246

श्रीः

# भैरवी

## कारकान्ता

शब्दशास्त्रपारावारीणश्रीभैरवभिश्रविरचिता
महामहोपाध्यायश्रीहरिदीक्षितविरचितलघुशब्दरत्नव्याख्या
चौखम्बासंस्कृतपुस्तकालयाध्यक्षानुज्ञया
सहस्रबुध्युपाव्हदामोदरशास्त्रिणा
संशोधिता
साच

## काश्यास्

व्रजवल्लभदासकम्पन्यभिधेयस्य
चौखम्बासंस्कृतपुस्तकालये
लभ्यते
मूल्यं रूप्यकत्रयम्

# Karakanta-Bhairavi

OR

COMMENTARY BY THE WELLKNOWN GRAMMARIAN

PANDIT BHAIRAVA MISRA

ON

LAGHU SHABDARATNA OF MAHAMAHOPADHYAYA

SRI HARI DIKSHITA.

REVISED BY PANDIT DAMODAR SHASTRI

*SAHASRABUDHAY.*

To be had from

MESSRS. BRAJA BALLABHA DASS & Co.,

Publishers, Book-Sellers & Proprietors

*"CHOWKHAMBA SANSKRIT BOOK DEPOT"*

BENARES CITY.

Printed at the Amar Press Benares.

First Edition 1000 Copies. ] 1896. [ Price per Copy Rupees 3-0 0

॥ श्रीगणेशाय नमः ॥

# भूमिका ।

सुप्रसिद्धमेवैतत्सङ्ख्यावतां यदद्यत्वे पाणिनीयमेव व्याकरणं पठनपाठनादिषूपयुज्यते । तत्रच प्रथमं श्रीमद्भट्टोजिदीक्षितविरचितान् सिद्धान्तकौमुद्यादिग्रन्थानधीत्य तत्रत्यसूक्ष्मविषयान् जिज्ञासमानानां छात्राणां हरिदीक्षितविरचितशब्दरत्नमेवावतिष्ठते ज्ञापकत्वेन । तच्च दुरवगाहतया नहि सर्वछात्रजनसाधारण्येन टीकां विना यथार्थं ज्ञायते । यद्यपि सन्त्यत्र बह्व्यष्टीकास्तथापि नास्ति शब्दशास्त्रधुरीणानां तत्रभवतां भैरवमिश्राणां टीकया समाना यथार्थज्ञापिका टीका सैव केवलं न कैश्चिदपि सीसकाक्षरैः संमुद्रापितेतिसलघुशब्दरत्नमनोरमाया एव केवलं पुस्तकंगृहीतृणामाधुनिकानां कार्यकालपक्षाश्रयिणां बहुधनव्ययासमर्थानांछात्राणा कारकान्तमेव शब्दरत्नग्रन्थं पठतामुपयोगायेति विचार्य व्रजवल्लभदासप्रभृतिभिरस्माभिः केवला कारकान्ता एव काशिकराजकीयप्रधानपाठशालायामुत्तीर्णमध्यमपरीक्षसहस्रबुद्धुचपाव्हदामोदरशास्त्रिद्वारा संशोधय्यालपमेव मूल्यं रूप्यकत्रयं संस्थाप्य अमरयन्त्रालये सीसकाक्षरैःसंमुद्राप्य प्राकाश्यं नीता तत् पश्यन्तु गुणैकपक्षपातिनस्सहृदयवराः सफलयन्तुच मदीयानायासानिलयहर्निशं संप्रार्थयन्ते ।

संवत् १९५३
आषाढ कृष्ण ९
भौमे ।

यौष्माककृपाभिलाषिणो
**व्रजवल्लभदासप्रभृतयः**
इति शम् ।

BALIJA KRUSHI SANKARA SASTR
RACHAKRISHNA SASTRIGAL
COIMBATORE - 641 004.
123
246

श्रीगणेशाय नमः ॥

# अथ शब्दरत्नव्याख्या भैरवी समारब्धा

ध्यात्वा देवम्परम्ब्रह्मजानकीपतिमव्ययम् विदुषां प्रीतिदां लघ्वीमुज्वीं रत्नप्रकाशिकाम् ॥ १ ॥ नत्वा तातञ्जगद्वन्द्यं भवदेवाभिधं गुरुम् सीताख्यां जननीञ्चकुर्वे भैरवो ऽगस्त्यसंभवः ॥ २ ॥ ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलं कुर्यादिति शिष्टसमाचारानुमितस्मृत्या प्रारिप्सितग्रन्थसमाप्तिप्रतिबन्धकविघ्नविनाशस्यावश्यकतया समुचितेष्टदेवतास्तुतिरूपम्मङ्गलमाचरन् शिष्यशिक्षायै निबध्नाति शेषविभूषणमिति विशिष्टं भूषणं विभूषणं शेषो विभूषणं यस्य तं शिवमित्यर्थः यद्वा शेषश्च विश्व शेषवी भूषयतस्ते भूषणे यस्य तं विष्णुम् शेषशायिनं गरुडवाहनमिति फलितोर्थः कस्मै प्रयोजनाय शेषाशेषार्थलाभाय शेषस्य यो ऽशेषोर्थस्तल्लाभाय आद्यपक्षे शेषयुक्तशिवस्तुत्या शिवस्य विशिष्टविभूषणयुक्तस्य हर्षावस्थापन्नस्य स्मरणे ऽभीप्सितार्थस्य सिद्धिर्भविष्यत्येवअन्त्ये शेषस्याशेषोर्थो महाभाष्यार्थस्तस्य यद्वा शेषश्चाशेषश्चेति द्वन्द्वगर्भस्तत्पुरुषः तेन महाभाष्यार्थगरुडपुराणोक्तार्थस्य लाभः अशेषशब्दे च विरोधार्थकनञ्तत्पुरुषो ऽसुरपदे यथा गरुपुराणोक्तो ऽर्थः सदसद्विवेकस्तस्य लाभः । प्रथमवाक्ये तामित्यस्याध्याहारः तं कम् यत्कृपादृष्टिः सकलमभीष्टम्फलन्दातुमीष्टे सर्वनाम्नामुत्सर्गतः प्रधानपरामर्शकत्वाद्यच्छब्दः शिवस्य विष्णोर्वा बोधकः ईष्टइत्यनेनेश्वरत्वस्य लाभः तथाचेश्वरस्य भूपतेः प्रसादेन तदाज्ञयैव लौकिकसकलार्थलाभो यथा दृश्यते लोके तथा शिवस्य विष्णोश्च कृपापूर्वकदृष्ट्या सकलार्थलाभो भवत्येवेति तदन्तर्गतत्वेन प्रारिप्सितग्रन्थस्य निर्विघ्नपरिसमाप्तिरपि भविष्यत्येवेति ध्वनितम् ॥ १ ॥

ननु ध्यायमिति यदि द्वितीयान्तन्तदा ऽभ्यासानुपपत्तिरत आह ध्यात्वाध्यात्वेति ध्यायशब्दो यदि घञन्तस्तदोक्तार्थलाभो ऽत आह णमुलन्तमिति एवञ्च क्त्वाणमुलोः समानार्थत्वेनोक्तार्थस्य लाभः सुकर एव

एतेन स्मारंस्मारमित्यपि व्याख्यात् कार्यब्रह्मणो हिरण्यगर्भस्यापि यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयन्तपस्तस्मादेतद्ब्रह्मनामरूपमन्नञ्च जायतइति श्रुत्या नपुंसकलिङ्गब्रह्मशब्दवाच्यत्वात्तद्व्याद्वृत्तये परमिति एवञ्च हिरण्यगर्भस्यापि जगदन्तःपातित्वेन तदुपादानत्वस्य तत्राभावात्तद्व्याद्वृत्तिरिति भावः नच हिरण्यगर्भस्य चेतनरूपत्वात्तस्य च नित्यं विज्ञानमानन्दम्ब्रह्मेति श्रुत्या नित्यत्वावगमेन कथङ्कार्यत्वमिति वाच्यम् अपञ्चीकृतसकलभूतसमष्टिसूक्ष्मशरीरोपहितो हिरण्यगर्भस्तदुपाधिभूततादृशशरीरस्य जन्यत्वाद्धिरण्यगर्भस्य जन्यत्वव्यवहारः अतएव हिरण्यगर्भः समवर्ततात्रे भूतस्य जातः पतिरेक आसीदिति श्रुतिः संगच्छते इदम् परमिति विशेषणम् ॥

ध्यैस्मृधात्वोस्तुल्यार्थकत्वस्य प्रसिद्धत्वादुभयोरुपादाने पौनरुक्त्यमत आह ध्यानमित्यादि व्यापाररूपामिति स्मृत्यनुकूलभावनाख्यसंस्काररूपामित्यर्थः तज्जन्यम् तादृशसंस्कारजन्यस्मरणरूपम् ननु गुरुशब्दार्थस्य पूज्यत्वेन गुरवः समागता इत्यादौ बहुवचनवदत्रापि बहुवचनेनैवोपादानमुचितमत आह गुरोरित्येकेति एतेनैकस्मात्सर्वविद्यालाभस्तस्य सर्वविद्याश्रयतां विना नोपपद्यत इति तस्यैकस्य सर्वविद्याकुशलत्वे लब्धे ऽधिकपूज्यत्वस्येश्वर इव सर्वोत्कृष्टस्य लाभ इति ध्वनितम् प्रौढानाम्मनांसि प्रौढमनांसि रमयति या सा प्रौढमनोरमा इत्यर्थश्चेत्तदा कर्मण्यणित्यण् प्रत्यये टिड्ढेति ङीप् स्यादत आह प्रौढानामित्यादिना एवञ्चैवंविधस्तस्य फलितोर्थो विग्रहस्तु गङ्गाधर इत्यत्रेव रमयतेः पचादित्वस्य मूलविभूजादित्वस्य वा कल्पनेन रमयतीति रमा प्रौढमनसां रमेति कार्य इति सूचितामिति केचित् वस्तुतस्तु यदि रमयतेः पचादित्वादि कल्प्यते तदा प्राप्तस्यापि कर्मण्यणित्यस्य पचादिभ्योजित्यादिना बाधे ङीबभावः सुकर एवेति । प्रौढमनांसि रमयतीत्येव विग्रह इति बोध्यम् प्रकृतोपयोगिप्रौढपदार्थतावच्छेदकमाह प्रौढत्वमिति एतेन महाभाष्यगूढार्थज्ञानमितरसकलदर्शनार्थज्ञाने सत्येवेति सूचितम् भाष्यकृतां विचारसमये सकलदर्शनार्थस्य तत्र तत्र ध्वननादतएव गूढत्वविशेषणं सङ्गच्छते एवंविधप्रौढत्वोपपादनेन तादृशज्ञानवतामेव निर्दुष्टत्वज्ञानेनेयम्मनोरमा रमयति नान्येषामित्युक्तम्भवति ॥

हयवरडित्यत्र यः प्रथमो हकारस्तत्प्रयोजनावसरे प्रत्याहारचतुष्टय एव प्रयोजनमुपात्तन्तत्र न्यूनत्वमाशंक्य निराचष्टे नन्वित्यादिना अम् ग्रहणे

ऽपीति अम् गृह्यते यस्मिंस्तस्मिन्पुमः खय्यम् पर इति सूत्रे ग्रहणादिति निमित्तत्वेन ग्रहणस्यापेक्षणीयत्वादित्यर्थः एतत्प्रयोजनमाह फलन्त्विति क्लृप्तप्रयोजनाभावसूचनाय तुशब्दः बह्विति अत्र बहवः पुमांसो यस्येति बहुव्रीहौ शेषाद्विभाषेत्यत्र विभाषाग्रहणादुरःप्रभृतिष्वेकवचनान्तस्य पुमस्शब्दस्य पाठान्न कप् सकारस्य तु संयोगान्तलोपः कृह इति प्रत्येकमनुकरणद्वयम् ॥ ननु प्रत्येकानुकरणे ऽनुकार्येणार्थेन ककारहकारयोरर्थवत्वात्प्रातिपदिकत्वेन सुबुत्पत्तौ हल्ङ्यादिलोपे प्रत्येकम्पदत्वाज्जश्त्वचर्त्वयोः कृतयोर्न रुत्वस्य प्राप्तिरत आह गवित्यत्रमाहेत्यादीति इत्यादाविवेत्यनेन तत्र वा भेदविवक्षा सूचिता बहुपुमित्यत्र तु सान्तप्रातिपदिकानुकरणम्भेदविवक्षा च अतएव सकारस्य संयोगान्तलोपः ककारादेरित्यादिना दकारपरिग्रहः जश्त्वमित्युपलक्षणञ्चर्त्वस्यापि सुट्तिथोरिति आदिपदग्रहेण झषस्तथोरित्यस्यात्रत्याकारस्य च परिग्रहः शास्त्रबोधितेत्यादि अचा अव्यवहितो ऽजव्यवहितः अजव्यवहितश्चासौ हल्समुदायश्चाजव्यवहितहल्समुदायः शास्त्रेणाबोधितो यो ऽजव्यवहितहल्समुदायस्तस्यासाधुत्वमित्यर्थः शास्त्रबोधितत्वञ्च शास्त्रबोधितभिन्नत्वम् ननु राज्ञ इत्यादौ शास्त्रबोधितत्वं लोपस्य नतु अव्यवहितत्वस्येति प्रतियोग्यप्रसिद्धिरिति चेन्न शास्त्रजन्यज्ञानप्रयोज्यसाधुत्वप्रतिपत्तिकभिन्नत्वस्य विवक्षितत्वात् साधुत्वस्य व्याकरणव्यङ्ग्यजातिविशेषरूपत्वात्तत्प्रतिपत्तेः शास्त्रजन्यज्ञानप्रयोज्यत्वमक्षतमेव बोधनादिति एवञ्चैतादृशस्यापभ्रष्टवदसाधुत्वेन शास्त्रप्रवृत्तियोग्यता तेषु नास्तीत्याशयेनाम् प्रत्याहारे हकारस्य ग्रहणरूपम्प्रयोजनन्नोपन्यस्तमिति भावः इदञ्च तस्य समुदायस्य सत्वाभिप्रायेण वस्तुतस्तु सत्वमेव नेत्याह अतएवेति तादृशसमुदायस्य सत्वसाधुत्वयोरभावादेव उच्चारणमपीति एकस्याप्युच्चारणसम्भवेन तादृशसमुदायस्य सुतरान्तदसम्भवेन तयोर्लाभः यत्विदम्भाष्याङ्गिम्मणिमन्त्रन्यायेन तादृशोच्चारणे प्रातिबन्धकमुत तादृशसमुदायस्यासाधुत्वतात्पर्यकम् आद्ये संयोगसंज्ञाविधायकशास्त्रस्य संज्ञयप्रसिद्ध्यानर्थकत्वापत्तिः लोपश्चेति द्विशकारको निर्देश इति भाष्यस्य चासङ्गतिः नान्त्यः एतद्भाष्यघटकोच्चारणशब्दस्यासाधुत्वाबोधकत्वादिति तन्न वाच्यवृत्त्या साधुत्वाबोधकत्वेपि लक्षणया तदर्थबोधकत्वसम्भवात् नन्वेवं शास्त्रबोधिताजव्यवहितहल्समुदायस्यासाधुत्वे

स्कोरित्यादौ सकारककारयोस्तादृशसमुदायस्याप्यसाधुत्वापत्तिरत आह स्कोरिति आदिना व्योरित्यस्य सङ्ग्रहः सौत्र इति एवञ्च शास्त्रबोधितत्वमेवात्रेति भावः अतएव तादृशहल्समुदायस्यासाधुत्वादेव हकारप्रयोजनम् हकारग्रहणप्रयोजनम् तदुदाहरणम् शश्छोटीत्यस्योदाहरणम् ॥ हकारपरेत्यत्र बहुव्रीहिः असम्भवश्चोक्तरीत्या बोध्यः उक्तार्थे कैयटोक्तिरपि साधिकेत्याह हकारपरेति इतिचेति चकारो वाक्यालङ्कारे ननु मूले प्रथमहकारस्याशग्रहणेन ग्रहणरूपम्प्रयोजनमुक्तन्तन्न सङ्गच्छते भोभगोइति सूत्रे ऽश्ग्रहणेन यद्यपि देवाः सन्ति छन्दःसु पयःस्वित्यादौ यथाश्रुतप्राचीनरीत्या लोपो वार्यते इति सम्भवति तथापि वक्ष्यमाणसिद्धान्तरीत्या ऽत्राशग्रहणस्य न प्रयोजनम् न च वृक्षव् करोतीत्यस्य साधुत्वाय हलिसर्वेषामिति सूत्रे ऽशग्रहणानुवृत्त्यर्थमशग्रहणमस्त्विति वाच्यम् तादृशप्रयोगाणामनभिधानात् अन्यथा ऽशित्यस्य तत्र सम्बन्धेपि वृक्षव् हसतीत्यत्र लोपापत्तिर्दुर्वारैव अतएव न पदान्ताः परेणः संतीति लण्सूत्रस्थभाष्यसङ्गतिः अतएव भाष्ये ऽशग्रहणेन हकारस्य ग्रहणमिति नोक्तमिति चेन्न प्रथमहकारस्यादृहशग्रहणेन ग्रहणरूपप्रयोजनकथनपरभाष्यस्योपलक्षणत्वात् अतएवेण्ग्रहणेन ग्रहणस्य लिलिहिद्व इति प्रयोजनम्भाष्यानुक्तमपि मूले उपात्तम् अतएव भाष्यकृता द्वितीयहकारस्य प्रयोजनकथनावसरे विशिष्य तस्य प्रयोजनमुक्त्वा यदि किञ्चिदन्यत्राप्युपदेशे प्रयोजनमस्ति तत्राप्युपदेशः कर्त्तव्य इत्युक्तमित्याहुः वस्तुतो मूलोक्तम् प्राचामनुरोधेन । यदि किञ्चिदित्यादिनासंदिग्धार्थकथनानन्तरमुदाहरणाप्रदर्शनेन प्रयोजनान्तराभाव एवानुमीयते कैयटेनापि तस्य प्रयोजनत्वोपन्यस्तमेवञ्च भाष्याविरुद्धप्रयोजनमेवोचितमित्याशयेनाह द्विर्गति द्वितीयहकाराभावे लकारस्याप्यसत्वमित्याशयेनाह इदं सूत्रमिति लकारसाध्यप्रयोजनानामन्यथासिद्धिमाह बलादीति आदिना हलादिसङ्ग्रहः रेफेण सकारोत्तरवृत्तिरेफेण ननु हलिति सूत्रसत्वे हल्ङ्यमित्यस्यावृत्त्या वक्ष्यमाणरीत्यान्योन्याश्रयपरिहारो भवति अधुना कथमतआह अन्योन्याश्रयेति रंत्यं हारीति न्यासेनेति अत्र वाक्यद्वयम् रंत्यमित्येकम् हारीति द्वितीयम् द्वितीयेप्यंत्यपदस्य सम्बंधः ॥ अतएव मध्येपाठः र इति पृथक् पदम् अंत्यं र इति स्वरूपमित् अंत्यो हर्वा इत् न्यासभेदे गौरवमित्याशयेनाह आवृत्त्येति हरंत्यमित्यस्यावृत्त्येत्यर्थः तत्र प्रथमस्यार्थमाह हर्मत्याहार-

बोधकेति इदं स्वरूपकथनम् हकाररेफबोधकस्य हर् शब्दस्य स्वघटितत्व-सम्बन्धेन हकारादिरेफान्तसूत्रसमुदाये लक्षणा नातो दुर्ग्रहत्वन्दोषः द्वितीयस्य तु अन्त्यो हर् हर्मित्याहारबोध्य इदित्यर्थएव नन्विदं सूत्रमित्यादिना यत्प्रयोजनम्मूले ऽभिहितन्तद्द्वितीयहकारमात्रस्यैव तथाच स हकारस्सकारानन्तरम्पाठ्यस्तत्सूत्रन्तु नारब्धव्यमत आह शषसेति विसर्गापत्तेरिति नच प्रेष्यब्रुवोर्हविष इत्यत्र हे परे विसर्गादर्शनेन हकारे परे विसर्गो नेति वाच्यम् सुगण् हसति प्रत्यङ् हसतीत्यत्र ङ्णोः कुक्टुगित्यस्यापत्तेः अस्यापि एङ् ह्रस्वात्सम्बुद्धेरिति ज्ञापकाद्धकारे परे ङ्मुट् नेति कल्पनया वारणम्भविष्यतीति चेदनेकस्य ज्ञाप्यस्य वचनस्य कल्पनापेक्षया ह्रस्य परत्र पाठे एव लाघवमिति ज्ञापकानां सौत्रत्वेनोपपत्तौ ज्ञापकत्वे मानाभावाच्च ननु सप्तमीति योगविभागात्समास इत्यनुपपन्नमधिकरणकारकस्य क्रियायामेवान्वयेनान्त्यपदार्थेनासामथ्यर्दित आह अधिकरणेति आदिना कर्मपरिग्रहः यद्द्वारा यस्य क्रियाजनकत्वन्तद्द्वारा क्रियान्वयस्यौचित्यादिति भावः अस्य योगविभागस्य सप्तमीति योगविभागस्य अगतिकगतिकत्वादिति अगतिकप्रयोगसाधकत्वादित्यर्थः विग्रहः हलः अन्त्यमिति विग्रहः हलिति सूत्रस्थेति कथनन्तु फलितार्थसूचनाय ननु षष्ठी स्थाने योगेति परिभाषया हलः स्थाने योन्त्यः स इदित्येव सूत्रार्थः किन्न स्यादुदाहरणञ्चैतस्य ङे प्रथमयोरमित्यनेन सुस्थाने जातो ऽम् भविष्यतीत्यत आह षष्ठी स्थान इत्यादि गोह इत्यादाविवेति तत्र यथोपधापदसन्निधानेनावयवार्थकत्वं षष्ठ्या निर्णीतमिति षष्ठी स्थान इति परिभाषाया अप्रवृत्तिस्तथात्रान्त्यपदसन्निधानेन तदप्रवृत्तिरिति भावः इति न्यायेनेति गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यादिति न्यायेनेत्यर्थः अत्र गुणानाम्परार्थत्वात्समत्वादसम्बन्ध इत्यन्वयः संज्ञासूत्रस्य परिभाषायाश्च विध्युपकारकत्वेन गुणत्वात्तयोः समत्वमस्यतः परस्परमनयोरुपकार्योपकारकभावो न भवतीति भावः ॥

हलन्त्यमिति संपूर्णसूत्रावृत्त्यपेक्षयैकदेशस्यैवावृत्तिरस्विति शङ्कते मूले स्यादेतादित्यादिना एकस्य शब्दस्यानेकार्थपरत्वे तत्रव्यवहारः यथा ऽक्षान्पश्येत्यत्राक्षशब्दो देवनाक्षरथाक्षविभीतकाक्षस्य बोधकस्तथात्रापि हल्शब्द उभयपरोस्तु सकृदुच्चरितः शब्दः सकृदर्थङ्गमयतीति न्यायस्य गङ्गायाम्मीनघोषौ स्त इत्यादौ व्यभिचारस्य दर्शनादनाश्रयणमिति भावः इदमेकशेषस्य प्रत्याख्यानपक्षे ।

शास्त्रीयप्रयोगनिर्वाहार्थन्तदारम्भे त्वाह एकशेषेति यत्र सकृदुच्चारितस्यैकस्यशब्दस्य समानानेकार्थपरता तत्र श्रुतस्यैकस्य शक्त्या लक्षणया वानेकार्थबोधकत्वसम्भवः यत्र तु विरुद्धानेकार्थबोधकता तत्रैकानुसन्धानेनानेकार्थबोधकत्वासम्भवः यथा पुण्यजनाश्रयोयन्देश इत्यादौ अत्र हि पुण्याश्रयो जन इत्यर्थविवक्षायान्तात्पर्यग्राहकसत्वे धार्मिकबोधकत्वेन चरितार्थस्यार्थान्तराबोधकत्वम् यदातु रूढ्या यातुधानस्य बोधो जायतामिति तात्पर्यन्तत्र सामग्रीसत्वे यातुधानबोधकत्वन्न तदा धार्मिकबोधकत्वमिति तादृशस्थले आवृत्तिं विना नानेकार्थप्रतीतिरिति प्रकृते हलशब्दस्य विरुद्धार्थकतया तन्त्रानिर्देशस्यावृत्तेश्च समानफलकत्वाभावेनान्यतमशब्दप्रयोगानुपपत्तिरित्याशयेन शङ्कते यद्यपीति ईदृशे विषये विरुद्धानेकार्थविषये व्यवस्थितैव एवकारेणैच्छिक्याव्यावृत्तिः साच व्यवस्था वक्तृश्रोत्रन्यतरपरत्वेन कल्पनीया वक्तुस्तन्त्रेणैकशेषेण वोच्चारणम् बोद्धुस्तूभयत्राप्यावृत्तिरेवेति एवञ्च तन्त्रावृत्तौ वा एकशेषावृतौ इति बोध्यम् न दोष इति वक्त्रभिप्रायेण त्रितययोजने यो ऽनुभवविरोधरूपो दोषः स नेत्यर्थः नन्वेकशेषस्य प्रत्याख्यानादन्यतमशब्दानुपपत्तिरित्यत आह । एकशेषश्चेति प्रत्याख्यात इति लौकिकशब्दसाधकत्वेन भाष्यकृता निराकृत इत्यर्थः प्रत्याख्यानञ्च सहविवक्षायां सजातीयानेकशब्दानान्द्वन्द्वादर्शनेन तन्त्रेणैकेनैव शब्देनानेकार्थस्य बोधसम्भवे तदर्थमेकशेषो नारब्धव्य इति रीत्या कृतः नच शास्त्रीयप्रयोगसाधकत्वेन तस्यावश्यकत्वेन प्रत्याख्यात इत्यसङ्गतमिति वाच्यम् लौकिकप्रयोगासाधकत्वेनैतदर्थमनावश्यक इति तदर्थात् नन्वेवम्पाणिनेः सूत्रकरणसङ्गतिरत आह असहविवक्षायामिति तदेतदुक्तं सर्वादिसूत्रभाष्ये तत्र हि संज्ञोपसर्जनव्यावृत्तिसमये सर्वादीनीति सूत्रेण सर्वनामसंज्ञा क्रियते पाठश्च विशेष्यते कथम्पुनरेकेन यत्नेन नोभयं लभ्यम् लभ्यमित्याह एकशेषनिर्देशात्सिद्धमिति इत्याशयेनेति भाष्यकृत इतिशेषः पृथगुक्तइति मूले दीक्षितैरिति शेषः असहविवक्षा च प्रकृतसूत्रेप्युक्तरीत्या अस्त्येव ननु सामीप्यं षष्ठ्यर्थ इत्यनुपपन्नम् षष्ठी स्थान इति परिभाषायाः सत्वादत आह षष्ठी स्थान इत्यस्येति ननु हस्थानिकलकाराभावात्परिभाषायाः कथम्प्रवृत्तिः नचोपानल्लुनातीत्यस्त्येवेतिवाच्यम् उपदेशे ऽतथात्वादिति

चेन्न लक्ष्याभावेन परिभाषाया अप्रवृत्तिकल्पनापेक्षया न्यायेन तदप्रवृत्तिकल्पनं युक्तामित्याशयात् ॥ गुणालाञ्चेति न्यायस्य व्यभिचारमाशङ्क्य निराचष्टे नचेत्यादिना तच्छेषशब्देन तस्य शेषस्य शेषो यस्येति वेत्यर्थकतच्छेषशब्देन परिभाषयोः अलोन्त्यस्येकोगुणवृद्धी इत्यनयोः परिभाषयोः लक्ष्यसंस्कारकेति एतेन तेषां स्वस्वप्रदेशेपि वाक्यार्थबोधजनकत्वमस्त्येवेति ध्वनितम् गुणगुणिभावेन अङ्गाङ्गिभावेन परस्परापेक्षत्वेन परस्परनिमित्तनिमित्तीभावेन यथा चक्षिङः ख्याञित्यादेः षष्ठी स्थान इति सूत्रपरामर्शं विना वाक्यार्थबोधजनकत्वन्नास्तीति तयोः परस्परनिमित्तनिमित्तीभावस्तथात्र नास्तीतिभावः विशेष्यविशेषणभावमात्रेण तच्छेषत्वकल्पनमपि न युक्तामित्याह एतन्मूलकतया उक्तन्यायमूलकत्वात् तत्पक्षासम्भवस्य परिभाषयोरेव तच्छेषत्वमिति पक्षासम्भवस्य प्रतीतिवदिति यथा तत्र स्वस्वामिभावप्रतीतिर्भवति तथा ऽनन्तरादिशब्दप्रयोगं विना सामीप्यन्न प्रतीयत इति वैपरीत्ये दृष्टान्तः षष्ठ्यर्थत्वाभावादिति तथाच सामीप्यस्य षष्ठ्यर्थत्वाभावे तस्मिन्नर्थे समासोपि नोपपद्यत इति भावः ननु वृत्त्या तस्यार्थस्य प्रतीत्यर्थं वाक्ये ते शब्दा उपादेया अत आह तत्प्रयोग इति लेखकप्रमादादिति अत्राहुः प्रमादाभिधानमनवधानेन तथाहि चित्रशब्दगोशब्दयोः कर्मधारयसमासे गोरतद्धितलुकीति टच् अयमुत्तरपदस्यावयवो डातिनात्रैकाजुत्तरपदकसमासत्वम् समासान्तस्योत्तरपदावयवत्वादेव द्विपुरीत्यादावनन्तोत्तरपदकद्विगुत्वसत्वात्स्त्रीत्वमिति ङीप्सिद्धिः उपशरदमित्यत्राव्ययीभावस्यादन्तत्वन्त्वयवावयवस्य समुदायावयवत्वेनास्तीति नाव्ययीभावस्येति सूत्रप्रवृत्तिरिति तन्न समासान्ता इत्यत्र यत्समासपदन्तस्य समासार्थवाक्यलक्षणया ऽलौकिके प्रक्रियावाक्ये सुवन्तसमुदायात्समासान्तस्य प्रवृत्तिरित्यस्य सिद्धान्तस्य वक्ष्यमाणतया टचः समुदायावयवत्वेनैकाजुत्तरपदकसमासत्वमन्येवेत्याशयात् द्विपुरीत्यादौ समुदायस्य स्त्रीत्वन्तु लिङ्गमाशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति समासान्ता इति सूत्रभाष्योक्तया लिङ्गानुशासनस्य लोकसिद्धलिङ्गानुवादकत्वेन प्रकृते लोकादेव सिद्धम् अतएव परवल्लिङ्गमिति सूत्रसत्वेपि द्विनावमर्द्धखारमित्यत्र नपुंसकत्वस्य सिद्धिः समासान्तानां समुदायावयवत्वादेवाकारान्तोत्तरपदो द्विगुः स्त्रियामिष्ट इत्यत्रोत्तरपदग्रहण-

ङ्चारितार्थम् यत्तु टचः समुदायावयवत्वेपि कुमतिचेति सूत्रे उत्तरपदेन समासस्याक्षेपे विभक्त्या च प्रकृतेरिति प्रत्यासत्त्योभयोरेकत्वाश्रयेणैकाजुत्तरपदकसमासरूपप्रकृतिकविभक्तेर्ग्रहणमिति नात्र णत्वस्य प्राप्तिः विभक्तिप्रकृतित्वं ङीवन्तस्य समासत्वन्तु टजन्तस्येति भेदादिति तन्न स्त्रीप्रत्ययरहिते दृष्टानाम्प्रातिपदिकतद्व्याप्यधर्माणां लिङ्गबोधकप्रत्ययविशिष्टे ऽतिदेशेन प्रातिपदिकग्रहण इति परिभाषाया ङीवन्ते सुप्प्रकृतौ समासत्वस्य प्रातिपदिकत्वव्याप्यसत्वेनोभयोर्भेदाभावात् आक्षिप्तस्यार्थस्य शाब्दबोधे भाने मानाभावाच्च नचैवं सति कुमतिचेति सूत्रभाष्ये माषकुंभवापेनेत्यत्र षष्ठीतत्पुरुषोत्तरपदकसमासे नित्यणत्वेन न भवितव्यम् षष्ठीतत्पुरुषेतु प्रातिपदिकान्तेति विकल्पेन भवितव्यमिति प्रतिपादितं तच्च प्रत्यासत्त्याश्रयणएव सङ्गच्छते अन्यथा वैकल्पिकणत्वापवादस्य कुमतिचेत्यस्योभयथापि प्राप्तिरिति तदसङ्गतिः स्पष्टैवेति वाच्यम् एतस्य भाष्यस्य यथाकथञ्चिदत्र णत्वस्य प्राप्तिरित्यत्र तात्पर्यात् णत्वन्तु तत्र पदव्यवायेपीति निषेधान्न भवत्येव किञ्च पूर्वोक्तप्रत्यासत्त्याश्रयणे बहुचतुरङ्गेणेत्यत्र विभाषा सुपो बहुच्पुरस्तादिति बहुचि विभक्तिप्रकृतित्वम्बहुच्विशिष्टस्यैकाजुत्तरपदकसमासत्वञ्चतुरङ्गशब्दस्येति भेदाण्णत्वन्न स्यात् नन्वेवमप्यन्तर्वर्तिविभक्त्या गोशब्दस्य पदत्वात्पदव्यवायेपीति निषेधः स्यात् उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधस्तु वक्तुमशक्यः अपदादिविधा विति पर्युदासबलेन पदान्तविधावेव तस्य निषेधस्य प्रवृत्यङ्गीकारादिति चेन्न अतद्धितइति वक्तव्यामिति वार्तिकैकवाक्यतया णत्वाश्रयातिरिक्तो यस्तद्धितभिन्नस्तत्परकपदव्यवाये निषेधस्य प्रवृत्यङ्गीकारात् अतएव रम्यविणा आर्द्रगोमयेण चतुर्बहुवङ्गेणेन्यत्र णत्वस्य सिद्धिः आद्ये आङो ना भावे पूर्वस्य विशब्दस्य पदत्वमस्त्येवेति तद्धितभिन्ने तस्मिन्परे सति निषेधाभावाय णत्वाश्रयातिरिक्तेति द्वितीये मयटो णत्वाश्रयातिरिक्तत्वात्तस्मिन्परे यत्पदङ्गोशब्दस्तेन व्यवधानेपि णत्वसिद्धये तद्धितभिन्नेति तृतीये बहुचो णत्वाश्रयातिरिक्तो यस्तद्धितभिन्नो ऽङ्गशब्दस्तत्परत्वाद्येन व्यवधानेपि णत्वसिद्धये पदेति एवञ्च चित्रगवीणामित्यत्र गोशब्दस्य णत्वाश्रयातिरिक्ततद्धितभिन्नपरत्वाभावाण्णत्वम्भवत्येव नन्वेवमपि कुमतिचेति णत्वमित्यनुपपन्नमस्यासिद्धत्वादेकाजुत्तरपदेण इत्यस्य प्राप्तेः कुमतिचेति

सूत्रस्यैकाजुत्तरपदे ण इति सूत्रापवादत्वन्तु वक्तुमशक्यम् चतुरङ्गेण माषकुम्भाणामित्यत्रैकाजुत्तरपदकत्वाभावेपि कवर्गवदुत्तरपदकत्वस्य सत्वात्तस्य प्राप्तोरिति येन नाप्राप्तिन्यायस्य विषयाभावादितिचेन्न असिद्धत्वस्य कार्यार्थतया यत्र फले विशेषस्तत्रैव तत्प्रवृत्तेः स्वीकारात् किञ्च प्रतिपदविधित्वेन कुमतिचेति सूत्रस्य प्रवृतिर्न्याय्या प्रतिपदविधित्वन्निरवकाशत्वएव बाधप्रयोजकमिति तु न भ्रमितव्यम् अपरशाल इत्यत्र दक्षिणपूर्वेत्यत्र चरितार्थस्यापि सर्वनाम्नो वृत्तिमात्र इत्यस्य भाष्यकृता प्रत्ययलोपसूत्रे प्रवृत्त्यङ्गीकारात् यदि निरवकाशत्वे एवेति नियमस्तर्हि स्त्रियाः पुंवदित्यस्य सूत्रस्यैव प्रवृत्तिर्वक्तव्या नतु स्वीयेष्टेरिति शीघ्रोपस्थितिकत्वेन प्रतिपदविधित्वम्पूर्वप्रवृत्तौ नियामकं भवत्येव ॥ प्रकरणात्तस्थेति त्यदादीनीतिसूत्रस्थेत्यर्थः । मूले अनन्तरादिष्विति आनन्तर्यादिष्वित्यर्थः ननु यद्यानन्तर्यन्न षष्ठ्यर्थस्तदा ऽस्तेर्भूरिति सूत्रे षष्ठीमात्रोच्चारणे सन्देहप्रतिपादनपरमन्तेरनन्तरे समीपे वेति भाष्यमनुपपन्नमत आह अन्तेरनन्तर इत्यादि तच्चिरूपितेति आनन्तर्यनिरूपितो यः सम्बन्धो निरूपकत्वाश्रयत्वान्यतररूपस्तदर्थिका अध्याहारेणैव भाष्ययोजना कार्येत्यत्र दृष्टान्तमाह स्थानपदेति नच स्थानपदं षष्ठ्यर्थ एवेति एतत्प्रतिपत्तये ऽध्याहारो नावश्यक इति वाच्यम् स्थानेन योगो यस्या इति व्यधिकरणपदकबहुव्रीहिप्रदर्शनपरभाष्यात्स्थानरूपः सम्बन्धो न षष्ठ्यर्थो ऽन्यथा स्थानं योगो यस्या इत्येव वदेदित्याशयात् निपातनात्साधुत्वमितितूभयथा वक्तव्यमेव एवञ्च स्थानानिरूपितो यः सम्बन्धो निवर्त्यनिवर्तकभावः स एव षष्ठ्यर्थः कैयटेनापि स्थाननिमित्तसम्बन्ध इति वदता स्थानरूपः सम्बन्धो न षष्ठ्यर्थ इति ध्वनितमेव नन्वस्य दृष्टान्तपरतया योजनायां वा शब्दप्रयोगासङ्गतिरिति वाच्यम् अत्रत्यवाशब्दस्येवार्थकत्वात् ववायथातथासाम्य इत्यमरात् एवञ्च षष्ठी स्थान इति सूत्रपर्यालोचनात्प्राग्वाक्यार्थपर्यवसानायाध्याहारो ऽवश्यङ्कार्य एवेति ध्वनितम् इत्यभिप्रायकमिति नतु सामीप्यादिः सम्बन्ध एव षष्ठ्यर्थ इत्यभिप्रायकमिति शेषः यद्यपि षष्ठ्यर्थसम्बन्धा बहवस्तथापि निर्णयाय षष्ठी स्थान इति सूत्रम् उक्तार्थे भाष्यान्तरमपि साधकमित्याह अन्तएवेति सामीप्यस्य षष्ठ्यर्थत्वाभावादेवेत्यर्थः अस्त्यर्थवादिति यथा वर्तमानकालावच्छिन्नाऽस्त्यर्थस्य सौत्रास्तिपदप्रतिपाद्यस्य

षष्ठ्यर्थत्वाभावेन प्रकृत्यर्थोपाधित्वन्तथेत्यर्थः अत्रोपाधिशब्दो विशेषणपरः प्रकृत्यर्थस्य गोपदार्थस्य विशेषणम् नच वर्तमानकालावच्छिन्नाऽस्त्यर्थस्य प्रकृत्यर्थविशेषणत्वे गोमानासीदित्यादावनन्वय इति वाच्यम् तादृशव्यवहारविषये गोमानित्यत्र लक्षणाया अङ्गीकरात् तत्र गावो ऽस्य सन्त्यनन्तरा इत्यत्र षष्ठ्यर्थत्वेत्यिति आनन्तर्यस्येत्यादिः अनन्तरा इति बहुवचनान्तोपादानेन प्रकृत्यर्थविशेषणत्वं स्पष्टमेव एवञ्च सापेक्षमसमर्थवादिति न्यायेन तत्रासामर्थ्यम् उपसंहरति तस्मादिति यत्र गुरुपुत्रो देवदत्तस्य, किञ्चित् इत्यत्र आनन्तर्यादिप्रतीतिः आनन्तर्यनिरूपितसम्बन्धप्रतीतिः उक्तार्थे प्रमाणान्तरमपि दर्शयितुमनन्तरादिष्विति ग्रन्थमवतारयति तत्रेत्यादि तत्र मतुब्विधायकसूत्रे यथा बहुव्रीहिसमासे वर्त्तमानकालावच्छिन्नाऽस्त्यर्थान्तर्भावस्तथा शब्दशक्तिस्वभावान्मतुबन्तादपि भविष्यतीति नैतत्प्रयोजनमिति भावः नन्वनर्थकमेवास्तित्वत्यत आह अन्यार्थकत्वे वेति सूत्रकारस्याज्ञानकल्पनापेक्षया ऽन्यफलकत्वकल्पनमेव वरमिति भावः अन्यत्फलम् अस्तिमानिति अत्र हि सत्ताकर्तृधनवाचको ऽस्तिशब्दो ऽव्ययत्वास्तिसामानाधिकरण्याभावान्मतुप्प्रत्ययो न प्राप्तस्तदर्थमेतदास्तिग्रहणमिति भावः सूत्रानुपात्तेति यथा शब्दशक्तिस्वाभाव्यान्मत्वर्थीयो बहुव्रीहिश्च भवति तथेति वैपरीत्ये दृष्टान्तः तथाभूतेति सूत्रानुपात्तेत्यर्थः उक्तार्थे प्रमाणान्तरमप्याह अनन्तरादेरिति तदुक्तम् । तदेतत्सर्वम्मनसि निधायोक्तम् नन्वेवमनन्तरशब्देन षष्ठीतत्पुरुषोपि न स्यादत आह अनन्तरादिशब्दैरिति असामर्थ्यस्य वृत्त्यभावप्रयोजकस्य तत्राभावादितिभावः नन्वेवङ्ग्रामकूप इत्यादि व्यवहारस्य कथमुपपत्तिरत आह ग्रामकूप इत्यादि यदा ग्रामशब्दः शालासमुदाये वर्तते तदाप्ययं व्यवहार एवमेवोपपाद्यः आनन्तर्यस्य षष्ठ्यर्थत्वमभ्युपेत्याह किञ्चेति आपत्तिरिति नन्वियमापत्तिर्हलन्त्यमिति सूत्रावृत्तावपि समानेवेति वाच्यम् धात्ववयवलकारस्योपदेशे ऽन्त्यत्वाभावादिति भावः इत्वापत्तिरिति तथाच लोपः स्यादिति भावः अतएव लोपश्च बलवत्तर इति भाष्ये उक्तम् अणादिसंज्ञाशब्देषु लोपस्तु न ॥

आदिरन्त्येनेति सूत्रारम्भसामर्थ्यात् अन्त्येनेत्यस्येदन्त्यसदृशेनेत्यर्थस्य वक्ष्यमाणत्वाच्च नचेत्संज्ञाया लोपातिरिक्तमपि फलमनुबन्धा अनेकान्ता इति पक्षे अभ्रआंअटित इत्यत्रेट्प्रतिषेधरूपन्दृष्टामिति वाच्यम् अनुब-

न्यानामेकान्तत्वपक्षस्यैव स्थापयिष्यमाणत्वात् लोपस्य फलत्वेपि तदतिरिक्तंफलन्नास्तीति शङ्कान्निराकुरुते नचेत्यादिना फलाभावः लोपातिरिक्तफलाभावः समाधते देवदत्तेति हलिति क्विबंतम् देवदत्तेति सम्बोधनम् अस्तीति शेषः लित्वसामर्थ्यादिति व्यञ्जनस्य या इत्संज्ञा तस्या लोप एव फलमिति तु न तथात्वे व्यञ्जनानुच्चारणस्यैव सुकरत्वात् किन्तु फलान्तरमपि तच्च फलं लितीत्येतत्प्रवृत्तिरूपमेव लकारस्थले स्वीकार्यम् एवञ्च प्रकृतोदाहरणे प्रत्ययात्पूर्वत्वाभावान्न प्राप्नोतीति तत्सामर्थ्याद्भवतीति भावः ननु हलसीरादिति निर्देशेन लकारस्य लोपाभावे इत्वमपि न भविष्यति प्रतियोगितासम्बन्धेन लोपस्येत्वव्यापकतया व्यापकाभावे व्याप्याभावस्य न्याय्यत्वादित्याशयेन शङ्कते यद्यपीति लघीयसीति कण्ठताल्वादिव्यापारगौरवापेक्षया मनोव्यापारगौरवमधिकमिति भावः ॥ मूलोक्तम् ॥ संपूर्णसूत्रावृत्तिरूपम् ननु कर्मवत्कर्मणेति सूत्रे व्यत्ययो बहुलम् लिङ्याशिष्यङिति संहितापाठे न द्विलकारको निर्देशः एकस्य लकारस्य संयोगान्तलोप इति प्रतिपादितमन्यत्र तदुपपत्तये संयोगान्तस्येति सूत्रे सम्बध्यमानमपि झल्ग्रहणं वाक्यभेदेन सम्बध्यते तेन क्वचिदझलोपि लोपो भविष्यति अत एवामोमशिति सूत्रस्थशकारप्रत्याख्यानपरभाष्यस्याप्युपपत्तिः तत्र हि शकाराभावे मकारस्य मकारादेशे प्रयोजनन्नास्तीति सर्वादेशो भविष्यतीति दूषणे दत्ते मकारस्य मकारादेशो नुस्वारबाधनार्थो भविष्यतीति दूषणे परेण दत्ते एवन्तर्हि द्विमकारको निर्देशः करिष्यते इत्युक्तम् अत्र द्विमकारकइति प्रतीकमुपादायैकस्य मकारस्य संयोगान्तलोपः करिष्यत इति कैयटेनोक्तम् एवञ्च न लकारस्य संयोगान्तलोपानुपपत्तिरित्यत आह मूले किञ्चेति अयं यत्र इति हल् चल्चेति द्वन्द्वकल्पनारूपो यत्र इत्यर्थः अन्वाञ्चावस्थायाम् हल्पदार्थाज्ञानावस्थायाम् सहविवक्षाया असम्भवाभिधानमसङ्गतमित्याशयिकामाशङ्कान्निरस्यति नचेत्यादिना यथासंख्यमन्वयेपीत्यस्य लक्ष्यसंस्कारवेलायामित्यादिः साहित्यावच्छिन्न इति आद्यन्तसमूहे साहित्यावच्छिन्नस्य टिक्तिसमूहस्य अन्वयः समानविभक्तिकतया अभेदान्वयः वक्ष्यमाणरीत्या इतरेतरयोगेपि समूहस्य विशेषत्वमिति भावः हल्पदवाच्यश्चेति यथा ऽज्ञम्प्रति नागरम्भक्षयेत्युक्ते नागरपदवाच्यः कश्चन पदार्थः स्यादिति सामान्यतो बोधः प्रथमतो जायते ततो नागरपदवाच्यः क

इति विशेषजिज्ञासा भवति तथेति कल्पितमिति सूत्रप्रणयनान्यथानुपपत्या कल्पितमित्यर्थः एतेन सहविवक्षासम्भवो दर्शितः ॥ ततः सामान्यतो बोधानन्तरम् विशेषजिज्ञासायामिति निर्विशेषस्य सामान्यस्याभावेन कारणस्य सामान्यज्ञानस्य वृत्तत्वाद्विशेषजिज्ञासा भवत्येवेति भावः ननु पृथग्वाक्यार्थबोधे किं साधकमतआह आदिरन्त्येनेति विशेषतः हल्त्वादिना विशेषरूपेण वाक्यार्थः वाक्यार्थबोधः एतेन सूत्रस्य सार्थक्यं द्वन्द्वस्य चोपपत्तिः कृता श्रोतुर्हल्पदार्थस्य ज्ञानाभावेपि वक्तुः पाणिनेस्तज्ज्ञानमस्त्येव अन्यथा वाक्यप्रयोगमेव न कुर्यात् यत्नं प्रति इच्छायाः कारणत्वात्तादृशी सहविवक्षा सम्भवति ततः पूर्वम् आदिरन्त्येनेत्येतत्सूत्रप्रणयनात्प्राक् हल्पदार्थज्ञानात् हकारादिलकारान्तस्य हल्पदार्थत्वेन ज्ञानात् क्रमेण प्राग्लकारस्येत्वेन ज्ञानन्ततो हल्पदार्थत्वेन ज्ञानन्ततो हल्पदवाच्य इदिति ज्ञानमिति क्रमेण समाधत्ते आद्यन्तावित्यादि सूत्रारम्भसामर्थ्येनेति यत्र न द्वन्द्वस्तत्र यथालोके शत्रुम्मित्रं विपतिञ्च जय रञ्जय भञ्जयेत्यत्र स्थानाख्यलौकिकप्रमाणेनान्वयबोधो भवति तथा शास्त्रेपि भविष्यतीति यथासङ्ख्यसूत्रन्न तदर्थङ्किन्तु द्वन्द्वार्थमेव लोके यथा द्वन्द्वनिर्देशे यथासङ्ख्यन्न प्रतीयते तथा शास्त्रेपि न स्यात् अतएवाजाविधनौ देवदत्तयज्ञदत्तावित्युक्ते न ज्ञायते कस्याजाधनङ्कस्यावय इति भाष्ये उक्तम् अतस्तथान्वयबोधार्थं पूर्वोक्तरीत्या यथासङ्ख्यसूत्रसहायेनास्तु साधुत्वमिति भावः अन्यप्रकारेण श्रोतुर्वक्तुश्च प्रथमतः सामान्यतस्ततः श्रोतुः प्रथमतो लत्वेन ततो हल्पदवाच्यत्वेनेति य उक्तः प्रकारस्ततोन्यप्रकारेण अयम्भावः प्रकृते यथासंख्यसूत्रविषयताया अभावाच्छ्रोतुर्द्वन्द्वस्य साधुत्वज्ञानन्ततः प्राथमिको बोधश्चान्योन्याश्रयान्न सम्भवतीति पूर्वपक्ष्युक्तसहविवक्षापदार्थो ऽसम्भवदुक्तिक इत्याह किञ्चेत्यादिना श्रोतृसम्बन्धिसहबोधकर्तृकसत्तेच्छा सहविवक्षा सा कदा सम्भवति यदा श्रोतुः सह बोधः स्यात् तथात्र तु न सम्भवत्यन्योन्याश्रयादिति सहविवक्षैव नास्तीति कल्पनीयम् ननु पाणिनेस्तादृशी इच्छा कल्प्यतामत आह तादृशेच्छयेति भ्रान्तत्वापत्तिरिति इच्छाम्प्रतीष्टसाधनताज्ञानस्य कारणतया श्रोतृसमवेतं सहज्ञानम्मदिष्टसाधनमिति ज्ञानम्पूर्वम्पाणिनेः कल्पनीयम् श्रोतुस्तु सहज्ञानन्न भवतीति पाणिनिसमवेतस्य ज्ञानस्य सहबोधविशेष्यकत्वावच्छिन्नश्रोतृसमवेतत्वप्रकारकस्य भ्रमात्मकत्वेन पाणिनेर्भ्रान्त-

त्वापत्तिरित्यर्थः तादृशबोधाजनकेति सहबोधाजनकेत्यर्थः ननु लोके यः पुरुषो ऽन्यतरविषयकज्ञानवान्नतूभयविषयकज्ञानवांस्तम्प्रति मुखनयनम्पश्येति प्रयोगो दृश्यते तथा ऽत्रापि भविष्यतीत्यत आह मुखनयनमिति पूर्वपक्ष्युक्तसहविवक्षापदार्थमभ्युपगम्यापि दूषणमाह किञ्च पाणिनेरिति हल्पदार्थज्ञानेपि आदिरन्त्येनेति सूत्रप्रणयनान्यथानुपपत्त्या हल् पदार्थज्ञानेपि तदभिप्रायेण हल्पदार्थज्ञानतात्पर्येण न प्रयोगः न हलिति प्रयोगः अन्यथा तादृशतात्पर्यकल्पने व्याख्यात्रिति पाणिनिप्रभृतयो ये व्याख्यातारस्तेषाम्परम्परया ऽवगतं यत्तात्पर्यन्तदन्यथानुपपत्त्येति समुदितार्थः लट् स्म इत्यादि लक्षणाया अनुमानस्य च हेतुसद्भावाल्लट् स्म सूत्रे यथा कैयटेन लक्षणोक्ता तथेहापि भविष्यति लट् स्म इति सूत्रे वार्तिककृता स्मपुरा भूतमात्रे न स्मपुरा ऽनद्यतन इति वार्तिकम्पठितन्तत्र स्मपुरेत्याकारकसूत्राभावादन्यथानुपपत्त्या प्रथमवार्तिके स्मपुराशब्दाभ्यामाद्यन्ताभ्यां लट् स्मे अपरोक्षे च न नौ पृष्टप्रतिवचने नन्वोर्विभाषा पुरि लुङ् चास्म इति पञ्चसूत्री लक्ष्यत इत्युक्तम् तत्र लक्षणायाम्मानन्तु यदि लक्षणा नस्यात्तदा प्रथमवार्तिकेन लट् स्मे अपरोक्षे च पुरि लुङिति सूत्रत्रयस्य भूतमात्रे प्रवृत्तिर्बोधिता तस्यैवाद्यतननिषेधप्रतिपादनद्वारा ऽनद्यतने विधानप्रतिपादने भूतविशेषे विधानमिति लभ्यते ततश्च भूतमात्र इत्यनेन सामान्येन विधानेन विरोधः प्राप्नोति यदातु प्रथमवार्तिके लक्षणा तदा पञ्चसूत्र्या भूतमात्रे प्रवृत्तिर्बोधिता तथा च लट् स्मे अपरोक्षे च पुरि लुङिति सूत्रत्रयस्याद्यतनभूतेपि प्रवृत्तिः प्राप्ता सा द्वितीयवार्तिकेन प्रतिषिध्यते न नौ पृष्टप्रतिवचने नन्वोर्विभाषेत्यनयोस्तु भूतमात्रे प्रवृत्तिरिति सिध्यति एवञ्च तत्रत्यभाष्यग्रन्थकवलेन प्रथमवार्तिके लक्षणा यथास्ति तथेहापि हकारादिलकारान्तसूत्रसमुदायघटकतत्तत्सूत्रान्त्ये लक्षणाङ्गीकार्या अन्त्यपदञ्च तादृशे तात्पर्यग्राहकम्भविष्यति गभीरायान्नद्यां घोष इत्यत्र यथा नद्यामित्यस्य गभीरनदीतीराभिन्नाधिकरणप्रतिपादकत्वे गभीरायामिति तात्पर्यग्राहकत्वद्वत् लक्षणयेति तृतीयान्तस्य बोधसम्भवेनेत्यत्रान्वयः शक्त्या निर्वाहे लक्षणाया अनौचित्यमित्यभिप्रायेणाह तत्रान्तरीयेत्यादि यथा तत्रान्तरे स्वौजस् इति प्रथमा अमौदशसिति द्वितीयेत्यादि उक्तन्तेनैवात्र शास्त्रे प्रथमाद्वितीयापदार्थग्रहस्तद्वत् अनुमानादिति हल्पदम् हकारादिषु शक्तम् हकारादिबोधतात्पर्येण पाणि-

न्युच्चरितत्वादित्यनुमानादित्यर्थः एवम् अनुपदोक्तरीत्या लक्षणायाः शक्त्यनुमानस्य वाङ्नीकारे नियमाभावादिति व्याकरणस्य शक्तिग्राहकत्वसिद्धान्तस्यैवमेवोपपत्तिरिति भावः नासूयेति प्रकृतिप्रत्ययययोरानन्त्येन शब्दानां साधुत्वज्ञानन्न सम्भवति तत्र केषाञ्चिच्छब्दानां साधुत्वमाचार्येण प्रतिपादितम्पंक्तिंविंशतीत्यादिना शब्दानामानन्त्यात्सर्वेषां तन्न सम्भवतीति तथा न कृतन्नत्वेतावताचार्यस्य दोष इति उपसंहरति तस्मादिति करिष्यमाणेति करिष्यमाणः शक्तिग्रहोपायो यस्य तादृशं यत्पदन्तस्य तदभिप्रायेण प्रागज्ञातार्थाभिप्रायेण आचार्यस्य पाणिनेः पूर्वम् शक्तिग्रहोपायात्पूर्वम् अस्मिन्नर्थे साधकान्तरमप्याह ध्वनित इत्यादिना अस्य भाष्येणापीत्यत्रान्वयः ग्रहणाभावायेति अच्पदेनेत्यादिः न स्वस्मिन् णाप्पदेन स्वाङ्गेनाञ्झलाविति वाक्यापरीति वाक्यस्य परिष्कृतवाक्यार्थस्य अपरिसमाप्तिः अनिश्चयः अन्यथा करिष्यमाणशक्तिग्रहोपायकस्य पदस्य स्वस्य ज्ञानसत्वात्तदभिप्रायेण प्रयोगाङ्गीकारे । आचार्येण पाणिनिना क्रमेण उपदेशादिक्रमेण तथाबोधे आचार्यज्ञानवद्बोधे असंगतं स्यादिति पाणिनेः पूर्वमपि तावतां ज्ञानस्य सत्वेन तत्तत्सवर्णाभिप्रायेण प्रयोगेणाच्पदेन सवर्णग्रहणन्दुर्वारमित्यर्थः विभाव्यतामिति द्वन्द्वादिनेति शेषः तदाह तदेतत्सर्वम्मनसि निधायाह अवयवस्येति अवयवस्यावयविनम्प्रति नित्यसाकाङ्क्षत्वादाक्षेपस्य सम्भवः तृतीयार्थः प्रकारिता तयोः आद्यन्तयोः पाराथ्यैति संज्ञि बोधकत्वनिर्णयात् संज्ञा हि संज्ञिनम्बोधयति नतु संज्ञास्वरूपमपि प्राचामनुरोधेन मूलकृतोक्तं व्याख्याय सिद्धान्तमाह वस्तुत इति अस्यापि संज्ञास्वरूपघटकान्त्यस्यापि अपिना समुदायघटकेत्संज्ञकवर्णपरिग्रहः प्रकारान्तरेण ज्ञापकादिभिन्नप्रकारेण अनुवृत्तिपदोत्तरश्चकारो भिन्नक्रमः फलपदोत्तरन्द्रष्टव्यः तेन तदनुवृत्तेः फलभावश्चेत्यस्य लाभः नन्वेवमनुवृत्तिपरभाष्यकारीयव्याख्यानविरोध इत्यत आह भाष्येप्येतादिति को विरोध इति यत्रोद्देश्यतावच्छेदकविधेययोरेकरूपेणोपस्थितिस्तत्रोद्देश्यविधेययोर्नान्वयबोधो दण्डवान्दण्डवानित्यत्र यथा नहि तथा प्रकृतेस्ति अकारादिचान्तसमुदायपर्याप्तसमुदायत्वमुद्देश्यतावच्छेदकमाजित्यनुपूर्वीतु विधेयतावच्छेदिकेति भावः प्राप्नोत्येवेति एतेन भवदुक्तरीत्या आद्यन्तयोर्वारणाभावः स्वं रूपमित्यनुवृत्ते वैयर्थ्यञ्च ध्वनितम् यन्मूले स्वं रूपमित्यस्यानुवृत्तिङ्कृत्वा स्वपदेनाल्यपराम-

शौ भाव उक्तस्यैवार्थस्यमप्यस्तीत्याह किञ्चेति विशिष्टेति अजित्यादिविशिष्टेत्यर्थः तस्मात् उक्तप्रकारद्वयात् तत्र हीति उपदेशे ऽजितिसूत्रव्याख्यानपरभाष्ये हीत्यर्थः प्रत्यक्षमिति अत्र प्रत्यक्षशब्द अर्शआद्यजन्तस्तेन प्रत्यक्षस्येंद्रियग्राह्यस्याख्यानमित्यर्थो लभ्यते प्रत्यक्षमिति त्वाख्यानक्रियाविशेषणम् गुणैः प्रापणम् साधारणधर्मोपादानेन कथनम् नासाविति अनुनासिकशब्देन आङो ऽनुनासिक इति सूत्रेण विधानमनुनासिकत्वन्तु साधारणमिति भावः सङ्कीर्णत्वमिति प्रत्यक्षाख्याने ऽप्युद्देशप्रयोगदर्शनेन सङ्कीर्णत्वम् यथा शिष्येणानुवाकम्भवानुदिशत्वित्युक्ते गुरुणा शश्वो देवीयकमधीष्वेत्युक्ते शिष्यआह । उद्दिष्टो मे ऽनुवाक इति इदञ्च सङ्कीर्णत्वं लृटः सद्वेति सूत्रविहितसंग्रहायावश्यकमिति भावः वार्तिकेति सिद्धन्तूपदेशने ऽजनुनासिक इति वचनादिति वार्तिकेत्यर्थः इदञ्च वार्तिकमुच्चारित इत्यस्याध्याहारेण व्याख्येयम् प्रत्याहारे सम्पादकं सूत्रमइउणित्यादि सूत्रमिति प्रत्यासत्येयस्योपस्थितत्वेनेत्यर्थः प्रौढिवादमात्रमित्यस्य महत्वेनोक्तं वस्तुतो ऽसङ्गतमित्यर्थः प्रतीयते स तु न युक्तः भाष्यकारोक्तावसङ्गतत्वकथनमस्यायुक्तत्वादतस्तद्व्याचष्टे वार्तिककृदिति कथञ्चित् बाहुलकरूपागतिकगत्या प्रायिकत्वादिति अतएव को भवता दायो लब्ध इत्यादि प्रयोगा इति भावः नतु वासरूपविधिना ल्युड्विषये घञपि भविष्यतीत्यत आह वासरूपेति प्रतिषिद्ध इति अत्र ज्ञापकमर्हे कृत्यतृचश्चेति सूत्रे कृत्यतृज्ग्रहणन्तद्धि चकारसमुच्चये लिङा कृत्यतृचोर्बाधा माभूदिति क्रियते यदि वासरूपविधिर्नित्यः स्यात्तदा तेन सिद्धे ऽस्य ग्रहणं व्यर्थं स्यात् साहचर्येण परतुमुन्साहचर्येण खल् नेति किन्त्वातो युजिति युजेवेति शेषः यदि साहचर्याश्रयणमत्र स्यात्तदा तुमुन्साहचर्येण भावार्थकखल्विषय एव वासरूपविधिनिषेधेन प्रकृते कर्मार्थकत्वेन निषेधाप्राप्त्या भाष्यासङ्गतिः स्यादेवेति भावः । क्लिष्टत्वमुपपादयति गुणेति विशेषणे इति निरूपितत्वं सम्यर्थः तस्या ऽऽकाङ्क्षायामन्वयः एवञ्च विशेषणनिरूपिताकाङ्क्षावत्वे सतीत्यर्थो लब्धः इतरान्वयः इतरस्मिन् प्रधानातिरिक्ते गुणे तस्य गुणस्य अयुक्त इति किन्तु प्रधानान्वय एव न्याय्यः प्रकृते च विधेयतया प्रत्ययः प्रधानम् तद्विशेषणमेव प्रायेणेति नतु संज्ञायामित्यस्येति एवञ्चोक्तन्यायत्याग एव प्रायेण संज्ञायामित्यन्वय इतिभावः भाष्यकृतावहेलनादित्यत्र भाष्य-

कृच्छब्दात्कर्तृकर्मणोरिति षष्ठी प्राप्नोतीति शंकावारणायाह अस्यार्थेति मूले ऽतएवेति तथा व्याख्यानस्य क्लिष्टत्वादेवेत्यर्थः ननु ल्युटो बाधकत्वशङ्कायां घापवादत्वकथनमनुपपन्नमेवेत्यत आह ल्युडपवाद इति तत्रापि हलश्चेति सूत्रेपि अगतिकगतिरित्यस्य न विद्यते गतिर्यस्य तस्य गतिरित्यर्थे अगतिकगतिरित्यनुपपन्नङ्कृत्याश्रयस्यैव सत्वादित्याशयेन शंकते नचेति अन्यतोपीति खनभिन्नादपीत्यर्थः खन्धातौ घित्वस्य फलाभावादिति भावः तत्रैवेति तावतैव घित्वस्य चारितार्थ्यादिति भावः ननु पदमित्यत्र न तथेति कथन्तत्प्रदर्शनमित्यत आह पदस्येति घञर्थे केन सिद्धेरिति घञर्थे क्रविधानमिति वचनेनेत्यर्थः ननु स्नानीयञ्चूर्ण राजभोजनाः शालय इत्यत्र यथा बाहुलकत्वेनार्थान्तरे प्रत्ययस्य स्वीकारस्तथा बाहुलकादुपदेशपदेपि करणे घञ् कल्पने किम्बाधकमत आह किञ्चोच्चार्येति उच्चारणार्थत्वेति आद्योच्चारणार्थत्वेत्यर्थः अतएवैकाच उपदेश इति सूत्रे इत्संज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यत इति कैयटः सङ्गच्छते ननु लोके चैत्रम्प्रति यज्ञदत्तेन स्रुघ्नङ्गमिष्यामि पन्थानम्भवानुपदिशत्वित्युक्ते चैत्रेणामुष्मिन्नवकाशे हस्तदक्षिणो ग्राह्यो ऽमुष्मिन्हस्तवाम इत्युक्ते यज्ञदत्तो वदति भवतोपदिष्टः पन्था इति तदनुपपन्नम्पथ उच्चारणासम्भवादत आह सङ्कीर्णेति लक्षणयापीत्यपिना शक्तिपरिग्रहः एतेन पाणिन्यादिवाक्यादिव लौकिकव्यवहारादपि शक्तिसिद्धिर्भवतीति सूचितम् नच भावयञन्तेनोपदेशशब्दसमभिव्याहृतेनाद्योच्चारणक्रियोपस्थाप्यते तथाच तदन्तत्वमनुबन्धत्वाभिप्रेतस्य न सम्भवतीति वाक्यार्थानुपपत्तिरिति वाच्यम् उद्देशश्च प्रातिपदिकानान्नोपदेश इति भाष्याद्येषां स्वरूपज्ञापनायापूर्वमुच्चारणन्तेषामेवोपदेश इत्यादेचउपदेश इति सूत्रस्थकैयटाच्चोपदेशशब्दस्याद्योच्चारणपरत्वव्यवस्थितावन्त्यपदार्थान्वयाय तस्य शब्दस्याद्योच्चारणविषये लक्षणाया अङ्गीकारात् नन्वेवं लृटः सद्वेति निष्ठेति सूत्रविहितशत्राद्यवयवस्य राजसूयसूर्येत्यादिनिपातनानुमितक्यबाद्यवयवस्य चेत्संज्ञानुपपत्तिः यदुक्तरीत्या लौकिकव्यवहारेणोपदेशशब्दस्योभयार्थकस्येह ग्रहणमिति ब्रूषे तदा ऽऽङो ऽनुनासिकइति सूत्रविहिते ऽतिव्याप्तिरत आह किञ्चोपदेशेति प्रत्ययादिपरत्वे भाष्योक्तकरणव्युत्पत्त्या प्रत्ययाद्यर्थकत्वे यत्किंचिदिति धात्वादिभिन्नेत्यर्थः तदर्थम् यत्किंचित्समुदायान्त्यवारणार्थम् सा-

मर्य्यादीति अन्त्यपदोपादानेत्यादिः आदिपदेन तस्य पदस्य व्यवसिताख्य-परत्ववर्णनस्य के पुनर्व्यवसिता धातुप्रातिपदिकप्रत्ययनिपातागमादेशा इति प्रदर्शनस्य च परिग्रहः नच भावघञन्तस्योपदेशशब्दस्य पूर्वोत्तरसूत्रयोराश्रयणे मनिनाद्यवयवेकारनकारयोरित्वानापत्तिरिकारस्याद्योच्चारणविषयांत्यत्वाभावात् किञ्च णिनिप्रत्ययावयवनकारस्योत्तरसूत्रेण मनिनवयवनकारवादित्वापत्तिरिति वाच्यम् यस्योपदेशे ऋषेस्तात्पर्यन्तस्य तदुपदेशप्रयुक्तेत्संज्ञा इत्यर्थ आश्रीयते णिनि प्रत्यये समुदायोपदेशप्रयुक्तैव मनिनादौ त्ववयवोपदेशप्रयुक्ता सेति व्याख्यातृवचनप्रामाण्यादाश्रीयत इत्याशयात् व्याख्यातृवचनमप्रमाणमिति तु न भाष्योक्तरीत्या व्यवसिताख्यस्यैव ग्रहणे सिद्धे भावघञन्तत्वपक्षेपि दोषपरिहाराय तथा वर्णनात् उपदेशशब्दस्य भावघञन्तत्वे भाष्यान्तरमपि साधकमित्याह उद्देशश्चेत्यादिना नच भावघञन्तस्य स्वीकारे लृटः सद्धेति सूत्रविहितशत्रवयवस्यासङ्ग्रह इति वाच्यम् व्यवसितान्त्यग्रहणमिति भाष्यैकवाक्यतया ऽस्मिन्नपि पक्षे सत्यदार्थज्ञानापत्तौ सदिति सूत्रोपस्थितेरावश्यकतया तत्र यस्तच्छब्दबोध्यस्तदन्त्यस्य ग्रहणमित्याशयात् एवमेव निष्ठेत्यत्र निपातनस्थले बोध्यम् वस्तुतस्त्वेवंविधक्लेशपरिहाराय बाहुलकात्करणे घञ् स्वीकार एवोचित इति बोध्यम् अतएव भवतष्ठक्छसाविति सूत्रविहितान्त्यस्येत्वसिद्धिः अत एवाह दिगिति एतेन शेखरोक्तसिद्धान्तार्थः सूचितः उपदेशत्वमित्यस्य शब्दस्य संज्ञि बोधकोपदेशशब्दप्रकृतिकत्वप्रत्ययान्तत्वे वक्ष्यमाणमूलोक्तदूषणानामापत्तिरत आह उपदेशशब्देति वाक्यशब्दो न सुप्तिङन्तचय इत्यादि प्रसिद्धार्थः किन्तु रूढ इत्याशयेनाह वाक्यशब्देनेति ननु प्राचा योग एव प्रदर्शित इति विकल्पम्प्रदर्श्य तन्मतखण्डनमयुक्तमत आह उपदेशपदमिति तथाच भवत्कृतं योगार्थवर्णनम्पङ्कजादिशब्दार्थवर्णनसदृशमुत पाठकादिशब्दार्थवर्णनसदृशमित्यत्र विकल्पप्रदर्शनतात्पर्यमिति भावः मूले संज्ञाया इति संज्ञारूपत्वं विनास्य शब्दस्य रूढत्वन्न सम्भवतीति भावः ननु शास्त्रकृत्कृसंज्ञारूपत्वाभावेप्यस्मत्कृतैव सास्त्विवत्यत आह मूले अस्मदादीति अतिप्रसङ्गादिति रघुनाथादिशब्दे बालकविशेषसङ्केतिते पूर्वपदादिति णत्वापत्तिरूपातिप्रसङ्गादित्यर्थः संज्ञात्वाभावेपि न तद्ग्रन्थीयसंज्ञापदमनुपपन्नन्तस्य व्यवहारलाक्षणिकत्वादित्याह संज्ञाशब्देनेति अभिमत इति

तस्येति शेषः अस्मत्पक्षेति भावघञन्तपक्ष इत्यर्थः किमत्र विनिगमकमिति चेत् क्त्वृत्तार्थकल्पने लाघवमेवेति गृहाण यकारादीति चुञ्चुबादिप्रत्यया-देश्चुटू इति सूत्रेणेत्वनिवारणाय तेनेत्थमुक्तम् ननूपदेशाभावादित्यसङ्गतम् स्थानिनस्तस्य सत्वादत आह आदेशस्येति अभ्युपेत्य वादोयम् वस्तुतस्त्व-सङ्गत एव अथवा नानुत्पन्ने सनि प्रकृत्या भवितव्यमित्यादिना भाष्य ए-व दूषितत्वात् लूशब्द एवेति यस्य क्रियावाचकत्वन्तस्य धातुसंज्ञा क्रिया-वाचकता चार्थबोधनाय प्रयुज्यमानशब्दघटकस्येति भावः असौ लूशब्दः अनुबन्धस्येत्संज्ञया निवृत्तिस्तूच्चारणाव्यवहितोत्तरकाल एवात आह केवल-मिति ञित्कार्यमिति ञकारोच्चारणसामर्थ्यादिति भावः अत्र धातुसूत्र-गण इत्यत्र साहचर्यात् सादृश्यात् एतस्य उक्तार्थलक्षणाकल्पनस्य भावघञ-न्तोपदेशशब्दस्य सप्तम्यन्तस्याद्योच्चारणविषयाणामित्यर्थलक्षणेति तात्प-र्यम् कर्मकरणव्युत्पत्तिकल्पनं साहचर्यकल्पनम् लक्षणाकल्पनञ्चानुचितमिति भावः इत एवारूचेः उक्तरीत्योक्तदोषपरिहाररूपारुचेः अलोन्त्यात्सूत्रे-तिशब्दात्तावन्मात्रं सूत्रमिति प्रतीतावसङ्गतिरप्रसिद्धेरत आह उपधासं-ज्ञेति उपधासंज्ञाविधायकसूत्रेत्यर्थः विरोधमुपपादयति तत्र हीति भिन्न-म्पदमिति एतेन शकारस्य संज्ञाशब्दावयवत्वेन समुदायाद्विभक्त्यनुत्पत्तिः यथाकथञ्चित्ततो विभक्त्युत्पत्तौ हल्ङ्यादिलोपः स्यादिति द्विशकारको निर्देश इत्यनुपपन्नमिति परास्तम् श इति चेति भिन्नम्पदमित्यनुपज्यते स्व-रूपेणार्थेन प्रातिपदिकत्वादेतस्मात्सुप् हल्ङ्यादिलोपः नचास्य शका-रस्य लोपशब्दानवयवत्वेन कथन्तस्य शित्वमिति वाच्यम् अनेकान्ता अनुबन्धा इति पक्षेणास्य पक्षस्य सत्वात्तत्पक्षे हि समीपे ऽवयवत्वारोपेण बहुव्रीहेः स्वीकारात् अनुबन्धा एकान्ता इति पक्षे तु न शकारान्तरस्य प्र-श्लेषः किन्तु लोपग्रहणानुवृत्त्यैव सिद्धे पुनर्लोपग्रहणात्सर्वादेशः अस-न्देहायेति द्विशकारकोयान्निर्देश इति भाष्याक्षरस्यान्यथानुपपत्त्या चेति शे-षः एतद्भाष्याक्षरमूलकव्याख्यानात्सन्देहनिवृत्तिकल्पनापेक्षया संयोगादि-लोपस्य कसाहचर्येण सलोपविषये ऽखण्डपद एव प्रवृत्तिकल्पनमुचितमिति भावः नचायस्मयादित्वेन भत्वाद्दृष्टान्ते जश्त्वाप्रवृत्तिर्न्याय्यैवेति वाच्यम् छन्दोवत्सूत्राणीत्यतिदेशस्य प्रवृत्तिं विना भत्वस्यासम्भव इति तस्य प्रवृ-त्तिरवश्यं वाच्या तथा च तत एव दृष्टांतदार्ष्टान्तिकयोः संस्कारकशास्त्रस्या-

प्रवृत्तिः स्यादित्याशयात् ननूक्तपक्षस्यानेकान्तपक्षाभिप्रायकत्वेनैकदेश्युक्तित्वेन तद्विरोधेपि न क्षतिरत आह किञ्चेति इत्यस्य इति सूत्रस्थचित्रङ् इत्यस्य अत्र पक्षे उपदेशपदस्य धातुसूत्रेत्यादिना पठितेषु योगरूढिरिति पक्षे भाष्यसम्मतकरणव्युत्पत्तिरिति पक्षे तु नासङ्ग्रहः त्वदुक्तरीत्या भाष्यकृता ऽपरिगणनात् व्यवसिताख्यस्य ग्रहणमिति व्याख्यानेपि नासङ्ग्रहः प्रातिपदिकान्त्यत्वादिति च ध्वनितम् ननु मन्मतेपि परिगणनन्नेत्यत आह एष्वेतस्येति अस्य धातुसूत्रेत्यादिना पठितस्य परिगणनस्यैवेत्यत्र पठितैवकारव्यवच्छेद्यमाह नन्विति नन्वत्र यथा परिगणनङ्कर्तव्यामित्युच्यते तथा अत्र नोक्तमिति परिगणनमिति कथनन्नोचितमत आह धात्वादीति मूले दुरूपपादत्वादिति सकृदुच्चरितस्य शब्दस्यैकव्युत्पत्त्यैवार्थबोधकत्वन्नतु तत्र व्युत्पत्तिद्वयसम्भवः एकार्थबोधकतया चारितार्थ्यादावृत्तौ मानाभावादिति भावः करणतेति प्रकृतिजन्यबोधप्रकारस्यैव भावप्रत्ययार्थतयोपदेशशब्दो यदि करणवत्तंतत्तदा करणताया एव भावप्रत्ययार्थत्वमित्याशयः न हीत्यादि प्रयोज्यप्रयोजकभावस्यान्वयव्यतिरेककल्पनया यथा चैत्रे चैत्रत्वधर्मसत्त्व एव पाचकत्वमन्यथा नेति कस्यापि न सम्मतङ्किन्तु विक्लित्त्यनुकूलव्यापारसत्त्वमेव पाचकत्वप्रयोजकन्तथा धातुत्वादिकन्न करणताप्रयोजकम् पूर्वस्मिन्पक्षे तु न तद्ग्रन्थविरोध इत्याह संज्ञात्वे त्विति उपदेशशब्दत्वमिति भावप्रत्ययप्रकृतिभूत उपदेशशब्द स्वरूपपरस्ततस्तत्प्रत्ययस्तद्वृत्तिधर्म्मपर इति भावः तदवच्छिन्नस्येति उपदेशतायाः प्रयोजकमिति विग्रहे या षष्ठी तस्यास्तदवच्छिन्नसम्बन्धित्वमथ इति कल्पनेन तदवच्छिन्नस्येत्यस्य लाभः प्रयोजकपदन्तु रूढ्यर्थतावच्छेदके लाक्षणिकमित्याशयेनाह तद्रूढ्यर्थतयेति यथा हर्यादि नानार्थपदस्य विष्णुत्वादिरूपा नानाधर्माः शक्यतावच्छेदका भवन्ति तथेहापि धातुत्वादिकं रूढ्यर्थतावच्छेदकं सम्भवतीत्याशयः नचास्मिन्पक्षे प्रयोजकपदस्य यदि लक्षणा तदा द्वितीयपक्षेपि प्रयोजकपदस्यावच्छेदके लक्षणास्तु तथा चोपदेशकरणतावच्छेदकमित्यर्थो भविष्यतीति तत्पक्षेपि न स्वग्रन्थविरोध इति वाच्यम् अन्यूनानतिरिक्तवृत्तिधर्मस्यैवावच्छेदकतया धातुत्वादेर्न्यूनवृत्तितया ऽवच्छेदकत्वासम्भवादिति भावः केचित् उपदेशतेत्यत्रोपदेशशब्दस्य संज्ञा शब्दतया संज्ञाशब्दस्थले शब्दस्वरूपस्यैव संज्ञिपरशब्दप्रकृतिकभावप्रत्ययार्थत्व-

मित्युपदेशतेत्यस्योपदेशशब्द इत्यर्थ एवोचित इत्याहुः तन्न योगरूढस्य श-
ब्दस्य शब्दस्वरूपप्रवृत्तिनिमित्तकत्वासम्भवात् मूले पक्षद्वयसाधारणन्दूषण-
माह लोपश्चेतीति आद्यपक्षे परिगणनेनासङ्गहः स्पष्टः द्वितीये तमुपपाद-
यति न ह्यनेनेति तदर्थः उपदेशपदार्थः ॥ सर्वसम्मतत्वेपि भाष्यानुसा-
रिणाम्भाष्यसम्मतार्थ एवाग्रह इत्याशयेनाह भाष्यकारादीति ननु करण-
व्युत्पत्तिस्त्वर्थप्रसिद्धार्थकैव स्यादत आह यत्र त्विति इत्यादाविति आदि-
ना भाष्ये यस्य सन्ध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चारणमिति वाक्यस्य स-
ङ्गहः मूले दिगिति ॥ दिगर्थस्तु प्रागुक्तभाष्यवार्त्तिकस्वारस्येन लृटः सद्वे-
त्यादिसङ्गहानुरोधेन सकललक्ष्यसाधनानुरोधेन बाहुलकाश्रयणमेवोचित-
मिति नन्वनुनासिकपदादनु पश्चान्नासिकाङ्गत इति नासिका पश्चाद्व्याप्रिय-
ते यस्मिन्निति वार्थः प्रतीयते तथा चानुनासिकाकारादीनामनुनासिकत्व-
गुणरहितानां स्वरूपोपलम्भात्तद्विषये मतभेदेन यद्यप्युक्तस्यार्थस्य सम्भ-
व इति तेषां संग्रहो भवति तथा पित्रादीनान्तद्गुणरहितानामनुपलम्भा-
दुच्चगपदेवोभयावच्छेदेनोत्पन्नाभ्यां वायुसंयोगाभ्यामुत्पत्तीरिति विनिग-
मनाविरहेणोभयोः स्थानत्वमतः कथं योगाश्रयणेन गतार्थता किञ्चानुस्वा-
रयमाणाञ्च नासिका स्थानमिष्यत इति शिक्षोक्तेस्तेषाञ्चासङ्गहो ऽत आह
नासिकामभीति तथाच नायमुक्तरीत्या यौगिकः किन्तु नासिकामनुगत
इत्यत्र यो ऽनुशब्दस्तस्याभिहत्येति गत इत्यस्य चाभिव्यञ्जित इत्यर्थ इति
सर्वेषां सङ्गह इति भावः उक्तयोगाश्रयणमावश्यकमित्याह प्रातिशाख्येति
न केवलं प्रातिशाख्यादावेव तथा किन्तु प्रकृतशास्त्रेपीति सूचयन्नाह अत
एवेति योगाश्रयणादेवेत्यर्थः प्रत्याख्यानेति तत्र ह्यादौ मुखग्रहणस्य मुख-
ग्रहणं यमानुस्वाराणामेव भाभूदित्येवमर्थमिति प्रयोजनमुक्त्वा ये उभय-
वचनास्तेषाम्प्रासादवासिन्यायेन सङ्गहो मुखग्रहणाभावेपि भविष्यति य-
मानुस्वाराणान्तु सङ्गहेपि नैव दोषो न प्रयोजनमित्यनेन क्षत्त्यभावमुक्त्वा
मुखग्रहणप्रत्याख्यानेत्यर्थः ध्वनितमिति भवेदुभयवचनानां सिद्धमिति क-
थनेन ध्वनितमित्यर्थः उभयवचनमुभयावच्छिन्नवायुसंयोगप्रयोज्याभिव्य-
क्तिविषयत्वे नैवेति तथा कथनेनायमर्थो लभ्यते ॥ नन्विदं सूत्रं यद्या-
भ्यते तदा ऽशब्दसंज्ञेति निषेधाद्यरोनुनासिक इत्यादौ स्वरूपग्रहणाभावो
वति सूत्रानारम्भे तु स्वरूपग्रहणम्प्राप्नोतीत्यत आह यरो ऽनुनासिक इ-

त्यादाविति इत्यादिवदिति आदिना देवदत्तादिशब्दपरिग्रहः तथाच स्वं रूपमित्यंशः पश्चादिविषये व्यभिचरित इति तस्यानित्यत्वानुवादकमेवाशब्दसंज्ञेति नतु स्वातन्त्र्येण निषेधविधायकमिति पश्चादिशब्दोच्चारणश्रमलवदत्रापि स्वरूपग्रहणाभाव इति भावः अनुनासिकाकारादिविषये मतभेदश्च कैयटीये प्रसिद्धः अनुनासिकस्य पूर्वः परो वा भागो मुखेनोच्चार्यते भागो नासिकया नासिकावचनभागानुरागवशान्मुखवचनोपि भागो नासिकावचन इव लक्ष्यते अत्र प्रासादवासिन्यायो नास्ति भागस्यैव मुखेन नासिकया चोच्चारणात् यदातु सर्व एव वर्णो मुखेनोच्चार्यते नासिकया च तदा प्रासादवासिन्यायेन मुखग्रहणम्भाष्यकारः प्रत्याचष्ट इति मन्दप्रयोजनशब्दो न क्रियाविशेषणमन्दशब्दघटितः समानाधिकरणपदको बहुव्रीहिः उक्तरीत्या प्रयोजनालाभात् किन्तु सप्तमी विशेषण इति ज्ञापकाद्व्यधिकरणपदक इत्याशयेनाह मन्देष्विति लोपः स्यादिति अत्र स्यादित्यनेन सम्भावनामात्रन्नतु प्रसक्तिर्वेदे आपाद्यमानरूपाभावात् यद्यप्यनेकान्ता अनुबन्धा इति पक्षे अभ्र आं अटित इत्यत्रेट्प्रतिषेधः फलं सम्भवति तथा प्येकान्तपक्षे तदसम्भव एवेति वक्ष्यते आङ् इदिति वक्तव्य इति आङ् इच्छन्दसीति वक्तव्य इत्यर्थः यत्तु तस्य लोप इति सूत्रानन्तरमाङ् इच्छन्दसीति लाघवाद्वक्तव्यमिति तन्न अचीत्यस्य कर्तव्यत्वापत्तेः स्वस्थाने तथापाठे तु प्लुतप्रगृह्येति सूत्रादचीत्येतस्य सम्बन्धेन तदनावश्यकमेव ननु विधानसामर्थ्यादस्य लोपो माभूदित्संज्ञा तु स्यादेवेत्यत आह तत्फलेति तस्येत्वस्य फलं लोपः स प्रतियोगितासम्बन्धेनेत्वस्य व्यापको विधानसामर्थ्याद्व्यापकस्य तस्याभावे व्याप्यस्येत्वस्याप्यभाव इत्यर्थः फलान्तरमाशङ्क्य निराचष्टे नन्वभ्रेति महासंज्ञेति इदिति व्यञ्जनमात्रं संज्ञा कर्त्तव्या तथा च लाघवम् इदितित्वेतीतीदित्यर्थकमिति लोपो भविष्यतीत्याशयः ॥

इक इत्यादाविति प्रत्याहारार्थमित्वन्तस्यावश्यकमेव तथाच महासंज्ञया तन्निवृत्तिः स्यादिति भावः ननु न तस्येतस्त्रोच्चारणङ्किन्तु तत्सदृशस्येव अत एवादिरन्त्येनेति सूत्रव्याख्यानावसरे इता इत्सदृशेनेत्युक्तमत एव वैयाकरण इत्यत्र चित्स्वरो नेत्यत आह आदाविति तेनाइउणित्यादौ णादिश्रवणानापत्तिः समुच्चीयते मुख्यत्वन्तस्योपपादयति तदा हीति एवं हलन्त्यमित्यादौ लक्षणाया अकल्पनेनापि लाघवम्वोध्यम् ननु दो-

षाभाव इति प्रागिलखितमेव पुनरिहेत्यदोषादित्युच्यते इति पौनरुक्त्यमिति चेन्न पूर्वस्य दोषपदस्येट् प्रतिषेधप्रसंङ्गरूपं दोषपरत्वमस्य तु दोषसामान्यपरत्वमिति भेदात् ॥

प्रतिज्ञानुनासिक्या इत्यत्र प्रतिज्ञाशब्दः कर्मबोधकाङन्त इत्याशयेनाह प्रतिज्ञानेति लक्षणावादिमतमुपपादयति भावेति लक्षणेति क्लिष्टमित्यनेन लक्षणास्वीकार एव क्लेश इति प्रतीयते स तु न युक्तः लक्षणया उच्छेदापत्तेरतो भावार्थमाह शक्तीति मूले पाणिन्युपज्ञमिति आद्यर्थकोपशब्दपूर्वकाज्ज्ञाधातोः कर्मण्यङ् पाणिनेरुपज्ञेति कर्तृषष्ठ्या समासः पाणिनिकर्तृकाद्यज्ज्ञानविषयभूतामित्यर्थः तत्र दृष्टान्ते उभयोः भावकर्मणोः तथात्वापत्तौ लाक्षणिकार्थबोधकत्वापत्तावित्यर्थः अभियुक्तोक्तेति शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा इति वृद्धोक्तेरित्यर्थः ॥

अत्र रप्रत्याहारविषये अन्यत्र लघुशब्देन्दुशेखरे लण्सूत्रस्थाकारो यद्यनुनासिकः स्यात्तदा ऽतो ल्रान्तस्येति सूत्रे पाणिनिर्लकारन्नोच्चारयेत् रप्रत्याहारेणैव व्यवहरेत् एवं यण्घटितसूत्रेषु लाघवाय प्रत्याहारनिर्देशमेव कुर्यात् तस्मादस्यानुनासिकत्वमप्रामाणिकमित्यादि तत्रोक्तम् वस्तुतस्तु लेत्यत्र रेत्येव सिद्धे लकारोच्चारणं लण्सूत्रस्थाकारनिष्पाद्यप्रत्याहारनिर्देशस्य क्वचिदनाश्रयणमिति ज्ञापनाय तेन शुल्कमाचष्टे शुल्कयति शुल्कयतीति शुल्इत्यत्र रात्सस्येति नियमाप्रवृत्या संयोगाल्लोपस्य प्रवृत्तिसिद्धिः अत एव रदाभ्यामित्यत्र रो ऽसुपि वनोरचेत्यनयोश्च न दोषः न चानयोरकार उच्चारणार्थो नच्चनुनासिक इति भ्रमितव्यम् विधेयविषये इत्संज्ञां विना निवृत्त्यसिद्धेः रदाभ्यामिति सूत्रे प्रत्याहारस्य ग्रहणे प्रफुल्लत इत्यत्रादितश्चेतीदप्रतिषेधाल्लुकारात्परतस्य नत्वापत्तिः यद्यपि यण् घटितसूत्रेषु लाघवाय यप्रत्याहारनिर्देशमेव कुर्यादिति तत्स्ववीयः इणो यण् इग्यणः सम्प्रसारणमित्यत्र लाघवाभावात् इको यणित्यत्र मात्रालाघवसत्त्वेपि यो ऽचीत्युक्ते प्रक्रियागौरवमस्त्येव किञ्च लण्सूत्रस्थाकारनिष्पन्नयप्रत्याहारनिर्देशस्य क्वाचित्कत्वं यप्रत्याहारेणैव निर्दिशेदिति वादिनापि वाच्यमन्यथा महाशूद्रीत्यत्रायोपधादिति प्रतिषेधस्य प्राप्त्या जातेरिति सूत्रविहितङीषभावस्य ङेर्य इत्यनेन यकारादिचतुष्टयादेशघटिता-

निष्टरूपाणामिष्टरूपाभावानाञ्चापत्तेः न चास्यानुनासिकत्वे हलप्रत्याहारे ऽनुनासिकाकारस्य ग्रहणापत्तिः हलप्रत्याहारसिद्धेः प्रागच्पदार्थनिष्पत्त्यभावेनोपदेशजित्वस्यार्थबोधाभावेनाप्याकारस्येत्वानापत्तेः इष्टापत्तिस्तु कर्तुमशक्या मा मां स्त्रायस्वेत्यत्रान् धातोः क्विपि दीर्घे यत्प्रकृतिकसम्बुद्धौ नलोपाभावे न श्छवीति रुत्वे ऽत्रानुनासिक इत्यनुनासिकपक्षे ऽनुस्वारापत्तेरिति वाच्यम् लण्सूत्रस्थाकारो नानुनासिकत्वविशिष्टः श्रूयते किन्तु कार्यार्थित्वात्तथा प्रतिज्ञात इति वाच्यत्वच्च कार्यम्प्रत्याहारसिद्धिरूपत्वच्चेत्त्वं विना ऽनुपपन्नमिति हलप्रत्याहारसिद्धिकाले तस्योक्तरीत्या इत्संज्ञायाः प्राप्त्यभावेपि मो ऽनुस्वार इति सूत्रजवाक्यार्थनिष्पत्तिकाले लण्सूत्रस्थाकारस्येत्वप्रवृत्तौ प्रतिबन्धकाभावात्तत्र तस्य लोपप्रवृत्तेर्दुर्वारत्वात्तावतापि भवदुक्तबलवतरलोपप्रतियोगित्वरूपहेतुसत्तायाः सत्वात्तस्य प्रत्याहारे ग्रहणाभावस्य सिद्धेः किञ्च यत् प्रत्याहारे जातिनिर्देशमाश्रित्य सो ऽस्तीत्यत्र सुलोपापत्तिरिति तदतिमध्वीयः अदेङ् गुण इत्यादौ सुलोपाकरणेन हल्न्तात्परत्वादेव सुलोपे सिद्धे एतत्सदोरिति सुलोपविधानेन ज्ञापकेन च लण्सूत्राकारस्य रप्रत्याहारातिरिक्तप्रत्याहाराप्रयोजकत्वकल्पनात् यदपि लण्सूत्रस्थाकारस्यानुबन्धत्वे तृतीयहेतोरव्यापकत्वापत्तिरूपदोषोद्भवनन्तदपि न मनोरमम् अइउणित्यादौ सन्धिकार्यम्प्राप्नोतीति शङ्कायां वर्णोपदेशकाले ऽजादिसंज्ञाया अनिष्पादात्सन्धिर्नेति परकृतसमाधानस्य खण्डनावसरे वर्णोपदेशे इत्संज्ञायामच्प्रत्याहारे च निष्पन्ने प्रवर्तमानानां यणादीनां सुध्युपास्य इत्यादौ तटस्थ इवोद्देश्यतावच्छेदकाक्रान्ते वर्णोपदेशेपि प्रवृत्तेर्दुर्वारत्वादिति यथाभिहितन्तथा हलप्रत्याहारनिष्पत्त्युत्तरमच्प्रत्याहारे निष्पन्ने भवत्यादिशब्दोकारे यथोपदेश इति सूत्रस्य प्रवृत्तिर्भवति तथोद्देश्यतावच्छेदकरूपाक्रान्ते लण्सूत्रस्थाकारेपि तस्य प्रवृत्तिदुर्वारेति प्रत्याहारग्रहणाभावे साध्ये यत्पक्षतावच्छेदकमनुबन्धत्वन्तद्व्यापकत्वम्बलवत्तरलोपप्रतियोगित्वरूपहेतोरस्त्येव हलप्रत्याहारसिद्धेः प्राक् पक्षे परं हेतोः पक्षावृत्तित्वेपि न क्षतिः अव्याप्यवृत्तेरपि कपिसंयोगस्य वृक्षे त्वद्द्रव्यत्वानुमापकताया दर्शनात् यद्यपि प्रत्याहारे ऽनुबन्धानामित्यादिनाच्प्रत्याहारे ऽनुबन्धानाङ्ग्रहणशङ्का कृता नतु हलप्रत्याहारे यदि लण्सूत्रस्थाकारो ऽनुनासिकः स्यात्तदा हलप्रत्याहारे ऽकारस्यानुनासिकस्य ग्रहणशङ्कापि कर्तुमुचितेति

तदकरणान्न्यूनतापत्तिरतो ऽस्यानुनासिकत्वमप्रामाणिकमिति भाषितन्तदपेशलम् तत्रत्याज्ग्रहणस्योपलक्षणत्वात् यथाश्रुतार्थकत्वे भवन्मतेपि उक्प्रत्याहारे णकारस्य ग्रहणाशङ्कासमाधानयोरकणेन न्यूनताया दुर्वारत्वात् उक्प्रत्याहारे णकारस्य ग्रहणमिष्टमेवेति तु न रणितो भणित इत्यादौ श्न्युकः किंतीतीण्निषेधप्रपत्तेः नच तस्योपलक्षितार्थकत्वं यद्यभिमतन्तदा ऽइउणित्यादिसूत्रचतुष्टयोपादानस्वारस्यभङ्ग इति वाच्यम् हल्प्रत्याहार एवानुबन्धाग्रहणन्तेन भाष्येण साध्यते इति भ्रमो हयवरेत्यादिसूत्रव्याख्यानोत्तरं शङ्कासमाधानयोः करणान्माभूदित्याशयेन तत्राइउणित्यादि सूत्रचतुष्टयस्य लेखनात् हल्प्रत्याहारसाधकसूत्रव्याख्याने मध्ये तथा शङ्कासमाधानयोः करणेन हल्प्रत्याहारेपि तैर्हेतुभिरनुबन्धाग्रहणसाधनस्याभिप्रतत्वमिति कल्पनसम्भवादिति कैयटानुयायिनः ॥ यत्तु बाहुलककल्पनापेक्षया भावघञन्तप्रत्याहारशब्दादर्श आद्यजिति व्याख्यानन्तदूषयति भावेत्यादिना अविशिष्टमिति गणविशेषे पाठकल्पने वृत्तिद्वयकल्पने गौरवमित्यस्य स्पष्टत्वात् एकस्मान्ङ्ञणवटा इति ङ्ञणवटा एकस्मात्परे ग्राह्या इत्यर्थः एवमग्रेपि ङ्ञणवटा इत्यत्र णकारः प्रथमसूत्रस्थो ग्राह्यः अणिति यथा इण् प्रत्याहारस्तु न तेन अचिश्नुधातु इत्यत्र सूत्रे समृद्य ग्रहणात् आदिरन्त्येन सहेति सूत्रस्थानित्यत्वे नैकस्मादित्यादि लभ्यते तत्र मानन्तु इको झल् अञ्झनगमां सनीति सूत्रद्वयारम्भ एव यदि अन्त्येन इता सह यस्य यस्यादेरुच्चारणासम्भवस्तत्र सर्वत्र प्रत्याहारे इङपि प्रत्याहारः स्यात्तथा चार्द्धधातुक इत्यनेन धातोराक्षेपे इङन्तस्य धातोः सनि इङश्चेत्यनेन गा ऽऽदेशे सूत्रद्वयवैयर्थ्यं स्पष्टमेवेति तदुक्तोरिति प्रक्रियाकारोक्तोरित्यर्थः पुंस्त्वैकवचनयोरेकस्य सौत्रत्वाश्रयणे न विशेष इत्याशयेन शङ्कते यद्यपीति ॥

ऊपदेनेति अस्य बहुव्रीहावित्यत्रान्वयः लक्षणयेति ऊपदस्येत्यादिः अभेदाध्यवसायः अभेदारोपः अत एव मृगचपलेत्यत्र पुंवद्भावः यथाश्रुतमेव सदृशे लक्षणां विनैव आदुचदात्त इत्यस्यानन्तरं फिट्स्वरेणेत्युपादाने आदुचदात्त फिट्स्वरेणेत्यर्थः पूर्तीयेत तथाचानुपपत्तिस्तस्यान्तोदात्तत्वविधायकत्वादत आह अन्तोदात इति अर्वाङ् शब्दाद्याकारस्यानुदात्तत्वमुपपादयति फिडित्यादिना अव्युत्पन्नमिति फिट्स्वरप्रवृत्तये ऽभिहितन्तत्र किंमानमिति चेदाङभिमुख इति वेदभाष्योक्तिरेव ह्रस्वग्रहणमतन्त्रमित्य-

नेन स्वरितार्द्धमात्रस्याद्यस्योदात्तत्वविधायकमिति प्रतीयेत एवाश्वासङ्गतिर्दीर्घादावप्यर्द्धमात्राया उदात्तत्वस्य लोके दर्शनात् अस्य शास्त्रस्य सर्वशाखासाधारणत्वेन सर्वोपकारकव्याख्यानस्यौचित्यात् अर्द्धह्रस्वशब्दो ऽर्द्धमात्रायां रूढ इति भाष्यविरोधश्चेत्यत आह इदञ्चेति इदम् अविवक्षितमित्यादिकथनम् लक्ष्यदर्शनमित्यनेन बोधितलक्ष्यन्दार्शितं ये रा इत्यादि तत्र तनूनपाच्छचीपतिशब्दयोरित्यादिना शङ्काग्रन्थ इति प्रतीयते तदसङ्गतिः शङ्काबोधकशब्दानुपादानादत आह अस्येति अस्य ग्रन्थस्येत्यर्थः आदुचदात्तत्वे कृत इति वनस्पत्यादिगण एव ऊप्रत्ययान्तस्वनूशब्द आदुचदात्तो निपात्यते न भ्राडितिसूत्रे निपातितस्वत्युरुषे तुल्येत्यादुचदात्तो न पाच्छब्दः एतयोः समासे ॥ समासान्तोदात्तत्वे प्राप्ते उभे वनस्पत्यादिषु युगपदित्यनेन पूर्वोत्तरपदयोः प्रकृतिस्वरे सति द्वयोरप्यादुचदात्ततत्वप्राप्तिरिति भावः एवं शचीशब्दः शार्ङ्गरवादिर्ङीनन्तत्वादादुचदात्तः पतिश्च डतिप्रत्ययान्तत्वादादुचदातः तेन शेषपूरणेन अनुदात्तावेव प्राप्नुत इत्यर्थो लभ्यते स्वरितत्वविधायकम्प्रातिशाख्यमाह मूले जात्यवदित्यादि जात्यवदिति वाक्यस्थपूर्वशब्दः । प्रकरणात्पूर्वपदपर इत्याशयेनाह पूर्वपदेति ॥ जात्यलक्षणघटकं यदत इति प्रतियोगिबोधकन्तत्स्वरूपजिज्ञासाशान्तये प्रतियोगिनन्दर्शयति उदात्तेति उदात्तश्च स्वरितश्चोदात्तस्वरितौ उदात्तस्वरिताभ्याम्पूर्वः उदात्तस्वरितपूर्वः उदातस्वरितपूर्वश्चासौ स्वरितश्चेति समासः तस्मादन्यः स्वरित इत्यर्थः एवञ्च यः स्वरित उदात्तपरकः स्वरितपरको वा तस्यान्तानुदात्तश्रुतिकस्य स्वरितस्य अत इत्यनेन बोधनमित्युक्तम्भवति तद्भिन्नस्योदात्तस्वरितपरत्वाभावे सति जात्यपदव्यवहार्यत्वमिति लभ्यते पदे इत्यस्य तात्पर्यार्थमाह अस्येति इत्यर्थः इति पर्यवसितार्थः तथा वेत्येतद्व्याचष्टे असंहितवदिति जात्यवद्भावासंहितवद्भावयोर्विकल्पार्थो वा शब्दः द्वितीयकोटौ वाशब्दोपादानेन विकल्पे ऽर्थात्तत्कोटिविपरीता कोटिर्लभ्यते तेन संहितवदित्यस्य लाभः तथाशब्देनासंहितवदित्यस्य प्रतिपादने साधकमाह पदचादीनीत्यति स्वतन्त्रोदात्तादित्येतल्लाभायाह श्लोक इति ननु लौकिकप्रयोगे इतरशाखायाञ्च समासोदात्तकत्वन्नास्तीति नियमानुपपत्तिरत आह तच्छाखायामिति ऋक्शाखायामित्यर्थः एतेन एवकारस्योक्तार्थसूचनफलकत्वेन एतौ पक्षौ आर्द्धमा-

त्रार्द्धमेव वेति पक्षौ ननु यदिनैतौ वैकल्पिकौ तदा वाशब्दस्य वैयर्थ्यमत आह वाशब्देति मूले ऽप्राकृत इति स्वरितो द्वेधा अप्राकृतः प्राकृतश्च आद्य उदात्तस्वरितयोर्यण इति स्वरितो वा ऽनुदात्त इति तित्स्वरितमिति सूत्रविहितः द्वितीय उदात्तादनुदात्तेति विहितः स्वारशब्दो न स्वरभक्तिपर इत्याशयेनाह स्वर एवेति नच सौवर्यः सप्तम्यस्तदन्तसप्तम्य इत्यत्र यथा स्वरशब्दस्य द्वारादिगणे पाठेनैजागमो भवति तथा ऽत्रापि स्यादिति वाच्यम् स्वरशब्दो द्वेधा अव्युत्पन्नो व्युत्पन्नश्च व्युत्पत्तिश्चास्यान्यत्र दर्शिता स्वयं राजन्ते ते स्वरा इति द्वारादिगणे स्वग्रामस्वाध्याययोः पाठो निगमार्थः स्वशब्दादेश्चेदेतयोरेवेति अन्यथा स्वशब्दस्य द्वारादिगणे पाठेन सिद्धे तदैयर्थ्यं स्यादुभयेव एवञ्च यो ऽव्युत्पन्नस्तस्य स्वार इति रूपम् तेनार्थवत्स्वशब्दघटितानियमेनैचः प्राप्त्यभाव इत्याशयात् बहुव्रीहिभ्रमवारणायाह ॥ स्वरितोदात्ताभ्यामिति मूले कम्पितमिति क्रियाविशेषणम् कम्पो निघातविशेषः । हरदत्तग्रन्थो भाष्यसम्मतार्थाभिधायकत्वेन युक्त एवेति मूलमसङ्गतमिति ध्वनयितुमत्रार्थे भाष्यसम्मतमाह तदुक्तमिति अनुपात्तम् शब्दशक्तिप्रतिपाद्यम् तस्य हरिग्रन्थस्य तथासति यत्सिद्धत्वमुदाह एवञ्चेति अर्द्धह्रस्वशब्दस्यार्द्धमात्राप्रतिपादकत्वसिद्धौ च अन्यशाखास्विति तदुक्तन्तैतिरीयप्रातिशाख्ये आदिरस्योदात्तसमः शेषो ऽनुदात्तसम इत्याचार्या इति । तत्र पूर्ववाक्याद्यावदर्द्धं ह्रस्वस्येति सम्बध्यते एवञ्चास्य स्वरितस्यादिर्यावद्धस्वस्यार्द्धं ह्रस्वार्द्धं कालस्य उदात्तसमो भवति शेषस्त्वनुदात्तसम इत्याचार्या इति तदर्थम्भाष्यकार आह प्रतिशाख्योक्तः पूर्वोक्तं यादृक् प्रातिशाख्यमर्द्धमेवेति तदुक्तमत इत्यर्थः ननु यदि मात्रापर एवार्द्धह्रस्वशब्दो बहुसम्मतस्तदा कथं कथञ्चिदित्यस्योपपत्तिरत आह लक्षणेत्यंशेति इति भाव इति इति मूलकृतो ऽभिप्रायः ॥

मुखञ्च नासिकाचेतीति अत्र नासिकाशब्दसमभिव्याहारान्मुखशब्दो मुखावयवतालवादिस्थानपरः आस्ये भवमिति यद्यप्यास्यशब्दस्यास्यन्दते ऽनम्प्राप्य द्रवीभवतीत्यर्थे ऽन्येष्वपि दृश्यत इति डप्रत्यये कर्तरि सति मुखपरत्वमथवान्नेन द्रवीक्रियत इत्यस्मर्भावितण्यर्थात्स्यन्दधातोः परिस्रेत्यत्रेव कर्मणि डप्रत्ययेन मुखपरत्वन्तथापि सर्वेषान्तत्तुल्यमिति तदुपादानवैयर्थ्यमत आस्यभवतालवादिस्थानपरत्वमित्याशयेनाह तालवादीनीति मूले प्रा-

कालिकत्वरूप इति नाभिप्रदेशात्प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्द्ध्वमाक्रामन्नुरःप्रभृतीनि स्थानान्याहन्ति ततो वर्णाभिव्यक्तिः तत्रोत्पत्तेः प्राग्यदा तत्तत्स्थानानि जिह्वाग्रोपाग्रमध्यमूलानि सम्यक् स्पृशन्ति तदा स्पृष्टता जिह्वाग्रादीनां सम्यक् स्पर्शश्च तत्तत्स्थानेन सह बोध्यः ईषद्यदा स्पृशन्ति तदा ईषत्स्पृष्टता समीपावस्थानमात्रेण संवृतता बाह्यास्तु वर्णोत्पत्तेः पश्चान्मूर्द्धि प्रतिहते निवृत्ते प्राणाख्ये वायौ उत्पद्यन्ते गलविवरसङ्कोचात्संवारः तस्यैव विकासाद्विवार इत्यादिरीत्या भवन्तीत्येषान्न वर्णोत्पत्तेः प्राक्कालिकत्वम् उदात्तत्वादीनामेतेषु गणतन्तुसावर्ण्यानुपयुक्तत्वात्तरतम्यपरीक्षोपयुक्तत्वे रूपधर्मसादृश्यात् यद्यपि वर्ग्याणाञ्चादीनामेकमेव स्थानन्तालिवति भेदाभावात् तुल्यत्वन्नोपपद्यते तथापि कार्यभेदेन स्थानेषु भेदारोपेण भेदघटिततुल्यत्वस्योपपत्तिः यत्तु नासिका न स्थानङ्किन्तु करणमिति मतन्तन्न युक्तमस्यन्त्यनेन वर्णानिति भाष्यात्कण्ठादीनामपि करणत्वप्रतीतेः स्थानत्वव्यवहारस्तु वर्णाभिव्यक्तिजनकवायुसंयोगाधारत्वाद्वर्णाधारत्वारोपेण ॥ एवञ्च आदीनान्नासिक्यव्यवहारस्य प्रातिशाख्यशिक्षादौ दर्शनेन नासिकायाम्भवा इत्यर्थकरणेन नासिक्या अमङ्णनमा इति व्याख्यातृवचनेन च नासिकापि स्थानमित्याशयेनाह अत्र यथेति अनुस्वारो अमा अनुनासिका इति तैत्तिरीयप्रातिशाख्यम् । यमानुस्वारनासिक्यानान्नासिका अनुनासिकाश्चोत्तमा इति कात्यायनप्रातिशाख्यम् । वर्गोत्तमा अनुनासिका भवन्ति चशब्दात्स्वस्थानाद्यपरित्यागद्वारेण नासिकास्थानन्द्वितीयमेषामित्यर्थ इति तद्भाष्यञ्च शिक्षेति एऐ तु कण्ठ्यतालव्या ओऔ कण्ठोष्ठ्यौ स्मृताविति पाणिनीयशिक्षेत्यर्थः तत्र तपरत्वाभावेन प्लुतानामपि सङ्ग्रहादत्र तपरसूत्रस्य प्रवृत्तावनुदात्तभङ्गापत्तिरतस्तदप्रवृत्तिः शिक्षादुक्तानुवादत्वेनेत्यत्रादिपदेन लोकानुभवपरिग्रहः ॥

त्रैपादिकस्य परस्य पूर्वदृष्ट्या ऽसिद्धत्वाभावे दोषमाह ततश्चेति धत्वेत्यादि अस्य सूत्रस्य विधित्वपक्षे त्रिपाद्यामपूर्वमपठितं यच्छास्त्रन्तदृष्ट्या परस्यासिद्धत्वबोधकत्वाभावेन गोदुहमानिति स्थिते धत्वजश्त्वयोः प्राप्तयोः पदान्ते धत्वस्य जश्त्वापवादत्वेनादौ धत्वम् ततो जश्त्वानुनासिकत्वयोर्जश्त्वमन्तरङ्गम् नचानुनासिकत्वञ्जश्त्वापवादः सुगण्वानित्यादौ पर्जन्यन्यायेन णकारादेर्णकाराद्यादेशविधायकत्वे चारितार्थ्यसम्भवेन येन ना-

प्राप्तन्यायविषयाभावात् किन्तु विजातीयादेशाभावेन निरवकाशत्वेन तद्बाच्यमिति तत्रादावपवादविषयेप्युत्सर्गस्य प्रवृत्तेर्जश्त्वम् ततो ऽनुनासिकः नन्वत्र घत्वोत्तरं झय इति वत्वापत्तिः जश्त्वस्य पदसंज्ञासापेक्षत्वेनाधिकापेक्षत्वेन बाहिरङ्गत्वात् झय इत्यस्य तु तदनपेक्षत्वेनान्तरङ्गत्वम् नचाप्य जश्त्वापवादत्वात्प्राक् प्रवृत्तिरिति उदाश्वित्वानित्यादौ तान्तात्परत्वेन तसौ मत्वर्थ इति भसंज्ञाविषये तत्प्राप्त्याऽपवादत्वासम्भवात् अत एव परत्वादादौ जश्त्वमिति न किञ्चाविरोधेनैतादृशस्थले परत्वन्न नियामकम् एवमेव वत्वस्य भष्भावात्प्राक् प्राप्तिः ततो जश्त्वभष्भावानुनासिकत्वानाम्प्राप्त्या गोधुङ्त्वानिति स्यादिति चेन्न घत्वोत्तरं वत्वभष्भावजश्त्वानाम्प्राप्तौ परत्वादन्तरङ्गत्वाच्च जश्त्वस्यैव प्राप्तेः नच जश्त्वाद्वत्वमुक्तरीत्यान्तरङ्गम् झय इति। सूत्रस्थापि पूर्वपरोभयसापेक्षत्वेनोभयोः समत्वात् नच स्थानभेदेनाविरोधात्परत्वन्न नियामकमिति वाच्यम् विषयभेदेपि विप्रतिषेधशास्त्रस्य प्रवृत्तिदर्शनात् भष्भावाज्जश्त्वस्यान्तरङ्गत्वन्तु स्फुटमेव ततो वत्वात्परत्वादनुनासिकः अनित्यत्वन्तूभयोः समामित्याशयात् पूर्वत्रासिद्धमित्यस्याधिकारत्वे तु घत्वात्प्राग् भष्भाववत्वयोरप्राप्त्या प्रथमतो घत्वन्ततो जश्त्वस्यासिद्धत्वात्ततः प्राग् भष्भावः वत्वन्तु न प्रवर्तते घत्वादीनामसिद्धत्वेन तदृष्ट्या हस्यैव सत्वात्॥ इदं विधिसूत्रमेवास्तु तथाप्युक्तप्रयोगस्य सिद्धिर्भविष्यतीति शङ्कानिराचष्टे नचेत्यादिना अतिदेशान्तरवत् स्थानिवत्वातिदेशान्तादिवद्भावातिदेशवत् नचास्मिन्सूत्रे वतिनिर्देशाभावादस्य सूत्रस्यातिदेशाविधायकत्वेनातिदेशान्तरवदित्यसङ्गतमिति वाच्यम् विनापि वतिं वत्यर्थो गम्यत इति भाष्यकारोक्त्या वत्यर्थलाभात् अस्य परिभाषात्वं वास्तु पूर्वत्वावच्छिन्नशास्त्रत्वमस्यालिङ्गम्भविष्यतीति पूर्वपक्षकर्त्रभिप्रायः उभयथापि दोष इत्याशयेन समाधत्ते। सपादेत्यादिना। ननु मध्ये पाठसामर्थ्यात्स्वापेक्षपूर्वत्वाश्रयशास्त्रेषु प्रवृत्तिरिति चेत्तत्राह मध्य इति एवं चेष्टासिध्या नास्यातिदेशशास्त्रत्वन्नापि परिभाषाशास्त्रत्वन्नापि स्वतन्त्रविधित्वम्मूलोक्तदोषात्किन्त्वधिकारसूत्रत्वमेवेति भावः रोरित्यस्य प्रसङ्गादिति मूलमसङ्गतम् रलोपोत्वयोः प्राप्तौ रलोपस्यासिद्धत्वेनोत्वे मनोरथसिद्धेर्निष्प्रत्यूहत्वादतो मूलाशयम्प्रकटयति सिद्ध इत्यादिना परत्वादिति कार्याऽसिद्धत्ववादिमते शास्त्रे ऽसिद्धत्वारोपाभावेन तत्र विप्रतिषेधशास्त्रस्य

प्रवृत्तिः स्यात्तथाच तद्विधेयकार्यस्यापि तद्द्वारा प्रवृत्तिर्जायते कार्यमसिद्धमिति बुद्धिस्त्वधुना न सम्भवति कार्यस्यासिद्धत्वादिति भावः तत्र जाते कार्ये अस्य जननोत्तरमित्यादिः शास्त्रयोः प्राप्तौ विप्रतिषेधशास्त्रस्य विरोध एव प्रवृत्तिः सच विरोधः कार्यद्वारा बोध्यः देवदत्ततहन्तृहतन्यायेनेति देवदत्तस्य हन्तरि हतेपि देवदत्तस्य यथा न दर्शनन्तथात्र देवदत्ततस्थानीयस्य रोहननसदृशलोपसम्पादकं रोरीति शास्त्रन्तस्य प्रवृत्तिरेव हननन्तस्मिन्कृते रोरदर्शनमस्तीति हशि चेति न स्यात् आरोपेति कथनं वस्तुतो ऽभावो नास्तीति सूचनाय पूर्वत्वस्य सावधिकतया यदि परस्य सत्तैव न स्यात्तदा पूर्वत्वमपि तस्य वक्तुमशक्यमिति पूर्वत्रासिद्धमिति वाक्यस्य प्रवृत्तिर्न स्यादतो वस्तुतः परसत्ता ऽपेक्षितैव तथा च तत्र न तत्कालिकाभावप्रतियोगित्वम् किन्तु शास्त्रबलादभावप्रतियोगित्वारोप एवेति भावः स्थानिभूतेति उत्वलोपयोरित्यादिः एतेन पूर्वत्रेति सूत्रस्य वैयर्थ्यापत्तिर्ध्वनिता सिद्धान्तव्याकोपमुपपादयति शास्त्रेत्यादिना शास्त्रस्य त्रैपादिकशास्त्रस्य अधुना शास्त्रासिद्धत्वपक्षाभावेपि शास्त्रस्येत्यस्य कथनन्दृष्टान्तार्थम् शास्त्रजज्ञानवेलायाम् त्रैपादिकशास्त्रजन्यवाक्यार्थज्ञानसमय इत्यर्थः भवन्मते विप्रतिषेधशास्त्रप्रवृत्तौ त्रैपादिकशास्त्रबोध्यकार्यस्य लक्ष्ये प्रवृत्तिविघातो निमित्तमिति वक्तव्यन्तच्च न सम्भवति तस्याजातत्वादिति सिद्धान्तव्याकोप इति भावः पूर्वादिपदे लक्षणास्त्र तथाच लक्ष्ये कार्यप्रवृत्तिर्नापेक्षिता किन्तु तात्कालिकज्ञानविषयपूर्वशास्त्रजन्यज्ञानविषयकार्यज्ञानमात्रमपेक्षितन्तच्चास्त्येवेति मनोरथस्य सिद्धिः स्यादेव अभावादुत्तरस्येत्यत्राप्युत्तरपदमुत्तरशास्त्रबोध्यकार्यपरमिति न सिद्धान्तव्याकोप इत्याशयकशङ्कां निराचष्टे नचेति ममापि कार्यासिद्धत्ववादिनो ममापीत्यर्थः पूर्वपरपदयोः अत्र पूर्वपदमुपात्तम्परपदन्त्वाक्षिप्तं बोध्यम् शास्त्र एव विषयतासम्बन्धेन शास्त्रजन्यज्ञानाविशिष्टकार्य एव एवकारेण लक्ष्ये कार्यप्रवृत्तिव्यावृत्तिः ननु पूर्वत्रासिद्धमिति शास्त्रारम्भ एव मानमत आह फलाभावादिति ननु फलमप्युक्तमेवेत्यत आह गौरवादिति कार्यासिद्धत्वपक्षम्परित्यज्य शास्त्रासिद्धत्वपक्षः स्वीकार्यस्तथा सत्युक्तार्थे लक्षणां विनापि प्रयोजनानामुक्तसिद्धान्तस्य च निर्वाहो भविष्यति यद्येवन्न क्रियते किन्तु कार्यासिद्धत्वमेवाश्रीयते उक्तः प्रकारो ष्याश्रीयते तदा गौरवं स्पष्टमेवेति भावः कार्यासिद्धत्ववादी शङ्कते ननु मनो-

रथ इति दर्शने निरस्येत्यादिः रूपत्वेनेति अभावाभावस्य प्रथमभावप्रतियोगिरूपत्वादित्यर्थः जातस्येति निरधिष्ठानारोपासम्भवेनारोपार्थज्ञातस्येत्यर्थः पूर्वरीत्या देवदत्तहन्तृहतन्यायेन अकाराभावेन उकाराभावस्याकाररूपत्वाभावादिति भावः आदिपदेन औकारस्थानिकस्योत्वस्यैकारस्थानिकेत्वस्य परिग्रहः ननु नाभावे कर्तव्ये मुत्वासिद्धत्वनिषेध एवं सति व्यर्थः स्यात् आङो ऽकारेण व्यवधानान्नाभावाप्राप्तेरिति देवदत्तहन्तृहतन्यायोत्र नाश्रयणीयस्तथा सत्यकारबुद्ध्या पररूपम्भविष्यतीत्याशयेन शङ्कते मुत्वस्येति युक्तमिति लाघवादिति शेषः एतच्चाभ्युपेत्यवादेन वस्तुतस्तूक्तज्ञापकेनापि न लक्ष्यस्य सिद्धिः उत्वे ऽसिद्धत्वारोपेणाकारबुद्धौ प्रवृत्तेनातो गुण इति शास्त्रेण पररूपे सत्यकारो भविष्यति ततो वृद्धावप्युकारस्य लक्षणस्य श्रवणन्न स्यादेव पररूपेण तस्य निवर्तनात् नचोकारासिद्धत्ववन्मकारोप्यसिद्ध इति दात्परत्वबुद्ध्या पुनर्मुत्वस्य प्रवृत्तिर्भविष्यतीति वाच्यम् लक्ष्ये लक्षणस्य पुनः प्रवृत्तेः शास्त्रविरुद्धत्वात् यदि पुनः प्रवृत्तिरपि नमुट्टादेश इति वार्तिकैकवाक्यतापन्ननमुने इति शास्त्रारम्भसामर्थ्याद्भविष्यतीति कल्प्यते तर्हि कार्यासिद्धत्ववादिनो महान् क्लेशः एवम् नमुन इति सूत्रवत् अत्रैव शास्त्रासिद्धत्व एव ननु देवदत्तहन्तृहतन्यायस्यानित्यत्वमन्यत्र दृष्टन्तद्रीत्या ऽत्रापि निर्वाहे ज्ञापकानुसरणं व्यर्थमित्याशङ्कान्निराचष्टे नचेत्यादिना तौ सदित्यादिनिर्देशस्य न्यायानित्यत्वज्ञापकत्वं शिथिलयति हत इत्यादिना सुतरामित्यस्य नोन्मज्जनन्देवदत्तस्येति शेषः तेन तौ सदिति निर्देशेन ननु ताविति वदत्रापि न्यायाविषयत्वमस्त्वित्यत आह प्रकृत इति ननु कार्यासिद्धत्वपक्षेपि न कार्यमसिद्धमनिष्पन्नमिति प्रकृतसूत्रेण प्रतिपाद्यते जाते कार्ये तन्निष्पत्त्यभावस्य वक्तुमशक्यत्वात् किन्तु पूर्वत्र कर्तव्ये परम्परशास्त्रबोध्यङ्कार्यमसिद्धत्वकालिकाभावप्रतियोगिप्रवृत्तिकर्तृत्ववादित्यर्थोस्तु एतेन कार्ये स्वकर्तृकप्रवृत्त्यभावकत्वबोधनेन त्रैपादिकशास्त्रस्य पूर्वमप्रवृत्तिरेव कल्प्यते तया च नाम् इत्याद्यासिद्धिरिति चेन्न राजभ्यामित्यत्र राजन्भ्यामिति स्थित्यवस्थायाङ्क्यापि सपादसप्ताध्यायीस्थकार्यस्य प्राप्त्यभावेन त्रैपादिकनलोपस्य प्रवृत्त्यभावबोधनासम्भवेन नलोपे जाते ततो भवदुक्तार्थे पक्षे दीर्घस्य प्रवृत्यापत्तेः एवं वृक्ष इहेत्यादौ यलोपे जाते गुणापत्तेः नचात्र सूत्रे ऽसिद्धमिति न कार्यमविद्यमानवदि-

त्यनुवर्तनीयत्वावतैवेष्टसिद्धिर्भविष्यति पूर्वत्र कर्तव्ये परम्परशास्त्रबोध्य-
मविद्यमानवदित्यर्थोस्तित्वत्यर्थादिति वाच्यम् अप्रवृत्तस्याविद्यमानवद्भावविधा-
नासम्भवेन पूर्वमप्रवृत्तेरावश्यकतया मूलोक्तदूषणापत्तेः नच शास्त्रासिद्धत्वस्वीकारेपि
राजभ्याम् वृक्ष इहेत्यस्यासिद्धिरेव शास्त्रस्यासिद्धित्वेपि कार्यस्य सिद्धतया दीर्घादेः
प्रवृत्त्यापत्तेर्दुर्वारत्वादिति वाच्यम् शास्त्रस्यासिद्धत्वप्रतिपादनद्वारा कार्यासिद्धत्वस्य
प्रतिपादनात् एवञ्च यत्र सपादसप्ताध्यायीस्थशास्त्रस्य त्रैपादिकस्य युगपत्प्राप्तिस्तत्र परं
शास्त्रमसिद्धमप्रवृत्तमित्यनेन बोधने सति परशास्त्रेण लक्ष्ये कार्यसंस्कार बुद्धिर्न भवति यत्र
तु न द्वयोर्युगपत्प्राप्तिस्तत्र त्रैपादिके जाते ऽपि शास्त्रे ऽभावारोपे तन्निष्पाद्यकार्ये ऽप्रवृत्तज्ञानेन
पूसक्तं सपादसप्ताध्यायीस्थं कार्यम्भवत्येव अग्नी इतीत्यत्र प्लुतस्थानिकपूगृह्यत्ववत्
यत्र तु शास्त्रासिद्धत्वज्ञानद्वारा कार्यानिष्पन्नत्वज्ञानेन सपादसप्ताध्यायीस्थशास्त्रोद्देश्यतावच्छेदकाज्ञानन्तत्र
तस्याप्रवृत्तिरेव राजभ्यामित्यादौ यथा तथा च मूलोक्तप्रयोजनस्य प्रथमरीत्या सिद्धिरित्याशयेनाह अन्यत्र विस्तर इति मूले एतेनेति उक्तरीत्या कार्यासिद्धत्वस्य प्रतिपादनासम्भवेनेत्यर्थः नच पूर्वोक्तप्रकारद्वयेपि ऊर्णुनाविषतीत्याद्यासिद्धिः णत्वविधायकशास्त्रस्यानिष्पन्नत्वज्ञानद्वारा नकारबुद्ध्या द्विर्वचनेपि वस्तुतो णकारघटितस्यैव द्विर्वचनञ्जातमिति परभागेपि णकारः श्रूयेतेति वाच्यम् स्यादिष्वभ्यासेन चाभ्यासस्येति ज्ञापकेन सपादसप्ताध्यायीस्थकार्ययोग्ये विषये त्रैपादिकशास्त्रस्य पूर्वमप्रवृत्तिकल्पनेनादोषात् ननु लोकप्रसिद्धपाठस्याधुनिकत्वेन तदपेक्षा नोचितेत्यत आह त्रिभिश्चेति पादमात्रिकाविति विसर्गस्य व्यञ्जनरूपतया ऽर्द्धमात्रिकत्वेन तदर्द्धस्यास्य पादमात्रिकत्वमत एतस्य तथैवोच्चारणङ्कार्यमिति भावः ॥ यत्तु ऋल्तृआविति स्थिते ऋत्यक इति प्रकृतिभावप्रवृत्तिपक्षे ऋअलाविति स्यादिति कस्य चिदुक्तिस्तान्दूषयितुमुपक्रमते ऋलृआवित्यादिना नच गुणोत्तरमपि यणादेशो ऽचः परस्मिन्निति स्थानिवद्भावेन ऋत्यक इति प्रकृतिभावप्रवृत्त्या न स्यादिति वाच्यम् प्रत्यासत्त्या ऋकाररूपाज्जनितकार्यस्यैव प्रकृतिभावेन प्रतिबन्धात् इति पाठ इति एतेन तस्यासाम्प्रदायिकत्वन्ध्वनितम् आगन्तूनामन्ते सन्निवेश इति न्यायविरोधात् ननु ऋलृवर्णयोरित्यनुपपन्नम् षष्ठीसमासस्य समानाधिकरणेन षष्ठी न समस्यत इति निषेधात् कर्मधारय

इत्यपि न सम्भवति तस्यापि पूक्ते षष्ठ्यन्तपदसम्बन्धितया तेन निषेधस्य प्राप्तेरित्याशङ्क्याह निराचष्टे पूरणेति नतु कर्मधारयस्येति अनन्तरस्येति न्यायादिति शेषः ननु तस्य निषेधस्य विषये कर्मधारयाभावोप्यन्यत्र दृष्ट इत्यत आह बहुलग्रहणेनेति भाष्योक्तेति यजुषः पीयमानस्येत्यादौ नच समानाधिकरणमसमर्थवदित्यतिदेशात्कथङ्कर्मधारय इति वाच्यम् समानाधिकरणाधिकारे पूर्वकालैकेत्यादिवचनपाठेन तस्यापूर्वत्वेज्ञापनात् नचासामर्थ्यादेव समासाप्राप्तौ समानाधिकरणेन षष्ठी न समस्यत इति निषेधवैयर्थ्यमिति शङ्क्यम् सर्पिः कालकमित्यादाविसुसोरिति षत्वाभावार्थमावश्यकस्य तस्य वचनस्य सर्पिष्पीयत इत्यत्रापि प्रवृत्तिः स्यादिति तद्धारणायाधात्वभिहितं समानाधिकरणमसमर्थवद्भवतीति कल्प्यते एवञ्च यजुषः पीयमानस्येत्यत्र षष्ठीसमासवारणाय समानाधिकरणेति निषेधस्यावश्यकत्वात् नचैवम्पूर्वः पचन्नित्यादौ पूर्वापरेत्यस्य सूत्रस्य चारितार्थ्येनान्यस्मिन्कर्मधारये समानाधिकरणमसमर्थवदित्यस्य प्रवृत्तौ प्राप्तायां कर्मधारयो न स्यादिति वाच्यम् पूर्वः पचन्नित्यादौ वचनप्रामाण्यादिति समर्थसूत्रस्थभाष्यप्रामाण्यादनभिधानेन समासाभावस्य सत्वात् एवञ्च प्राप्ते कर्मधारये न किञ्चिद्बाधकम् अयम्पक्षः प्रथमान्तेनेति पक्षः ॥ अत एव परिनिष्ठितविभक्त्या समास इति पक्षस्वीकारादेव यदुक्तम्प्राग्भाष्योदाहृतेति तत्र मानन्तु अस्य वर्णस्येत्यर्थः सहिवहोरिति सूत्रे ऽवर्णस्येति प्रयोगो ऽनेकमन्यपदार्थ इति सूत्रस्थान्यस्य पदस्येत्यर्थको ऽन्यपदेति प्रयोगश्चेति बोध्यम् एकविभक्तिचापूर्वनिपात इति समुदायाभिधानमेकविभक्तिग्रहणाभावे ऽपूर्वनिपात इत्यस्यानर्थक्यमित्यभिप्रायेण ज्ञापकन्त्वेकविभक्तिग्रहणमेव अतिप्रसङ्गम् तेन सूत्रेण पूर्वपदस्वरप्राप्तिरूपातिप्रसङ्गम् प्रतिपदोक्तेति तृतीयासप्तमीति यदोपादानेन यः समासो विधीयते तस्य ग्रहणम्परिभाषया भवतीति भावः यत्तु कालसमयवेलास्विति निर्देशेनाकारहकारयोर्न सावर्ण्यमित्येव कल्प्यताङ्किमस्मिन्सूत्रे आकारस्य प्रश्लेषेणेति तन्मतन्निरस्यति निर्देशेनेत्यादिना वेलास्वितीति निर्देशस्य ज्ञापकत्वमर्थविशेषे चेत्यत्र ज्ञापकाभिधानन्तत्र तज्ज्ञाप्यं वचनमानुमानिकार्थाभिधायकमेव भवति अनुमितिस्तु व्याप्तिज्ञानादिघटितगुरुतरसामग्रीप्रयोज्येति गौरवमिति भावः अत्र न्यायः आकारः हकारसावर्ण्याभाववान् षत्वाप्रयोज्यकत्वादिति कल्पनीयः ननु नाञ्झला-

वित्यत्र दीर्घस्य सत्वेन प्लुतस्य सद्भावे मानन्नास्तीत्यत आह व्याख्यानादिति प्रयत्नभेदेन। ईषद्विवृतेतिप्रयत्नभेदेन भाव्यमिति प्रयत्नभेदे सति सावर्ण्याभावः सूत्रप्राप्त्यभावप्रयोज्य एव भवति यदा तु न प्रयत्नभेदकल्पना तदा चेत्सावर्ण्यन्तदा फलभेदः स्पष्ट एवेति शस्य ईकार इति सूत्राभावे ह्रस्वेकारशकारयोः सावर्ण्याच्छकारस्याक्त्वात्सवर्णदीर्घप्राप्तिः ईकारस्य तु तस्याच्त्वादिति विशेषः॥ सिध्मादिगणे सम्प्रति शीतशब्दपाठानुपलम्भादाह शीतशब्दो हीति नन्वेतादृशक्लेशेन शीतलशब्दसाधनापेक्षया लाघवेन शीङ एव रूपमित्यस्तु तथाचोक्तं ज्ञापकं सुस्थमेवेत्यत आह किञ्चेति युक्तमिति लाघवादिति शेषः अन्यथा शकारो ऽच्कार्यानिष्पादक इति वचनान्तरकल्पनाप्रयुक्तगौरवं स्पष्टमेव किञ्च शीङः शकारोच्चारणं शिश्ये इत्यादौ चरितार्थम् तत्रोत्तरखण्डे एरनेकाचो ऽसंयोगेति यण् शकारसत्व एव भवति दीर्घस्तु पूर्ववन्न प्रवर्तते वार्णादाङ्गस्य बलवत्वात् मूले सूत्रविशेषस्य प्रतीकमधृत्वा व्याख्याने सन्देहो भविष्यतीत्यतो व्याचष्टे ग्राहकेति अत्र च परेणाण्ग्रहणे च ननु तपरसूत्रस्थानणि विध्यर्थतया लृकारस्य ग्रहणार्थन्तपरकरणमस्त्विति शङ्कान्निरस्यति नच तपरेत्यादिना विध्यर्थत्वमभ्युपेत्यैव समाधत्ते स्थानेन्तरतमेति एवं ज्ञापितेपि परेणाण्ग्रहणमिति ज्ञापितेपि वैयर्थ्यमिति स्वविषये चरितार्थ्याभावादिति भावः स्वरूपाभ्यनुज्ञानार्थेति यद्यनेनादेशविधानन्न स्यात्तदा ऽचीकृतत् अवीवृधत् अमीमृजदित्यादिष्विररारामप्रवृत्तिः स्यादिति दीर्घऋकारस्य स्वरूपोपलम्भो न स्यादिरादेशेनापहरात्सत्ति त्वस्मिन्दीर्घस्वरूपोपालम्भ इति स्वरूपाभ्यनुज्ञेत्यर्थः यत्त्वस्य ऋत इति स्थानषष्ट्यर्थान्वयायादेशत्वेन भाव्यमानेति परिभाषाप्रवृत्तिः स्यादतोयमेव तकारो भाव्यमानोपि सवर्णग्राहको भवतीत्यर्थे ज्ञापक इति तन्न अपूर्वबोध्यत्वमेव भाव्यमानत्वमित्यर्थस्य प्रसिद्धत्वात् अपूर्वबोध्यत्वञ्च स्थानिस्वरूपविजातीयनिष्पाद्यत्वम् भाव्यमानोकारविषय एव सवर्णग्राहकत्वस्य सुप्रसिद्धत्वाच्च तावतैवादसोसेरित्यत्र निर्वाहस्य सम्भवात्॥ ननु ग्राहकशास्त्रस्याचार्येण पठितत्वादनिष्पत्तेरित्ययुक्तमतो भावार्थमाह वर्णानामित्यादिना तावत् आदौ नन्वेतादृशक्रमेण वाक्यार्थनिष्पत्तावन्यत्रास्य स्वावित्यादौ सवर्णग्रहणवन्नाञ्झलावित्यत्रापि ग्राहकशास्त्रप्रवृत्तिः कुतो नेत्यत आह अयम्भाव इति एतत् नाञ्झलावित्येतत् परिहारेणेति

अपवादविषयपरिहारेणैवोत्सर्गप्रवृत्तेरङ्गीकारात् अन्यथा नाज्झलाविति-तद्वाक्यार्थापर्यालोचने अनापत्तिरिति अप्रामाण्यज्ञानानास्कन्दितशक्ति-ग्रहस्यैव शाब्दबुद्धिहेतुत्वादिति शेषः नचेति नहीत्यर्थः एतद्वाक्यार्थबोधात् नाज्झलाविति वाक्यार्थबोधात् तन्निश्चयः सवर्णपदार्थनिश्चयः तथा च तुल्यास्यसूत्रार्थबोधो यद्यपि प्राग् भवति तथापि निश्चितो न सम्भवतीति तत्राप्रवृत्तिः बाधकाभावादिति प्रतिबन्धकबाधबुद्ध्यभावादित्यर्थः विध्यपेक्षत्वेनेति प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्याभावबुद्धिकारणतायां प्रसिद्धत्वादिति भावः षत्वमितीति अत्र षत्वस्यासिद्धत्वादादौ ढत्वान्ततः षढोः कः सीति कत्वान्ततः षत्वस्य प्राप्तिरिति बोध्यम् ननु ढत्वादीनामसिद्धत्वात्संयोगान्तलोपः प्राप्नोतीत्येव कुतो नोक्तमत आह सर्वस्येति एकया युक्त्या आकारप्रश्लेषरूपया युक्त्या न्यायानादरादिति न्यायस्य पूर्वत्रासिद्धमिति युक्तेः प्रवृत्तिविषये ऽनादरादित्यर्थः ननु सादृश्यभेदनिबन्धनत्वाद्धातौ धातुसंज्ञा न प्राप्नोतीत्यत आह बाधातावितिं अत एव याति वातीति निर्देशसङ्गतिः ॥ स्व्यर्थानिमित्तकेति बहूपेक्षस्य बहिरङ्गत्वात् ननन्वत्र नाजानन्तर्य्यपरिभाषाप्रवृत्तिः यत्राचः पञ्चम्यन्तशब्दबोध्यस्यान्यनिरूपितानंतर्यमाश्रयणन्तत्रैव तत्परिभाषायाः प्रवृत्तेः सम्प्रदायसिद्धत्वात् यत्रान्तरङ्गे बहिरङ्गे वाजानन्तर्यमित्यर्थस्तु न युक्तः पचावेदमित्यादावसिद्धत्वाभावप्रसङ्गादत आह ततोपीति टापोपीत्यर्थः यद्यप्यर्थापेक्षत्वमुभयत्र तथापि लोपस्याधिकापेक्षत्वम् प्रकृतिप्रत्ययसमुदायापेक्षत्वात् किञ्च टापो लिङ्गापेक्षा तच्च लिङ्गम्प्रथमत उपस्थितम्भवति सङ्ख्या तु तदुत्तरम्प्रतीता भवतीति टाप एवान्तरङ्गत्वमिति भावः ननु भत्वावच्छिन्नम्प्रति विभक्तित्वेन कारणतेत्येवङ्कार्यकारणभावो न सम्भवति वृषण्वसुः वृषणे श्व इत्यत्र व्यभिचारात् ॥ यदि भसंज्ञासामान्यम्प्रति विभक्तेर्निमित्तत्वाभावेपि लोपविधायकशास्त्रप्रवृत्तिहेतुभसंज्ञाविभक्तिनिमित्तिकैवेति विभाव्यते तदा याः पश्यसीत्यादौ भसंज्ञानिमित्तविभक्तिनिमित्तकात्परस्वरूपनिमित्तकत्वेन टापो लोपाद्बहिरङ्गत्वमपि सम्भाव्यत इत्यत्र आह अर्थनिमित्तकेति अभावादिति अयम्भावः शब्दशास्त्रे शब्दस्य प्राधान्यादसिद्धम्बहिरङ्ग इति परिभाषाघटकनिमित्तबोधकाङ्गशब्देन शब्दरूपं तद् गृह्यत इति नियमः अत एव त्रयादेशे स्वस्तस्य प्रतिषेध इति वार्तिकं सङ्गच्छते अन्यथा स्त्रीत्वा-

पेक्षतिस्वादेशापेक्षया तदनपेक्षत्रयादेशस्य पूर्वप्रवृत्तौ ततस्तस्य स्थानिवद्भावेन त्रिशब्दत्वात्तस्य स्थाने तिस्रादेशे लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तेः पुनस्त्रयादेशाप्रवृत्तौ वार्तिकासङ्गतिः स्यादेव अत एव गौधेरः पचेतेत्यस्य सिद्धिरन्यथा ऽतो येय इत्यस्याङ्गसंज्ञासापेक्षत्वेन बहिरङ्गतया वलि लोपो न स्यात् अर्थापेक्षबहिरङ्गत्वाभावे नलोपः सुबिति सूत्रस्थङ्कृति तुग्ग्रहणं ज्ञापकमिति अन्यथा वृत्रहभ्यामित्यादौ पदसंज्ञासापेक्षनलोपस्य बहिरङ्गत्वादेव तुगभावस्य सिद्धौ तद्वैयर्थ्यं स्यादेव नच भ्याम्निमित्तकत्वमेव नलोपस्य नतु पदसंज्ञासापेक्षत्वमिति शब्दस्वरूपस्याङ्गशब्देन ग्रहणेपि दोष एवेति वाच्यम् भ्यामः पदसंज्ञाभ्यामिति निमित्तत्वेपि नलोपभ्यत्वनिमित्तत्वात् परम्परया निमित्तत्वाश्रयणे तु मानाभाव इति लाक्षणिक इति लक्षणशब्दो ऽत्र भीम इतिवदेकदेशशक्त्या लक्षणप्रतिपदोक्तपरिभाषापरस्ततो ऽर्हतीत्यर्थे ठञ् लक्षणप्रतिपदोक्तपरिभाषाया अविषय इत्यर्थः तदविषयत्वे हेतुमाह नकारजाविति तद्विषये धातुसंज्ञाविषये दर्शनेनेति एवं च येषां लक्षणप्रवृत्तिज्ञानोत्तरकालिकज्ञानविषयस्वरूपकत्वन्तेषामपि धातुपाठे पाठसामर्थ्येन धातुसंज्ञाविधौ तस्याः परिभाषाया अप्रवृत्तिरिति भावः नच भूवादय इति सूत्रदृष्ट्या तेषामसिद्धत्वान्न लाक्षणिकानां दर्शनमिति परिभाषाप्रवृत्तिः स्यादेवेति वाच्यम् यादृशानुपूर्वीकस्य धातुसंज्ञा ऽभिप्रेता तादृशानुपूर्व्यवच्छिन्नस्य ज्ञानन्धातुसंज्ञाप्रवृत्तिप्राक्कालिकं लक्षणज्ञानपूर्वकालिकम्भवति ततो ऽसिद्धत्वारोपे ऽधिष्ठानङ्कारणमस्ति अधिष्ठानस्य परस्य ज्ञानसत्वे हि परत्वज्ञानसापेक्षपूर्वत्वज्ञानन्धातुसंज्ञाविधायकसूत्रविशेष्यकंम्भवति ततो ऽसिद्धत्वारोप इति नश्चापदान्तस्येत्यादिसूत्रज्ञानसापेक्षत्वमस्त्येवेत्याशयात् यत्तु वर्णग्रहणे आदेच उपदेश इति सूत्रस्थोपदेशग्रहणाल्लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तत इति तन्न ओत्सूत्रस्थभाष्यविरोधात् तत्र हि हे चित्रगोऽमित्यत्र ओदितिसूत्राप्रवृत्तिः परिभाषया साधिता तस्मादादेच इति सूत्रस्थमुपदेशग्रहणम्परिभाषाया अनित्यत्व एव ज्ञापकम् वर्णग्रहणेपि तस्याः क्वचित्प्रवृत्तिस्वीकारादेव पशुष इत्यस्यं चिकीर्षति जिहीर्षतीत्यस्य च सिद्धिः आद्ये पशुं सनोतीति विग्रहे जनसनेति विट्प्रत्यये विड्वनोरित्यात्वे आकारस्य लोपो लाक्षणिकस्यापि भवति अन्त्ययोरज्झनगमां सनीति दीर्घेपि वृतो वेतीड्विकल्पो न ऋकारस्य लाक्षणिकत्वात् अनित्यत्वस्य फलान्तर-

न्तु वापयति क्रापयतीत्यादौ पुक्सिद्धिरिति एतदेवाह आत इति ननु त्क्तः श्न इत्यादिसिध्यर्थमातो नाप इति वार्तिककृतोक्तन्यद्धिरोधात्कथं याः पश्यसीत्यत्राकारलोपस्य प्राप्तिरत आह आतो नाप इति पदत्वानापत्तिरिति ततश्च देवदत्तः पचति वा गच्छति वेत्यत्र निघातापत्तिः एवन्नृपतिस्तत्र त्वा वा मा वा प्रेषयिष्यतीत्यत्र त्वामाविति सूत्रस्य प्रवृत्त्यनापत्तिः ननु सत्ताद्यर्थनिर्देशाद्धातुसंज्ञा न भविष्यतीति चेन्न तस्यापाणिनीयत्वादत एव सेधतेर्गताविति सङ्गच्छते ननु क्रियावाचिन इत्युक्तावापि वातीत्यत्र विकल्पयतीत्यत्रेव च निपातवाशब्दादापि विकल्परूपी क्रिया प्रतीयत एवेत्यत आह क्रियात्वञ्चेति उत्पाद्यमानत्वमिति एतत्प्रतीतिस्तु नात्र शब्दशक्तिस्वभावादत एव विकल्पो विकल्पावित्यत्रेव न लिङ्गसंख्यान्वयः ॥ ननु हिरुगाद्यर्थस्योक्तरीत्या क्रियात्वाभावादेव धातुसंज्ञा न भविष्यतीत्यत आह एषामिति नन्वेषान्धातुत्वे प्रातिपदिकत्वाभावादेव सुबभावे सिद्धे ऽव्ययेषु पाठवैयर्थ्यापत्तिरत आह एषामव्यय इति अभिमानपदेन सूचितामरुचिम्प्रकटयति नन्वेषामिति ननु शिश्य इति तिङन्तात्कालस्यापि पूर्वीतिसत्वात्तस्यापि तादृशसमुदायवाच्यत्वं वाच्यन्तथा च न क्रियामात्रवाचकत्वमिति कथन्धातुसंज्ञापूसक्तिरत आह कालोपीति अपिशब्दः फलसङ्ग्रहार्थः पञ्चकन्धात्वर्थः तिङ् तु द्योतको ऽत एव तिङ्द्योत्यकालप्रकारक एव बोधः फलस्यापि क्रियात्वव्यवहारविषयत्वमिष्टमेव अत एव कर्मणः फलान्वयित्वेपि कारकाणाङ्क्रियान्वयित्वमिति व्यवहारस्य न क्षतिः क्रियावाचकत्वस्य ननु समुदायस्य धातुत्वेपि न क्षतिः नच तिङापत्तिः उक्तत्वात् आत्वापत्तिरपि न उपदेशाभावादत आह अत्र चेति तत्र सूत्रे आदेच उपदेशे इति सूत्रे उक्त इति अत एव गोभ्यामित्यादावुपदेशपदव्यावृत्तिप्रदर्शनसङ्गतिः पूसज्यप्रतिषेध इति पर्युदासे तु प्रत्यये शिज्झिन्न एवात्वं स्यात्तथा चाकारान्ताद्विधीयमानः प्रत्यय एजन्तान्न स्यादत आह पूसज्यप्रतिषेधेपीति शित्परत्वयोग्यस्यात्वमिति स्वीकारान्नात्रात्वापूसाक्तिरिति यदि स्वीक्रियते तदा तिङन्तघटकतिङ्मात्रस्यापि न पूसाक्तिरित्याह किञ्चेति उक्तार्थे प्रमाणन्तु विप्रयोगस्यापि संयोगवत्तादृशार्थोपस्थितिजनकत्वमेव उक्तार्थानङ्गीकारेप्याह अपि चेति यद्वा पूसज्यप्रतिषेधपक्षे योग्यता यदि निमित्तन्तदा ऽवसाने जायमानविसर्गादेर्द्वित्वन्न स्यादतस्तथा स्वीकारो न युक्त इति यदि स्वीक्रियते तदा-

ष्याह अपि चेति वा सादृश्यमिति भ्वादाविति शेषः वाचकत्वेनेति स्वीकियत इति शेषः आणवयतीति आज्ञापयतीत्यर्थः वट्टयति वर्तयतीत्यर्थः आदिपदेन वर्द्धयतीत्यस्यार्थे पूयुज्यमानस्य वट्टयतीत्यस्य समुच्चयः अपभ्रंशानामर्थबोधकता सुप्रसिद्धैव साधुत्वापत्तिरिति तथा च यागादिष्वपि तादृशप्रयोगापत्तिरिति शेषः नच साधुत्वनिश्चयस्य तादृशकर्मणि तत्तच्छब्दप्रयोगे कारणतास्ति स च निश्चय एतादृशशब्दविशेष्यकासाधुत्वनिश्चयेन प्रतिबध्यत इति नायन्दोष इति वाच्यम् साधुत्वस्य व्याकरणव्यङ्ग्यजातिविशेषरूपतया यद्येतेषु शास्त्रपूर्वृतिः स्यात्तदा ऽप्रामाण्याज्ञानानास्कन्दिता साधुत्वज्ञानन्न स्यात् तथा च प्रतिबन्धकाभावात्तेषु एतेषाम्प्रयोगः स्यादेवेत्याशयात् ननु स्तम्भ्वादीनामुदित्करणन्धातुत्वानुमापकमित्यसङ्गतम् तेषान्धातुत्वाभावे प्रातिपदिकसंज्ञायात्ततः सर्वनामस्थाने उगिदचामित्यनेन नुमूसम्पादकत्वेनोदित्करणस्य चारितार्थ्यादत आह इदमिति तत्प्रकृतिकेति स्तम्भ्वादिप्रकृतिकेत्यर्थः ननु च्व्यनुवादेनाङ्विधानात्स्तम्भेर्धातुत्वम्भवतु स्तुन्भुप्रभृतिषु कथन्तदनुमानमत आह सावर्धातुक इति स्तुन्भुस्कुन्भुप्रभृतिधातुभ्यः कर्त्रर्थकसार्वधातुके परे श्नाप्रत्ययस्य श्नुप्रत्ययस्य च विधानात्तादृशधातुत्वानुमापकम्भविष्यतीत्यर्थः धातुत्वमिति बोध्यमित्यस्यापकर्षः ननु जुप्रभृतीनामुक्तरीत्या धातुसंज्ञानुमानन्न सम्भवतीत्यत आह जुचङ्क्रम्यइत्यादिना ऋतिप्रभृतिग्रहणं काश्यनेकाञ्ग्रहणञ्चुलुम्पाद्यर्थमिति वार्तिकपठितानाङ्कण्ड्वादिपाठितानाञ्च सङ्ग्रहाय स्तम्भुप्रभृतीनाम्मूलोक्तप्रकारेण धातुत्वानुमानकरणे गौरवमनेकानुमानकल्पनाप्रयुक्तं स्यादतो लाघवायाह एतैश्चेति ननु बहुलमेतन्निदर्शनमित्यप्रामाणिकमत एव पाठे न धातुसंज्ञा क्रियते सा न प्राप्नोतीति भाष्यकारोक्तिः सङ्गच्छते व्याख्या च तस्य भाष्यस्य स पाठो नोपलक्षणार्थो ऽपि तु इयत्ताप्रतिपादनार्थ इति कैयटेन कृतेत्याशयेनाह मैत्रेयाद्यन्येति एतेन तदुक्तेः स्वीयभाष्यासम्मतत्वन्ध्वनितम् सानुस्वारपाठादिति केषुचित्पुस्तकेष्वित्यादिः ॥ तद्भाष्योक्तयेति वेदभाष्योक्तयेत्यर्थः तन्मात्रनिर्णायके लोधशब्दार्थमात्रनिर्णायके यदि तस्य भाष्यस्य पशुशब्दार्थनिर्णायकतापि स्यात्तदा तथा भाष्यकृतोक्तं स्यादिति भावः अन्यथा पाठे निरनुस्वारपाठाद्भिन्ने सानुस्वारपाठे यथा लुब्धमिति विशेषणबोधकमृषिमिति विशेष्य-

सन्निधाने पठितन्तथा तत्सन्निधान एव पशुमित्यस्यापि पाठे कर्तव्ये क्रियावाचकपदसमभिव्याहारेण पाठस्य स्वारस्यानुपपत्तिश्चेत्यपि बोध्यम् किञ्चादुच्चदात्तत्वदर्शनमप्यस्य निपातत्वनिर्णायकम् लोमवल्लाङ्गूलवचनस्य तु पशुं-तांश्चक्रे वायव्यानित्यत्रान्तोदात्तत्वमेव दृश्यते तदेतदर्शयितुमाह दिगिति उपसर्गश्चायताविति सूत्रे वामनेन निसः सान्तत्वमनुक्तमित्येवमिति कथमत आह तत्र हीति उपसर्गेति सूत्रे हीत्यर्थः इति संज्ञेति अष्टाध्यायीस्थसूत्रविहितानां सन्धिकार्योपयोगिनीनां संज्ञानाम्प्रकरणं समाप्तमित्यर्थः तेनाङ्प्रगृह्यलोपाम्रेडितभलोपादिसंज्ञानामस्मिन्प्रकरणे पाठाभावेपि न न्यूनतापत्तिः एतेन संज्ञानामेवेदम्प्रकरणन्तु संज्ञानामिदमेवेत्यत्र तात्पर्यम् पूर्वत्रासिद्धमित्यादिसूत्रार्थकथनन्तु प्रसङ्गादिति बोध्यम् । इति संज्ञाप्रकरणविवरणम् ॥

इको गुणवृद्धी नेदमधिकारसूत्रम् न धातुलोप इति सूत्रस्थनकारस्य पृथक् पाठात् अन्यथा ऽधिकारत्वाविशेषान्नञा संयुज्यैव पठेत् संज्ञासूत्रमपि न विरुद्धं विभक्तिनिर्देशात् विधिसूत्रमपि न तत्तद्विधायकसूत्रसामर्थ्यादतः परिभाषासूत्रमेवेत्याशयेन प्रकरणान्तरे ऽस्य पाठः अत्र पूर्वसूत्राभ्याङ्गुणवृद्धिपदे अनुवर्त्य योजनयोक्तार्थ लाभ इति मूलीयव्याख्यानङ्गुणवृद्धिग्रहणसामर्थ्यादिति भाष्याक्षरविरुद्धमित्याशयेनाह यद्यपीत्यादि तदनुवृत्त्यैव गुणवृद्धिपदानुवृत्त्यैव नच तयोः सूत्रयोर्गुणवृद्धिपदे स्वरूपपरे इह तु तयोः संज्ञिपरत्वङ्कथमिति वाच्यम् ष्णान्ता षडित्यत्र संख्यापदवच्छब्दाधिकारेण संज्ञिपरत्वसम्भवात् सामर्थ्यात् पुनरस्मिन्सूत्रे तयोः पाठसामर्थ्यात् लभ्यत इति लक्षणयेति शेषः सा च गुणवृद्धिशब्दकरणकविधानाधिकरणे कार्या मन्दबुद्धीति किञ्च यदीहोक्तार्थे गुणवृद्धिपदयोरनुवर्तमानयोर्लक्षणा ऽऽश्रीयते तदा. नधात्वित्युत्तरसूत्रयोः पुनरर्थान्तरे ऽकारादिमात्रे लक्षणाश्रयणीयेति गौरवं स्यादतो लाघवायास्मिन्सूत्रे तयोरनुवृत्त्या योजनाकल्पनमेव युक्तामिति बोध्यम् ॥ शब्दव्यापारपरतया व्याख्यानस्य फलन्द्यौरित्यादावतिव्याप्तिवारणरूपं दर्शितं यथा तथा स इत्यत्र न सम्भवतीति तदुपादानन्निष्फलमित्याशङ्कानिरासायाह अत्र नैवेति तथा चातिव्याप्तिवदव्याप्तिनिरासोप्येवं व्याख्यानस्य तस्य फलमिति ध्वनितम् नन्विमामित्यत्र पुनरतिव्याप्तिप्रदर्शनं सन्दर्भविरु-

द्धम् द्यौरित्यस्यातिव्याप्त्यधिकरणस्याग्रे एतदुपन्यासस्योचितत्वादतो भावमाह अत्रेकारेति तथाचान्त्यादेशस्य विषये दोषमुद्भाव्यानन्त्यादेशप्रसक्त्यातिव्याप्तिप्रदर्शनाय पुनरेवं लेखः अत एव लुकः प्रवृत्तेरेव दीर्घे इति अत्वसन्तस्येति सूत्रविहित इत्यादिः ननु तच्चेत्यनेन सम्पूर्णसूत्रपरामर्शे ऽर्थासङ्गतिरत आह इक इति पदञ्चेति अनेन पदपदोपादानेन ननु विधेयसमर्पकगुणवृद्धिपदोपादानं यत्र तत्रास्योपस्थानञ्चेदचोञ्णिति इति सूत्रे ओर्गुण इत्यत्र च तथा सत्वादत्रापीक इत्यस्योपस्थानं स्यात् तथा च सूत्रोपात्तयोर्वैयर्थ्यमत आह अच इति नच निर्दिष्टस्थानिकत्वमिक इत्यस्यानुपस्थाने नियामकम्भविष्यतीति वाच्यम् अच इत्यस्य स्थानिबोधकत्वनिर्णयस्य वाक्यार्थबोधोत्तरकालिकत्वात् लिङ्गस्य वृद्ध्यादिपदनिष्ठस्य लिङ्गस्य इक्पदोपस्थितिद्वारा तदर्थप्रकाशनसामर्थ्यरूपस्य श्रुत्यपेक्षया अच इत्यादिश्रुत्यपेक्षया निरपेक्षो रवः श्रुतिः दुर्बलत्वेनेति श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति सूत्रे मीमांसायां हि तथोक्तम् दुर्बलत्वमुपपादयति प्रथमत इति श्रौत इति श्रुतेरयं श्रौतः श्रुतिश्चाच्पदादिरूपा अत एवाह अच्पदार्थादीति आदिना वृद्ध्यादिपदार्थपरिग्रहः वृत्ते निष्पन्ने वाक्यार्थबोधस्य या पदार्थोपस्थित्यादिसामग्री तस्या वृत्तत्वादिति शेषः एतेन पदोपस्थितिप्रतिबन्धकसद्भावो ध्वनितः उपस्थितस्यापीत्यपिना ऽनुपस्थितौ सम्यक्त्वं सूचितम् लिङ्गस्य तु पदोपस्थापकत्वन्तत्तस्य पदस्य शक्तिस्मरणात्तत्तदर्थोपस्थितिस्तत्तस्यार्थस्य वाक्यार्थघटकत्वसम्भावनेति विलम्बः स्पष्ट इति भावः यथा इमामगृभ्णन् रशनामृतस्येति मन्त्रे रशनामात्रप्रकाशनसामर्थ्यरूपलिङ्गसत्वेन गर्द्धभरशनाग्रहणेपि प्रसक्तस्य तस्य मन्त्रस्य तदीयब्राह्मणे अश्वाभिधानीयमादत्त इति विधिबोधकलेडत्तशब्दोच्चारणेनाश्वरशनाग्रहणे श्रुत्या तस्य मन्त्रस्य विनियोगो बोध्यत इति निर्दिष्टस्थानिकत्वादित्यनेन स्थान्यन्तराकाङ्क्षाभाव उक्तः अनन्वय इति अर्थद्वारेति शेषः जनितान्वयबोधादिति भावः ॥ प्रकृतसूत्रोपयोगस्थलमाह सार्वधातुक इत्यादिना तदुपस्थितिम् एतत्सूत्रस्थेकपदोपस्थितिम् शास्त्यभावेनेति गुणादीनामनेकाल्त्वाभावेनानेकाल् शित्सर्वस्येत्यस्यानुपस्थितेरङ्गस्येति षष्ठ्या अर्थस्य समीपादिपदाध्याहारेणास्तेर्भूरित्यत्रेवानेकस्य सम्भवेन स्थानषष्ठीत्वनिर्णयाभावाद-

लोन्त्यस्येत्यस्याप्यनुपस्थितिरन्यस्य तु निर्णायकस्य स्वरूपत एवाभावादिति अङ्गसम्बन्धिगुण इत्यर्थबोधस्तु सामान्यतो जातोपि न लक्ष्यसंस्कारक इति भावः बोध एव नेति सम्बन्धविशेषविषयकः षष्ठीजन्यबोध एव नेत्यर्थः नचैवमस्याः परिभाषाया अप्युपस्थितिर्न स्याद्विधेयसमर्पकत्वनिर्णयाभावेन लिङ्गानिश्चयादिति वाच्यम् असति बाधके विधिवाक्यस्थाप्रथमाविधेयबोधकपदावयवेति सामान्यतः सिद्धवाक्यतो गुण इति पदस्य प्रथमान्तस्य लिङ्गवसम्भवात् मौलत्वाच्चेत्यादिग्रन्थमवतारयति एवञ्चेत्यादिना एवञ्च सामान्यतो बोधे च पदश्रुतिनिमित्ता विधेयबोधकत्वज्ञानविषयगुणादिपदश्रवणानिमित्ता एषा इको गुणेति परिभाषा अन्तरङ्गत्वादस्याः प्रथमतः प्रवृत्तिमाह पदैकेति अलोन्त्यस्यादेः परस्यानेकालित्वस्य च यथा ऽन्यत्र व्यवस्थापकत्वन्तदाह स्थानषष्ठीत्वेति पादस्य लोप इत्यादौ यथा प्रकृते सार्वधातुकेत्यादिसूत्रे स्थानषष्ठ्यास्य किङिति चेत्यस्य निर्दिष्टपरिभाषोपास्थितावव्यवहितस्य गुणनिषेधकत्वेन तत्प्रतिबध्यसूत्रस्थपदघटितवाक्यघटकषष्ठ्या निर्णय इत्यर्थः एवञ्चालोन्त्यस्येत्यस्य बहिरङ्गत्वं स्पष्टमेव अनन्त्यस्येति कृष्णतीत्यादावादेरित्यर्थः वाक्यैकवाक्यतेति तस्याः परिभाषाया यत्र स्थानषष्ठी तत्रालोन्त्यस्येत्युपतिष्ठत इत्यर्थेन वाक्यैकवाक्यतेत्यर्थः तदाहेति तदेतन्मनसि निधायाहेत्यर्थः एवञ्च भिदेरित्यादि षष्ठ्या अवयवषष्ठीत्वनिर्णये च स्थानषष्ठीत्वेति इक इत्यस्य तथात्वेपि परिभाषाया अनियमे नियमकारकत्वस्वभावादिक इत्यस्य पदस्यैकवर्णोपस्थापकतयाल्समुदायबोधकत्वाभावेनालोन्त्यस्येत्यस्य तत्रानुपस्थितिरिति भावः नन्विको गुणेत्यस्य सूत्रस्य परिभाषात्वकथनेन विधिसूत्रत्वमेव नास्ति नियमसूत्रत्वन्तु कुत इत्याकाङ्क्षानुत्थानायाह तत्त्वादिति इदमपि इको गुणेति सूत्रमपि नियमार्थमिति अन्यथा गुणादिविधायकवाक्यस्य निर्णयाजनकतया वैयर्थ्यापत्तिः स्यादिति तद्भावः अलोन्त्यस्येतिवादिति यथा ऽन्त्यस्यानन्त्यस्य च प्राप्तावन्त्यस्येति । तेन नियमः क्रियते तथा ऽनेनापीको ऽनिकश्च गुणवृद्धिप्रसङ्गे इक एवेति नियमकल्पनया परिभाषात्वमस्याः सिद्धमिति भावः भाष्यविरोधमुपपादयति द्वयोरित्यादिना द्वयोः इकोगुणालोन्त्यस्येत्यनयोः विशेषणमिति । विशेषणार्थप्रतिपादकमित्यर्थः इत्यर्थ इति फलितार्थः सर्वादेश इति सूत्रसामर्थ्यात्सर्वादेश इत्यर्थः तद्विरोधः भाष्य-

विरोधः प्राचामिति शेषः दूषणोद्धारप्रकारन्दर्शयति मिदेरित्यादिना इ-त्यादीत्यादिना मृजेर्वृद्धिरित्यस्य परिग्रहः तत्र हि अच इत्यपकृष्यत इत्या-दि द्रष्टव्यः भाष्योक्तेति नन्वेवम्भाष्यानुक्तार्थस्य स्वयङ्कथनेन स्वस्य प्रौढत्व-प्रदर्शनमनुचितमिति चेन्न सम्भवमात्रेण तदुक्तेः दोष इति पुक्यन्तस्या-कारस्य गुणापत्तिरूपो दोष इत्यर्थः ननु सन्निपातपरिभाषया पुकि कृते गु-णो न भविष्यति यत्तु गुणे कृते ऽत उपधाया इति ह्रद्धिरिति तन्न अङ्ग-ह्रत्तपरिभाषाया तदप्राप्तेरिति चेन्न पुग्निमित्तके कार्ये कर्त्तव्ये सन्निपात-परिभाषाया अप्रवृत्तिरिति सिद्धान्तात् अत एवादिद्रपदित्यत्र हूस्वस्य सिद्धिः क्ष्मापयतीत्यत्र सन्निपातपरिभाषायास्तत्र प्रवृत्तिस्वीकारेपि यस्य गुणापत्ते-र्दुर्वारत्वाच्च यदि चेलेक्नोपेरिति निर्देशेन पुकि कृते क्वचिद्गुणो भवती-त्युच्यते तदा प्रतिपत्तिगौरवमिति प्रदर्शयन्नाह गुणे कृत इति नचाङ्गह्रत्त-परिभाषया ह्रद्धिर्न भविष्यतीति वाच्यम् तस्माद्वयोरिति निर्देशेनानित्य-त्वात् असत्वाच्च अत एव पिबतेर्गुणप्रतिषेध उक्तः स न वक्तव्य इत्येव तस्याः प्रयोजनम्भाष्ये उक्तम् अत एव गुणोत्तरं ह्रद्धिप्रवृत्तिस्वीकारादेव पकारस्य गुणापत्तिरपि यापनेति निर्देशेन नेति यदि कल्प्यते तदाधिकङ्गौ-रवम् पुक्यन्त इति व्याख्यानमेव युक्तमिति तात्पर्यम् ॥ एवम् पुक्यन्त इत्यादिरीत्या दोषाभावे सति क्नोः त्रसिगृधीति सूत्रविहितक्नोः उचित-मिति ज्ञापकमूलकवाक्यान्तरकल्पनापेक्षया ऽस्मिन्पक्षे प्रतिपत्तिलाघवादौ-चित्यम् किञ्च मृजेर्वृद्धिरित्यत्राच इत्यस्यापकर्षे ऽमाद् इत्यत्राटो गुणापत्ति-वारणायानित्यविकारेत्यसदेशस्येति परिभाषायाः प्रवृत्तिः स्वीकार्या ऋ-च्छत्यृतामिति सूत्रे ऋकारान्तरस्य प्रक्षेपः कार्यः ऋदृशोङीत्यत्र योगवि-भागश्च कर्तव्य इत्यधिकन्तच्छेषपक्षे गौरवम् किञ्च परिभाषयोर्गुणगुणि-भावो गुणानाञ्च परार्थत्वादिति न्यायविरोधान्न युक्तः किञ्च व्यञ्जन-स्य गुणवारणे जनेर्डविधानस्य ज्ञापकत्वमाश्रयणीयन्तदपेक्षया ऽस्य सूत्र-स्य पदोपस्थापकत्वमेव युक्तमित्याशयेनाह दिगिति अतएवेग्लक्षणा ह्रद्धि-रेपितव्येति भाष्यीयोपसंहारः साधु सङ्गच्छते अन्त्यस्यैवेति नचानिदि-तामिति सूत्रे ऽनिदिद्ग्रहणस्यैवं सति वैयर्थ्यापत्तिरतो ऽनेन ज्ञापकेना-न्त्यस्य न भविष्यतीति वाच्यम् अनिदिद्ग्रहणस्यार्थान्तरे ज्ञापकत्वकल्पना-पेक्षयोक्तार्थे ज्ञापकताया उचितत्वात् ननु तच्छब्देनोपस्थितत्वादन्ताव-

यवपरामर्शः स्यादेवञ्चाङ्गस्य नान्तत्वन्दुरुपपादमेवेत्यत आह यस्येति य-द्यपीति अस्य न दोष इत्यत्रान्वयः अत्र तपूर्णीत्यादौ इगन्तेतीति द्विगु-मासे इगन्तादुत्तरपदे परे सङ्ख्यावाचि पूर्वपदस्यप्रकृत्येत्यर्थकेनेगन्तेति सूत्रेण स्वरानापत्तिरित्यर्थः नलोपसिद्धेरिति प्रातिपादिकान्तावयवस्य हि लोपविधा-नात् । ननु स्थानं योगो यस्या इति समानाधिकरणपदकबहुव्रीहिणैव सामञ्ज-स्ये व्यधिकरणपदकबहुव्रीहिप्रदर्शनमनुचितमत आह तन्निरूपित इति स्थान-निरूपित इत्यर्थः सम्बन्धः निवर्त्यनिवर्तकभावः अनेन व्यधिकरणपदक-बहुव्रीहिप्रदर्शनेन अत एव निपातनादेव नचेयं स्वकल्पनेति भ्रमितव्यम् भाष्यकृतैवोक्तत्वात् हूस्वत्वादेरिति एतेन प्रमाणे द्वयसजितिसूत्रप्रसिद्धस्य नैयायिकमते प्रसिद्धानाञ्चानुपयोगान्न ग्रहणमिति ध्वनितम् स्वशास्त्रप्रसि-द्धगुणपदार्थन्दर्शयति गुणशब्देनोक्त इति गोशब्दाज्झटिति स्त्रीव्यक्तेः प्र-तीतिरतो गोबलीवर्दन्यायम्परित्यज्य ब्राह्मणवसिष्ठन्याय उक्तः तेन ता-दृशधर्ममात्रस्य गुणशब्दाद्बोधनेन इत्यादीत्यादिना सोष्मणः सोष्माण इ-त्यस्य एचोश्चोत्तरभूयस्त्वादित्यस्य पादादीनाम्पदादयो वर्णसाम्यादित्यस्य च परिग्रहः स्थानेन्तरतम इति तत्तत्सूत्रोपलक्षणम् आनन्तर्यपदं सादृश्य-परन्तस्य प्रयोजकाः समानस्थानिकत्वादयो वर्णधर्मास्ते च यत्र न सन्ति तत्रापि भाष्यप्रामाण्यादनान्तर्यस्यानुरूपप्रतिसम्बन्धिराहित्यस्यापि सादृश्य-प्रयोजकत्वङ्कल्पनीयम् ननु भ्रुयो होन्यतरस्यामित्येतदुदाहरणविवेचनसमये बाह्यप्रयत्नस्य गुणपदव्यवहार्यस्य सादृश्यप्रयोजकत्वं सर्वैः स्वीकृतन्तच्च नोपपद्यते बाह्यप्रयत्नस्य वर्णावृत्तित्वात् ते हि काकलकाधस्तात्कण्ठविवर-निष्ठविकासादिकार्यजनका अत एव तेषां बाह्यत्वमत आह बाह्यानामिति अत्र साक्षादिति कथनेन परम्परासम्बन्धेन वर्णसम्बद्धत्वन्ध्वनितम् साक्षा-त्समवायसम्बन्धेन पररीत्या स्वमते तु तादात्म्येन परमते आत्मधर्मत्वं स्व-मते मनोधर्मत्वमिति ज्ञेयम् परम्परासम्बन्धश्च स्वप्रयोज्यविकासाश्रयसमी-पतालवादिनिष्ठवायुसंयोगाभिव्यङ्ग्यत्वात्मकः गुणत्वम् वर्णगुणत्वम् न-न्वनुकरणमनुकार्यगतवर्णसमानानुपूर्वीकमेव प्रायोत्र शास्त्रे दृश्यते तस्थ-स्थमिपामित्यादौ यथा ॥ तथात्रापि चेदनुमतन्तदा तस्मिन्निति सूत्रस्य त-स्मिन्नणि च युष्माकास्माकाविति त्रैव प्रवृत्तिः स्यान्नात्विको यणचीत्यादा-विति तेष्वभिप्रेतार्थलाभः स्यादस्य सूत्रस्य वैयर्थ्यञ्च तस्मिन्नणिचेति सूत्र

एव निर्दिष्टपदोपादानेन तत्रेष्टार्थलाभसम्भवादत आह अचीत्यादीति स-प्तम्यन्तार्थकस्य सप्तम्यन्तानि पदान्यर्था यस्येत्यर्थः स्वतन्त्रस्येत्यनेनानुकरण-त्वाभाव उक्तः तस्मिन्नणि चेति सूत्रस्यैवोदाहरणत्वे फलन्तु यौष्माकी-णाम्मभ्यन्देहीत्यादावादेशाभाव इति व्याख्यानादिति तस्मिन्नणीति सू-त्रवोध्ययोः स्वत्रणोः प्रत्ययत्वात्ताभ्यां यस्माद्विहितौ तदादेरित्यस्योपस्थि-त्या तत्र सूत्रे निर्दिष्टे पूर्वयोरित्येवेष्टे सिद्धे ऽस्य सामान्यसूत्रस्य निष्प्र-योजनत्वापत्तिरित्येतन्मूलकादित्यर्थः ॥ नन्वेवमनुकरणमिति व्यर्थमत आह शब्दार्थकत्वेनेति तस्मिन्निति प्रकृतसूत्रस्थस्तच्छब्दो बुद्धिस्थपरामर्शकः स-र्वनाम्ना प्रकान्तार्थपरामर्शकत्वमेवेति न नियमः तथा च यत्र सप्तम्यर्थ-बोधस्तत्रैवास्योपस्थितिः यत्र सूत्रे सप्तम्यन्तपदोपादानन्तत्रास्य सूत्रस्य प्रवृत्तिरिति तु न नेड्वशि कृति ङः सि धुट् तस्मानुडचीत्यादावस्य प्रवृ-त्यदर्शनात् एतेन यत्रास्य प्रवृत्तिरभिप्रेता तेषां सङ्ग्रहाय सप्तमी निर्दिष्टा इत्येवास्त्विति निरस्तम् एवञ्च सप्तम्यन्तार्थे ऽव्यवहितोच्चारिते पूर्वस्य कार्यमिति वाच्योर्थः तथाच सप्तम्यन्तपञ्चम्यन्तपदयोरर्थोपस्थितिर्यत्र त-त्र तद्बलिङ्गसङ्ख्यावत्त्वस्मिन्नित्यादिपरिभाषाद्वयस्य यथायथमुपस्थितिरिति सिद्धम् निर्दिष्टपदस्य प्रयोजनमाह अत एवेति सप्तम्यर्थतात्पर्यकपदघटिते ऽस्योपस्थितेरेवेत्यर्थः आदिना कारनाम्नीत्यादि यस्कादिभ्यो गोत्र इत्यादेः सङ्ग्रहः न दोष इति तत्र चेदुपस्थितिः स्यात्तदा जनपदरूपे ऽर्थे देशे इति लक्षणया तादृशार्थबोधकशब्द इति वा तेषां सूत्राणामर्थे ऽनिष्टापत्तिरूपो दोषो नेत्यर्थः एतदेव दर्शयति न हीति अर्थः देशरूपः अचि उपश्लिष्टे इति एतेन यत्रौपश्लेषिकाधारे सप्तमी तत्रास्योपस्थितिरिति सूचितम् अ-व्यवधानस्य पूर्वोच्चारितत्वपरोच्चारितत्वान्यतररूपस्य यत्रौपश्लेषिकाधारत्व-न्तत्रैव सम्भवात् अवध्यवधिमतोः साजात्यात् पूर्वत्वादिव्यवहारस्य व्यव-हितेपि दर्शनादस्मिन्सूत्रे निर्दिष्टपदम् यथा काश्याः प्रयागः पूर्वः पाट-लिपुत्रः पर इत्यादि लोके ऽचः परस्मिन्पूर्वस्येति शास्त्रे अस्य सूत्रस्योप-स्थितौ यादृशार्थोपस्थितिर्भवति तदुदाहरणम्मूले प्रदर्शितमचि यणीत्यादि-ना केचित्त्विको यणचीत्यादिसूत्रे क्रियावाचकपदाश्रवणादस्तिर्भवन्तीपर इति न्यायेन सतीत्यस्याध्याहारेणाचि सति यण् भवतीत्यादिरित्या तत्र तत्रार्थ इति तन्न युक्तम् भवनक्रियायाम्प्रधानार्थप्रतिपादिकायामन्वये स-

म्भवति सति गुणभूतायामन्वयस्यानौचित्यात् औपश्लेषिकाधार एवा-
स्योपस्थितेः स्वीकारादेव कर्तृकर्मणोः कृतीत्यत्र नास्योपस्थितिः कृति स-
ति तत्प्रकृत्यर्थक्रियानिरूपितकर्तृत्वकर्मत्वविशिष्टार्थवाचकात्षष्ठीति तदर्थात्
यदि तु यस्य च भावेनेति सूत्रविहितसप्तम्यन्तपदस्य सतीत्यस्याध्याहा-
रेपि कर्तृकर्मणोरित्यत्रास्योपस्थितिः स्यात्तदा कृदन्ते निरन्तरोच्चारित
इत्यर्थापत्तौ कृष्णस्य कृतिरित्यत्रैव षष्ठी स्यान्नतु कृतिः कृष्णस्येत्यत्रेत्यनि-
ष्टापत्तिरत इको यणचीत्यादावुपपदविभक्तेरिति न्यायेनौपश्लेषिकाधार एव
सप्तमीत्याशयेनौपश्लिष्टस्येति व्याख्यातम् उपश्लिष्ट इति पदमेतेष्वध्याहर्त-
व्यम् उप समीपे श्लेषः सम्बन्धस्तत्कृताधिकरणमौपश्लेषिकाधिकरणमत ए-
व तत्र च दीयत इति सूत्रभाष्ये मासे ऽतिक्रान्ते यद्दीयते तस्य मास औ-
पश्लेषिकमधिकरणमित्युक्तम् वर्णयोः समीपवृत्तित्वन्तु बौद्धं बोध्यम् इदम्
इको यणचीत्यत्रौपश्लेषिकमधिकरणमित्येतत् तत्र हि तस्मिन्नित्यादिसूत्र-
स्थस्य प्रयोजननिरूपणावसरे पूर्वोत्तरयोर्योगाविशेषान्नियमार्थं वचनम्-
युदकम्पचत्योदनमिति वार्तिककृतोक्तम् तदर्थनिरूपणावसरे भाष्यकृता
इको यणचि दध्युदकम्पचत्योदनम् उभाविकौ उभावचौ अचि पूर्वस्या-
चि परस्येति संदेहः इष्यतेचात्राचि पूर्वस्य स्यात् तच्चान्तरेण यत्रच सिध्यतीति
नेयमार्थमेवमर्थमिदमुच्यते इत्युक्तम् अत्र तथा सन्देहप्रदर्शनेनौपश्लेषिकाधारे
सप्तमीति स्पष्टम्प्रतीयते उक्तञ्च कैयटेन उपपदविभक्तेः कारकविभक्तिर्ब-
लीयसीति न्यायादधिकरणसप्तमी कृतेति न सूत्रितमिति अत्र केचिदने-
कालिति सूत्रात्प्रागिति शेष इति वदन्ति तन्न युक्तम् एवं सत्यनेकालिति
सूत्रस्यादेरित्येतदपेक्षया परत्वन्निर्बाधमिति वक्ष्यमाणस्यादेरिति ग्रन्थस्या-
सङ्गत्यापत्तेरत उत्तरग्रन्थसङ्गमनायाह स्वं रूपामिति नन्वेतादृशसूत्रकरणे
यत्रादेरित्यस्यानुपस्थितिस्तत्र तस्मादित्यस्याप्यप्रवृत्तिः स्यात्तथा च गाङ्-
कुटादिभ्य इत्यादौ दोष इत्यत आह तत्रोत्तरेति तत्र एकस्मिन्सूत्रे पृथ-
गेति उत्तरस्येति व्यस्तपाठात् अस्यैकपदत्वेपि वाक्येतिकथनमुत्तरस्ये-
त्यस्य तत्र सम्बन्धाभिप्रायेण तत्र आदेरित्यंशे एकसूत्रस्यांशभेदेन व्याख्या-
नं ऽशान्तरे पूर्वांशानुवृत्तेर्णेरणाविति सूत्रे कल्पितत्वात् तथांशभेदेन व्याख्या-
ने ऽनुवृत्तस्यार्थांतराभिधायकत्वमपि दृष्टमित्याशयेनाह इयमिति इयम् पृथ-
भूते आदेरित्यंशे ऽनुवर्तमानं यदुत्तरस्येति तत्र स्थिता क्वचित् गाङ्कुटादि-

भ्य इत्यादौ चस्त्वर्थे । ननु यथा आदेरित्यंशाप्रवृत्तावपि तस्मादित्यस्य क्वचित्प्रवृत्तिस्तथा तस्मादित्यंशं विनाप्यादेरित्यस्यापि प्रवृत्त्यापत्तिरिति नित्यङ्ङित इत्यादौ दोष एवेत्यत आह आदेरित्यंशस्त्विति आवृत्येति अत्र प्रमाणन्तु पचावेदमित्यादिप्रयोगदर्शनम् नन्वादेः परस्येति न क्रियते तस्मादित्यनेन सहादेरिति पठ्यते लाघवाभिप्रायेण तच्च लाघवमधुना नोपपद्यते वाक्यभेदस्यावृत्तेश्च करणात् उत्तरस्येत्यत्र शब्दाधिकाराश्रयणाच्च परस्येत्यस्यानुपादानेपि मनोव्यापारगौरवस्याधुना सत्वञ्चेति चेन्न सिद्धान्तेप्यादेरित्यस्य नित्यं ङित इत्यत्र दोषवारणायावृत्तेः सत्वात् एतदेव ध्वनयितुमधुनोत्तरस्येत्यस्यावृत्तिमप्रदर्श्योत्तरत्वबोधकशब्देनेत्यनुपादाय परत्वबोधकेत्युक्तम् तत्रैवेति प्रवर्तत इति शेषः ननु मूलोक्तदोषोपि स्थानभेदेन सूत्रपाठाद्वारायितुं शक्य इत्याशयेन शङ्कां प्रदर्शयन्निराचष्टे नचेत्यादिना नचैवन्न्यासेप्युक्तरीत्या वाक्यभेदाद्यावश्यकमेवेति सूत्र इति द्विवचनोपादानमसङ्गतमिति वाच्यम् द्वितीयस्य सूत्रस्यादौ पाठे एकत्वमेवेत्याशयेन द्विवचनोपादानात् षष्ठी स्थान इत्यस्य सम्बन्धासम्बन्धेन समाधत्ते आदेरित्यंश इति तस्य आदेरित्यंशस्य प्रवृत्यापत्तेरिति तथा चादेर्जसवयवाकारस्यासुगागमे आगमे ऽकारोच्चारणसामर्थ्यादतो गुण इति पररूपाभावे सकारोच्चारणसामर्थ्यात्संयोगान्तलोपाभावे ऽनिष्टरूपापत्तिः स्पष्टैव सम्बन्ध इति षष्ठी स्थान इत्यस्य सम्बन्ध इत्यर्थः अत्र निर्दिष्टस्येत्यस्याध्याहारेण स्थानषष्ठीनिर्दिष्टस्य यत्कार्यन्तत्स्यादेरित्यर्थेनाज्जसेरसुगित्यत्र नोक्तदोषः तत्रासुकः कित्त्वेन जसेरिति षष्ठ्या अवयवार्थकत्वनिर्णयात् मध्य इति पठितयोरिति शेषः तयोः मध्ये पठितयोः आगमविषय इति आने मुक् छेचेत्येतद्विहितागमविषयं इत्यर्थः एवं सति विपरीतरूपापत्तिर्दुर्वारैवेति स्पष्टमेव एतादृशन्यासपक्षे आदेरित्यस्य यत्र स्थानषष्ठीनिर्दिष्टादेशस्य तस्मादित्यनेन नियमस्तत्रैव प्रवृत्तिः स्यादेवञ्च ज्यादादीयस इत्यत्र ज्यादिति पञ्चम्याः परस्येत्यस्याध्याहारेणोपपत्या तत्रानियमाप्रवृत्तेस्तस्मादित्यस्य तत्राप्रवृत्तावादेरित्यस्याप्यप्रवृत्त्यापत्तावलोन्त्यस्य प्रवृत्तावनिष्टापत्तिरित्यपि बोध्यम् सिद्धान्ते तु परस्येत्यस्याध्याहारेपि परत्वविशिष्टबोधकशब्देन परस्यादेशविधानमस्त्येवेत्यादेरित्यस्य प्रवृत्या न दोषो ऽत एवाह दिगिति ननु डाणलोरिवेति दृष्टान्तोपादानम्प्रकृते विरुद्धम् तयोः प्रत्ययाधिकारे पाठेन प्रत्यय-

तया आनुपूर्व्यनुपयोगादत आह आदेशानामिति आदेशानामिति बहुवचनं च्व्यादेशसङ्ग्रहाय वाक्यार्थबोधोत्तरम् षष्ठी स्थान इति शास्त्रैकवाक्यतया वाक्यार्थबोधोत्तरम् एतेन तत्र वाक्ये प्रत्यय इत्यस्य सम्बन्धाभावेपि क्षत्यभावो ध्वनितः उपदेशे पाणिनिकर्तृकाद्योच्चारणे प्रवृत्तिकाल इति बभूवेत्यादिलक्ष्यसंस्कारकाले यो वाक्यार्थबोधस्तस्योत्पत्तिकाल इत्यर्थः एतच्च दीक्षिताभिप्रायवर्णनमेव वस्तुतस्तु प्राचोक्तञ्जश्शसोः शिरित्युदाहरणमपि युक्तमेव शकारस्यानुबन्धत्वयोग्यतया नानुबन्धकृतमनेकाल्त्वमिति परिभाषाविषयत्वसत्वात् शित्वञ्चेत्संज्ञायोग्यशकारवत्त्वमेव इत्संज्ञाया प्रवृत्तिर्यद्यप्यादेशोत्तरम्भवति तथापि योग्यतास्त्येव अनुबन्धत्वमपीत्संज्ञायोग्यत्वमेव अत एव काणोर्नासारूप्यप्रयुक्तो विकल्पः अन्यथा तत्रापि वाक्यार्थबोधोत्तरम्प्रत्ययत्वज्ञानेत्संज्ञाप्रवृत्तावप्युपदेशे ऽसारूप्यमस्त्येवेति उपपादितमिति न सूत्रितमित्येतद्व्याख्यानावसर इति शेषः मूले शब्दान्तरप्राप्त्येति कथनं सर्वस्य शब्दान्तरस्य शब्दान्तराच्छब्दान्तरे वा प्राप्त्येत्यर्थकम् सम्बन्धसामान्यार्थकषष्ठ्या समासः अत एवाह यद्व्यक्तीति अनाश्रयणेनेति अक्लृप्ताभावकस्याभावकल्पनापेक्षया क्लृप्ताभावकस्याभावकल्पनायां लाघवमिति लाघवमेव नित्यस्यानित्याद्बलवत्वे साधकन्तच्च लक्ष्यानुरोधेन क्वचिद्व्यक्तिविशेषाचिन्तयाश्रीयते क्वचित्सामान्यतः प्राप्तिमात्रेणेति भावः ननु व्यक्तिविशेषाचिन्तायामप्यत्र न बाधकं वार्तिकेन निर्वाहादित्याशङ्कान्निराकरोति वृद्ध्यौत्व इत्यादिना अत्र रन्धयतीति लक्ष्यसाधनावसरे तृज्वद्भावपदन्तत्र वार्तिके स्त्रियाञ्चेत्येतद्व्यतिरिक्तपरम् तेन न तदंशे साहचर्यभङ्गः ॥ ननु साहचर्यस्यानित्यत्वेन वार्तिकेन रन्धयतीत्यस्य सिद्धावत्र नित्यत्वाश्रयणवैयर्थ्यमत आह नित्यत्वेनैवेति दिगर्थस्तु विप्रतिषेधसूत्रस्थपरशब्दस्येष्टवाचकत्वमाश्रित्य सर्वेषाम्पूर्वविप्रतिषेधसाधकवचनानां सङ्ग्रह इति यदि तदा स्वरितेनाधिकार इत्यस्य स्वरितत्वयुक्तेनाधिकङ्कार्यमित्यर्थाश्रयणेन नुमागमस्य व्यक्तिविशेषाचिन्तया ऽनित्यत्वेपि स्वरितत्वेनैव प्रवृत्तिर्भविष्यतीति न नित्यस्य बलवत्वोदाहरणमेतत्किन्तु तुदतीत्येवेति मौलमन्तरङ्गत्वादिति यत्तु तयपः स्थाने ऽयजादेश इति मते नान्तरङ्गबहिरङ्गयोरन्तरङ्गम्बलीय इति परिभाषान्तरमिति पक्षे च बोध्यम् वस्तुतस्तु भाष्यकारीयसिद्धान्तरीत्या न तस्य प्राप्तिरित्याशयेनाह भाष्ये

ल्यजिति ज्ञापकमिति युगपत्प्राप्तिविषयकस्यान्तरङ्गबहिरङ्गयोरन्तरङ्गस्यैव य इति वचनस्य बोधकमित्यर्थः प्रपञ्चितमिति लौकिकोयन्दृष्टान्तः मनुष्योयम्प्रातरुत्थायं शरीरकार्याणि करोति ततः सुहृदान्ततः सम्बन्धिनामिति प्रत्यासन्नवर्तित्वस्य लोके दृष्ट्वात्तन्मूलकमेवेदं वचनामिति एतस्य वचनान्तरत्वम्मूलकृतोप्यभिमतमत एवासिद्धामिति प्रतीकमुपादाय पचावेदमित्यस्य साधनं सङ्गच्छते सापवादत्वनिरपवादत्वाभ्यान्द्वयोः परिभाषयोर्भेदः अन्यथाऽन्तरङ्गत्वेनायजे इन्द्रमित्यस्य साधनन्न स्यात् नाजानन्तर्यपरिभाषाविषयत्वादिति बोध्यम् तेनेतीति अन्तरङ्गे कर्तव्ये जातमपि बहिरङ्गमसिद्धमित्यर्थकपरिभाषान्तराश्रयणेन अत एवाह पूर्वात्विति अन्तरङ्गशास्त्रत्वमस्या लिङ्गम् अत एव कार्यकालपक्षे त्रिपाद्यामप्येषा प्रवर्तत इति वृद्धाः पक्षद्वये तत्र न प्रवर्तत इति तु भाष्यतत्वविदः वाह ऊडिति सूत्रस्थमूठ इति ज्ञापकमिति स्फुटीभविष्यति नच सा विप्रतिषेधसूत्रभाष्ये प्रत्याख्यातेति वाच्यम् तस्य भाष्यस्य प्रौढिवादत्वात् नाजानन्तर्यपरिभाषायां षत्वतुकोरसिद्ध इति सूत्रस्थन्तुग्ग्रहणं ज्ञापकम् ताद्धि अधीत्य प्रेत्येत्यादौ समासोत्तरं ल्यपः प्रवृत्या पूर्वं समासे जाते तत्र संहिताया नित्यत्वादेकादेशे ल्यपि तुगपेक्षया पदद्वयसम्बन्धिवर्णद्वयापेक्षैकादेशस्य बहिरङ्गत्वेनासिद्धतया तुकः सिद्धौ तत्सूत्रस्थन्तुग्ग्रहणं व्यर्थम् नाजान्तर्यपरिभाषासत्त्वे तु तुकि अजानन्तर्यस्य निमित्तत्वेनाश्रयणाद्बहिरङ्गपरिभाषाया निषेधे तुकः प्रवृत्यर्थन्तत्र सूत्रे तुग्ग्रहणमावश्यकमेव परिभाषार्थस्तु अचोरानन्तर्यमिति द्विवचनान्तेन समासमाश्रित्य बाध्यासिद्धपरिभाषायामुभयोपादानादधिकरणाकाङ्क्षायास्ताभ्यान्निरासेनान्तरङ्गे बहिरङ्गे वा यत्कार्ये ऽजानन्तर्यमाश्रीयते तत्र बहिरङ्गपरिभाषा न प्रवर्तत इति हरदत्तेन प्रतिपादितः स तु न युक्तः पचावेदमित्यत्रासिद्धपरिभाषाया एत ऐ इति सूत्रप्रवृत्तिवारणपराकरविरोधात् किन्त्वचोन्यानन्तर्यनिमित्तके ऽन्तरङ्गे कर्तव्ये जातस्य बहिरङ्गस्य बहिष्ट्वप्रकल्प्तिर्नेति अत्र जातस्येति निवेशादेवौमाङोश्चेत्यत्राङ्ग्रहणञ्चरितार्थम् तद्धि खड्वा आ उढा इति स्थिते परमपि सवर्णदीर्घम्बाधित्वा धातूपसर्गकार्यत्वेनान्तरङ्गत्वादादृगुणे वृद्धिप्राप्तौ तद्बाधनार्थं क्रियते युगपत्प्राप्तस्याप्यन्तरङ्गस्य बलवत्त्वाभावश्चेत्परिभाषाबोध्यः स्यात्तदा ऽनया बाधादन्तरङ्गपरिभाषाया अप्रवृत्तौ परत्वात्सवर्णदीर्घे ततो गुणे रूप-

सिद्धावाङ्ग्रहणवैयर्थ्यं स्पष्टमेवेति दीक्षिताशयः वस्तुतस्तु न परिभाषाद्वयम् किंत्वन्तरङ्गे कर्त्तव्ये जातन्तत्कालप्राप्तिकञ्च बहिरङ्गमसिद्धमित्येतदर्थिका परिभाषा एकैव यत्राजानन्तर्यपरिभाषायां षत्वतुकोरसिद्ध इति सूत्रस्थन्तुग्ग्रहणं ज्ञापकन्तदसिद्धामिति परिभाषाया अनित्यत्व एव ज्ञापकमिति सर्वेष्टसिद्धिः असिद्धपरिभाषाया अपवादभूतामन्यामपि परिभाषामपठन्ति प्राञ्चः अकृतव्यूहा इत्यादि विशिष्ट ऊहो येषु तानि व्यूहानि शास्त्राणि ऊहस्तर्कः स च बाहिरङ्गेणान्तरङ्गनिमित्तविनाशरूपस्तद्वन्ति शास्त्राणि अकृतानि यैरित्यर्थः भाविनि निमित्तविनाश इत्याध्याहारः एवञ्चान्तरङ्गशास्त्रनिमित्तस्य बहिरङ्गशास्त्रेण विनाशसम्भावनायामन्तरङ्गशास्त्राणाम्प्रवृत्तिं लक्ष्ये न कुर्वन्ति पाणिनिप्रोक्तशास्त्राध्येतार इति फलितम् अस्याञ्च समर्थानामिति सूत्रस्थं समर्थग्रहणं ज्ञापकन्तद्धि कृतसवर्णदीर्घात्सूत्थितशब्दादिञ् यथास्यादित्येवमर्थङ्क्रियते तच्चैतत्परिभाषाभावे ऽन्तरङ्गे सवर्णदीर्घे कृत एव भविष्यतीति व्यर्थं सदस्या ज्ञापकम् अकृतव्यूहपरिभाषासत्वे तु भाविन्या आदिवृद्ध्या दीर्घनिमित्तस्य सवर्णाच्त्वस्य विनाशः सम्भावित इत्यकृतदीर्घात्सुउत्थितशब्दादिञ् प्रत्ययः स्यात्तथा च सावुत्थितारिति रूपं स्यादिति तन्निरूत्यर्थमिति तेषामाशयः ॥ ननु प्राचीनसम्मताया अकृतेतिपरिभाषाया लक्ष्यसाधकत्वेनावश्यकतया भाष्यकृतैषा कुतो नोक्तेत्याशङ्कायान्तदभिप्रायमाह यदित्विति क्रमेणान्वाख्याने ऽकृतेतिपरिभाषां विना न निर्वाह इति पदेति एवञ्च निसेदुषस् ईभम् इति स्थितिङ्कल्पयित्वा वस इट्सम्प्रसारणयोः प्राप्तौ प्रतिपदविधित्वात्सम्प्रसारणे कृते वलादित्वाभावादिटः प्राप्तिरेव नेति निषेदुषीमित्यादिसिद्धिरित्येषा निष्फलेति नवीनाः समर्थानामिति सूत्रस्थसमर्थग्रहणन्तु विष्णु इत्यत्राकृतसन्धेरपि प्रत्ययदर्शनेन सूत्थितादावपि तथा ऽकृतसन्धेर्वार्णादाङ्गमिति परिभाषया प्रत्ययो माभूदित्येवमर्थङ्क्रियते अस्याः परिभाषायाः असत्वादेव चौ प्रत्यङ्गस्य प्रतिषेध इति वचनं वार्तिककृतारब्धम्भाष्यकृता च न प्रत्याख्यातम् प्रत्यङ्गमन्तरङ्गम् अस्याम्परिभाषायां सत्यान्तु प्रतीच इत्यादिरूपाणामनयैव सिद्धेस्तद्वैयर्थ्यं स्पष्टमेव अत एव च्छ्वोरिति सूत्रेऽवश्यमत्र तुगभावार्थो यत्नः कर्त्तव्यो ऽन्तरङ्गत्वाद्धि तुक् प्राप्नोतीति भाष्ये उक्तम् परिभाषायाः सत्वे तु विश्नः प्रश्नः इत्यादौ तुगभाव-

स्य परिभाषयैव सिद्धेराश्रयकत्वकथनवैयर्थ्यं स्पष्टमेव अत एव अस्याः परिभाषाया असत्वादेव ननु प्रतिपदविधित्वमनवकाशत्वे सत्येव बाधकत्वे प्रयोजकत्वञ्चात्र नास्ति लुलुवुषश्चिच्युष इत्यादावस्य चारितार्थ्यादत्र हि वस्वेकाजादिति नियमादिडभावस्य सिद्धेरिति कथमेतदिति चेन्न तथात्वाभावेपि शीघ्रोपस्थितिकत्वप्रयोज्यम्प्रतिपदविधित्वात्पूर्वप्रवृत्तौ प्रयोजकम्भवत्येवेत्याशयात् अत एव प्रत्ययोत्तरपदयोश्चेति सूत्रव्याख्यानावसरे परनित्यान्तरङ्गप्रतिपदविधयो विरोधिसन्निपाते तेषाम्मिथः प्रसङ्गे परबलीयस्त्वमिति कैयट आह अत एव रमे इत्यादौ प्रतिपदोक्तत्वेन पूर्वं संबुद्धौ चेत्येत्वे आकारपूरणाद्धलङ्यादिलोपो न प्राप्नोतीत्याशङ्क्यैङ्ह्रस्वादिति लोपेन समाहितम् अन्यत्र परिभाषेन्दुशेखरादौ इति परिभाषापूकरणविवरणम् ॥

इको यणचि पदानां वाच्या व्यक्तिरित्येकः पक्षः आनयनादिकार्यान्वयस्य व्यक्तिष्वेव दर्शनात् ननु व्यक्तेरानन्त्यात्सर्वासु व्यक्तिषु शक्तिग्रहासम्भवः यत्किञ्चिद्व्यक्तौ शक्तिग्रहश्चेद्व्यक्तन्तरस्य शक्तिग्रहाविषयतया शाब्दबोधविषयत्वन्न स्यादिति चेन्न ज्ञात्यादिरूपानुगमकधर्माणां शक्यतावच्छेदकत्वस्वीकारेण समानप्रकारकत्वेन शक्तिज्ञानपदार्थोपस्थित्योः कार्यकारणभावाभ्युपगमान्नानुपपत्तिरिति तेषामाशयात् नचाशक्यत्वेन कथं शक्यतावच्छेदकत्वमिति वाच्यम् अलक्ष्यत्वेपि लक्ष्यतावच्छेदकत्ववदशक्यत्वेपि शक्यतावच्छेदकत्वसम्भवात् जातावेव पदानां शक्तिरिति पक्षान्तरम् व्यक्तिलाभस्त्वाक्षेपात् आनयनादिकार्यान्वय आक्षिप्तव्यक्तिद्वारैव जातेरेकत्वाल्लाघवमत्र पक्षे अत एव सवर्णेग्रहणमपरिभाष्यमाकृतिग्रहणादिति भाष्ये उक्तम् तत्राद्यपक्षाभिप्रायेणाशङ्कते नन्विति उकारादिभिरिति इकारविषये तु शङ्का न कृता तस्योच्चारितत्वेन तत्राणुदित्सूत्रप्रवृत्तिसम्भवात् दीर्घादीत्यादिना प्लुतानुदात्तादीनां सङ्ग्रहः उच्चारितः उच्चारितत्वेन गृहीतः पूत्यायकः स्वार्थबोधनसमर्थः ॥ तत्रापि पुस्तकेक्षणस्खलेपि सूक्ष्मेति जपमन्त्राणान्नैस्वर्येण ज्ञानस्यावश्यकतया नैस्वर्यस्य तालव्यादूचर्दूध्वदेशाद्यधिकरणकोच्चरितत्वरूपतया तत्र सूक्ष्मोच्चारणमावश्यकन्तद्व्रहसि पुस्तकेक्षणस्खलेपि बोध्यम् एतेन उच्चारित एव पूत्यायक इत्यसङ्गतम् लिपिस्मृतशब्दादर्थबोधानापत्तेरिति परास्तम् तत्रापि सूक्ष्मो-

च्चारणसत्वात् यत्र नोच्चारणन्तत्र नार्थप्रत्ययः यथा ऋगित्युक्ते विशिष्टसन्निवेशा ऋक् प्रतीयते ननु तस्या उच्चारणमिति यदा तदा नार्थप्रत्ययः अनुकरणवत् मूले तद्वाच्यवाच्येति प्रत्याहारवाच्याक्षरसमाम्नायपठ्यमानवाच्य इत्यर्थः अक्षरसमाम्नायवाच्यत्वग्राहकञ्चाणुदित्सूत्रमेव रत्नाकरादुच्चिक्षण्डयति एतेनेति इक्पदवृत्त्या इक्पदशक्त्या अनन्वयापत्तिरिति प्रत्ययानाम्प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति सिद्धान्तात् अत एव सार्वधातुके यगिति सूत्रे पच्यमान इत्यादौ कर्तरि शानच् कर्मणि यगिति पक्षे प्रकृतिप्रत्ययाविति नियमेन कर्मार्थविशेष्यकबोधानापत्तिः कर्तुरेव प्रथमतो जातप्रत्ययार्थत्वादित्युक्तम् परास्तम् लक्षणायां दीर्घादाविक्पदस्य लक्षणारूपा या वृत्तिस्तदाश्रयत्वान्निरस्तमित्यर्थः वृत्तिप्रयोज्येति प्रकृतिवृत्तिप्रयोज्येत्यर्थः प्रयोज्यत्वन्तु जन्यजन्यत्वम् नचैवं सति घटमानयेत्यत्र घटोपस्थितिविषयघटे विभक्त्यर्थानन्वयापत्तिर्घटस्य योपस्थितिः सा घटपदजन्यैव ननु घटपदजन्यजन्येति वाच्यम् अस्य ग्रन्थस्य प्रकृताभिप्रायकत्वात्सामान्यतः कल्पितस्तु नियमः प्रकृतिजन्यत्वघटित एव जन्यत्वजन्यजन्यत्वान्यतरत्वमेव प्रयोज्यत्वमित्यस्य सामान्यतो नियमे प्रवेश इत्यभिप्रायाद्वा ॥ प्रत्याहारग्रहणे यदिं लक्षणा तर्ह्यणुदित्सूत्रस्थाण्ग्रहणं विनापि निर्वाहात्तद्वैयर्थ्यम् नच यत्र न प्रत्याहारग्रहणङ्किन्त्वेकवर्णमात्रबोधकशब्दोपादानन्तदर्थन्तदस्तित्वति वाच्यम् तत्रापि वक्ष्यमाणरीत्या लक्षणाया आवश्यकत्वादित्याशयेन शङ्कते नन्विति अणुदित्सूत्रमिति उदितः सूत्रमुदित्सूत्रमण्विशिष्टमुदित्सूत्रमणुदित्सूत्रमित्यर्थः एवञ्चोदिद्ग्रहणस्यावश्यकत्वेपि सविशेषणे विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्ये बाधे इति न्यायेन स्वर्गी ध्वस्तः शिखी विनष्ट इत्यादिस्थलइव विशेषणे पर्यवसानम्बोध्यम् आद्यवर्ण इति तत्रानुबन्धसमभिव्याहारेणाक्षरसमाम्नायिक एवार्यमिति प्रत्याभिज्ञायाः सम्भवेनाणप्पदबोध्यत्वस्य सम्भवादिति भावः अन्यसवर्णानामिव द्वितीयादिसवर्णानामिव तत्सवर्णानाम् आदिसवर्णानाम् प्रत्याहारवाच्यत्वस्यादिवर्णेपि सत्वादिति भावः अस्य च्वावित्यादाविति आदिपदेन एरजित्यादिसङ्ग्रहः एतेषु प्रत्याहारग्रहणाभावादित्याशयः अत एव शुक्लीभवतीतिवन्मालीभवतीत्यस्य सिद्धिः शङ्कानुरोधेनाह व्यक्तिपक्ष इति अस्य अस्य च्वावित्यादिसूत्रस्थाकारादिवर्णस्य भेदेनेति यत्र प्रत्याहारनिर्देश-

स्त्र यथा आद्यवर्णस्यानुबन्धसमभिव्याहारेण स एवायमिति प्रत्यभिज्ञा-
विषयत्वं तथात्राभावेनैतेषु तादृशप्रत्यभिज्ञाया असम्भवेन भेदस्य निश्चि-
तत्वेनेत्यर्थः अत एवाह अणुत्वाभावादिति ननु प्वादीनां ह्रस्व इति नि-
र्देशेन ज्ञापकेनाप्रत्यय इति निषेधारम्भेण च तत्सदृशेपि प्रत्याहारनि-
र्देशबोध्यङ्कार्यसम्भवतीति निश्चयो भविष्यति अन्यथा सना शंसभिक्षउरि-
त्यत्रोपात्तोकारस्याप्यस्य च्वावित्यकारबद्धेदेन ग्रहणकशास्त्राप्राप्तेरुद्वैयर्थ्यं
स्पष्टमेव अत एवावात्तामित्यत्र तकारद्वयस्य झल्प्रत्याहारबोध्याक्षरसमाम्ना-
यिकतकारसादृश्यञ्झलो झलीत्यस्य प्रवृत्तेरिति चेन्न इणो यणित्यत्र ण-
कारचिन्हेन यकारांशे तत्त्वप्रत्यभिज्ञासत्त्वेन तत्राप्रत्यय इत्यस्य चारिता-
र्थ्यात् प्वादीनामिति निर्देशस्यापूर्वार्थज्ञापकत्वकल्पनापेक्षया मूलोक्तार्थ
एवोपष्टम्भकत्वस्य सम्भवात् लक्ष्यतावच्छेदकज्ञानार्थमिति तद्वाच्यवाच्य-
स्वरूपस्य लक्ष्यतावच्छेदकधर्मस्य लक्ष्येषु ज्ञानार्थमित्यर्थः प्रत्याहारवाच्य-
स्याक्षरसमाम्नायपाठेतेष्वादिरन्त्येन सहेतेतिसूत्राऽज्ञानसम्भवेपि तद्वा-
च्यत्वस्य दीर्घादिषु ग्रहो ऽणुदित्सूत्रादेवेति भावः प्रत्याहारग्रहणेष्विति सा-
मान्यत उपादानेनावर्णविषयेपि लक्षणयैव निर्वाहे तत्र शक्त्या बोधन-
स्यानावश्यकत्वन्ध्वनित्तत् यत्तु युगपद्वृत्तिद्वयकल्पनाया विरोधेन सर्वेषां
लक्षणयैव बोधनमनुचितङ्किन्तु दीर्घाञ्जासि चेति ज्ञापकादकृपदस्य दीर्घेकारे
ऽस्तु लक्षणा ह्रस्वोकारादीनान्तु शक्त्यैव बोधनम्भविष्यतीति तत्र यणा-
देशासिद्धिः ल्वादिभ्य इत्यादिनिर्देशस्य दीर्घोकारादिष्वपि लक्षणया बो-
ध्यत्वसाधकत्वे त्वनेकज्ञापककल्पनापेक्षया जातिपक्ष एव ज्ञापकमस्त्विति
तन्न सति तात्पर्ये युगपद्वृत्तिद्वयस्य गङ्गायां मीनघोषौ स्त इत्यादिषु दर्श-
नेन तयोर्विरोधस्याभावात् इति चेति उपलक्षणमिति शेषः ॥ आवश्यक-
त्वादिति अन्यथोक्तरीत्या ऽनुपपत्तिपरिहाराभावादिति शेषः ननूक्तार्थ-
योर्लक्षणास्वीकारे ऽस्य च्वावित्यत्रेवोकारादिप्रत्ययाविषयेपि लक्षणायाः स-
म्भवादोष एवेत्यत आह अणुदिदित्यत्रेति अत एव विधीयमानातिरिक्त-
विषयैवेति स्वीकारादेव नन्वेवं नाञ्झलाविल्यादावनुवादस्थले दोष एवे-
त्यत आह नाञ्झलाविति अग्रहादिति वाक्यापरिसमाप्तिन्यायेन नाञ्झ-
लाविल्यादिषटकप्रत्याहारस्य स्वशक्यतावच्छेदकधर्मावच्छिन्नबोधकत्वस्यैव
सम्भवादिति भावः तत्र लक्षणायाम् ननु प्रथमयोरिति सूत्रे ऽनुवृत्तं यद-

गिति पदन्तत्राकारस्योच्चारणेन तस्याण्त्वात्तत्राणुदित्सूत्रस्य प्रवृत्त्या विश्व-पावित्यादौ प्राप्तस्य पूर्वसवर्णदीर्घस्य व्यावृत्त्यर्थन्दीर्घाज्जसि चेति सूत्रम-स्त्विति कथन्तस्य ज्ञापकत्वेनोपन्यास इत्यत आह अकृपदयेति ननु दीर्घा-कारविषये नादिचीत्येव सिद्धमिति कथनन्नोपपद्यते अस्य च्वाविव्यकार इवास्याप्यकारस्यानाक्षरसमाम्नायिकत्वेन तत्राणुदितिसूत्रामप्रवृत्तेरिति चेन्न अमि पूर्व इति सूत्रे ऽनुवृत्ताकृपदस्य नादिचीत्यत्रापि सम्बन्धस्तस्य च वि-शेषत्वमिति प्रत्याहाराश्रयवर्णे नादिचीत्यस्य प्रवृत्तिरित्याशयात् यदि निरा-कांक्षत्वात्तत्र तस्यासम्बन्ध इति ब्रूषे तदा ल्वादिभ्य इति निर्देशस्यैव ज्ञा-पकत्वमस्त्वित्याशयेन मूले तदुक्तिः सङ्गच्छते ननु यथासङ्ख्याभावोपपा-दनाय गुणाभेदकत्वप्रदर्शनमनुचितं यण्विषयेप्युक्तरीत्या लक्षणया नि-र्वाहादत आह विधीयमानेति ॥ ननु यद्यभेदस्तदाभेदानिबन्धनसप्तत्वस-ङ्ख्याविरोध इत्यत आह शास्त्र इति एतेन लोके भेद एव पदभेदकत्वेन ज्ञापकमस्थिदधीतिसूत्रे उदात्त इति कथनन्तच्छास्त्र एव तथाकल्पनेत्यत्र ज्ञापकमिति ध्वनितम् भेदकत्वाभावेपीति एतेन गुणकृतो भेदः शास्त्रप्रवृत्ति-प्रतिबन्धको नेति ध्वनितम् स्वरूपकृतेति तत्तद्धर्मवैशिष्ट्यस्य भेदसाधकतया सप्तत्वसङ्ख्याया उपपत्तिरिति भावः । अणुदिदित्यत्राजुदिदित्येव साम-ञ्जस्येणग्रहणम्भिन्नानां यणां सङ्ग्रहार्थमेवेति यण् विषये भेदकत्वपक्ष ए-वोचित इत्याशयेनाह यदि त्विति चत्वार इति निरनुनासिकानामेव या-दीनां यण्शब्दबोध्यत्वात् तत्खण्डन इति यथासङ्ख्यखण्डन इत्यर्थः ननु शक्यार्थबोधमादायेत्यसङ्गतमुक्तरीत्या सर्वत्र लक्षणया बोधकत्वस्येष्टत्वा-दतआह ल्वादिभ्य इत्यादीति ल्वादिभ्य इति निर्देशेनोहितः कल्पितो यस्तात्पर्यानुपपत्तिग्रहस्तस्य शक्यार्थबोधसत्वे एव सम्भव इति शक्यार्थबोध आवश्यकः लक्षणायाः शक्यार्थोपस्थितिमूलकत्वादिति भावः उक्तरीत्या दीर्घाज्जसीत्यस्य चारितार्थ्यादत्र ल्वादिभ्य इत्येवोक्तम् तत्र चेति शक्या-र्थबोधानन्तरज्ञायमाने वाक्यार्थबोध इत्यर्थः शक्यार्थोपस्थितिमूलकवाक्या-र्थबोधेपि ल्वादिभ्य इत्यादिनिर्देशानुपपत्तिरस्त्येवेत्यत आह ल्वादिभ्य इत्यादीति स्ववाचकेति दीर्घवाचकहूस्वान्वयिनीत्यर्थः स्थानेन्तरतम इति सूत्रेणैवेति मूलस्थैवकारेण यथासंख्यसूत्रं व्यवच्छिन्नमित्याह व्यक्तिपक्ष इति एवं व्यक्तिपक्षे दोषमुद्भाव्य तस्मिन्पक्ष एव स्थाने ऽन्तरतम इति सूत्रस्य प्र-

वृत्तिरिति न किन्तु जातिपक्षेपीत्याह लक्ष्यासिद्धेश्चेति निरनुनासिकवकारघटितानाम्वादीनामित्यादिलक्ष्याणामसिद्धेरित्यर्थः यदि यथासङ्ख्यपरिभाषाप्रवृत्तिस्तदा ऽनुनासिकोपि वकारः कदाचित्स्यात् भाव्यमानेन सवर्णानाङ्ग्रहणन्नेयतिरिक्ता तु परिभाषा गुणभेदकत्वात्प्राप्तस्य सवर्णग्रहणस्य न बाधिका किन्त्वणुदित्सूत्रप्राप्तसवर्णग्रहणस्यैवास्तीत्याशयेनाह भाव इति मूलकाराशय इत्यर्थः नन्वेवं सति यथासङ्ख्यसूत्रे भाष्ये किमुदाहरणमिको यणचि दध्यत्र मध्वत्रेत्युक्तन्तद्विरोध इति चेन्न तस्य भाष्यस्य प्राथमिकोपस्थितिकवर्णाभिप्रायकत्वात् ॥ अथ मूलकाराशयमुपवर्ण्य भाष्यकारीयसिद्धान्तानुसारेणाह परे त्विति प्रत्याहारसूत्रेषु प्रत्याहारघटितेषु झलो झलीत्यादिषु सूत्रेषु अग्रहादिति झलामण्भिन्नत्वादिति शेषः तत्र तेषु प्रत्याहारसूत्रेषु प्रत्याहारघटितेषु सूत्रेषु इदमुपलक्षणमस्य च्वावित्यादेः जातिनिर्देश एव तत्तज्जातेरेवोद्देश्यत्वनिमित्तत्वतात्पर्यकत्वादेव यद्यपि साक्षाज्जातौ तदसम्भवस्तथापि व्यक्तिद्वारा बोध्य इत्युक्तमेव निर्वाहः अवात्तामित्यादिलक्ष्याणान्निर्वाहः एवञ्च जातिपक्षावश्यकत्वे च उचित इति प्रत्याहारनिर्देशस्थले तत्तत्प्रत्याहारेणोद्देश्यबोधनायेत्यादिः अत एव जातिपक्षाश्रयणतात्पर्यकत्वादेव उक्तामिति व्यक्तिपक्ष इत्यादिः तत्र हि प्रत्याहारनिर्देशे सवर्णाग्रहणमनण्त्वात् तत्रानुवृत्तिनिर्देशे सवर्णाग्रहणमनण्त्वादित्यनेनोक्तामित्यर्थः एव कृतमिति एवकारेण लक्षणाव्यवच्छेदः लक्षणावादिमते ऽण्विषये व्यक्तिपक्षाश्रयणमण्भिन्नप्रत्याहारग्रहणस्थले जातिपक्षाश्रयणमिति यद्वैरूप्यन्तदस्मन्मते नास्ति एवञ्च यथोत्तरम्मुनीनाम्प्रामाण्यमिति लक्षणाश्रयणमप्रामाणिकमिति भावः जातिपक्षाश्रयणस्याभिप्रेतत्वादेव स्थाने ऽन्तरतम इति सूत्रभाष्ये किमुदाहरणमिको यणचि दध्यत्र मध्वत्र यथासङ्ख्येनाप्येतत्सिद्धमित्युक्तम् यत्तु यथासङ्ख्यसूत्रे दध्यत्र मध्वत्रेत्यस्य स्थाने ऽन्तरतमसूत्रोदाहरणत्वप्रदर्शनपरम्भाष्यन्तदिको यणचीत्यादौ सूत्रे तदुदाहरणे चोभयपक्षे फलांशे वैलक्षण्याभावतात्पर्यकमित्याशयेनाह यथासङ्ख्यसूत्रञ्चेति यथेति यदि व्यक्तिसाम्यस्य विवक्षा स्यात्तदा लशब्देन लृङ्लृटोर्बोधनेन तत्र यथासङ्ख्यसम्बन्धो न स्यात् नचेको यणचीत्यत्र स्थानसाम्यमपि नियामकामिति यदि फलाभेदाय कल्पयसि तदा लृकारस्य वकारोपि स्यादिति वाच्यम् स्थाने ऽन्तरतम इत्यत्र ग्रहणेनान्यूनानतिरिक्त-

स्थानकादेशस्य ग्रहणात् ॥ यथासङ्ख्यसूत्रस्येको यणचीत्यत्र प्रवृत्तिस्वीकारपक्षे मूलोक्तदोषापत्तिम्परिहरति नाप्यत्रेति अतिदेशादिति समानजातित्वातिदेशादित्यर्थः वस्तुतो ऋत्वजातिर्लृकारे नास्ति पृथक्पाठस्याक्षरसमाम्नाये कृतत्वात् अनित्यत्वेति ऋलृक्सूत्रे पृथक्पाठस्य धातुपाठे ऋकारलृकारयोः पृथक्करणस्य चात्र ज्ञापकत्वसम्भवादिति शेषः ननूद्देश्यांश इव विधेयांशेपि जातिनिर्देश एव वाच्यस्तथा च त्यदादीनाम इत्यादौ दीर्घापत्तिरत आह तत्पक्ष इति जातिपक्ष इत्यर्थः प्रत्याख्यान इति सवर्णे ऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादित्यनेन भाष्यकृता प्रत्याख्यान इत्यर्थः वाक्यभेदेन योगविभागेन चोः कुरित्यादौ विधेयविषये उदित्करणसामर्थ्यात्सवर्णग्रहणस्यावश्यकतया तदेकवाक्यत्वस्यावश्यकत्वेन योगविभाग आवश्यक इति भावः नचोच्चारणार्थ एवोकार इति शङ्क्यम् उद्देश्येपि तथात्वापतेः उदिद्ग्रहणसामर्थ्यादिति चेद्विनिगमनाविरहेणोभाभ्यां सवर्णग्रहणन्वा रमेव निषेधक इति एतेनाधुना प्रसज्यप्रतिषेधार्थको नञिति बोधितम् अन्यैनैकवाक्यतायां हि पर्युदासस्य प्रसक्तिः सर्वनिषेधकत्वे दृष्टान्तमाह तपरसूत्रवदिति यथा ऽत्र पक्षे तपरसूत्रस्य तद्वच्च तपरकरणमित्यइउण्सूत्रभाष्योक्त्या सूत्रस्य सार्थक्याय च सर्वनिषेधकत्वन्तथा ऽप्रत्यय इत्यत्रापि कल्पनेति भावः नच जातिपक्षे ऽप्रत्यय इत्यंशेपि प्रत्याख्येय इति भ्रमितव्यम् सवर्णेण्ग्रहणमपरिभाष्यमाकृतिग्रहणादित्यनेनाण्ग्रहणप्रत्याख्यानस्यैव भाष्यकृदभिमतत्वनिर्णयात् तपरसूत्रस्य सवर्णपदानुवृत्त्या नियमार्थत्वपक्षेपि फलितनिषेधमादाय दृष्टान्ततयोपन्यास इति बोध्यम् यत्तु त्यदादीनाम इत्यादौ पाथिमथीत्यत्रेव श्लेषेण निर्वाह इति तन्न पाथिमथीत्यत्राप्यप्रत्यय इत्यनेन निषेधात्श्लेषानुपयोगात् श्लेषे ऽनेकाल्त्वेन सर्वादेशत्वापत्तेश्च एवञ्च अप्रत्यय इत्यनेन निषेधे च अपिना गुणाभेदकत्वस्य परिग्रहः निरनुनासिक एवेति यत्र यत्र विधेयता तत्र सर्वत्रानेन निषेधादेव मतोर्मस्य निरनुनासिक एव वकारो ऽत एव तद्वानासाद्युपधानसूत्रनिर्देशसङ्गतिरन्यथा प्रत्यये भाषायामित्यनेन दस्य स्थाने ऽनुनासिकापत्तिरित्येवकारेण ध्वनितम् एवं यवलपरे यवला वेत्यनेनापि निरनुनासिक एव ॥ अत एव जातिपक्षस्याभिप्रेतत्वादेव उक्तामिति भवन्मते प्रागुक्तरीत्या यथासङ्ख्यासम्भवेन तदुक्तयसङ्गतिः स्पष्टैव तेन उक्तभाष्येण अत्र

इको यणित्यत्र उक्त इति जातिपक्षबोधनद्वारेति शेषः तयोः द्वयोः परिभाषयोः ननु उञितीति सूत्रोदाहरणे समये किम्वितीतिप्रयोगेऽनुनासिकवकारस्य प्रदर्शनपरदीक्षितादिग्रन्थस्य कथमुपपत्तिरत आह उञ इति सूत्र इति नव्यानाम् दीक्षितप्रभृतीनाम् जातिपक्षानाश्रयणेपि झलादिप्रत्याहारग्रहणस्थले निर्वाहमाशङ्क्य निराचष्टे नचेति रूपसादृश्येन स्वरूपस्य सदृशत्वेन यथा ऽल्पत्वमहत्वकृतभेदापरामर्शेनाल्पत्वमहत्वस्थूलत्वकृशत्वविशिष्टास्वपि व्यक्तिषु घटो गौरिति प्रत्ययो भवति तथा ऽत्तात्तामित्यत्र द्वयोरपि तकारयोर्झलादित्वोध्यत्वम्भविष्यतीति भावः किञ्चित्सादृश्येनेति तुल्यध्वनिव्यङ्ग्यत्वकृतमधुना सादृश्यम् दृष्टान्ते तु समानावयवसंस्थानकृतम् नतु जातिकृतम् जातिपक्षपरित्यागस्य कृतत्वात् ग्रहण इति हूस्वादिभिरिति शेषः उक्तार्थे मुनिसम्मतिमपि दर्शयति ल्वादिभ्य इति ईषदिति एतेन दीर्घाभिव्यञ्जकध्वनेराधिक्येपि न क्षतिरिति सूचितम् युक्तत्वादिति लक्षणाज्ञापकतापेक्षयोक्तार्थज्ञापकतायां लाघवादिति शेषः स्वोक्तार्थे भाष्यकारस्यापि सम्मतिमाह तदप्युक्तमिति तदपि रूपसादृश्येन सिद्धमित्यपि अपिना जातिपक्षसमुच्चयः नचात्र पक्षे ऋकारेण लृकारग्रहणानापत्तिरिति वाच्यम् तत्रापीषत्सदृशध्वनिव्यङ्ग्यत्वस्य सत्तायाः सत्वात् अणग्रहणप्रत्याख्यानपरभाष्यमत्र मानमन्यथा फलभेदेन प्रत्याख्यानासङ्गतिः स्यादेव ननु पक्षद्वयमपि सूत्रकारस्याणग्रहणकरणेन नाभिप्रेतमत आह अणुदित्सूत्र इति अयम् अणादिप्रत्याहारघटको ऽकारादिः उपायान्तरमिति तत्रैवोपायान्तरमित्यर्थः एतेनाथ च्वावित्यत्र तादृशचिन्हाभावेन तस्य सूत्रस्थ दीर्घेपि प्रवृत्त्यर्थमुपायान्तरस्यावश्यकत्वेन सूत्रकृतो न्यूनतेति ध्वनितम् इदमेव न्यूनतारूपन्दोषमेवेत्यर्थः भाष्य इति यथेतरम्मुनीनाम्प्रामाण्याज्जातिपक्षाश्रयणमेव वरन्नतु लक्षणाश्रयणमित्येतेन ध्वनितम् . यत्तु हूस्वस्येतिसूत्राद्धस्वग्रहणस्य दीर्घादितिसूत्रादीर्घग्रहणस्य चानुवृत्या दीर्घादिति पञ्चम्याः सेनासुराच्छायेति ज्ञापकात्पञ्चम्यर्थकत्वस्य लक्षणतया हूस्वदीर्घयोर्यणादेशेनेष्टसिद्धाविको यणचीतिसूत्रे इग्ग्रहणन्त्याज्यम् रामेश्वरो रमेशः दैत्यारिः श्रीश इत्यादौ गुणेन सवर्णदीर्घेन बाधादेवेष्टसिद्धेः तयोर्बाधकत्वे मानन्तु निरवकाशत्वादपवादत्वमेवेति तन्न यथीउइत्याह करभोरूउइत्याहेत्यादावप्लुतवदुपस्थित इति सूत्रेणाप्लुतवद्भावे कृते यणादेशानापत्तेः नच

प्लुतस्य स्थाने ऽप्लुतादेश एवास्त्विति वाच्यम् अग्नीउइतीत्यत्र प्रगृह्याश्रये प्रकृतिभावे प्लुतस्य श्रवणानापत्तेः नच यणादेशदृष्ट्या प्लुतस्यासिद्धतया न दोष इति वाच्यम् सिद्धः प्लुतः स्वरसन्धिष्विति सिद्धान्तात् अनुवर्त्तेति दीर्घादाचार्याणामित्यत्रेत्यादिः पर्युदासेति शब्दाधिकारेण प्रकृतसूत्रे पर्युदास इत्यर्थः तेन पूर्वसूत्रे प्रसज्यप्रतिषेध एवान्यथा दीर्घादाचार्याणामिति निषेधस्य प्राप्त्यभावो यद्यपि पर्युदासेनोपपादितस्तथापि द्वित्वस्याप्राप्त्या भाष्योदाहरणस्यासङ्गतिरेवेति शङ्कायां नावकाशः पर एवेति अत्रैवकारेणावसानव्यावृत्तिः नित्येति तन्मते आचार्यग्रहणस्य पूजार्थतया निषेधस्य नित्यत्वमिति भावः व्याख्यानेनेति तन्मते व्याख्यानेन एतेन हलीति वक्तव्ये ऽनचीत्युक्तिः प्रसज्यप्रतिषेधार्थैवेति ध्वनितम् ननु सर्वत्रेतिसूत्रे शाकल्यपदस्य विकल्पार्थकत्वेनात्वेत्यादिप्रयोगस्य निर्वाहे ऽत एवेत्यादियुक्त इत्यन्तग्रन्थस्य प्रकृते ऽनुपयोग इत्यत आह एवञ्चेति माधवादुद्धृतविकल्पाङ्गीकारे चेत्यर्थः इतिवदिति अनचीति सूत्रे विकल्पानुवृत्तेः सर्वसम्मतत्वेन तेनैव सर्वेष्टसिद्धौ सर्वत्रेतिसूत्रस्य वैयर्थ्यं यथा भवन्मते तथा दीर्घादाचार्येतिसूत्रस्याप्याचार्यपदघटितत्वे विकल्पार्थकतया ऽस्यापि प्रपञ्चरूपत्वमेवेति वैयर्थ्यदुर्वारामिति भावः इदम् दीर्घादितिसूत्रम् अपिना सर्वत्रेत्यस्य सङ्ग्रहः प्रक्रियाव्याख्यानपरतत्पौत्रोक्तिमनुवदति यत्विति वृत्ताविति उक्तामिति शेषः उद्धृत्य उपपत्तिपूर्वकं व्याख्याय तेन समानकर्तृकत्वस्योपपत्तिः एवङ्कथनङ्काशिकापदमञ्जर्योर्नादिन्योतिसूत्रे प्राप्तिविचारस्य क्वचित्पुस्तके उपलम्भाभिप्रायेण पदमञ्जर्यामेव प्राप्त्युल्लेखे तु वृत्तावित्यस्य व्याख्यानभूते पदमञ्जरीग्रन्थ इत्यर्थः एवम्पौत्रोक्तेरयमाशयः पूजार्थतायाः प्रामाणिकैरनुक्तेरित्ययुक्तम् मुनित्रयस्यौदासीन्येनाचार्यग्रहणस्य पूजार्थत्वलाभात् माधवोक्तिस्त्वयुक्ता उक्तस्य वाक्इत्यादिप्रयोगस्योक्तरीत्योपपत्तेः एवञ्च यथा नादिनीति नित्यो निषेध इति तत्रानचीत्यस्य प्राप्त्युद्भावनन्तथा दीर्घादित्यापि नित्यमित्यत्रापि प्राप्त्युद्भावनमावश्यकमेव त्रिप्रभृतिष्विति सर्वत्रेति च वैकल्पिकम् शाकटायनग्रहणशाकल्यग्रहणयोर्विकल्पार्थत्वादिति ॥ फलितत्वेनेति अभावाभावस्य प्रतियोगिरूपत्वान्निषेधस्य प्रवृत्तिपक्षे विधेरप्राप्त्या फलितत्वेनेत्यर्थः तथात्र प्राप्त्युद्भावनन्नावश्यकमिति भावः नित्यनिषेधेत्विति नादिनीशरोचिर्दीर्घादि-

तिसूत्रत्रये इत्यर्थः अभावस्य प्राप्तिपूर्वकत्वादिति शेषः एवञ्च राष्ट्रादिसिद्धये त्रिप्रेतिसूत्रमावश्यकमेव सर्वत्रेत्यस्य तु तत्र वा. पदस्य सम्बन्धेन विकल्पस्य सिद्धत्वादनावश्यकत्वमेवेति सूचितम् विकल्पेपीति सूत्रद्वये ऽप्राप्तविषयविधिविकल्पाङ्गीकारेपीत्यर्थः अपिना निषेधविकल्पपक्षसमुच्चयः प्रकरणादिति नादिनीति । सूत्रानन्तरमस्य पाठेन निषेधार्थकनञः सर्वत्र सम्बन्धादिति भावः आवश्यकत्वादिति एतेन तत्र प्राप्त्यकथनेन तस्य ग्रन्थस्य न्यूनतेति बोधितम् ननु तयोः सूत्रयोर्नञो ऽसम्बन्धेन न प्रकरणलाभ इत्यत आह मध्य इति द्वित्वमात्रेति अत्र मात्रपदङ्कात्स्न्र्ये तेनाचोरहाभ्यामित्यस्यापि सङ्ग्रहः नकारपकारयोः इन्द्रः राष्ट्रमित्युदाहरणघटकयोरिति शेषः उल्लेखस्येति द्विर्वचनशब्देन प्रथमोच्चारितेन प्राप्तेर्लाभादितिभावः अनुपलम्भादिति एतेन भवदीया कल्पना असङ्गतैवेति ध्वनितम् दिगेति दिगर्थस्तु आचार्यग्रहणस्य पूजार्थत्वे भ्राष्ट्रमित्यादौ विकल्पार्थं त्रिप्रभृतीत्यस्य प्रवृत्तिरवश्यमेव वक्तव्येत्याशयेन त्रिप्रभृतीत्यस्य सूत्रस्य राष्ट्रमित्युदाहरणप्रदर्शनपरवृत्तिग्रन्थव्याख्यानावसरे दीर्घादित्यस्यासिद्धत्वात् त्रिप्रभृतीत्ययमेव प्रतिषेधो भविष्यतीति मन्यत इति मिश्रोक्तिविरोधः वाक् वाक्क् इति भाष्योदाहरणविरोधश्च नचानचीत्यस्यानुवृत्त्या तस्य पर्युदासपरतया व्याख्यानान्न तदुदाहरणासङ्गतिरिति वाच्यम् मण्डूकानुवृत्तिकल्पनायाम्मानाभावात् तथा कल्पनायामपि शब्दाधिकारकल्पनायां साधकाभावेनोक्तार्थालाभाच्चेति ॥ नन्वादिशब्दोपादानमसङ्गतं ञ्नित्यादेशानां सर्वेषामुपादानादत आह आदिनेति तदभावे स्थानिवद्भावाभाव इत्यर्थः यदि विकरणादेशस्य स्थानिवद्व्यवहाराविषयत्वन्तदा तेषामादेशानामार्द्धधातुकत्वेन प्रत्ययत्वेनाङ्गसंज्ञानिमित्तत्वेन च ग्रहणं न स्यात् इष्टापत्तौ क्रमेण दूषणान्याह अवादिपातामितिअत्रावाधिपातामिति युक्तः पाठः इड् नस्यादिति आर्द्धधातुकत्वाभावादिति शेषः केचित्त्ववादिपातामित्यत्रात्मनेपदसमर्थनाय कर्मव्यतिहारे तङिति वदन्ति प्रत्ययत्वस्य फलमाह क्सादेरिति आदिना चङादेश्चास्य परिग्रहः बहुवचनम्प्रयोगबाहुल्याभिप्रायेण तन्न स्यादिति प्रत्ययत्वस्याभावेन लशकितीत्संज्ञा शस्य न स्यात् तृतीयस्य फलमाह माहीति ऋदृशोङीत्यस्याङ्गाधिकारे पाठादिति भावः प्रत्ययाधिकारे पाठात्प्रत्ययत्वे फलमाह श्नसूवदिति यद्यप्यस्य मित्त्वसामर्थ्यादागमत्वन्तथापि प्रत्ययत्वम्प्र-

त्ययाधिकारे पाठादत एव शस्येत्वसिद्धिः न स्थानिवत्वोपयोग इति औपदेशिकार्द्धधातुकत्वे प्रत्ययत्वमादायेष्टसिद्धेरिति भावः एतन्मते अदेशत्वेपि प्रत्ययत्वन्द्रढयितुं शङ्कते नचेति व्यर्थमिति च्लेः क्वाप्युच्चारणाभावेन सिज्लुङीति वाच्यम् चङादयस्त्वपवादा इति भावः शङ्काम्परिहरति मन्त्र इति मन्त्र इति सूत्रे भवन्मते च्लिविधानस्याभावेन लेरित्यस्य वक्तुमशक्यत्वादिति भावः त्रयाणामिति ग्रहणमिति शेषः धयतेराकारान्तात्यरयोश्च ङ्सिचोर्लुगर्थमेतयोर्ग्रहणं घसर्थमङो ऽन्यार्थं सिच इति विवेकः सिचो लुकि दोषान्तरमाह सिचो लुकीति इदञ्च यत्र सिजपवादप्रत्ययस्याप्राप्तिस्तद्विषये बोध्यम् तेन घस्णशगम्धातोः सिचो ऽसत्वेपि न ग्रन्थासङ्गतिः स्वरापत्तिरिति प्रत्ययलक्षणेनादिः सिच इति सूत्रेण सिजन्तस्यादुदात्त इत्यर्थकेनादुदात्तत्वापत्तिरित्यर्थः नच न लुमतेत्यस्य प्राप्त्या न दोष इति वाच्यम् लुमता लुप्ते प्रत्यये यदङ्गन्तदुद्देश्यककार्य एव निषेध इति सिद्धान्तात् अत एव पञ्चभिः क्रोष्ट्रीभिः क्रीतङ्कुलम्पश्चक्रोष्ट्र इत्यत्र तृज्वत्वम्भवति अङ्गस्य क्रोष्टुस्तृज्वत्वमित्यर्थेन तद्धितार्थेति समासे ठको ऽध्यर्द्धेति लुकि लुप्ते तद्धितेति स्त्रीप्रत्ययस्यापि लुकि स्वमोर्नपुंसकादिति सोर्लुकि कृतेपि प्रत्ययलक्षणेनाङ्गत्वस्य सत्वात् नचैवं सति वृषण्वस्वश्वयोरित्यनेन वृषण्वसुरित्यत्र भसंज्ञायामल्लोपो न इति सूत्रेणान्नन्तस्य भसंज्ञकाङ्गस्यानोकारस्येत्यर्थकेनाल्लोपापत्तिरिति वाच्यम् प्रत्यासत्त्याऽङ्गसंज्ञाभसंज्ञयोर्यत्रैकनिमित्तकत्वन्तत्रैव प्रवृत्तेरङ्गीकारात् नचैवमपि ममृष्ट इत्यत्र मृजेर्वृद्धिर्दुर्वारा भवद्रीत्या मृजेरङ्गत्वात् न लुमतेतिनिषेधस्याङ्गसंज्ञायामप्रवृत्तेर्भवतैवोपपादनादिति वाच्यम् ङिति चेति सूत्रेण ङिन्निमित्तप्रतिषेधस्य प्राप्तेस्तत्राङ्गसंज्ञाया अनपेक्षणेन न लुमतेतिनिषेधेन न क्ङितीत्यस्य प्राप्तिरित्यस्य वक्तुमशक्यत्वात् धातोः कार्यमुच्यमानन्तत्प्रत्यय इति निषेधाच्च ॥ नन्वादिः सिच इत्यस्य वैकल्पिकतया छन्दस्यापाद्यमानरूपस्य वक्तुमशक्यत्वेन न स्वरापत्तिरूपदोष इत्यत आह चेतीति तेन सिच एव स्थाने क्सादेशविधानमिति पक्षे ऽयुषन्नित्यत्र जुसापत्तेर्लौकिके तादृशप्रयोगे स्वरापत्तेश्च परिग्रहः यदि तु च्लिरुत्सर्गः क्सादयो ऽपवादा इत्याश्रीयते तदा न दोष इत्यवधेयम् परिगणने तु दोष एवेत्याह तेनेति परिगणनेनेत्यर्थः नचात्र स्थानीत्संज्ञकटकारोपलक्षितो नत्वादेश इतीट इत्यसंगतमिति वा-

च्यम् स्थानिनिष्ठस्येत्संज्ञकटकारोपलक्षितत्वस्यारोपाभिप्रायेणैवमभिधानात् इदम् अग्रहीदित्याद्यसिद्धिरूपदूषणम् अव्ययस्येति अस्य पृथग्ग्रहणेत्यत्रान्वयः अत्र अन्त्यपक्षे दोषत्वमिति ब्राह्मणवशिष्ठन्यायानाश्रयण इत्यादिः अत एवाह इति भाव इति एतेनायम्पक्षो निर्दुष्ट इति ध्वनितम् अव्ययादाप्सुप इति यस्मिन्काले प्रवर्तते तस्मिन्काले आकडारीयसंज्ञाविषये यथोद्देशपक्षाश्रयणेनाङ्गसंज्ञाप्रवृत्तौ प्रत्ययलोपेपि प्रत्ययलक्षणेन तत्प्रवृत्तौ बाधकाभाव इत्याशयेनाह अङ्गत्व इति उक्तरीत्या पञ्चेत्यत्र पदसंज्ञा यथा प्रवर्तते भाविफलासत्त्वात्तथात्र फलन्नास्तीति भावः ननु फलाभावेपि पर्जन्यन्यायेनाङ्गसंज्ञा भविष्यति लुक्प्रवृत्तिसमकालमेव संज्ञायाः प्राप्तेः सत्वात् यद्येकस्मिन्काले स्थानित्वनिमित्तत्वयोर्विरोधेन लुग्विधेः सर्वतो बलवत्त्वेन च तस्यैवादौ प्रवृत्तिर्भविष्यतीति ब्रूषे तर्ह्यस्त्वादौ लुक् तथापि प्रत्ययलक्षणेन लुगुत्तरमपि सा भविष्यतीत्यत आह लुका लुप्त इति अयम्भावः न लुमताङ्गस्येति सूत्रे न लुमता तस्मिन्निति न्यासो वार्तिककृता लुमति प्रतिषेधे तन्निमित्तग्रहणमित्यनेन बोधितः लुमता लुप्तो यः प्रत्ययस्तस्मिन्परे यत्पूर्वत्वदुद्देश्यकं यत्कार्यन्तत्र कर्तव्ये प्रत्ययलक्षणन्नेति तदर्थः एवञ्च तद्वार्तिकैकवाक्यतया सूत्रकारमतेपि फलभेदाभावाय लुमता लुप्ते प्रत्यये परे यदङ्गं यत्पूर्वत्वस्य यत्कार्यमाङ्गमनाङ्गं वा तस्मिन्कर्तव्ये निषेध इत्येवार्थो ननु लब्धाङ्गसंज्ञकत्वस्यापि निवेश इति निषेधस्याङ्गसंज्ञायामपि प्रवृत्तिर्भविष्यतीति नच पञ्चभिः क्रोष्ट्रीभिः क्रीतङ्कुलम्पश्चक्रोष्ट्र इत्यस्य सिद्ध्ये लब्धाङ्गसंज्ञकत्वनिवेश आवश्यको ऽङ्गस्य क्रोष्टुस्तृज्वत्वमिति सूत्रार्थात् तत्र हि तद्धितार्थेति समासे ठको लुकि लुक्तद्धितेति स्त्रीप्रत्ययस्य ङीपो लुकि सोर्लुकि कृतेपि तृज्वद्भावस्य सिद्धिः स्वष्टृञ्चेदं युवोरनाकावित्यत्र भाष्यकैयटयोरिति वाच्यम् तस्य ग्रन्थस्य न लुमतेत्यस्यानित्यत्वाभिप्रायकत्वात् अत एव प्रियातेस्र कुलमिति प्रयोगोपपत्तिः तदप्राप्त्या अङ्गसंज्ञाया अप्राप्त्या तेन अङ्गशब्देन ॥ ननु सुपो लुकि पदसंज्ञापि कथमत आह तत्वञ्चेति पदत्वञ्चेत्यर्थः निघातार्थमिति प्रातर्भवति प्रस्तुत्य भरतीत्यादौ तिङ्ङतिङ इति निघातार्थमित्यर्थः एतेन फलसत्वमुक्तम् सुबन्तत्वाच्चेति एतेन न लुमतेतिनिषेधाप्रवृत्तिं सूचयति पदसंज्ञाया लुप्तप्रत्यये यः पूर्वस्तन्मात्रोद्देश्यकत्वाभावात् त्रस्त्वर्थे तत्वम् पदत्वम् कृत्वस्यावश्यकतां ध्वनयति

अत एवेति कृत्वस्तावश्यकत्वादेवेत्यर्थः अत्र प्रस्तुत्येत्यत्र ननु कृत्वमात्रस्यानव्ययत्वेपि तदन्तस्याव्ययत्वेन तदादेशस्य समुदायस्याव्ययत्वेनाव्ययोदाहरणमूलोक्तं सम्यगेवेत्यर्थं सोपपत्तिकमनूद्य दूषयति नचेति अर्थवत्त्वेन भावार्थाभिधायकत्वेनास्य तत्वम् सर्वे सर्वपदादेशा इत्यत्र पदशब्दो ह्यर्थवत्पर इत्याशयः त्कादीनाङ्कचिदनर्थकत्वेन व्यवहारस्तु प्रकृत्यर्थातिरिक्तार्थाभावेन बोध्यः तादृशेति समुदाये इत्यर्थः मानाभावादिति श्रौतस्य स्थान्यादेशभावस्य यत्र स्थानिन आनर्थक्यन्तत्र समुदायस्य स्थानित्वमिति आनर्थक्यमेव तादृक्कल्पनायामानन्त्यमत्र नास्तीति भावः ननु जहत्स्वार्थाऽत्रिरिति पक्षे समुदायादेशत्वकल्पनमेव युक्तमत आह दिगिति रूढेरभावेन जहत्स्वार्थायास्त्र्याः अङ्गीकाराभावः प्रक्रियादशायान्तदनङ्गीकारश्चावश्यकोत एव सुपन्था इत्यादावात्वस्य पूर्वतपूर्योगे तुरुश्च सिद्धिरिति नन्वनलिश्चाविति दुचकामइत्यादिप्रयोगसिद्ध्यर्थमावश्यकमेवेति प्रश्नानुपपत्तिरत आह विधिग्रहणविशिष्टमिति दुचकामइत्यादिसिध्यर्थमनलीत्येव वाच्यमित्याशयः उत्तराशयस्तु षष्ठीसमासेनालाश्रये विधौ नेत्यर्थेन सकलसूत्रोक्तप्रयोजनसिध्यर्थन्तस्यावश्यकत्वमिति ननु तृतीयान्तार्थाभावेपि व्यूढोरस्केनेत्यस्य नासिद्धिः रषाभ्यामिति पञ्चमीनिर्देशेन तस्मादिति परिभाषायाः प्रवृत्तिसम्भवात् अत एवादर्शेनेत्यत्र न णत्वम् नच सौत्रव्यवायपदविरोध इति वाच्यम् अडादिभिन्नव्यवधानेनेत्यर्थात् अत एव क्षुभ्नादिषु क्षुभ्नशब्दपाठस्य चारितार्थ्यम् भाष्यकारमतेपि योगविभागेनोक्तार्थलाभाच्च ॥ तच्चाद्भिन्नत्वे स्वतो ऽस्त्येवेत्याशयिकामाशङ्कान्निराकरोति नचेति निषेधादिति नियमशास्त्राणान्निषेधमुखेन प्रवृत्तिरिति पक्षे निषेधः स्पष्ट एव विधिरूपेण प्रवृत्तिः सामान्यशास्त्रतात्पर्यसङ्कोचे इति पक्षेपि फलितनिषेधमादायेत्थमभिधानम् अतिदिश्यमानो यो धर्मस्तद्विरुद्धो यः स्वाश्रयधर्मस्तत्प्रयुक्तकार्याभाव इत्यर्थः स्वाश्रयः आदेशनिष्ठः कार्येति कार्यातिदेशस्य प्राधान्याभिप्रायेण शास्त्रातिदेशोपि कार्यातिदेशादभिन्न एव फलत इत्यभिप्रायेण स्वभावेति यथा सिद्धत्वासिद्धत्वयोर्विरोधेन जहीत्यत्रासिद्धवदत्रेत्यनेनासिद्धत्वातिदेशेपि स्वाश्रयो हेर्लुङ्न भवति असिद्धवत्सूत्रन्तु शाधीत्यत्र स्थानिप्रयुक्तस्य धिभावस्य झलन्तत्वस्य बुध्या प्रवृत्तिसम्पादनेन चरितार्थम् इदम् स्वभावसिद्धपूर्वोक्तम् नच ब्राह्मणवदस्मिन्क्षत्रिये वर्तितव्य-

मित्यत्रातिदिश्यमानो धर्मो ब्राह्मण्यन्तत्प्रयुक्तकार्यविरुद्धस्याध्यापनप्रतिग्रहनिवृत्तिरूपस्य क्षत्रिये दर्शनेन भवदुक्तः स्वभावो व्यभिचरित इति वाच्यम् तत्रापि न ब्राह्मण्यस्यातिदेशः किन्तु अभ्युत्थानसत्कारादिरूपस्य तद्विरुद्धन्यूनत्वबुद्धिप्रयोज्याभ्युत्थानाभावाप्रवृत्तिसम्पादनेनातिदेशस्य चारितार्थ्यात् सामान्यातिदेशे विशेषानतिदेश इति हि परिभाषा लोकप्रसिद्धा यथा ब्राह्मणवदस्मिन्क्षत्रिये वर्तितव्यमित्यनेनाग्रासनाद्यतिदेशो दृश्यते नतु माठरकौण्डिन्यसम्बन्धिपरिवेषणादिधर्मस्य एवञ्च वत्वस्य वल्त्वस्य वा हल्त्वापेक्षया विशेषधर्मत्वेन तदतिदेशो न भविष्यति किन्तु हल्त्वस्यैव तथा च कथमतिदेशेन दुच्यकाम इत्यत्र बलि ककारे लोपस्य प्राप्तिरित्याशयेन शङ्कते यद्यपीति हल्त्वादीत्यादिना वल्त्वपरिग्रहः नच वत्वस्य विशेषधर्मत्वेपि न तद्रूपत्वेन निमित्तत्वं किन्तु वल्त्वेनैवेति वत्वातिदेशापेक्षाया एवाभाव इति तस्य विशेषधर्मत्वोपपादनपूर्विका कथमियमांशकेति वाच्यं दिव उदित्यत्र दिव इति षष्ठीनिर्देशादलोन्त्यपरिभाषाया उपस्थित्या दिवोन्त्यस्य वस्येत्यर्थस्य प्राप्तौ वत्वस्य स्थानितावच्छेदकत्वेन तस्योपस्थितौ तद्व्यापकं वल्त्वमप्युपस्थितं भविष्यतीत्याशयात् परिभाषाघटकसामान्यविशेषशब्देन यस्य कस्यचिद्ग्रहणे प्रमेयत्वादिकेवलान्वयिधर्मापेक्षया विशेषधर्मत्वं सर्वस्यापि धर्मस्यास्तीति कस्याप्यतिदेशो न स्यादतः सङ्ग्राहकवाक्यादुपप्लुतलक्ष्यसंस्कारकवाक्यघटकशब्दोपात्तधर्मापेक्षया विशेषधर्म एव विशेषशब्देन ग्राह्यः आशंसायां भूतवच्चेत्यत्र भूतचापेक्षया ऽनद्यतनत्वविशिष्टभूतत्वं यथा एवञ्च प्रकृते स्थानिवदादेश इति यदतिदेशसूचकं वाक्यन्तत्र यत्स्थानिपदन्तदुपात्तधर्मस्यैवातिदेशो नतु तद्व्यापकस्येत्यर्थो वाच्यस्सत्त्वनुपयुक्तः स्थानित्वादेशस्य निष्फलत्वात्किन्तु तस्मादुपप्लुतं यद्वकारवदुकार इत्याकारकं वाक्यन्तद्घटकशब्दोपात्तवत्वापेक्षया विशेषधर्मत्वमेव वक्तव्यन्तच्च वत्वे नास्तीत्याशयेन समाधत्ते तथापीति ॥ एतादृशवाक्योपप्लवे मानमाह सूत्रेति अलोन्त्यपरिभाषैकवाक्यतया सूत्रलक्ष्येत्यर्थः स्थानिवद्भावाङ्गीकारेपि लक्ष्यस्य सिद्धिरित्याशयेन शङ्कते यद्यपीति पक्षे लोपाभावपक्षे यत्तु हलि सर्वेषामिति नित्यलोपस्य वैकल्पिकलोपापवादतया क इत्येव स्यादिति तन्न हलीति सूत्रे वकारस्याप्यनुवृत्तिरिति स्वीकारेपि वृक्षव् करोतीत्यत्र नित्यलोपस्य चरितार्थतया ऽपवादत्वासम्भवात् नित्यलोपविधाय-

के ऽश्ग्रहणानुवृत्त्या ऽश्रूपहल्येवमवृत्तिरिति स्वीकारेपि वृक्षवित्यत्र विज्ञि-
त्तिकवलोपस्य प्राप्त्या वृक्षवादेरनभिधानाच्च नच लोपोव्योरिति वलोपे
ऽचः परस्मिन्निति टिलोपस्य स्थानिवद्भाव इति वाच्यम् न पदान्ताः परे
ऽणः सन्ति ननु चायमस्ति कर्तृहर्त्रितिभाष्याद्वृक्षवादेरनभिधानेन नित्यलोपवि-
धायके वग्रहणानुवृत्तेर्निष्फलत्वात् अत एव भोभगोइति सूत्रस्थमश्ग्रहणम-
नर्थकमन्यत्राभावादिति भाष्यं सङ्गच्छते मूले स्थान्यवयव एवेति अत्र ए-
वकारो भिन्नक्रमः स्थानिपदोत्तरन्द्रष्टव्यः अत एवादेशावयवाश्रयणेपि न
निषेध इत्येतद्दर्शयति तेनेति ननु स्थान्यवयवालो ग्रहणे स्थान्यवयवाल्वृ-
त्तिधर्मावच्छिन्नस्याश्रयणे निषेध इत्यर्थलाभेन प्रपठ्येत्यस्य व्यावर्त्यस्य सि-
द्धावपि विधिग्रहणविशिष्टस्यानल्विधावित्यस्य यद्व्यावर्त्यं मूले दर्शितन्तद-
नुपपत्तिः प्रकृतसूत्रभोभगोइति सूत्रस्थभाष्यविरोधापत्तिश्चेत्यत आह उपल-
क्षणेति अत एव स्थानिरूपस्याप्याश्रयणादेव आदेशिन्यालि स्थानिन्यालि
आदेशिन्यलीत्यत्र समानाधिकरणे सप्तम्यौ आदेशिनीत्यत्र सम्बन्धिन आ-
धारत्वविवक्षया सप्तमी सम्बन्धश्चेतरसम्बन्धानवच्छिन्नविशेषणविशेष्यभावो
ऽवयवावयविभावश्च तेनोभयोर्लाभः अत्र प्रपठ्येत्यादुदाहरणप्रदर्शनपरा-
कर एव मानम् अतः स्थानिस्थान्यवयवान्यतरालो ग्रहणात् प्रत्ययत्वमिति प्र-
त्ययत्वस्य सुप्त्वव्यापकतया व्यापकासतायां व्याप्यासत्वमप्यवश्यं स्यात्तीति
तदभावसूचनायेत्थमभिहितम् तेन रामायेत्यस्य सिद्धिरन्यथा ऽप्रत्ययान्ततया
समुदायस्य प्रातिपदिकत्वापत्तौ सुप्त्वातिदेशाल्लोपापत्तिरपि वारिता ॥ भा-
ष्ये आश्रीयमाणपदोपादानेन स्थानिबोधकशब्दजन्यप्राथमिकोपस्थितिविषय-
ता यत्तात्त्वावच्छिन्ना तत्र निषेध इति ध्वनितमित्याशयेनाह अग्रहीदित्या-
दाविति नचैवं सति क इष्ट इत्यत्र वचिस्वपीतिसम्प्रसारणन्तत्र वाक्यार्थः
संज्ञीति पक्षे वच्यादीनां यण इक्संप्रसारणाभिन्न इत्यर्थो भविष्यति एवञ्च
स्थानिबोधकः शब्दो यण् इति तज्जन्योपस्थितिविषयता यण्त्वावच्छिन्ना
नतु अल्त्वावच्छिन्नेति कथमालि विधावित्यस्य तदुदाहरणमिति वाच्यम् अ-
ल्त्वावच्छिन्नेत्यस्यात्पर्याप्तधर्मावच्छिन्नेत्यर्थात् तथाच यण्शब्दजन्योपस्थि-
तिविषयता यद्यद्रूपावच्छिन्नस्य यणसंज्ञा तत्तद्रूपावच्छिन्नेति यत्त्वरूपस्याद-
शो धर्मः स चात्पर्याप्त एवेति तदुदाहरणं युक्तमेव एवमेव प्रत्याहारनिर्देशे
सर्वत्र बोध्यम् दिव औदित्यादौ चालोन्त्यपरिभाषैकवाक्यतया ऽत्पर्या-

ष्तालत्वावच्छिन्नैव सेति तत्रापि निषेधस्य प्रवृत्तिः यत्तु यन्निमित्तवैकल्य प्रयुक्तोपदेशाप्रवृत्तावतिदेशो मृग्यते तस्य निमित्तस्य स्थान्यल्साधारणधर्मत्वे निषेध इत्यर्थ आश्रयणीयस्तथा च सुप्त्वस्य भ्यामादौ समुदायेपि सत्वान्नाल्साधारण्यामिति न तत्र निषेध इति तन्न तन्वन्तीत्यत्रोकारवृत्त्यार्द्धधातुकत्वस्य तत्यादिसमुदायेपि सत्वेन नाल्साधारण्यमिति तस्यातिदेशेनेट् स्यात् नचापरविधाविति करणेनाचः परस्मिन्नितिसूत्रेण स्थानिवद्भावेनेट् तत्र भाष्यकृतैव वारित इति वाच्यम् तस्य भाष्यस्यैकदेश्युक्तित्वात् तस्यैकदेश्युक्तित्वसाधकञ्चायन्नासान्निति तदुदाहरणप्रदर्शनमेव तस्योदाहरणस्यासिद्धवत्सूत्रेण सिद्धेः नच क्रुन्मेजन्तसूत्रभाष्ये आधये चिकीर्षवइत्यत्रेकारोकारवृत्तिकत्वस्याल्पर्याप्ततया निषेधयोग्यतायाः सत्वेन कथमव्ययसंज्ञाप्राप्तिरुक्तेति वाच्यम् तत्र स्थानिबोधकस्य घिशब्दस्य प्रथमतः समुदायोपस्थापकतया स्थानिबोधकशब्दजन्यप्राथमिकोपस्थितिविषयतां नाल्पर्याप्तधर्मावच्छिन्नेत्यदोषात् नच तथापि कुम्भकारेभ्य इत्यत्र बहुवचने झल्येदित्येत्वे कृते स्थानिवद्भावेन कृतमाश्रित्याव्ययत्वप्राप्तिशङ्का कृता सा कथं संगच्छताम् स्थानिबोधकादत इतिशब्दादल एव प्रथममुपस्थितिसत्वादिति वाच्यम् तत्रापि प्रथमतो ऽल्त्वेनोपस्थितिर्नेत्वत्त्वेन अत्त्वन्तु समुदायपर्याप्तमिति न निषेधविषयतेत्यदोषादित्थमेवान्यत्रापि बोध्यम् अस्याङ्गल्पनायां विशिष्टं ह्येषो ऽनलमाश्रयते इटन्नामेति भाष्यमेव क्रुन्मेजन्तसूत्रस्थं भाष्यञ्च साधकमिति दिक् अत्रानल्विधाविति प्रसज्यप्रतिषेध एव नचासमर्थसमासापत्तिः बहुषु स्थलेषु तस्य दर्शनात् पर्युदासे हि स्थान्यल्भिन्नाश्रयके विधौ स इत्यर्थे व्यूढोरस्केनेत्यत्र णत्वापत्तेर्दुर्वारत्वात् स्थानिपदस्य स्थानिस्थान्यवयवान्यतरपरतया स्थानिस्थान्यवयवाश्रितविधिभिन्नाविधाविति व्याख्यानेन व्यूढोरस्केनेत्यस्य निर्वाहेपि बभूविवेत्यस्यानिर्वाह इत्यसमर्थसमासाश्रयणेन प्रसज्यप्रतिषेध एवाश्रितः नचान्यतराल्वृत्तिधर्मस्य वल्त्वस्याश्रयणादेवमपि बभूविवेत्यस्यासिद्धेरिति वाच्यम् यद्धर्मवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तस्य धर्मस्यान्यतराल्निष्ठस्यातिदेशे कर्त्तव्ये निषेधस्य प्रवृत्त्यङ्गीकारात् यदि तु ङेर्य इत्यादौ ङकारोच्चारणेन ङकारोपलक्षिते स्थानित्वस्य बोधनेनाग्रहीदित्यत्रेट इव सर्वत्र सूत्रोपात्तसमुदाये स्थानित्वमिति ङेशब्दनिष्ठं सुप्त्वे प्रत्ययत्वन्नाल्धर्म इति यन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावतिदेशो

मृग्यते सौत्रस्थान्यलनिष्ठधर्मावच्छिन्ननिमित्तकविधिभिन्नविधौ स्थानिवदित्यर्थ आश्रीयते तदा ऽस्तु पर्युदासः एवं सति लाघवमपि भवति पर्युदासेष्यार्थिकनिषेधमादाय निषेधपरत्वेन व्याख्यातृग्रन्था नेयाः पर्युदासपरतया व्याख्यानञ्च विशिष्टं ह्येषो ऽनलमाश्रयते इटन्नामेति वदता भाष्यकृता ध्वनितमसङ्ग्राहकवाक्यालक्ष्यसाधकं वाक्यमिड्वदीर्घइति ङेवद्य इति रीत्या कल्पनीयम् स्थानित्वावच्छेदकशास्त्रोपात्तमेव रूपम् ॥ व्याख्यानादिति अनलिति शब्दसंस्कारार्थं प्रथमोपादेयात्तल्लक्ष्योपपत्त्यर्थश्च विधिशब्दाध्याहारेण समासचतुष्टयफलानामुपपत्तिश्च कर्त्तव्येतिरीत्येष्टसिद्धौ विधिशब्दोपादानरूपादधिकाद्यत्नादित्यर्थः परमपूले निषेधो न शङ्क्यो ऽनल्विधाविति तन्निषेधादिति ग्रन्थस्य तच्छब्देन निषेधपरामर्शे ऽसङ्गतिरत आह मूले स्थानिवत्वेनेति तेन अल्विध्यर्थमस्य सूत्रस्यारम्भेण उरदिति सूत्रे उरित्यनेनाल एव स्थानित्वबोधनादिति तात्पर्यम् अचः परस्मिन्निति सूत्राप्रवृत्तिशङ्कां वारयति नचोरदल्विमिति दूषयित्वेति सामान्यत उपादानेन प्रकृतसूत्र इति भ्रमोपि स्यादिति तन्निवारणायाह अङ्गस्येतीति अत्र दूषणे हेतोरनुक्तेः प्रसिद्धस्य हेतोरनुपलम्भाच्चाह एतादिति वत्रश्चेत्याद्यसिध्येत्यर्थः यदा न संप्रसारण इति निषेधारम्भादन्यस्य यणः प्रथमतः सम्प्रसारणम्पूर्वस्य तु तन्निमित्तः प्रतिषेध इति स्वीक्रियते तदा वत्रश्चेत्याद्यसिद्धिरूपो दोषः प्रागभ्यासविकारेभ्यो ऽङ्गाधिकार इति पक्षे यदा तु न सम्प्रसारण इति सूत्रस्थसम्प्रसारणशब्दस्य सम्प्रसारणभाविनि लक्षणा ऽऽश्रीयते सम्प्रसारणप्रवृत्तिप्राकाल एव प्रतिषेधः निषेधसामर्थ्याच्च कृते परस्य सम्प्रसारणे पूर्वस्य सम्प्रसारणाप्रवृत्तिरित्याश्रीयते तदा नेदं प्रयोजनमचः परस्मिन्निति सूत्रारम्भस्येत्याशयेनाह मूले किञ्चेति न केवलमल्विध्यर्थमिदं सूत्रमित्येव किन्त्वपरोपि विशेष इति भावः अत एवाह विस्तरस्त्विति कैयटादिग्रन्थ इत्यर्थः ननु मूले तु वार्यते इत्येवोक्तं हेतुस्तु नोक्त इति न्यूनतेति तल्लाभायाह स्थानिनीत्यादि उक्तार्थस्य वक्ष्यमाणज्ञापकेन लाभे सति यथा लक्ष्यसिद्धिसम्पादकवचननिष्पत्तिस्तथाह अजादेश इति प्रयोगीयाच एवादेश इत्यर्थः नत्वत्रापि सूत्रे पूर्वसूत्रवत्सौत्रस्थान्यादेशभावस्य ग्रहणन्तेन णिलोपस्थानेन स्थानिवद्भावसिद्धिः अवधारणफलन्तु मरुतमाचष्टे मारयतीत्यादिसिद्धिः ननु सर्वत्र शब्दस्यैवाधिकारो दृष्ट इति शब्दाधिकार

इत्यनर्थकम् क्लृप्तार्थस्य त्यागेन शब्दमात्रस्यात्र सूत्रे सम्बन्धे च किम्मानमत आह पूर्वसूत्रेति इत्येतन्मात्रेति तेन नायकादिसिद्धिः उभयार्थकत्वेति भावाभावोभयार्थकत्वेत्यर्थः क्लृप्तार्थपरित्यागेन शब्दमात्रस्य सम्बन्धो यत्र तत्र शब्दाधिकार इति व्यवहारः यत्र तु क्लृप्तार्थसम्बद्धशब्दस्यान्यत्र सम्बन्धस्तत्रार्थाधिकार इति यद्यपि दीर्घशब्दस्याल्पाच्त्वन्तथापि सूत्रे प्रागुपादानादिह यलोपदीर्घावादी इत्युक्तम् द्वन्द्वान्ते श्रूयमाणमिति न्यायेनाह यलोपादय इति वैचित्र्यायेति अल्पशब्दोपादानेन लभ्यो ऽप्यर्थः क्वचित्स्थष्टप्रतिपत्तये ऽधिकशब्दोपादानेन बोध्यते तथापि नाधिकोपादानप्रयुक्तन्दुष्टत्वमित्येतद्वैचित्र्यध्वननायेत्यर्थः लिङ्गत्वमुपपादयति नहीत्यादिना ननु यलोपादीत्युक्तौ न्यूनता यथा यलोपादिग्रहणस्य ज्ञापकता तथा द्विर्वचनग्रहणस्यापि ज्ञापकत्वसम्भवादिति चेन्न वाक् वाक्क् इति भाष्यीयोदाहरणस्योपपत्त्यर्थमनचीतिसूत्रे ऽनचीत्यत्र प्रसज्यप्रतिषेधस्य सर्वैरङ्गीकृततया स्थानिनि सति भवतो निषेधस्यादेशे ऽतिदेशप्रसक्त्या ऽभावातिदेशमन्तरेणापि तस्य चारितार्थ्यसम्भवात् अभावातिदेशस्य फलमाह मूले अत एवेति अभावातिदेशादेवेत्यर्थः ननु गणयतीत्यादावचोञ्णितीति शास्त्रादतो लोप इत्यल्लोपविधायकशास्त्रस्य बलवत्त्वादकारस्य लोप एव भविष्यतीति न वृद्धिरित्यसङ्गतमत आह अत उपेति ॥ ननु तस्य प्रवृत्तिरभावातिदेशेपि दुर्वारा क्किलुगिति वार्तिकेन स्थानिवत्त्वनिषेधादत आह क्किलुगिति प्रत्ययेति यथा पारिखीय इत्यत्र परिखाशब्दाच्चातुरर्थिके ऽणि तदन्ताद्वृद्धाच्छस्य बाधको जनपदतदवध्योरिति वुञ् प्राप्तस्तम्बाधित्वा वृद्धादकेकान्तखोपबाधादिति छो भवति एवकारस्य क्किलुगिति वार्तिके चकारनिर्देसग्रहणाज्ज्ञापकाल्लुब्धस्य व्यावर्त्यमाह नान्यत्रेति तेन कथयतीत्यादेः सिद्धिः ननु वैयाकरण इत्यत्र निमित्तापेक्षया पूर्वत्वाश्रयणपक्षेप्यायादेशापत्तिरुक्ता सा न सङ्गच्छते निमित्तादेकारस्याव्यवहितपूर्वत्वाभावादत आह पूर्वत्वञ्चात्रेति स्वरे निषेधादिति तस्य हि चिकीर्षक इत्यादुदाहरणन्तत्र रेफषकाराभ्यां व्यवधानेन स्थानिवद्भावाप्राप्तेः स निषेधो ऽव्यवहितपूर्वत्वाश्रयणे व्यर्थः स्यात् अतः व्यवहितस्यापि पूर्वशब्देन ग्रहणात् अपिशब्दाभ्यामादेशापेक्षया पूर्वत्वस्य ग्रहणपक्षे दोषः सूचितः नचान्तरङ्गपरिभाषया ऐजागमस्यासिद्धत्वान्नोभयपक्षे वैयाकरण इ-

त्यत्रायादेशापत्तिः किरतौ लवन इति ज्ञापकादतिदेशविषयेपि तस्याः प्रवृत्तिस्वीकारादिति वाच्यम् ज्ञापकमूलकवचने कल्पनापेक्षया स्वान्यपेक्षया पूर्वत्वाश्रयणे लाघवात् मूले ऐचोः सिद्धमित्यत्रैच इत्यस्य श्रवणमिति शेषः परममूले न पदान्तेतिसूत्रस्थविधिशब्दस्य भावसाधनत्वाभिप्रायेण व्याख्यानङ्कृतन्नतु तस्य कर्मसाधनत्वन्तत्य फलम्मूले आह वृक्षं वेतीत्यादिना एतदेवोपपादयति अन्तशब्दस्येति यत्तु कैयटेन वृक्षं वश्चतीति किंपि तत आरूपाने णिचि विजुक्तस्तथा व्याख्यानफलनिरूपणावसरे स तु प्रकारो न युक्त उपधावृद्धेर्दुर्वारत्वादतो ऽयमेव साधनप्रकार आदृतः ऊद् स्यादिति तस्य वलोपापवादत्वादिति भावः अस्य वृक्षवृशब्दस्य पदत्वाभावादिति प्रातिपदिकाण्णिजुत्पत्तेः स्वीकारादिति भावः मूले हरदत्तादिमत इति तत्करोति तदाचष्ट इति वचनस्य द्वितीयान्तादिति तेन व्याख्यानादिति भावः नच प्रातिपदिकाद्धात्वर्थ इत्यत्र प्रातिपदिकादित्यस्य दर्शनेन सुवन्तादित्यसङ्गतमिति वाच्यम् तेनातिक्रामतीत्यत्र तेनेत्यस्य तृतीयान्तादिति व्याख्यानदर्शनेन तत्सादृश्यात्प्रातिपदिकादित्यस्य प्रातिपदिकप्रकृतिकस्सुवन्तादित्यर्थ इति तद्भावात् ॥ अन्तर्वर्तिसुपा पदत्वमीकाराद्यन्ते नतु वान्त इत्याशङ्कायामाह अन्तर्वर्तीति एकदेशेति तस्य न्यायस्य लौकिकत्वादिति भावः मूलेन चेष्टत्वादिति इदमपि परत्वात्सुप्तिङन्तमित्यस्य बाधकमिति भावः ननु प्रत्ययलक्षणमित्याशङ्का कृता सा न सङ्गच्छते तस्य सूत्रस्य नियमार्थत्वसिद्धान्तादत आह स्थानिवत्त्वेनेति एवञ्च स्थानिवत्सूत्रस्यैव प्रसक्तिशङ्केयमिति भावः अल्विधित्वात्तस्याप्राप्तिमुपपादयति णाविष्ठवदित्यादिना वर्णाश्रयमिति यजादीत्यस्य खादीत्येतद्विशेषणत्वेपि प्रपञ्चेत्यत्रेवाप्राधान्येनालाश्रयणेपि निषेधस्य प्रवृत्तेः स्वीकारादिति भावः ननु स्थानिवत्सूत्रेण प्राधान्यात्कार्यातिदेश एव क्रियते इति कथमतिदेशाप्रवृत्तिरत आह कार्यातिदेशेपीति अङ्गीकारादिति अत एव सर्वस्मिन्नित्यत्र दीर्घो न अतिदिष्टकार्यस्यापि यत्रादित्वनिमित्तकत्वात् ननु वर्णाश्रयेपि प्रत्ययनिमित्तककार्यार्थम्प्रत्ययलक्षणसूत्रमास्त्वित्यत आह प्रत्ययेति स्थापितामिति नचातृणेडित्यत्र कथमिमागमस्यस्य हलादौ पिति सार्वधातुके प्रवृत्तिस्वीकारादिति वाच्यम् हलीत्यस्य तत्र सम्बन्धमकृत्वा ऽचि नेत्यस्य सम्बन्धात् अनिष्टत्तेरिति अभ्युपेत्य वादोयम् वस्तुतो ऽचः परस्मिन्नित्यस्य प्रवृत्तिरेव न सम्भ-

वतीत्याह प्रकल्प्येति अयम्पक्षः सुबन्ताण्णिजिति पक्षः सम्मत इति प्रातिपदिकादिति तत्करोतीत्यादि च टेरिति सूत्रस्थस्य णाविष्ठवत्प्रातिपदिकस्येत्यस्यानुवादः तत्र वार्तिके प्रातिपदिकादित्यस्य प्रातिपदिकप्रकृतिकसुबन्तादित्यर्थकरणे प्रातिपदिकपदोपादानस्य व्यर्थत्वापत्तिरिति भावः ॥ मूलोक्तस्य भावसाधनविधिशब्दस्याश्रयणे तर्हि प्रयोजनाङ्किमत आह चरमावयव इति नन्वेषोयान्नित्यत्व तहुर्यत्वमपि न स्यादत आह उत्वे चेति तस्य भावरूपत्वेन पदचरमावयवत्वसम्भवात् कानि सन्तीत्यादौ स्थानिवद्भावप्रवृत्तिनिमित्तभूतमनादिष्टादचः पूर्वत्वमुपपादयति वाक्येति तत्र पक्षे वाक्यसंस्कारपक्षे एतन्मूलकमेव तादृशान्तरङ्गत्वमूलकमेव एतेन तस्यापूर्ववचनत्वन्निराकृतम् श्रुतवर्णक्रमेण यस्य प्रथमतः श्रवणन्तन्निमित्तककार्यस्यान्तरङ्गत्वात्तस्य पूर्वम्प्रवृत्तिरिति क्रमेण ननु जातिपक्षमुपादायाण्ग्रहणस्य प्रत्याख्यानवत्पदसंस्कारपक्षाश्रयणङ्कृत्वा पदान्तग्रहणम्प्रत्याख्यायतामिति चेन्न अदड्ढीच इत्याद्यर्थन्तस्यावश्यकत्वात् पदान्तग्रहणाभावे तत्राच इत्यल्लोपस्य स्थानिवत्वाद्यण् स्यात् नचाद्व्यादेशस्योभयाश्रितत्वमच इत्यस्य तु न तदाश्रितत्वमित्यच इत्यन्तरङ्गमिति तस्यादौ प्रवृत्तिस्ततो ऽद्व्यादेशस्येति नेकारस्यानादिष्टादचः पूर्वत्वमिति वाच्यम् भसंज्ञानिमित्तविभक्त्युत्पत्तिपर्यन्तस्याद्व्यादेशस्य प्रवृत्तिप्रतिबन्धे मानाभावेनाल्लोपात्प्राक् प्रवृत्तेः दुच्यप्रागपागुदक्प्रतीचोयदिति सूत्रे प्रतीच इत्यत्र यणादेशस्याकरणेनाच इत्यल्लोपस्य पूर्वस्य कार्ये कर्तव्ये न स्थानिवत्त्वमित्यर्थकल्पनायां तु ज्ञानगौरवस्याप्यनुचितत्वमित्यर्थसाधकमेव पदान्तग्रहणमास्त्वित्याशयेन भाष्यकृता तस्य प्रत्याख्यानन्न कृतमिति तेन यायावर इत्यत्र यङ्वयवाकारलोपस्य स्थानिवद्भावाभावेन तल्लाभः आर्द्धधातुकत्वालाभः यद्यकारस्यार्द्धधातुकत्वं स्यात्तदा तदादेशस्य लोपस्यातिदेशेनार्द्धधातुकत्वं स्यात्तदेव तु न सम्भवतीति भावः ननु सम्भावनामादाय वरेग्रहणस्य चारितार्थ्येपि नापूर्वम्फलङ्किञ्चिन्निष्पन्नमत आह फलान्त्विति ननु मूले यलोपविधिं प्रति न स्थानिवदित्यस्य यायावर इत्युदाहरणमेव कुतो नोक्तमिति चेन्न यातिरित्याद्यर्थं यलोपग्रहणस्यावश्यकतया तेनैवात्रापि स सिद्ध इति न तदंशे उदाहरणत्वमित्याशयात् इत्यादिसिद्धिरिति यदि सम्भावितमार्द्धधातुकत्वमाकारलोपनिमित्तन्न स्यात्तदा यातिरित्यत्र यङन्तात् क्तिचि कृते ऽकारयकारयोः

क्रमेण लोपे ऽकारस्यार्द्धधातुकत्वाभावेनाकारस्य लोपो न स्यादतः सम्भावितमप्यार्द्धधातुकत्वमाकारलोपस्य निमित्तमित्याश्रयणीयम् अत्रादिना लोलुवः पोपुव इत्यस्य सङ्ग्रहः अत्राच्प्रत्ययविषये यङ्वयवाकारस्य नधातितिसूत्रस्य प्रत्याख्यानपक्षे यस्येति योगविभागेनादौ लोपे यङ्लोचिचेति यलोपे ऽलोपस्य स्थानिवत्वेनाच्प्रत्ययनिमित्तको गुणो यथा न भवति तथोवङादेशोपि न तत्र तन्निमित्तकः किन्तु यङ्वयवाकारनिमित्तक एव वाच्यः स यदि सम्भावितम्प्रत्ययत्वन्नाश्रीयेत कार्यप्रयोजकत्वेन तदा न स्यात् ननु मूले यातिरित्यस्य साधनावसरे नच पुनराल्लोपः शङ्क्यः चिणो लुङ्न्यायेनातो लोपस्यासिद्धत्वात्स्थानिवद्भावाच्चेत्युक्तम् तत्र लक्ष्यभेदेन लक्षणभेदकल्पनया ऽसिद्धत्वमाकारलोपविधायकशास्त्रस्येत्यस्तु स्थानिवद्भावादिति तु न युक्तम् अभ्यासस्यासवर्ण इत्यनेनाभ्यासकार्ये तदुत्तरखण्डादेशस्याभ्यासकार्यप्रतिबन्धकीभूतस्थानिवत्वन्नेति ज्ञापनेन यथा आरतीत्यस्य सिद्धिर्भवति तथा प्रकृतेपि स्थानिवद्भावस्य निषेधः स्यादिति चेन्न अभ्यासत्वपर्याप्त्यधिकरणस्य स्थाने कार्ये कर्तव्ये तदुत्तरखण्डादेशस्य तत्प्रतिबन्धकीभूतमित्यर्थस्य तेन ज्ञापनात् नचैवं सति परिभाषेन्दुशेखरविरोधस्तत्र हि अरि ग्रियादित्यत्र स्थानिवत्वेनेयङ् भवत्येव तस्य स्थानिवत्त्वस्याभ्यासकार्यप्रतिबन्धकत्वाभावादित्युक्तम् अभ्यासत्वपर्याप्त्यधिकरणत्वस्य पूर्वेशे तु तस्येयङो ऽभ्यासत्वपर्याप्त्यधिकरणस्थानित्वन्तत्र नेति निषेधाप्राप्तेः प्रतिबन्धकीभूतेत्यस्य तत्र प्रयोजनकथनासङ्गतेरिति वाच्यम् तस्य ग्रन्थस्य वस्तुतो ऽभ्याससम्बन्धिकार्य इत्यर्थाभिप्रायकत्वात् अभ्यासावयवादेशस्याप्यभ्याससम्बन्धित्वमित्याशयात् वस्तुतस्तत्र प्रतिबन्धकत्वनिवेशो न कार्यो ऽभ्यासत्वपर्याप्त्यधिकरणत्वनिवेश एव कार्यो लाघवायेति दिक् । अप्रवृत्तिरेवेति चिकीर्षक इतीकारस्येति शेषः मूले सवर्णानुस्वारग्रहणस्य शिण्ढीत्युदाहरणत्वत्र शिषेर्लोटि तस्य हेर्धिः श्नम् अल्लोपे ऽनुस्वारे ष्टुत्वजश्त्वपरसवर्णेषु झरो झरीति वा डकारलोप इति प्रक्रिया तत्र डकारलोपे पञ्चमीसमासेन स्थानिवत्वन्न आदिष्टादचः पूर्वत्वात्पूर्वत्रासिद्धीयत्वाच्च ॥ तत्र शिण्ढीत्युदाहरणङ् खण्डयितुमाशङ्कते नन्विवादिना अप्रवृत्तिरिति अल्लोपस्य परसवर्णे कर्तव्ये स्थानिवत्वाप्रवृत्तिरित्यर्थः नकारनिष्ठमनादिष्टादचः पूर्वत्वं स्थानिवदादेश इत्यनेनानुस्वारे ऽतिदिष्टमस्तु

यद्यप्यनादिष्टादचः पूर्वत्वमशास्त्रीयन्तथापि सवर्णग्रहणाज्ज्ञापकात्तदतिदेशो भविष्यति एवञ्चातिदिष्टत्तदेवादाय परसवर्णे कर्तव्ये ऽचः परस्मिन्निति स्थानिवद्भावः स्यादित्याशङ्क्यान्निराचष्टे नचेति फलाभावादिति पूर्वसूत्रेण स्थानिवत्त्वस्य फलाभावादित्यर्थः उत्तरसूत्रस्य प्रवृत्त्यर्थम्पूर्वसूत्रस्य प्रवृत्तिकल्पनङ् कृत्वा सवर्णपरग्रहणकरणापेक्षया प्रक्षालनाद्धीति न्यायेन पूर्वसूत्राप्रवृत्तिरेवोचितेति भावः किञ्च यत्र ज्ञाप्यार्थस्यान्यत्र फलत्तदेव ज्ञापकम्भवति तथात्र वक्तुमशक्यम् नच समाद्येत्यस्य सिद्धिरेव फलम् अत्र सम्अद्ईयइति स्थिते पूर्वविप्रतिषेधेनोपधावृद्धेः पूर्वं णिलोपे तत स्तस्य स्थानिवत्त्वेन णित्त्वबुद्ध्या वृद्धौ कृतायामेकदेशविकृतन्यायेनाद्ग्रहणेन ग्रहणाज्जग्ध्यादेशस्य प्राप्तावचः परस्मिन्निति स्थानिवत्वमिष्यते स चानादिष्टादचः पूर्वत्वस्यातिदेश एव घटत इति वाच्यम् णिलोपादन्तरङ्गत्वेनोपधावृद्धेः प्रवृत्तेरनादिष्टादचः पूर्वत्वस्य सुलभत्वात् सन्वल्लघुनीतिसूत्रे प्रत्याहारे ग्रहणेन वृद्धेर्लोपो बलीयानिति तु यत्रैकस्थानिकत्वं वृद्धिलोपयोस्तद्विषयम् नच लोलुव इत्यत्रोवङि पुगन्तेति प्राप्तस्याङ्निमित्तकगुणस्य न धातुलोपसूत्रप्रत्याख्यानपक्षे प्रतिबन्ध एव फलमस्तीति वाच्यम् न धातुलोप इति सूत्रप्रत्याख्यानपक्षे फलसत्वेपि सूत्रकारमते फलाभावात् अत एव पूर्वत्रासिद्धे न स्थानिवदित्यवष्टभ्य सवर्णग्रहणप्रत्याख्यानपरभाष्यस्य सङ्गतिरन्यथोक्तार्थज्ञापकतयैव सवर्णग्रहणस्यावश्यकतया वरे यलोपस्वरवर्जन्द्विर्वचनादीनि न वक्तव्यानीति भाष्यन्न सङ्गच्छेत तद्घटितेति अकारयुक्तो नकार इत्येवमानुपूर्वीघटितेत्यर्थः अशक्यत्वादिति नचाविद्यमानस्यैव धर्मस्यातिदेशो भवतीति तस्यातिदेशो भविष्यतीति वाच्यम् तस्यानुपूर्वीरूपतया कार्यातिदेशस्याद्यसूत्रेण करणेपि रूपानतिदेशात् स्थानिभूताल्लृत्तीति नकारवृत्तीत्यर्थः नन्वसाधारण्यनिवेशवादिमूलकन्मतेनायमल्वृत्तिधर्मो ऽत आह विशेषणतयेति अज्रूपस्यालो विशेषणत्वादिति भावः पूर्वोक्तं सर्वमत्र सवर्णादेशपक्षे ॥ वस्तुतोत्र तस्याभावेन णकारो ऽयुक्त इत्याशयेनाह भाष्य इति प्रतिप्रसवेनेति तस्य दोष इति वचनेनेति शेषः स्थानिवत्त्वेनेति स्थानिद्वारकमनादिष्टादचः पूर्वत्वमाश्रित्य भवत्सम्मतस्थानिवत्त्वेनेत्यर्थः ननु प्रतिपदोक्तणत्वस्य पूतिपूसवसूचकवार्तिके ग्रहणमत आह णत्वग्रहण इति उपपादयिष्यत इति अष्टन्शब्द इति शेषः

णग्रहणस्यापदान्तस्य मूर्द्धन्य इति सूत्रान्मूर्द्धन्यपदानुवृत्तिङ् कृत्वा प्रत्याख्यानेन पूतिपदोक्तस्य णत्वस्याभावेन लक्षणपूतिपदोक्तपरिभाषाया अप्रवृत्तिरेव एवञ्च शिण्ढीति न सवर्णानुस्वारयोरुदाहरणम् किन्तु अनुस्वारग्रहणस्यैव आद्यसूत्रेणाभ्युपेत्यानादिष्टादचः पूर्वत्वं शिण्ढीत्येतत्परसवर्णग्रहणोदाहरणत्वैतत्साधयति किञ्चेति इदम्पाठव्यत्यासपूदर्शनेञ्जश्त्वस्यासिद्धत्वप्रदर्शनाय नतु लोपस्यासिद्धत्वप्रदर्शनाय व्यत्यासाभावेपि लोपस्यासिद्धत्वसम्भवात् पाठव्यत्यासपक्षे शिण्ढीत्यत्र प्रक्रिया त्वित्थम्बोध्या शिनष् हि इत्यत्रालोपानुस्वारष्टुत्वानि अस्यामवस्थायामनुस्वारस्य यय्परत्वाभावादप्राप्तिः परसवर्णत्वस्य एवं लोपस्यापि सवर्णपरत्वाभावादप्राप्तिः किन्तु जश्त्वप् तस्य जश्त्वस्यासिद्धत्वात्परसवर्णप्राप्तिरिति भावः सवर्ण इति कर्तव्य इति शेषः प्राप्तस्थानिवद्भावेति क्रौ लुप्तन्न स्थानिवदिति तु क्वाचित्कमित्याशयः ननु क्रौ लुप्तमित्यस्यासार्वत्रिकत्वेपि तेन निषेधेनास्य रूपस्य सिद्धेर्नैतदसाधारणं सवर्णग्रहणोदाहरणमत आह हरितेति हरिद्धसतीत्यत्र ननु हरिद्धसतीत्यपि पंचमीसमासस्यानाश्रयणपक्षे सुवचमत आह हरिन्नमतीति भाष्यरीत्येति तत्र हि स्वर्नयति प्रातर्नयतीत्यादौ यरो ऽनुनासिक इति रेफस्य स्थाने ऽनुनासिकादेशवारणाय वार्तिककृता रेफस्यानुनासिकपरसवर्णद्विर्वचनप्रतिषेधो वक्तव्य इति कथितत्तत्प्रत्याख्यानाय यरो ऽनुनासिक इति सूत्रे ऽनुस्वारस्य यथीति सूत्रात्सवर्णग्रहणस्यापकर्षो दर्शितः नच हरिन्नमतीत्येतदपि पदान्तविधिम्प्रति न स्थानिवदित्यनेन सिद्धमिति वाच्यम् पदचरमावयवे कर्तव्ये परपदस्याजादेशो न स्थानिवदिति सिद्धान्ते तस्याप्रवृत्तेः अन्यत्र चतुर्मुख इत्यस्य साधनावसरे स्त्रीति इदम्पूर्वान्वायि नचैवं सति मूलासङ्गतिरिति वाच्यम् वृत्त्यनुरोधेनैवं कथनात् वस्तुतस्तु समाना जग्धिः साग्धिरित्यत्र सहशब्दस्यैव सादेशः समानशब्दस्य विग्रहवाक्ये प्रयोगस्तु सहार्थस्य सम्पूत्यर्थप्रदर्शनाय रूढश्चायं शब्द इति सहस्य सः संज्ञायामिति सादेशः छान्दस इति नचैवं सत्यमरग्रन्थे कथमस्यप्रयोग इति वाच्यम् अस्य छान्दसानुकरणत्वात् प्राप्तविशेषणेनेति प्राप्तस्य विशेषणेनेत्यर्थः नन्वेकत्वसङ्ख्येत्यस्य द्विवचनान्तेनापि सासे एकत्वमेव भासत इत्यर्थः उत एकवचनान्तेनैव समासः सङ्ख्यातु व भासत इति अथवा हुम्फडादिभ्य इवौत्सर्गिकैकवचनान्तेन साधुत्वा-

र्थमुत्पन्नैकवचनान्तेनैव समास इत्यर्थ इति नाद्यः द्व्येकयोर्द्विवचनैकवचन इति सूत्रेण द्वित्वविवक्षायामेव द्विवचनस्य विधानेन तस्य विवक्षापि तस्य तु न भानमिति न सम्भवति वदतो व्याघातात् गौणी मुख्या वोत्तरा सङ्ख्या पूर्वसङ्ख्याम्बाधत इति सिद्धान्तविरोधापत्तेश्च अत एवैक एवाकार इति पक्षे घटिक इत्यत्र द्व्यज्लक्षणष्ठञ्न स्यादिति शङ्कायामावृत्तिः कृता द्व्यज्व्यपदेशादिति भाष्यकृतोक्तम् न द्वितीयः ईद्देदिति सूत्रभाष्ये कुमार्योरगारमिति विगृह्य कुमार्यगारमिति समासप्रदर्शनविरोधापत्तेः अत एव न तृतीयः उदक्षरत्वापत्तेश्चेत्यत आह अभेदैकत्वेति अभेदलक्षणा एकत्वसङ्ख्येति तदर्थः अभेदो भेदाभावः उपसर्जनपदार्थतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावः एतेन यत्र भेदभानन्तत्रापेक्षाबुद्धिसत्वेन तत्समानाधिकरणद्वित्वादिभानम् वृत्तौ तु तस्याभानेन द्वित्वादेर्न भानमेकत्वमपि प्रसिद्धन्न भासते समुदायस्यैकार्थीभावविवक्षायां साधुत्वस्य समासविधायकशास्त्रबोधनेन तत्रोपसर्जनपदार्थतावच्छेदकरूपेणोपसर्जनपदार्थस्य भानम् राजपुरुषादिशब्देभ्यो राजसम्बन्धी पुरुष इत्याद्याकारक एव बोधो भवति तत्र तात्पर्यग्राहकसत्वे तेन रूपेणैकानेकव्यक्तिभानम् तावकीनो यौष्माकीण इत्यादौ यथा यत्र न तत्सत्ता तत्र तादृशधर्मावच्छिन्नप्रकारताक एव बोधः अत एवोक्तं सङ्ख्यासामान्याभाव इति अयञ्चोपसर्जनपदार्थे यत्र सङ्ख्याविशेषबोधकशब्दाभावस्तत्रैव यत्र तत्सत्ता तत्र भवत्येव द्विपुत्र इत्यादिषु यथा समर्थसूत्र इत्यस्य प्राक्कथनाद्भाष्ये स्थितमित्यत्रापि भाष्यं समर्थसूत्रस्थमेव विवक्षितमिति भ्रमः स्यादत आह संयोगेति यद्वृत्तौ हीत्यादिना भाष्ये स्थितमित्यन्तेनाभिहितन्तत्तु सम्यगेव यत्तु यद्यपीत्यादिना लाभार्थमन्तग्रहणमित्यन्तेन ग्रन्थेन संयोगसंज्ञासूत्रस्थभाष्यसंवादेन बोधितमन्तग्रहणस्य प्रयोजनन्तत्तु तस्य भाष्यस्यैकदेशयुक्तितया समञ्जसन्नेत्याह एवञ्चेति अन्तपदस्योक्तफलकत्वस्योक्तभाष्यारूढत्वे च । सूत्राक्षरेति न विद्यते ऽन्तरं येषान्ते ऽनन्तरा इत्यर्थेन समुदायस्य प्रतीतिः ध्वनिततयेति समुदायसंयोगसंज्ञासिद्धये सहग्रहणं कर्तव्यमिति प्रथममभिधाय गर्गदण्ड्यायेन समुदायस्य तत्सिद्धौ सहग्रहणन्न कार्यमित्येवोक्तत्वेकस्य संयोगसंज्ञायाः किञ्चिदसाधारणम्प्रयोजनमभिहितन्तेन ध्वनितमित्यर्थः फलान्तर इति अन्तग्रहणस्येत्यादिः अभीति अस्ति सिच इति सूत्रे सिच्छब्दात्प्राक्स -

कारस्य प्रश्लेषेपि तस्य सकारस्य संयोगान्तलोपेन निवृत्तिरित्येतत्फलस्याभिनिवेशः अत्राल्पदोपादानेनैकम्प्रागुक्तं द्विवचनान्तेन समासलाभरूपं यद्यपि सम्भाव्यते तथापि प्रत्येकसयोगसंज्ञापक्षस्यैवासत्त्वेन तन्नास्ति अस्ति सिचो ऽपृक्ते इत्यत्र विद्यमानादस्ति सिच इत्यर्थस्य लाभस्तु सिच्च अस् चेति द्वन्द्वघटितास्तिपदाद्यवयवककर्मधारयेन सिद्धः तथाच तदपि फलन्नास्तीति भावः प्रक्रियाप्रकाशोक्तिङ् खण्डायितुन्नामनुवदति यत्त्विति अस्यार्थस्य फलन्तु सरूपसंज्ञासूत्रभाष्ये पृथग्विभक्तिपराणामेकशेष इति पक्षे वृक्षसमृइति प्राप्नोतीत्यभिधाय संयोगान्तलोपात्सिद्धमिति भाष्यकारोक्तिसङ्गमनम् तादृशलक्ष्येति पूर्वोक्तार्थाकरणे यादृशलक्ष्यन्न सिध्यति तादृशलक्ष्यस्य सम्प्रतिपन्नस्याभावादित्यर्थः सरूपसूत्रस्थत्वद्भाष्यन्तु तादृशार्थकरणेनैकसकारस्य निवृत्तावपि वृक्षसृइत्यस्य प्राप्त्यैकदेश्युक्तिरेवेति तादृशार्थकरणं व्यर्थमेव अत एव कैयटेन तादृशार्थस्य लक्ष्यासाधकतया वस्तुतः संयोगान्तस्य लोपाद्धलङ्यादिलोपादिति व्याख्या कृता ॥ अत एव तादृशार्थाभावादेव भाष्ये उक्तामिति यदि तादृशो ऽर्थो ऽभिप्रेतः स्यात्तदा लुप्तनिर्दिष्टः शकार इति वदेदिति भावः अपकृष्येति मुनिसम्मत एवायमपकर्षः यथा पूर्वसूत्रकरणकाले स्मृतप्रयोजनकपदोपादानेपि लक्ष्यानुरोधेनोत्तरत्र सम्बन्धो भवति तथा पूर्वसूत्रकरणकाले विषयान्तरसंसक्तमनसा प्रयोजनास्मरणेनाकृतस्य शब्दस्योत्तरसूत्रकरणकाले स्मृतप्रयोजनकस्य पूर्वत्र सम्बन्धोपि स च क्वचिद्योगविभागेन भाष्यकृता प्रदर्श्यते क्वचित्त्वन्यथा यथा रायो हलीत्यत्र हलीत्युभयोः शेष इत्युक्तम् अत्र तु संयोगान्तस्य लोपे यणः प्रतिषेधः नवा झलो लोपाद्धहिरङ्गलक्षणत्वाद्वेति वार्तिककृतोक्तम् षष्ठ्येति उत्तरत्र पञ्चम्यन्तस्य तस्य सत्त्वात् वाक्यभेदेनेति संयोगान्तस्य लोप इत्येकं वाक्यम् एतदर्थः प्रसिद्ध एव झल इति द्वितीयन्तस्य संयोगान्तस्य लोप इत्यनुवर्तते संयोगान्तस्य झलो लोप इत्यर्थः एवञ्च पूर्ववाक्येनैव सिद्धावस्य वैयर्थ्यमतः पूर्ववाक्यस्य कात्रित्कत्वज्ञापनमेव फलम् पूर्ववाक्यस्य झलि पूर्वत्वतिस्वीकारादेव ङे प्रथमयोरमिति सूत्रे मकारान्तरप्रश्लेषेपि तस्य निवृत्तिसिद्धिः नातिप्रसङ्ग इति सुध्युपास्य इत्यादौ यकारादिनिवृत्त्यापत्तिरूपो ऽतिप्रसङ्गो नेत्यर्थः ध्वनितञ्चेदमिति अपकर्षकरणादिकमित्यर्थः पूर्ववाक्यस्य क्वचिदझलि पूर्वत्तेः

फलान्तरमाह तत्र हीत्यादीना हरदत्तसम्मतार्थाभिप्रायेण नाजानन्तर्यपरिभाषायाः प्राप्तिं वारयति मूलें नचेति तत्र च अनित्यत्वे च ननु यदसंस्कारपक्षमादाय केण इति निर्देशस्योपपत्तिर्भविष्यतीति कथन्तस्योक्तपरिभाषायाः अनित्यत्वे ज्ञापकतेत्याशयेनाह वस्तुत इति परमपि सवर्णेत्वनेन लक्ष्यगतपरत्वानाश्रयणेनाधुना सौकर्यमपीति ध्वनितम् ॥ वृद्धिबाधनार्थमिति अत्र नाजानन्तर्यपरिभाषाया यत्रान्तरङ्गे शास्त्रे ऽजानन्तर्याश्रयणन्तत्र बहिरङ्गस्य प्रकृत्तिर्नेति पक्षेपि प्रवृत्तिः प्राप्ता वस्तुतो ऽयमेवार्थः असिद्धम्बहिरङ्गमन्तरङ्ग इत्युक्ता नाजानन्तर्य इति वक्ष्यमीत्युक्त्या पूर्वपरिभाषाश्रयस्यान्तरङ्ग इत्यस्य तत्रानुवृत्तिसूचनात् यदि नाजानन्तर्यपरिभाषा नित्या स्यात्तदा ऽनया ऽन्तरङ्गस्य गुणस्याप्रवृत्तिसम्पादने कृते परत्वात्सवर्णदीर्घे गुणेन लक्षस्य सिद्धावाङ्गहणवैयर्थ्यं स्यादेवेति अस्याः नाजानन्तर्यपरिभाषायाः एवञ्चोक्तज्ञापकेन सर्वथा नाजानन्तर्यपरिभाषा नास्तीति न शङ्कनीयमिति ध्वनितम् परोपपादितो मतभेदो ऽक्षरस्वारस्यविरुद्ध इत्येतदुपपादयति नवेतीत्यादिना सर्वमिति आरम्भप्रत्याख्यानरूपम् वक्ष्यमाणदुषणसङ्गमनायाह संयोगान्तेति न भाष्यसम्मत इति अत एव प्रकृत्यैकाजिति सूत्रस्थ प्रयोजनखण्डनावसरे स्रजिष्ठ इत्यत्र स्रग्विन्शब्दादिष्ठनि कृते विन्मतोर्लुगिति विनो लुकि प्राप्तस्य टिलोपस्य बाधनार्थम्प्रकृत्यैकाजित्यारम्भ इति वाच्यञ्जातिपक्षाश्रयणेन टिलोपत्वावच्छिन्नस्य लोपो विन्मतोर्लुग्विषये ऽवश्यम्प्राप्त इति विन्मतोर्लुगपवाद इति तद्विषये टिलोपस्याप्रवृत्तिरिति भाष्यकृता प्रतिपादितम् यदि पूर्वस्थानिकस्यान्तरङ्गत्वमपि भाष्यकारसम्मतं स्यात्तदोत्तरकालप्राप्तटिलोपापेक्षया विनो लुको बहिरङ्गत्वेनासिद्धतया स्रजिष्ठ इत्यस्य सिद्धौ जातिपक्षाश्रयणप्रयासस्य नैष्फल्यापत्तिरिति परोक्तमभ्युपेत्याह किञ्चेति बहिरङ्ग इति एवञ्च यदुक्तम्मूले ऽल्लोपणिलोपयोरसिद्धत्वस्येति तदयुक्तमिति भावः वाल्लयोरिति द्विर्वचनस्य सङ्गमनायाह काव्य इति इति कृत इति संयोगाल्लोपस्यासिद्धत्वादित्यादिः अन्त्ये शाल्वे दुर्वार इति एवञ्च त्वदुक्तरूपासिद्धिरिति शेषः ननु शाल्वे ऽल्लोपस्य विच्पक्षे स्थानिवत्वेन न वलोपस्य प्राप्तिरत आह काव्यशब्द इति नन्वेवम्मदुक्तकावितिरूपन्दुर्वारमेवेत्यत आह एवञ्चेति ननु मूलोक्तं गिरिवेडित्युचितम् प्रत्याख्यानपक्षे तु

मान्तमेवेति तदनुचितमारम्भप्रत्याख्यानयोः फलभेदस्य क्वाप्यदर्शनादत आह अस्येति तत्पक्ष इति झल्ग्रहणापकर्षपक्ष इत्यर्थः अन्यथा शेषपूरणेन व्याख्यानाभावे दिगर्थः दिक्शब्दोच्चारणेन सूचितार्थः संयोगादिलोपविषयकतयेति स्कोरितिसूत्रे यण्ग्रहणसम्बन्धेन यणन्तसंयोगाद्योः सकारककारयोर्लोपो नेति तदर्थः तेन वाक्यर्थं वाक्यार्थमित्यत्र कसयोर्लोपो न यद्यप्यनयोः कसयोर्लोपे कर्तव्ये ऽचः परस्मिन्नितिस्थानिवद्भावोपि वक्तुं शक्यः पूर्वत्रासिद्धे न स्थानिवदिति तु तस्य दोष इत्यनेन निषिद्धम् तथापि स्थानिवद्भावानाश्रयणेनोपायान्तरमेतादिति बोध्यम् एवञ्च प्रकृते एवङ्कथनं यणः प्रतिषेध इति संयोगान्तलोपस्यैव निषेध इति या कस्य चिदुक्तिस्तत्खण्डनतात्पर्यिकोते ध्येयम् अत एव तस्यैव प्रत्याख्यानादेव तत्र तत्रतत्र अतएवात्र मूले संयोगान्तलोपे यणः प्रतिषेध इति व्याख्या कृता प्रकृतमाह बहिरङ्गेति स्वारस्येनेति अन्यथा ऽन्तरङ्गो लोपः अन्तरङ्गलक्षणत्वाद्वेत्येव वदेत् ईदृशानाम् अकृत्रिमयणघटितानाम् अनभिधानमेवेति अन्त्यपक्षरीत्या लोपप्राप्त्या आद्यपक्षे तत्प्राप्त्या फलभेदापत्तेस्तादृशानामनभिधानमेवेत्यर्थः तृतीयसमाधानं त्रिपाद्यामप्यसिद्धत्वस्य प्रवृत्तिरिति मतेन वस्तुतस्तु त्रिपाद्याम्बहिरङ्गपरिभाषाया वक्ष्यमाणरीत्या अप्रवृत्तिरेवेति बहिरङ्गपरिभाषया प्रकृते लक्ष्यस्य साधनन्न युक्तन्तत्समर्थनाय पूर्वपूर्वस्थानिकमन्तरङ्गमित्यस्य स्वीकारक्लेशश्चायुक्त इत्याह वस्तुत इति विसर्जनीयसूत्रे विसर्जनीयस्य स इति सूत्रे दूषितमिति एतदग्रे स्फुटीभविष्यति ॥ ननु यदि लोपस्य वैकल्पिकत्वेन तत्कृतो न विशेषस्तर्हि तस्योपन्यासो व्यर्थ एवेत्यत आह सम्भवमात्रेणेति तदुक्तिः लोपविकल्पोक्तिः यत्तु एकः पूर्वपरयोरिति सूत्रे यथा आधानादिसंस्काराणां सकृदेवानुष्ठानन्तथा गुणादीनामपि सकृदेव स्यात्तथा च प्रतिपुरुषमेक एव गुणघटितः साधुः स्यादन्ये ऽपशब्दाः स्युरित्याशङ्क्य ज्योतिष्टोमादिशास्त्रदृष्टान्तेन प्रतिप्रयोगङ्गुणादिविधायकशास्त्राणाम्प्रवृत्तिर्भविष्यतीत्यादुक्तया लक्ष्ये लक्षणस्येति न्यायस्याविषयोयमिति प्राचीनोक्तिखण्डनपरः पुनर्द्वित्वमित्यादिग्रन्थो न युक्त इति केचित्तन्न भाष्याशयानवबोधादिति ध्वनयितुम्भाष्याशयम्प्रकटयति तत्र हीत्यादिना तत्र एकः पूर्वपरयोरिति सूत्रभाष्ये बोधादिति पूलयोरिति द्विवचनस्वारस्येनैकवा-

क्यतया उचिततयेत्यादि एतेन ग्रहं सम्मार्ष्टि इत्यत्रोद्देश्यबोधकपदोत्तरै-
कवचनस्य यथा ऽविवक्षया ऽनेकग्रहाणां सम्मार्गस्तथा ऽनयोः पूलयो-
रित्यत्रापि सम्भाव्यते तथापि सम्भवत्येकवाक्यत्वे वाक्यभेदो न न्याय्य
इति न्यायस्य सञ्चारो ध्वनितः एकत्वविवक्षणेन कटमित्यस्य विधेयबो-
धकतया तत्रैकत्वस्य विवक्षणेन द्वन्द्वनिर्देशात् इतरेतरयोगे तस्य द्वन्द्वस्य वि-
धानेनोद्भूतावयवसमुदायस्यान्यत्रान्वयात् । शङ्कितमिति अस्यावश्यकमि-
त्यत्रान्वयः दृष्टान्तप्रदर्शनेन शङ्कां योजयति यथेति स्वविषये आधानाख्य-
संस्कारे ॥ व्यापारादिति प्रतिपुरुषमेकवाक्यतया बोधकत्वादिति शेषः
वाक्यभेदो ऽवश्यमिति पुरुषैक्येपीति शेषः तत्र पूर्वोपवर्णितवाक्यार्थत्रयम-
ध्ये पुरुषसंस्कारकः पुरुषस्य धर्मजनकक्रियाप्रवृत्तिसम्पादकः एकः शब्दः
सुप्रवृत्तः शास्त्रान्वितः स्वर्गे लोके कामधुग्भवतीति भाष्यात् नित्यत्वम् य-
स्याकरणे प्रत्यवायस्तत्वम् अहरहः सन्ध्यामुपासीतेति यथा निषेधविधि-
रपि नित्यः न ब्राह्मणं हन्यादिति नैमित्तिकम् निमित्तसद्भावे स्वबोध्यार्थे
आवश्यकप्रवृत्तिसम्पादकम् यथा पूर्ववया ब्राह्मणः प्रत्युत्थेय इति काम्यम्
तत्फलेच्छाधीनतद्विषयप्रवृत्तिसम्पादकशाब्दबोधजनकम् यथा ज्योतिष्टोमेन
स्वर्गकामो यजेतेत्यादि तत्र नित्यविधिस्थले शुचि तत्कालजीवित्वस्याधिका-
रसम्पादकतया यावज्जीवन्तद्रूपसद्भावे स्वबोध्यक्रियाप्रवृत्तिसम्पादकत्वेन
तस्याकरणे प्रत्यवायः कल्प्यते नैमित्तिकस्थलेपि निमित्तप्राप्तेः क्रियाप्रवृ-
त्तिसम्पादकतया यदायदा तस्य प्राप्तिस्तदातदा प्रवृत्तिरन्यथा त्वनिष्टं स्यात्
यथा वृद्धे समागते तस्योद्ध्वंप्राणा व्युत्क्रामन्ति प्रत्युत्थानाभिवादाभ्या-
म्पुनस्तान्प्रतिपद्यते इति दोषप्रतिपादकवाक्यात्तथा कल्पनात् एवं राहू-
परागे स्नायादित्यादावपि बोध्यम् एवं काम्येषु कामानामानन्त्यात्तत्सद्भावे
ज्योतिष्टोमादौ त्रैवर्णिकानामप्यधिकारात्प्रवृत्तिः सा च यदा २ तदेति न
सकृदेवानुष्ठानम् तत्रा ऽपरो विशेषः नित्यस्यानुष्ठाने प्रत्यवायानुत्पत्तिरेव फ-
लम् क्षैमिकमस्याः फलत्वम् नैमित्तिके दोषपरिहारः काम्यं फलञ्च भवति
काम्यस्थले कामनाविषयसिद्धिरेवेति तत्तद्विषयकेति तत्तत्क्रियाविषयकेत्यर्थः
प्रत्यवायश्रवणादिति ते ऽसुरा हेलयोहेलय इति कुर्वन्तः पराबभूवुस्तस्मा-
द्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै इति श्रुत्या दोषश्रवणादित्यर्थः नि-
त्यसमत्वमिति शास्त्रसंस्कारविरुद्धोच्चारणे प्रत्यवायश्रवणेन नित्यत्वमर्थबो-

धनार्थम्प्रवृत्तेरर्थस्य बोधो भवतीति फलसम्बन्धेन काम्यत्वमपि अतः स-मशब्दस्य प्रयोगः यथा काम्ये दर्शादियागे पुनःपुनःप्रवृत्तिस्तथात्रापि तत्तत्सुखरूपस्वर्गकामनया खद्वेन्द्रमालेन्द्रमेशादिसाधनाय तेषां सुप्रयुक्तत्व-शास्त्रान्वितत्वसम्पत्तये पुनःपुनः प्रवृत्तिः ॥ एवमुक्तप्रकारेण एवञ्च शुद्ध-संस्कारार्थत्वे च उक्तार्थे भाष्यान्तरमपि साधकमित्याह सम्प्रसारणाच्चे-तीति तत्र हि शकद्ध्वर्थमित्यत्र सम्प्रसारणपूर्वत्वमाशङ्क्य वाक्यस्य सम्प्र-सारणसंज्ञापक्षमादाय पूर्वरूपनिष्पन्नस्य न सम्प्रसारणत्वमिति समाधा-नोत्तरं समाधानान्तरङ् कृतम् कार्यकृतत्वाद्वेति शास्त्रस्यास्मिन्विषये प्रवृ-त्तिर्न भविष्यतीति तदर्थः तत्र दृष्टान्ततयेत्थम्भाष्यकृता ऽभिहितम् तद्यथा वसन्ते ब्राह्मणो ऽग्नीनादधीतेति सकृदाधाय कृतः शास्त्रार्थ इति कृत्वा पुनः प्रवृत्तिर्न भवति विषम उपन्यासः उक्तं यत्तस्यैव पुनः प्रवृत्तिर्न भ-वति तत्र कैयटः पराङ्गमग्न्याधानम् यज्ञमुखप्रतिपत्त्यर्थमिति पुनःक्रियमा-णम्फलभेदाभावान्नानुष्ठीयते इति ततः यत्तु तदाश्रयम्प्राप्नोति न तच्छ-क्यम्बाधितुम् तद्यथा वसन्ते ब्राह्मणो ऽग्निष्टोमादिभिः क्रतुभिर्यजेतेति अ-ग्न्याधाननिमित्तं वसन्ते इज्यत इत्यभिहितम् यत्तु तदाश्रयमिति यस्मात्फ-लावाप्तिस्तत्फलभेदाद्विद्यमानमसकृदनुष्ठीयत इति कैयटः एवञ्च कार्य-कृतत्वादित्यपरिहार इति तेनोपसंहृतम् अस्ति चात्र फलम् शास्त्रीयप्रक्रि-यापूर्वकप्रयोगाद्धर्मोत्पत्तेः शास्त्रान्वित इत्यनेन बोधनाच्छकद्ध्वर्थमित्यादौ सम्प्रसारणाच्चेति सूत्रस्थ पुनः समुदायोच्चारणात्प्राक् स्मरणे ऽधिकस्य ध-र्मस्य लाभ एवेति भावः एवम्प्रतिपादनेन लक्ष्यभेदेन पुनः प्रवृत्तिर्भवति यत्र तु न तथा लक्ष्यभेदस्तत्राप्रवृत्तिरेवेति न्यायो ध्वनितः लोपस्य वै-कल्पिकत्वेन जातेपि द्वित्वे भावकार्यानुष्ठानात्पुनः प्रवृत्तावपीष्टापत्तिरिति मा शङ्किष्ठा इत्याह एवञ्चेति लोपस्य वैकल्पिकत्वे चेत्यर्थः ॥ परोक्ति-न्दूषयितुन्तदुक्तिमनुवदति त्वदुक्तमित्यादिना नचेत्यस्य वाच्यमिति परे-णान्वयः त्वदुक्तरीत्या लोपस्य वैकल्पिकत्वरूपोक्तरीत्या सम्भवादिति ए-तावतैव शास्त्रस्य कृतार्थत्वादिति शेषः परिनिष्ठितत्वस्य स्वरूपम्प्रतियोगि-ज्ञानसम्पादनायाह अपूर्वत्वेत्यादि हिर्हेतौ अस्ति चेदृशम्परिनिष्ठितत्वं य-णादेशपूर्वत्वत्युत्तरं सुध्युपास्य इत्यादौ अत्र यणादेशविधायकशास्त्रस्य पूर्वत्त-त्वेनापूर्वत्वो नित्यविधिरेचो ऽयवायाव इति तदुद्देश्यतावच्छेदकानाक्रान्त-

त्वन्तस्येति रीत्या सर्वत्रोहनीयम् नच अग्नी इतीत्यादावप्रवृत्तो नित्यविधिः सवर्णदीर्घस्तदुद्देश्यतावच्छेदकाक्रान्तत्वसत्वेनापरिनिष्ठितत्वापत्तिरिति वाच्यम् एषु प्रगृह्यत्वप्रयुक्तप्रकृतिभावस्य प्रवृत्त्या प्लुतप्रगृह्याभिन्नत्वविशिष्टसवर्णाच्परत्वविशिष्टाक्त्वस्योद्देश्यतावच्छेदकतया तदनाक्रान्तत्वस्य सत्वात् प्रवृत्तत्वम्प्राप्तत्वञ्जातत्वं वा वैकल्पिकेऽडादिविषये सेद्धादौ परिनिष्ठितत्वसिद्धये नित्येति तद्रीत्या समाधत्ते आनन्त्यापत्तेरिति पञ्चादीत्यादिना यावच्छक्तिद्वित्वपरिग्रहः त्रिधामित्यादीति अत्रादिना त्रियमित्यस्य परिग्रहः असङ्गतेवेतीति यद्यप्युक्तरीत्या परिनिष्ठितत्वस्योपपत्तिर्भवति तथापि न वत्वोक्तेरसङ्गतिरेव दूषणमिति भावः खण्डनकृदादिमतन्दूषयति आनन्त्यापत्तिरेवेति तन्न्यायेति लक्ष्ये लक्षणं सकृदेव प्रवर्तत इति न्यायेनेत्यर्थः सा च वृद्धिराकाररूपा जाता ओकारे सहिवहोरोदवर्णस्येत्योकारे जात इति शेषः पुनर्वृद्धिर्न ओकारस्य पुनर्वृद्धिर्न विकारकृतभेदेनेति विकारकृतो यो व्यक्तिभेदस्तेनेत्यर्थः तस्य न्यायस्य समूलतामाह समः सुटीत्यादिना अस्याम् उक्तन्यायरूपपरिभाषायाम् ॥ अन्यथा तन्न्यायानङ्गीकारे सिद्धाविति लोपस्य रुप्रकरणस्थत्वेनेष्टसिद्धावित्यर्थः तद्वैयर्थ्यमिति समः स्टुटीतिसूत्रत्रिसकारकरूपसिद्ध्यर्थत्वाच्चाधुनापि सिद्धमिति भावः लोपः पाणिनिसम्मतो नेति तु न शङ्कनीयम् अप्रतिषिद्धमनुमतम्भवतीति न्यायेन तस्य पाणिनिसम्मतत्वात् शास्त्रान्तरप्रसिद्धानामिहाश्रयणस्य भाष्यकारसम्मतत्वमपि अत एव मृजन्ति मार्जन्ति ममृजतु ममार्जतुरित्यादिरूपाणामिहान्ये वैयाकरणा मृजेरजादौ सङ्क्रमे विभाषावृद्धिमारभन्त इति भाष्यकृतोक्तम् ॥ अन्योक्तन्तन्न्यायबीजङ् खण्डयति इरयोरितीति तद्धि सूत्रम्प्रथमन्दध्र आप इत्यस्य साधनायारब्धम् तत्र धात्वो लिटि तस्य झादेशे लिटस्तझयोरितिसूत्रेणेरजादेशे तस्यानेन रे आदेशे कृते तस्येडागमे पुनरनेन रेभावो भवति रेभावविधानसामर्थ्येन तस्येडागमो नेति तु न वाच्यम् चक्रुरित्यादाविट्प्रतिषेधविषये तस्य चरितार्थत्वात् स्वविधेयस्य रेभावस्येडागमेपि यदागमाइति न्यायेन रेशब्दत्वात्पुनस्तस्योद्देश्यत्वाप्राप्त्या रेभावो न स्यादिति द्विवचनं सफलमिति भावः उदवोढामित्यत्र सहिवहोरोदितिसूत्रे तकारोच्चारणेन पुनर्वृद्ध्यप्राप्तिरिति कस्य चिदुक्तिङ् खण्डयति नच तत्रेति अशाब्दत्वादिति आदित्यत्र तपरकरणेन वृद्ध्यप्रा-

म्नेः शब्दमर्यादया लाभादित्यर्थः तदुपपादयति एतेन वक्ष्यमाणदूषणेन ननु सुध्युपास्य इत्यत्र जश्त्वरूपविकारातिरिक्तवर्णकृतानुपूर्वीकृतलक्ष्यैक्यसत्त्वात्पुनर्द्विवचन भविष्यतीत्याशङ्कां वारयति विकारेति ममापि उदवोढामित्यत्र लक्ष्यैक्यवादिनो ममापि एवञ्च तपरत्वसामर्थ्यादिति त्वदुक्तिर्व्यर्थेति भावः दिगिति दिगर्थस्तु स्वविधेयस्य स्वस्मिन्नुद्देश्यत्वासम्भवे बीजमुद्देश्यत्वं सिद्धस्य स्वविधेयस्य त्वसिद्धतया तस्योद्देश्यत्वासम्भव इति तथा इरयोरइतिसूत्रसाध्ये दध्र इति प्रयोगे नास्ति रेभावे कृते तस्येडागमे कृते कालविलम्बेनोद्देश्यस्य सिद्धतया द्विवचननिर्देशाभावेपि रेभावस्य पुनर्विधानञ्चरितार्थमिति द्विवचननिर्देशस्य लक्ष्ये लक्षणस्येति न्यायबीजत्वमेव यत्रोद्देश्यतावच्छेदकविधेयतावच्छेदकधर्मैक्यन्तत्र विधेयस्योद्देश्यत्वासम्भवो यथा घटो घट इत्यादौ अवच्छेदकभेदेन तत्सम्भवस्तु घटो नील इत्यादौ प्रसिद्ध इति केचिदूचुः तन्न यत्रोद्देश्यविधेययोः सामान्यविशेषभावस्तत्रोद्देश्यविधेयभाव इति नियमः घटो घट इत्यादौ च तथात्वाभावेन तत्त्वाभावः घटो नील इत्यादौ तु घटः सामान्यन्नीलो विशेष इति विवक्षास्तीतिसम्भवत्युद्देश्यविधेयभावः एवञ्च प्रकृते रेभावे कृते इडागमे तस्येरेत्वप्रकारकज्ञानाविशेषत्वेपि सामान्यविशेषभावाभावेन तत्त्वासम्भव इत्याशयात् यदि चेडागमविशिष्टस्य रेशब्देन ग्रहणम् यमुद्दिश्यागमो विहितस्तद्बोधकेन शब्देनागमविशिष्टस्य ग्रहणमिति तदर्थात् तथाच रेत्वेरेत्वयोः सामान्यविशेषभावसत्त्वेन ताभ्यान्धर्माभ्यामाश्रययोरुद्देश्यविधेयभावसम्भव इति ब्रूषे तर्हि कृतेपीडागमे तस्यादेशो न प्राप्नोतीति इरेत्वस्यैव स्थानितावच्छेदकत्वेन शास्त्रघटकशब्देनोपस्थितत्वात् एवञ्चेडागमे कृते यो धर्मः स्थानितावच्छेदकत्वेनाश्रितस्तत्प्रकारिका प्रतीतिरस्त्येवेति भवति शास्त्रस्य प्रवृत्तिरिति वक्तव्यन्तथा चेरेत्वेन विधेयस्यैवोद्देश्यत्वं वक्तव्यं तच्च न सम्भवतीत्याशयः यदपि रेभावोत्तरमिडागमेपि तस्येरेशब्दस्य लाक्षणिकत्वादादेशो न स्यादतो द्विवचननिर्देश इति तदपि न कृतेपि द्विवचननिर्देशे प्रकृते लाक्षणिकत्वन्नापगतमिति लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वज्ञापनेनैव तस्य चारितार्थ्यस्य वक्तव्यत्वादिति ननु द्विधमित्यादिना धकारस्य द्वित्वमादाय यन्मूले चतुष्ट्वमुक्तन्तन्न युक्तन्दकारस्य द्वित्वमादाय रूपाधिक्यस्य सम्भवादिति चेन्न द्वित्वे कर्तव्ये ज-

त्वस्यासिद्धत्वात् नच पूर्वत्रासिद्धीयमद्वित्व इत्यसिद्धत्वस्य प्रतिषेधो भविष्यतीति वाच्यम् तस्याः परिभाषात्वेन सिद्धत्वयोः फले विशेषो यत्र तत्रैव प्रवृत्तेः लक्ष्यभेदसम्पादनाय खण्डनकारोक्तामन्यां युक्तिङ् खण्डयति एतेनेति वक्ष्यमाणप्रकारेण तमेव दर्शयति यदेति तथाच क्रियासमभिहारे लुनीहि लुनीहित्येवायं लुनातीत्यादौ पुनर्द्वित्वापत्तिः क्रियासमभिहारे द्वित्ववद्वीप्सायामपि पुनर्द्वित्वापत्तेश्च क्रियासमभिव्याहारवत्तस्या अप्यनेकव्यङ्ग्यत्वसम्भवादिति भावः परोक्तमभ्युपेत्य पूर्तिबन्ध्युत्तरमिदम् वस्तुतः पुनर्द्वित्वस्य प्रवृत्तौ मानाभाव इत्याशयेनाह वस्तुत इति तत् आष्टमिकं वर्णद्वित्वम् अयं भावः षाष्ठद्वित्वस्थले एकाच इति षष्ठी स्थानपदार्थनिरूपितसम्बन्धार्थिका द्वे इति शब्दस्वरूपात्मकसङ्ख्येयपरामिति स्थाने द्विर्वचनस्य लाभः यदा तूच्चारणे इत्यध्याहारः उच्चारणक्रियायाः कर्मसाकाङ्क्षत्वादुपस्थितस्य द्वे इत्यस्यैव कर्मसमर्पकत्वन्तदा द्विः प्रयोगो द्विर्वचनमिति पक्षस्य लाभः तत्र कारकविभक्तेर्न्याय्यत्वाद् द्वितीयपक्ष एव युक्तः अधिकमन्यल्लोक्तम् यत्तु षाष्ठाष्टमिकपदद्वित्वयोर्नित्यतया क्वचित्तस्य विश्रामो ऽवश्यं वाच्यः एवञ्च लाघवेन प्रथमप्रवृत्तावेव विश्रामः कल्प्यते अन्यथा रूपानन्त्यापत्तिरिति तन्न उक्तरीत्या आनन्त्यापत्तेरभावात् सकृत्प्रवृत्त्यैव वीप्सादिद्योतनसम्भवाच्च अन्यथा परेर्वर्जने इति द्वित्वस्य वैकल्पिकतया तस्य पुनः प्रवृत्त्यापत्तेः केचित्तु लिटि धातोरितिसूत्रे ऽनभ्यासग्रहणाल्लक्ष्ये लक्षणस्येतिन्यायो ऽनित्य इति पुनर्द्वित्वस्य प्रवृत्तिसम्भव इति वदन्ति तन्न भाष्यविरोधात्तमेवाह अनभ्यासेति अनर्थकइत्यस्य लक्षणस्य सकृत्प्रवृत्तेरिति शेषः तथाच तन्न्यायमाश्रित्याभ्यासप्रतिषेधो बभूवेत्यादौ पुनर्द्वित्ववारको न कार्य इति कल्पनेन लाघवस्य सम्भवे तन्न्यायानित्यत्वेभ्यासप्रतिषेधस्य ज्ञापकत्वकल्पनम्भाष्यविरुद्धमिति भावः ननु नोनावेत्यत्र सन्यङोरिति द्वित्वोत्तरं लिटीतिद्वित्वापत्तिरतो ऽनभ्यासप्रतिषेध आवश्यको ऽत आह छन्दसीति न दोषः न पुनर्द्वित्वापत्तिः पुनर्द्वित्वाप्रवृत्तौ कैयटोक्तिम्प्रमाणयति एकस्यैकाच इति एतेन जुगुप्सिषतइत्यादौ पुनर्द्वित्ववारणायोत्तरार्थमनभ्यासस्येति कथितमिति परास्तम् उक्तरीतेः अरुचिबीजम् कैयटादिभिरित्युक्त्या सूचितत्वद्बीजमित्यर्थः भाष्यप्रामाण्येन अभ्यासप्रतिषेधो ऽनर्थक इति भाष्यप्रामा-

ण्येन तेषाम् सन्नन्तादित्यादिना मूले प्रदर्शितानाम् अनभिधानमिति लोक इति शेषः अत एवाह स्तौतीत्यादि इत्याहुरिति भाष्यानुसारिण इति शेषः रूपानन्त्यस्य खण्डितत्वादाह रूपाधिक्यमिति ननु सुध्युपास्य इत्यस्य लक्ष्यस्यैकत्वात्सकारस्यापि तेन शास्त्रेण द्वित्वन्न स्यादत आह अच्परेति ननूक्तन्यायाङ्गीकारे न सम्प्रसारणे सम्प्रारणमितिसूत्रस्य वैयर्थ्यापत्तिरत आह एवमिति अत्र सुध्युपास्यइत्यादौ बहिरङ्गलक्षणत्वाद्धेत्वनेन संयोगान्तलोपाप्रवृत्तिसम्पादनमसङ्गतत्रैयादिकेन्तरङ्गे त्रिपाद्या असिद्धेस्तत्राप्रवृत्तेर्न्याय्यत्वादिति तदपि नेत्यादिनोक्तमसङ्गतमतो मूलाशयमाह यथोद्देशइत्यादिना मूले तस्मादित्यत्र यदिहेति तदर्थमाह यणो मय इति ॥ भाष्यकारोक्तसिद्धान्तमाह विसर्जनीयेति तत्र हि नार्कुटो नार्पत्य इत्यादौ रेफस्य विसर्गवारणाय विसर्जनीयो ऽनुत्तरपद इति वार्तिककृतोक्तन्तत्प्रत्याख्यानपरान्तरङ्गपरिभाषाप्रवृत्तिस्तु न युक्ता पूर्वत्रासिद्धमिति प्रत्यक्षसिद्धमित्येतद्विरोधादत एवोक्तन्तत्र नवा बहिरङ्गलक्षणत्वादिति तेनोभयपक्षेपि त्रिपाद्याम्बहिरङ्गपरिभाषाया अप्रवृत्तिरेव नन्वेवं सति मूलविरोधो ऽत आह मूलेत्यिति परे भाष्यतत्वविदः मूले समानाङ्गग्रहणमितीति अत्र समानपदमेकपरम् एवञ्च यत्र सम्प्रसारणस्याचश्चैकाङ्गावयवत्वन्तत्र पूर्वरूपमित्यर्थाश्रयणे सुध्युपास्यइत्यत्र पूर्वरूपापत्तिर्दुर्वारैव समासोत्तरोत्पन्नसुनिमित्ताङ्गसंज्ञायाः समुदायनिष्ठतया सम्प्रसारणाचोरेकाङ्गावयवत्वस्य सत्वात् यदितु सम्प्रसारणानिमित्तप्रत्ययनिमित्तैकाङ्गसंज्ञाविशिष्टावयवत्वमित्यर्थस्तदा कारीषगन्धीपुत्र इत्याद्यसिद्धिस्तत्र सम्प्रसारणस्य प्रत्ययनिमित्तकत्वाभावादतोङ्गशब्दस्य सम्प्रसारणनिमित्ताव्यवहितपूर्ववर्तिसमुदायपरत्वमेव वक्तव्यम् नन्वेवमपि हूतो जीन इत्यादौ पूर्वोत्तरन्दीर्घो न भविष्यति सम्प्रसारणत्वस्य स्थान्यलभ्यधर्मतया तदादेशे पूर्वरूपनिष्पन्ने ऽतिदेशेन वक्तुमशक्यत्वादिति वाच्यम् हल इति सूत्रारम्भसामर्थ्यात्तत्रानित्यधाविति निषेधाप्रवृत्तेः नचैवमपि शकन्ध्वर्थमित्यादौ पुनः पूर्वरूपापत्तिवारणाय समानाङ्गग्रहणमिति वार्तिकवैयर्थ्यमेव पूर्वरूपनिष्पन्ननिष्ठस्यातिदेशलभ्यसम्प्रसारणत्वस्यान्यधर्मतया तदादेशे दीर्घे अतिदेशेन तस्य वक्तुमशक्यत्वादिति वाच्यम् अनयैव रीत्या वार्तिकानारम्भस्य भाष्यकाराभिप्रेतत्वादत आह सम्प्रसारणस्थानिकस्येति ननु सम्प्रसारणस्थानिकस्य तत्वं हल इति सूत्रेण

ज्ञापितमेवेत्यत आह स्थाने जातस्येति ननु हल इति सूत्रस्य सम्प्रसारणत्व-स्यात्यधर्मत्वेपि तदतिदेशे कर्तव्ये ऽनल्विधाविति निषेधो न प्रवर्तत इत्य-र्थज्ञापकत्वमेवास्तित्वत्यत आह साक्षादिति अल्विधाविति दीर्घे इत्यर्थः क-र्तव्य इति शेषः एतावतैव हल इति सूत्रस्य चारितार्थ्यमिति भावः नन्वेवं-सति सुध्यपास्य इत्यादौ सुधि आ इतिस्थिते ऽपवादत्वाद्धल इति दीर्घे पू-र्वरूपन्न स्यात् हल इति सूत्रस्य कृतार्थतया ऽल्विधावपि स्थानिवद्भावेन स-म्प्रसारणादेशस्य सम्प्रसारणत्वमित्यर्थज्ञापकत्वासम्भवात् सम्प्रसारणाच्चेत्य-स्य विस्थाधेत्यत्र चारितार्थ्यादितिचेन्न निरुतन्दुरुतमित्यस्य सुप्तमित्यादेश्च सिद्धये ऽङ्गस्येत्यस्यावृत्त्या ऽङ्गावयवाद्धलः परं यत्संप्रसारणन्तस्याङ्गस्य दीर्घ इत्यर्थस्याश्रयेण दीर्घस्य पूर्वरूपात्प्राक्प्रवृत्त्यसम्भवात् ननु धात्रंश इत्यत्र रेफस्यानचीति सूत्रेण द्वित्वाप्राप्त्या द्वित्वन्नेत्यसङ्गतमत आह ॥ यणो मय इतीति मय इति पञ्चमीति पक्ष इति शेषः नन्वेवमपि यत्र रेफस्य द्वित्वनिमि-त्तत्वप्रसक्तिर्हर्यनुभव इत्यादौ यथा तत्रास्तु स्थानिवत्वबाधो धात्रंश इत्यादौ च न तथेति कथम्बाध इत्यत आह तथाचेति अस्मिन्प्रकरणे स्थानिवत्वबाधे च भाष्यमिति हयवरट्सूत्रस्थमित्यादिः आद्यदोषवारणायाह रेफोष्मणामिति एतेन यरो ऽनुनासिक इति सूत्रे ऽनुस्वारस्य यथीति सूत्रात्सवर्णपदा-पकर्षो ध्वनितः तथाच सवर्णो ऽनुनासिको नास्तीत्यर्थः यथाश्रुते रेफस्य रेफ एव सवर्ण इति रेफस्य सवर्णो नास्तीत्यसङ्गतमेव स्यात् अत एव म-हिष्मानित्यत्र षस्य नानुनासिकः एतेनानुस्वारस्य यथीति सूत्रे यरो ऽनु-नासिक इति सूत्रादनुनासिक इत्यस्य सम्बन्धश्च ध्वनितो ऽत एव द्वितीया-तिप्रसङ्गवारणप्रकारो विशिष्यात्र नोपपादितः तृतीयातिप्रसङ्गवारणा-याह नेमाविति रहावित्यत्र हकारोपादानन्दृष्टान्तत्वप्रदर्शनाय यथा हस्य कार्यित्वन्न तथा रेफस्यापि कार्यित्वन्नेति तात्पर्यम् अन्यथा एतत्प्रकरणस्थ-वचनसामान्यप्राप्तद्विर्वचनस्य बाधानङ्गीकारे ननु कार्यित्वमपि यण्यरश-ब्दाभ्यां साक्षात् श्रुतमेवेत्यत आह विशेषेति अनचीत्यनेन अनचि चेति सू-त्रेण एतेनानचीत्यस्य निषेधबोधकतया ऽनचीत्यसङ्गतमिति परास्तम् अ-नवकाशेनेत्यनेन निमित्तत्वस्यापवादत्वात्कार्यित्वबाधकता बोधिता नचा-नचीत्यस्याचो रहेत्येतद्दृष्ट्या ऽसिद्धत्वात्कथम्बाधकतेति वाच्यम् तावतापि तदप्राप्तियोग्ये विषये ऽचारितार्थ्यस्यापवादत्वबीजस्यानपायात् अनची-

स्य वैकल्पिकतया द्वित्वाभावपक्षे चारितार्थ्यात्कथङ्कार्यित्वस्य निमित्तत्वेन बाध इति शङ्कायां नावकाशः इदम् ज्ञापकाश्रयणम् व्यक्तिपक्षेप्यावश्यकमिति अपिना जातिपक्षसमुच्चयः अयमाशयः व्यक्तिपक्षे प्रतिलक्ष्यं लक्षणानाम्भेदेन यणादिकार्यविधायकशास्त्रस्थले सर्वलक्ष्यसङ्ग्रहाय तत्रेणो ङ्चारणमित्यावश्यकमेवञ्च श्रीशइत्यादिविषयकमपि यण्विधायकशास्त्रं स्यादित्यनिष्टापत्तिरतो यत्रापवादशास्त्रविषयता तद्विषयकबाध्यशास्त्रस्याकल्पनमेवेति यथा तथा यणादेशस्थानित्वरूपिको विशेषतः श्रुतमिति तस्य निमित्तत्वाकल्पनमपि स्यात्तथाच सुध्युपास्यइत्यादिलक्ष्याणामसिद्ध्यापत्तिरत इकामपि निमित्तत्वे यणादेशे ऽस्तीत्यत्र तस्मादित्युत्तरस्येत्यादीनां ज्ञापकतैव तथा जातिपक्षेपि लक्षणस्य सर्वविषयकत्वमत एव भाष्यकृता न ब्राह्मणं हन्यादित्यत्र सर्वब्राह्मणविषयकत्वसिद्धये जातिपक्षाश्रयणमेव दर्शितमेवञ्च श्रीशविषयकत्वं यणादेशविधायकशास्त्रे नास्तीति कल्पनीयमन्यथा तत्र विकल्पापत्तिः एवमिकान्निमित्तत्वाकल्पनमपि स्यादतो ज्ञापकत्वमावश्यकमिति एतदेव दर्शयति अन्यथेति अन्यथा ज्ञापकानाश्रयणे तद्विषयकेति इको निमित्तत्वविषयकेत्यर्थः अत्र यण्विषये तत्र इकि चारितार्थ्यादिति एतेनेग्विषये येन नाप्राप्तिन्यायविषयतायाः अभावेनेकान्निमित्तत्वबाधाप्रसक्त्या पक्षद्वयेपि ज्ञापकानुपयोग एवेति ध्वनितम् नन्वत्र येन नाप्राप्तिन्यायस्य सञ्चारो मया न क्रियते किन्तु तक्रकौण्डिन्यन्यायविषयतायाः सत्त्वेन तेन न्यायेन बाध उच्यत इत्यत आह तक्रेति स्पष्टमिति तत्र हि क्रौष्ट्रोना गत इत्यादावन्त्योपधावृद्ध्योर्निषेधमुत्कोक्तन्यायेन तयोर्बाधमाशङ्क्य सौश्रुत इत्यत्रादिवृद्धेश्चारितार्थ्येन न्यायेन तयोरादिवृद्ध्या बाधस्याप्राप्तिमुपन्यस्यानुशतिकादिगणे पुष्करच्छन्दपाठच्यादिवृद्धिविषये तयोरप्रवृत्तौ ज्ञापकतोक्ता एतेन तत्र यथोक्तन्यायेन नास्ति बाधस्तथेहाप्यत्वेकत्वयोः सामान्यविशेषभावसत्वेपि निमित्तत्वस्थानित्वयोरुक्तन्यायेन बाध्यबाधकभावाभाव इति भावः एतद्विषये तक्रकौण्डिन्यन्यायविषये तथाच तक्रकौण्डिन्यन्यायमूलक एव येन नाप्राप्तिन्याय इति सूचितम् सर्वथा निरवकाशत्वमप्युक्तन्तु बाधकत्वन्त्वच्यत् ॥ परोक्तमुपन्यस्य खण्डयति नचेति विधेयविषय एवेति तथाचोभयोरविधेयत्वान्न तक्रकौण्डिन्यन्यायसञ्चारः व्यवहारादिति तद्धितेष्वचामादेरिति

भाष्यमूलकादित्यादिः अपूर्वबोध्यत्वेन अज्ञातज्ञाप्यत्वेन अपिना कार्यित्वस्य सङ्ग्रहः तत्त्वम् निमित्तत्वङ्कार्यित्वञ्च अत्र केचित् एवं सति मतिबुद्धीतिसूत्रे राजपूजित इत्यत्र भूते क्तान्तेन तृतीयान्तस्य समास इत्युक्तम् सा चोक्तिर्भूतवर्तमानकालयोर्भेदं हृदि निधाय तत्र मत्वादिबोधकधातुविहितक्त्वोल्वर्तमानकालस्य विशेषत उक्तत्वेन सामान्यत उक्तस्य भूतकालस्य वार्धं सम्भाव्य तेनेत्यधिकारे उपज्ञात इति निर्देशेन कालयोर्बाध्यबाधकभावाभाव इत्युक्तन्तस्य तेन निर्देशेन विधेयविषय एव विशेषत उक्तस्य सामान्यतो बोधितबाधकतेति लौकिकन्यायस्य सञ्चार इति सामान्यतो ज्ञाप्यत इति तात्पर्यम् तत्र परेत्वाहुः लौकिकेन तेन न्यायेन बाध इति वक्तुमप्यशक्यम् युगपद्विषयतायां लौकिकन्यायसञ्चारः साचेह विरुद्धत्वान्नास्ति यथा द्वन्द्वापवाद एकशेष इति व्यवहारो यदीदन्न स्यात्तदा चार्थ इति सूत्रमवर्तेतेति रीत्या साध्यते तथा कालयोर्वक्तुमशक्यमित्युक्तत्तदेतेन बोध्यते तत्रापि मत्वादिसम्बन्धित्वेन वर्तमानकालस्यापूर्वबोध्यत्वेन तत्त्वस्य सत्वेन तस्य बाधकत्वसम्भवादिति तन्न कालानामत्यन्तयोल्वतया ऽविधेयत्वात् नच तत्र क्तवतुप्रत्ययवत्कालस्याप्यपूर्वबोध्यत्वेन तत्वम् तस्य सामान्यतो विशेषतश्च लोकसिद्धत्वस्य कालोपसर्जने च तुल्यमित्यनेन प्रतिपादितत्वात् कालयोर्युगपद्विवक्षायाः कर्तुमशक्यत्वेन बाध्यबाधकभावाप्राप्तेश्चेत्याह दिगिति ननु विसर्गस्य द्वित्वेनाधिक्याद्धाक्तिरिति त्वेकमेवेति मूलासङ्गतिरत आह याणित्यादि तथा च यथा सुध्युपास्य इत्यादौ यण् तत्प्राग्वर्ति यरो द्वित्वकृताधिक्यन्तथात्र नास्तीति प्रतिपादने तात्पर्यमिति बोध्यम् वकारस्य दन्त्योष्ठ्यत्वात्स्थानकृतसादृश्यमादाय तत्प्राप्तिशङ्कां वारयति वकारस्त्विति तमप उपादानेनातिशयितमार्त्यं यत्र तच्च प्रवृत्तिर्भवतीति तात्पर्यम् एवं स्थानेन्तरतम इति सूत्रभाष्ये किमुदाहरणमिको यणचि दध्यत्र मध्वत्र यथासङ्ख्येनाप्येतत्सिद्धमिति उक्तम् तेनाप्यत्र वकाराभावो बोध्यः ईदृशानाम् लृस्थानिकलादेशयुतानामनार्षप्रयोगाणाम् तत्र भाष्ये न पदान्ताः परेणः सन्तीत्युक्तम् आर्षप्रयोगमादायेको यणचीति सूत्रे यथासङ्ख्यनिर्वाहः ॥ आर्व्वी इति प्रयोगे आर्व्वी इमे दीर्घ इति वैदिकप्रयोगानुकरणम् तत्र निप्रत्ययो बाहुलकात्तदन्तात्कृदिकारादिति ङीष् द्विवचनम् छांदसत्वात्पूर्वसवर्णदीर्घत्वम्

उच्यत इति तद्भाष्ये तथा व्याख्यानात् लौकिकप्रयोगे त्वाह आर्तिरिति वाचनिकत्वम् वार्तिककृता वचनरूपेण पठितत्वम् यत्तु येन विधिरिति सूत्रे आदिरन्त्येनेति सूत्रादादिरित्यस्येतेत्यस्य चानुवृत्तिः इत्यदञ्चालि लाक्षणिकम् सप्तम्यन्तत्वेन तस्य विपरिणामः एवं येनेत्यस्यापि सप्तम्या विपरिणामः वाक्यभेदश्चाश्रयणीयः विधिरित्यस्यावृत्तिश्चेति यस्मिन्नलि विधिस्तदादिविधिर्बोध्य इत्यस्य लाभ इति तन्न भाष्यानुक्तत्वात् किञ्च क्लेशेन तादृशार्थकल्पनापेक्षया वाचनिकत्वकल्पने लाघवमिति भावः इति भाव इति प्राचीनानुसारिणो मूलकारस्येत्यादिः एतेन पूर्वसूत्रपर्यालोचनस्यावश्यकत्वेपि तज्जन्यवाक्यार्थबोधस्य तेनोपप्लुतस्य लक्ष्यसंस्कारकवाक्यान्तरस्य पर्यालोचनस्यावश्यकमित्यादौ तोरिति वक्तव्यमिति वार्तिकमूलकाङ्क्ष्याख्यानादेतादृशार्थलाभ इति ग्रन्थेनास्य विरोधे इति परास्तम् अस्याः पूर्वत्रासिद्धीयमद्वित्व इत्यस्याः यत्तु द्वित्वे परसवर्णत्वं सिद्धं वक्तव्यम् संख्यन्तेत्यादौ त्रियकारकत्वार्थमिति भाष्यवार्तिकप्रामाण्येन वर्णद्वित्वेऽस्याः प्रवृत्तिर्न अत एव णत्वन्द्वित्वञ्चतुर्णामिति परममूलसङ्गतिरिति तन्न वाक् वाक्क् इति भाष्यीयप्रयोगासङ्गतेः अत्र चस्य कुत्वे जश्त्वे द्वित्वचर्त्वयोः प्राप्तौ चर्त्वस्यासिद्धत्वेन द्वित्वे परस्य गस्य चर्त्वे तस्यासिद्धत्वेन खर्परत्वाभावेन पूर्वगकारस्य चर्त्वाप्राप्तौ गस्यैवश्रवणापत्तेः नचावसाने चर्त्वस्य जश्त्वमिति वाच्यम् अपवादप्रवृत्तिबाधकाद्वित्वविषयता सत्त्वेन चर्त्वमप्रवृत्तेः रामावित्यादौ वृद्ध्यपवादपूर्वसवर्णदीर्घविषयतायाः सत्त्वेन निषेधात्प्राग्वृद्धेरप्रवृत्तिवत् पर्वत्रासिद्धीयमद्वित्वे इति परिभाषाया उपस्थितौ लिङ्गन्तु तदधिकारभवशास्त्रत्वम् यत्र तदधिकारभवशास्त्रत्वन्तत्राद्वित्व इत्युपतिष्ठत इति तस्या अर्थः एवन्तदधिकारीयशास्त्रे ऽद्वित्व इत्यस्योपस्थितौ सम्भवति सामानाधिकरण्य इति न्यायेन द्वित्वभिन्ने पूर्वत्र कर्तव्ये इदमसिद्धमित्यर्थो भवति एतेनैनाम्परिभाषामाश्रित्य झलाञ्जशिति जश्त्वस्य प्राक् प्राप्त्या द्विधमिति परममूलमृग्वेर्धस्येति मूलञ्चासङ्गतमिति खण्डनकारोक्तिः परास्ता ॥ हयवरट्सूत्रस्थभाष्यस्योभयविषयकतया प्रवृत्तेरुभयत्र विकल्पानुवृत्तिः सप्रमाणेति प्रहर्त्तनायाह हयवरडिति मूले ज्ञापकमभिप्रेत्येति ज्ञापकमुपन्यस्येत्यर्थः तत्र ज्ञापकतायां संवादार्थं संमत्यर्थम् लोपमात्रस्येति अत्र मापदङ् कात्स्न्र्ये लोपापवाद इतीति अत्रापवादश-

ङौ बाधकपरः अपवाद इवापवाद इत्यर्थः अपवादो यथोत्सर्गस्य प्राप्तिम्प्रतिबध्नाति तथेदमपि लोपयोः प्राप्तिं वारयेत् नत्वपवादत्वमेव सम्भवति यत्रोत्सर्गे प्रवृत्तेष्यपवादत्वेनाभिमतस्य प्राप्तिस्तत्रापवादत्वव्यवहारस्य मुख्यत्वात् द्वित्वस्य लोपमात्रबाधकत्वे साधकमाह आरम्भेति अणग्रहणमिति एतद्धि संख्यन्तेत्यादावनुनासिकयकारादेर्द्वित्वार्थं यदि लोपो नित्यः स्यात्तदा कृतेपि द्वित्वे तस्य लोपेन निवृत्तौ यकारादिद्वयस्यैव श्रवणमिति तत्राज्ग्रहणेन सिद्धावक्लृप्तस्य परणकारसाध्यप्रत्याहारान्तराश्रयणस्य व्यर्थत्वमिति भावः तस्य उक्तसूत्रस्थाणग्रहणस्य सिद्धमिति अणग्रहणादित्यादिः तद्विषये हलो यमामिति लोपविषये हर्यनुभव इत्यादौ शरोचीति ज्ञापकमिति एतद्धि चतुर्ष्वित्यादौ द्वित्वस्य निषेधाय यदि तु झरो झरीति लोपो नित्यस्तदा जातेपि तस्य द्वित्वे लोपेन निवृत्ताविष्टस्य सिद्ध्या निषेधो व्यर्थः स्यादिति भावः प्राच्याम् प्रकाशकृताम् तद्भाष्यस्य अनुवर्तत इति भाष्यस्य उभयविषयकतयेति तेन ज्ञापकेन झरो झरीत्यत्रानुवृत्तौ मध्यस्थत्वेन हलो यमामित्यत्रापि तत्सम्बन्ध इत्युभयविषयकता तस्येति भावः ॥ रत्नाकरोक्तिङ् खण्डयितुं तन्मतमनुवदन्नाह नचेति औरिति गोतो णिदिति सिद्धस्य रूपस्यायं लेखः प्रातिपदिकस्वरूपन्तु ओइति गुणे इति तदा एच्परत्वाभावेन वृद्धेरप्राप्तेः तद्बाध्यते ओमाङोश्चेति पररूपम्बाध्यत इति भावः अनभिधानादिति सिचि वृद्धिरितिसूत्रस्थकैयटोक्तिरत्र मानम् अनभिधाने भाष्यसम्मतत्वभावादाह किञ्चेति सामर्थ्येन एचीत्यस्य ऊडंशेपि सम्बन्धेनैजादावूठि वृद्धिरिति वाक्यार्थसामर्थ्येन लक्ष्यानुरोधेनेति ऊडंशेप्येचीत्यस्य सम्बन्धेनैजादावेवोठि वृद्धिस्वीकारे येन नाप्राप्तन्यायेन ओमाङोश्चेत्येतद्बाधेनात्रैव स्यान्नतु विश्वौह इत्यादाविति तादृशलक्ष्यसिद्ध्यनुरोधेनेत्यर्थः असम्बन्धेति ऊडंश इत्यादि वार्णेति वाक्यसंस्कारपक्षे इदम् मूले एकदेशविकृतस्येति एकदेशेन विकृतस्येत्यर्थः अनन्यत्वादिति स्थानिवद्भावेनेत्यादिः नत्वत्रैकदेशविकृतमनन्यवदिति परिभाषायाः सञ्चारः अर्द्धाधिकविकारसत्वात् एजादित्वन्तु न स्थानिवद्भावेन अत्विधित्वादिति भावः एचीत्यस्यैधत्यंशे सम्बन्धेपि स्थानिवद्भावेन माभवान्मेदिधादित्यत्र वृद्धिवारणासम्भव इत्याशङ्कां वारयति नचेत्यादिना पररूपमेवेति तथा चेष्टानिष्टव्यवस्थाया असिद्धिरिति भावः ननु

दृष्टान्ते प्रकृतिप्रत्ययसमुदायस्यादेशो दार्ष्टान्तिके तु न तथेति वैषम्यम् किञ्च स्थानिवद्भावेनैधतित्वमपि वक्तुं शक्यमत आह एधतेरिति तत्त्वम् एधतित्वम् दृष्टान्ते प्रकृतिप्रत्ययसमुदायस्यादेश इह तु प्रकृत्ववयवधकारप्रत्ययघटितसमुदायस्यादेश इति वैषम्यं यद्यप्यस्ति तथापि सम्मोहे दृष्टान्तोयम् सर्वे सर्वपदादेशा इतीति एधीत्यस्य समुदायस्यार्थत्वेनास्ति ॥ सर्व इति न्यायसञ्चारः श्रौतस्तु धीत्यस्यैवाजादोर्द्वितीयस्येत्युक्तेः परिभाषया चेति द्वयोः परिभाषयोर्बाध्यबाधकभावाभावादेकवाक्यतयेत्थं व्याख्यातम् पादस्य लोप इत्यादौ यथा दोषादिति णिलोपस्य प्राप्त्यभावरूपदोषात् ॥ असत्वादिति सम्मोहेन णिबुद्धेरसत्वादित्यर्थः सूत्रन्तु आद्यादिति अत्र णिति प्रत्यये परतो हृद्धेर्विधानेन णिबुद्धेरविघाताद्भवति णिबुद्धिरिति भावः मूले सनः सकारेणेति सन्यङोरित्यस्य षष्ठ्यन्ततया सकारविशिष्टस्य नटभार्यावद्व्यञ्जनानि भवन्तीति न्यायेनैकाच्पदेन ग्रहणादिति भावः स्यादपीति अपिर्मूलोक्ताभावस्य समुच्चायकः तथा च मूलोक्तम्मुख्यन्दूषणमिति ध्वनितम् शङ्काभिप्रेतमन्तरङ्गत्वमुपपादयति चङ्परेति भाष्येत्विति एतेन नित्यत्वेनैव निर्वाहे ऽन्तरङ्गपर्यन्तानुसरणं व्यर्थमिति भावः मूलोक्तस्वोक्तयोः समप्रमाणत्वसूचनायाह इदमिति इदम् बहिरङ्गस्यापि पूर्वम्प्रवृत्तिरित्येतत् शङ्काया एवेति शङ्काया अभावे समाधानमप्यसङ्गतमित्येवकारेण ध्वनितम् सुनोतिरूपेत्यत्र रूपशब्दो ऽर्थपर इति स्वं रूपमित्यत्र यद्यपि प्रतिपादितन्तथापि षष्ठ्यर्थान्वयायाह सुनोतित्वेति त्वदुक्तरीत्या ण्यन्तस्य शब्दान्तरत्वमित्युक्तरीत्या मूले ऽसङ्गत एवेति अत्र एवकारेण प्रकृतिभागस्य शब्दान्तरत्वे उपैधयते प्रैदिधिषते इत्यादौ हृद्भावः स्यादिति ध्वनितम् वस्तुतस्त्विणीकारादौ प्रतिषेध इति वार्तिकविरोधात्प्रेदिधादित्यस्यानभिधानमावश्यकमिति तदुपादानेन सर्वोपि विचारोत्र निष्फल एव एत्येधत्योरवयवे ऽचीति भाष्यकारीयव्याख्यानन्तूपरञ्जकतया एधत्यंशेप्येचीत्यस्य सम्बन्ध इत्यभिप्रायेणेत्याहुः अपरे तु वार्तिकस्थमिण्ग्रहणमुपलक्षणम् अत एव भाष्यकृता ऽत्रैत्येधत्योरिति योगं विभज्य तयोरेवैचीति विशेषणङ् कृतमिति वदन्ति ॥ नन्वन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते इति न्यायविरोधादिति विग्रह इत्यसङ्गतमत आह समप्यमानेति वाप्यामश्वो वाप्यश्च इत्यादौ यथा स्यष्टार्थमाह अत इनीति नन्व-

सिद्धपरिभाषया जातस्य तत्कालप्राप्तिकस्य चासिद्धत्वप्रतिपादनेनान्तरङ्गेणेत्ययुक्तमत आह प्रथमेति समासे संहिताया नित्यत्वेन इन्प्रत्ययोत्पत्तिपर्यन्तविलम्बासम्भवादिति भावः नन्वकृतव्यूहपरिभाषया प्रथमतो गुणो न भविष्यतीत्यत आह समर्थग्रहणेनेति इदमकृतव्यूहपरिभाषायाः सत्ववादिमतेन वस्तुतः सा नास्तीत्याशयेनाह तस्या इति तद्घटकेति प्राचोपपादितो यः समुदायस्तद्घटकेत्यर्थः कल्पितेनापीति समासे समुदायस्यैवार्थवत्वम् अवयवस्य कल्पितैक्यत्वस्यचात्र नास्तीत्यर्थः इन्प्रत्ययस्य समासादुत्पत्तेरिति भावः एतत्सूत्रेति नचाक्षादूहिन्यामिति वार्तिकन्तु सूत्रमित्येतत्सूत्रमित्यसङ्गतमिति वाच्यम् तद्धितप्रकरणारम्भे शब्दरत्ने एवोपपादयिष्यमाणत्वात् भ्राजौ राजेरपीति अत्रापिशब्दो भ्राजाविति स्थानन्तरं द्रष्टव्यः परोक्तन्दूषणमुद्धर्तुमाह नचैवमिति छान्दसत्वादिति एतेन स्तिपाशपेति परिभाषासत्वे छन्दसि सर्वविधीनां वैकल्पिकत्वेन तदप्रवृत्तिरिति ध्वनितम् अनित्यत्वात् गुणो यङ्लुकोरिति सूत्रेण यङ्लुकि गुणविधाननानित्यत्वात् सिद्धान्तरीत्याह भाष्येति एतेन तस्या असत्वेन यङ्लुकि राराष्टीत्यादौ निर्देशाभावादिति यत्र गणबोधकशब्दस्य साक्षादुच्चारणन्तत्रैव गणेन निर्दिष्टमिति व्यवहारादित्याशयः अत्र हि फणादित्वङ्ग्राह्यतावच्छेदकन्तु ग्राहकतावच्छेदकम् तच्च राजृत्वमेव भूतपूर्वगत्येति अनुबन्धसहितस्य निर्देशे सर्वत्र भूतपूर्वस्य गतिरेव सुप्रसिद्धेति भावः साम्प्रतिकत्व सत्वे भूतपूर्वगत्याश्रयणमशक्यमित्याशयेन शङ्कामप्यकृतां वारयति र.शब्दपूर्वकेति रातीति राः तज्जृगातीत्यर्थः क्विपीति अत्र क्विप्शब्दः क्विविवाचरतीत्यर्थपरत्वेन विच्परः तेनेत्वतुकौ न तुकि बहिरङ्गस्य ह्रस्वत्वस्यासिद्धत्वमपि बोध्यम् पाठादिति लाक्षणिकत्वाच्चेत्यपि बोध्यम् आवश्यकश्चानुनासिकपाठः अन्यथा राजृइतिसूत्रे पाठसामर्थ्यादेव लाक्षणिकत्वाय स्यात् नतु राड्डित्यादौ राजृइतिस्वरूपानुपलम्भात् अत्र सीरदेवोक्तामिति विशेषोपादानस्थले आवश्यकामिति भ्राजन्तर्गतराजेरधातुत्वात्तस्य ग्रहणासम्भवादिति भावः न ऋकारानुबन्धत्वमिति तेन राजृग्रहणेन तद्ग्रहणासम्भव इति शेषः यत्र भाष्यकारपठितवचनविरुद्धार्थस्य प्रसक्तिस्तत्रैव भाष्यविरुद्धमिति व्यवहारस्तथात्वत्र नास्तीत्याशयेनाह तदनुक्तेति नन्वाद्गुणइत्यादौ स्थानषष्ठ्यनिर्देशात्कथङ्गतार्थतेत्यत आह पूर्वपरयोरिति अपिशब्दः प्रत्येकपदोत्तरं यो-

जनीयः समुदायस्यैव स्थानित्वाभिमतत्वे समाहारद्वन्द्वेनैव निर्देशेदिति भावः अत एव कृष्णर्द्धिरित्यादौ रपरत्वसिद्धिः उभयोः पूर्वपरयोः इति भाव इति मूलकारस्येति शेषः एवञ्च स्थानिवद्भावाश्रयणे च ज्ञापकाश्रयणमिति उभयथार्क्षेवति निर्देशस्य ज्ञापकत्वाश्रयणस्मकाशकारादिकृतन्न कार्यमित्यर्थः तत्स्थानिधर्मत्वाभावात् एकादेशस्थानिधर्मत्वाभावात् समुदायस्य प्रत्येकञ्च स्थानित्वं नहि तत्र पदत्वमस्तीति भावः नन्वानुमानिकत्ववनकल्पनया भविष्यतीत्यत आह आनुमानिकेति मूले अन्त्यादिवच्चेत्यनेन वर्णमात्रवृत्तिधर्मस्यातिदेशो नास्तीत्यर्थे वार्तिकन्नवा अताद्रूप्यातिदेशादित्युक्तत्वद्विवणोति वर्णाश्रय इत्यादिना ॥ वर्णमात्रवृत्तिधर्मानतिदेशे साधकमाह अत एवेति वर्णमात्रवृत्तिधर्मानतिदेशादेव अत एवेति उक्तार्थः एतत्फलम् तुक्यसिद्धवचनेन ज्ञापकेनान्त्यादिशब्दौ सौत्रावुपस्थितैकादेशस्थानिपरौ पूर्वपरयोरित्यस्य चानुवृत्तिः तौ च तद्घटितसमुदायपरौ यथासङ्ख्यञ्च तेनोक्तार्थलाभः दिगिति दिगर्थस्तु यन्मूले ऽभिहितं स्थानिवद्भावेन गतार्थमिति तदभिप्रायवर्णनमेवैतत् तथाहि स्थानिवत्सूत्रमप्राधान्येनालाश्रयणेपि न प्रवर्त्तते प्रपठ्येत्यादौ यथा इदञ्च सूत्रम्प्राधान्येनालाश्रयणे षत्वतुकोरसिद्ध इति सूत्रे तुग्ग्रहणाज्ज्ञापकाद्यद्यपि न प्रवर्तते तथापि यत्राप्राधान्येनालाश्रयणन्तत्र प्रवर्तत एव अत एव क्षीरपेणेत्यादौ पेइत्यस्यैकाच्त्वविशिष्टोत्तरपदत्वातिदेशाण्णत्वस्य प्रवृत्तिः स्थानिवत्सूत्रेण तु तस्य नातिदेशो ऽप्राधान्येनालाश्रयणात् किञ्च तेन स्थानिनिष्ठधर्मस्यैवातिदेशो भवतीति भीईभियइत्यादौ वर्णयोरेवं स्थानिवत्त्वेन भीइतिसमुदाये धातुत्वानापत्तिरितीयङ् न स्यात् आनुमानिकस्थान्यादेशभावे भीईइतिसमुदायस्य भीईयादेशे स्थानिनि समुदाये धातुत्वस्यासत्त्वेन भीइत्यस्य धातुत्वमलभ्यम् आनुमानिकस्थान्यादेशभावकल्पनेपि भीईइत्येतद्घटकयोः प्रत्येकं स्थानित्वमित्यत्र मानाभावः प्रत्येकमपि स्थानित्वकल्पने तु स्वशब्दाऽश्वशब्दयोरकादेशे स्वाश्वशब्दे स्वत्वस्यातिदेशोपि स्यादिति तत ईरिन्शब्दे स्वाश्वेरीत्यत्र वृद्ध्यापत्तिः अस्य सूत्रस्याप्राधान्येनाश्रयणेपि प्रवृत्त्यर्थमावश्यकत्वादेव भाष्यकृतामप्रत्याख्यानमिति सन्निहितसुखार्तशब्दमात्रविषयकत्वन्तस्य नेत्याशयेनाह सुखेति धातुत्वादीत्यादिना ऽवर्णान्तत्वस्य परिग्रहः हरदतसम्मतपरिभाषार्थपक्षे ऽज्झय-

स्यान्यानन्तर्यमिति उतान्तरङ्गे बहिरङ्गे वेत्यत्र वाशब्दस्य चार्थकत्वेनान्तरङ्गे बहिरङ्गे चाचोराश्रयणमित्यर्थो वाभिमतः नाद्यः अक्षदूयरित्यत्र यणादेशे कर्तव्ये बहिरङ्गस्य ऊठो ऽसिद्धत्वनिषेधानापत्त्या इष्टप्रयोजनासिद्धिः नान्त्यः वाशब्दोपादानस्वारस्यविरोधात् अक्षदूयरित्यस्यासिद्धिश्चेत्यत आह अचो ऽजानन्तर्यमिति मूले हरदतपक्षे इत्यनेनारुचिः सूचिता तद्धीजन्तु पचावेदमित्यत्राप्यसिद्धमिति परिभाषाया निषेधापत्त्येष्टार्थासिद्धिः तुक्यसिद्धत्वविधायकवचनस्यावश्यकतया ज्ञापकस्योपपत्तावपि भाष्ये ऽसिद्धम्बहिरङ्गमन्तरङ्गे इत्युक्का नाजानन्तर्यमिति वक्ष्यामीत्युक्का ऽन्तरङ्ग इत्यस्यानुवृत्तिसूचकाक्षरास्वारस्यमिति एतच्च पश्चात्प्रवर्तमान इत्युक्त्या मूलकारेणापि ध्वनितम् ॥ अत्र च परिभाषायाश्च तद्वैयर्थ्यम् तुग्ग्रहणवैयर्थ्यम् षत्वग्रहणन्तु न ज्ञापकम् कोसिचादित्यत्रेणः पूर्वपदसम्बन्धित्वेन षत्वस्याप्युभयापेक्षत्वेनोभयोः समत्वादित्यन्यत्र स्पष्टम् अजानन्तर्यमित्यत्र न द्विवचनान्तेनाच्छब्देन समासः किन्त्वेकवचनान्तेनैवेत्याशयेनाह अचो ऽन्यानन्तर्यमिति यत्क्रियायुक्ता इति वचने यस्य क्रियेतिसमास इत्याशयेन व्याचष्टे यदर्थेति अस्यार्थस्य सप्रमाणत्वमाह भाष्यकारादिभिरिति क्रियायोग एवोपसर्गसंज्ञाया गतिसंज्ञायाश्च विधानेन प्रत्यासत्त्या ऽस्यार्थस्य लाभः तेन प्रभूत ऋद्धः प्रर्द्ध इत्यत्र वृद्धिर्न तेन उत्तरार्थस्य परग्रहणस्य करणेन अद्यर्शादिति अद्य आ ऋश्यादिति छेदः आङो योगात्पञ्चमी वैकल्पिकत्वादाङ् मर्यादाभिविद्ध्योरित्यसमासः ऋश्यो मृगः ओमाङोश्चेति पररूपम् ततो गुणः भिन्दुच्यरित्यत्रोस्यपदान्तादिति पचन्तीत्यत्रातो गुण इति पररूपम् अपपाठ इति उक्तप्रयोगाणामसिद्धेरिति शेषः परोक्तन्दूषणमुपन्यस्य दूषयति नचेति पररूप इति प्राप्त इति शेषः अनुनासिकाभावार्थमिति पूर्वसादृश्यात्प्राप्तस्यानुनासिकस्याभावार्थमित्यर्थः कैयटे इको गुणेतिसूत्रस्थ इति शेषः भाष्योक्तरीत्येति तत्र यथा स्वरस्य रूपत्वन्नेत्युक्तत्वया ऽनुनासिकत्वस्यापीति भावः गुणस्य आनुनासिक्यह्रस्वत्वादेः ननु पृथिव्यादिद्रव्यनिष्ठगुणानां शब्दे ऽसम्भव एव ॥ यदि तु जातिसंज्ञा क्रियाभिन्नधर्ममात्रमिह रूपपदार्थस्तदा इदमपि स्यादेवेत्यत आह रूपशब्देनेति अवयवेति वर्णरूपेत्यादिः नचावयवसंस्थानवान्समुदायो नत्ववयवा इति कथमवयवानां रूपत्वमिति वाच्यम् धर्मधर्मिणोरभेदात् एतदेव

प्रकटयति वर्णरूपेत्यादिना तद्वान् अवयवसंस्थानवान् शब्दत्वादीति यथा शब्दत्वन्न शब्दस्य रूपन्तथा स्वरोपीत्यर्थः तत्र सङ्गतिन्दर्शयति तत्र सूत्र इति एतेन रूपशब्देनानुनासिक्यस्य व्यावृत्तिर्न सम्भवतीति दर्शितम् एवन्तर्हुच्चक्तप्रयोगे ऽनुनासिकः स्यादेवेत्त आह परः किङ् गुणक इति लभ्यत इति अन्तरतमपरिभाषयेति शेषः तत्र पूर्वोक्तलक्ष्ये तद्गुणकस्य शुद्धस्येति शेषः परशब्देन तस्योपस्थितौ मानमाह परशब्द इति भेदकः विभिन्नव्यवहारसम्पादकः अभेदकः अस्थिदधीतिसूत्रे उदात्तग्रहणाज्ज्ञापकादभेदकः असम्भवादित्युक्तेः फलमाह यत्र त्विति अत एव सति सम्भवे उभयगुणकस्य स्वीकारादेव स्वरितान्तेति तत्र साधुरिति यदन्तत्वात्स्वरितः सुब्रह्मण्यशब्दान्तः ततष्टाप् स्वरितानुदात्तयोरेकादेशोपि आन्तरतम्यात्स्वरित एव स्वरित इति स्वरितस्य समाहाररूपतयोभयगुणकत्वात्सम्भवोस्तीति भावः इति सूत्रभाष्य इति एतेनैतद्भाष्यप्रामाण्यादेकादेश उदात्तेनोदात्त इति सूत्रे ऽनुदात्तस्येत्यनुवर्तत इति ध्वनितम् भाष्यान्तरविरोधपरिहारायाह ऐऔजितीति एकदेशिनेति आद्गुणइत्यादौ तात्परत्वात् द्विमात्रस्य संज्ञा नतु त्रिमात्रचतुर्मात्राणामिति शङ्कायां एवाभावेन तादृशशङ्कायां योगविभागादिप्रदर्शनमेकदेशयुक्तिरिति भावः अत एवाह अभिमानेनेति ॥ सिद्धान्त इति संज्ञासूत्रस्थे तपरे गुणवृद्धी इति सिद्धान्ते इत्यर्थः तत्रैव ऐऔजितिसूत्र एव एवन्तर्हि कैयटविरोध इत्यत आह इको गुणेतीति चिन्त्य एवेति रूपशब्देनोक्तरीत्या तस्याव्यावृत्तेरिति शेषः स्वमते तत्रत्यभाष्यविरोधपरिहारायाह तत्र हीति खण्डनकारोक्तिङ्खण्डयति वृत्ताविति आहुरित्यस्वरसबीजन्तु पूर्वनिपातप्रकरणस्थानित्यत्वेन तथा व्याख्यानमपि युक्तमेवेति ननु शकदेशस्यैकत्वादेशविशेषाणामित्यत्र बहुवचनासङ्गतिरत आह देशविशेषेति मूले एकत्र समास इति समास इत्येकत्वस्य विवक्षया ऽस्यार्थस्य लाभः किञ्चित्साम्येनेति ध्वन्यन्तरव्यवच्छेदकत्वेन तदभावे अनुकरणस्येत्यस्याभावे अव्यक्तशब्दे अव्यक्तशब्दानुकरणे तत्राव्यक्तत्वङ्कथमत आह अव्यक्तत्वञ्चेति चस्वर्थे एतेनानुकार्यस्याच्छब्दाभावेनानुकरणस्य लाभे ऽनुकरणस्येति चिन्त्यप्रयोजनमिति कस्यचिदुक्तिः प्रत्युक्ता निरालम्बनत्वमुपपादयति अद्ग्रहणमिति एतेनादितिप्रश्नस्यातो भिस ऐसित्यत्रैव ह्रस्वाकारबोधकता वाच्या तथाचैतदुपादानं व्यर्थमतो गुण इत्यतस्तदनुक्त्यैवृत्त्व

सिद्धेरित्यभिप्रायः दान्ते माभूदित्युत्तरस्य त्वदिति न ह्रस्वाकारबोधकम् नाम्रेडितेतिसूत्रे ऽत्यस्य तु वेत्युपादानसामर्थ्यात्किन्तु समुदायानुकरणमेव वाच्यन्तथा च तान्तानुकरणमेव नतु दान्तानुकरणमित्यभिप्राय इति मौलान्निःसारमित्येव निःसारमिति प्रागुपाय्युक्तिः प्रत्युक्ता बालानामपि भवदुक्तान्त्यस्य तु वेति ज्ञापकवशाद्ग्रहणमद्भिन्नत्वाद्वृत्त्यर्थमिति ज्ञानम्भविष्यतीत्याशयेनाह तद्भिन्नेति ॥ अतो गुण इति सूत्रे ऽत इत्यस्य ह्रस्वाकारबोधकतया ऽनुवर्तमानस्याच्छब्दस्य तन्मात्रबोधकता स्यादत आह शब्दाधिकारेति ननु जश्त्वविधायकशास्त्रस्यानुकार्यानुकरणयोरभेदे ऽपदान्तत्वान्न प्राप्तिरत आह अनुकार्येति ननु प्रक्रियायाम्पटत्पटेति पररूपोदाहरणम्पटत्पटादिति तदभावस्योदाहरणमुक्तन्नत्वव्यक्तेतिसूत्रप्राप्तियोग्यस्य तत्र कथनामिति न भवदुक्तदूषणावसर इत्यत आह वृत्त्यादीति प्रकृते ऽनुकार्येत्यादि तदुक्त्याशयम्प्रकटयति सर्वत्रेति मूले पटत्इतीति पाठः एतद्धि पूर्वसूत्रस्य प्राप्तियोग्यम्क्रियावाक्यम् ननु समकक्षयोर्बाध्यबाधकभावो भवति प्रकृते तु जश्त्वशास्त्रस्यासिद्धतया बाधादित्यनुपपन्नमत आह तस्यासिद्धतयेति स्याशेति स्पशधातोर्बाधनार्थादाङि स्त्रियामेतद्रूपम् खण्डनकारोक्तिनिरासायाह दिगर्थस्त्विति नन्वद्ग्रहणं तद्भिन्नेत्यादि पूर्वोक्तरीत्या व्यर्थमेवेति भवता कथन्तदुपपत्तिः क्रियते ऽत आह ममाद्ग्रहणमिति दिगर्थमध्ये दिगर्थस्तु मया यथा शब्दाधिकारानित्यत्वज्ञापनार्थमित्युक्तन्तथा भवतापि वक्तुं शक्यं यद्यपि तथापि प्रकाशकारादिकृता कल्पना व्यर्थैवेति ॥ व्यक्तिपक्षे यावद्व्यक्तीनान्तत्तद्व्यक्तित्वेन ज्ञानासम्भवात्संङ्ख्याज्ञानमपि न सम्भवतीत्याशयेनाह जातिपक्षेति सूचितमिति एतेन यदि सुवचमिति मूलकारोक्तिर्जातिपक्षाभिप्राया तदा परममूले स्थानत आन्तर्यादितीको यणचीतिसूत्रे या कृतोक्तिः सा व्यर्था यथासङ्ख्येनैवेष्टसिद्धेरिति परास्तम् तस्य ग्रन्थस्य व्यक्तिपक्षाभिप्रायकत्वात् वस्तुतस्तु जातिपक्ष एवेति तद्भाष्येत्यस्य ऋति ऋवेत्येतद्भाष्येत्यर्थः प्रतीयते स तु न युक्तः तस्य विशिष्याख्यानादत आह तुल्यास्येति अन्यथासिद्धिरिति तद्वार्तिकसाध्यफलान्यथासिद्धीत्यर्थः उद्भावितेति यदि विजातीयादेशार्थं वार्तिकारम्भस्तदा ऽनयोर्विधानमात्रं स्यान्नत्वचुकार्यमित्यनयोरच्त्वमवश्यं वाच्यन्तथासति दीर्घसंज्ञानयोर्भविष्यतीति अकः सवर्ण इत्यनेनैवेष्टसिद्धेर्वा-

तिकवैयर्थ्यमिति रीत्योद्भावितेत्यर्थः एङः पदान्तादितिसूत्रे पदान्तादित्यस्याभावेपि पदान्तविषयकत्वङ्कथमत आह अपदान्ताच्चेदिति विभक्तौ चेदिति हरयइत्यादि विभक्ताविति नियमव्यावर्त्यम्भविष्यतीति भावः ननु तत्र एङ इति पञ्चम्यन्तमत आह षष्ठ्येति गोरिति षष्ठ्यन्तमिति तेन सामानाधिकरण्यार्थमित्यादिः वर्णग्रहणे लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तिवादिमताभिप्रायेणाह आद्गुणेति ओदितिसूत्रस्थादोभवदित्यत्र प्रवृत्तिवारणपरभाष्याद्वर्णग्रहणेपि सा प्रवर्तत इत्याशयेनाह प्रतिपदोक्तेति अनित्यतेति तेन वर्णग्रहणेपि चेत्प्रतिपदोक्तपरिभाषाप्रवृत्तिस्तदा चक्रे ऽत्रेत्यादावेवैङ इति सूत्रम्प्रवर्तेत ननु हरे ऽवेत्यादाविति शङ्काया नावकाशः वर्णग्रहणेपि प्रतिपदोक्तपरिभाषायाः प्रवृत्तिः सप्रमाणेत्याह ध्वनितञ्चेदमिति इदम् तत्र तत्प्रवर्तनम् तत्र हि अनदः अदः समभवददोभवदित्यत्र प्रकृतिभावनिवारणायारब्धस्यौतश्चेत्यप्रतिषेध इति वार्तिकस्यान्यथा सिद्धिरनया परिभाषया कृता तेनेदन्ध्वनितमित्यर्थः नन्वेवमर्थाधिकारानुरोधादेङ इति सूत्रेपि प्रतिपदोक्तस्यैवैङो ग्रहणं स्यादिति शाब्दो ऽर्थ इत्यादौ तस्य प्रवृत्तिर्न स्यादत आह एङ इति अत्र च प्रकृतसूत्रे प्रतिपदोक्तपरिभाषाप्रवृत्तौ च स्थानिवदित्यादिं तत्र हि गोः पूर्वणिल्लाक्षरेष्वित्यारब्धस्य प्रतिषेधस्यैनामाश्रित्य प्रत्याख्यानपरभाष्येत्यर्थः ननु विभक्तौ चेदिति विपरीतनियमो न भविष्यति भवतेरइत्यत्र शपि पूर्वरूपादर्शनादिति तेन सामान्यापेक्षेन ज्ञापकेनापदान्ताच्चेदित्युक्तानियमस्यैव लाभादेङ इति सूत्रे पदान्तादिति व्यर्थमिति तत्सामर्थ्यात्तत्र प्रतिपदोक्तस्यैव ग्रहणमित्यस्तु इति चेन्न स्थानिवत्सूत्रस्थभाष्ये हेचित्रगो ऽग्रमित्यत्र पूर्वरूपप्रदर्शनपरभाष्यविरोधादित्याशयेनाह अन्यत्रेति उद्योतादौ यद्येङ इति सूत्रे प्रतिपदोक्तस्यैव ग्रहणन्तदा हलो ऽनन्तराः संयोगः मुखनासिकावचनो ऽनुनासिक इत्यादिप्रयोगासङ्गतिरिति प्रतिपदोक्तपरिभाषाया इहाप्रवृत्तिस्तथाच साधारण्येन प्रवृत्तौ ङसि ङसोश्चेत्यस्यापदान्ताच्चेदिति प्रथमोक्तनियमबोधकतया सार्थक्यमेव वाच्यमत एव भवतेर इति निर्देशस्योपपत्तिरिति पदान्तादित्युत्तरार्थमेव पूर्वसूत्रे करणन्तु विपरीतनियमशङ्कावारणायैवेति तत्त्वम् गोशब्दस्य नान्त इति पाठपक्षे पूर्वरूपस्यैव विकल्पेन निषेधपक्षे ऽवादेशापत्तिरत आह पूर्वरूपमपीति अप्यर्थकोत्रैवकारः अपिना ऽवादेशस्य

सङ्ग्रहः तल्लाभोपायमाह गोशब्दस्येत्यादिना एवञ्च निषेधविकल्पे विधिविकल्पः फलतीति न्यायेन पक्षे ऽवादेशबाधकस्य पूर्वरूपस्य प्रवृत्तिस्तदभावे स्वरूपेणावस्थानमिति गोअग्रमित्यस्यावङादेशे गवाग्रमित्यस्य सिद्धिः अवङिति सूत्रेपि प्रतिपदोक्तस्यैवैङो ग्रहणमित्येतद्दाढर्यायाशङ्कते नन्विति स्वरसिद्ध्यर्थमिति गवादयः पशव आगता इति वाक्ये गवादय इति शब्दे गवाग्रमिति शब्दे च बहुव्रीहिसंज्ञके स्वरसिद्ध्यर्थमित्यर्थः अत्र हि पूर्वपदप्रकृतिस्वरेण गोशब्दस्य यो व्यपदेशस्तस्यैवावस्थानम्बोध्यते गोशब्दश्चोणादीनां व्युत्पत्तिपक्षे आदुचदात्तः प्रत्ययस्वरेण अव्युत्पत्तिपक्षे तु फिट्स्वरेणान्तोदात्तो व्यपदिश्यते यद्यवङादेशस्तदा आदुचदात्त इति व्यपदेशपक्षे आन्तरतम्यादवङादेशोप्यादुचदात्तो व्यपदिश्येतेति गवादय इत्यादावादुचदात्तत्वव्यवहारस्योपपत्तावपि उणादयो ऽव्युत्पन्नानीति सिद्धान्तपक्षे ऽवङादेशो ऽन्तोदातः स्यादिति वाशब्दाकारस्यैकादेश उदात्तेनेत्युदात्तस्य श्रवणापत्तिः अगागमे त्वागमा अनुदात्ता इत्यनुदात्तस्यैवैकादेश इत्यनुदात्तस्यैव श्रवणसिद्धिरिति भावः गवाग्रमित्यस्य तत्पुरुषत्वे तु समासस्वरेणान्तोदात्तत्वमेव स्यादिति स्वरे न विशेषः एतत्सूत्रस्थेति स्वरभेदप्रतिपादकैतत्सूत्रस्थभाष्येत्यर्थः अस्त्विति अत्रावङादेशे चित्रगवाग्रमिति रूपमगागमे तु चित्रग्वाग्रमिति रूपभेदापत्तिरिति रूपाभेदसिद्धये एङ्ह्रस्वानुवृत्तिरस्त्विति भावः किम्मानमिति अस्य गवाग्रतुल्यतया रूपे विशेषाभाव इति भावः निपातनेनेति एकश्रुत्या पाठे कर्तव्ये आदुचदात्तस्यावङ्शब्दस्योच्चारणेनेत्यर्थः पूर्ववार्तिके स्वरसिध्यर्थमित्युपादानात्स्वराभेदसिद्धावेव वार्तिकतात्पर्यन्तच्चादुचदात्तनिपातनेनापि निर्वहति यदि हे चित्रगो ऽग्रमित्यत्र पक्षे ऽवङादेशोपि स्यात्तदा निपातनपक्षे स्वरे भेदः स्यात्तदेवोपपादयति चित्रगोशब्द इत्यादिना स्पष्ट इति अतः प्रतिपदोक्तस्येत्यावश्यकमिति शेषः अन्यकृता स्वराभेदशङ्कामनूद्य दूषयति नचेति इत्यादाविवादिना गवाग्रमित्यस्य तत्पुरुषस्य सङ्ग्रहः तस्य निपातनेन साधितस्यादुचदात्तत्वस्य माभूदिति कथनेन सतिशिष्टत्वात्तस्य श्रवणापत्तिरुद्भाविता इवेति स एवादौ प्रवर्तते इति कल्पनयेति शेषः परत्वेनेति कथमत्र विरोध इति चेदित्थम् गो आम् अक्षि सु इति स्थिते ऽलौकिके प्रक्रियावाक्ये समासान्ते ऽक्ष्णो दर्शनादित्यचि तद्धितान्तत्वात्प्रातिपदिक-

संज्ञायाः पूर्वभागस्य समाससंज्ञायाश्च युगपत्प्रवृत्तौ सुब्लुकि आदुत्तदा-त्तत्वयुक्तावङः समासान्तोदात्तत्वस्य युगपदसम्भव इति अङ्गसंज्ञासापेक्षे-ति अङ्गेति संज्ञा यस्मिन्प्रत्यये तत्सापेक्षेत्यर्थः एतेन संज्ञाकृतस्य बहिर-ङ्गत्वस्य सिद्धान्तविरुद्धत्वशङ्काया नावकाशः अन्तरङ्गत्वादिति प्रकृतिमा-त्रापेक्षत्वेनेत्यादिः अस्य उपदेशिवद्भावस्य ॥ औचित्यमुपपादयति य-थान्यास इति अस्य अगागमस्य उक्तार्थे भाष्यकारोक्तिरपि साधिकेत्याह स्थानिवत्सूत्र इति पूर्वत्व इति कर्तव्य इति शेषः वार्तिकैकदेशोयम् अत्र पूर्वत्व इत्युपादानेन सर्वत्रेत्यस्यावङादेशस्य च कथं लाभ इत्यत आह अ-त्रेति अत एव उभयबोधनस्येष्टत्वादेव स्थानिवत्वात्प्राप्ताविति अतिदेशवि-षये सामर्थ्याल्लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तिरिति भावः तन्न का-र्यम् गोः पूर्वेति वचनन्न कार्यम् दिगर्थस्तु यथा सूत्रत्रयस्य भाष्यस्य चैक-वाक्यता भवति तथैव कल्पनमुचितमित्येङ्गृहणानुवृत्तिः प्रतिपदोक्तस्य च तस्य ग्रहणमित्युचितमिति ननु जातिलक्षणङीषः प्रकृते प्राप्तिसत्वेन टा-प्यादित्यनुचितमत आह ङीप इति खण्डनकारोक्तिङ्खण्डयति गवीत्यस्ये-ति नाङ्गसामिति उदक्षरत्वादिति शेषः ननु प्रकृतिभावविधायकवचनष-ष्ठ्या प्लुतस्यासिद्धत्वात्कथम्प्लुतस्य प्रकृतिभावविधानमत आह प्रकृतिभा-वेति उपलक्षणस्य फलमाह एवञ्चेति अपिना तत्सत्ता समुच्चीयते पदस-मूहो वाक्यमिति परमतम् स्वमते तु एकतिङ् वाक्यमिति शास्त्रीयप्रक्रिया-यामाश्रीयत इत्याशयेनाह वाक्यस्येति कैयटोपीति एतेनायमेवार्थः युक्त इति ध्वनितम् ॥ परममूले सर्वः प्लुत इति कथनेन प्राचामित्यस्य सर्व-प्रकरणाङ्गत्वन्ध्वनितम् भाष्यकृता तु विभाषेति योगविभागेन सर्वस्य प्लु-तस्य वैकल्पिकमुक्तम् तत्र पक्षे प्राचामिति पूजार्थम् यदा तु प्राचामित्यने-नैव सर्वस्य प्लुतस्य वैकल्पिकत्वं साध्यते तदा विभाषा पृष्ठेत्यत्र विभा-षाग्रहणङ्किमर्थमित्याशङ्कायामाह अत्र पक्ष इति प्राचामिति योगविभागेन सर्वस्य प्लुतस्य वैकल्पिकत्वसाधनपक्ष इत्यर्थः विभाषा पृष्ठेत्यत्र विभाषाग्र-हणमुपलक्षणम् वार्तिकपठितवाशब्दोप्येवम् अवयुत्यानुवाद इत्यत्रावयुत्ये-ति ल्यबन्तम् पृथक् कृत्येत्यर्थः अवयुत्येति तृतीयान्तं वा तदा ऽवयुत्येत्यस्य पृथक्करणेनेत्यर्थः नन्वेवमविद्वांस इत्यनेन भाष्यकृता प्लुतयुक्तस्य प्रत्यभि-वादवाक्यस्य कर्तव्यता सूचिता सा प्लुतस्य नित्यत्व एवोपपद्यते यदि स-

र्वस्य प्लुतस्य वैकल्पिकत्वन्तदा प्लुताकरणेपि दोषाभावेन सा नोपपद्यत इ-
त्याशयेनाह अविद्वांस इति शास्त्राज्ञानेन या निन्दा तत्परमित्यर्थः दूराद्धोध-
केति एतेन दुराद्धूते चेति सूत्रे दूराद्धूतपदन्दूराद्धोधनोपलक्षणमिति सप्रमा-
णमिति सूचितम् अत एवाकडारसूत्रे गुरुनदीसंज्ञयोः समावेशे गार्गी बन्धुः
वात्सी बन्धुरित्यत्र गुरोरिति प्लुतः नदीबन्धुनीति पूर्वपदान्तोदात्तश्च फ-
लमित्युक्तत्वत्सङ्गच्छते ननु मूलोक्तप्रकृतिभावस्य वैकल्पिकत्वमयुक्तङ्किन्तु
तस्य नित्यत्वमेवेष्टमत आह अस्येति तत्पक्षे अप्लुतवद्भावपक्षे अस्याभावेन
प्रकृतिभावस्याभावेन तत्त्वम् वैकल्पिकत्वम खण्डनकारोक्तिम्परिहर्तुमाह तस्य
मते इति तस्य चाक्रवर्मणस्य तथाच मूलोक्तं फलितार्थपरमेवेति भावः एतेन
फलितार्थकथनपरत्वकथनेन अवैदिकत्वमिति उपस्थितशब्दस्य प्रकृतसूत्रे
ऽवैदिकेतिशब्दपरत्वमित्यत्र किम्मानमिति चेदुपस्थित इत्युच्यते किमुपस्थित-
म्नाम अनार्ष इति करण इति भाष्यमिति गृहाण इदञ्चेति ॥ कुमार्य-
गारमित्यत्रातिप्रसङ्गकथनञ्चेत्यर्थः असम्भव एव संज्ञाविधाविति निषेधा-
दिति शेषः एवकारेण प्रगृह्यसंज्ञाप्राप्तिनिरासः इत्युक्तमिति कथनमात्रेण
मूलोक्तस्यैव टीकायाम्पुनः कथने पौनरुक्त्यमिति या शङ्का तस्या नि-
रासो न जातो ऽत आह मूल इति शेषः तथाच पुनः स एवार्थो नो-
च्यते किन्तु मूलोक्तार्थस्य दार्ढ्याय स्मारणङ्क्रियते ऽतो न पौनरुक्त्यम् ॥
वम्प्रचेतसीति मेदिनीकोशव्याख्यानावसरे सत्या भाम इतिवदिवार्थे व-
शब्दप्रयोग इति तद्व्याख्यात्रोक्तत्वन्न युक्तमित्याशयेनाह ववेत्यादीति को-
शान्तरमात्रेण निर्णयाभावादाह विनापीति तादृशस्थले सखण्डस्थले तथा-
कल्पने लोपस्य कल्पने मूलोक्तमारम्भसामर्थ्यादित्यनुपपन्नमित्याशयेनाश-
ङ्कते नन्विति न पृथग्बोधकत्वमिति लक्ष्यसंस्कारकपृथग्बोधजनकत्वन्ना-
स्तीत्यर्थः अत्र मानन्तु अयादिभ्यः परैव प्रगृह्यसंज्ञेति भाष्यमेवेति अत्रा-
दसोमादिति सूत्रस्थभाष्ये संज्ञापदोपादानेन संज्ञाविषये प्रदेशीयपरत्वेनैव
व्यवस्थेति दर्शितम् तस्य प्रगृह्यसंज्ञाविधायकशास्त्रस्य नन्विदम्भवदुक्तं का-
र्यासिद्धत्वपक्षे तत्तु न युक्तम् शास्त्रासिद्धत्वस्यैव प्राग्व्यवस्थापनादतस्तत्प-
क्षेप्याह किञ्चाधीति संज्ञाया अपीति कार्यकालत्वादिति शेषः असिद्ध-
त्वमिति किन्तु सिद्धस्यैव पूर्वशब्देन बोधनं युक्तामिति शेषः एतेन अष्टा-
ध्यायीपाठकृतपूर्वत्वस्य पूर्वत्रासिद्धमिति शास्त्रप्रवृत्तावनियामकत्वेन एता-

वता ग्रन्थेन सामर्थ्यादित्यनुपपन्नमित्युपपाद्य समाधत्ते अप्रगृह्येति ॥ नन्विदमप्रगृह्यादस इति कथनं यथान्यासपक्षे यथाफलसिद्धिस्तथैव चेदुच्यतन्तथा ऽधुना न सिध्यति हेऽमुक अमुका ३ तयोरपि प्रतिषेधः प्राप्नोतीत्यत आह हेऽमुकेति अस्मिन्पक्षे वाक्यभेदेनाप्रगृह्यादसो ऽनुनासिको नेति सूत्रार्थादत्राप्राप्तिरिति भावः ननु व्यवस्थितविभाषापरिगणितस्थल एवेत्यत आह अनभिधानेति भाष्ये इति प्रकृतसूत्रस्थे तत्र हि तत्रैवायम्बूयादणो प्रगृह्यस्यानुनासिकः अदसो नेत्युक्तम् यत्तु तद्भाष्यस्थादस इत्यावर्त्य न दस्य सो यस्येत्यर्थेनोक्तप्रयोगयोर्न निषेधस्य प्राप्तिरिति तन्न आवृत्तिकल्पने तत्र व्यधिकरणबहुव्रीहिकल्पने च गौरवात् शे इति सूत्रे छन्दसीत्युपादानाभावाच्छान्दसमपीदमित्यनुपपन्नमत आह शे आदेशस्येति नन्वपदत्वादनुकरणे कथम्फलमत आह प्रकृतीति नन्वतिदेशेन प्रगृह्यत्वस्यापि सिद्धौ सूत्रस्य तर्हि वैयर्थ्यमत आह तेनातिदेशेनेति फलाभावेनेति अचूपरत्वस्याभावेन प्रकृतिभावो न फलमेवमवसानाभावेनानुनासिकाप्राप्त्या तन्निषेधोपि न फलम् ननु वाक्यार्थस्य भेदाभावेनान्यथात्वेत्यसङ्गतमत आह अनभीति नन्वेवङ्किल तदित्यनेन स्मृतोर्थो निर्दिश्यते नतु स्मरणम् द्योत्यते ऽत आह विस्मृतस्येति मर्यादाभिविधावित्येकवचनस्योपपत्तये आह तद्वृत्तित्वम् निरुक्ते इति तत्र हि अभ्र आं आप इत्युक्तम् विभक्त्यर्थे विहिताव्ययीभावस्य नित्यस्य प्राप्तिशङ्कायामाह अव्ययीति मूले परत्वादित्यस्य ओदिति सूत्रापेक्षयेत्यादिः परत्वस्य शास्त्रद्वयचरितार्थ एव प्रवृत्तिनियामकत्वमित्याशयेन तदर्शयति इतिशब्दातिरिक्त इति एवञ्च विकल्पेन संज्ञाविधायकशास्त्रसामर्थ्यन्नास्तीति सम्बुद्धावित्यस्य वैयर्थ्यमित्याशयः ॥ अत एव विकल्पाभावे नित्यस्याप्रवृत्तेरेव अन्यथा वैकल्पिकशास्त्राभावे नित्यस्य प्रवृत्तिस्वीकारे निषेधीयेति अनेन निषेधस्य प्राप्तिपूर्वकत्वेनैतदभावेन यदीति पूर्वस्य प्राप्तिसत्वेनोभयत्र विभाषात्वमस्य दुर्लभं स्यादित्युक्तम् प्रगृह्यसंज्ञाया आकडारीयत्वाभावेन परत्वादित्यसङ्गतमित्याशयेन शङ्कानिरस्यति नचेत्यादिना अन्यत्र तदधिकाराभावस्थले केचिदिति मूलकारानुयायिनः अनेनारुचिर्बोधिता तथाहि तज्ज्ञापकं संज्ञाया भेदविषयकत्व एवेति यदि ब्रूषे तदा साक्षात्प्रभृतीतिसूत्रस्थभाष्यविरोधः तत्र हि च्व्यन्तस्य प्रतिषेधो वाच्यः लवणीकृत्य नवा पूर्वेण कृतत्वादस्त्वनेन

विभाषा पूर्वेण नित्यो भविष्यतीत्युक्तम्भाष्यकृता तत्र कैयटः अत्र परत्वादनेन विभाषा प्राप्नोति नित्या च गतिसंज्ञा इष्यत इति सा च पुनःप्रसङ्गविज्ञानात्कल्पनीया एकसंज्ञाविषये ऽभावपर्यन्तं व्यापारेण विकल्पाभावे नित्यत्वाप्राप्तिरिति यदि स्वीकारस्तदा तत्रत्ववार्तिकस्यावश्यकतया तत्प्रत्याख्यानविरोधः स्पष्ट एव ननु तर्हि कथम्मूलस्य सङ्गमनमत आह परेत्विति ननु सम्बुद्ध्ाविति तर्हि व्यर्थं स्यादत आह संबुद्ध्ाविति त्विति अन्यथा निपातपदानुवृत्तिस्वीकारे तथाच निरवकाशत्वात्प्राप्तविभाषैव स्यादित्यत्र तात्पर्यम् अभावपर्यन्तमपि व्यापार इति कल्पनायाम्मानाभाव इति भावः उत्कृष्टत्वादिति निरवकाशत्वेनेति भावः ननु यदि निपातपदाननुवृत्तितात्पर्यकं सम्बुद्धिग्रहणन्तदा तन्न कार्यम् सम्बुद्धिपदन्त्यत्का प्रकृतसूत्रेप्योदग्रहणङ्कार्यन्तत्सामर्थ्यादेव निपातपदाननुवृत्तिः सिध्यतीत्यत आह ओदग्रहेति वैचित्र्यार्थमिति वैचित्र्यायेत्यर्थः स्वार्थस्य विवक्षया सम्बुद्धिनिमित्तकस्यौकारस्य ग्रहणेन तादृशस्थले प्रसक्ताव्याप्तिनिरासार्थमन्यथा निपातपदसम्बन्धः स्यात्तथा चाव्याप्तिः स्यात् निपातपदासम्बन्धे तु स्वरादिपठिते मिथोशब्दे ऽव्यये ऽतिप्रसङ्गस्यापि निरासो भवतीत्येतद्वैचित्र्यार्थमित्यर्थः मूले ऽनुवर्तत इति एङः पदान्तादिति सूत्रादित्यादिः ॥ अन्यथा प्लुतप्रगृह्येति सूत्रे तदसम्बन्धे अत एवादसोमादिति सूत्रभाष्ये पदान्तप्रकरणे प्रकृतिभाव इति भाष्यं सङ्गच्छते अत एव विभक्त्यनुत्पत्तेरेव लिङ्गसर्वनामेति सर्वनाम इव सर्वनामलिङ्गानां सर्वनामलिङ्गं सर्वनाम तस्य नपुंसकतापदेन कर्मधारयः सर्वनामसादृश्यञ्च सर्वत्र स्थितिः सत्त्वादिगुणानामस्तीति तन्मात्रविवक्षया सर्वत्र प्रवृत्तिसत्त्वेन अत एव सन्दिग्धे ऽप्यर्थे नपुंसकलिङ्गस्य शब्दस्य प्रयोगः स्वरूपपरता गोशब्दस्य स्वरूपपरता तेन इतिशब्देन यत्र हि लौकिकविग्रहे व्यपेक्षालक्षणं सामर्थ्यमस्ति तत्र कल्पिते ऽलौकिकविग्रहे एकार्थीभावारोपात्समासो भवति प्रकृते चेतिशब्दस्य स्वातन्त्र्येणार्थबोधनाय प्रयोगाभावेन नैकार्थीभाव इति भावः खण्डनकारोक्तिस्तु खण्डयति नचेति अनित्यत्वेनेति अन्यथा धातुपर्युदासात्प्रातिपदिकत्वानापत्तौ क्षिय इति निर्देशानुपपत्तिः सुसाधुत्वेनेति गवीति प्रयोगस्य सुसाधुत्वेन नन्वेतदर्थमेवेत्यत्रैवकारस्य वैयर्थ्यम् अन्यत्रापि प्रयोजनसत्त्वादत आह एतदर्थमपीति एवञ्च निपातानामनेका-

र्थतया एवकारो ऽप्यर्थक इति भावः अन्यत्र फलमाह अनितेरित्यादिना आपत्तिरिति हलोयमामित्यत्रैव यथासङ्ख्यापत्तिः तस्य यथासङ्ख्यस्य ननु तस्यासार्वत्रिकत्वे न मानमत आह ॥ आन्महत इति ॥ ननु मूलोक्तस्थले सूत्रस्थ प्रवृत्त्यर्थं यरो ऽनुनासिक इति सूत्रे निमित्तस्याऽनुनासिकशब्देनोपादानमस्तु विधेयसमर्पकस्यानुनासिकपदस्य तूपादानाङ्किमर्थमत आह पूर्वोक्त इति नकारापत्तीति यरो ऽनुनासिके अम् इत्युपादाने स्थानत आन्तर्यान्नकारापत्तिरित्यर्थः प्रत्याहारेत्विति तदा यम्पदेन लकारस्योपस्थितौ स एव भविष्यतीति भावः लस्यैवेति आन्तरतम्यादिति भावः इदम्मूलकाररीत्या वस्तुतस्तु कमलादेरनभिधानमेव अनुनासिकेतिसंज्ञाया वर्णमात्रे तात्पर्येण लाघवाभाव इत्येव दूषणमत्र बोध्यम् अत एवाह यथान्यासमेवेति मूले ऽत एवेति किम्वितीत्यत्रानुस्वाराभावस्येष्टत्वादेवेत्यर्थः सन्निपातपरिभाषयेति मयः परत्वमुपजीव्य तस्य करणादित्यादिः तथापाठेन मय उञो वो वेति पाठेन स इति अनुनासिको वकार इत्यर्थः अन्यथा विधेयेपि सवर्णग्राहकत्वाङ्गीकारे अत एव अनुनासिकाकारापत्तेरेव अच्सन्धिरित्यत्राचो ऽक्षु इत्यत्रेव कुत्वापत्तिवारणायाह इति स्वरसंधिरिति सन्धिद्वयमित्यर्थः द्वित्वञ्च प्रकृतिभावमादाय अत एव सिद्धः प्लुतः स्वरसन्धिष्विति भाष्ये ऽभिहितम् तत एव पञ्चसन्धिरित्यस्योपपत्तिः इति श्रीमद्ब्रह्मप्रकाशिकायामचां सन्धिद्वयं समाप्तम् ॥ ॥ तद्योगमितीति ऋचा योगमित्यर्थः क्रियादावन्वये सति साहित्यस्य दर्शनादाह साहित्यञ्चेति चित्तमित्यादावतिप्रसङ्गवारणायाह संयोग इति यथासङ्ख्योपपत्तये आह तथेति अनादितयेति किमत्र प्रमाणमिति चेत् ॥ अनन्त्यश्च भवेत्पूर्वो ह्यन्त्यश्च परतो यदि । तत्र मध्ये यमस्तिष्ठेत्सवर्णः पूर्ववर्णयोरिति नारदीयशिक्षैव ॥ नन्विति ञ्नित्यस्य वर्णान्तरत्वाभिप्रायेणेयमाशङ्का यद्वा वर्गस्य पञ्चमे परे पूर्वस्य स्थाने यमसंज्ञकादेश इति पक्षे तज्ज्ञानमित्यत्र दकारस्य चुत्वन्न स्यात् यमयोगस्यात्र सत्वन्नतु चुयोगस्येत्याशङ्का बोध्या उत्तराशयस्तु यमो नादेशः किन्तु पञ्चमे परे ऽनन्त्यात्परत्र यमो नाम पूर्वसदृशो वर्णान्तरो भवति नत्वनन्त्यस्य यमो नामादेशः तत्पक्षस्यान्यत्र निराकृतत्वादिति ननु शादिति लिङ्गेन तस्मिन्निति परिभाषाया इहानुपस्थाने चित्तमित्यादौ चुत्वापत्तिरत आह पूर्वत्वांशेति एतेनाव्यवधानांशस्य बोधिका परि-

भाषा इहोपतिष्ठत एव तत्र शादित्यस्य ज्ञापकत्वासंभवादित्याशयः तद्व्यर्थमिति षकाररूपस्य व्यावर्त्यस्याभावेन टोरिति व्यर्थमित्यर्थः अस्य षस्य नचैवमपि स्थानीयः सकारस्तद्बुद्ध्या स्यादेव जश्त्वमिति वाच्यम् देवदत्तहन्तृहतन्यायेन तद्बुद्धेरिहासम्भवादित्याशयात् दकारस्य प्रश्लेषे तस्य श्रवणापत्तिं वारयति चर्त्वेनेतीति लोपस्तु वैकल्पिकत्वान्न कृतः तत्र तत्प्रकृतिकमतुपि तात्पर्यमिति दकारस्य चर्त्वेन प्रश्लेषङ् कृत्वा समाधानकर्तुरिति शेषः अत्र मौलं यच्छक्यमिति तदग्रे इति केचित्तन्न मृन्मानित्यादावतिप्रसङ्गादिति पाठाभिप्रायेण तमनूद्य तन्न झय इति वत्वेन तद्रूपस्यैवासम्भवादिति खण्डनकारेणोक्तत्वात्खण्डयति इतीत्यादिना अधिकमिति सूत्रे तदभावादिति शेषः नन्वनुस्वारस्येति सूत्रस्थस्य सवर्णपदस्य सम्बन्धो भविष्यतीत्यत आह ॥ परसवर्णेति प्रकारान्तरेण तस्य लाभोन्येनोक्तस्वन्मतमनूद्य दूषयति नचेत्यादिना एवमेव भवदुक्तप्रकारेणैव स्वरितत्वेति सवर्णपद इत्यादिः तोर्लीत्यत्र समुदायस्य सम्बन्धसूचकतया स्वरितत्वस्य चारितार्थ्यमुक्तं यद्यपि तथाप्येकदेशे स्वरितत्वप्रतिज्ञासामर्थ्यादेव सम्बन्ध इत्येतदुपपादयति पकारमात्र इत्यादिना ॥ अतिरभसमुपपादयति चयो ऽभावादिति ननूदः स्यादिति सूत्रनिष्पन्नस्य थस्य स्थाने चर्त्वेन तकारे तस्य दितीयादेश इति तेषामभिप्राय इत्याशङ्कायामाह दीर्घादिति सम्प्रति श्रूयमाणाष्टाध्यायीपाठपक्षे खरि चेत्येतद्दृष्ट्या उदः स्थास्तम्भोः पूर्वस्येत्यस्यासिद्धत्वात्कथन्थस्य स्थाने चर्त्वेन तकार इत्याशङ्कानुत्थानायाह इत्युत्तरमिति एवञ्च खरि चेत्यस्य परत्वान्न तद्दृष्ट्या पूर्वसवर्णनिष्पन्नथकारस्यासिद्धत्वशङ्केति भावः भाष्यसम्मत इति उत्कन्दो रोग इति भाष्योदाहरणाद्भाष्यसम्मत इत्यर्थः नचैतद्भाष्योदाहरणबलेन महाप्राणत्वघटितान्तरतम्यम्पूर्वसवर्णस्य प्रवृत्तौ न नियामकमित्येव कल्पयितुं शक्यतावतापि तकारस्य लाभेन चयो लाभ एवेति वाच्यम् महाप्राणत्वन्न नियामकमिति यदि ब्रूषे तदा भाष्यकाराज्ञानकल्पनात्तदपेक्षया ऽष्टाध्याय्यामाठव्यत्यासस्य कल्पनमेवोचितमित्यभिप्रायात् तस्य चर्त्वनिष्पन्नतकारस्य एतत्सर्वञ्चयो द्वितीया इत्यस्य चयः सत्तायामवृत्तिरूदभावे तु नेत्यभिप्रायेण वस्तुतो निमित्ताभावादिह तस्य प्राप्तिरेव नेत्याशयेनाह शरपरत्वाभावेति अथ तनोतीत्यादिना वक्ष्यमाणपक्षे मूलोक्तदो-

षोपपत्त्यर्थमिह प्रक्रियाम्पूरयति तत इति एवञ्च अवसाने चर्त्वस्य जश्त्वापवादत्वे च तत्र कृते चर्त्वे कृते अपवादे प्रवृत्ते पुनरुत्सर्गाप्रवृत्तेः सिद्धान्तिसम्मतत्वात् निरवकाशो विधिरपवादो भवति नचेह निरवकाशत्वमित्याशयिकासुक्तिन्निरस्यति नचेति उक्तरीतेः अवसाने चर्त्वे कृते जश्त्वमिति रीतेः तदप्राप्तियोग्ये विषये ऽचारितार्थ्यमपवादत्वबीजन्तादिहास्त्येवेति भावः एतदेव उक्तबीजमेव ॥ अत एव तदप्राप्तियोग्ये विषये ऽचारितार्थ्यस्यापवादत्वप्रयोजकत्वादेव कैयटादिग्रन्थाः द्वित्वोत्तरन्दिग्यादेशस्य चारितार्थ्येनाबाध इत्येवंरूपा इत्यर्थः वार्तिकेति एवञ्च भाष्यकृता तन्मतस्य खण्डितत्वान्न लक्ष्यसंस्कारकतेत्यत तात्पर्यम् एवञ्चेति विसर्गापत्तौ चेत्यर्थः ईदृशे विषये पदान्तरसम्बन्धासम्बन्धाभ्यां विलक्षणरूपप्राप्तिविषये इष्टापत्तिरिति यदुक्तव्यूहपरिभाषया साध्यन्तद्वाक्यसंस्कारेणैव साधनीयम् पदसंस्कारस्तत्र त्याज्यः तथाच प्राचीनोक्तं वावसान इति चर्त्वे कृते इत्यादिना यत्तदसङ्गतमेवेति भावः पदसंस्कारपक्षमवलम्ब्यादौ विसर्गङ् कृत्वा पश्चात्तिङन्तसम्बन्धः कार्य इत्यभिप्रायेण सविसर्गरूपमपि साधुरिति केनाप्युक्तन्तन्मतमाह अन्येत्विति आदिना नन्वकृतव्यूहपरिभाषया तथा न भविष्यतीत्यत आह परिभाषाया इति आहुरित्यस्वरसबीजन्त्वेतादृशरूपानभिधानमेवेति यथासङ्ख्यमिति सूत्रे यत्प्रथमान्तं यथासङ्ख्यमिति पदन्तदनुकरणम्मान्तमेव भविष्यतीति यथासंङ्ख्यस्येत्यसङ्गतमत आह ख्यान्तैकेति एवञ्च यथासङ्ख्येत्येकदेशयुक्तसूत्रप्रवृत्तेरिष्टत्वादिति मूलार्थः ननु न ङः सीतिसूत्रे पञ्चमीनिर्देशस्य परत्वङ्किन्तु सप्तमीनिर्देशस्यैवेति पञ्चमीनिर्देशो बलीयानित्यसङ्गतम्परत्वस्य तत्र हेतुत्वेन प्रतिपादनात्तच्च परत्वमत्र नास्तीत्यत आह तस्मिन्नितीति परिभाषाविषये कार्यकालपक्षेपि पाठकृतमेव परत्वन्नियामकन्तु संज्ञाशास्त्रवत्पदेशीयं साधकाभावात् किञ्च भाष्यकृता अधिकारो नाम त्रिप्रकारः कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति इत्यभिहितम् कश्चित्परिभाषारूप इति व्याख्या च कैयटेन कृता तेनाष्टाध्यायीपाठ एव तद्विषये नियामक इत्यभिहितम् ननु विरोधे सति परत्वेन व्यवस्था स एव तु कथमत आह डकारादिति तत्त्वम् आगमित्वम् असम्भवः कार्यित्वानिमित्तत्वयोर्युगपदसम्भवः निर्णय इति परत्वात्तस्मादित्यस्य प्रवृत्तौ निर्णयः फलित इत्यर्थः ननु यदि न

षष्ठीनिर्देशस्तर्हि प्रकृतिमात्रस्य प्रयोग एव न स्यादत आह षष्ठ्या इति अत एव चर्त्वस्यासिद्ध्या तकारस्य थकाराभावादेव धातोः कर्त्रर्थकसार्वधातुके शप् भवतीत्यर्थेनोभयोर्मध्ये ऽनवयवः शप् भवति यथा यथा डः सि धुड् भवतीत्यर्थे ऽनवयवो धुट् स्यादिति तु शङ्का न भवति आगमलिङ्गटकारोच्चारणवैयर्थ्यापत्तेरतस्तस्यागमत्वमेव एवञ्चागमित्वण्डकारस्य सकारस्य वेति सन्देहे उभयनिर्देश इत्यादिना सस्यागमित्वनिर्णयः कृतः तत्र ड इत्यस्य पञ्चम्यन्तत्वे पूर्वोक्तः सन्देहो भवति यदि ड इति षष्ठ्यन्तत्वदा न सन्देहः परन्तु धुडागम एव चेत् क्रियते तदा डकारात्पूर्वः सस्यादितीष्टरूपासिद्धिरित्याशयेन धुगिति कृत्वा डकारस्यागमित्वनिर्णयाय सूत्रानुपूर्व्याव्यत्यासङ्कृत्वा शङ्कते नान्विति धुक् डः सीतिन्यासे सकारात्पूर्वण्डकारस्योपादानेन विधेयानन्तरोपादानेन च डकारस्यागमित्वनिर्णयो भविष्यतीत्याशयेनानुपूर्व्याव्यत्यासो दर्शितः नन्वेवमपि शक्तावच्छेदकानुपूर्वीभेदात्सङ्ख्याया बोधानापत्तिरत आह परमार्थत इति एतेन पदानुपूर्वीभेदादिष्टार्थाप्रतीतिः स्यादिति शङ्का न कार्येति दर्शितम् न शक्तावच्छेदकभेद इति वाक्यानुपूर्वीभेदाभावादिति शेषः मूले ष्टुत्वेनेति धुट् इत्यादिः अत एव ष्टुत्वप्रतिषेधस्येष्टत्वादेव ननु तुगागमे चयो द्वितीया इति थकारस्यापत्तिरपि दोषः नचास्य पदान्तत्वान्न द्वितीयादेशापत्तिरिति वाच्यम् हलन्ते वक्ष्यमाणरीत्या पदान्तेपि क्वचित्प्रवृत्तेरिति चेन्न तुकि कृते द्वितीयष्टुत्वयोः प्रसक्तौ ष्टुत्वदृष्ट्या द्वितीयादेशस्यासिद्धतया ष्टुत्वस्यापत्तिरेवेत्याशयेनात एवेत्यवधारणस्य करणात् तुडागमे द्वितीयापत्तिरितित्वन्यत् केचित्तु चयो द्वितीया इत्यस्योष्मोदयम्प्रथमं स्पर्शमेके द्वितीयमाहुरपदान्तभाजमिति प्रातिशाख्यादपदान्त एव वेदे प्रवृत्त्या तदेकवाक्यतया लोकेपि व्यवस्थितविभाषाया आश्रयणेनापदान्त एव प्रवृत्तिरित्यभिप्रायेणात एवेत्यवधारणमित्याहुः अपरे तूष्मोदयं स्पर्शेन्द्वितीयमाहुरित्येव द्वितीयेत्वस्य प्रथमसापेक्षतया द्वितीयस्योपादानेन प्रथमलाभे प्रातिशाख्ये प्रथमपदमन्याख्यानिकप्रथमलाभार्थमिति नात्र द्वितीयादेशस्य प्रसक्तिरित्याशयेनावधारणमित्याहुः तुडेव कर्तुमुचित इति डः सस्य तुडिति न्यासः कार्य इत्याशयः ॥ अदश्रोततीत्यत्र धुडागमप्राप्तिः सकारसद्भाव एवेत्याशयेनाह श्रोततीति सादिः नकारजेत्याद्यभियुक्तोक्तेरिति शेषः श्चु-

त्वन्धुटीति वार्तिके धुटीत्युपादानस्य फलमाह श्चुत्वस्येति लाघवार्थ इति ङः सीतिसूत्रइवेत्यादिः अन्यथा उभयोरचारितार्थ्याभावे शिति चेति सप्तमीति शेषः ननु छान्दसत्वादेव विरप्शमिति भविष्यतीत्याशंकायामाह छान्दसार्थमपीति असिद्धत्वन्तु नेति सम्प्रति प्राप्तमसिद्धत्वन्नेत्यर्थः पक्षद्वये यथोद्देशकार्यकालभेदेन पक्षद्वये इदमेवेति अत्रैवकारेण यत्तु वदन्तीत्यादिना यदभिहितन्तन्न युक्तमित्यभिहितम् असिद्धत्वादिति असिद्धमित्यनेनासिद्धत्वादित्यर्थः इति भाव इति अत्रारुचिबीजन्तूक्तमेव यत्तु परममूले अछौ अचछाविति पद्यन्तत्पदचन्द्रिकास्थमनूदितमिति बोध्यमेतेन चयो द्वितीया इति छादेशविकल्पेन रूपद्वयाधिक्याच्चिन्त्यमिदमिति खण्डनकृदुक्तिः प्रत्युक्ता तुगादिविकल्पमात्राभिप्रायकत्वाद्वा ननु मूले ङम्प्रत्याहारइत्यस्यानन्तरं संज्ञायामिति कथनम्भ्रामकन्तत्र चेत्येतावन्मात्रेण प्रस्तुतार्थनिर्वाहादत आह ङमिति प्रत्याहाररूपायामिति ननु ङमुडित्यत्र टित्वन्दृश्यते तत्रोकारान्तस्य टित्वन्तु संज्ञाया इति संज्ञायामिति मूलमसङ्गतमिति चेन्न उकारस्योच्चारणार्थत्वात् एतेनोकारान्तस्य टित्वं सा च न संज्ञेति संज्ञायामित्यसङ्गतमिति कस्यचिदुक्तिः प्रत्युक्ता रत्नाकरादुपक्तिङ् खण्डयति न चेति अस्य नित्यत्वापत्तिरित्यत्रान्वयः विभाषामध्यइत्यपूर्वं वचनमिति शङ्काभिप्रायः ॥ भाष्यकारोक्तन्नापूर्ववचनङ्किन्तु न्यायसिद्धमित्याशयेन समाधत्ते स्वरितत्वेत्यादिना उक्तार्थमेव स्पष्टयति तस्मादिति पूर्वेति अव्यवहितेत्यादिः यत्तु सुगण्णीश इत्यत्र ङमुटः परत्वेन स्थानिवद्भावशङ्कैवासङ्गतेति तन्न प्रत्ययैषणान्नित्यर्थम्पञ्चमीसमासस्यावश्यकत्वात् अनित्यत्वादिति प्रविगणय्येति भाष्योदाहरणादस्यानित्यत्वादित्यर्थः यत्तु प्राचेत्यादिना ऽजादेः पदस्येति व्याख्यानस्य स्वयन्दूषयिष्यमाणत्वान्ङमुटः परादित्वमिति कथनं विरुध्यत इत्यत आह तत इति ङम इति पञ्चमीपदस्येत्यनुवृत्तं सामानाधिकरण्येन संबन्धाय पञ्चम्या विपरिणम्यते सा चानवकाशा अचीति सप्तमीतूत्तरत्र चरितार्थेति सा ऽत्र षष्ठ्यर्थ इति कल्प्यते एवञ्च ह्रस्वात्परो यो ङम् तदन्तं यत्पदन्तस्मात्परस्याच इत्यर्थ इत्याशयात् मूले णत्वप्रतिषेधार्थमिति पदान्तस्येति णत्वप्रतिषेधस्य सिध्यर्थमित्यर्थः ङम इत्यस्येति अस्यान्यथेत्यादिः षष्ठ्यन्तत्वमिति अस्मिन्पक्षे पदस्येत्यत्र विभक्तिविपरिणामो न कार्य इति लाघवम् एवमचीति सप्त-

स्यापि चरितार्थो ह्रस्वात्परस्य ङमः पदावयवस्याचि पर इति तु नोक्तद-
ण्डिनेत्यादौ दोषापत्तेः अस्मिन्पक्षे पदे इत्यनुवृत्तस्तद्विशेषणमचीति तेन त-
दादिविधिः यदि तु पदावयवस्य ह्रस्वात्परस्य ङमो ऽजादौ पद इत्यर्थ आ-
श्रीयते तदा दण्डिनेत्यत्र दोषः परिहर्तुं शक्य एव ननु नन्दनानन्नित्यत्र
सर्वथा दोष एव नन्दनशब्दो ल्युडन्तः अनन्शब्दस्त्वन्प्रकृतिकश्चत्रन्तः तेन
नन्दनशब्दस्य कर्मधारयः अत्र ङमन्तम्पदन्नन्नित्यनकार-
स्य परादिवद्भावेनाजादिपदमानान्नित्यत्र तस्मिन्परे ङमुट् स्यादिति चेन्न परम-
मूलोक्तव्याख्यानेप्यस्य दोषस्य सत्वात् यदि तूक्तदोषवारणाय पदस्येत्येतत्प-
दपदार्थे ङमन्ते पदे इत्येतत्पदपदार्थानिमित्तकपदत्वबुद्धेरपि विवक्षित इत्यु-
च्यते तदा तु न कोपि दोष इत्यवधेयम् मूले ऽत एवेति णत्वाभावार्थमेवेत्य-
र्थः ॥ कार्यकालेति पररीत्यैवेदम् एतस्य पाक्षिकमित्यस्य वैकल्पिकमित्यर्थ इ-
ति भ्रमस्तु न कार्यो विकल्पस्याप्रक्रान्तत्वात् अभाव एवेति स्पष्टञ्चेदमन्यत्र
यमुद्दिश्य य आगमो विहितः स आगमीयधर्मवैशिष्ट्येन गृह्यते तद्धर्मवै-
शिष्ट्येन गृह्यते स आगमीयेन शब्देन गृह्यते तेन शब्देनागमविशिष्टस्य ग्र-
हणमिति चार्थः आगमीयधर्मवैशिष्ट्येन गृह्यते आगमोपि तेन धर्मेण गृ-
ह्यत इत्यर्थे किम्मानामिति चेत् प्रकृतसूत्रस्थभाष्यग्रन्थ एवेति गृहाण तत्र हि
दण्डिना शकटिनेत्यत्र ङमुड्वारणाय पदादिग्रहणङ्कर्त्तव्यमिति वार्तिकस्य
पदादित्यस्यानुवृत्तिम्प्रदर्श्य एवमपि परमदण्डिना परमछत्रिणेत्यत्र प्राप्नो-
तीत्याशङ्कायामुत्तरपदत्वे चापदादिविधौ प्रतिषेध इति वचनेन दोषम्परि-
हृत्य एवमपि पदादित्यपूर्वङ्कर्त्तव्यं यद्धि तत्प्रकृतं प्राक्सुपि कृत्सनादि-
त्येवास्तु इति कथनानन्तरमेवास्तां ङम एवायं ङमुट् क्रियते कथम् पद-
स्येति वर्तते ङम इति च नैषा पञ्चमी का तर्हि सम्बन्धषष्ठी पदान्तस्य
ङमो ङमुट् भवतीति ह्रस्वादुत्तरस्य अचीति यदि ङम एव ङमुट् क्रियते कु-
र्वन्नास्ते रषाभ्यान्नोणः समानपदे इति णत्वम्प्राप्नोति पदान्तस्येति प्रति-
षेधो भविष्यति पदान्तस्येत्युच्यते नैषः पदान्तः पदान्तभक्तः पदान्तग्रह-
णेन ग्राहिष्यत इत्युक्तम् णत्वम्प्राप्नोतीति आगमनस्येत्यादिः अत्र पदा-
न्तभक्त इत्यादिना उक्तः परिभाषार्थो ध्वनितः अनुवृत्तस्य पदस्येत्यस्य
विशेष्यत्वाभिप्रायेण मूले व्याख्या कृता तथासति ह्रस्वादिति प्राधान्या-
त्पदस्य विशेषणं स्यादेवं ङम इति षष्ठ्यन्तमपि तस्य विशेषणं स्यात् एवं

सति यादृशः सूत्रार्थः सम्पन्नस्तमाह तर्हि हूस्वात्परस्य पदस्येति ङ्यन्त-स्येति शेषः तथासति पदस्य विशेष्यत्वाङ्गीकारे सति न प्रागुक्तः शङ्कक-कृतः महदनिष्टमिति अस्ति पराङात्मादेवदत्तरामानिति वदेत्यादावति-व्याप्तिः कुर्वन्नास्ते संन्नच्युत इत्यादावव्याप्तिः स्यादित्यर्थः तथाच लक्ष्या-नुरोधान्मूलोक्त एवार्थः कार्यः सर्वमिति शङ्कासमाधानावसरोक्तम् मूले अत एव उत्तरपदत्व इति वचनस्वीकारादेव तत् तादृशं व्याख्यानम् अ-नेन उत्तरपदत्व इति वचनस्यात्र संचारणेन इहैव परमदण्डिनावित्यादा-वेव ॥ अनुसर्तव्यत्वादिति एतेन वास्तविकम्परिभाषाश्रयणस्येदन्नलो-पात्मकदूषणापत्तिवारणमेव फलन्नतु नुट्प्राप्तिर्नलोपस्यति नुटो ऽसिद्ध-त्वादिति ध्वनितम् नचैवं सति यदि प्रतिपदोक्तो निपात उञ्चिति गृ-ह्यते तर्हि उत्तरार्थम्पदग्रहणमित्युञ्चिति सूत्रस्थपरममूलविरोधः पदे इत्य-स्य सम्बन्धं विनापि निर्वाहस्य मूले कृतत्वादिति वाच्यम् तदन्तं यत्पद-मित्यर्थसम्पादनार्थत्वथोक्तमित्याशयात् वस्तुतस्तु पदस्येत्यधिकारान्ङस इति पञ्चम्यन्तेन सामानाधिकरण्याद्विभक्तिविपरिणामेनोक्तार्थस्य लाभान्नेद-म्प्रयोजनङ्किन्तु विशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्व एव यस्मिन्विधि-रिति परिभाषाप्रवृत्त्या ऽजादेः पदस्येति व्याख्यानलाभार्थमेव पदे इत्यु-त्तरार्थमित्युक्तम् नचोत्तरपदत्व इति परिभाषया निर्वाहे ऽजादेः पदस्येति व्याख्यानन्निष्प्रयोजनमिति वाच्यम् माषकुम्भवापेनेत्यत्र पदव्यवायेपीति निषेधस्य सिध्यर्थं उत्तरपदस्य कार्यित्व एव तस्याः परिभाषायाः प्रवृत्ति-रित्यस्य स्वीकारात् एवमन्योपि तत्र विशेष इत्याह यदि त्विति कार्यित्व एवेति नच पदान्तत्वनिमित्तक इति पूर्वोक्तार्थेन माषकुम्भवापेनेत्यस्य निर्वाहे कार्यित्व एवेत्यस्य वैयर्थ्यमिति वाच्यम् किञ्चेत्यादिना भेदेनोपादानेन पक्षभेदसूचनात् नचैवमपि पूर्वदण्डिप्रिय इति त्रिपदबहुव्रीहावव्याप्तरतत्पु-रुषे दण्डिन्नित्यत्र नलोपार्थम्पदत्वमावश्यकन्तच्चोभयथोक्तनिषेधान्न सि-ध्यतीति वाच्यम् मध्यमपदत्वानाक्रान्तस्य ग्रहणमित्यस्य निवेशेनादोषात् नचैवम्पूर्वोक्तकार्यित्वनिवेशवैयर्थ्यमिति शङ्क्यम् प्रत्यासत्त्या तत्समासीय-मध्यमपदत्वानाक्रान्तत्वनिवेशेन माषकुम्भस्य वाप इति समासे कुम्भशब्द-स्य पदत्वसिध्यर्थं कार्यित्वनिवेशस्यावश्यकत्वात् प्रत्यासत्तिफलन्तु दधिमे-चिशयइत्यादावलुक्समासे सेकशब्दे कुत्वाभावः नचैवम्पूर्वदण्डिप्रिय इत्य-

त्रावान्तरतत्पुरुषीयमध्यमपदत्वानाक्रान्तत्वात्पुनरनुपपत्तिः तत्समासप्रयोजकैकार्थीभावप्रयोज्यसमासीयमध्यमपदत्वनिवेशात् नचैवंसति परमवाचेत्यादौ विशिष्टाभावादव्याप्तिरिति वाच्यम् मध्यमपदशब्देन तत्समासीयचरमपदपूर्वत्वानाक्रान्तस्य ग्रहणात् अतद्धित इत्यस्य प्रत्याख्यानाय पदव्यवाय इत्यस्य पदे व्यवाय इत्यर्थस्य करणेन माषकुम्भवापेनेत्यत्र वापशब्दस्य पदत्वसिद्ध्यर्थङ् कार्यित्वनिवेशस्यावश्यकत्वाच्च नच पदपदस्य पदत्वयोग्यपरत्वं शङ्क्यम् स्वशास्त्रसङ्केतितपदपदलक्षणापेक्षया शास्त्रान्तरसंकेतितोत्तरपदे लक्षणाया उचितत्वमित्याशयात् ॥ ननु सूत्रे ऽत्र ग्रहणसत्त्वे रुप्रकरण एव सम्बन्धो नतु ढो ढे लोप इत्यत्रेति लभ्यते इत्यनर्थकमित्यसङ्गतमत आह इदमिति उपलक्षणम् दोषान्तरस्यापीति शेषः तदाह प्रातीति इत्यर्थस्येति सूत्रोपात्तविधेयसम्बन्धे सति निराकांक्षप्रतिपत्तिर्भविष्यतीति भावः विधिपक्षे मूलानुक्तमत्र ग्रहणस्य प्रयोजनं स्वयमाह विधिपक्ष इति अत्र केचित् यद्यप्युभयत्र पाणिनितात्पर्यामिति लभ्यते तथापि विधित्वमेवोचितम् सकृद्विधेयबोधकशास्त्रस्य व्यापारेणाकाङ्क्षाशान्त्या लाघवादिति तन्नेत्याह वस्तुत इति परममूले रोरित्यस्यैतत्प्रकरणविधेयस्यानिन इत्यर्थः तेन लोपस्यापि सङ्ग्रहः इति सूत्रे कृतयोरिति एतेन यदुक्तमत्र ग्रहणस्य विधित्वपक्षे प्रयोजनन्तथाकल्पनेपि दोष एव यद्यपि वन उपसङ्ख्यानमिति छान्दसत्वतथापि विभाषेति लौकिकमपीति तत्र दोष एवेत्याशयः उत्तरत्रैवेति अत एवास्य सूत्रस्य मतुवसोरित्यनन्तरम्पाठः कृतः परशब्दस्य श्रवणेन दिग्योगलक्षणा पञ्चमीति भ्रान्तिवारणायाह दिग्योगेति इति न्यासेनेति नचैवन्न्यासे आतो टि नित्यमित्यत्राप्युभयसम्बन्धापत्तिः नचेष्टापत्तिः महां इन्द्र इत्यस्मिन्तदुदाहरणे ऽनुस्वारानुपलभादिति वाच्यम् एकदेशे स्वरितत्वप्रतिज्ञयेष्टसिद्धेः अवधारणपरत्वे आगमलिङ्गस्य टित्वकित्वादेरभावे परशब्द एवागमलिङ्गमिति लभ्यते तच्चासम्भविपूर्वशब्दस्याप्यागमलिङ्गस्य दर्शनादत आह प्रसिद्धावेवेति ॥ नन्वेकयोगनिर्दिष्टानामिति न्यायेनावसानपदसम्बन्धोपि स्यादत आह एकदेश इति ननु संहिताधिकारादेव तत्र न भविष्यतीत्यत आह पूर्वेणेति नत्वाकडारीयत्वाद्बाध्यबाधकभावः संज्ञिभेदात् एतेन पूर्वमादाय सन्निकर्षसत्वन्ध्वनितम् ॥ अत एव उक्तरीत्या तयोः समावेशस्येष्टत्वादेव सङ्गच्छत इति अन्यथा तो-

लीत्यादौ पुनस्तस्य सम्बन्धे मण्डूकप्लुत्यापत्तिरिति भावः अत एव अयोगवाहानामकारोपरि पाठादेव दुर्वारमिति नचैवं सति नुम्ग्रहणवैयर्थ्यमिति वाच्यम् सुहिन्सु इत्यत्रानिष्टसम्पादकतया तस्य चारितार्थ्यसम्भवात् आदिशब्दार्थ इति एतेनानिष्टापत्तौ तात्पर्यमिति भावः अत्र पूर्वसवर्णदीर्घस्य प्राप्तिः द्वितीयेत्वचत्वेपि द्वितीयात्वविरहेण न दीर्घस्य प्राप्तिः वस्तुतस्तु प्रथमेपि यणादेशस्यैव प्राप्तिर्नतु दीर्घस्य अनिधित्वेन स्थानिवद्भावाभावात् अत एव अनित्यत्वादेव झलां जश् झशीति झलाञ्जशोन्त इत्येतद्दृष्ट्या ऽनुस्वारस्यासिद्धत्वात्तत्यागः यदि जश्त्वं स्यात्तदा ऽयोगवाहा विज्ञेया आश्रयस्थानभागिन इति शिक्षोक्तरीत्या तालव्यत्वेन जकारः स्यात् कश्चिदिति अनेनारुचिः सूचिता तथाहि अट्कुप्वाङितिसूत्रस्थनुम्ग्रहणस्य प्रत्याख्यानेन ज्ञापकान्तराभावेन चानित्यत्वे न मानम् भाष्यानुक्तञ्चानित्यत्वम् झलाञ्जशोति जश्त्वापत्तिस्तु अभ्यासे चर्चेतिसूत्रसान्निध्येनानन्त्यझल एव ग्रहणेन वारयितुं शक्येति एकस्मिन् लक्ष्ये एकस्य शास्त्रस्य पुनः प्रवृत्तौ लक्ष्ये लक्षणमिति न्यायविरोध इत्याह एकस्येति एकेन अचो रहेत्यनेन अन्येन यणो मय इत्यनेन तत् व्याख्यादर्शोक्तसामानाधिकरण्यम् एतच्च असाङ्गत्यञ्च सिद्धान्तरीत्या ऽऽह यदेति सूतेः सप्रसवे पुमानिति तत्रोक्तम् सूतेः सस्यप् इति तदर्थः मूलकारोक्तं योजयति पातेरिति ख्याञ्आदेशेनेति नापूर्वं वचनं किन्त्वर्थसिद्धमिति प्रतिपादयति मूले आदेशो हीत्यादिना बहुलन्तण्यन्नेत्यादि तणिति संज्ञाछन्दसोः संज्ञा ॥ बहुलग्रहणस्य प्रयोजनमाह अन्नेत्यादि अत्रादेः क्ते जग्ध्यादेशाभावः वधकेत्वत्र हन्तेर्ण्वुल् अनेन वधादेशः गात्रेत्यत्रेणो गादेशः विचक्षणे ख्याआदेशाभावः अजिरे व्यादेशाभावो बोध्यः यत्त्वस्यासिद्धतयेति तद्विधायकशास्त्रस्यासिद्धतयेत्यर्थः एवञ्च सस्थानशब्दस्य संज्ञारूपत्वे च उच्यते इति संज्ञाशब्दस्थले शब्दस्वरूपस्यैव प्रवृत्तिनिमित्तत्वादिति भावः एवञ्च तथा माधवोक्तौ च ख्यातेः स्वतन्त्रस्येति शेषः त्रायेचस्य प्राप्तेरिति एवञ्च मूले परस्मैपदग्रहणमात्मनेपदस्याप्युपलक्षणम् अभिमान इति उपदेशे यो हि तदन्तत्वानपायेनात्मनेपदस्य दुर्वारत्वात् अत एव उक्ताशयादेव कथन्तर्हि त्राहिमामित्यस्य सिद्धिरत आह आर्षमिति मान्तानामेवेति भूतपूर्वेत्यादिः लोपश्चेति चो ह्यर्थे एवञ्च विसर्गस्य लोपे च अयोगवाहानां वर्णसमाम्नाये

पाठे ऽयमेव निर्देशो ज्ञापक इति बोध्यम् नच जिव्हामूलीयस्यैव पाठे ज्ञापक इति वाच्यम् एकदेशानुमत्या सर्वेषान्तथात्वे ज्ञापकत्वसम्भवात् ॥ तयोः जिव्हामूलीयोपध्मानीययोः तौ विना कवर्गपवर्गौ विना अभावेन असम्भवेन नान्तरयिकामिति अन्तराभवमन्तरीयम् अन्तरीयमेवान्तरीयम् नित्यसमस्तम् अन्तरा तदभाववति भवं वर्तमानन्नञा तदभिन्नो बोध्यत इति तदभाववद्वृत्तिभिन्नस्वरूपव्याप्तिलाभ इति भावः तयोः कुप्वोः तन्मात्रे जिव्हामूलीयोपध्मानीयमात्रे तयोः समुदितयोः ननु समुदायाद्विधेयसमर्पकविभक्तिसत्वेन समुदायस्यैव विधेयत्वङ् कुतो नेत्यत आह व्याख्यानादिति लक्ष्यदर्शनमूलकादिति शेषः प्राचां व्याख्याने बीजमाह निपातानामिति क्षमते दोषम्परिहरति चानुकृष्टेति मूले कान् कानिति आद्यङ् किमृशब्दप्रकृतिकद्वितीयान्तम् द्वितीयन्तु कुत्सितार्थककशब्दप्रकृतिकद्वितीयान्तम् मूले गणपाठेति अत एव निपातानामव्ययत्वेपि त्यब् न एतेन समुदायस्य गणे पाठेन ननु चर्त्वशास्त्रस्यासिद्धतया कथमत्र सन्निपातपरिभाषाप्रवृत्तिरत आह असिद्धविषयेपीति प्रवर्तत इति उपजीव्यविरोधस्यान्याय्यत्वमिति लोकन्यायसिद्धत्वन्तस्या इत्यसिद्धत्वविषये प्रवृत्तौ बोधकाभाव इति भावः इदञ्च चर्त्वस्यासिद्धत्वात्कथं सन्निपातपरिभाषाप्रवृत्तिरिति शङ्कामात्रेण वस्तुतस्त्वस्यात्र न प्राप्तिरित्याह यद्वेति ननु पदान्ताद्वेति विकल्पविषयतासत्वेन तुगभावेन सौत्रनिर्देशस्योपपत्तौ कथं ज्ञापकतेत्यत आह वैकल्पिकेष्वपीति इति श्रीमद्ब्रह्मप्रकाशिकायां हल्सन्धिविवरणम् ॥

ननु शर्परइति सूत्रे विसर्जनीयपदाभावे कुप्वोरिति सूत्रे चाद्विसर्जनीय इत्यस्य कथं लाभ इत्यत आह कुप्वोरिति चकारेण नेत्यस्यानुकर्षः ॥ तत्राभावस्य प्रतियोगिसाकाङ्क्षत्वात्पूर्वसूत्रे यो निषेध प्रतियोगित्वेन कल्पितस्तस्यैवात्रापि प्रतियोगित्वमेवञ्च स्थानिनो विसर्गस्यैवावस्थानामिति भावः ननु नेत्यनेन विसर्जनीयस्य स्थाने प्राप्तं विकारमात्रम्बाध्यतामत आह सत्वनिषेध इति येन नाप्राप्तिन्यायेनास्य सत्वमात्रनिषेधकता स्यादिति भावः विहितस्येति एतेन विसर्जनीयस्य स इति सूत्रप्राप्तियोग्यता सूचिता ॥ तत्सामर्थ्यात् विसर्गस्य विसर्गविधानसामर्थ्यात् चोद्यर्थे अनेन शर्पर इति सूत्रेण तस्यैव खरवसानयोरिति सूत्रविहितविसर्जनीयस्यैव प्रत्यापत्तावपीति प्राप्तस्य विकारस्य निरसनपूर्वकस्वस्वरूपावस्थानेपीत्यर्थः खण्डनकु-

दुक्तन्दोषम्परिहरति ऐतेनेति उक्तव्याख्यानेनेत्यर्थः एतद्विहितस्य शर्पर इति सूत्रविहितस्य तौ जिव्हामूलीयोपध्मानीयौ एतयोः उक्तयोः स्यादिति शर्पर इति सूत्रविहितस्य तु न सत्वप्राप्तिरस्यासिद्धत्वादिति भावः परास्तमिति अनेन नापूर्व आदेशः क्रियते किन्तु खरवसानयोरिति विहितस्यैवावस्थानम्बोध्यते एवञ्च कुप्वोरित्यस्य विसर्जनीयस्य स इत्यस्य च खरवसानयोरिति विहितविसर्गादेशत्वमेवेति तदुक्तम्परास्तमित्यर्थः अर्थाधिकारेणेति प्रकृते शब्दाधिकारे मानाभाव इति भावः आदेशाच्चेति कुप्वोरिति सूत्रेणेति शेषः एवञ्च कुप्वोरिति सूत्रं सत्वापवाद इति यद्यपि तथापि शर्पर इत्यस्य सूत्रस्य कुप्वोरित्यत्रानुवृत्तिङ् कृत्वा वाक्यभेदेन शर्परयोः कुप्वोर्विसर्जनीयस्य विसर्जनीय इती व्याख्येयमिति न कोपि दोषः लाघवानुरोधिनीमन्यकृतां शङ्कान्निरस्यति विसर्जनीयस्येति सत्वविकल्पेनेति स इत्यस्यैव विधेयसमर्पकस्य पूर्वत्र सत्त्वादिति भावः सिद्धावपि हरिः शेते हरिश्शेते इत्यादेरित्यादिः अनुवृत्त्येति अशर्परयोः कुप्वोरिति व्याख्यानेनेति शेषः अनापत्तेरिति विधेयबोधकविसर्जनीयपदाभावादिति शेषः नच कुप्वोरिति सूत्रे चकारो न पाठ्यः विसर्जनीय इत्येव पठनीयत्वावतापि लाघवमेवेति वाच्यम् अशर्पर इत्यत्र प्रसज्ये प्रतिषेधे वाक्यभेदस्यापत्तिः पर्युदासे तु हल्परयोः कुप्वोरित्यर्थस्यापत्तिरित्यनिष्टापत्तेः एवं मध्यपठितस्य वा शरीत्यस्यापि हल्परशर्य्येव प्रवृत्त्यापत्तावनिष्टापत्तिरिति यथाश्रुतस्यैवोचितत्वात् ॥ ननु खरीत्यस्यानुवृत्तिपक्षे क्लेशमात्राभिधानम्मूलकारकृतमसङ्गतम् यूस्तरेत्यत्र दोषस्य स्फुटत्वादत आह किञ्चेति आदिना यशः पठतीत्यादेः सङ्ग्रहः सुतरामिति मण्डूकप्लुतिप्रयुक्तम्तूक्त एव कुप्वोरिति सूत्रे श्रूयमाणा सप्तमी औपश्लेषिकाधारे ऽस्ति सो ऽपदादाविति सूत्रे तु सा निर्धारणे इति कल्पनात्कुप्वोरित्यस्यानुवृत्त्या च सुतरामित्यर्थः मूले ऽन्यस्येति प्रत्ययान्यस्येत्यर्थः ननु सुबुत्पत्तेः प्राक्समासे उरःकेणेत्यत्रान्यस्यापि सम्भवोस्तीतीदमसङ्गतमत आह अयम्भाव इति नन्वादिग्रहणमपदाद्योः कुप्वोरित्यर्थस्य स्पष्टप्रतिपत्त्यर्थमास्त्वत्यत आह तल्लब्धेति सामर्थ्यलब्धेत्यर्थः उरःकेणेत्येतदवयवककारस्य तु यदि सुबुत्पत्त्यनन्तरं समासः स्यात्तदा पदावयवत्वं स्यादिति सम्भावनया न तत्त्वमिति भावः नच पाशवादीनामपि तद्धितान्तप्रातिपदिकावयवत्वमस्त्येवेति ते-

षामसङ्ग्रहापत्तिरिति वाच्यम् एवंसति वैयर्थ्यमिति तदारम्भसामर्थ्येन तद्धितान्तप्रातिपदिकभिन्नं यत्पदत्वयोग्यम्प्रातिपदिकन्तदनवयवस्य ग्रहणमित्याशयात् नन्वीषदसमाप्त्याद्यन्वयाय यदि शक्तिमत्परत्वङ्कल्प्यते तदा कथमव्ययत्वमत आह अव्ययत्वमिति ननु रोरेवेति नियमेन षत्ववत्सत्वव्यावृत्तिरपीष्टेति तन्मात्रोपादाने न्यूनतेत्यत आह सत्वमिति नन्विदुदुपधेति बहुव्रीहिसमासे ऽन्यपदार्थत्वेन विसर्गस्योपस्थितत्वात्कथं समुदायस्य लाभो ऽत आह अलो ऽन्त्यादितीति एवञ्च विसर्गापेक्षया समुदायस्य शीघ्रोपस्थितिकत्वेन पदार्थोपस्थितिकाले तस्यैवान्यपदार्थत्वं कल्पनीयमिति भावः लाघवादाह इदुदुपधस्येति अन्य इत्यरुचिस्तु पदाधिकारस्य विशेषणत्वमित्यर्थप्रतिपादकभाष्यविरोध इति लक्षणामकृत्वा सामानाधिकरण्येन सम्बन्धे वक्ष्यमाणदोषापत्तिरत आह व्याख्यादर्शोक्तेति॥ रोरसुप्त्वेनेति अतिदेशाप्रवृत्तावित्यादिः खण्डनकारादुद्धाक्तिङ्खण्डयितुं शङ्कते नन्विति अतिदेशेन प्रत्ययलक्षणेन एवञ्चैतद्दृष्ट्या खरवसानयोरित्यस्यासिद्धतया ऽतिदेशस्य प्रवृत्तिर्न स्यादिति भावः लौकिकेन न्यायेन सिद्ध्या शङ्कान्निराचष्टे नचेति समत्वादिति॥ रुत्वस्य सिध्यर्थम्प्रवृत्तं यत्पदत्वन्तस्य तेन न्यायेन रेफान्तेपि लाभस्य तुल्यत्वादित्यर्थः एवञ्च ज्ञापकानुपयोग इति तात्पर्यम् अणुरपि विशेषो ऽध्यवसायकर इत्याशयिकामाशङ्कान्निराचष्टे नचाग्निरिति आदेशस्य रुत्वस्य अतिदेशलभ्येति परम्परयेत्यादिः कार्यस्य विसर्गस्य अकिञ्चित्करत्वादिति यद्यतिदेशस्यापेक्षा नभवेत्तदा ज्ञापकानुसरणाभावो न्याय्यः स्यात्तथा तु नास्तीति भावः रुत्वासिध्येति पदसंज्ञाप्रयोजकशास्त्रदृष्ट्येत्यादिः एवञ्च ज्ञापकवर्णनपरग्रन्थासङ्गतिरिति मूलकारोक्तिमपि खण्डयति किञ्चेति सूत्रे भाष्य इति स्फुटीभविष्यति तत्रैवैतत् एवं सामानाधिकरण्ये व्याख्यादर्शोक्तसामानाधिकरण्ये नचासोरिति न्यासेपि पदलाघवाभाव इति वाच्यम् सूत्रोपात्तस्य प्रत्ययपदस्य प्रत्ययपदावच्छिन्ने शक्तस्य सुमात्रपरत्वे लक्षणायां ज्ञानगौरवम् असोरिति न्यासे तु न लक्षणेति लाघवस्य सत्वात् ननु न मया लक्षणा ऽऽश्रीयते किन्तु शिवमात्रस्य पूजनकाले चैत्रो देवम्पूजयतीति वाक्यप्रयोगे कृते प्रकरणेन देवत्वेन देवविशेषबोधकता यथा देवशब्दस्य तथात्रत्यप्रत्ययपदस्यापि भ-

विष्यतीत्यत आह किञ्चैवमित्यमिति एवम् उक्तरीत्या सामानाधिकरण्याङ्गीकारे अनेन षत्वस्येति व्युत्पत्तिपक्षेपि विसर्गस्य प्रत्ययभिन्नत्वसत्वात् एवम् उक्तो ऽर्थः एतेन नित्यं समास इति सूत्रस्थमनुत्तरपदस्थस्येत्युत्तरार्थमिति कल्पनायामपि भाष्यविरोधः स्फुट एवेति दर्शितम् तेन यद्यर्थकस्याथशब्दस्योपादानेन अस्य सूचितमित्यत्रान्वयः ॥ षत्वासिद्धये आदेशप्रत्यययोरिति सूत्रविहितस्य षत्वस्य सिद्धये नत्वसाविति अव्युत्पत्तिपक्ष इत्यर्थः एवञ्चेसुसन्ते नित्यषत्वाप्राप्तिरेव फलिता सा त्वद्रीत्या ऽयुक्ता स्यादिति भावः इदम्पररीत्या अव्युत्पत्तिपक्ष एवेति पक्षे तु बाहुलकत्वेन षत्वस्य सिद्धिरित्यन्तो ऽनुसन्धेयम् तस्मात् उक्तभाष्याक्षरस्वारस्यात् प्रत्ययसंम्बन्धीति प्रत्ययावयवभिन्नस्येत्यर्थः एतेनाग्निः करोतीत्यत्र प्रत्ययसम्बन्धिप्रकृतिप्रत्ययसमुदायभेदस्य विसर्गे सत्वादोषो ऽस्त्येवेति परास्तम् अत एव प्रत्ययावयवभिन्नस्येत्यर्थाङ्गीकारादेव न दोष इति न षत्वापत्तिरूपो दोष इत्यर्थः अन्यथा प्रत्ययत्वपर्याप्त्यधिकरणसमुदायभेदस्य विसर्गे सत्वादोषः स्यादेवेति भावः आदिना पेचुः काष्ठैरित्यस्य सङ्ग्रहः उक्तमेवार्थन्दाढ्यार्य पुनराह नित्यं समास इतीति अनुत्तरपदस्थस्येत्यस्योत्तरार्थत्वमुक्तमेवात आह कस्कादिष्विति ननु कस्कादिषु सर्पिष्कुण्डिकाशब्दपाठस्यापि व्यपेक्षायान्नित्यार्थतया चारितार्थ्यमस्त्येवेत्यत आह चेति एतेनोक्तभाष्यपरिग्रहः एतद्ग्रन्थेति मौलग्रन्थेत्यर्थः तथाच प्रत्ययपदस्य प्रत्ययावयवलक्षणया सामानाधिकरण्येनान्वय एवोचित इति सिद्धम् वस्तुतस्तु प्रत्ययावयवस्य नेति प्रसज्यप्रतिषेध एवोचितः अत एवाग्निः करोतीत्यत्र प्रतिषेधात्मककार्ये कर्तव्ये स्थानिवद्भावस्य प्रवृत्तिरपि सूपपादा अत एव अचः परस्मिन्नित्यस्य त्रिपाद्यामप्रवृत्तेरेव इच्त्वासिद्धिरिति अन्यथा ऽछोपस्य स्थानिवत्वात्तन्न स्यात् ननु नपदान्तेति निषेधेन सिद्धिः निषेधविधायकसूत्रदृष्ट्या त्रिपाद्या असिद्धत्वन्तु वक्तुमशक्यम् द्विर्वचनादिग्रहणात् अत एव नपदान्तसूत्रभाष्ये वेतस्वानित्यत्र रुत्वप्राप्तिमाशङ्क्य पदे ऽन्त इति सप्तमीसमासेन समाहितम् नच सुबुत्पत्तेः प्राक्समासे परस्य पदत्वाभावेन कथमत्र निषेधस्य प्राप्तिः धनक्रीतेत्याद्यर्थङ्कारकांशे गतिकारकानामिति वचनस्य क्वचिदप्रवृत्तिस्वीकारात् अत एव गोचेत्यादावडादेशो न गोचेत्यादिसिध्यर्थं पद इत्यस्य पदत्वयोग्यपरतायां आवश्य-

कत्वाच्चेत्यत आह आदाविति तेन राज्ञ इत्यादिसङ्ग्रहः ॥ एतच्चेति अचः परस्मिन्नित्यस्य त्रिपाद्यामप्रवृत्तिरित्येतच्चेत्यर्थः अयञ्च प्रपञ्चितपदानुवादः वस्तुतो नपदान्तसूत्रे द्विर्वचनादिग्रहणेन वतिघटितान्यातिदेशानात्रिपाद्याम्प्रवृत्तिर्भवत्येव अतएवामी क्षीरपेणेत्यादिसिद्धिरिति स्फुटीभविष्यति द्विर्वचनादिग्रहणन्तु न्यायसिद्धानुवादः तस्य दोष इति तु वाचनिकमिति बोध्यम् मूले नन्वेवमिति एवम् प्रत्ययभिन्नस्येति रीत्या सामानाधिकरण्येन व्याख्याने षत्वं स्यादिति विसर्गस्य प्रत्ययभिन्नत्वादिति भावः अत्रैवमित्युपादानेन प्रत्ययपदस्य प्रत्ययसम्बन्धिनि लक्षणा पक्षे नायन्दोष इति भ्रान्तिः स्यात्तन्निवारणायाह सिद्धान्तेति अकारः असो ऽवयवाकारः समुदायनिवेशितत्वात् असिति समुदायपर्याप्तत्वात् तदादेशस्य अकारादेशस्य अस्याकारादेशत्वेपि द्वयोः षष्ठीनिर्दिष्टयोरिति न्यायेन ऋवर्णादेशत्वमपीति रपरत्वस्य सिद्धिः सर्वे सर्वपदादेशा इति न्यायानुसारिणीमाशङ्कान्निराचष्टे नचान्तादीति प्रत्ययतयेति तदवयवसस्य प्रत्ययावयवतया तदादेशस्य विसर्गस्य तत्वसत्वेनेति शेषः ननु स्थानिवत्सूत्रस्य प्रवृत्तिरूपपादितेति तेनोरसित्यस्य प्रत्ययत्वम्भविष्यतीत्यत आह स्थानिवत्वेनेति नन्वुपात्तस्य स्थानिनो ऽकारस्याप्रत्ययत्वेपि सकारनिष्ठम्प्रत्ययसम्बन्धित्वमतिदेशेन विसर्गेस्तित्वत्यत आह प्रत्ययसम्बन्धित्वमिति मातृअसित्यस्येति अस्मिन्पक्षे ऋअसिति समुदायो नार्थबोधक इति स परित्यक्तः ॥ एतदेव उपपादितपदार्थसत्वमेव अत्रैवकारेण कैयटेन लुप्यते त्र प्रत्यय इति प्रतीकमुपादाय स सन्निधावकारेण प्रत्ययत्वन्न लब्धं समुदायनिष्ठत्वात्तस्येति कुतस्तदादेशे तत् उक्ते कृते ऽवशिष्टस्सस्तु प्रत्ययसंज्ञोपि लुप्त इति भाव इति यदुक्तन्तन्न युक्तमिति ध्वनितम् सकारसन्निधावकारे यद्यपि न प्रत्ययत्वन्तथापि तस्मिन् लुप्ते ऽवशिष्टे ऽकारे प्रत्ययत्वस्थानपायात् ननु रात्सस्येत्यनेन सकारस्य लोपो विधीयते नतु विसर्जनीयस्येति लुप्यते ऽत्र प्रत्ययविसर्जनीयो रात्सस्येति भाष्यस्य कथं योजनेत्यत आह लुप्यतेत्रेत्यादेरिति यः विसर्जनीयः प्रत्ययस्यैव सस्यैव ज्ञापनद्वारेति एवञ्च मुख्यं ज्ञाप्यमिदमेव षत्वन्नेति तु फलितार्थकथनमिति ध्वनितम् अत एव त्रिपाद्यामन्तादिवद्भावस्य प्रवृत्तिस्वीकारादेव एवञ्चोरसित्यस्य परादिवद्भावेन प्रत्ययतया सकारे गते ऽप्युरित्यस्य स्थानिवद्भावेन प्रत्ययतया तदादेशस्य

विसर्गान्तस्योरित्यस्यापि प्रत्ययत्वमिति विसर्गे प्रत्ययावयवत्वमर्थादेव लब्धमिति तदानयनार्थन्नातिदेशापेक्षेति भावः एकाजुत्तरपदत्वमिति कर्मधारयः अधीनामिति ननु स्थानिवद्भावेन अशास्त्रीयत्वात् एतेनान्तादिवत्सूत्रं स्थानिवद्भावेन गतार्थमिति प्राचोक्तमपास्तमिति सूचितम् पे इत्यस्यैकाच्त्वं यद्यपि स्वतः सिद्धन्तथाप्युत्तरपदत्वस्याशास्त्रीयत्वेन तदलाभादित्थमुक्तम् हरदत्ताभिमतं वैयधिकरण्यमुपपादयति प्रत्ययस्येत्यादिना अगत्या कविभिः कृतमित्यादौ गत्यन्तराभावेन अभिमान इति प्रत्ययपदस्य लक्षणया प्रत्ययसम्बन्धिबोधकत्वन्तद्धर्मावच्छिन्नप्रतियोगिताकभेदवतो ऽभेदेन विसर्गविशेषणत्वमेतेन सर्वेष्टसिद्धौ क्लेशानुसरणं व्यर्थमिति भावः लेशतोपीति स्वस्य तस्य च मते प्रत्ययपदम्प्रत्ययसम्बन्धिपरम् एतावानेव विशेषः स्वमते सामानाधिकरण्येन सम्बन्धस्तन्मते वैयधिकरण्येन फलञ्च तुल्यम् व्याख्यादर्शोक्तमते तु प्रत्ययपदस्य न लक्षणा कविभिरित्यत्र दोषावारणञ्चेति तदादराभाव इति भावः ॥ अनेन अतीवेतिकथनेन अलमिति उक्तदोषगणापत्या स्वीयव्याख्यैवोचितेति सूचितम् एकादेशशास्त्रमुकारादेशे निमित्तन्नतु विसर्ग इत्येकादेशशास्त्रनिमित्तकस्येत्यनुपपन्नमत आह एकादेशेति प्रचुर इति इदुदुपधेति सूत्रोरण्रपरसूत्रयोरेवन्दर्शनभाष्ये ऽस्तीत्यस्य प्रचुरत्वम् तादृशपाठसाध्यफलन्त्वन्यथासिद्धमित्याह ओषधीस्कृधीत्यादाविति ओषधिशब्दाच्छसि पूर्वसवर्णदीर्घे शसः सकारस्य रुत्वविसर्गयोः कः करादित्यस्य प्राप्तिः इति षत्वेति इति सूत्रप्राप्तषत्वेत्यर्थः तत्रेणः षः स इति च सम्बध्यते कः प्रभृतिषु परेषु अदितिशब्दसम्बन्धिभिन्नस्य विसर्गस्येणः परस्य षो ऽन्यस्य तु स इति कस्कादिषु चेति सूत्रस्येव तदर्थात्प्राप्तिः षत्वस्य अन्यथा परमूले तस्य सूत्रस्य सकारविधायकत्वेन व्याख्यातत्वादसङ्गतिः स्यात् तत्फलम् पञ्चम्यन्तपाठफलम् चो ऽप्यर्थे मूले परमूले तस्य फलस्य छान्दसत्वादिति सकारघटितस्य षकाराभावदर्शनविषयप्रयोगस्य छान्दसत्वादित्यर्थः छन्दसीति एवञ्चेण इत्यस्य कस्कादिषु चेत्येतत्पर्यन्तमेव सम्बन्धो भवतीति तेन सूत्रेण सकार एव विधीयत इति भावः दिगीति दिगर्थस्तु पञ्चम्यन्तपाठो भाष्यसम्मत एवोचितः अत एवापदान्तस्य मूर्द्धन्य इति सूत्रे प्रकृतं षग्रहणमनुवर्तते तेनैव सिद्धे मूर्द्धन्यपदाङ्किमर्थमिति विचारे च प्रकृतमिणः ष इति भाष्यं सङ्गच्छत इति

षग्रहणस्य कः करादिति सूत्रे सम्बन्धो भवत्येवेति परममूले तु कः करादितिसूत्रस्य सकारादेशमात्रविधायकत्वेन व्याख्यानं ह्रस्वानुसारेण अत एव वृत्तौ आदितिः करदित्यत्र सकारादेशो नेत्युक्तम् हरदत्तेन तु पूर्वोक्तापदान्तस्येति सूत्रस्थभाष्यदर्शनेन सकारादेश इति प्रतीकमुपादाय षत्वस्याप्युपलक्षणमेतदिति व्याख्यातम् दृष्टसाहचर्येति लोकादाविल्यादिः साहचर्यसम्बन्धस्य एकस्मिन्कार्ये परस्परसापेक्षत्वरूपसम्बन्धस्य नियामकत्वमिति युगपदेवोभयोः प्रसिद्धार्थबोधकत्वमित्यर्थः संयोगो विप्रयोगश्चेत्यादिना हरिणा ऽयमर्थः सङ्गृहीतस्तदर्थस्तदुदाहरणानि चान्यत्र स्पष्टानि ॥ नचेति नहीत्यर्थः एषाम् सुजन्तद्विरादीनाम् अयम्परिः अनियतार्थकः कर्मप्रवचनीयः परिः दृष्टापचारः दृष्टव्यभिचारः व्यभिचारमेवाह वर्जने चावर्जनेति अवर्जने लक्षणादौ अपशब्द इति अपेति शब्द इत्यर्थः सहायेनार्थ इति सहायेन प्रयोजनमित्यर्थः अक्षतेरिति प्रकृतसूत्रे द्वयोः सुजन्तयोः प्रयोगेण चतुःशब्दस्य सुजन्तस्य तयोः सदृशत्वेन तस्यैव ग्रहणम्भविष्यतीति मूलासङ्गतिरूपाक्षतिर्नास्तीत्यर्थः ननु हरितात्पर्यमन्यदेवास्ति भवता त्वन्यथैव व्याख्यायत इत्यत आह परिभाषायामिति सहचरितासहचरितयोरिति परिभाषायामित्यर्थः सदृशयोरेवेति अत एव समानशीलव्यसनेषु सख्यमिति लोके प्रसिद्धिरस्तीति भावः सदृशयोरेव सदृशार्थकशब्दयोरेव सहविवक्षेति धवखदिरावित्यादौ छेदनयोग्यत्वेन सादृश्यस्य सत्वात्सा एवमन्यत्र यथायथमूहनीयम् तयोरेव सदृशयोरेव यो हेतौ दिगिति दिगर्थस्तु हरिकारिकाव्याख्यानावसरे पञ्चम्यपाङ्परिभिरिति सूत्रं साहचर्ये उदाहृतं हेलाराजादिभिः वर्जनार्थापशब्दसाहचर्यात्तदर्थकस्यैव परेः कर्मप्रवचनीयस्य ग्रहणमिति चोक्तमिति तद्ग्रन्थानुसारि मूलमिति ननु इसुसोरिति सूत्रे इसः प्रत्ययस्यार्थवतश्च ग्रहणमित्येतदुणादयो व्युत्पन्नानीति पक्षे सम्भवदुक्तिकत्वव्युत्पत्तिपक्षे ऽत आह प्रतिपदोक्तस्येति द्विस्त्रिस्शब्दस्यावयवश उत्पन्नत्वेनैतयोरिस्शब्दो लाक्षणिक इति भावः भाष्यप्रामाण्येनेति प्रकृतसूत्रायनेयीति सूत्रभाष्यप्रामाण्येनेत्यर्थः अत्र चतुःशब्दे वस्तुतस्तु शास्त्रे इत्यर्थः अत्र मानन्त्वतः क्रकमीति सूत्रे कंसग्रहणम् ॥ अत एव अव्युत्पत्तिपक्षाश्रयणादेव आदिना चतुष्पञ्चाशदित्यस्य प्रयोगस्य सङ्ग्रहः तत्त्वमिति इदुदुपधस्येति सूत्रे ऽप्रत्ययपदस्य प्रत्ययाभि-

न्नार्थकत्वेन व्याख्यातृव्याख्यादर्शोक्तरीत्या ऽव्यपेक्षायान्नित्यं षत्वन्तेनैव सिद्धम् प्रत्ययपदस्य लक्षणया प्रत्ययसंबन्धिपरत्वमिति सिद्धान्तिमते तु तत्र नित्यषत्वाप्राप्त्या विकल्प एव असमासे व्यपेक्षाविरहेपीति तूभयमतेपीति तत्त्वमित्यर्थः परमसर्पिःकुण्डिकेतीति अत्र षत्वादर्शनेन तदुक्तिर्भाष्यविरुद्धेति स्पष्टमेवेति भावः मूले ऽयः सहितेति प्रतीकन्धृत्वा नत्वयसो विकार इत्युक्तन्तद्ग्रन्थादयस्कुशेत्यत्र न तथा विग्रहः किन्त्वयः सहितेत्येवेति प्रतीयते सा च न युक्ता कुशापदस्य टाबन्तस्यैवोभयथा समस्तत्वेन जानपदेति ङीष्प्रसङ्गादिति हेत्वसङ्गतिरत आह आबन्तेति आबन्तं यत्सूत्रं ऽतः कृकमीत्यत्र कुशेति तदनुवादः परमसूत्रे कुशेति कृतो विशेषबोधनाय न त्वयसो विकार इत्यर्थः कुशशब्दार्थस्य च विशेषत्वज्ञानपदेति ङीष्प्रसङ्गादित्यत्र तात्पर्यम् एवञ्च विशेषणप्रतीकधारणं विशेष्यविशेषणबोधनतात्पर्यकमेवेति भावः इति श्रीमद्रत्नप्रकाशिकायां विसर्गसन्धिप्रकरणम् ॥

अत एव ग्रहणवतेति वचनस्य प्रत्ययविधिविषयत्वादेव सङ्गच्छते इति यदि सर्वत्र तस्य वचनस्य प्रवृत्तिः स्यात्तदा परमस्त्वसेत्युदाहरणविरोधः स्पष्ट एव अस्य ग्रहणवतेति वचनस्य अनुवादकता तद्वार्तिकस्थनिषेधानुवादकतेत्यर्थः युक्तत्वादिति क्लृप्तार्थबोधकत्वकल्पने लाघवस्य सम्भवेन युक्तत्वादित्यर्थः नन्वस्मिन्वचने ज्ञापकवर्णनं वृथौ कृतमित्यस्यातिरिक्तत्वमेव युक्तमत आह यत्वस्येति ज्ञापकमिति उपक्रमे उक्तमिति शेषः वस्तुतस्तु तस्य वार्तिकस्य जागरूकत्वाज्ज्ञापकमेव तत्सूत्रन्नेति बोध्यम् इत्यस्येवेति एतेन ज्ञापकत्वासम्भव एव ध्वनितः स्वकल्पनायाम्मानमाह अत एवेति अनतिरिक्तत्वादेवेत्यर्थ अस्याः व्यपदेशिवद्भावो ऽप्रातिपदिकेनेति परिभाषायाः प्रत्याख्यानन्तत्रत्यं स्पष्टयति फलाभावादिति ननु केवलसूत्रादिशब्दाट्टगादिवारणमेव फलमस्त्वित्यत आह सूत्रान्तादिति इति भाव इति कौस्तुभ इत्युक्त्यनन्तरम्प्रत्याख्यातत्वादिति कथनस्य भावः ॥ एतेनारुचिर्ध्वनिता तामेवाह तन्वेकेत्यादिना पूर्वोक्तमन्तग्रहणसामर्थ्यङ् खण्डयति तत्रान्तेति आवश्यकमिति एतेन चारितार्थ्यन्दर्शितम् भयाढ्यादाविवेति येन विधिस्तदन्तस्येति सूत्रे एवं वार्तिकम्भाष्ये तस्य सूत्रस्य प्रयोजनप्रदर्शनपरमस्ति तत्र भयञ्चाढ्यादयश्चेति समासः एतेन क्षेमादिषु नेति सिद्धम् तेषु तथा कथनेन विशेषत्वमेव स्वीक्रियते इति यथा तथेह कल्पनया ऽन्तग्रहणसा-

मर्थ्ये सूपपादम् तद्यथा कर्मण्याणीति सूत्रात्कर्मणीत्यनुवर्तते तच्च मेघर्तीति सूत्रे सम्बध्यमानम्मेघादिघटितवाक्ये विशेषणबोधकमेव भयशब्दघटिते तु विशेष्यबोधकन्तेन भयङ्कर अभयङ्कर इति भवति एवमाढ्यङ्करणम् स्वाढ्यङ्करणमिति भवति एवं सुभगादिषु बोध्यन्तेनानुवृत्तस्य विशेषणत्वमुपात्तस्य विशेष्यत्वमित्युत्सर्गः प्रत्ययविधाविति निषेधस्त्वेतन्मात्रतात्पर्यग्राहको नतु स्वार्थतात्पर्यग्राहक इति कल्प्यते एवञ्च सूत्रान्तादिति सूत्रे ऽन्तशब्दाभावे प्यनुवृत्तस्य प्रातिपदिकादित्यस्य तत्र विशेष्यबोधकत्वस्वीकारेण सूत्रान्तात्प्रत्यये सिद्धे ऽन्तग्रहणन्तत्र व्यपदेशिवद्भावाप्रवृत्तौ ज्ञापकम्भविष्यतीति भावः समाधानमाह समासेत्यादिना आदिपदेन ग्रहणवतेत्यस्य सङ्ग्रहः विशेष्यत्व इति एवञ्च तत्रान्तग्रहणाभावे सूत्रशब्दान्नञ्स्यादित्यन्तशब्दोपादानमावश्यकमेवेति भावः विपरीतस्य उपात्तस्य तत्र विशेषणत्वमित्येवंरूपस्य तस्य विशेषणविशेष्यभावस्य नचेति अस्य मानाभाव इत्यत्रान्वयः अस्याम् व्यपदेशिवद्भावो ऽप्रातिपदिकेनेति परिभाषायाम् परोक्तन्दोषमुद्धरति नचेष्टादिभ्य इत्यादिना अत एव सपूर्वादित्यस्यानुवृत्तेरेव ज्ञापकपरेति अस्य येनविधिरिति सूत्रस्थेत्यादिः एकयोगनिर्दिष्टानाङ् कचिदेकदेशो ऽप्यनुवर्तते इति परिभाषामाश्रित्याह एकयोगेपीति तस्यां परिभाषायां ज्ञापकान्तरमपि सुवचमित्याशयेनाह व्यपदेशीति तद्वैयर्थ्यम् सूत्रवैयर्थ्यम् एवञ्च सूत्रसार्थक्यन्तत्फलमिति भावः खण्डनकारोक्तन्दोषमुद्धरति दिव उत्सूत्रमिति अन्तादिशब्देति यत्रैषामुपादानन्तत्रैव व्यपदेशिवद्भावाप्रवृत्तिरित्यर्थः कैयटस्यापि सम्मत इति मूलोक्तं सप्रमाणमेवेति भावः अनयोः मूलोक्तपरिभाषयोः तत्र भाष्ये ऽसमासग्रहणप्रयोजननिरूपणावसरे आर्हादगोपुच्छेत्यत्र तदन्तविधौ पारमगोपुच्छिकमित्यत्र ठक्प्रतिषेधाट्ठञ् सिद्धो भवति ततस्तदन्तविधिप्रतिषेधसम्भावनायां विधौ प्रतिषेध प्रतिषेधश्चायमित्युक्तम् तेनोक्ता प्रत्ययविधिविषयता ध्वनिता कैयटेन च स्पष्टीकृता दिगिति दिगर्थस्तु यदगोपुच्छेत्यस्य पर्युदासपरतया व्याख्यानेन प्रत्ययविधित्वसम्पादनन्तन्न युक्तमुक्तभाष्यविरोधापत्तेरिति नन्वपिशब्देनैव निर्वाहे आदिपदोपादानमनर्थकमत आह आदिनेति तथाचापिशब्दः परमसञ्ज्ञेत्यस्य समुच्चायकः न स्यादिति उत्तरग्रन्थानुरोधेनोभयोरपि तयोर्ग्रहणमिति भावः कृतरुत्वेति तत्रेण वार्तिकेन

कृतरुत्वस्याप्यनुकरणमित्यर्थः तथाचोभयोरपि सङ्ग्रहः लोप इति यत्वासिद्ध्येति शेषः अभिधान इति स्वीक्रियमाण इति शेषः एतेनानभिधानकल्पनया ऽत्र समाधानेपि भो राजन्नित्यस्य दर्शनेनानभिधानकल्पनायाम्मानाभाव इति दर्शितम् अपूर्वस्येति अः पूर्वो यस्येत्यर्थः एवञ्च रोः सुपीति सूत्रस्थं रोरित्युभयत्र सम्बध्यत इति सिद्धम् ॥ अत्र पक्षे कृतरुत्वानुकरणपक्षे अन्यथा ऽपूर्वान्तद्वन्द्वात्षष्ठीकल्पने क्वचिद्वैयधिकरण्येन क्वचित्सामानाधिकरण्येनान्वयो दुर्घटः स्यादिति भावः अत्र पक्ष इति कथनेनायम्पक्षो न युक्त इति ध्वनितम् एवं सति वाक्यभेदस्य षष्ठ्याः सौत्रलुकश्च कल्पनायाङ्गौरवस्य स्फुटत्वात् परममूलोक्तपक्षे तु अञ्शब्दान्तद्वन्द्वस्य पूर्वशब्देन बहुव्रीहिरिति न दोषद्वयमिति भावः अवधेयमिति कथनेन ध्वनितमर्थं स्पष्टयति यदीत्यादिना तत्र इट ईटीति सूत्रे प्रकृते भोभगो इत्यत्र वैषम्यम् अलाश्रयणम् यथा प्रकृते ऽलाश्रयणन्तथोपपादयति अनल्विधेति तत्र देवाः सन्तीत्यत्र दुर्लभमिति एवञ्च सिज्लोपविधायकं यदिट ईटीति ततो ऽस्य वैषम्यं स्पष्टम् नचैवं हे रामेत्यादावपि स्थानिसकारवृत्तिसुत्वस्यादेशे लोपे आगमनन्दुर्लभमिति कथम्पदत्वमिति वाच्यम् सान्तनिष्ठपदत्वस्यैकदेशविकृतन्यायेन सान्तस्य समुदायस्याकारान्तादेश इति सर्वे सर्वपदादेशा इति रीत्या समुदायादेशत्वकल्पनेन स्थानिवद्भावेन पदत्वस्य सुलभत्वात् आवश्यकञ्च समुदायादेशत्वकल्पनमन्यथा आदेशस्य लोपस्याभावरूपतया ऽर्थबोधकत्वासम्भवेन स्थान्यर्थाभिधानसमर्थस्यादेशत्वमिति प्रवादव्याकोपः स्यात् नचैवमपि दीर्घाहो निदाघेत्यत्रादेशे सुप्त्वाभावेनासुपीति निषेधाप्रवृत्तौ रेफापत्तिरिति वाच्यम् सावपि पदम्भवतीति पक्षाश्रयणेन हल्ङ्यादिलोपात्प्राक् तेन निषेधेन रत्वाभावे रुः ततो रुशब्दान्तस्यौकारान्तादेश इति कल्पनया साधुत्वस्य सम्भवात् यत्र ह्यभावरूपादेशस्तत्र ह्येवङ् कल्पना यत्र तु भावरूपादेशस्तत्र तु श्रौतस्यान्यादेशभावमादायाल्विधित्वमत एवानल्विधावितिचरितार्थम् अन्यथा व्यूढोरस्केन द्यौः पन्था इत्यादावपि समुदायादेशत्वकल्पनेनाल्विधित्वन्न स्यात् द्यौः पन्था इत्यादौ हलन्तत्वस्याशास्त्रीयत्वात्तस्यातिदेशासम्भवाच्च विशेषणतया ऽलाश्रयणस्य तावतापि सम्भवाच्च नचैवमप्यतिखट्वः निष्कौशाम्बिरित्यत्र ह्रस्वे आप्त्वादेरतिदेशो ऽऽल्विधित्वान्न सम्भवतीति हल्-

ङ्यादिसूत्रे दीर्घग्रहणवैयर्थ्यमिति वाच्यम् सानुबन्धकनिष्ठस्य स्त्रीप्रत्ययत्वस्य परादिवद्भावेन सवर्णदीर्घनिष्ठस्य हूस्वे ऽतिदेशसम्भवात् स्त्रीशब्दाद्येन रूपेण गोस्त्रियोरिति सूत्रजन्यबोधे मानन्तस्य समुदायनिष्ठत्वात्तत्रानल्विधाविति निषेधासम्भवाच्च अत एव तत्र सूत्रे गोटाङ्ग्रहणङ्कर्तव्यमिति वार्तिककारोक्तिः स्त्रियामित्यधिकृत्य ये विहितास्तेषाङ्ग्रहणमिति भाष्यञ्च सङ्गच्छते नचैवमप्यतिखट्वायेत्यत्र स्थानिवद्भावेनाप्त्वस्य सुपि चेति दीर्घे ऽतिदेशो ऽल्विधित्वान्न सम्भवतीति वाच्यम् अचः परस्मिन्नित्यनेन सम्भवात् स्थूलञ्चेदमिति तत्र हि अश्ग्रहणमनर्थकमन्यत्राभावात् ननु चायमस्ति छन्दःसु पयःसु किम्पुनःकारणम् सुपर एवोदाह्रियते न पुनरयं वृक्षस्तत्र प्लक्षस्तत्रेति अस्त्यत्र विशेषः विसर्जनीये कृते न भविष्यति इहापि विसर्जनीये कृते न भविष्यति छन्दःस्वित्यादौ ननु चेहापि स्थानिवद्भावात्प्राप्नोति वृक्षस्तत्रेति अनल्विधौ स्थानिवद्भावः अथायमल्विधिः स्यात् शक्यमश्ग्रहणमवक्तुम् बाढं शक्यम् अल्विधिस्त्वर्हि भविष्यति कथमिदमास्ति रोरीति ततः खरवसानयोर्विसर्जनीयः र इत्येव रोः सुपि विसर्जनीयः रोः र इति प्रतिपादितम् एतेन भाष्यप्रघट्टकेन स्थानितावच्छेदकत्वेनाभिप्रेतस्यातिदेशेन प्राप्तस्य यत्राल्समर्पकस्थानिबोधकशब्दबोध्यवृत्तित्वन्तत्रानल्विधाविति निषेधः प्रवर्तते नान्यत्रेति स्थूलमेव लभ्यते उक्तभाष्यरीत्या समाधत्ते तदा पयःस्वित्यत्रेति देवाः सन्तीत्यतोस्य वैलक्षण्यमस्तीत्याह तत्र हीति नन्वस्य सूत्रस्य नियामकत्वेनेति विसर्ग इत्यसङ्गतमत आह नियमशास्त्राणामिति विधिमुखेनैवेति इदमन्यत्र स्थूलम् उत्तरार्थमिति अत एवोक्तभाष्यानन्तरमुत्तरार्थन्तर्हि तत्कर्तव्यम् हलि सर्वेषामाशि हलि यथा स्यादिह माभूत् वृक्षवयतेरप्रत्ययः वृक्षव् करोतीत्युक्तम् परोक्तदोषमुद्धरति यदित्विति उत्तरार्थम् हलि सर्वेषामिति सूत्रार्थम् अवधेयमिति मूलोक्तार्थावधेयपदार्थ एतावानित्यवधेयमित्यर्थः मूले ऽन्यथेति वार्तिकस्यैव स्वीकारे इत्यादिसिद्धावपीति मतुवसोरिति सूत्रे पठितस्य तस्य वार्तिकस्यैषात्रयाणामन्यस्य रुः स्यात्सम्बुद्धौ अवस्य चौदित्यर्थः तत्र नानर्थक इति परिभाषाया अस्वीकारपक्षे ऽलोन्त्यपरिभाषातु न प्रवर्तते वस्येतिवाच्ये ऽवस्येत्युपादानसामर्थ्यात् एवञ्च पुंलिङ्गे हल्ङ्यादिलोपेन प्रत्ययलक्षणस्य प्रवृत्तिरिति सिद्धावपीत्यर्थः भो हरिहरावित्यादि आद्ये सम्बुद्धिपरत्वाभा-

वादन्त्ये सम्बुद्धेर्लुका ऽपहराद्रूपन्न सिद्ध्येदित्यर्थः वार्तिकाभावेपि लक्ष्याणां सिद्धिमाह भोइत्यादीत्यादिना ननु निपातमात्रस्वीकारे आमन्त्रितकार्यसिद्धिः कथमत आह निपातानामपीति सम्बोधनविभक्त्यन्तत्वेन सम्बोधनविभक्त्येकवचनान्तत्वेन ॥ त्रलादिसिद्धिमप्याह भवदादीति भवदादीत्यत्र भवदादियोग एवेष्यत इत्यत्र तत्र भोइत्यादीति आदिना ततो भोइत्यादिसङ्ग्रहः साधारणानाम् सर्वलिङ्गसर्ववचनविषयनिपातानामित्यर्थः विभक्ताविति गङ्गाशब्दसामानाधिकरण्येन तस्य स्त्रीलिङ्गत्वात्तत्र ङीप्स्यादिति भावः हेभो इति प्रयोगानुपपत्तिर्निपातमात्राङ्गीकारे सूचिता तां स्फुटयति स्युः पाडित्यस्येति अयम् भोः शब्दः अत एव तस्य निपातस्य भवच्छब्दसमानार्थकत्वादेव ननु शब्दत एव विभक्तिप्रतिरूपकत्वमस्तु तावतापि भाष्योपपत्तिर्भविष्यतीत्यत आह विभक्त्यन्तेति अर्थतश्चेति विनिगमनाविरहादुभयं विवक्षितमिति भावः अन्यत्र स्फुटमिति मतुप्सूत्रभाष्यकैयटयोः स्फुटमित्यर्थः तत्र हि अस्तिमानित्यादौ सत्ताकर्तृत्वेन धनबोधादस्ति कथञ्चिदर्थतः साम्यमित्यस्तीत्यस्याव्ययेष्वप्रामाणिकः पाठ इत्युक्तम् सहप्रयोगस्याप्युपपत्तिमाह किञ्च व्यतीति समुच्चित्य द्योतकत्वस्य सम्भवादिति भावः इत्यरुचेरिति यद्यद्वार्तिकारम्भस्य फलमुक्तन्तदन्यथासिद्धिरुक्तैव त्रलादिसिद्धिरपि भवदादीत्यत्रादिशब्दोपादानेन साधितैवेत्यरुचेरित्यर्थः किञ्चेतीति किञ्चामन्त्रितत्व इत्यादीत्यर्थः मूले पदात्परत्व इत्यादिना वार्तिकारम्भस्य तत्र भो इति तिष्ठति भो इत्यत्र वा आमन्त्रितस्य चेत्याष्टमिकसूत्रेण निघातसिद्धिः फलमित्युक्तन्तदपि निपातस्य सम्बोधनविभक्त्यन्तत्वस्वीकारप्रदर्शनेन साधितमेवेति मूलोक्तनिघातसिद्धिरूपम्प्रयोजनभगो अघोः शब्दांश इत्याह इदञ्चेत्यादिना भावादित्यन्तेन सम्बोधनप्रथमान्तत्वेनेति सा च प्रातिपदिकार्थेति सूत्रेण सम्बोधने चेत्यनेन वेति सामन्त्रितमिति सूत्रे व्यक्तीभविष्यतीति भावः सिद्धिरिति फलमित्यस्यानुषङ्गः॥ मानाभावेनेति भगो हरिहरावित्यतो भगवत्वप्रकारेणाघोदेवदत्तेत्यतो ऽघवत्वप्रकारेण बोधस्यानुभवसिद्धतया सम्बोधनविभक्तयन्तत्वे मानाभावेनेत्यर्थः निपातयोर्भगोअघोःशब्दयोर्न पूर्वोक्तमेव फलङ्किन्त्वन्यदपीत्याशयेनाह भगोस्तिष्ठसीत्यादाविति आम् भगो देवदत्तेत्यादाविति आमित्यङ्गीकारे अत्राम् देवदत्त भगो इति पाठः अत्र भगोः शब्दस्यामन्त्रितस्य चे-

त्यनेन प्राप्तस्य निघातस्याम एकान्तरमामन्त्रितमनन्तिक इत्यनेन प्रतिषेधसिद्धिः फलम् नच देवदत्तेत्यस्याविद्यमानवद्भावेन नैकान्तरता प्राप्नोतीति वाच्यम् नामन्त्रिते समानाधिकरण इति सूत्रेणाविद्यमानवद्भावस्य प्रतिषेधात् नैकान्तरत्वसिद्धिमात्रम्फलाङ्किन्त्वन्यदपीत्याह भगो आगच्छेति इदं द्विर्भावप्रवृत्तियोग्यमुदाहरणम् भगो भगो आगच्छेति तदा भविष्यति धनेन भगो इति धनेन भगवन् ऐश्वर्यवान्नित्यर्थः अत्र मत्वर्थसत्तायान्धनस्य करणत्वेनान्वयादामन्त्रितम्प्रति कारकत्वमस्तीति पराङ्गवद्भावस्य प्राप्तिः न प्रामाणिकाविति भोशब्दस्येव तयोः कोशे ऽनुपादानादिति शेषः अत एव भगोस् अघोसिति निपातयोरप्रामाणिकत्वादेव असिद्धिमिति एषा प्रागुपपादिता इत्येवोक्तमिति नत्वन्यान्येत इति तत्रोक्तमिति तयोरप्रामाणिकत्वस्य सिद्धिः इत्यादीति आदिना भगो गङ्गे इत्यस्य सङ्ग्रहः तदिति प्रकाशकृदुक्तमित्यर्थः मूले उभयग्रहणादिति निपातवार्तिकनिष्पन्नयोर्ग्रहणादित्यर्थः ननु सूत्रकारस्य सूत्रकरणसमये वार्तिकासत्वेनैतद्बोधितसाधुत्वकानामनुकरणासम्भवेनोभयग्रहणादित्यसङ्गतमत आह वार्तिकेति अत्र वार्तिकं शकन्ध्वादिषु पररूपं वाच्यमिति बोध्यम् एवञ्चैकदेशानुमत्या तद्वार्तिकस्यापूर्वत्वाभावबोधनद्वारा तत्साध्यरूपाणां साधुत्वं सूत्रकृतैव ध्वनितमिति भावः मूले महाव्याहृतिग्रहणमिति भुव इति सूत्रे भुव इत्यनेनान्तरिक्षवाचकस्य भुवरिति रान्तस्य महाव्याहृतेर्ग्रहणमुत किंवन्तपृथ्वीवाचकभूप्रकृतिषष्ठ्यन्तस्य ग्रहणमिति सन्देहस्य लक्षणप्रतिपदोक्तपरिभाषया निवृत्तौ महाव्याहृतिग्रहणम्परिभाषाया अनित्यत्वे ज्ञापकमिति भावः ॥ प्रकृतसूत्रे उभयोर्ग्रहणे भाष्यमपि साधकमित्याह विभाषाभवदितीति मूले नचैवमिति एवम् लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तिस्वीकारे तेन साहचर्येण न केवलं साहचर्यमात्रं साधकङ्किन्तु परिभाषापीत्याह अर्थवदिति ननु मूलकृता साहचर्यपरिभाषा सञ्चारिता नत्वर्थवत्परिभाषा इत्यत्र किम्बीजमत आह सान्तेति भोशब्दादीनामेवेति एवकारेण प्रभोरित्याद्येकदेशव्यावृत्तिः तथाचौकारान्तानुकरणमिति पक्षाभिप्रायको ऽयङ्ग्रन्थ इति भावः मूलात्सिद्धान्तानिर्णयात् स्वयं सिद्धान्तमाह अत्रेदन्तत्वमिति रान्तानामेवेति लक्षणवशसम्पन्नरान्तानामेवेत्यर्थः एवञ्च लाक्षणिकत्वाविशेषान्निपातवार्तिकनिष्पन्नयोर्ग्रहणासिद्धिः प्रभोरित्याद्येकदेशव्यावृत्तिस्त्वनर्थ-

कत्वेन साधितैव एवकारेण सान्तौकारान्तपक्षयोर्व्यावृत्तिः । न्याय्य एवेति एतेनैतत्पक्षे सौत्रसन्ध्यभावाकल्पनेन लाघवमिति सूचितम् ननु लघूच्चारणतर इति मौलव्याख्यानादुच्चारणक्रियागतस्य प्रकर्षस्य लाभो भवति नतु क्रियाप्रयोजकप्रयत्नगतस्येति कथन्तदित्यत आह लघुतरोच्चारण इति एवञ्च लघूच्चारणतर इत्यत्रान्यपदार्थसम्बन्धोत्तरं वर्तिपदार्थस्य लाघवस्य प्रकर्षविवक्षेति भावः शुक्लतरः पट इत्यादावपि विशेषणप्रकर्षविवक्षया साधुत्वस्य सर्वत्र दर्शनात् एवञ्च शिखी ध्वस्त इतिवत्साधुत्वमस्येति बोध्यम् भाष्ये इति एतच्च प्रागुपपादितम् हरदत्तादय इत्यनेन सूचितामरुचिमपकटयति वकारलोप इत्यादिना अनवगतेरिति पदानुपूर्वीज्ञानस्यार्थोपस्थितिकारणत्वस्य क्लृप्तत्वादिति भावः नच शास्त्रस्य प्राप्तिः कथं वारणीयेति वाच्यम् शास्त्रस्यानिष्टार्थमवृत्तेरदर्शनात् ॥ एवञ्च उक्तरीत्या लोपाभावस्य सिद्धौ च तत एव अर्थानवगतेरेव उक्तभाष्यविरोधमपरिहरति भाष्यमपीति वृक्षव् करोतीत्यत्र प्राप्तिप्रदर्शकभाष्यमपीत्यर्थः एकदेश्युक्तिरिति तदर्थानवगतेरित्युक्तरीत्यैकदेश्युक्तिरित्यर्थः भाष्यान्तरसंवादादपि तस्यैकदेश्युक्तित्वमित्याह न पदान्ताः परेण इति अत्रेदम्बोध्यम् अनेन सूत्रेण लघ्वलघूच्चारणयोर्लोपः क्रियते यदि हलीति प्रकृतसूत्रे नोच्येत तदा देवा इहेत्यत्रालघूच्चारणस्य यस्य लोपः स्यादित्याशयेन परमपूले हलि किम् देवायिहेत्युक्तम् लोपः शाकल्यस्येति सूत्रन्तु देवा इहेत्यत्र लघूच्चारणस्य यस्य लोपविधायकत्वेन चरितार्थमेतद्विषये यकारस्य यत्र वैकल्पिको लोपस्तत्रैतद्विषयकशास्त्रारम्भान्नित्यो लोपो हल्ग्रहणाभावेपि न प्रवर्तत इति एतेन वैकल्पिकलोपविषये नित्यलोपस्वीकारे विकल्पस्य वैयर्थ्यापत्तिरिति परास्तम् भाष्ये स्थितमित्यत्र भाष्यं हूलोप इति सूत्रस्थङ्ग्राह्यामिति भ्रमानुत्पत्तये आह दृढः स्थूलेतीति द्रष्टव्यमिति योक्तः सा दृढ इति प्रक्रियोक्तप्रत्युदाहरणस्योपपादनाय प्रसादस्य तस्माद्दृढशब्दाण्णौ ततो ल्यपि ल्यपि लघूपूर्वेति सूत्रञ्चैव प्रवर्तते इति तदभिप्रेतमित्याह अस्येति मते इति शेषः एतेनेयमुक्तिरपसिद्धान्त इति ध्वनितम् अत एवाह त्वदवलम्बेति अत्रारुचीति वामनोक्तावरुचिबीजनिरूपणार्थः भाष्यविरोध इति नकारहकारलोपार्थमित्युपादाने ऽनिदितो न निपातनमिति स्पष्टमेवेति भाष्यविरोध इत्यर्थः वामनोनेभयोरपीति यद्यप्युक्तन्तथापि

प्रक्रिया कृता तथा नोक्तमतः स्वस्योभयोरपीति नेष्टमिति प्रसादानुयायिशंकां वारयति किञ्चेति अलमिति योगविभागस्यागमशास्त्रानित्यत्वस्य चाप्रमाणत्वम् सर्वावलम्बभूतदृढस्थूलेतिभाष्यविरोधश्चेत्यस्यार्थः ननूत्तरस्याभावादित्यसङ्गतमष्टाध्याय्यान्तत्सत्वोपलम्भादत आह आहार्येति पूर्वत्रासिद्धमिति शास्त्रप्रामाण्यादिति शेषः वस्तुतो विद्यमानेपि शास्त्रे इच्छाया प्रतियोगितासम्बन्धेनाभाव आरोप्यत इति तस्याभावज्ञानस्याहार्यत्वम् ॥ तद्वैयर्थ्यम् अनञ्समासग्रहणवैयर्थ्यम् तद्धयसः शिव इत्यादौ लोपाभावार्थं कृतम् यत्र तु विहितविशेषणं स्यात्तदासोस्वच्छब्दाद्विधानाभावेन लोपाप्राप्त्या तद्वैयर्थ्यं स्पष्टमेव वस्तुतस्तु विहितपदाध्याहारेण तद्योगे पञ्चमी कल्पनायामकृप्तकल्पनापेक्षया ऽनन्तरपदाध्याहारेण तन्निरूपितसम्बन्धे षष्ठीत्येवोचितमत एवात्रेति भाव इत्युक्तम् इदमेवानञ्समासग्रहणन्नञ्समास उत्तरपदार्थप्रधान इत्यत्र ज्ञापकमन्यथा नञर्थाभावस्य विशेष्यत्वे उत्तरपदस्योपसर्जनत्वेन त्यदाद्यत्वाप्राप्त्या हल्ङ्यादिलोपस्य दुर्वारतया तद्वैयर्थ्यमेव स्यात् पूर्वरूपस्येति अवादेशस्य चेत्यपि बोध्यम् इत्यादाविवेति अत्र यथा अत्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु चेति सूत्रप्राप्तस्य प्रकृतिभावस्याभाववदित्यर्थः केचित्तु सो ऽहमाजन्मेत्यादिसिध्यर्थमवधारणपरतया व्याख्याने सास्माअरमित्यत्र सुलोपानापत्तिः यदि बहुलग्रहणानुवृत्त्यैव तत्साध्यते तदा तेनैव सो ऽहमाजन्मेत्यादेरपि सिद्धावबधारणपरतया व्याख्यानस्य वैयर्थ्यमित्याहुः तन्न छन्दस्यभावदर्शनेन लौकिके प्रयोगे शास्त्रप्रवृत्तिकल्पनमन्याय्यमित्याशयात् किञ्च लोके लोपे सत्येव पादपूरणं लोपो भवति नान्यत्रेत्यर्थस्य स्पष्टप्रतिपत्त्यर्थमत्रावधारणपरतया व्याख्यानं प्राचामनुरोधेन कृतम् वस्तुतो बहुलग्रहणेनैव सर्वेष्टसिद्धावबधारणपरतया व्याख्यानन्न कार्यमित्याह एवञ्चेति बहुलग्रहणेनोक्तप्रयोगसाधने चेत्यर्थः अस्य तात्पर्यमित्यत्रान्वयः सिद्धेरिति लोपाभावस्य सो ऽहमाजन्मेत्यादौ सिद्धेरित्यर्थः तात्पर्यमिति अत एवेति वदतो मूलकृत इति शेषः एवञ्च परममूलप्राचामनुरोधेनैतदेव ध्वनयितुत्तत्र सत्येवेत्यवधारणन्त्विति तु शब्दो ऽरुचिबोधक उपात्त इति बोध्यम् इति श्रीमदगस्त्यकुलवंशावतंससकलविद्वत्सार्वभौमभवदेवमिश्रात्मजभैरवमिश्रकल्पितायां रत्नप्रकाशिकायामष्टमसन्धिविवरणम् ॥

सूत्रे तन्त्रादिनेति सकृदुच्चरितः शब्दो ऽनेकार्थपरो यत्र तत्र तन्त्रेति व्यवहारः उभयम् प्रत्ययपदम्प्रत्ययान्तपरमित्येतदुभयम् तद्धितान्तस्येति कृद्ग्रहणन्तु लिङित्यादौ धातुपर्युदासात्प्रातिपदिकसंज्ञासिद्धये आवश्यकमिति भावः नचात्रापि लिह् किबित्यवस्थायाञ्जातायाः संज्ञाया एकदेशविकृतन्यायेन लिह इत्यत्र सौ लभ्यमिति वाच्यम् फलाभावेन तदानीमप्रवृत्तेः परत्वान्नित्यत्वादन्तरङ्गत्वाच्चापृक्तलोपस्य प्राक्प्राप्तेश्च वस्तुत इदन्तद्धितग्रहणमत्र नियमार्थङ् कृद्ग्रहणन्तु प्रतिषिद्धार्थम्भिद्छिदित्यत्र निषेधस्य प्रसङ्गादिति कैयटेनोक्तङ् कृत्तद्धितग्रहणं नियमार्थमिति भाष्यव्याख्यावसर इति तदनुरोधेन यथोद्देशपक्षाश्रयणे तु कृद्ग्रहणमपि तदन्तप्रतिषेधे ज्ञापकमेव ॥ इत्यादाविति आदिना अधुनेत्यस्य सङ्ग्रहः असहायतया व्यपदेशिवद्भावेनास्य तद्धितान्तत्वम् कृत्तद्धितेति तु साजात्यालुब्धम् इत्यवस्थायामिति तदा तादृशसमुदायस्य प्रत्ययभिन्नतया तद्धितग्रहणं विनापीष्टसिद्धेः वस्तुतो ऽत्र सूत्रे ऽधातुग्रहणमप्रत्ययग्रहणञ्च न कार्यम् कृत्तद्धितग्रहणन्तु धातोः प्रत्ययान्तस्य चेत्कृत्तद्धितान्तस्यैवेति तु नियमार्थन्तेनेष्टसिद्धेरिति एकदेशविकृतन्यायेनेति शास्त्रीयेन स्थानिवद्भावेनेत्यर्थः नचेति नहीत्यर्थः एतत् प्रशस्तार्थत्वम् प्रत्ययमात्रस्य केवलकृत्तद्धितमात्रस्य एवञ्च तत्र तदन्तविधिलाभार्थमुपात्तनियमार्थन्त्योरुपादानमिति कल्पनायान्तु न प्रशस्तार्थवद्विषयको नियमः किन्तु वृत्त्या ऽर्थबोधकत्वमर्थवत्त्वमेव पूर्वसूत्रे धातुप्रत्ययपर्युदासाद्विवक्षितन्तादृशार्थवद्विषयकमेवात एव भाष्ये ऽप्रत्यय इति किम् काण्डे कुड्ये अप्रत्यय इति शक्यमवक्तुम् कस्मान्न भवति काण्डे कुड्ये इति कृत्तद्धितग्रहणं नियमार्थम्भविष्यति कृत्तद्धितान्तस्यैव प्रत्ययान्तस्य प्रातिपदिकसंज्ञा भवति नान्यस्येति नियमप्रदर्शनेनाप्रत्ययग्रहणप्रत्याख्यानं सङ्गच्छते तन्मात्रे प्रत्ययमात्रे भावाभावादिति अर्थवद् द्वितीयाभावादिति शेषः यत्तु वाग्दृषदप्रिय इत्यादौ तद्धितान्तस्य प्रातिपदिकत्वापत्तिमुद्भाव्य सुप्पाग्वर्तितद्धितान्तमात्रस्याप्रयोगेण प्रशस्तार्थवत्त्वाभावान्न दोष इति समाधानन्तत्तु न युक्तम् सुप्प्रकृतिमात्रस्य कृत्तद्धितान्तस्य क्वापि प्रयोगस्यादर्शनेनासम्भवापत्तेः यदित्यर्थबोधकवृत्तिप्रकृतिकसुबन्तसमुदायघटकत्वमित्यर्थस्तदा वाग्दृषदप्रिय इत्यादावप्यस्त्येव तदित्यतिप्रसङ्गवारणासम्भवः कृत्तद्धितमात्रेपि भवदुक्तस्यार्थबोधकवृत्तिप्रकृतिकसुबन्तसमुदायघटकत्वस्य स-

त्वेनैतादृशार्थकरणेपि तदन्तग्रहणालाभश्च स्यात् ॥ वाग्दृषदमिति समाहारे टजन्तस्य प्रयोगदर्शनाच्च काल्पनिकस्य तस्याविशिष्टत्वाच्च तन्मात्रवृत्तिरेवेति प्राशस्त्यार्थकमतुप्प्रत्ययबलादेतल्लभ्यते ॥ तद्धितान्तत्वेति समासान्तानामलौकिकविग्रहवाक्यावयवत्वसिद्धान्तेन टजन्तस्य तद्धितान्तत्वस्य समाससंज्ञाप्युत्तरपदनिमित्तकास्तीति समासत्वस्य च सत्त्वमिति भावः एतेन समासग्रहणकृतनियमेनाव्याप्तिः सूचिता नचैकार्थीभावे ऽर्थवत् द्वितीयसत्व एव प्रकृतेतु टचो निरर्थकतया कथन्तदन्ते एकार्थीभावस्य सत्त्वमिति वाच्यम् तस्यानर्थकत्वेपि तत्प्रकृतेरर्थवत्वेन तत्रैकार्थीभावस्य सत्त्वेन टचस्तादृशसमुदायावयवत्वात्तत्राप्येकार्थीभावस्य सत्त्वमित्याशयात् अत एव बहुगोमत्केत्यादावपि कवन्ते एकार्थीभावव्यवहारः नचार्थवद् द्वीतीयसत्व एव चेदेकार्थीभावव्यवहारस्तदा ऽन्यत्तस्मार्थिककान्ते कथमेकार्थीभावव्यवहार इति वाच्यम् तस्यार्थवत्तद्धितान्ततुल्यतया आरोपेण तन्मात्रेप्येकार्थीभावस्य व्यवहारात् न प्रातिपदिकत्वमिति अतस्तादृशटजन्तान्न टाप् यदितु यस्य समुदायस्य टिदन्तत्वन्तदर्थम्प्रत्युपसर्जनत्व एव ङीपो ऽप्रवृत्तिरित्याश्रीयते तदा ङीबापत्तिरपि दोषः एतेनाधातुरितिप्रातिपदिकम् तिविति सुपः पकारेण प्रत्याहारः तन्त्रेण तिपन्तिवन्तञ्च वर्जयित्वेत्यर्थः समासश्चेति द्वितीयं सूत्रम् यद्वा ऽविभक्तिप्रातिपदिकम् समासश्चेत्येवास्त्विति परास्तम् उक्तदोषापत्तेः किञ्च तिप्प्रत्याहार आद्यन्यासे प्रत्यासत्त्या सिपः पकारेण गृह्येतेति थसाद्यन्ते ऽतिव्याप्तिः व्याप्तिन्यायश्चेद्विवक्षितस्तदा कपः पकारेण तदापत्तिः एवञ्च टाबादिकवन्तानाम्प्रातिपदिकत्वाय तद्धितस्त्रीप्रत्ययग्रहणङ्कार्यम् टापष्टाशब्दमारभ्य कपः पकारेण प्रत्याहारेण टाबग्रहणं वा कार्यमिति गौरवम् वक्ष्यमाणरीत्या दश दाडिमानीत्यादिसमुदायस्य व्यावृत्तये ऽर्थवद्ग्रहणस्यावश्यकत्वाच्च किञ्चाहन्नित्यस्य वक्ष्यमाणरीत्या ऽतिवन्तत्वेन तत्र नलोपापत्तिवारणायाधातुग्रहणमप्यावश्यकम् केचित्तु वृत्तिमदर्थवत् प्रातिपदिकमित्येव लक्षणङ् कार्यम् एवञ्च सूत्रद्वयाकरणेन लाघवम् अर्थवदित्यत्र भवदुक्तम्प्राशस्त्यार्थवत्वं विवक्षितमतो न पञ्चनावाप्रिय इत्यादौ दोषः नचाव्युत्पन्नानाम्प्रातिपदिकसंज्ञा न स्यादिति वाच्यम् सर्वत्र प्रकृत्यादिकल्पनेन व्युत्पन्नत्वस्यैव कल्पनात् यद्यपि पचतकीत्यादिभ्य एवंसति सुबुत्पत्तिः प्राप्नोति तथाप्येतादृशानान्नपुंसकत्वाभ्युपगमेन

सुपां लुकासिद्धम् नचैवमेधताके इत्यादौ नपुंसकह्रस्वापत्तिरिति वाच्यम् सप्तम्यधिकरणे चेति ज्ञापकेन विभक्त्यन्तप्रातिपदिकस्य ह्रस्वत्वाभावज्ञापनात् सुपो धात्विति सूत्रे प्रातिपदिकपदोपादानमात्रेण सिद्धे धातुग्रहणेन धात्वर्थविशेष्यकवृत्तौ प्रातिपदिकत्वाभावस्य ज्ञापनाद्वा नचैवम्पचतिकल्पमित्यादौ प्रातिपदिकसंज्ञा न स्यादिति वाच्यम् ॥ धात्वधिकारीयप्रत्ययान्तवृत्तौ प्रातिपदिकत्वाभावस्य ज्ञापनात् भोक्तुं पाक इत्यादौ धात्वधिकारीयप्रत्ययसत्वेपि धात्वर्थविशेष्यकबोधाजनकतया न क्षतिः सर्वत्र व्युत्पत्तिपक्षस्यैवाङ्गीकारेण निपातस्यानर्थकस्येति वार्तिकमपि न स्वीकार्यमित्याहुः तन्न वृत्तिपदस्य कृदन्तादिबोधकतया तद्धत्वस्य तत्र वक्तुमशक्यत्वात् किञ्चैको द्वौ बहव इत्यादाविवानन्वितार्थकविभक्तिकल्पनापेक्षया ऽनुवादकविभक्तेर्न्याय्यतया पचतकः पचतकौ इत्यादिभ्यो द्विवचनबहुवचनयोरेवोत्पत्त्या लुका तयोरपहारासम्भवेन श्रवणापत्तेः किञ्च विभक्त्यर्थप्रधानस्य लिङ्गसंख्याभ्यां योगो नास्तीत्यस्य भाष्यसम्मतत्वेन पचतीत्यादिभ्यः परस्य सोर्लुकापहारस्य वक्तुमशक्यत्वाच्च किञ्च सप्तम्यधिकरणे चेति निर्देशेन सामान्यतो विभक्त्यन्तप्रातिपदिकस्य ह्रस्वत्वेनेति कल्पने ऽन्तरङ्गानपीति न्यायेन प्रकिरुलमित्यादौ पूर्वं सुपो लुकि ह्रस्वत्वानापत्तिः किञ्च पुत्रीयतीत्यादौ क्यजन्तस्य धातुसंज्ञया सुपो लुग्भवति तस्य धात्वधिकारीयप्रत्ययान्तत्वन्तु नास्तीति धातुग्रहणस्य चारितार्थ्येन ज्ञापकत्वासम्भवः यदि च वृत्तिमदित्यत्र व्यपदेशिवद्भावेन वृत्तेर्वृत्तिमत्वम्मतुपस्त्यागेन वृत्तिरित्येवाश्रीयते तदा प्राथमिकदोषोद्धारेपि टिघुभादिशब्दस्याव्युत्पन्नत्वेनैषाम्प्रातिपदिकसंज्ञानापत्तिरिति दिक् ॥ तेनेत्यनेनोक्तमर्थं स्पष्टप्रतिपत्तये आह प्रियशब्दान्त एवेति तत्र पञ्चनावप्रिय इत्यादौ अयम्प्रियशब्दान्तनिष्ठैकार्थीभाव एवोत्तरपदनिमित्तकद्विगुप्रयोजको नतु नौशब्दान्ते ऽन्यस्यैकार्थीभावस्य स्वीकारः वृत्तिधर्माणामेकार्थीभावफलानाम्प्रियशब्दान्तनिष्ठेन तेनैवोपपत्तेरिति भावः प्रियशब्दान्त इत्यस्य प्रियशब्दप्रकृतिकसुबन्त इत्यर्थः अदोषादिति प्रशस्तार्थवत्त्वानापत्तिरूपदोषाभावादित्यर्थः दोष इति प्रातिपदिकसंज्ञाया अप्राप्तिरुप दोष इत्यर्थः दोषमुपपादयति तत्रेत्यादिना धातोरेवेति यः शिष्यते इतिन्यायेनावशिष्टः श्रूयमाणो लिहइत्यादिशब्द एव लेहनकर्त्रादिबोधक इति भावः अलौकिके वाक्ये लिह् किबि-

त्यत्र अस्य वाक्यत्वञ्च शक्तशब्दसमुदायत्वरूपम् तस्यार्थबोधनाय प्रयोगाभावेन नैकोपस्थितिजनकत्वस्य सद्भावो ऽत आह कल्पित इति तत्र लुप्तक्रियन्ते अदोषादिति वास्तविकस्य विशिष्टार्थबोधकत्वस्य तत्राभावेन प्रातिपदिकत्वाभावापत्तिरूपदोषाभावादित्यर्थः एतेन पदैकार्थीभावेनेत्यादिमूलोक्तमनूद्य तन्न औपगवो वृक्ष इत्यादौ सुब्विशिष्टस्यैव तथात्वेनाव्याप्त्यापत्तेः किञ्च समासग्रहणं व्यर्थम् वाक्ये एकार्थीभावविरहेण तस्य नियमार्थत्वायोगात् किञ्च भोक्तुम्भुक्का शुक्लतरः पाचकतम इत्यादावव्याप्तिः तुमुन्नन्तादेः प्रत्ययान्ततया ऽस्य सूत्रस्याप्रशस्तार्थवत्वेनाग्रिमसूत्रस्य चाप्राप्तेः एकार्थीभावः स्वार्थिकेषु नेति हरदत्तग्रन्थे स्पष्टम् तस्मात्सूत्रद्वयसाधारणं यदन्वयव्यतिरेकाभ्यां प्रत्ययभिन्नत्वे सति अर्थप्रत्यायनयोग्यत्वम्प्रशस्तार्थवत्त्वमिति रत्नाकरोक्तलक्षणमपास्तम् प्रशस्तसमीपत्वेनारोपितप्रशस्तार्थवत्त्वस्य औपगवादौ सुब्रहिते सत्वात् समासग्रहणस्य नियमार्थत्वमप्येवमेवोपपादनीयम् अनेन व्यर्थं स्यादित्यन्तग्रन्थेन सातेरुपादानेनापूर्ववचनकल्पनापेक्षया क्लृप्तापत्ययपदस्यावृत्तावेव तस्य तात्पर्यग्राहकत्वं युक्तामिति भावः औत्सर्गिक इति सङ्ख्याकर्मादेरभावादित्थमुक्तम् ॥ तस्यापीति सातेरपीत्यर्थः अपिः प्रकृतिसमुच्चायकः नचैवम्प्रकृतिप्रत्ययोः समासापत्तिः बहुचाश्चित्वसामर्थ्येन प्रकृतिप्रत्ययोः समासाभावस्य कल्पनात् इति भाव इति मूलकारस्येति शेषः एवमभिधानेनारुचिर्ध्वनिता सा वस्तुतस्त्वित्यादिना ऽग्रे स्फुटा तस्य च सोश्च न केवले निषेधविषयतायाः सत्वेन सोरुत्पत्तिरुचितैवेति भावः प्रातिपदिकावयवत्वन्तस्योपपादयति समुदायेत्यादिना एतेन प्रत्येकं सोरुत्पतौ तच्छ्रवणापत्तिरिति दूषणम्परिहृतम् नन्वेवन्तत्र लुक्प्रवृत्तावपि धात्ववयवादुत्पन्नस्य श्रवणापत्तिरत आह पचतीति तन्निषेधादिति प्रातिपदिकसंज्ञाप्राप्तिनिषेधादित्यर्थः अत्र धात्ववयवादुत्पन्नस्यापि लुकापहारस्तु नोक्तः अधातुरितिपर्युदासात् प्रत्ययावयवस्याप्येवं श्रवणापत्तिः समुदायस्य प्रातिपदिकावयवत्वन्तु न अप्रत्यय इति पर्युदासात् नच यदि धातुप्रत्ययपदयोस्तदवयवे लक्षणा तदा तयोरेव निषेधो न स्यादिति वाच्यम् प्रागुक्तकृत्तद्धितग्रहणकृतनियमेन तयोर्वारणात् तस्मात् व्युत्पन्ने उक्तरीत्या दोषवारणात् आपाद्या आपादनार्हा एतेन भाष्योक्तन्धनं वनमिति प्रत्युदाहरणमेतयोरव्युत्पन्नत्वाभिप्रायेणेति ध्वनितम् व्युत्पत्तिपक्ष इति अत्र

ह्येवं व्युत्पत्तिर्यास्केनोक्ता वनशब्देतु नोक्ता अत एव वनशब्द एव दोषस्य मुख्यतया भाष्ये प्रथमतस्तल्लेखः इदम् अव्युत्पन्न एव दूषणमित्येतत् ध्वनितमिति एतस्यैवोदाहरणत्वप्रदर्शनेन ध्वनितमित्यर्थः नलोपाद्यापत्तिरिति अत्रादिपदेन वनशब्दे वकारस्य लोपो व्योरिति लोपापत्तिर्धनशब्दावयवधकारस्य जश्त्वापत्तिश्च दोषः इदम् प्रतिवर्णम् प्रातिपदिकसंज्ञापत्तौ सुबुत्पत्त्यापत्तिरूपन्दूषणम् अभ्युपगमेनेत्युक्तिसूचितमर्थं स्पष्टप्रतिपत्तये आह वस्तुतस्त्विति अत्र यदीति क्वचित्पाठः तदुत्पत्तिः सुबेकवचनोत्पत्तिः अत्र सुबिति कथनेन सप्तानामपि विभक्तीनामेकवचनानीति पक्षः सूचितः इदमुपलक्षणम् औत्सर्गिकैकवचनस्यापि अन्यत्रानुत्पत्तौ हेतुमाह एकवचनमिति महासंज्ञाकरणमन्वर्थत्वाय यदि गमकाभावेपि तदुत्पत्तिः स्यात्तदा महासंज्ञाकरणमनर्थकं स्यादिति भावः एवमर्थनियमादिप्रकारत्रयं वक्ष्यमाणमपि सत्येव गमके इति च बोध्यम् प्रकृते धनं वनमित्यादौ अत एव गमकं विना तदनुत्पत्तेरेव स्त्रीत्वा साधकाभावेप्यौत्सर्गिकैकवचनोत्पत्तिरिति प्रकारेण अत एव प्रकृतसूत्रे भाष्ये निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या खञ्जति निखञ्जति लम्बते किम्पुनरत्र प्रातिपदिकसंज्ञया प्रार्थ्यते प्रातिपदिकादिति स्वादुत्पत्तिः सुबन्तमिति पदसञ्ज्ञा पदस्य पदादिति । निघातो यथा स्यात् नैतदस्ति प्रयोजनम् सत्यामपि प्रातिपदिकसञ्ज्ञायां हुत्यत्तिर्न प्राप्नोति किङ्कारणम् नहि प्रातिपदिकसंज्ञायामेव स्वादुत्पत्तिः प्रतिबद्धा किन्त्वेकत्वादिष्वप्यर्थेषु स्वादयो विधीयन्ते नचैषामेकत्वादयः सन्तीत्यादिकमुक्तम् अत एव च प्रकृतसूत्रशेषे भाष्ये काण्डे कुड्ये इत्यत्र पूर्वान्तवत्वेन प्रातिपदिकत्वाद्ध्रस्वत्वमाशंक्य ह्रस्वो नपुंसके यत्तस्येति न्यासान्तरेण तद्वारणम्प्रदर्शितन्तु तत्र सुबुत्पत्तिर्दर्शिता उक्तार्थे साधकान्तरमाह अत एवेति प्रातिपदिकावयवानामव्यावर्त्यत्वादेव एतेनार्थवदिति व्यपदेशाय वर्णानाम्माभूदित्युपक्रमभाष्यमेकदेशयुक्तिरिति सूचितम् निरर्थकः परस्परान्वितार्थबोधाभावेन निरर्थकः मुख्यमिति इदमपि यथाश्रुतरीत्या वस्तुतस्तु वक्ष्यमाणसिद्धान्तरीत्या प्रत्ययस्य पञ्चगवधन इत्याद्येकदेशस्य पञ्चगवेत्यादेश्च व्यावर्त्यत्वमस्त्येव ॥ ननु पचतःकल्पमित्यादौ गमकाभावेपि स्वादुत्पत्तिवद्धनाद्यवयवादपि स्यादेवेति कस्यचिच्छंकां वारयति पचत इति भाष्यङ्गमकमिति तत्र हि

पचतःकल्पमित्यादौ लिङ्गसङ्ख्यायोगाभावादमो ऽभावमाशङ्क्य क्रियाप्रधानमाङ्ख्यातङ्क्रिया चैका न द्वित्वादिमती तिङन्ताद्भेदानवगतेः क्लीबत्वञ्च स्वभावादिति समाधाय पचत इत्यादौ द्विवचनानुपपत्तिमाशङ्क्य साधनापेक्षत्वेन समाधाय कल्पबाद्यन्तात्सुबुत्पत्त्यभावमाशङ्क्य एकवचनमुत्सर्गतः करिष्यते तस्य द्विबहुवोरर्थयोर्द्विवचनबहुवचने अपवादो भविष्यत इति तत्रोक्तम् अयम्भावः तिङन्ताद्भेदानवगमेपि शब्दशक्तिस्वभावात्स्वगतैकत्वमादाय कल्पबाद्यन्तादौत्सर्गिकमेकवचनम्भवति तेषामभावे तु साधनापेक्षन्द्विवचनादि भवति द्व्यादिभ्यस्तु नौत्सर्गिकैकवचनम् किन्तु न केवलेति समयपरिपालनायानुवादकविभक्तिर्भवत्यत एव बहुषु द्वयोरेकस्य निजां त्रयाणामित्यादिनिर्देशाः सङ्गच्छन्ते अन्यत्र त्वौत्सर्गिकैकवचनमेवेति ननु दश दाडिमानि षडपूपा इत्यादिसमुदायस्य समासग्रहणकृतनियमेन वारणम्भविष्यतीत्यत आह समासेति अर्थवत्समुदायेत्यादि ननु पूर्वसूत्रे पर्युदासबलादर्थवत्त्वलाभादर्थवत्पदाभावे ऽग्रिमसूत्रे तदसम्बन्धादनर्थको यो ऽसूर्यादिसमासस्तस्य प्रातिपदिकसंज्ञार्थञ्च समासग्रहणमिति कथमर्थवत्समुदायविषयकत्वन्तस्येति चेन्न असूर्यमित्यादेः समाससंज्ञासिद्धये ज्ञापकाश्रयणमावश्यकन्तत एव प्रातिपदिकसंज्ञाया अप्यनुमानम्भविष्यतीति तत्र समासग्रहणमर्थवत्समुदायविषयकमित्याशयात् तल्लाभश्च नियमस्य सजातीयापेक्षत्वेन भवति दिगिति दिगर्थस्तु वस्तुतस्त्वित्यादिनोक्त एव नन्वधातुरितिपर्युदासादर्थवत्त्वेन सादृश्यलाभ इति कुतो ऽसत्वार्थकत्वेनापि सादृश्यसम्भवादत आह व्याख्यानादिति बहुलक्ष्यसंस्कारमूलकाद्व्याख्यानादित्यर्थः यतो ऽत्रार्थवत्त्वेन सादृश्यं विवक्षितमतः सुप्तिङन्तं पदमिति सूत्रस्थभाष्यमपि सङ्गच्छते तस्मिन्सूत्रे ऽन्तग्रहणेन संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणञ्चेति ज्ञापनोत्तरं कृत्तद्धितसमासाश्चेत्यन्तग्रहणङ्कर्तव्यम् न कर्तव्यम् अर्थवदिति वर्तते न केवलाः कृत्स्तद्धिता वेति भाष्ये उक्तम् तत्रान्वयव्यतिरेकगम्यार्थवत्ता केवलानामपि कृत्तद्धितानामस्तीति न केवला इत्यसङ्गतमित्याशंकायामर्थवद्ग्रहणानुवृत्तिसामर्थ्याल्लौकिकार्थप्रत्यासन्नो ऽभिव्यक्ततरो यो ऽर्थः प्रत्ययान्तेषु लक्ष्यते स आश्रीयते इति कैयटेनोक्तम् तत्र सामर्थ्यवर्णनमनुवृत्त्यभावेपि तस्य लाभश्चेद्भवति तदा धातुपर्युदासात्तस्य लाभो भविष्यतीति तदभिप्रायकमेवेति॥

इत्युक्तमित्येतावन्मात्रकथनेपि पौनरुक्त्यभावो न लभ्यत इत्यत आह एतेनेति तेन आरोपेण तन्मात्रस्य इञ्मात्रस्य ननु तदर्थेत्येव वाच्यत्वतैव प्रकान्तयोः प्रकृतिप्रत्यययोर्बोधसम्भवेन तत्तदर्थेति वाच्यम् नच स्पष्टम्प्रकृतिप्रत्यययोर्बोधनाय द्वन्द्वनिर्देशो ऽयमिति वाच्यम् एकशेषप्रसङ्गादत आह तस्येति कृतद्विर्वचनेन वीप्सायामित्यादिः षष्ठीसमासे अर्थविभागशब्दस्यार्थशब्दस्य वेति शेषः एकदेशान्वयापत्तिभिया आह सस इति अत्रापि सस इति वीप्सायामेव द्विर्वचनम् इदम् तत्तदर्थविभाग इति पदम् उक्त्वरीत्या साधुत्वे उपष्टम्भकं सूचयन्नाह एतेनेति उक्तप्रकारेणेत्यर्थः ननु प्रत्ययग्रहणपरिभाषया कृतद्विर्वचनस्य षष्ठ्यन्तत्वसुबन्तत्वयोरभावात्कथं षष्ठीसंमासस्य कर्मधारयस्य वा प्रसक्तिरत आह सुबन्तत्वमपीति । अपिना षष्ठ्यन्तत्वपदत्वयोः परिग्रहः द्विःप्रयोगपक्ष इवेति यद्यपि समासग्रहणकृतनियमेन समुदायस्यापि प्रातिपदिकत्वन्तथापि कस्कादिगणे कौतस्कुत इत्यस्य पाठेन तद्धितोत्पत्तिर्भवतीति ज्ञापनवदाद्योच्चारणविषये यस्मादिहितस्तत्वबुद्धिरन्त्यस्य शब्दादौ सुप्त्वषष्ठीत्वबुद्धिरित्यपि कल्पनीयमुक्तापादाने पञ्चमीतिसूत्रस्थभाष्यप्रयोगादिति यथेत्यर्थः वस्तुत उक्तप्रयोगाभ्यां स्थाने द्विर्वचनपक्ष एव ज्ञाप्यतामित्याशयेनाह स्थाने द्विर्वचनपक्षे ऽपीति अस्योपमानत्वेन निर्देशो युक्तत्वस्य सूचनाय यद्यप्यस्मिन् पक्षे स्थानिवद्भावेन सुबन्तत्वं सूपपादम् तथापि त्वदुक्तरीत्यैव निर्वाह इत्याशयेनाह आद्येति अत्राद्यशब्दः सुलभत्वध्वननाय नन्वस्मिन्पक्षे समुदाये स्थानिवद्भावेनोक्तरीत्या वा सुबन्तबुद्धिर्भवतु तथापि तदवयवे सुप्त्वबुद्धिर्न स्यात् वस्नसादिषु प्रकृतिप्रत्ययविभागसम्मोहो यथा अत एवाटिटदित्यत्र स्थाने द्विर्वचनपक्षे णिलोपानापत्तिरूपन्दूषणमभिहितम् तथाच सूपो धात्वित्यस्य कथं प्रवृत्तिरिति चेन्न उक्तभाष्यप्रयोगेणानस्मितादेशत्वस्य समुदाये कल्पनेनादोषात् एवञ्चाकृते द्विर्वचने स्थानिनि समुदायावयवे वा या या बुद्धिः सा सा ऽधुनापीति सुब्लुकः सिद्धिः अतएवाऽग्रे ऽग्रे वृक्षान् वृक्षानपचन्नपचन्नित्यादौ पूर्वरूपणत्वप्रतिषेधऽमुडागमादीनां सिद्धिः अत एवास्मिन्पक्षे तावेव सुप्तिङौ यौ ततः परौ सैव प्रकृतिराद्या समुदायपदत्वमेतेनेति षाष्ठे एकाच इति सूत्रे भाष्यकारोक्तम् ॥ सर्वपदार्थमाह धातूपसर्गेति एवमेव कल्पिते एव स्फोटः स्फु-

त्यर्थो ऽस्मादिति स्फोटः वाचकः शब्द स च हृदयप्रदेशे ऽभिव्यक्तः कर्णपिधानेन सूक्ष्यतरवाय्वभिघातेन स्वमात्रश्राव्यः प्रणवापरपर्यायनादशब्दबोध्यः आन्तरो व्यञ्जकतत्तद्वर्णप्रतिबिम्बयुक्तो ऽभिधीयते अधिकमन्यत्र स्फुटम् पद्यप्यष्टौ स्फोटा अन्यत्रोक्तास्तथापि निष्कर्षे वाक्यस्फोटस्येवावस्थानामित्यन्तं लेखः तस्य परमार्थत्वे साधकमाह लोकानामिति व्युत्पित्सूनामित्यर्थः प्रयोज्यप्रयोजकवृद्धव्यवहारेणावग्रहस्य तत्रैवोत्पत्तेः नन्वेवं शास्त्रेण तस्याप्रतिपादनेन शास्त्रानार्थक्यमायातीत्यत आह शास्त्रेणेति पाणिनीयेनेति शेषः पदस्येवेति तद्द्वारा वाक्यस्य चेत्यपि बोध्यम् प्रतिवाक्यं सङ्केतग्रहासम्भवाल्लघुभूत उपायः शास्त्रेण बोध्यते शाखाचन्द्रन्यायेन एवञ्च तत्तदवयवस्य तत्तदर्थानाञ्च प्रदर्शनं वाचकस्य समुदायस्य विशिष्टार्थस्य च बोधनतात्पर्यकमेवेति भावः स च समुदायो बौद्ध एव परम्परया बोध्यते ऽर्थोपि बौद्ध एव अत एव वंध्यासुत इत्यादेरुपपत्तिः क्रियापदरहितस्य बोधकत्वाभावादाह भवंतीति उपलालनाः वञ्चनस्थानापन्ना मिथ्याभूता इत्यर्थः पर्यवसितार्थमाह नास्विति तस्यारोपितत्वमुपपादयति लोकानामिति मुख्यार्थवत्त्वाभावादाह आरोपितेति गौतमादिभ्रमापगमायाह भाष्यकृदादिः त्रिषु प्राधान्याद्भाष्यकृत एवात्रादानुल्लेखः अत्र निर्विसर्गपाठो युक्तः शास्त्रकृच्छब्दस्य मूले समस्तत्वात् ननु प्रत्याहारान्हिक इत्यादिना स्पष्टमित्यन्तेन भाष्यकारमतस्य दर्शितत्वान्नैषेति शङ्कायां अनुत्थितिरत आह तद्धितविषय इति ॥ तथाच तद्धितविषये प्रत्याहारान्हिकेनोक्तमिति शङ्कायां उत्थितिरिति भावः वचनस्यौत्सर्गिकी प्रवृत्तिर्गमकसापेक्षेति प्रकृते गमकाभावात्कथमप्रवृत्तिरतं आह औत्सर्गिकेति अत्र गमकान्तरानुक्तेश्चकारस्य प्रयोगो ऽनुपपन्न इत्यत आह चः पञ्चम्यर्थेति पातादिति पञ्चम्यर्थेत्यर्थः एवञ्च चकारो व्यर्थ एवेति तात्पर्यम् अनेन कथञ्चिदितिपदेन एतेन तज्ज्ञापनस्य भाष्यसम्मतन्दृढतरम्फलन्नास्तीति ध्वनितम् इह किञ्चित्त्रपो इति न्यायसत्ताम्प्रदर्शयति इकोचीत्यादिना यद्यप्युत्तरार्थत्वात्तथाप्युत्तरार्थस्योत्तरत्रैव करणमुचितमिह करणाङ्किञ्चित्फलसाधकत्वात्किम् त्रपो इतीति तदर्थः अनित्यत्वेति एतेन तस्य निषेधस्य पाक्षिकी प्रवृत्तिरिति प्रदर्शितम् तत्फलन्त्वेङ् हूस्वादितिसूत्रस्थभाष्ये त्रपु इति प्रयोग एव इत्थं सतीति अर्थवद्ग्रहणस्यैव ज्ञापकत्वसम्भवे सती-

त्यर्थः लघुनेति एकस्यास्य फलद्वयसाधकत्वसम्भवे ऽनित्यत्वज्ञापनमात्रफलकं यत्तद् द्वयत्तद्व्यर्थमिति तात्पर्यम् ननु धातोः प्रातिपदिकसंज्ञायान्ततः सुबुत्पत्त्यापत्तिर्वक्तव्या द्वयोः संज्ञयोराकडारीयान्यत्वेन समावेशेपि परत्वात्सुब्विधायकशास्त्रस्य तत्प्रवृत्तेर्न्याय्यत्वात् लडादयः पुत्रीयतीत्यादौ सावकाशाः भुवादय इति धातुसंज्ञापि श्रियावित्यादावियङादिसम्पादकत्वेन चरितार्थेति नलोपमात्रस्य फलत्वेन प्रदर्शनफलमत आह सुबुत्पत्तिरिति निरवकाशतयेति अस्य सर्वथेत्वादिः एतेन पूर्वं लडादीनामुत्पत्तिरिति ध्वनितम् एतेनापवादविषये बाध्यप्रातिपदिकसंज्ञायाः कथम्प्रवृत्तिरिति शङ्काया नावकाश इति ध्वनितम् अपवादशब्दो ऽत्र बाधकपरः तिबादिभिरित्यादिशब्देन तत्स्थानिलडादेरपि सङ्ग्रहः येन नाप्राप्तिन्यायस्य नात्र विषयता सम्मति प्रातिपदिकसंज्ञाया अप्राप्तिविषये चारितार्थ्याभावात् गमकाभावादौत्सर्गिकैकवचनोत्पत्तिरपि नोक्ता ननु नलोपवारणस्य यथोद्देशपक्षेपि सम्भवेन विशिष्यात्र कार्यकालपक्षस्यैवोपादानमफलमित्याशङ्कां वारयितुमुपक्रमते नचेत्यादिना अत एव भाष्ये ऽप्रत्यय इत्यत्र पर्युदासप्रसज्यप्रतिषेधयोराशङ्काङ्कृत्वा ऽन्ये राजातक्षेत्यादौ प्रत्ययलक्षणेन प्रतिषेधः प्राप्नोतीति शङ्कायान्नञीति ज्ञापकान्न दोष इति साधारण्येनोक्तिः संगच्छत इति भावः फलाभावेनेति तस्मिन्काल इत्यादिः अप्रवृत्तिरिति तदानीमिति शेषः मूलस्योक्तभाष्यस्य च तात्पर्यन्दर्शयितुमादौ कैयटादिरीत्या ऽऽह अक्तेति अनित्यत्वादिति प्रकृतिप्रत्यापत्तिवचनेनानित्यत्वादित्यर्थः स्वसिद्धान्तरीत्याह असत्वेति पूर्वोक्तन्द्वितीयहेतुन्निराचष्टे भविष्यतीति तत्र पक्षे यथोद्देशपक्षे यथाश्रुतभाष्यस्य प्रकारान्तरेण सङ्गमने मूलकारोक्तरीत्या तद्योजनमुचितमित्याशयेनाह यथोद्देशेति पर्युदासे लाघवादधातुरिति पर्युदासे लक्ष्यसिद्धेः अहन्नित्यस्य राजेत्यस्यच लक्ष्यस्य सिद्धेः शङ्कासमाधाने नच कार्यकालपक्षे इत्यादिना शङ्कासमाधाने निर्दले निःसारे शङ्केति दोषस्येत्यादिः अत एव भाष्यकृता पर्युदासपक्षे राजातक्षेत्यत्र दोषशङ्का न कृतेति बोध्यम् तत्राहन्नित्यत्र तिङुत्पत्तेः प्राक् प्रातिपदिकसंज्ञाया व्यावर्तकतया धातुपर्युदासस्य सार्थक्यम् राजेत्यस्य तु प्राक्प्रवृत्तप्रातिपदिकसंज्ञया सुबुत्पत्त्या नलोपस्य प्रवृत्त्या च सिद्धिः पर्युदासेत्युपादानन्तु यदि प्रसज्यप्रतिषेधः स्यात्तदा

निषेधाश्च बलीयांस इति न्यायेन प्रत्ययोत्पत्तेः प्रागपि निषेधविषये बाध्यप्रातिपदिकसंज्ञायाः प्रवृत्तिर्न स्यादित्याशयेन एतेन कैयटोक्तिरपि पर्युदासपक्षे नञीत्यस्य ज्ञापकत्वोपपादनपरा निस्सारेति दर्शितम् नहीति अत्र हिशब्दो यत इत्यर्थे वर्तते पक्षयोः कार्यकालयथोद्देशपक्षयोः भाष्ये ध्वन्नित्वादिति तत्र ह्यग्नी इत्याहेत्यत्र प्राक् प्रगृह्यसंज्ञायाल्लस्य स्थाने गुरोरनृत इति प्लुते इदूदेदिति तपरकरणात्पुनः प्रगृह्यसंज्ञा प्रकृतिभावफलिका न प्राप्नोति प्लुतसंज्ञाकृतस्य प्रकृतिभावस्य त्वप्रवृत्तिरप्लुतवदुपस्थित इत्यप्लुतवद्भावस्य विधानात् प्रगृह्यसंज्ञाविधायकसूत्रदृष्ट्या प्लुतस्यासिद्धत्वन्तु न भवति कार्यकालपक्षे प्रगृह्यसंज्ञायाः प्लुतप्रगृह्येत्येतदेकवाक्यतया स्वरसन्धिश्रुत्वसम्पत्त्या सिद्धः प्लुतः स्वरसन्धिष्वित्यनेन सिद्धत्वस्य बोधनादित्याशंक्य यथोद्देशपक्षाश्रयणेन समाहितन्तेनास्य ध्वनित्वादित्यर्थः कश्चिदिति अत्रारुचिवीजन्तु यथोद्देशपक्षे यद्यप्युक्तरीत्या निर्वाहस्तथापि पक्षान्तरे सम्बुद्धिपदस्योक्तार्थज्ञापनपरत्वम्भाष्यकृदुक्तमनुपपन्नमेवेति वस्तुतस्तु पर्युदासाश्रयणेपि कार्यकालपक्षे ज्ञापनमावश्यकमेव न च स्वाश्रयापूत्ययान्तत्वेन तत्सिद्धिः अतिदिश्यमानधर्मविरुद्धस्वाश्रयधर्मप्रयुक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वादत एव रामानित्यादौ न स्वाश्रयापूत्ययान्तत्वनिमित्तकप्रातिपदिकत्वेन नलोपः एवञ्च शङ्कासमाधाने निर्दल इत्युक्तिरसंगतैवेति ॥ मूले कथमन्यथेति अन्यथा पूत्ययलक्षणेन पर्युदासस्य प्रवृत्तौ कथं स्यादिति योजना राजेत्यादेरुत्तरसूत्रेण सिद्धेः कथमन्यथेत्यनुपपन्नमित्याशङ्कान्निराचष्टे नचेत्यादिना अत एव उत्तरसूत्रेप्यपूत्यय इत्यस्य सम्बन्धादेव न सुपो लुगिति एतयोस्तद्धितान्तकृदन्तत्वे पूर्वान्तवद्भावेनैकदेशविकृतन्यायेन च बोध्ये ज्ञापकम् न ङिसम्बुद्ध्योरिति ज्ञापकम् ज्ञापनादिति अधातुग्रहणेनेति शेषः अन्यथा नञीतिसूत्रस्य विशेषापेक्षज्ञापकत्वे यत्तु दाक्षी दिदृक्षू इत्यत्रोभयत आश्रयणे नान्तादिवदिति निषेधादोषाभावेन नोत्तरसूत्रं ऽपूत्यय इत्यस्य सम्बन्ध इति तत्तुच्छम् पूर्वान्तवद्भावेन प्रातिपदिकत्वस्य परादिवद्भावेन सुप्त्वस्य बुद्ध्या लोपस्य प्रवृत्तिरित्येकत्रोभयोर्नाश्रयणमिति भवदुक्तन्यायविषयतायाः अभावात् अपूत्यय इत्यस्य सम्बन्धेतु तत्र पूत्ययपदङ्कृत्तद्धितातिरिक्तपूत्ययपरमेवञ्च कृत्तद्धितातिरिक्तपूत्ययान्तभिन्नस्य प्रातिपदिकसंज्ञेत्यस्य फ-

लिततया ऽस्य तत्त्वबुद्ध्या सा नेति भावः नचात्र ईइत्यादेः परादिवद्भावेन कृत्तद्धितातिरिक्तपूर्त्ययत्वबुद्धावपि स यस्माद्धितस्तदादित्वम्पूर्वान्तवद्भावेन वाच्यमित्युभयत आश्रयणमेकदैवेति निषेधः स्यादिति वाच्यम् रामाविल्वादाविवैकदेशविकृतन्यायेन क्षान्ते यस्माद्धितस्तत्त्वस्य बुद्ध्या परादिवद्भावेन ईकारादौ तदन्यपूर्त्ययत्वबुद्ध्या निषेधस्य प्रवृत्तेः नन्वत एवेत्यादुच्यत्कमसङ्गतम् सप्तम्यधिकरणे चेति निर्देशेन विभक्तयेकादेशस्यान्तवत्त्वाभावस्य ज्ञापनादित्यस्य वक्ष्यमाणतया पूर्वान्तवद्भावेन कृत्तद्धितान्तत्वस्य वक्तुमशक्यत्वादिति चेन्न उपायस्योपायान्तरा दूषकत्वमिति न्यायेन वक्ष्यमाणज्ञापकम्परित्यज्यात्रापूर्त्यय इत्यस्य कटितिस्मृतत्वेन तेनैव वारणस्य सुकरत्वपूदर्शनायेत्थमभिधानात् पूर्वोक्तरीत्या क्षान्ते यस्माद्धितस्तत्त्वम्परादिवद्भावेन द्विवचनत्वमत एवेदूदेदिति पूगुह्यसंज्ञेत्यवश्यं वाच्यमिति यथा तथैव तदतिरिक्तपूर्त्ययबुद्धिरपि भविष्यतीत्यस्य स्पष्टप्रतिपत्त्यर्थमेवमभिधानाच्च आवश्यकश्चोत्तरसूत्रे ऽपूर्त्यय इत्यस्य सम्बन्धः अन्यथा पूर्वसूत्रभाष्ये राजा तक्षेत्यत्र पूर्त्ययलक्षणेन पूर्त्ययान्तत्वात्प्रातिपदिकसंज्ञायाः कार्यकालपक्षे प्रतिषेधमाशङ्क्य न ङिसम्बुद्ध्योरित्यस्य पूर्त्ययलक्षणेनापूर्त्यय इति पर्युदासापूर्वसूत्रौ ज्ञापकत्वपूदर्शनकृतन्तद्विरोधः स्यात् सम्बुद्धौ प्रतिषेधस्य हेसुराजन्नित्यत्र समासत्वात्प्राप्तप्रातिपदिकसंज्ञायाः कार्यकालपक्षेपि सत्वेन नलोपनिषेधायावश्यकत्वादतस्तद्भाष्यसङ्गमनायोत्तरसूत्रे समासांशे ऽपूर्त्यय इत्यस्य सम्बन्धेन समासानवयवपूर्त्ययान्तभिन्नसमासस्य ग्रहणमित्यर्थो यथा तथा कृदाद्यंशेपीत्याशयः कल्प्यः अत एव समासग्रहणस्य नियमार्थत्ववर्णनपरभाष्यग्रन्थोपि सङ्गच्छते अन्यथा सुराजा सुतक्षेत्यत्र कार्यकालपक्षे नलोपाय समासत्वात्प्रातिपदिकसंज्ञाविधायकत्वेन समासग्रहणस्य चरितार्थतया तदसङ्गतिः स्पष्टैवेति सामान्ये पक्षपात इत्यस्य यथान्यत्रोपस्थितसामान्यधर्माक्रान्ते कार्यसिद्धिः स्वविषये इष्टस्य च सिद्धिस्तादृशार्थज्ञापकत्वमित्यर्थः अन्यथा स्वविषये यथा चारितार्थ्यन्तन्मात्रज्ञापकतापि स्यादिति राजपुरुषादिपदे पूर्वपदस्य पूर्त्ययान्ततया प्रातिपादिकत्वानापत्तौ नलोपानापत्तिरित्यर्थः नच तादृशविशेषापेक्षत्वे राजा तक्षेत्यस्याप्यसिद्धेर्जागरूकत्वाद्राजपुरुषपर्यन्तानुधावनमफलमिति वाच्यम् सूत्रोपस्थितेति विशेषणस्य विशेषत उ-

पादानेन सम्बुद्धिसंज्ञाविधायकं यदेकवचनं सबुद्धिरिति सूत्रस्थापि क्रोडीकारेणैकवचनविषयतायान्तात्पर्यन्नतु सम्बुद्धिसंज्ञकमात्रविषयकतायामित्यभिप्रायात् एवञ्च ङिसुविषयकता स्यादित्यस्य फलितत्वेन राजा तक्षेत्यस्य सिद्धिर्भविष्यतीति षष्ठ्यन्ते दोषोपपादनं युक्तमेव तथाच ज्ञापकसामान्यस्य यः स्वभावः स्वातिरिक्ते फलनिष्पादकत्वरूपः सो ऽपि यथा नङीत्यस्य निर्वहति तथैव ज्ञापनं युक्तमिति भावः ॥ एवम्प्रकारस्य ज्ञापकविषये ऽन्यत्र प्रक्लृप्तत्वप्रदर्शनायाह स्पष्टा चेयमिति इयं रीतिः ज्ञापकानां सजातीयापेक्षत्वमङ्गीकृत्य स्वविषये चारितार्थ्यमिति रीतिः इत्यत्र भाष्य इति तत्र हि सार्वधातुकपदस्य प्रयोजननिरूपणावसरे तदभावे कर्ता हर्तेत्यादौ तृजादेरपि ङित्वप्राप्तिशङ्काया आर्द्धधातुकेषु चङ्ङादिषु ङित्करणरूपज्ञापकेन निरासङ्कृत्वा सजातीयापेक्षत्वेन धातुभ्यो विहिता ये प्रत्ययास्तद्विषयकत्वशङ्कां सार्वधातुके ऽव्याप्त्यापत्त्या ऽर्द्धधातुकत्वेन साजात्यमादाय नियमकरणेन निरस्य यद्येवङ्कल्प्यते तदा चङ्ङौ लुङ्विकरणानां ज्ञापकौ नजिङ् वर्तमानकालानामप्यङौणादिकानान्तङ्शब्दो घञर्थानां ज्ञापको भविष्यति तथाच तृजादेर्ङित्वापत्तिरिति सार्वधातुकग्रहणङ्कर्तव्यमित्यभिहितम् एवञ्च यथा बाधकसत्त्वात्तत्र न सामान्यापेक्षत्वङ्किन्तु विशेषापेक्षत्वेन चारितार्थ्यमित्युक्तन्तथा ऽत्रापि बाधकसत्त्वे विशेषापेक्षत्वन्तदभावेतु सामान्यापेक्षत्वम्भविष्यतीति तात्पर्यम् ॥ भाष्ये चेदमिति अत्र चस्त्वर्थे इदम् प्रत्ययलक्षणेन प्रतिषेधाभावे नङीतिसूत्रस्य ज्ञापकत्वम् स्पष्टम् कण्ठरवेणोक्तम् ननु सुप्सिपोः प्रातिपदिकत्वे पदत्वापत्तौ षत्वानापत्तिरूपो दोषः सुबुत्पत्तावेव वाच्यः स तु न सम्भवति गमकाभावेन सुबुत्पत्तिरेव न सम्भवतीत्यत आह तयोरिति तत्सामर्थ्यादिति प्रातिपदिकसंज्ञासामर्थ्यादित्यर्थः तथाचेदमवगमकमिति भावः अन्येन तूक्तन्तयोर्लुकापहारङ्खण्डयति विभक्तेरर्थस्येति अत एव ह्रस्वो नपुंसक इति सूत्रभाष्ये काण्डे रमते इत्यनयोरर्थयोः सुबर्थक्रियारूपयोर्लिङ्गसंख्याभ्यां योगो नास्ति विचित्रत्वात्पदार्थशक्तीनामित्यभिहितम् तत्सत्त्वे त्विति नपुंसकत्वसत्त्वेत्वित्यर्थः अत्र तु नाप्रागुक्तभाष्यविरोधापत्तिरूपा ऽरुचिर्ध्वनिता मूले तत्रैवेति हरिषु करोषीत्यत्रैवेत्यर्थः नन्वत्र नौत्सर्गिकैकवचनापत्तिर्गमकाभावात् नच पूर्ववत् प्रातिपदिकसंज्ञासामर्थ्यमि-

ति शङ्क्यम् फिट्स्वरप्रवृत्त्या साफल्यात् सुबिति पकारस्य प्रत्याहारनिष्पादकतया सिबादेः पित्त्वस्याङित्वसम्पादकतया चारितार्थ्यसम्भवात् न च समासस्येत्यन्तोदात्तविधानसामर्थ्यात्सखण्डेषु फिट्स्वराप्रवृत्तिरिति वाच्यम् पदसंज्ञकपूर्वोत्तरभागकसमुदायविषये ऽप्रवृत्तिज्ञापनेन तस्य साफल्यादत आह सुप इति तिङन्ते दोषमाह पचेरन्निति आदिना सर्वस्मिन्नित्यस्य सङ्ग्रहः मूले इष्टसिद्धेरिति प्रत्ययान्तपर्युदासेनेष्टसिद्धेरित्यर्थः अतिदेशेन अन्तवत्त्वातिदेशेन एतेन लक्ष्ये लक्षणं सकृदेव प्रवर्तत इति न्यायाविषयत्वन्ध्वनितम् अत्रातिदेशेनेतिकथनेनौपदेशिकप्रातिपदिकत्वस्याप्रवृत्तिः सूचिता परादिवत्त्वेनैकारे प्रत्ययत्वस्यैकदेशविकृतन्यायेन ङान्ते तत्त्वस्य सत्त्वेन प्रत्ययान्तत्वस्यार्थसमाजग्रस्तत्वेन तन्निषेधात् ननु ह्रस्वो नपुंसक इति सूत्रस्थपूर्वोक्तभाष्यादलिङ्गत्वेन निर्देशस्योपपत्त्या न तस्य ज्ञापकत्वमिति चेन्न अभ्युपेत्यवादेन मूलकृता तथाभिधानात् ॥ प्रातिपदिकग्रहणस्य ज्ञापकत्वमुपपादयति नपुंसकेति नपुंसकवृत्तित्वं वाच्यवाचकभावसम्बन्धेन लाभे सिद्धे लाभे जाते अन्यथा सामान्यापेक्षज्ञापकत्वानङ्गीकारे अप्रत्ययः किमित्यारभ्यास्त्वित्यन्तो मौलग्रन्थो ऽयुक्त एवेति ध्वनयितुमाह यद्यपीत्यादि सत्त्वप्रधानेति कल्पितसत्त्वप्रधानकेत्यर्थः एवञ्च यदर्थे शास्त्रे नपुंसकङ्गुणः प्रसिद्धस्तादृशस्य प्रातिपदिकस्य तादृशे ऽर्थे वर्तमानस्य ह्रस्व इति सूत्रार्थः ननु मूलोक्तमुपायान्तरमस्त्वित्यत आह मूलोक्तार्थ इति दुर्निरूपत्वेति तथाच ज्ञापकतैवायुक्तेति भावः प्रागुक्तदोषान् क्रमेणोद्धरति सङ्केतेति गमकं विना साधकं विना यथा ऽव्ययेभ्यः स्वादुत्पत्तौ अव्ययादाप्सुप इति गमकन्तथात्र नास्तीति भावः प्रत्ययान्तपर्युदासस्य हरिषु करोषीत्यादौ समुदायप्रातिपदिकत्वापत्तौ लुगापत्तिरिति प्रयोजनन्निरस्यति धातुसाहचर्येणेति धात्ववयवस्य यादृशस्य सुपो लुग्भवति तादृशस्यैव प्रातिपदिकावयवस्य तस्य लुग्भविष्यति साहचर्यात् ननु साहचर्यं साहश्यन्तच्च साधारणधर्मप्रयोज्यमेवान्यत्र स्वसम्प्रकृतेतु तादृशो धर्मः क इत्याकाङ्क्षायामाह सुबित्यादि समभिव्याहृतस्येत्यनन्तरं सुप इति शेषः व्यधिकरणे षष्ठ्यौ प्रथमषष्ठ्यन्तार्थः सुप इत्यत्र या षष्ठी तत्प्रकृत्यर्थस्य विशेषणम् स चार्थस्तत्प्रकृतिकत्वमेव एवञ्च सुप्तिङितरसमभिव्याहृतप्रातिपदिकप्रकृतिको यः सुप् तस्य लुगिति फलि-

तम् अस्ति चायन्धर्मः पुत्रीयतीत्यादौ तिङितरः क्यच् तत्समभिव्याहृतम्प्रातिपदिकम्पुत्रशब्दस्तत्प्रकृतिकत्वन्धात्ववयवस्येति लुकः प्रवृत्तिः तथा राजपुरुषइत्यादावप्यस्ति सुप्तिङितरेत्यत्र सुपस्तत्तद्व्यक्तित्वेन निवेशात् सुप्तिङ्पदञ्च तदन्तपरम् चालनीन्यायो ऽत्र बोध्यः एवञ्च राजन्शब्दप्रकृतिकसुबन्तभिन्नः पुरुषशब्दस्तत्समभिव्याहृतम्प्रातिपदिकं राजन्निति तत्प्रकृतिकत्वं ङसो यथा तथा खन्तभिन्नराजन्शब्दसमभिव्याहृतम्प्रातिपदिकम्पुरुषेति तत्प्रकृतिकत्वं सोरित्युभयोर्लुकः सिद्धिः अत्र सुप्तिङितरसमभिव्याहृतत्वन्न तेन पूर्वोत्तरभावरूपम् पुरुषाभ्यामित्यादौ सुब्भिन्नो भकारस्तत्समभिव्याहारस्य पूर्ववृत्तित्वरूपस्य पुरुषशब्दे सत्वेन तत्प्रकृतिकस्य भ्याम एव लुगापत्तेः नापि तदर्थान्वितस्वार्थबोधकत्वं समभिव्याहारः अत्यन्तस्वार्थिकताद्धितान्तावयवस्य सुपो लुगनापत्तेः राजपुरुषः सुंदर इति वाक्यावयवस्य राजपुरुषशब्दप्रकृतिकसुपो लुगापत्तेश्च किन्तु सुप्तिङितरसमभिव्याहृतत्वन्तदघटितप्रकृत्तिवृत्तिघटितत्वरूपं विवक्षितम् एवञ्च सुप्तिङितरघटितवृत्तिघटकप्रातिपदिकप्रकृतिकसुपो लुगिति सूत्रार्थः नचैवमपि राजपुरुष इत्यत्र समुदायप्रकृतिकसुबन्तभिन्नो राजन्शब्दः पुरुषशब्दो वा तद्घटितावृत्तिः समुदायरूपा राजपुरुष इति तद्घटकत्वस्य तदविषयकप्रतीत्यविषयत्वस्य तत्रैव सत्वेन तत्प्रकृतिकसुपो लुगापत्तिरिति वाच्यम् वृत्तिघटकत्वन्न स्वाविषयकप्रतीत्यविषयत्वमात्रम् किन्तु स्वाविषयकप्रतीत्यविषयवृत्तिकत्वे सति ह्यत्यविषयकप्रतीतिविषयत्वरूपमिति न कश्चिद्दोषः अत्र तिङोभिधानं तिङन्तावयवकाच्समभिव्याहृतस्य सुपः पुत्रीयतीत्यादौ लुकः प्रसिद्धत्वसूचनाय वस्तुतः सुबितरेत्येवास्तु एवञ्च हरिषु करोषीत्यादौ लुगप्राप्तिः स्फुटैवेति भावः ॥ सूत्रशेषे प्रकृतसूत्रशेषे ध्वनितमिति तत्र हि अप्रत्यय इत्यत्र किम्पुनरयम्पर्युदासः यदन्यत्प्रत्ययादिति आहोस्वित्प्रसज्यो ऽयम्प्रतिषेधः प्रत्ययो नेति कश्चात्र विशेषः अप्रत्यय इति चेतिचैकादेशे प्रतिषेधो ऽन्तवत्वात्काण्डे कुड्ये अस्तु तर्हि प्रसज्यप्रतिषेधः प्रत्ययो नेति न प्रत्यय इति चेद्ङेकादेशे प्रतिषेधः आदिवत्वादित्युक्तम् परस्य कार्ये प्रतिषेधे कर्त्तव्ये परादिवद्भावः स्यात्तथाच प्रतिषेधापत्तिरिति भावः एवञ्च ब्रह्मबन्धुरिति न सिध्यति इत्थम्पक्षद्वये दोषमभिधाय द्वितीयपक्षे आचार्यप्रवृत्तिर्ज्ञापयति उत्पद्यन्ते ऊङन्ता-

त्स्वादय इति यदयन्नोङ्धात्वोरिति विभक्तिस्वरस्य प्रतिषेधं शास्तीत्यनेन दोषोद्धारं कृत्वा अथवा पुनरस्तु पर्युदासः ननु चोक्तमप्रत्यय इति चेतिचैकादेशे प्रतिषेधो ऽन्तवत्वादिति प्रसज्यप्रतिषेधेप्येष दोषः. द्वे ह्यत्र प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि गृह्यते च प्रातिपदिकाप्रातिपदिकयोरेकादेशः प्रातिपदिकग्रहणेन तस्मादुभाभ्यामपि वक्तव्यं स्याद्भस्त्वो नपुंसके यत्तस्येति किञ्च नपुंसके नपुंसकं नाम गुणः प्रातिपदिकस्येत्युक्तन्तेन ध्वनितमित्यर्थः तत्र कैयटः यत्तस्येति विभक्तयन्तञ्च शक्तिसंज्ञयाप्रधानम् नच तयोर्लिङ्गयोगः नवान्तवद्भावेनार्थः शक्यो ऽतिदेष्टुमिति न भवति हूस्व इति नन्वेवमपि पचेरन्नित्यादौ दोष एवेत्यत आह पचेरन्निति लाघवात् ज्ञानलाघवात् केवलस्यातथात्वादिति मूलमसङ्गतम् ॥ यस्माद्विहित इत्येतद्घटितपरिभाषाया अधिकग्रहणाभाव एव प्रयोजनन्तु व्यपदेशिवद्भावस्य तया बाध इति केनचिदुक्तन्तदसङ्गतमिति सूचयन्नाह यस्माद्विहित इति किञ्चैतादृशे विषये मन्त्रेषु सर्वेषामित्यादौ षत्वनिषेधाकरणेन व्यपदेशिवद्भावो नेत्यपि बोध्यम् उक्तज्ञापकानुसन्धानेन शङ्कते यद्यपीति अत एव ॥ अशास्त्रीयस्याप्यतिदेशादेव व्यतिसे इत्यादावीति आदिना व्यतिधे इत्यस्य सङ्ग्रहः फागिति यञिञोश्चेत्यनेनेति शेषः सामान्येनोक्तस्यापि स्थूप्रतिपत्त्यर्थमुक्तेः आह तेनेति इयं रीतिरिति तत्र हि ढौकितेत्यादौ नान्तरीयकत्वादुपदेशसत्वेपि न व्यपदेशिवद्भावेनैजन्तत्वमिति तेनोक्तम् अत एव असहाय एव व्यपदेशिवद्भावस्य प्रवृत्तिस्वीकारादेव तथासति ससहायेप्यनयोर्व्यपदेशिवद्भावस्य प्रवृत्तिस्वीकारे साच परिभाषा लोकन्यायसिद्धेति लोके यादृशी व्यवस्था तादृश्येवात्र शास्त्रे तत्परिभाषाविषय इत्याह लोक इति अत एव ससहाये तदप्रवृत्तेरेव नन्वेवं सति निजध्वाङ्वयवेकारमात्रे व्यपदेशिवद्भावः ससहायत्वान्न स्यादिति निजौ चत्वार एकाच इति भाष्यमनुपपन्नमत आह निजौ चत्वार इतीति तात्पर्यमिति प्रत्ययपर्युदासाङ्गीकर्तुर्मूलकृत इति शेषः एतेनारुचिर्ध्वनिता तामुद्घाटयति वस्तुतस्त्वित्यादिना अत्र सूत्रेपीति अपिनोत्तरसूत्रसङ्ग्रहः ॥ तेनैकरूपता द्वयोर्भवति मूलरीत्यातु वैरूप्यं स्फुटमेव ननु भवदुक्तार्थत्वमलौकिकविग्रहवाक्यस्य नास्तीति तस्यैषा न स्यादत आह एकेति उक्तपर्युदासलभ्यार्थे विभक्तिपदमेतत्साध्यप्रत्ययो-

पलक्षणन्तेन टाबादिप्रकृतिसङ्ग्रहः स्वोक्तार्थस्य भाष्यकाराभिमतत्वसूचनाया-
याह ध्वनितमिति सुप्तिङन्तमिति सूत्रभाष्ये कृत्तद्धितेति सूत्रे ऽन्त इत्य-
स्यार्थवद्ग्रहणानुवृत्त्या लाभप्रतिपादनपरभाष्यस्योत्तरसूत्रे एकार्थीभावेन लौ-
किके प्रयोगे प्रसिद्धत्वतात्पर्यकत्वं यन्मूलकारसम्मतन्तदपि नेत्याह सु-
प्तिङन्तमिति अतैव उभयोरप्यर्थवत्त्वमेकरूपमेवेत्यत्रैव अधिकमन्यत्र स्पष्टम्
अन्यथा बहुपटव इति समुदायस्य प्रातिपदिकसंज्ञाया अस्वीकारे स्या-
दिति चित इति सूत्रे सप्रकृतेरिति वार्तिकादिति शेषः समासेति तृ-
तीयाप्रभृतीत्यनेनेत्यादिः एकस्वरश्रवणमिति समासस्येत्यनेनैकस्यान्तोदात्त-
त्वस्य श्रवणमित्यर्थः फिष इत्यस्य तु सखण्डे ऽप्रवृत्तिरिति भावः लौ-
किकप्रयोगे स्वरस्य दुर्लक्ष्यत्वादाह दधीति पक्षे समासाभावपक्षे प्रकृति-
भावेति न समास इति निषेधस्य तदा ऽप्राप्तेरिति भावः नच दधि
उपदंशमित्यत्र दधिशब्दात्तृतीयासत्त्वेन तदन्तस्य भुजिक्रियायां सम्बन्धा-
त्कथमत्र णमुलिति वाक्यम् स्वरायान्द्वितीयायाञ्चेति णमुलो ऽत्र सत्वात्
अत एव कृद्ग्रहणे इति परिभाषायाङ्कृत्प्रकृत्यर्थनिरूपितकारकस्य ग्रह-
णेपि विशिष्टस्य कृदन्तत्वनिर्वाहः प्रकृतेरपेक्षणेति एतेन विभक्तीतरानपे-
क्षत्वभावः सूचितः ननु लिट्धुगित्याभ्याञ्जायमानशाब्दबोधे कर्तुः प्रा-
धान्येन भानान्न प्रधानीभूतक्रियावाचकत्वमिति कथमत्र धातुत्वमत आह
कर्तृरूपेति अशनेरिति क्रियामात्रेत्यस्य प्राधान्येनेत्यस्य वा धातुसंज्ञाविधा-
वनिवेशाद्धातुत्वाक्षतेः अतएवाल्पसन्तेति सूत्रे धातुपर्युदासस्य सार्थक्यम्
स्त्रीप्रत्यय इति परिभाषाया न तावन्मात्रत्वमिति न्यूनताभङ्गायाह अनु-
पसर्जनेति तस्य स्त्रीप्रत्ययस्य तन्निषेधः तदादिनियमनिषेधः अभिमान
इति परिभाषायाः स्त्रीप्रत्ययमात्रग्रहणे प्रवृत्तिरिति कल्पनायान्न प्रमाण-
मिति तद्भावः तत्कार्येति प्रातिपदिकत्वकार्येत्यर्थः तद्विशिष्टे स्त्रीप्रत्यय-
विशिष्टे स्त्रीप्रत्ययमात्रस्य ग्रहणमत्र नास्तीत्येव वक्तव्ये ऽन्तरङ्गस्यापीत्या-
दुक्तिर्विफलेत्यत आह शङ्कितेति शेषत्वमिति एतेनास्यामपि परिभाषा-
यामङ्ग्रहणपदसम्बन्ध इति सूचितम् फलितार्थमाह एवञ्चेति सा प्रत्ययग्र-
हणपरिभाषा प्रत्ययग्रहण एव प्रत्ययमात्रग्रहण एव अत एव गोमतो नि-
ष्क्रान्ता निर्गोमतीत्यत्रोक्तिरिति ङीप्सिद्धिः इत्युच्यते इति अत एव
पुरुषो ऽस्ति ते युवते इति समुदायस्य तिप्रत्ययरूपतद्धितान्तत्वात्प्राति-

पदिकसंज्ञा न यदि समासग्रहणकृतनियमेनैतद्व्याहृत्तिरित्युच्यते तदा मक्त्या परमगतिरित्यत्र कर्तृकरणे कृता बहुलमिति समासाभावरूपम्फलम्बोध्यम् न दोष इति. न प्रातिपदिकत्वासिद्धिरूपो राजकुमारीत्यत्र दोष इत्यर्थः ध्वनितञ्चेदमर्थवत्समुदायानां समासग्रहणन्नियमार्थमित्युक्त्या भाष्यकृता अत एवाह दिगिति इत्यादाविति अत्र नञो दृश्यर्थे सम्बन्धादसामर्थ्यन्द्रष्टव्यम् स्वश्विधायकसूत्रस्थ मानत्वमुपपादयति अन्यर्थेति समास इति अमूर्येत्यादावित्यादिः ननूपपदं विभक्त्यन्तत्वसूर्यशब्द एवेत्यत आह ॥ तत्प्रकृतिक इति सुप् चात्र द्वितीयैव प्रकृत्यर्थस्य कर्मसाकांक्षत्वाल्ललाटसाहचर्याच्च तस्मिन्निति शशादिशृङ्गे एतैरन्तासतो बुद्धिसत्ताविशिष्टस्यार्थस्य बोधनात् स्वभाव्यनुरोधेन बौद्धस्यार्थस्य स्वीकारात् अधिकमन्यत्र स्पष्टम् येषां रथन्तरादिशब्दानामवयवा अत्यन्तनिरर्थकास्तेषामप्यन्यत्र दृष्टार्थारोपेण प्रातिपदिकत्वात्सुबुत्पत्त्या साधुत्वान्वाख्यानम्बोध्यम् ॥ ननु यदि समासग्रहणेन मौलो नियमो बोध्यते तदा पूर्वसूत्रस्थस्यार्थवत्पदस्य दशदाडिमानीत्यादिसमुदायव्याहृत्तिपूदर्शनपरभाष्यविरोध इत्यत आह अर्थवतीति तत्र साधकमाह सजीतीयेति उत्तरसूत्रेप्यर्थवत्पदानुवृत्तेः पञ्चनावाप्रिय इत्यादौ पञ्चनावेत्यादेस्तदभावस्य प्रयोजनत्वमन्यत्राभिहितमेव खण्डनकारीयन्दोषमुद्धरति प्रत्ययो नेत्यस्येति इदं साजात्यप्रदर्शनाय न दोषः न समुदायस्य प्रातिपदिकत्वापत्तिरूपो दोषः तत्र जन्मवानित्यादिसमुदाये तत्र औपगवादौ कृत्रिमाकृत्रिमन्यायेन हि पदमित्यत्रेति एतेन शक्तस्यान्यमते पदत्वस्य सुप्सिद्धत्वेपि न क्षतिः अत्र पक्षे परममूलोक्तनियमाकारपक्षे दोषः इदं समुदायस्य प्रातिपदिकत्वापत्तिरूपो दोषः वस्तुतः साजात्यप्रदर्शनमुक्तरूपेण न सम्भवतीत्याह वृषण्वस्त्वित्यादिना ननु यद्येति मूलोक्तद्वितीयनियमस्वीकारे डित्थाद्यव्युत्पन्नानां संज्ञानापत्तिः अर्थवत्सूत्रन्तु बहुपटव इत्यादौ चरितार्थम् नच प्रकृतिप्रत्ययभावानापन्नपदसङ्घातविषयको नियमो ऽस्त्विति वाच्यम् गवित्ययमाहेत्यत्र हृषण्वसुरित्यत्र च यो दोष उक्तस्तस्य तदवस्थत्वात् किञ्च लाघवादर्थवत्समुदायस्य चेत्समासस्यैवेत्येवास्तु गवित्ययमाहेत्यादावनुकरणस्यानुकार्येणार्थेनार्थवत्वाद्व्याहृत्तिः तथा राजा इयानित्यादेश्च नियमेन सा न नियमस्यार्थवत्समुदायविषयकत्वस्वीकारादेव ज-

न्यवान् बहुपटव इत्यादीनां सङ्ग्रहः। नचैवं सरूपसूत्रस्थभाष्ये समुदायादेकविभक्तावेकशेष इति पक्षे भिक्षा आम् इति स्थितिरुक्ता तद्विरोध इति वाच्यम् तस्य भाष्यस्यैकदेशयुक्तित्वात् किञ्च परमसूत्रोक्तधर्मेण न सर्वसमाससाजात्यम् अलुक्समासे पूर्वभागस्याप्रकृतित्वात् विभक्तिपूर्वभागे तत्र प्रकृतित्वमस्तीति चेत् उत्तरस्तु प्रत्ययो नेत्येतद्विरोधादिति चेत्तथैवाह प्रकृतसूत्र इति ॥ अत्र भाष्यकारीयवाक्ये तत्रेण सकृदुच्चरितस्याप्यर्थवत्समुदायपदस्यार्थवता यः समुदायः स्वयमर्थवांश्च तत्परत्वविवक्षया षष्ठीतत्पुरुषस्य फलमव्युत्पन्नडित्थादिसङ्ग्रहः एवमर्थवतः प्रकृतिप्रत्ययसमुदायस्य च सः कर्मधारयफलन्तु समासग्रहणस्य नियमार्थत्वोपपत्तिरन्यथा ऽर्थवतामनर्थको यः समुदायो ऽनर्थकसमासो ऽश्राद्धभोजी ब्राह्मणो ऽलवणभोजी चेत्यादिस्तेषाम्प्रातिपदिकसंज्ञानिष्पादकत्वेन समासग्रहणचारितार्थ्येन नियमत्वानुपपत्तिरेव किञ्च कर्मधारयासत्वे पञ्चगवधनाद्येकदेशस्यार्थवत्समुदायरूपसमासत्वात्तत्रापि स्यादिति तद्व्यावृत्तिरपि एतस्य कर्मधारयस्य लाभस्तु नियमस्य सजातीयापेक्षत्वमित्यनेन नन्वेवम्बहुपटवादौ दोष एवेत्यत आह तत्रेति अर्थद्वयविवक्षायाम् स्वातन्त्र्येणापीति अत्रापिः पारतन्त्र्यसमुच्चायकः स्वातन्त्र्यञ्च तावन्मात्रस्याप्यर्थबोधनाय पृथक्प्रयोगयोग्यत्वम् प्रयोगार्हार्थवदित्यस्य प्रयोगार्हमर्थवदित्यर्थः ननु गवित्ययमित्यादेरधुना व्यावृत्तिर्न स्याद्गोइत्यादेरिति शब्दसमभिव्याहारेणैव प्रयोगादत आह गवित्ययमिति तत्त्वमिति तावन्मात्रस्य पृथक्प्रयोगार्हत्वम् खाद्क्त्व इत्यादौ यथा बहुपटवः पुत्रकाम्य इत्यादेः सङ्ग्रहमाह प्रकृतीति अभावादिति निरुक्तस्वातन्त्र्यभावस्य सत्त्वेन विशेषणाभावप्रयोज्यविशिष्टाभावस्य तत्र सत्त्वमिति भावः नचैवङ्कुम्भकारादुच्चपपदसमासासङ्ग्रहः उपपदा सन्निधानेनोत्तरपदस्याप्रयोगादिति वाच्यम् वेदव्यासाद्वयवस्य व्यास इत्यस्य प्रयोगदर्शनेनारण्यकदण्डवत्स्वरूपयोग्यत्वरूपयोग्यतायां अनपायात् एषाम्प्रातिपदिकसंज्ञा तु पूर्वसूत्रेण कृदन्तत्वेन वा स्वोक्तार्थस्य सप्रमाणत्वध्वननायाह भाष्य इति सरूपसूत्रे इति पाठः क्वाचित्कः अर्थवत्सूत्रभाष्ये एव सुबंतानामिति प्रतीकमुपादायैतच्चोपलक्षणमित्यादिना भेदसंसर्गद्वारकेतिशब्देन तेन कथनात् इदमेव स्वातन्त्र्येणापि प्रयोगार्हार्थवतामित्येव पदार्थयोर्विभागेनापि प्रयोगे कु-

ते सतीतरसंसर्गाकाङ्क्षाभेदसंसर्गः स द्वारभूतो यस्य विशिष्टार्थवत्त्वस्य तदुच्चकानामिति तद्वाक्यार्थः ननु मूले पुरुषाविल्यादेः संज्ञाप्राप्तिरुद्भाविता सा न सङ्गच्छते समुदायस्य प्रत्ययान्तपर्युदासेन व्यावृत्तिः स्यादत आह परस्येति आविल्यस्येत्यर्थः प्रत्ययान्तपर्युदासबोधकशब्देपि प्रत्ययपदेन यस्माद्विहितस्तदादेरित्यस्योपस्थितिरस्त्येवेति भावः अत एव भाष्ये दशदाडिमानीत्यादिवाक्यस्थानर्थे कस्यार्थवत्पदव्यावर्त्यत्वोक्तिः सङ्गच्छते यत्तु परस्येत्यनेन नियमस्याद्यस्याप्रवृत्तिर्ध्वन्यते तस्मिन्नुत्तरस्तु प्रत्ययो नेत्यस्य निवेशेपि परस्य तत्प्रकृतिकप्रत्ययान्तत्वाभावादिति व्याख्यानन्तत्तु स्वीयसिद्धान्तविरुद्धम् यत्र सङ्घाते पूर्वो भागः पदमित्यनेनैव नियमाप्रवृत्तिलाभात् नचोत्तरपदत्वे चेति निषेधेन पुरुषेत्यस्य पदत्वन्नास्तीति वाच्यम् उत्तरपदस्य कार्यित्व एव तस्य निषेधस्य पूर्वत्वङ्गीकारात् ॥ छदन्तत्वं वाक्यस्य परिभाषयोपपादितन्तच्च न सङ्गच्छते यत्क्रियायुक्ता इति न्यायबल इव पूर्वासत्या कारकत्वापि तद्धात्वर्थक्रियासम्बन्धिन एव ग्रहणेनास्य भुजिम्पूत्येवकारकत्वादित्याशङ्कान्निवारयति नचेत्यादिना समाधानं सूचयति मूलकोति अपिर्भुजिनापि सम्बन्धं व्यनक्ति अन्वयः शाब्द इति शेषः पूर्वानेति तिङन्तार्थक्रियायाः समुदायजन्यशाब्दबोधे विशेष्यतया भानादस्याः प्राधान्यम् पूर्वानानुरोधीति पूर्वानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् शक्तिर्गुणाश्रया तत्र पूर्वानमनुरुध्यत इति न्यायात् तम्पूत्यपीति उपदंशम्पूतीत्यर्थः ननु नियमशास्त्रस्य निषेधमुखेन पूर्वत्तिरिति पक्षे निर्वाहेपि विधिमुखेन पूर्वत्तिरिति सिद्धान्तिते पक्षे कथन्निर्वाहोऽत आह नियमस्येति अर्थतः प्रयोजनतः निषेधेपि तात्पर्ये उभयप्राप्तौ कर्मणि षष्ठ्याः प्रतिषेधे ऽकादिप्रयोगे ऽप्रतिषेध इति वार्तिकं सङ्गच्छते इति भाव इति परत्वादिति वदतो भाव इत्यर्थः वस्तुतो निषेधे तात्पर्ये निषेधाश्च बलीयांस इति कर्मणिङिति सूत्रपठितवार्तिकरीत्या बलवत्त्वसम्भवे परत्वादित्येतन्न युक्तामित्याशयेनाह निषेधानामिति इत्यपीति अपिना विधिमुखेन पूर्वत्तिरिति पक्षे नियमस्य यत्र पूर्वत्तिस्तत्र सामान्यशास्त्रस्य तात्पर्यसङ्कोचः क्रियत इत्यपि पक्षो ऽस्तीति प्रकृते बाध्यसामान्यचिन्तया ऽर्थवत्पदस्यार्थवत्पदसमूहान्यपरत्ववत्कुदंशस्यार्थवत्पदसमूहान्यकुदंतपरत्वमित्यपि सम्भवतीति निषेधस्य यत्फलन्तस्यार्थतो लाभ-

स्तथाच न प्रकृते ऽतिप्रसङ्ग इति बोध्यम् स्वोक्तार्थः सिद्धांतसम्मत एवेति ध्वनयितुमाह स्पष्टश्चेदमिति तत्र हि गतिकारकोपपदानाङ् कृद्भिः सह समासवचनम्प्राक् सुबुत्पत्तेरिति परिभाषाया प्रयोजनम्प्रथमतः साङ्कूटिनम् व्यावक्रोशीत्येतदभिहितम् अत्राद्ये ऽभिविधौ भाव इनुणतीनुण् प्रत्यये ऽणि नुण इत्यण्प्रत्ययस्य सुपश्च प्रसङ्गे अण्प्रत्ययस्य स्वार्थिकत्वेन सुबुत्पत्तेः प्रागन्तरङ्गत्वादुत्पत्तिर्भवति यदि तदा कूटिन्निवस्यैवादिवृद्धिः स्यात् सुबुत्पत्तेः प्राक् समासेतु अन्तरङ्गत्वात्पूर्वं समासः अण्प्रत्ययस्त्वनुणन्तत्वसापेक्षत्वाद्बहिरङ्ग इति विशिष्टादेवाण्प्रत्ययः यदि समासे सुबुत्पत्तेरपेक्षा तदा सुबुत्पत्तेः प्राक् समासाप्राप्त्या सुपश्च प्राक् पूर्वोक्तरीत्या ऽण्प्रत्यये रूपासिद्धिः स्फुटैव द्वितीयेतु कर्मव्यतिहारे णच् स्त्रियामिति णाचि समासोत्तरं णचः स्त्रियामञ्चिति विशिष्टादञ्चि रूपसिद्धिरन्यथा ऽस्यापि पूर्ववदसिद्धिः स्यात् ततः सत्यामप्येतस्याम्परिभाषायाम्प्रत्ययग्रहणपरिभाषया ऽवयवादुत्पत्तिः प्राप्नोतीत्याशङ्कायाः कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषाया निराकरणे कृते गतिकारकोपपदानामिति परिभाषायाः साङ्कूटिनमित्यादिप्रयोजनन्तर्हि न स्यादकृत एव समासे कृद्ग्रहणे परिभाषया सङ्घातात्तद्धितोत्पत्तिरित्याशयेन नैतदर्थाः परिभाषायाः प्रयोजनम्भवति एतयैव सिद्धमिति भाष्यकृतोक्तम् अस्याः गतिकारकोपपदानामिति परिभाषायाः एतया कृद्ग्रहणपरिभाषया ततो न सिध्यति किङ्कारणमप्रातिपदिकत्वादित्याशङ्क्य कृदन्तत्वात्प्रातिपदिकसंज्ञा भविष्यतीति समाधाने परेण कृते सति कृद्ग्रहणपरिभाषा प्रातिपदिकसंज्ञायान्नोपतिष्ठते मूलकेनोपदंशम्भुक्त इति वाक्येपि लुक् प्रसज्येतेत्युक्तम् तत्राप्रातिपदिकत्वादिति प्रतीकमुपादाय प्रत्ययग्रहणे यस्मादिति परिभाषासत्वान्न कृदन्तत्वात्सार्थवत्सूत्रेणापि न समासग्रहणकृतनियमेन सङ्घातस्य प्रातिपदिकसंज्ञानिषेधादिति कैयटेनोक्तम् सुब्लुगिति समासग्रहणकृतनियमेन कृदन्तत्वप्रयुक्तसंज्ञाया अपि बाधो ऽवश्यं वाच्यः एवञ्च फलाभावान्नैतत्परिभाषोपस्थितिस्तत्रेति भावः अत्र समासग्रहणकृतनियमेन बाधस्य प्रकारस्तूपपादित एव एतेन प्रघट्टकेन स्वोक्तार्थः सिद्धान्तसम्मत इति स्पष्टमेव अत्र मूले यत्तित्वत्यादिना नैयायिकमतानुवादे न्यूनतापरिहारायाह नापि वाक्य इति वृत्तिः शिद्धा श-

क्तिरूपा वृत्तिः सिद्धा न्यूनतान्निराचष्टे वाक्येपीति अत एवाह वृत्तौ वाक्ये चेतीति समा इवेति तद्धीत्येत्यादिः तद्धितेपि तद्धितविशिष्टेपि मूले ऽतिव्याप्तिरिति तस्यापि तद्धितविशिष्टत्वात्प्रातिपदिकसंज्ञाया आपत्तेरित्यर्थः इष्टापत्तिस्तु कर्तुमशक्या पचतकि भवतीत्यादौ तिङ्ङतिङ इति निघातापत्तेरित्यभिमानः प्रातिपदिकसंज्ञायाम्फिट्स्वरापत्तिरिति तु न चित्तः सप्रकृतेर्ग्रहणेनान्तोदात्तत्वस्येष्टत्वात् तद्धितवैशिष्ट्यम् अन्यतरसम्बन्धेन तद्धितविशिष्टप्रकृतिघटितसमुदायत्वम् मध्यवर्तित्वम् स्वनिष्ठावयवत्वनिरूपितावयवित्वम् एवञ्चोक्तातिव्याप्तिर्दुर्वैव नन्वत्र लक्ष्यानुरोध एव विनिगमको ऽस्त्वित्यत आह किञ्चेति संज्ञापत्तिरिति तथाच सुब्लुक् स्यात् ननु प्रत्ययग्रहणपरिभाषया यथा भवन्मते प्रकृत्यादिप्रत्ययान्तस्य ग्रहणम् भवति तथा मया प्रत्ययादिप्रकृत्यन्तस्यापि ग्रहणमिति कल्प्यत इति न भवदुक्तो दोष इत्यत आह मूले किञ्चैवमिति अत्र यदेवमिति तद्विशिष्टपरमिति चेदित्यर्थकमिति भ्रमवारणायाह समासग्रहणस्येति अर्थवत्त्वाभावादिति तन्नये विशिष्टे शक्तिलक्षणयोरभावादिति भावः उत्तरसूत्रे कृत्तद्धितेति सूत्रे कृदन्तादिष्वापि तन्न ये वृत्त्यसत्वादिति भावः ननु यदि मूलकेनोपदंशमिति वाक्यैरापि प्रातिपदिकसंज्ञायां सुब्लुक् तर्हि तृतीयापूर्भृतीनीति समाससंज्ञाविधानङ्किमर्थमत आह तृतीयेति स्वरे विशेषार्थमिति उदात्तादिस्वरकृतो यो विशेषस्तदर्थम् एवं स्वरे ऽचिषो विशेषः दधि उपदंशमित्यादौ न समास इत्येतत्पूर्वोक्तिकृतो यो विशेषस्तदर्थमित्यप्यर्थः यदि तु ज्ञापकसिद्धन्न सर्वत्रेति परिभाषामाश्रित्य कृद्ग्रहणपरिभाषाया अनित्यत्वादिष्टसिद्धिरित्युच्यते तदा क्लेश इति बोध्यम् ननु विरुद्धधर्मवत्वादनुकार्यानुकरणयोरभेदः कथमत आह सादृश्यमूलकेति वृत्त्या ऽनुपस्थितस्य तर्हि शाब्दबोधविषयत्वङ्कथमत आह तथोपेति शाब्दे ऽन्वयप्रतियोगित्वम् शाब्दविषयसंसर्गप्रतियोगित्वम् व्युत्पत्तिवैचित्र्यात् कार्यकारणभावे वैचित्र्यात् अनुकार्यविषयकशाब्दबुद्धित्वावच्छिन्नम्प्रत्यनुकरणजन्यार्थोपस्थितित्वेन कारणतायाः स्वीकारात् एवञ्च उक्तरीत्या निर्वाहे च अत एव उक्तरीत्या ऽनुकरणस्य प्रातिपदिकत्वाभावादेव एवञ्च भू सत्तायामित्यादिनिर्देश एवाभेदविवक्षाज्ञापक इति भावः नन्वनुकरणञ्चानितिपरमिति गति संज्ञायान्निपातत्वादव्ययसंज्ञायां लुका

रूपसिद्धिरिति चेन्न ङ्यो योग एव तत्प्रवृत्तेरङ्गीकारात् नन्वपदस्य कथम्प्रयोगो ऽत आह अपदमिति एतत्पक्ष इति भेदविवक्षापक्ष इत्यर्थः यथार्थो वृत्तिविषयस्तथा शब्दोपीत्यर्थः अनुकरणन्द्विविधम् व्यक्तशब्दसमानानुपूर्वीकमव्यक्तशब्दसदृशं च एतदुभयसाधारणन्तत्वं स्वसदृशशब्दमात्रतात्पर्यकोच्चारणविषयत्वम् व्यक्तशब्दानुकरणस्थले ऽनुकार्यस्योपस्थितस्यार्थोपस्थापकतास्ति अव्यक्तानुकरणात्तूपस्थितस्य सा नास्तीति विशेषः एवञ्चार्थविशिष्टशब्दमात्रतात्पर्यकत्वध्वनितात्पर्यकत्वे अनुकरणयोरनुकार्ये तूभयधर्माभाव इति विरुद्धधर्माभ्यामनुकरणमनुकार्याद्भिन्नमिति भेदविवक्षाबीजम् एवञ्चोभाभ्यां शाब्दबोधो वृत्त्या भवतीति वृत्त्यर्थत्वमस्त्येवेति भवत्येव प्रातिपदिकसंज्ञा भुवो वुगिति निर्देशस्त्वत्र ज्ञापकः प्रातिपदिकग्रहण इति परिभाषया लिङ्गविशिष्टस्यापीत्यस्य लिङ्गबोधकप्रत्ययविशिष्टस्यापीत्यर्थस्तत्र तद्विशिष्टस्य ग्रहणे मानमाह प्रातिपदिकत्वेत्यादिना स्पष्टमिति तत्र हि कुण्डोध्नीत्यत्र नद्यन्ताद्बहुव्रीहेरित्यर्थो नदृतश्चेति सूत्रस्थेत्यर्थाभिप्रायेण कथापादितः यदि नद्यन्ते बहुव्रीहित्वस्य प्रातिपदिकत्वस्य व्याप्यस्यातिदेशः परिभाषया क्रियते तदापादनसङ्गतिरिति नद्यन्तप्रकृतिकसुबन्तोत्तरपदकाद्बहुव्रीहेरित्यर्थेन परिहार इति स्वन्यत् नन्वयस्कुम्भीत्यत्र प्रकृतिभागमादायातः ङकमीत्यस्य प्रवृत्तिर्भविष्यतीति न परिभाषोपयोगो ऽत आह मूले तद्धीति उत्तरपदस्येत्यस्य लाभस्तु नित्यसमास इति सूत्रात्समास इत्यस्यानुत्तरपदस्थस्येत्यस्य वानुवृत्त्या विसर्गान्तस्य पूर्वपदत्वलाभे उत्तरपदस्याक्षेपेण प्रत्यासत्त्या कंसादिरूपन्तद् गृह्यत इति परिभाषाया उक्तार्थकत्वमावश्यकामिति भावः एतादृशार्थस्वीकारं विना नायस्कुम्भीत्यत्रात इति सूत्रस्य प्रवृत्तिरित्येतदुपपादयति अत्र चेति ॥ पुंवद्भावस्य टिलोपबाधकत्वाभिप्रायेणाह इदमिति ननु प्रकृते कुमारीशब्द औषधिजातिवाची गृह्यत इति भाषितपुंस्कत्वाभावान्न पुंवद्भावस्य प्राप्तिरत आह णिचश्चेति एवञ्चोपलक्षणत्वावश्यकत्वेन वयोविशेषविशिष्टवाचकत्वेपि तस्य प्रकृते नानुपपत्तिः परिभाषायां ज्ञापकस्य कुमारः श्रमणादिभिरिति निर्देशस्य विशेषविषयत्वाद्विशेषग्रहण एवेति भ्रमवारणायाह सामान्येति मूल इत्येव सिद्धे इति यत्तदसङ्गतमित्यभिप्रायिकामाशङ्कान्निराचष्टे नचेत्यादिना तदस्तु ङ्याब्ग्रहणमस्तु न-

न्वस्तु दृष्टा मालेति समुदायात्सुस्थापि हल्ङ्यादिलोपेन सिद्धमत आह एवञ्चेति समुदायात्सुबुत्पत्त्या एकपदत्वे चेत्यर्थः एकान्तरतापत्तिः आम एकान्तरामिति सूत्रेणैकपदान्तरितत्वप्युक्तस्य निघातनिषेधस्यापत्तिः एतद्भाष्येति ङ्याब्ग्रहणस्योक्तनियमार्थत्वप्रतिपादनपरभाष्येत्यर्थः पृथगिति पृथगर्थोवस्थापको विभक्तयन्तो ऽनवयवो यस्य समुदायस्य तस्य ग्रहणमित्यर्थः समासघटकस्य चित्रगवीत्यादिसमुदायस्यस्य व्यावृत्तये आह पृथगिति अजेत्यादिसङ्गृहाय विभक्तयन्तेति पूर्वोक्तं यदाम इत्यस्य पूर्वत्तिरूपम्फलन्तद्विघटयति पूत्येकमपीति बाधकत्वादिति गौणी मुख्या वा उत्तरसङ्ख्या पूर्वसंख्याया बाधिकेत्यइउण्सूत्रीयभाष्यसिद्धान्तादिति भावः नचैवमामतिसुन्दरपुरुष इत्यत्र तस्य सूत्रस्य पूर्वत्तिर्न स्यादिति वाच्यम् एकान्तरामिति पदे स्वरितत्वकल्पनेनाधिककार्यमिति स्वरितेनाधिकार इति सूत्रार्थात्पूर्वतैकपदेन समासात्मकैकपदस्यापि ग्रहणमित्यर्थेनादोषात् ननु पूर्वतसूत्रस्थं ङ्याब्ग्रहणं स्त्रीपूत्ययान्ताच्चेन् ङ्याबन्तादेवेति नियमार्थमस्त्वित्याशङ्क्यान्निराचष्टे नियमार्थन्त्विति त्यूङन्त इति तिपूत्ययान्ते ऊङन्ते चेत्यर्थः युवतिः श्वश्रूरित्यादिसङ्गृहाय नियमार्थता तस्य नोक्ता नन्वेतयोः सुबुत्पत्तौ किम्मानमिति चेन्न युवतीः पश्य युवतिका युवतितरेति भाष्यपूयोगस्य श्वशुरः श्वश्रूवेति सौत्रनिर्देशस्य च मानत्वात् एवमूङन्ताद्विभक्तयुत्पत्तौ नोङ्धात्वोरिति सूत्रमपि ज्ञापकम् नच ङ्यावन्तात्तद्धितोत्पत्तिस्वीकारे यूनीतिरिति स्यादिति वाच्यम् तद्धितपदस्य तिपूत्ययान्यतद्धितपरत्वात् ॥ भाष्योक्तरीत्येति इयं रीतिरग्रे स्फुटा फलमिति येषाङ्कुत्सार्थद्योतकत्वेन स्वार्थिकता तेषु कुत्सित इति भाष्योक्तरीत्या फलाभावेपि एतद्भाष्योक्तन्यायाविषयास्तेषु फलमित्यर्थः कुत्सिता इति सूत्रभाष्योक्तन्यायाविषयतासूचनायाह अत्यन्तेति अन्तरङ्गस्य बलवत्वाद्बहिरङ्गशास्त्रमतुल्यबलमिति परश्चेत्यनुपपन्नमत आह अभ्युच्य इति विपूतिषेधाभावं स्वीकृत्य वाद इत्यर्थः एवञ्च ङ्याग्ग्रहणस्य परमपूलोक्तार्थसाधकत्वेनावश्यकतया चेत्यर्थः नन्वस्तूक्तरीत्या कनः पूर्वमुत्पत्तिस्त्वथापि कन्पूक्त्या ऽर्यशब्दान्मध्ये टाबुत्पत्त्येष्टसिद्धिर्भविष्यतीत्यत आह अन्यथेति उक्तानियमाभाव इत्यर्थः नचात्रैकाज्द्विर्वचनन्यायोपन्यसनान्निष्फलङ्कुत्सार्थेनैकार्थीभावापन्नस्याऽर्यशब्दस्य निष्कृष्य तस्य स्त्री-

त्वेन योगासम्भवेनैव ततष्टाबभावस्योपपादयितुं शक्तत्वादिति वाच्यम् अस्य कनो ऽत्यन्तस्वार्थिकतया तादृशयुक्तेरभावात् इदम् अञ्चत एवेत्यादिना यदुक्तत्वात् एवञ्च यस्य स्त्रीत्वेन योगो ऽन्यपदार्थबोधकत्वत्तस्योगिदन्तत्वाभावान्न ङीपः प्राप्तिरिति भावः आवश्यकश्चायमर्थो ऽन्यथा बहुकुमारीक इत्यादौ कबुत्पत्तेः प्रागुपसर्जनह्रस्वत्वस्य प्रवृत्तिः स्यादलौकिकप्रक्रियावाक्ये समासान्तप्रवृत्तौ तु अन्यपदार्थविशेषणतापन्नार्थप्रतिपादकत्वान्तस्य स्त्रीप्रत्ययान्तत्वाभावान्न ह्रस्वस्य प्राप्तिः उत्तरपदस्येत्यादिकथनस्य प्रकृतानुपयुक्तत्वशङ्कां वारयति एतत्सर्वमिति तच्छब्देति चरमावयववाच्यत्वादित्यर्थः यद्यस्य चरमावयवत्वं विवक्षितन्नाभविष्यत्तदा समासादित्येवावक्ष्यत् समासस्यैव समासार्थवाक्यस्यैव एवकारेणोत्तरपदावयवत्वमतनिरासो ध्वनितः नचास्योत्तरपदानवयवत्वे द्विपुरीत्यत्र समुदायस्य कथं स्त्रीत्वमिति वाच्यम् लिङ्गस्य लोकाश्रयत्वेन खट्वादिशब्दवत्समुदायस्य स्त्रीवाचकत्वस्वीकारात् इति सूत्र इति स्वरविधायक इति शेषः अत्र पुरस्त्रादिति पक्षे सूत्रस्थभाष्येति तादर्थ्यात्तच्छब्दमित्युक्तभाष्येत्यर्थः नहि सुपः पुरस्त्रादिति पक्षस्वीकारे भाष्यकारीयवाक्यवाच्यार्थविरोधमात्रमेव दोषः किन्तु लक्ष्यासिद्धिरपीत्याह किञ्चेति ततः पूर्वम् सुपः पूर्वम् ननु सुब्लुकः पूर्वमेव कवन्ताट्टापि कृते लुकः प्रवृत्त्या न टापः सुपः परत्वमत आह तत्रेति तदन्ते कवन्ते असत्वादिति तन्मते कवन्ते स्त्रीबोधकत्वस्य वक्तुमशक्यत्वादित्यर्थः आरोपितस्यान्यत्रारोपे मानाभावादिति भावः परस्त्रादिति पक्षेत्विति तुना न पूर्वोक्तभाष्यवाच्यार्थोपपत्तिरेव फलङ्किन्तु विशेषान्तरमपीत्याह पुनः सुपि त्वकृत इति तथाच बहुचर्मिकेत्यस्य सिद्धिः स्यष्टैव विशिष्टस्य वाक्यस्य समाधत्ते तेषामिति समासान्तानाम् यद्यपि प्रत्ययेतिमहासंज्ञाकरणेन प्रकृत्यर्थेनार्थवत्वमस्ति तथापि तदतिरिक्तो ऽर्थो नास्त्यत एवात्यन्तस्वार्थिकत्वव्यवहारस्तेषाम् एवञ्च उक्तन्यायस्य समासान्तविषये अभावेच तद्धितान्तत्वस्य सुब्लुगप्रयोजकत्वादाह प्रातिपदिकत्व इति ननु यदि पुनर्न सुप्तदा समाससंज्ञैव कथमत आह प्रत्ययेति ननु यदि प्रत्ययलक्षणेन समाससंज्ञां स्वीकरोषि तदा समासान्तम्परित्यज्य सा स्यादिति कथं समासान्तस्य समासग्रहणेन ग्रहणमत आह साचेति समुदायस्य सुबन्त-

समुदायस्य तद्ग्रहणेन समासग्रहणेन तदन्तेति समासान्तप्रत्ययान्तेत्यर्थः अत्र क्वचित्कपुस्तद्वाक्येत्यादिपाठः उक्तार्थमेव शङ्कासमाधानाभ्यान्द्वयति नचेत्यादिना उत्तरपदत्वेचेति प्रत्ययलक्षणस्य प्रतिषेधादुत्तरपदस्य सुबन्तत्वसिद्धये सुबुत्पत्तिरवश्याभ्युपेयेति तद्भावः अनेन समुदायोत्तरज्ञायमानेन तत्त्वाभावादिति सुबन्तत्वाभावादित्यर्थः नचोत्तरपदत्वे इति निषेधोऽस्त्येवेति वाच्यम् उत्तरपदस्य यत्र कार्यित्वन्तत्रैव तत्प्रवृत्तेरङ्गीकारात् एवञ्च प्रत्ययलक्षणेऽपि च पूर्वमिति समाससंज्ञातः पूर्वमित्यर्थः तस्यामवस्थायाम् समाससंज्ञाप्रवृत्तिप्राक्कालिकावस्थायाम् तदनभिव्यक्त्या सङ्ख्याकारकानभिव्यक्त्या पूर्वोक्तः शास्त्रप्रवृत्तिक्रमोऽभ्युपगमवादेनेत्याशयेनाह वस्तुतस्त्विति दिगिति दिगर्थस्तु यत्तु सरूपसूत्रस्थभाष्यात्समासान्तानामुत्तरपदावयवत्वमिति लभ्यते तत्र हि कृतद्वंद्वानामेकशेष इति पक्षे ऋक्च ऋक्च ऋचावित्यत्र ऋक्पूरितिसमासान्ते कृते ऽसारूप्यादेकशेषो न स्यादिति दूषणमुक्तत्वस्यावसरः समासान्तानामुत्तरपदावयवत्वपक्ष इति मूलोक्तः समुदायावयवत्वपक्षो ऽयुक्त एवेति तन्न समासान्तानामलौकिके प्रक्रियावाक्ये प्रवृत्तिस्वीकारेपि कृतद्वंद्वानाञ्चेदेकशेषस्तदा ऋग्भ्यामित्यत्राप्यकारप्रत्ययस्य पूर्वम्प्रवृत्तिः स्यादिति रूपासिद्धे स्फुटत्वात् नचैवमपि ऋक्च ऋक्च ऋचौ समासान्ते कृते ऽसारूप्यादेकशेषो न प्राप्नोतीति भाषाक्षराभ्वारस्यमिति वाच्यम् कृतद्वंद्वानामेकशेषपक्षे तस्य भाषस्य प्रवृत्तत्वादिति तस्य द्वन्द्वे कृते लुकि च समासान्तप्राग्भागस्य विभक्तिपरत्वाभावस्तद्विशिष्टस्य न सारूप्यमित्याशयात् किञ्च यदि प्राग्भागस्य सारूप्यमादायैकशेषस्य प्रवृत्तिस्तदा ऋचे इति स्याट्टापः प्रसङ्गादिति ऋचावित्यस्यासिद्धिप्रतिपादने तात्पर्यात् यदि समासपदस्य तादर्थ्यात्तच्छब्द्यमिति न्यायेन समासालौकिकवाक्ये लक्षणा कल्पनायाङ्गौरवमिति तदपि न उत्तरपदावयवत्त्ववादिमतेपि समासतत्पुरुषादिपदस्य समासतत्पुरुषादिसम्बन्ध्युत्तरपदे लक्षणा कल्पनाया अविशेषादिति यद्यप्यकृतेति सिद्धान्तग्रन्थमनूद्य बहुचर्मिकेत्यत्र सुपः प्राक् समासान्तप्रवृत्तावसुप इति प्रतिषेधादित्वानापत्तिरिति दूषणाभिधानन्तत्स्वीयः सुपः प्रागिति पक्षस्य गर्भस्रावेणैव गतत्वात् यच्च प्रियपथः प्रियगव इत्यत्रालौकिके प्रक्रियावाक्ये समासान्तानाम्प्रवृत्तावात्वद्वयोः प्रवृत्त्यापत्तिरिति तदपि न

सुपोधात्विति लुग्विषये विभक्तिनिमित्तककार्याप्रवृत्तेः सुप्रसिद्धेरिति । यन्मूले आब्ग्रहणस्यैव स्पष्टार्थत्वमुक्तन्तत्र बीजमाह ङीब्ग्रहणं त्विति ङ्याप्योर्विषये व्यवस्थायाः समत्वादाह मूलकारो वस्तुत इत्यादि क्रमेण बोधे बीजमाह स्वार्थ इत्यादिना जात्यादीति आदिना गुणक्रिययोः परिग्रहः स्वमात्रेति सङ्ख्याकारकयोस्तु भिन्नपदार्थापेक्षत्वमिति तयोरुपस्थितेरादौ न सम्भव इति भावः तज्ज्ञानमिति पूर्वमाकाङ्क्षितत्वेनेत्यादिः आकाङ्क्षेति इतरान्वयार्थमिति शेषः लिङ्गादौ ङीबादीति उभयत्रादिना ङ्याबन्तात्स्वादेः परिग्रहः अत एव परिपूर्णस्यैवान्यत्रान्वयादेव फलितार्थमाह एवञ्चेति उक्तन्यायेनेष्टसिद्धौ चेत्यर्थः अनुवाद एवेति एतेन सूत्रभाष्ययोरविरोध इत्येतदभिहितम् यत्तु ङ्याब्ग्रहणसामर्थ्यलब्धनियमाकारे यत्तद्धितपदन्तस्य तद्धितसामान्यपरत्वमिति बुध्वा मौलग्रन्थोपरि यद्येवन्तर्हि बहुगोमतीकेति स्यादिति दूषणाभिधानन्तन्न युक्तन्तत्रत्यतद्धितपदस्य सार्थकतद्धितपरत्वादित्येतद् ध्वनयन्नाह अत्यन्तेति तस्य ङ्याब्ग्रहणस्य निवृत्तौ हेतुमाह उक्तन्यायेति तेषामर्थाभावेनोक्तन्यायविषयताया अभावादित्यर्थः इत्येवेति एतेनार्यकेत्यस्य सिध्यर्थन्तत्रापि ङ्याब्ग्रहणसम्बन्ध इति निरस्तम् कार्यमेवेति अत एव भाष्ये सामान्यतो नियमाभिप्रायेण समासान्तेषु दोषः बहुगोमतीकेति स्यादिति परेण दोषोद्भावने कृते न दोषः तेपि स्वार्थिकाः ततः परत्वात्समासान्ता इत्युक्तम् ततः कथं हरिणिकेति प्रकृत्यन्तरं सः कथं लोहिनिकेति वक्ष्यत्येतत् लोहितालिङ्गबाधनं वेति प्रतिपादितम् ॥ एवञ्चैनिका आर्यका इत्यनयोरभाव एवेत्याशयवानाह स्पष्टञ्चेदमिति अत्यन्तस्वार्थिकतरबादेरपि ङ्याबन्तादनभिधानमेव तृतीयेति एतेन तदनुवृत्तिरवश्यङ्कर्त्तव्येति सूचितम् तल टाङसीतिसूत्रे इष्टस्येति सौत्रत्वादेकशेषस्याभावेपीत्यादि यदि त्वत्र विधिसूत्रस्थक्रममादाय प्रवृत्तिरित्युच्यते तदा ङसिङ्योः स्मात्स्मिनाविति सूत्रे ङसित्युच्चारणे षष्ठ्येकवचनस्य ग्रहणापत्तिर्दोषो बोध्यः मूले विभागार्थाविति उभयोरनुच्चारणे इष्टस्य विषयविभागस्यालाभः स्यात् नन्वेकस्योच्चारणमस्तु तावतापि तादृशविषयविभागो भविष्यतीत्याशयेनाह अन्यतरस्येति सम्भाव्येतेति यदितु नाज्झलाविति सूत्रनिर्देशान्न वकारान्तत्वन्तदा प्रतिपत्तिगौरवमिति भावः ततः

ङित्वसम्भावनायाम् टिलोप इति ङित्वसामर्थ्यादभत्वेपि टिलोपो लिहा-
दित्यादौ स्यादित्यर्थः आकारादेश इति ये सुरथा रथीतमा इत्यादिम-
न्त्रे यौ सुरथाविति प्राप्ते सुपामिति सूत्रेण प्रश्लेषेणाकारादेशोपि विधी-
यत इति भावः इत्येवास्त्विति घेरित्येवास्त्वित्यत्र तात्पर्यम् इतरांशस्या-
नुवृत्त्या लाभात् नियमादिति सुपि चेञ्जस्येवेति नियमादित्यर्थः इत्यर्थ-
मिति अत्र हि पतिः समास एवेति नियमाद् विलाभावेन घेरित्यस्याप्रा-
प्तेरिति भावः नच हूस्वस्य गुण इति सूत्रस्य नियमार्थत्वकल्पनेनान्यत्र
गुणो न भविष्यतीति वाच्यम् हे सखे इत्यर्थन्तस्यावश्यकत्वात् आण् नद्या
इति सूत्रे ङितीत्यस्य सम्बन्धार्थं ङितीत्यावश्यकमिति ङकार आवश्य-
क इति भावः मूले प्राच इति प्रक्रियाकृत इत्यर्थः व्याख्यानेपीति त-
ट्टीकाकारकृत इति शेषः तत्र सुप इति सूत्रे एवञ्च व्याकरणान्तरोक्ता-
र्थस्य क्रोडीकार एव तानीत्युपादानस्य फलामिति ध्वनितम् एतेन ता-
नि पदघटितसम्पूर्णसूत्रानुवृत्तिप्रदर्शनमत्रासङ्गतमानीत्यस्य प्रकृते ऽनुपयो-
गादिति यत्तदेवासादिति सूचितम् नच तासां संज्ञानामप्रक्रान्तत्वात्क-
थन्तच्छब्देन तासां लाभ इति वाच्यम् तच्छब्दस्य बुद्धिस्थपरामर्शक-
त्वात् प्रथमादीति आदिना द्वितीयादिसङ्ग्रहः ताश्च संज्ञाः स्त्रीलिङ्गाः प्र-
थमायाश्च द्विवचन इत्यादिनिर्देशात् मूले उभयामिति शसि परे वा द्वि-
र्वचनमिति वचनस्य ज्ञापनादिति शेषः अर्थापेक्षणेनेति एतत्प्राचामनुरो-
धेनोक्तमधिकापेक्षं बहिरङ्गमित्यस्य क्षमते भावात् यदुक्तम्मूले शसैव वी-
प्सायां उक्तत्वेनेत्यादि तदेवायुक्तमुक्तार्थानामपि द्वौ व्यतितुनीत इति प्र-
योगदर्शनादिति खण्डनकारोक्तिङ्खण्डयति यद्यपीत्यादिना वक्तुमशक्य-
मिति तद्धितेनैव वीप्सोक्तिसम्भवादिति भावः एवम् उक्तरीत्या ए-
कैकशइति प्रयोगस्यासाधने ऋषिसहस्रमित्यत्र कर्मधारयसमासः सहस्र-
मृषय इत्यर्थः एतद्वाक्यं वित्तेन क्रीत्वा पुनर्दत्वेति रीत्या ऽन्यत्र व्या-
ख्यातम् सहस्रदक्षिणा इत्यस्य सहस्रन्दक्षिणा गोरूपा येषान्दातॄणामि-
त्यर्थः एतेन सहस्रगोदानफललाभस्तेषामिति सूचितम् असङ्गतिरिति कै-
यटोक्तरीत्या असङ्गतिरित्यर्थः अत एव तद्धाप्रयोगादत्यन्तस्वार्थिको
ऽपि शसस्तीत्यनुमीयते ऽत एव प्रायश इत्यस्यापि सिद्धिरिति स्वार्थि-
कशसन्तस्य द्विवचनमिति तद्भावः उक्तस्य भाष्यप्रयोगस्यान्यथोपपत्ति-

माह एकेतीति नच त्यदादीनां सम्बोधनाभावात्कथमेतदिति वाच्यम् हे स इति भाष्यीयप्रयोगदर्शनेन तस्य निषेधवचनस्यौत्सर्गिकत्वात् ननु स्वार्थिकमत्र द्वित्वमित्येव कल्पना ऽस्त्वित्यत आह एतद्भाष्येति परोक्तं यत्स्वार्थिकः शसिति तत्तु सर्वथा नोचितम् तथा कल्पने तस्य शसो ऽन्तरङ्गत्वेनादौ प्रवृत्त्या ततो द्विर्वचने ऽनिष्टरूपापत्तेः वस्तुतस्तु यदुपरुम्भाद्भवतामेतादृशी कल्पना तदेव शिथिलमित्याह किञ्चेति गौण्यपीति उत्तरा मुख्या यथा पूर्वसङ्ख्याया बाधिका तथा गौण्यपीत्यर्थः तत्र एकैकश इति प्रयोगे दिगिति दिगर्थस्तु लोके यत्र तद्धितमात्रेण वीप्साया अनभिधानन्तत्रोभयोस्सत्वन्तु केवलशस्सो यथैकैकश इत्यत्र माषश इत्यादौ तु तावन्मात्रेणापि वीप्साभिधानान्न द्वित्वमिति भाष्याशय इति योगिन इति एतेनागस्तिसंहितोक्ता " रमन्ते योगिनो यस्मिन्नित्यानन्दे चिद्वात्मनि इति रामपदेनासौ परम्ब्रह्माभिधीयत" इति व्युत्पत्तिर्दर्शिता एतावता पूर्वोक्तरीत्या द्वन्द्वाप्राप्त्युपपादनेन अनुकर्षणशब्दस्यानुवृत्तिपरत्वमन्यत्र दृष्टमित्याशयेनाह अन्विति एतेन यौगिकोयं शब्द इति सूचितम् यत्तु यत्र द्विवचनादौ वैलक्षण्यन्तत्र माभूदेकशेषः भ्यामादौ तु भवत्येवेति मतं तन्न युक्तमित्याशयेनाह भ्यामादावपीति अपिना औजसादिसमुच्चयः परोक्तङ्खण्डयति भ्यामीति अनुप्रयोगविरोधादिति औजसादिष्वनुप्रयोगविरोधादित्यर्थः तावित्युक्ते पुमर्थस्यैवाभिव्यक्तिस्ते इत्यनेन तु स्त्रिया एवेति शिष्यमाणपदप्रतिपाद्ययोरर्थयोः समभिव्याहृतपदप्रतिपाद्यार्थाभेदान्वयाभावेन नैकशेष इति परोक्तङ्खण्डितम् ननु मातृमातारावित्यादावेकशेषवारणायैवकारापकर्षो व्यर्थः प्रकृतसूत्रे प्रवृत्तेस्तेन वारणे ऽप्युत्तरसूत्रप्रवृत्तेर्दुर्वारत्वादत आह पुमानिति अनुवृत्तेरिति अपकृष्टैवकारसहितस्यैकविभक्तौ सरूपाणीत्यस्यानुवृत्तेरित्यर्थः अत एव सरूपाण्येवेत्यनुवृत्तेरित्युक्तम् तादृशस्यानुवृत्तौ मानमाह अत एवेति एवसहितस्य तस्यानुवृत्तेरेव वार्तिककृतोक्तमिति तथाच स्वोक्तार्थे वार्तिककृदुक्तिस्तात्पर्यग्राहिका स्वोक्तार्थन्दृढयितुं शङ्कते नन्विति मात्रार्थक इति वाक्य इति शेषो ऽत्रेत्यस्य सम्बन्धो वा चेन देहीत्यस्य सम्बन्धः तेन समानविभक्तिकत्वमेवेति ध्वनितम् नचेति वाच्यमिति परेणान्वयः तत्पक्षे विभक्त्यन्तानामेकशेष इति पक्षे इष्टापत्तिरिति प्रातिपदिकशेष इत्यस्य वि-

शिष्टोपादानेन तत्पक्षे सूत्रस्य प्रवृत्तिरिष्टैवेति भावः ॥ इष्टापत्तौ भाष्यकारोक्तिमप्रमाणयति किमुच्यत इत्यादिना न पुनरिति वाक्यालङ्कारे न निषेधे तस्यापि एवंरीत्या सूत्रव्याख्यातृमतेपि लक्ष्यस्य प्रकृते तु लक्ष्यं वाक्यमेव एतदर्थं भाष्यं साधकमाह अत एवेति लक्ष्यभेदानौचित्यादेव एतेन प्रातिपदिकेति विशेषणोपादानमयुक्तमिति सिद्धम् ईदृशविरुद्धमिति एकलक्ष्यस्य व्याख्याभेदेन साधुत्वासाधुत्वरूपविरुद्धमित्यर्थः तथाचाभ्युपगमवादोयमिति भावः वस्तुतस्तथा व्याख्यात्रापि प्रतिषेधो वक्तव्य एवेत्यत्र तात्पर्यन्तद् ध्वनयन्नाह अत एवेति वार्तिककारस्याभ्युपगमवादत्वादेवेत्यर्थः तदुत्तरम् भवतीत्युत्तरम् चोद्यत इत्यस्य किङ् कर्मेत्याकांक्षायामाह अस्येति एतेन किमुच्यत इत्यादि चोद्यान्तरमिति ध्वनितम् अनेन एवञ्च कृत्वेत्यनेन भाष्येण अस्य प्रातिपदिकेतिशब्दघटितवार्तिकस्य ननु तस्मिन्वार्तिके मातृशब्दस्यैवोपादानन्न्यूनम् यातृशब्दघटिते यातृभ्यां यातृभ्याञ्च देहीति वाक्ये ऽप्युक्तरीत्या दोषस्य सत्त्वादत आह तत्र मातृग्रहणमिति उक्तरीत्योपलक्षणत्वावश्यकत्वे प्रातिपदिकैकशेष इत्यपि विभक्त्यन्तानामेकशेषपक्षस्याप्युपलक्षणमिति निगूढाशयः अयञ्च पूर्वपक्षः प्रातिपदिकैकशेष इत्यारभ्य कृतः पूर्वपक्षः ननु विभक्ताविति पदाभावे प्रयोगमात्रावच्छेदेन सारूप्यस्य विवक्षा कुतो नेत्याशङ्कायामाह प्रयोगेति प्रयोगसामानाधिकरण्येन क्वचित्प्रयोग इत्यर्थकमेतत् ग्राह्यतयेति तेन हरिण्यौ हरिण्य इत्यस्य सिद्धिः पुंवद्भावकृतान्तद्विते वैरूप्यन्द्रष्टव्यम् तस्य सामानाधिकरण्येन सारूप्यस्य अत्रापि मातृमात्रादावपि ॥ प्राप्तस्य एकशेषस्येति शेषः अत एव तदभाव एव तदुपपत्तिम्मत्वा पूर्वपक्षस्य सत्त्वादेव अग्रे अथानेन पक्षेणार्थः स्यादित्यादिस्थले विभक्तेरिति अत्रैकपदानुपादानेनैकपदोपादानं स्पष्टार्थमिति ध्वनितम् एकस्यामपि विभक्तौ यानि विरूपाणि न तेषामेकशेष इत्यस्य स्पष्टतया लाभार्थम् वस्तुतस्तु विभक्तौ यानि सरूपाण्येवेत्युक्तौ खसारौ खसारः इत्यत्रैकशेषो न स्यात् खसरि च खस्रोश्चेत्यत्र वैरूप्यदर्शनात्कमलौ कमल इत्यादावेव स्यात् कृतो त्वेकपदे एकसङ्ख्यावाचकविभक्ताविति अर्थलाभाद्भिन्नार्थकविभक्तौ वैरूप्येपि भवत्येव सः तत्पक्षस्थापनेन प्रातिपदिकानामेकशेष इति पक्षस्थापनेन तत् खण्डनम् मातृमात्रोः प्र-

तिषेधो वक्तव्य इत्येतद्वार्तिकखण्डनम् तं विना एवकारापकर्षं विना तावन्मात्रेण विभक्तेः सारूप्योपलक्षणत्वमात्रेण तत्खण्डनेति मातृशब्दयोर्भ्यामादौ सारूप्यसद्भावादिति भावः एतेनेति प्रत्याख्यानपरभाष्यप्रामाण्यादपकर्षस्यावश्यकत्वेनावृत्तेरफलत्वेनेत्यर्थः ननु वृक्षौ वृक्षा इत्यादावेकशेषानापत्तिः वृक्षौ च वृक्षाश्चेत्यत्र प्रथमायामेव वैरूप्यदर्शनादत आह विवक्षितायामिति विभक्ताविति पदं विशेषणत्वमात्रतात्पर्यकन्नतूपलक्षणत्वतात्पर्यकमित्याशयेनाह यस्यामित्यादि प्रत्यासत्त्येति अस्मिन्नर्थे तात्पर्यग्राहकमेकपदामिति तद्भावः तदाशय इति राम राम औ इति स्थितिप्रदर्शनञ्चदाशय इत्यर्थः यदुक्तं भ्यामादावेकशेष इति तत्खण्डयति वार्तिकमत इति प्राप्तत्वादिति विभक्तिविशेषबोधकशब्दमनुपादाय मातृमात्रोरित्येव यतो वार्तिककृतोक्तत्वतः प्राप्तत्वादित्यर्थः एकशेषशब्दस्य पुंस्त्वादेकशेषपरामर्षापपदे तच्चेति नपुंसकोपादानन्तदसङ्गतमित्याशयेनाह एकशेषेति इदम् सहविवक्षायामेव प्रवर्तत इत्येतत् सहविवक्षापदार्थस्तु विशेष्यविशेषणभावानापन्नानेकस्य युगपदेकपदार्थसम्बन्धबोधनेच्छा यद्यसहविवक्षायामप्येकशेषः स्यात्तदा तत्र द्वन्द्वाप्रसक्त्या ऽनवकाशत्वप्रदर्शनमसङ्गतं स्यादिति भावः इतरेतरेति यन्मूले ऽभिहितत्वत्समाहारस्य व्यावृत्तये तत्र साधकमाह एकवदित्यादिना समाहारे ऽवृत्तिबोधनादिति यदि समाहारेप्येकशेषः स्यात्तदा तदिदं वस्त्रमित्यस्य समाहारविवक्षायान्तानीमानि वस्त्राणीत्यस्येतरेतरयोगे विवक्षायां सिद्धो विकल्पेनैकवद्भावस्य विधाने व्यर्थं स्यादिति भावः एतेन समाहारद्वन्द्वविषयेप्येकशेषो भवति अन्यथा घटघटमित्यादिसमाहारविवक्षायां स्यात् अनभिधानेन तद्वारणन्तु न चमत्कृतिकारि अन्यथा घटघटाविति स्याप्यनभिधानेनोपपत्तावेकशेषारम्भो ऽनर्थकः स्यात् नच घटघटमित्यतो यथा समाहारस्य प्रतीतिस्तथा घटमित्यस्मान्नेति कथन्तत्रैकशेष इति वाच्यम् प्रकरणादिना तत्प्रतीतिसम्भवात् अत एव व्यक्तिपक्षेपि न ब्राह्मणं हन्यादित्यस्य वाक्यस्य सर्वब्राह्मणविषयकत्वसिद्धिरिति परास्तम् व्यक्तिपक्षे यद्कश्चिद्ब्राह्मणमहत्वा ऽन्यत्र कृती स्यादित्यनेन दोषमभिधाय जातिपक्षमवलंब्य समाधानपरभाष्यविरोधापत्तेश्च घटघटमित्यस्य वारणन्त्वनभिधानेनैव दिक्षु समाहारो नास्त्यनभिधानादिति यथा मूले ऽनेकार्थस्य मि-

लितस्येतरान्वयो यत्र स द्वन्द्वस्य विषय इत्युक्तन्तद्यथाश्रुतन्न युक्तम् रा-
जपुरुषमित्यत्रातिप्रसङ्गादतो मिलितस्येत्यस्य परस्परविशेषणविशेष्यभावा-
न्नापन्नत्वे सति किञ्चिन्निष्ठविषयतानिरूपितविषयताश्रयानेकस्येत्यर्थः अ-
त एवाह एकरूपेणेति यथा धवखदिरौ छिन्धीत्यादौ धवखदिरयोः
समूहान्वितयोः कर्मत्वेन छेदनान्वयः चैत्रमैत्रयज्ञदत्तगृहैर्मण्डितमिदन्नग-
रमित्यत्र द्वन्द्वार्थस्य गृहपदार्थे ऽन्वयोस्ति तत्र न तेषामेकरूपमि-
त्यनुपपत्तिरत एकरूपावच्छिन्नेति यदुक्तम्मिश्रविशेषणविशेष्यभावानापन्ने-
ति तत्र मानमाह मूले इदञ्चेति भेदघटितेति यत्रानेकपदार्थस्यान्व-
यितावच्छेदकविभिन्नरूपेण धवत्वखदिरत्वाभ्यामेवेतरान्वयस्तत्रैव समूहा-
न्वितस्येतरान्वयोस्ति तत्रैव द्वन्द्वस्य साधुत्वमिष्यते पदार्थतावच्छेदकभेद ए-
व द्वन्द्वस्य साधुतानियामकः ब्राह्मणवसिष्ठन्यायेनेत्यत्र ब्राह्मणत्ववसिष्ठ-
त्वयोर्यथा पुष्पवन्तपद इवेतीति एकयोक्त्या पुष्पवन्तौ दिवाकरनिशा-
करावित्यमरे द्वन्द्वेन पर्यायप्रदर्शनात्तत्र द्विवचननिर्देशादेकयोक्त्येत्युक्तञ्च स-
मूहस्य शक्यतालाभेन पुष्पवन्तौ नमस्कुर्म इत्यत्र यथा समूहान्वितयो-
श्चन्द्रसूर्ययोः कर्मत्वेन नमस्कारान्वयित्वन्तथा सर्वत्र द्वन्द्वस्थले एकार्थी-
भावापन्नसमुदायोपस्थाप्यानेकस्यैकधर्मावच्छिन्ने ऽन्वयो द्रष्टव्यः एकशेषोपि
तादृशस्थल एवेष्यते तत्राप्येकपदोपस्थाप्यानेकस्य समूहान्वितस्येतरान्वयो
भवति यत्र त्वेतादृशसहविवक्षाभावे द्विवचने ऽचीत्यादौ भाष्ये एकशे-
षनिर्देशादित्युक्तिस्तत्रैकशेषशब्दस्तत्रापरो लक्षणयेति बोध्यम् समाहारद्व-
न्द्वादितरेतरयोगस्थले विशेषस्तु द्वन्द्ववाच्यस्य समूहस्योद्भूतावयवभेदक-
स्य भानमत एव द्विवचनबहुवचनयोर्यथायोगमुपपत्तिः लिङ्गन्यायाभ्या-
मुक्तार्थस्य झटिति प्रतिपत्तिर्न सम्भवतीत्याशयेन मूले यद्वेति । त-
त्रैकशेषस्य द्वन्द्वापवादत्वप्रदर्शकवाक्यस्य नैकस्यामवस्थायामुभयोः प्राप्तिस-
त्वेन किन्तु द्वन्द्वस्यैकशेषप्रवृत्त्युत्तरकालिकतल्लुक्ष्याधिकरणकाभावप्रतियो-
गिप्राप्तिकत्वेनैव वाच्यम् तस्य त्वेकशेषस्य यस्यामवस्थायाम्प्राप्तिस्तदा सु-
पो ऽभावान्न द्वंद्वस्य प्रसङ्ग इत्यत आह विभक्त्युत्पत्ताविति एवञ्च स-
माहारस्य विषयतायाः सत्त्वेनैकशेषप्रतिबन्धकसत्त्वे च नन्वस्मिन्पक्षे जसः
शीतिसूत्र एव वा ग्रहणं कार्यन्तेन सर्वत्र विकल्पो भविष्यति तावतैव सि-
द्धौ विभाषा जसीति पृथक्सूत्रकरणमेकशेषे कृते समासनिमित्तककार्य-

त्रेत्यर्थे ज्ञापकमस्तु तथाच सर्वे इत्यादौ न मूलोक्तदोषापत्तिः हलि सर्वेषामि-त्यत्र सुट् चोक्तार्थस्य ज्ञापको भविष्यतीत्यत आह जसः शीत्यत्रेति उद्भूता-वयवभेदविवक्षया उद्भूतः प्रकटो ऽवयवानाम्भेदो यस्य समूहस्य तादृशस-मूहस्य सर्वादिशब्दवाच्यत्वविवक्षया तत्रेति तादृशसमूहवाचकसर्वादिशब्द-घटिते जस्परकलक्ष्ये इत्यर्थः विकल्पवारणायेति भवत्सम्मतवाशब्दघटित-न्यासेन विकल्पवारणायेत्यर्थः उत्तरार्थम् प्रथमचरमेत्यादिसूत्रेषु विभाषा जसीत्यस्यानुवृत्तय इत्यर्थः यच्चोक्तं सुट् चोक्तार्थज्ञापक इति तदपि न तेन निर्देशेन द्वंद्वे प्रसक्ते. सतीति व्याख्यानमेव ज्ञाप्यतामपूर्वस्य ज्ञापक-सिद्धस्य वचनस्य कल्पनापेक्षयाज्ञाप्यार्थस्यास्मत्सम्मतव्याख्यानेन सिद्धौ लाघवात् उद्भूतावयवभेदसमूहवाचकसर्वशब्दादापि सुटः प्रवृत्त्या तस्य निर्देशस्योपपन्नत्वाच्च मूले प्राचेति प्रक्रियाकृतेत्यर्थः सम्भव इति अस्य प्रसादकृतोक्त इति शेषः अवयवयोरिवेति नचावयवयोः प्रातिपदिकत्वस्वी-कारे ऽल्पत्वात्प्रत्येकं सुबुत्पत्तिरपि भविष्यति तथाच नियमविषयतायाः सत्वात्समुदायस्य प्रातिपदिकसंज्ञा न भविष्यतीति वाच्यम् समुदायोत्तरोत्प-न्नसुपा स्वार्थसङ्ख्यान्वयसमर्पणे प्रत्येकं सुबुत्पत्तेरप्रवृत्तिरित्याशयात् अ-र्थवत्वादिति अर्थस्य प्रकाशनार्दित्यर्थः सजातीयेति पदसंज्ञकपूर्वभागघटि-तत्वेन साजात्यस्य विवक्षणादिति भावः ॥ सिद्धान्तभूतार्थेपि प्रक्रि-योक्तस्योपपत्तिमाह स्वातन्त्र्येणेति अनुग्रहेति प्रत्येकार्थस्यापि समुदाय-घटकतया सङ्ख्यान्वायित्वस्य सम्भवरूपानुग्रहेत्यर्थः अत एव तादृशानुग्र-हादेव अन्यथा एकाज्द्विर्वचनन्यायबाधाकल्पने द्वन्द्वोच्छेद इति तथाच द्वन्द्वविधानसामर्थ्यात्तत्र तस्य बाधस्य कल्पनेति भावः ननु द्वन्द्वविधानसा-मर्थ्येन चार्थ इति सूत्रे सुविति निवृत्तमित्येव कल्प्यतान्तावतापि तस्य सा-र्थक्यम्भविष्यतीत्यत आह नलोपाद्यसिद्धिरिति राजसैनिकावित्यादाविति आदिः आदिना वाक्यत्वचमित्यादौ कुत्वादेः सङ्ग्रहः आवृत्त्योक्तव्याख्या-नेपि वाक्यापरिसमाप्त्या न्यूनतापत्तिरत आह तेषामिति ननु यद्यपि कण्ठरवेण भाष्यकृता आवृत्तिर्नोक्ता तथापि मातृपात्रोः प्रतिषेध इत्यनेन ध्वनितेति कल्पयाम इत्यत आह किञ्चावृत्ताविति इत्यर्थापत्त्येति न-चास्मिन्पक्षे एवकारापकर्षवैयर्थ्यम् मातृमातारावित्यस्यैवकारापकर्षव्याव-र्त्यस्य सम्भवात् भ्याम्येकशेषस्य प्रवृत्ताविष्टापत्तिं निरस्यति प्रातीति

तदभावस्य एकशेषाभावस्य आद्दतौ एकविभक्तौ यानि सरूपाण्येव तेषामेकविभक्तावेकशेष इत्यर्थो भविष्यति तत्राद्यवाक्यार्थस्य पयःपयो जरयतीत्यत्रासत्त्वमुपपादयति समुदायादिति द्वितीयासत्त्वमाह विभक्तेरिति । सहविवक्षाया अभावमभिकटयति साचेत्यादिना एकार्थेति ॥ छेदनादीत्यर्थः एककारकाबेशे एककारकशक्तिवैशिष्ट्ये शक्तिश्च कर्तृत्वादिरूपा विवक्षिता एतेन प्रकृते ऽसम्भवो ध्वनितः एव भवतीति क्रियान्वयित्वं यत्र तत्रैवंविधैव सहविवक्षा वाच्येति भावः मूले ऽन्यथेति अंशद्वयसद्भाव एवैकशेषस्य प्रसङ्ग इति नियमास्वीकार इत्यर्थः कर्तुं शक्यत्वेनेति मूलोक्तरीत्या समुदायस्य प्रातिपदिकत्वादिति भावः नचात्र यद्येकशेषस्तदा द्वयोर्गौणमुख्यकर्मणोरेकद्वितीयया कथमभिधानमिति वाच्यम् तत्रेण तस्योपपत्तेः आवश्यकमिति तस्य लाभस्तु तिष्येतिसूत्राद्द्वन्द्वइत्यस्यानुवृत्त्या भविष्यति एवञ्च द्वित्वार्थयैवेति निष्कर्षः अत्र पयःपयो नयतीत्यत्र लुकीति उभयोर्नपुंसकत्वादित्यादिः नत्वमतेत्यस्यानित्यत्वेनाप्रवृत्तिस्तु प्रामाणिकप्रयोगस्थल एवेति तात्पर्यम् नन्वत्रापीत्यादि वदता द्वन्द्वे इति नानुवर्तनीयमिति ध्वनितमिति तद्वीत्यैवातिप्रसङ्गो देवदेव इत्यत्रेत्याह असहेति तत्पुरुषादीति देवस्य देवो देवदेव इत्यर्थकतत्पुरुषादीत्यर्थः आदिना इदितो नुमिति बहुव्रीहेः सङ्ग्रहः तत्रापि तत्पुरुषादिघटितवाक्येपि खण्डनकृदुक्तिङ् खण्डयितुं तदुक्तिमनुवदति नन्वेनकेत्यादि नचानयैव रीत्या सर्वत्र निर्वाहे एकशेषारम्भस्य तन्मते वैयर्थ्यमिति वाच्यम् सर्वत्रैकशब्देनैवानेकार्थो बोधनीयानियमाभावाद् घटघटावित्यादिपाक्षिकप्राप्तिविषयानिष्टवारणाय तदारम्भात् तदुक्तिङ् खण्डयति एकशेषारम्भ इति नचानेकमिक्षाशब्दस्य स्त्रीप्रत्यये चानुपसर्जनेनेति परिभाषया प्रत्ययान्तत्वेन कथं समुदायादामिति वाच्यम् स्त्रीप्रत्ययमात्रग्रहणे तस्याः परिभाषायाः प्रवृत्तेरुक्तत्वात् तादृशस्य अनेकबोधकस्यैकस्य परोक्तङ् खण्डयति नचेति समर्थग्रहणं हि परिनिष्ठितम् ॥ परन्तुचाप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रान्तत्वरूपम् इदञ्च यथा सन्धिकार्यात्प्राङ् नास्ति तथैकशेषविधायकशास्त्रस्य प्रवृत्तेः प्रागपि नास्तीति तदभावः कृतसन्धिकार्यत्वमेवात्र परिनिष्ठितत्वभाष्यकारसम्मतमित्याशयेनाह प्रातिपदिकाधिकारेणेत्यादिना प्रातिपदिकेत्यादि कर्मधारयः कार्यस्य विशेषणम् एतादृशात्परिनिष्ठितात् तद्धितोत्पत्तिश्च सूत्रिय-

तिर्वैक्षामाणिरित्यादौ प्रसिद्धैव वर्णमात्राश्रयेत्यनेन निमित्तकार्यिणोरुभयोरपि प्रातिपदिकसम्बन्धित्वम्बोधितम् विष्वगित्युत्तरपदलोपश्चाकृतसन्धेरिति वार्तिके ऽकृतसन्धेरित्यत एव चरितार्थम् ॥ अत एव निमित्तकार्यिणोरुभयोरपि प्रातिपदिकसम्बन्धित्वाश्रयणादेव दीर्घश्रवणमिति नान्तलक्षणदीर्घश्रवणमित्यर्थः प्रकृतो दीर्घस्तु न प्रातिपदिकसम्बन्धिवर्णनिमित्तकः किन्तु सर्वनामस्थाननिमित्तकः एतेन विभक्तिनिमित्तकैकशेषस्य भवत्सम्मतस्याप्रवृत्तावपि न परिनिष्ठितत्वहानिरिति ध्वनितम् अत एव विश्वौह आगतं विश्ववाट्रूप्यामिति भाष्यप्रयोगस्याप्युपपत्तिः मूले न स्यादिति एकादेशे कृते परादिवद्भावमात्राश्रयणे ऽसारूप्यादेकशेषाप्रवृत्तिरित्यपि बोध्यम् उभयत आश्रयणं प्रकटयति विभक्ताविति ननु न वयमन्तादिवच्चेति सूत्रस्य प्रवृत्तिं स्वीकुर्मः किन्त्वचः परस्मिन्निति सूत्रस्य प्रवृत्तिं वदाम इत्यत आह अचः परस्मिन्नितीति अत्र शास्त्रस्य एकशेषशास्त्रस्य विधित्वाभावादिति अपूर्वविधित्वाभावादित्यर्थः अनयापि रीत्या शास्त्रीयविधित्वाभावात्मकयुक्त्यापि अपिना मूलोक्तरीतिसङ्ग्रहः मूलोक्तादिकपदसूचितमर्थमाकटयति यदित्यित्यादिना सूत्रस्थभाष्येति तत्र हि दीव्यत इति दीव्यतिशब्दैकदेशदीव्यच्छब्दानुकरणमित्युक्त्वा किमर्थं विकृतनिर्देशः क्रियते एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषा एकदेशविकृतमनन्यवदित्युक्तम् भाष्यप्रामाण्यात् भाष्यसंवादात् अशास्त्रीयस्य चेति चाच्छास्त्रीयपरिग्रहः अदोष इति मूलोक्तकिञ्चेत्यादुच्यक्तदोषाभावः अत एव उक्तन्यायस्याशास्त्रीयविकारेपि प्रवृत्तिस्वीकारादेव तस्य रामावित्यादेः पदत्वेति कार्यकालपक्षेपीत्यादिः अन्यथा सुप्तिङन्तम्पदमिति सूत्रेपि यस्मात्प्रत्ययविधिस्तदादीत्यस्यानुवृत्त्योभयत आश्रयणस्य सत्त्वेन पदत्वन्न स्यादितिभावः । अत एवेति उक्तो ऽर्थः श्रायसाविति श्रेयस्शब्दादपत्ये ऽणि देविकाशिंशपेतिसूत्रेणादेराकारे ऽस्मंतात् द्विवचने परादिवद्भावात्सर्वनामस्थानपरत्वम् आशङ्क्येति यद्यशास्त्रीयविकारे तस्य न्यायस्य प्रवृत्तिर्न स्यात्तर्ह्यात्वस्य शास्त्रबोध्यत्वेपि स्थानिन एकारस्य या निवृत्तिस्तस्याः शास्त्रबोध्यत्वाभावात्सर्वनामस्थानस्य यतो विधानन्तत्त्वस्याभावेन नुमः प्राप्तेरेवाभावेन शङ्काया एवासम्भवः स्यादिति भावः न स्यादिति रामावित्यादावित्यादिः परस्य हलन्त्यत्वादिति शेषः न दोष इति किञ्चेत्युक्तदोषो नेत्यर्थः नच

विरूपाणामपीति वचनस्य समानार्थविषयकत्वमुक्तं तु तदभाव इति कथन्तस्य प्रवृत्तिरिति वाच्यम् तस्मिन्वचने ऽपिः सर्वोपाधिव्यभिचारार्थस्तथा चानुपूर्वीभेदे ऽप्येकार्थत्वे यथाप्रवृत्तिस्तथा ऽसारूप्ये विशेषार्थभेदेपि प्रवृत्तिनिमित्तस्यैकत्वेपि प्रवृत्तिः अस्ति चात्र योगिकर्तृकध्यानकर्मत्वमप्रवृत्तिनिमित्तमेकमित्याशयात् वस्तुतस्तु तुना ऽरुचिर्ध्वनिता साच सर्वथा यत्र समानार्थत्वन्तत्रैव तस्य वचनस्य प्रवृत्तिरिति प्रकृते तदप्राप्तिरेवेति नच घटश्च कम्बुग्रीवावांश्चेति सहविवक्षायामेकशेषो न स्यात् प्रवृत्तिनिमित्तभेदात्कम्बुग्रीवाया अवयवसंस्थानविशेषरूपत्वादिति वाच्यम् कृतैकशेषाद्यत्र लुप्यमानार्थाभिधानन्तत्रैव प्रवृत्तेरङ्गीकारेण प्रकृते तदप्रवृत्तेरिष्टत्वात् उक्तसहविवक्षाया असम्भवेन द्वन्द्वस्याप्रसक्तेश्च अलमित्यनेनावयवेभ्यः सुबुत्पत्तेर्दुर्वारत्वेन समुदायस्य प्रातिपदिकसंज्ञाया अप्राप्त्या ततः सुपो ऽसम्भवे तस्य पक्षस्य सम्भव एव नोपपद्यते नच समुदायोत्पन्नविभक्त्या ऽवयवानां समुदायघटकतया सङ्ख्यान्वयसंभवरूपानुग्रहेणावयवेभ्यः सबुत्पत्तिर्न भविष्यतीति वाच्यम् अवयवानाम्पदसंज्ञारूपस्य तत्तदुपादानकोत्पत्तिकविभक्तिप्रयोज्यस्योपकारस्य समुदायोत्तरोत्पन्नसुपा ऽसम्भवेन प्रत्येकं सुबुत्पत्तेः सम्भवात् अपिच नीलङ् घटम्पश्येति वाक्ये घटशब्दादुत्पन्नसुपा नीलपदार्थगतसङ्ख्याकर्मत्वमतिपाद्यते यद्यपि तथापि साधुत्वार्थन्नीलेतिप्रातिपदिकादपि सुप् भवति तथात्रापि स्यादिति ध्वनितम् मूले प्राचा व्याख्यात्रेति प्रसादकृतेत्यर्थः द्रव्याणामिति वर्तिपदार्थरूपाणामित्यर्थः मूले अजहत्स्वार्थायामिति यत एकैकस्य स्वार्थप्रतिपादकता समभिव्याहृतप्रातिपदिकान्तरार्थप्रतिपादकता चास्तीत्यतो ऽजहत्स्वार्थत्वव्यवहारः एवञ्च । द्वित्वादिविशिष्टार्थाभिधायकद्विवचनादुच्चत्पत्तिर्निर्बाधैवेति भावः तत्कल्पनादिति प्रत्येकमनेकार्थाभिधायकत्वस्य कल्पनादित्यर्थः ॥ एतत्पक्षे प्रसक्तातिप्रसङ्गं वारयति रामकृष्णाविवादाविति द्वन्द्वविधानसामर्थ्येनेति इदमुपलक्षणम् समानार्थानामिति विशेषणसामर्थ्यादित्यपि बोध्यम् तत्प्राक्कालिकस्य युगपदधिकरणत्ववचनत्वात्प्राक्कालिकस्य तत्र वार्तिकपूर्वत्तौ निमित्तत्वादिति निमित्तत्वेनाश्रयणादित्यर्थः मूले जहत्स्वार्थायामिति अस्मिन्पक्षे ऽवयवानामनर्थकतया पूत्येकन्द्विवचनादुच्चत्पत्त्यसम्भवः पक्षान्तरेपीति अजहत्स्वार्थावृत्तिपक्षेपीत्यर्थः प्रथममेकवचनस्य पूर्वत्तौ साधकमाह

अयम्भाव इत्यादिना तत्कल्पनेपि अनेकार्थाभिधायित्वकल्पनेपीत्यर्थः अनन्तरम् सुबुत्पत्त्यनन्तरम् तत्कल्पकेति युगपदधिकरणताकल्पकेत्यर्थः एवञ्च सुबुत्पत्तिकाले तयोरप्रवृत्त्या कल्पकाभावेन तदभावे च अन्तरङ्गत्वम् स्वार्थमात्रसापेक्षत्वादन्तरङ्गत्वम् तादिति उत्तरपदार्थः स्वार्थस्य पूर्वपदार्थस्य तस्य सम्बन्धस्य तदन्तेति षष्ठ्यन्तेत्यर्थः तदुच्छेदः षष्ठीतत्पुरुषोच्छेदः दुःखादुःखमदा झटिति प्रतीतावनुपारोहादोषाक्रान्तत्वाच्च एतदेवाह वृद्धव्यवहारेति अस्य व्याकरणादिभ्यो ऽपि प्रथमप्रवृत्त्या प्राधान्यम् नच नहि ननु शक्त्यभावेपि लक्षणास्तु इत्यत आह न्यग्रोधशब्देनेति यदि भवत्सम्मतयुगपदधिकरणवचनता स्यात्तदा बोधावृत्तिः स्यात्सापि नास्तीत्याह प्लक्षन्यग्रोधाविति दुरुपपादेत्यस्य दुष्टः निःसारः उपपाद उपपादनं यस्याः सेत्यर्थः तस्याप्रमाणाशङ्कां निरस्यति नचेति द्विवचनेति द्वन्द्वोत्तरद्विवचनेत्यर्थः अभिधानशक्तिमत्त्वात् अभिधानसामर्थ्यवत्वादित्यर्थः ननु समुच्चयान्वाचययोर्द्वन्द्वापत्तिरेवोपपादिका भविष्यतीत्यत आह समुच्चयेति नचेति आवश्यकमित्यत्रास्यान्वयः अन्यत्र द्वन्द्वे यः शिष्यत इति न्यायेन कस्यचित्सर्वार्थप्रतिपादनसामर्थ्यवत्वं वक्तव्यन्तत्र विनिगमनाविरहात् सर्वेषामेव तथात्वं वक्तव्यमिति भावः तथासतीति यद्येकशेषविषये तत्स्वीकारस्तदा एकेनानेकार्थबोधस्यैकशेषं विनापि सिद्धतया तद्वैयर्थ्यमिति भावः तस्मादिति एकशेषवैयर्थ्यापत्तेरित्यर्थः तच्छक्तीति अनेकार्थाभिधानशक्तीत्यर्थः ततः एकशेषात् न दोषः नैकशेषवैयर्थ्यापत्तिरूपदोषः एतेन प्रागेकवचनस्योत्पत्तिर्दुर्वारेति प्रतिपादितम् मूले यदपि व्याचख्युरिति प्रसादकृत इति शेषः एवकारासङ्गतिमुपपादयन्नाह ब्राह्मणेति अन्यत्रापि रामावित्यादावपि नन्वेवंसति बहुर्थस्य तत्रेण तत्र प्रतिपत्तिसत्वाद्बहुवचनापत्तिरत आह न ब्राह्मणमिति नन्वेकशेषं विना कथमनेकार्थाभिधायकत्वम् अन्यथा प्रत्यर्थं शब्दनिवेशान्नैकेनानेकार्थाभिधानमिति भाष्यविरोध इत्यत आह 'अयम्भाव इति तत्र न ब्राह्मणं हन्यादिति दृष्टान्तस्थले अन्यथा अर्थावर्थावित्याद्यनङ्गीकारे बोधेति अनेकार्थबोधेत्यर्थः सूत्रारम्भात्सूत्रेणैकशेषेपीष्टार्थानां बोधानुपपत्तिरिति भावः तत्रस्थ द्वौ भेदौ शास्त्रप्रसिद्धौ अर्थतन्त्रम् शब्दतन्त्रञ्चेति तत्राद्यमाह अत्रार्थतन्त्रमिति अत्र न ब्राह्मणं हन्यादित्यादिषटकब्राह्मणादिशब्दे

सकृदुच्चरितस्यानेकार्थपरत्वं यत्र तत्र तन्त्रव्यवहारः यत्रार्थानाम्भेदेपि शब्दैक्यन्तत्र तालवोष्ठपुटादिव्यापारप्रकाशितैकशब्देनैकवृन्तगतानेकपुष्पफलन्यायेनानेकार्थसम्बन्धेनैकशब्देनानेकार्थबोधादर्थतन्त्रामिति व्यवहारः । एतदेवाह एकत्रैकेति अस्य लक्षणमाह शब्दस्येति पर्यायपरिवृत्तीति पर्यायेण पर्यायवाचकेन परिवृत्तिरनेकार्थस्य प्रकाशनन्तत्सहत्वमित्यर्थः स्वप्रयोगाभावेपि स्वबोध्यावदर्थबोधकस्वपर्यायकत्वमर्थतन्त्रत्वम् अस्ति चेद्ब्राह्मणादिशब्दे ब्राह्मणशब्दस्य प्रयोगाभावेपि तद्बोध्यानाम्बोधनाय विप्रशब्दस्य प्रयोगदर्शनात् द्वितीयमाह अक्षा इत्यादाविति अत्राक्षशब्दो देवनाक्षरथाक्षविभीतकानाम्प्रतिपादकस्तावतामन्येनाप्रतिपादनादिति भावः प्रातिपदिकतन्त्रादयो ऽन्ये तन्त्रा अनयोरेवान्तत्र प्रतिपादिताः तत्र क्षमयोरित्यत्र उभयवृत्त्येकजातेरत्राभावेन तन्त्रानङ्गीकारे जातिप्रकारकानेकार्थविशेषकप्रतीतिरत्र न सम्भवतीति बोध्यम् उक्तरीत्या सूत्रकाराशयमुपवर्ण्य भाष्यविरोधम्परिहरति अनभिधानामिति पक्षद्वयेचेति जातिपक्षे व्यक्तिपक्षेचेत्यर्थः व्यक्तेर्वाच्यत्वमते ऽप्यर्थावर्थावित्याश्रयणेनैकस्यानेकार्थत्वमप्यभिधानस्वाभाव्यादिति तद्भावः नच प्रत्येकव्यक्तेः शब्दप्रतिपाद्यत्वविवक्षायान्द्वन्द्वापत्तिवारणाय सूत्रमस्त्विति वाच्यम् चार्थ इत्यस्य सूत्रस्य येषाञ्चार्थे वृत्तिस्तेषां संज्ञाविधायकत्वञ्चार्थः समूहः सच भिन्नानामेव भेदश्च क्वचित्पदार्थानां स्वतःसिद्ध एव क्वचित्तु पदार्थतावच्छेदककृत इति घटशब्देनैकेनैव प्रतिपादनन्नतु पदार्थानाम्भेदात्साहित्यस्य प्रतीतिरित्याशयात् एतदेवाह अनेकेति ननूक्तरीत्या चार्थवृत्तित्वाभावेनैव पाक्षिकानिष्टवारणे सिद्धे आवश्यकमित्यनुपपन्नमत आह अनभिधानाज्ञान इति मूले सूत्रवैयर्थ्यमेव हृदि निधायेति अयम्भावः यद्येकार्थाभिनिवेशित्वमेव शब्दानान्तर्हि कृतेप्येकशेषे नानेकाभिधानं शिष्यमाणेनैकेन वचनेनासत्याः शक्तेर्वक्तुमशक्यत्वात् यदि स्वभावादनेकार्थाभिधायकत्वं सिद्धमेव तदा सूत्रम्मास्तु एकेनानेकव्यक्तिप्रतिपादनसम्भवादिति इत्यादीत्येतावन्मात्रमधिकसाकाङ्क्षमत आह किन्त्विति एतच्चार्थत उपनिबद्धम् तदीयग्रन्थानुपूर्वीतु किन्तु वृत्तिविषये एकस्याप्यनेकार्थाभिधानशक्तिरस्तीति ज्ञाप्यत इति मूले आहुरिति प्रसादकृत इति शेषः नतु लौकिकमिति एकशेषस्य नित्यतया तादृशप्रयोगासम्भवादिति भावः शास्त्रप्रवृत्त्येति

वैरूप्यादित्यादिः तावदेव रामरामावित्येतावदेव तत्प्रक्रियावाक्ये एकशेषस्य प्रक्रियावाक्ये सन्दर्भविरोधमुपपादयति एकस्यैवेति इति सूत्रमिति एतेन समुदायादेकविभक्तिप्रदर्श्य सूत्रस्य स्थापनप्रदर्शितत्वतः प्रत्याख्यानप्रकारः समुदायादित्यादि दर्शितः इदं स्वभावतो विरुद्धम् यदि प्रत्याख्यानप्रकारस्यैव स्वाभिमतत्वात्तदा समुदायादेकविभक्तिप्रदर्शनासङ्गतिस्तस्या एव युक्तत्वे प्रत्याख्यात इत्ययुक्तमिति भावः अत्र प्रयुक्तानेवेत्यादिना यन्न्यायविरुद्धत्वस्य मूले प्रदर्शनात्तदेव विरुद्धम् परिनिष्ठितं हि द्विविधम् प्रक्रियावाक्यरूपम् लौकिकञ्चेति तत्र प्रक्रियावाक्ये सन्धिकार्यन्न प्रवर्तते तावन्मात्रस्यैव प्रयोगार्हता स्यादिति रत्नाकरोक्तिङ् खण्डयति नेत्यादिना वैषम्यादिति अत्र वृद्धिप्रवृत्तौ तावदेवोक्तरीत्या परिनिष्ठितं चेत्स्यात्तच्च न लोके प्रयुज्यत इति भावः भाष्यवार्तिकेति यद्यपि भाष्ये नावावनड्वाहाविति कण्ठरवेण नोक्तम् किन्तु ऋक्च ऋक्च ऋचौ समासान्ते कृते असारूप्यादेकशेषो न प्राप्नोतीत्येवाभिहितम् तथापि तदुत्तरग्रन्थे अङ्गाश्रये चैकशेषवचनमिति वार्तिकव्याख्यानावसरे कैयटेनेत्थमभिहितम् अङ्गाश्रयकार्यञ्च भाष्ये दर्शितं स्वसाच स्वसारौच स्वसार इत्यनेन तत्र कैयटः अङ्गाश्रयेचेति चशब्दादनङ्गाश्रयेपि यथा नौश्च नावौचेति प्राह परत्वादिनेत्यादिना ऽत्तरङ्गत्वेन ऋचावित्यत्र समासान्तस्य प्रवृत्तिर्दर्शिता असङ्गत्यापत्तेरिति अलौकिके प्रक्रियावाक्ये शास्त्रीयम्परिनिष्ठितत्वप्रयोजकं शास्त्रन्न प्रवर्तत इति भवन्मतन्तच्चोक्तभाष्यवार्तिकाभ्याङ्कैयटीयव्याख्यानेन च विरुद्धमिति भावः अलमिति एतेन यथा ऽनेकव्यक्तिप्रतिपादनायानेकप्रातिपदिकस्य प्रयोगे प्राप्ते एकस्यैव यथा स्यादित्येवमर्थमस्य सूत्रस्यारम्भ इति प्रातिपदिकेषु सूत्रस्य प्रवृत्तिर्भवति तथा धातुषु न भवति एकनिष्ठानामनेकव्यापाराणामिवानेकनिष्ठानामपि व्यापाराणामेकधातुत एव निवृत्तभेदानामप्रतीत्या ऽनेकधातुप्रयोगस्याप्रसक्तेः तदुक्तभाष्ये न तिङन्तान्येकशेषारम्भमयोजयन्ति यथा जातीयकानान्द्वितीयस्य पदस्य प्रयोगे सामर्थ्यमस्ति तथा जातीयकानामेकशेषः नच तिङन्तानान्द्वितीयस्य पदस्य प्रयोगे सामर्थ्यमस्ति किङ्कारणम् एका हि क्रिया ऽनेकेनोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यमुक्तार्थानामप्रयोग इति अत्र कैयटः यथा जातीयकानाम् सत्ववाचिनाम् एका हीति आख्यातवाच्या क्रिया सर्वैव

निवृत्तभेदा पूतीयत इति एकश्च एकश्च द्वौ च द्वौ चेत्यत्रानभिधानान्नैकशेषः विंशतेश्च विंशतिश्चेत्येवं सहविवक्षायां विंशती इति त्विष्टमेव तदुक्तभाष्ये इह कस्मान्न भवति एकश्च एकश्च द्वौ च द्वौ चेति एवमाशङ्क्य सङ्ख्याया अर्थासम्प्रत्ययादन्यपदार्थत्वाच्च नैकशेषः न ह्येकावित्यनेनार्थो गम्यते अन्यपदार्थत्वाच्च संख्याया एकशेषो न भविष्यति एकश्च एकश्चेत्यस्य द्वाविति अर्थः द्वौ च द्वौ चेत्यस्य चत्वार इत्यर्थः वाचकशब्दान्तरसत्ताविशिष्टार्थासम्प्रत्ययेनैकादिआदशानामेकशेषो न विंशत्यादीनान्तु भवत्येवेति तात्पर्यार्थः अर्थासम्प्रत्ययादित्यस्य यत्रैकः शब्दो ऽनेकमर्थमभिधातुं शक्नोति तत्रैकशेषो नान्यत्र प्रयुक्तानामन्वाख्यानारम्भात् एकावित्युक्ते असहायादिरर्थो गम्यते नतु द्वावित्यत्र तात्पर्यम् ततो ऽर्थासंप्रत्ययेपि गार्ग्यश्च गार्ग्यायणश्च गार्ग्यावितिं अक्षश्च अक्षश्चाक्षावित्यत्रैकशेषो दृश्यत इत्यभिप्रायेण पूर्वोक्तौ पृथक् परिहारौ नोपपद्येते इत्याशयेन शङ्काङ् कृत्वा एवन्तर्हि नेमौ परिहारौ एकपरिहारोयं संख्याया अर्थासम्प्रत्ययादन्यपदार्थत्वाच्चेति यत्र ह्यर्थासम्प्रत्यय एव वा अन्यपदार्थतैव वा भवति तत्रैकशेषः गार्ग्यौ विंशती इति यथेति भाष्यीयप्रघट्टकार्थो ध्वनितः नन्वचो ऽवयवत्वादमियोजित्यनुपपन्नमत आह अवयविन इति उत्तरत्र सम्प्रसारणाच्च अवङ् स्फोटायनस्येत्यनयोः अनुवृत्तौ अत्र प्रकरणे ऽनुवृत्तौ नन्वग्रे ऽनुवृत्तिरस्तीति चेन्मध्येपि सम्बन्धो भविष्यत्येव पुनस्तत्र ज्ञापकोपन्यासवैयर्थ्यमत आह अनुवृत्तस्येति । भाष्ये इति तत्र हि गामिच्छति गच्छतीत्यत्र प्रत्ययलक्षणेनौतो ऽम्शसोरित्यात्वमाशङ्क्यानात्वविधाविति वचनान्न भवतीत्युक्तम् अज्ग्रहणानुवृत्त्यभावे ऽनात्वविधाविति निषेधाप्राप्त्या तदसङ्गतिः स्पष्टैव पृथमयोरित्यतः पूर्वसवर्णग्रहणानुवृत्त्यैव सिद्धे पूर्वग्रहणं राममित्यादौ द्विमात्रादेशव्यावृत्तये यत्तु पूर्वग्रहणानुवृत्त्यैव सिद्धे पूर्वग्रहणमेकादेशे कृते राममित्यत्र सुपि चेति दीर्घो माभूदिति तन्न पूर्वान्तवद्भावेनाकारान्ते सुप् यस्माद्विधीयतेत्यस्य सद्भावेपि मकारमात्रे सुप्लाभाभावात् एकदेशविकृतन्यायस्यार्द्धाधिकविकारे ऽपूवृत्तेः नापि स्थानिवद्भावेनानुमानिकादेशकल्पनया तत्त्वम् अमः स्थानित्वाभावात् अअमित्यस्य स्थानित्वकल्पने तु सुप्त्वस्य स्थान्यवृत्तित्वं स्पष्टमेव अवयवषष्ठीत्यस्यावयवत्वरूपसम्बन्धार्थिका षष्ठीत्यर्थो वाच्यः सच न सम्भवति सम्बन्धस्योभयनिष्ठत्वस्वभावतया

ऽवयवत्वस्यैकमात्रसम्बन्धित्वेन सम्बन्धत्वस्य वक्तुमशक्यत्वात् यद्यप्य-
वयविन्यपि निरूपकत्वात्मकस्तदीयः सम्बन्धो ऽस्ति तथापि स वृत्त्यनि-
यामक इत्याशयेनाह अवयवाऽवयविभावेति अवयवत्वावयवित्वसमूहः स-
म्बन्ध इत्यर्थः एवमेव स्वस्वामिभावादिस्थलेपि बोध्यम् प्रकृतसूत्रे नुम्ग्र-
हणं तद्व्यवधानेपि णत्वार्थं कृतं यद्येकव्यवधान इत्यर्थः स्यात्तदा यत्र
नुमा व्यवधानं तत्रैकमात्रव्यवायाभावेन तस्य वैयर्थ्यापरिहरतस्तस्यैव ज्ञा-
पकत्वसम्भवे निर्देशपर्यन्तानुधावनमफलमत आह नुमिति एवञ्च मूले प्रा-
चामनुरोधेन तथोक्तमिति भावः नच नुम्ग्रहणस्यानावश्यकतया तस्य
ज्ञापकत्वन्न सम्भवतीति वाच्यम् सूत्रार्थनिर्णयावसरे तत्प्रत्याख्यानानव-
सरात् सच नियमश्चेत्यर्थः उत्तराऽभागेनेति एतच्चाऽभागमात्रोपलक्ष-
णम् सर्वतोऽभागस्य सत्त्वादत एव प्रातर्ऋतमित्यत्र रोरीति लोपो न
णत्वसिध्या ऋकारावयवरेफात्परत्वेन णत्वस्य सिद्ध्या अत एवाह इद-
मिति आदर्शेनेत्यादौ णत्वाप्रवृत्तिर्योगविभागाभावेपि भविष्यतीत्याशयेना-
शङ्कते यद्यपीत्यादिना ध्वनितमिति णत्वे ऽन्यव्यवाये प्रतिषेधो वक्तव्यः
नवा ऽन्येन व्यवेतत्वादिति ग्रन्थेन ध्वनितमित्यर्थः तत्र रषाभ्यामिति सू-
त्रे इदमेव योगविभागेन नियमत्वमेव यथोत्तरम्मुनीनां प्रामाण्यात्तत्खण्ड-
नाय प्रवृत्तेश्च उक्तनियमं विनोक्तसादृश्यस्यालाभः स्यात् ननु स्वाभा-
विकाऽनुस्वारो दुर्लभः नकारजावनुस्वारपञ्चमा इति वृद्धोक्तेरत आह त-
द्भिन्नस्थानिकेति नन्वेवमपि स्वाभाविकत्वमनुपपन्नमेव नुम्भिन्नस्थानिकस्या-
पि लक्षणवशसम्पन्नत्वादत आह पाणिनीति एतेन स्वस्य पाणिनेराभा-
वः उच्चारणं स यत्रास्तीति व्युत्पत्तिर्ध्वनिता एतादृशव्याख्याने बीज-
माह तृंहूइत्यादेरिति वृद्धोक्तेरावश्यकत्वमाह अत एवेति नकारस्थानिक-
त्वादेव इवि प्रीणने इत्येवम्पाठाभावादाह हिवीति पठितस्येति माधवादि-
भिरिति शेषः एतेन स्वमते इवि व्याप्तावितिपाठेपि न क्षतिः दिगर्थमाह
तद्वदिति नुम्विसर्जनीयेतिसूत्रस्थनुम्ग्रहणवदेतत्सूत्रस्थनुमित्यर्थः असिद्धे-
रिति यदि नुम्स्थानिके लक्षणा स्यात्तदा तृंहणमित्यत्र नुम्स्थानिका-
नुस्वाराभावाण्णत्वन्न स्यादतः काकेभ्यो दधि रक्ष्यतामिति वाक्यस्थ-
काकपदस्य दध्युपघातकसामान्ये यथा लक्षणा तथेहापि नुम्शब्दस्यानु-
स्वारमात्रे लक्षणा स्वीकार्येति भावः तिङन्तस्य तरब्निरूपिताङ्गसंज्ञायाः

फलमाह तदनङ्गीकारे इत्यादिना आपादनादीति अत्रादिना तत्समाधानपरभाष्यसङ्ग्रहः एवमदुहितरामित्यत्रेटः सम्प्रसारणसंज्ञायां हल इति दीर्घः प्राप्तः स यथासंख्यविज्ञानान्नेति ग्रन्थस्य च न तस्य मते विरोधः निपातसमुदायादिति एतेन प्रातिपदिकत्वाभावो ध्वनितः अलमिति अलर्थस्तु यदि णप्रत्ययस्य णित्त्वसामर्थ्याण्णित्त्वनिमित्तिका वृद्धिर्भविष्यतीत्याश्रीयते तदा नेदमयोजनम् किन्तु औपगवादौ वृद्धिर्न स्यात् सुबन्तात्प्रत्ययस्य विधानेनाण्प्रत्ययनिरूपिताङ्गत्वस्य भवन्मते ऽभावेरिति बोध्यम् यदि त्वत्रापि प्रातिपदिकाधिकारात्प्रातिपदिकादेव विधानमणादेः कुत्सित इति सूत्रस्थभाष्यरीत्या तु सुबन्ताद्भवन्तीतीत्युच्यते तदा ऽपाचितरामित्यत्र लुगापादनपरभाष्यविरोध एव मुख्यन्दूषणमिति । उत्तरार्थमिति बहुलञ्छन्दसीत्युत्तरसूत्रार्थमित्यर्थः मूले षष्ठी विषयभेदाद्भिद्यत इति एतेन तत्रेण षष्ठीद्वयोच्चारणन्तत्रास्तीति दर्शितमेतदेवाह आदेशेत्यादिना षष्ठीभेद इति अत्र प्रतिपाद्यार्थस्य भेदान्ङस्द्वयोच्चारणङ्कार्यन्तच्च समुदायान्न सम्भवतीति सूत्रे तत्रेणौस्रूपस्य सकृदुच्चारणेन निर्देशः कृतः तत्तद्विषयस्य संस्कारकाले तु प्रत्येकं ङसन्तस्योच्चारणेन वाक्यस्य कल्पना कार्येति इत्येवंरूप इति इत्येवं व्याख्येयवाक्यार्थ इत्यर्थः षष्ठीभेदः वाचिकायाः षष्ठ्याभेदः नच ङसैकस्य सम्बन्धस्य बोधनवदोसासम्बन्धयोर्बोधनम्भविष्यति किन्तत्र स्वीकारेणेति वाच्यम् प्रतियोगिन एकत्वे ङसः प्रयोगस्तयोर्द्वित्वादावोसादेरिति कल्पना तत्रेणैवेत्याशयात् ननु यत्र शब्दस्य सारूप्यन्तत्र तत्रेणोच्चारणमिति भवति प्रकृतेतु तन्नास्तीति कथन्तत्रेणोच्चारणङ्किञ्च प्रत्ययमात्रे तत्रेणोच्चारणं लोके न दृष्टमत आह ओस्सम्बन्धेति तथाचैकस्यौसो यतः सम्बन्धद्वयार्थत्वमत एवात्र तत्रव्यवहार इत्याशयः अभिमान इति प्रकाशग्रन्थानुवादकर्तुरिति शेषः ननु यदि तिसृणामित्यत्र षकारस्यापत्तिस्तदा सकारोच्चारणवैयर्थ्यमत आह तिस्रादेश इति चरितार्थमिति एतेन तिस्र इत्यत्रैव षत्वापादने कार्ये तिसृणामित्येतत्पर्यन्तानुधावनमफलमिति यत्केनचिदुक्तन्तदपास्तम् निषेधाविषयस्य प्रदर्शनाय तावत्पर्यन्तानुधावनात् ननु सकारस्य सोष्मणो ऽघोषस्य तादृश एव षकार इति परोक्तानुवादकृत्वा ठकारे ऽतिप्रसङ्गादिति यन्मूलकृता ऽभिहितन्तदयुक्तं ठकारस्य सोष्म-

स्वानुक्तेरत आह सोष्मण इति तस्यापि द्वितीयस्यापि ननूष्मशब्दस्य श-
षसहा ऊष्माण इत्यत्र धर्मिवचनत्वस्य दृष्टतया सोष्माण इत्यनुपपन्न-
मत आह सोष्मण इत्यस्येति भावप्रधानोष्मशब्देन सोष्माणाविति्यत्र स-
मास इति भावः नचैवंसति विवृतमूष्मणामित्यत्र द्वितीयस्यापि ग्रहणा-
पत्तिरिति वाच्यम् शषसहानामेव तत्र ग्रहणात् अन्यथा नाञ्झलाविति
सौत्रनिर्देशस्यानुपपत्तिः स्यात्पूर्वस्य सोष्मत्वाभावात् हकारस्य तु सोष्म-
त्वेन विवृतत्वेन प्रयत्नभेदस्य जागरूकत्वात् एतदेव ध्वनयति अत्रार्थे इति
ऋष्यन्तरेति आश्वलायनप्रातिशाख्यकृत इत्यर्थः ॥ ननु गतिकारकेतिवच-
नस्य कथं दधिसेचाविच्छत्र प्रसक्तिर्यावता कैयटेन सोपपदाद्विच् नास्ती-
त्यभिहितमत आह सोपपदादिति सुपीत्यनुवर्तमाने ऽन्येभ्योपि दृश्यन्त
इत्यनेनात्र विच् इति भावः विचीति सतिसप्तमीयम् दृश्यन्त इति दृशि-
ग्रहणादुपपदस्यापि व्यभिचारोत्र द्रष्टव्यो ऽत एव वनिपा शर्वरीत्युदाहर-
णस्य सिद्धिरिति भावः प्रत्ययलक्षणप्रतिषेधवचनस्याप्राप्तिमुद्घाटयति उ-
त्तरपदत्व इति उत्तरपदत्वे चापदादिविधाविति वचनेनेह निषेधः प्रत्य-
यलक्षणस्य न भवति पदादिविधित्वादित्याह तत्र उत्तरेति लुप्तविभक्ति-
कमुत्तरशब्दः समासचरमावयवे रूढे वाक्ये प्रयुज्यमाने वाक्यैकदेशस्य
प्रयोग इति न्यायेन पदत्वशब्दः पदत्वव्यपदेशपरः कर्तव्य इत्यस्याध्याहारः
ननुत्र कैयटीयरीत्या केवलादेव विजिति पूर्वोक्तमसङ्गतमत आह यद्यपीति
तथापीति अस्यानभिधाने न मानमिति परेणान्वयः उत्तरपदत्वेति वार्ति-
कपत्याख्यानप्रकारमाह याचिभामित्यत्रेत्यादिना तेन मध्यवर्तिसुपो भसंज्ञा-
विधानेन नन्वेवं याचिभामिति सूत्रस्य व्याख्याने वाचेत्यत्र भसंज्ञा तस्मा-
न्मध्यवर्तिसुबन्तविरहादत आह अत्रेति नन्वेवमसर्वनामस्थानपरत्वं यत्र
तत्र भसंज्ञयेष्टसिद्धावपि यत्र सर्वनामस्थानपरत्वं सुवाचाविित्यादौ तत्र प्र-
त्ययलक्षणेन पदत्वं दुर्वारमेवेत्यत आह एवमिति विभज्येत्यादि ल्यबन्तानां
नेत्यर्थ इत्यस्य शेषभूतं यत्कार्यं इति पदत्वदूघटकधात्वर्थकरणक्रियायाम-
न्वयः तत्र प्रथमल्यबन्तस्य विधायेत्यत्रैवान्वयः प्रसज्यप्रतिषेधमाश्रित्येति ।
असमर्थसमासो ऽसर्वनामस्थान इति पद इत्याश्रित्येत्यपि बोध्यम् तत्परम्
यजादिसर्वनामस्थानपरमित्यर्थः । राजपुरुषादिशब्दघटकराजादिपदे नि-
षेधातिप्रसङ्गशङ्कां वारयति सुबन्तश्चेति तत्र सुवाचाविित्यादिशब्दे अत्र

योगविभागसामर्थ्यादनन्तरस्येति न्यायस्य बाधो बोध्यः यचीत्यस्यापकर्षेणायमतिषेध उक्तस्य फलमाह श्रूयमाण इति तेन पदसंज्ञानिषेधेन इत्येवमिति यचिभमित्यारभ्योक्तप्रकारद्वयरूपे इत्यर्थः आवश्यक इति अन्यथा पूर्वोक्तरीत्या सेच्छब्दस्य पदत्वनिषेधात्सात्पदाद्योरित्यस्य प्रवृत्तिर्न स्यादिति भावः एवञ्चानभिधाने साधकालाभः यथोत्तरम्मुनीनाम्प्रामाण्याद्वाक्यकारोक्त्यैव व्यवस्थात्तर्यमिति तथा वदतो मूतकृत इति शेषः उत्तरपद इति वार्तिकारम्भप्रत्याख्यानपक्षयोस्तुल्यत्वमाह प्रत्याख्यान इति पंचमीसमासे पदादादिरिति पचमीसमासे सतीति शेषः बहुसेचाविति अत्र बहुचः प्रत्ययतया पदत्वाभावेनादेश इत्यनेन प्राप्तस्य षत्वस्याप्रवृत्तये सात्पदाद्योरिति सूत्रानन्तरम्बहुच्पूर्वस्य चेति पठनीयमिति तात्पर्यम् अस्मिन् पक्षे समासचरमावयवकस्य कचिद्योगविभागलब्धनिषेधेन वा पदत्वाभावः श्रूयमाणे सौ पदसंज्ञा त्विष्टैव तत्रैव बहुसेचावित्यत्रैव समासाभावेनोत्तरपदत्व इति कल्पस्य वचनस्य तत्राप्राप्तिरिति पदस्यादिरिति षष्ठीसमासेनैव षत्वस्य वारणादाह कुत्वेति बहुच्पूर्वस्य चेति पदादिविधिभिन्ने पदान्तस्य बहुच्पूर्वस्य कार्ये कर्तव्ये प्रत्ययलक्षणश्चेति तदर्थः दधिसेचावित्यादिसमासेतु कल्पवचनेनैव षत्वकुत्वयोरप्रवृत्तिः अस्मिन्पक्षे समासचरमावयवस्य पदत्वं कार्यविशेष एव नतु सर्वत्रेति विकल्पः श्रूयमाणे सौ पदत्वं नेति निष्कर्षः एवमारम्भप्रत्याख्यानयोः साम्यन्दर्शितम् इदमपीति उक्तप्रकारेण भसंज्ञादिकमपीत्यर्थः एतेन दधिसेचाविंत्यत्र कुत्वाभावाय पदत्वनिषेधस्यावश्यकतया पदस्यादिरिति षष्ठीसमासे षत्वनिषेधानापत्तिः वार्तिकसत्वे त्वपदादिविधावित्युक्तेर्दोषाभाव इति निरस्तम् केचित्तु वार्तिकारम्भपक्षे लाघवमस्ति तथाहि प्रत्याख्यानपक्षे स्वादिष्विति योगविभागः कार्यः असर्वनामस्थाने इति सूत्रे ऽयचीत्यस्यापकर्षो ऽसमर्थसमासश्च स्वीकार्यः भद्रङ् करोषि गौरित्यत्रैचो प्रगृह्यस्येत्यस्याप्रवृत्तिसिद्धये वाक्यान्तः सन्धः पदान्तस्येति व्याख्यानञ्च कार्यम् बहुच्पूर्वस्य चेति सात्पदाद्योरिति सूत्रानन्तरं पठनीयम् वार्तिकारम्भेतु तत्रारम्भ एकः सात्पदाद्योरिति सूत्रे सातेः पदादिति योगविभागेन पठनीयम् अत्र पदशब्दः शक्तस्य पदसंज्ञकस्य च बोधकः नच शक्तम्पदमिति नात्र शास्त्रे प्रसिद्धमिति भ्रमितव्यम् नेर्विश इति सूत्रे निरपि पदं विशिरपि पदमिति

भाष्ये सर्वे सर्वपदादेशा इत्यत्र च तस्य प्रसिद्धत्वात् एवञ्च बहुचः प्रत्ययस्य कुत्साद्यर्थे शक्तिः स्वीकार्येति बहुसेचाविल्यादेः सिद्धौ बहुच्पूर्वस्य चेति वचनं न कार्यम् नचाग्निसादित्यादौ पदादित्येव सिद्धे सातिग्रहणस्यापि एवं सति वैयर्थ्यमिति वाच्यम् स्वादिष्विति यस्य पदसंज्ञेति वक्ष्यमाणार्थज्ञापनाय तस्यावश्यकत्वात् वस्तुतस्तु सातिग्रहणं विध्यर्थङ् कार्यम् हलि सर्वेषामिति निर्देशेन प्रकृत्युत्तरप्रत्ययावयवस्य पदत्वमिति ज्ञापनात् अतएव बुभूषति राजपुरुषेष्विल्यादेः सिद्धिः ध्वनितञ्चेदन्तात्पर्यमित्यरुचिसूचकशब्दोपादानेन एवञ्च मूलोक्तज्ञापकं विनैव रामेष्वित्यादिसिद्धौ लाघवमिति नचैवंसति बहुसेचाविल्यत्रापि षत्वापत्तिरिति वाच्यम् सादिति लुप्तषष्ठ्यन्तम्भिन्नम्पदम् पदाद्योरित्यत्र तु पदञ्चादिश्चेति द्वन्द्वात्यञ्चमी आदिशब्दश्चादित्वविशिष्टबोधकशब्दपर इति बहुचो लाभ इत्याहुः पदत्वमाश्रित्येति नचोत्तरपदञ्च इति वार्तिकेन निषेधः स्यादिति वाच्यम् उत्तरपदस्य कार्यित्वाभावेन तस्याप्राप्तेः ननु सोः समुदायाद्विधानेन राजपुरुषेष्वित्यत्र कथमेतावता निर्वाह इत्यत आह प्रत्याख्यानरीत्येति अत्र प्रत्याख्यानरीत्येतिकथनेन वार्तिकारम्भपक्षस्य युक्तत्वं सूचितमत एव भाष्ये उक्तरीत्या प्रत्याख्यानमुदस्य पुनर्नञ्घटितस्य तस्य वचनस्य पाठेन तस्य सत्वन्ध्वनितम् तस्यापि उत्तरपदस्यापि अयम्भावः प्रत्याख्यानं स्वादिष्विति योगविभागेन क्रियते एवञ्चासर्वनामस्थाने यचीत्यत्र सुबित्यस्य चेदनुवृत्तिस्तदा स्वादिष्वित्यत्रापि तस्य सम्बन्धः कार्यो ऽन्यथा मण्डूकप्लुत्यापत्तिरिति मध्यवर्तिसुबन्तस्यापि तेन पदत्वम्भवतीति एवञ्चेदं समाधानमपि प्रत्याख्यानानुरोधीति स्पष्टं लभ्यते स्वादिपरत्वेन यस्य पदसंज्ञेति ज्ञाप्यतामित्येतच्च सात्यतिषेधो ज्ञापकः स्वादिपरत्वेन येषाम्पदसंज्ञा न तेषाम्प्रतिषेध इति कथनेन भाष्यकृता सूचितमेव केचित्तु सातिग्रहणेन नोक्तार्थो ज्ञाप्यते किन्तु पदादेरिति प्रतिषेधः प्रत्ययस्य पत्वे कर्त्तव्ये न प्रवर्तत इत्येव ज्ञाप्यत इति वदन्ति तन्मतन्दूषयति मूले यच्चाहुरित्यादिना आहुरित्यस्य प्रकाशकृत इति शेषः अनेककर्तृकेति अयं भावः कर्तरिकर्मेतिसूत्रे कर्मशब्दः क्रियापरः व्यतीहारश्च परिवर्तनरूपः अतएवोदीचाम्माङो व्यतीहार इति सूत्रस्थापमित्य याचत इत्युदाहरणव्याख्यानावसरे याचित्वा वस्त्राणि परिवर्तयतीति कैयटेनोक्तम् एवं स्वीयं वस्तु

दत्वा परकीयस्य वस्तुनो ग्रहणमपि व्यतीहारः प्रणिदानं व्यतीहार इत्यनर्थान्तरमिति घसंज्ञासूत्रस्थकैयटात् एवञ्च सम्हरन्ते राजान इत्यत्रेवानेकसाधनसाध्यक्रियास्थल एव व्यतीहारसम्भव इति यत्र कर्तृभेदस्तत्रैव कर्तरिकर्मेति सूत्रस्य प्रवृत्तिर्युक्तेति भावः अत एवैतादृशस्थले बहुवचनान्तप्रयोग एव प्रायेण दृश्यते क्वचिद्व्यतिलुनीत इति यत्तदयुक्तम् एवम्भूतप्रयोगोऽप्ययुक्त एव बाधे दृढ इति न्यायात् नचैवंसति तासस्त्योरिति सूत्रस्थ यद्व्यतिसे इति वृत्तिकारोक्तमुदाहरणन्तत्कथं सङ्गच्छतामिति वाच्यम् तस्य छान्दसत्वात् एवञ्चैकवचनान्तप्रयोगो लोके ऽसाधुरेवेति तथापि स्वरूपक्रियैव परा क्रियेति न्यायेन समाधत्ते तथापीत्यादिना फलतीत्यन्तेन प्रणिहन्मि येनेत्यस्याग्रे राजन्यबन्धुधृतकार्मुकेषुरिति चतुर्थः पादः तव धर्मेण देवब्राह्मणाद्वेषरूपेण येन धर्मेणेति युक्तामिति शेषः त्वत्सम्बन्धिन इति ब्रह्मद्विषस्त्वत्सम्बन्धिनो निहन्मीति योजना तात्पर्यार्थमाह अग्रारभ्येति ननु क्रौर्याक्रौर्ययोर्भावित्वात्कथमत्र लडित्यत आह । वर्तमानसामीप्य इति इति कर्मव्यतीहारेति इत्येवंरूपो यः कर्मव्यतीहारस्तस्य सम्भवादित्यर्थः फलतीति तथाचात्र यन्मूले अभिहितन्तद्भट्टयनुरोधेनेति बोध्यम् अस्माच्छ्रुतसदादित्वस्याशास्त्रीयस्यापि रामेष्वित्यादौ प्रत्ययमात्रेतु भवदुक्तः प्रकारो नेत्याह राम इत्यादिना असहायत्वेति सूत्रे एकस्मिन्नित्यस्योपादानेन लोके सजातीयसहायसद्भावे व्यपदेशिवद्भावादर्शनेनासहाय एव तत्प्रवृत्तिरिति भावः पूर्वपक्षयुक्तामिति व्यतिसे इति प्रयोगस्यैव लोके ऽसत्वमिति भावः अभ्युपेत्येत्यनेनास्मदुक्तरीत्या समाधानस्यौचित्यं ध्वनितम् सिद्धान्तपदोपादानेन सिद्धान्तान्तरस्य स्मरणसम्भवादाह अत्रेति रामाविवित्यादि लक्ष्य इत्यर्थः एतेन यथोद्देशपक्षे निर्वाहेपि कार्यकालपक्षे कथन्निर्वाहः उभयत आश्रयणे नात्मादिवदिति निषेधेनात्मादिवच्चेति सूत्रेण निर्वाहो वक्तुमशक्य इति शङ्काया नावकाश इति ध्वनितम् उक्तरीत्या पदत्वानयनकालोक्तरीत्या एवं सिद्धान्तान्तरकथनेन भाष्यैकवाक्यतापि सिध्यतीति दर्शयति इदञ्चेति मूले नास्तीति नास्त्येवेत्यर्थः तत्सन्निधाने प्रकृतिसन्निधाने तेषाम् प्रत्ययानाम् चकारो दोषान्तरसमुच्चायक इत्याशयेनाह चेनेति एवञ्च मन्त्रेष्वित्यादिहेतूक्तिमात्रोपपादनन्तेषामयुक्तमि-

ति भावः दिगिति दिगर्थस्तु व्यतिसे इति प्रयोगस्य लौकिकस्याभावे मूलोक्तं सर्वमापातरमणीयम् एकस्मिन्नस्य सूत्रे उपादानेनासहाय एव न्यायप्रवृत्तेरिष्टत्वमिति विशेषणानि वार्तिपदार्थरूपाणीति शेषः संविज्ञायन्त इति एतेन संविपूर्वकाज्ज्ञाधातोः कर्मणि ल्युडिति ध्वनितम् तेन तद्गुणाः संविज्ञानं यत्रेति समानाधिकरणपदकोपि बहुव्रीहिः सम्भवतीति बोध्यम् नचातद्गुणसंविज्ञानबहुव्रीहौ सर्वशब्दाद्यवयवकसमुदाय उद्भूतावयवभेदो अन्यपदार्थ इति लभ्यते तथाच तस्य लक्ष्ये प्रयोगाभावात्संज्ञाविधानवैयर्थ्यामिति वाच्यम् अजादिसंज्ञावत्प्रत्येकन्तद्विश्रान्तेः स्वीकारादत्रैव मानं दर्शयितुं मूले हलि सर्वेषामिति निर्देशादित्युक्तम् एवमविधेयान्वयि स्वघटकावयवार्थको बहुव्रीहिस्तद्गुणसंविज्ञानः यस्त्वेवन्न सोऽतद्गुणसंविज्ञानः तस्य लोके प्रवृत्त्युदाहरणमाह प्राय इत्यादिना लोहितोष्णीषा ऋत्विजः प्रचरन्ति लम्बकर्णमानयेत्युदाहरणे लम्बकर्णमभोजयेत्यत्र तथान्वयादर्शनादाह प्राय इति एतेनोक्तनियम औत्सर्गिक इति सूचितम् इदम्भेदद्वयमनेकेतिसूत्रविहितबहुव्रीहेः नन्वेवन्नागयज्ञोपवीती भोज्यताम् शुक्लवाससम्भोज्यतान्नागचर्मोत्तरच्छदमित्यादौ विधेयान्वयस्य विशेषणेऽदर्शनादतद्गुणत्वमेव स्यान्नचेष्टापत्तिः विशेषोपादानस्य व्यर्थत्वापत्तेरत आह नागेति तथाचैतेषु विशेषधर्मविशिष्टबोधकशब्देनोपादानसामर्थ्याद्विशेषस्य क्रियायामन्यपदार्थान्वयवेलायां सन्निधिमात्रे तद्गुणत्वव्यवहारः एवंरीत्या तद्गुणत्वे मानन्तु हरिवंशीयो व्यालयज्ञोपवीताश्च केचित्तत्र महासुरा इति बाणयुद्धप्रसङ्गसमयकालिकवर्णनपरप्रयोग एवेति अत्र न कर्मधारयादिति निषेधस्तु असुब्वत भाष्यप्रयोग इवात्र न अयंभावः पूर्वोक्ततद्गुणसंविज्ञानशब्दार्थनिरूपणावसरे कार्यित्वादिनेत्यत्रादिपदमुपात्तन्तेन विधेयसमानकालिकत्वस्यापि ग्रहणमिति ध्वनितन्तथाच विधेयक्रियान्वयित्वतत्कालवृत्तित्वान्यतरवत्स्वघटकावयवार्थकत्वन्तद्गुणसंविज्ञानत्वमिति लक्षणनिष्पत्तिः कार्येति एवम्मत्वर्थे बहुव्रीहिरिति वार्तिकान्मत्वर्थकल्पनाप्येवमेव कार्या तेन दण्डी विषाणी चानीयतामित्यस्य साधुत्वस्य बोधनात् नच दण्डिनं भोजयेत्यादेर्दण्डस्वामिनमित्यर्थोपि सम्भवतीति कथमनेन तद्गुणत्वलाभ इति वाच्यम् तदस्यास्त्यस्मिन्निति सूत्रेऽस्मिन्नित्युपादानेनाधारतावच्छेदको यो वृत्तिनियामकः सम्बन्धः सोपि

विवक्षितः सच न स्वस्वामिभावः किन्तु विलक्षणो दण्डवामिति प्रतीतिनियामक इति दण्डसंयुक्तस्यैव कार्यान्वयित्वमिति तद्गुणत्वलाभात् भोजनकालिकत्वस्य संयुक्तत्वे ऽन्वयः प्रायः पदस्यतु तद्गुणत्वमित्यत्रान्वयः एवमतद्गुणसंविज्ञानो बहुव्रीहिर्मत्वर्थीयश्चित्रगुमानय गोमिनमानयेत्यादौ अत्रापि प्रायःपदम्बोध्यं तेनाहिताग्निर्गृहिणश्च भोजयेत्यस्य तद्गुणत्वेपि न क्षतिः तत्सिद्धेरिति मूलस्य स्मायादेशस्य समुदायस्य संज्ञां विनापि तदन्तविधिना सिद्धेरित्यर्थः कार्यः स च न संभवति ङिच्चनस्य समुदायाद्विधानेनाधुना भवन्मते सर्वनाम्नो विधानाभावात्तस्य सिद्धेरप्रसंग इत्याशयिकामाशङ्कान्निराचष्टे नचेति अवयवनिषेधकत्वेनेति सामर्थ्यादित्यादिः अवयवात्परत्वमादायातिप्रसङ्गनिवारणरूपफलाभावादित्यर्थः ननु तदन्तविधिफलमवयवात्परत्वमाश्रित्य सिद्धमित्येतन्नास्तीत्याह अवयवेति प्रयोजनं सर्वनामाव्ययसंज्ञायामिति तदन्तविधिसूत्रस्थभाष्यवार्तिकप्रामाण्येनाङ्गाधिकारीयकार्ये तदन्तविधिः किं सर्वनामबहुभ्य इत्यस्य तु नाङ्गाधिकारीयत्वमिति सर्वनामप्रकृतिकसप्तम्यन्तात्यञ्चम्यन्ताद्वा त्रतासिलाविति स्वीकारात् एवमव्ययसर्वनाम्नामिति सूत्रस्थाव्ययसर्वनामप्रकृतिकसुबन्तात्कुत्साद्यर्थविवक्षायां सर्वनामाव्ययावयवटेः प्रागर्थजित्यर्थः एतेन परमसर्वत्रेति त्रल् परमभवकानित्यत्राकच्च तयोरङ्गाधिकारीयत्वाभावेपि प्रातिपदिकाधिकारीयत्वेन तदन्तविधिना भविष्यतीति कस्यचिदुक्तिः परास्ता समासप्रत्ययविधौ प्रतिषेध इति तदन्तविधेः प्रतिषेधाच्च भाष्यप्रयोगस्याप्रसिद्धत्वशङ्कां वारयति दिङ्नामेति नच विहितस्येत्यस्याध्याहारेण कार्यन्तथाच कथं सर्वनाम्नो विहितस्येत्यत्र पञ्चमीति वाच्यम् योयतो विहितस्स ततो निःसृत इत्येवंप्रतीत्या बौद्धापादानत्वस्य तत्र सत्वात् नचैवमुपपदविभक्तेरिति न्यायेन दिग्योगे विहिता पञ्चम्यनुपपन्नेति वाच्यम् तस्मादित्युत्तरस्येत्यनेन तस्यापि शास्त्रे स्वीकारस्य बोधनात् एवं जसः शी सर्वनाम्नः स्मै ङसिङ्योरित्यत्रापि विहितविशेषणमेव अशोकवनिकान्यायेन त्वेकत्रोक्तिः पाठवैयर्थ्यशंकोदयायैवमिति व्याचष्टे नित्यद्विवचनेति स्वरस्य सिद्धेः संज्ञाफलत्वन्निराचष्टे स्वाङ्गेति तत्सिद्धेरिति आदुचदात्तत्वस्य सिद्धेरित्यर्थः ननु कथन्निमित्तेत्रिवार्तिकेन सिद्धिर्यावता त्र प्रायपदस्य विभक्तिष्वेव सम्बन्ध इत्यत आह प्रायदर्शनामिति प्राय-

ग्रहणादिति नन्वयच् स्यादित्येव कथनं विरुद्धम्प्रतिभाति यावता द्वित्रिभ्यामिति सूत्रात्तयस्येत्यस्य प्रक्रान्तत्वादत आह अत्रापीति विभक्ताद्यसूत्रेपीत्यर्थः अपिनैकसूत्रसत्त्वसमुच्चयः द्वितीयसूत्रस्यादेशविधायकत्वन्तु नैव सम्भवति तस्य स्वार्थे कार्यविधायकतया तयपः स्वार्थे ऽप्रवृत्तेः सो ऽप्युदात्त एव स्यानिवत्सूत्र इति तत्र हि तयादेशे उभयप्रतिषेधः स्यानिवद्भावेन तयपो ग्रहणेन ग्रहणाद्विभाषा प्राप्नोतीत्यभिधायायच्प्रत्ययान्तरमिति प्रतिपादितम् प्रत्ययान्तरत्वमिति अयम्भावः उभादुदात्त इति सूत्रस्थ विभाषाधिकारीयत्वेन तत्सम्बन्धस्यावश्यकतया नित्यग्रहणं योगविभागार्थमेव एवञ्चोभादुदात्त इत्यत्रास्वरितत्वादयज्वेत्यनो वा ग्रहणसम्बन्धाभावेपि महाविभाषासम्बन्धो भवत्येवेति तेनावयवद्वृत्तेः संख्यावाचिन उभयशब्दादवयविन्यर्थे ऽयच् स्यादित्यर्थकेन पक्षे ऽयच्पक्षे वाक्यं भवति नित्यमिति सूत्रे तु वाच्यार्थविरोधान्न विभाषापदसम्बन्धः तस्य नित्यमयच्स्यादित्येवार्थ इति तत्रार्थविशेषानुपादानात्तस्य स्वार्थिकत्वमिति तत्र कैयटेन वृत्तिविषय इत्युक्तं तद्व्यर्थमुभाभ्यामित्यनेनैव व्यावृत्तिसिद्धेरित्याशयेनाह वृत्तिविषय इति इदमेव उभशब्दाद्यत्र द्विवचनन्न श्रूयते इदमेव तेनोभयोर्वास इत्यत्र वृत्तिसत्वेपि शयवासेत्यलुग्विधानेन द्विवचनस्य श्रवणादयजभावस्य सिद्धिः श्रूयत इत्युपादानादुभयपक्षविनीतनिद्रा इत्यादौ प्रत्ययलक्षणेन द्विवचनपरत्वे ऽप्ययच्सिद्धिः न लुमतेति निषेधस्तु नात्र लुप्तप्रत्ययनिमित्तककार्य एव कर्त्तव्ये तेन निषेधात् अन्येषामिति भाष्ये ऽयचः प्रक्रमात्प्रकृते ऽन्यत्वप्रतियोग्याकांक्षायास्तेनैव ज्ञान्त्या ऽयचो ऽन्येषामित्यर्थः अभाव इति तेषामेकवचनबहुवचनयोर्विधानादिति भावः भाष्यसिद्धान्तरीत्या शंकासमाधानयोरत्रानवसर इत्याशयेनाह पूर्वपक्षिणेति अत्रानभ्युपेतामिति कथनेनाभ्युपगमवादेनैतदुक्तमिति सूचितम् एकदेशविकृतन्यायेन भान्तस्योभशब्दत्वन्ततः परादिवद्भावेन द्विवचनत्वन्तस्य च श्रवणमिति तस्य सिद्धिरिति भावः ननूभौ साभ्यासस्येति निर्देशन उभयत आश्रयणे ऽप्यतिदेशो भवत्येवात्रेतिकल्पनया सामञ्जस्ये नञ्द्वयघटना व्यर्थेति चेन्न उभयपक्षविनीतानिद्रा इत्यत्र लुप्तेपि अङ्गकार्यत्वाभावेन निषेधाप्रवृत्त्या द्विवचनपरत्वं सुस्थमित्ययजनापत्तिरित्याशयेन नञर्थद्वयाभिधानात् उत्पत्तेरिति एवञ्चोभयशब्दादुत्पन्नमित्ययुक्तमिति भावः उ-

भयघटितादिति उभशब्दादित्यस्योभः शब्दो यत्रेति बहुव्रीहिणा प्रकरणादुभयशब्दस्यापदार्थत्वेन उभयघटितादित्यर्थकत्वम् एवञ्च तत्रोभयशब्दादुत्पन्नद्विवचनस्य लुक्कापहारविषयतायाः सत्वाल्लुक्कृतापहारसम्भावनां भावद्बन्धत्वन्तास्तीति पूर्वमयच् प्रवर्त्तते तस्मिन् कृते उभयशब्दस्य सर्वादिगणे पाठस्य सत्वेन तत उत्पन्नपञ्चमीसप्तम्योः सर्वनामप्रकृतिकत्वेनोभयत उभयत्रेत्यस्य सिद्धिः नन्वर्थद्वयघटनायाः प्रयोजनमाह यत्र लुक्कापहृतमिति प्रातिपदिकेति उभाविवाचरत्युभयतीत्यर्थे उभशब्दादाचारक्विपि उभयतीति भवति भवन्मते तत्र द्विवचनस्योभशब्दादुत्पत्तेरेवाभावेनोभशब्दादुत्पन्नं द्विवचनं लुक्कापहृतमिति नास्तीत्ययचो ऽसाधुत्वापत्तिरिति यदीष्यतेत्यनेनाऽनभिधानान्नेष्यत इति ध्वनितम् नन्द्वयघटितवाक्यार्थस्य तत्र सत्त्वमस्तीत्याह तत्रोत्पत्तेरिति विशिष्टाभावेति लुक्कृतापहारसम्भावनाविषयत्वाभाववदुभयशब्दापादानकोत्पत्तिकर्तृत्वविशिष्टद्विवचनाभावस्याक्षतेरित्यर्थः एतेनोभाभ्यामित्युभयत उभयोरित्युभयत्रेति रीत्या विग्रहकाले उभशब्दस्य सर्वादौ पाठः किमर्थ इति शङ्कमते नास्तीति सर्वनामप्रकृतिपञ्चम्याद्यन्तत्वस्य प्रकृते विरहात्तसिलाद्यनुत्पत्त्योभयत उभयत्रेत्यादाविवेति दृष्टान्तासङ्गतिरिति शंकापि निरस्ता तन्मतेपि यथा न दृष्टान्तासिद्धिस्तस्य प्रकारस्य निश्चयाय लुकानापहृतमिति मूलं व्याचष्टे लुक्कृतेत्यादिना अयजनापत्तौ अयचो प्राप्तौ इत्यसिद्धिरिति इत्याद्यसिद्धिरित्यर्थः सम्भावनाघटितार्थसद्भावं प्रकटयति यद्ययजित्यादिना एतेनोभौ साभ्यासस्येति निर्देशेनोभयो ऽन्यत्रेति वार्तिकस्वारस्येन च यत्र द्विवचनविषयत्वसंभावना तत्रोभशब्दस्य प्रयोगः यत्र तु न तथा तत्रोभयशब्दस्य सः यत्र तूभयपक्षेत्यादौ लुग्भवति तत्र लुका तद्विषत्वस्यापहार इति नासाधुता उभावित्यत्रैकादेशात्यागपि तद्विषयत्वान्नायच् एवमेवोभयत उभयत्रेत्यस्य सिद्धिरित्येतद् ध्वनयितुं विषयपदमुपात्तमिति भाष्यकृतः सिद्धान्तो ध्वनितः । स्वार्थिकत्वेनेति एतेन द्विवचनशब्दो ऽत्र द्वित्वविशिष्टार्थबोधकपरो योगेन नतु द्विवचनशब्दपर इति सूचितम् तेनोभयोरुभावुभोभावित्यस्यापि सिद्धिः कप्रत्ययस्यापीति पाठः अपिन्नोभशब्दद्विवचनयोः सङ्ग्रहः द्वयोर्वचनान्द्विवचनमिति योगेन द्वित्वसंख्याप्रकारकसङ्ख्येयविशेष्यकबोधविषयार्थानुबोधकत्वरूपान्द्विवचनशब्देनोच्यते त्रला-

देस्तु विभक्त्यर्थस्य स्वार्थे विधानात्तत्तत्कारकशक्तिप्रधानत्वमिति नोक्तद्विवचनत्वमत उभयत उभयत्रेत्येतयोः सिद्धिरिति भावः केचित्तु यदुभयकावित्यत्राकच् सिद्धिरेवायजभावाय सर्वादावुभयशब्दपाठस्य फलत्तदा ऽकजित्वधात्वेवोभाव्ययसर्वनाम्नामिति पठनीयत्वावतैवेष्टस्य सिद्धेरुभयशब्दस्य सर्वादौ पाठो न कार्यः सर्वनामसाहचर्यात्संज्ञादिव्यावृत्तिरपि भविष्यतीत्याहुः तन्न एवंसति पाठस्य क्वचित्सिद्धिरेव जातेति सूत्रे गणे वा पाठे इत्यत्र फलतो विशेषाभावेन लाघवाभावात् प्रत्युत साहचर्याश्रयणे गौरवमिति स्फुटमेव नच यद्यन्याभावो द्विवचनटाब्विषयत्वादिति वार्तिके द्विवचनशब्दो यौगिकस्तर्हि तरबादिष्वप्ययज् न स्यादिति वाच्यम् तरबादीनाम्प्रवृत्तिनिमित्तगते तत्समानाधिकरणगुणगते वा प्रकर्षादौ विधानेन प्रकारद्वयस्याप्यत्राभावेनोभशब्दात्तरबादीनामुत्पत्तेरेवाभावात् यद्यप्येका युपीतिवदेकस्य पुरुषस्योभयसमबलत्वप्रतिपादनायास्मात्तरप्प्राप्नोति तथाप्यनभिधानात्तत्र तरबादिकन्न तत्सत्वे ऽप्ययज्नेति वार्तिकाशयः ननु मूले ऽज्ञाताद्यर्थबोधकत्वेनाधिकबोधकतया इत्येव कथनं युक्तमिति पञ्चकेति कथनमफलमत आह सङ्केतेति वार्तिकेति अस्योभयोरपि ग्रहणमित्यत्रान्वयः उभयोः अवयव्यर्थकायजन्तस्वार्थिकायजन्तयोः तस्य उभयशब्दस्य तद्भावः कैयटाशयः मूले इति भाव इति कथनमरुचिबोधनायेत्याशयेनाह इत्यभीति तद्बीजन्तूक्तमिति कैयटेनेति प्रतीकमुपादायोक्तभाष्यविरोधरूपमुक्तमित्यर्थः कृष्णस्येति कृष्णस्मृति सखीवाक्यमेतत् अतो भवन्तमित्यनेन कृष्ण एव प्रतिपाद्यत्वेन विवक्षितः । अत एव तद्वाक्यात्पूर्वपठितेनाथ ताङ्कर्तुमशक्ताश्चिरमनुरक्तां स्वतो गृहे दृष्ट्वा तच्चरितं गोविन्दे मनसिजमन्दे सखी ग्राहेति वाक्येनैकवाक्यं भवति युष्मदर्थत्वे इति तवाधर इत्यत्रेति शेषः अनन्वितमिति यदि युष्मदर्थ एवात्र विवक्षितः स्यात्तदा भवन्तमित्यत्र यो भवच्छब्दस्यात्प्रतिपाद्यो ऽपि कृष्ण एवेति स्वीयाधरपानं स्वकर्तृकं बाधितमित्यनन्वय इति भावः अत्र पक्ष इति एकस्य तान्त्वमिति पक्षमित्यर्थः निर्देश इति तेन एतत्त्वमिति मूलोक्तयोर्वेदवाक्ययोरुपपत्तिरिति भावः पूःशब्दार्थस्य विशेष्यत्वे संज्ञा नेति वार्तिकार्थ इत्याशयेनाह पूःशब्देनेति एतेन गणसूत्रशेषत्वे प्रमाणत्वमुक्तम् अत एव स्त्रीरूपस्य पुरोरूपार्थस्य विशेष्यत्वादेव उदाहृतमिति यद्यष्टाध्या-

यीस्थसूत्रस्य शेषः स्यात्तदा जस्त्वरकप्रयोगमेव कुर्यात् सप्तम्यामेवेति अष्टाध्यायीस्थसूत्रशेषत्वे ऽप्यपुर इति वक्तव्ये पुरीतिसमुदायोपादानेन सप्तम्युपादानेन चान्तरस्याः पुर आगत इति भवत्येवेति तात्पर्यम् असहाय इति एतदर्थक एकशब्द एकाकिभिः क्षुद्रकैर्जितमित्यत्र प्रसिद्धः समस्तपाठमिति कचित्तु स्वाभिधेयापेक्षोवधिनियम इत्यसमस्तपाठः तत्रापेक्षशब्दः कर्मधरन्तो ऽवधिशब्दार्थविशेषणं यदि विवक्षितन्तदा सापेक्षत्वेन समासानुपपत्तिः नियमशब्दार्थस्य विशेषत्वे त्वनन्वय इति दूषणम्परिहृतम् अपेक्षशब्दावधिशब्दयोः कर्मधारयोत्तरनियमपदेन षष्ठीतत्पुरुष इति भावः कर्मणीति कर्त्तरि च कारके इति सूत्रेणेत्यादिः ननु व्यवस्थायामित्यसङ्गतम् व्यवस्था प्रवृत्तिनिमित्तकत्वं हि दिक्शब्दत्वमित्यर्थः स्यात् सत्वयुक्तः तस्याः प्रवृत्तिनिमित्तत्वाभावात् दिग्वाचकशब्दत्वस्यैव दिक्शब्दत्वेन सुप्रसिद्धत्वादत एव दिङ्नामान्यन्तराल इति सूत्रं सङ्गच्छत इत्यत आह पूर्वादिशब्दैरिति एकस्या एवेति साचाकाशवदेकैवेति तर्कशास्त्रे प्रसिद्धम् भेदस्येति कल्पितस्येति शेषः । ननु पृथिवीमध्यस्यावधित्वमप्रसिद्धं हरिवंशादौ पर्वतनामेव चतुर्णामवधित्वस्य प्रसिद्धत्वादत आह रामायण इति मध्यदेशावधिकस्यैवेति विन्ध्यहिमालययोर्यो मध्यदेश आर्यावर्तेति तदपेक्षया स्वावस्थित्यधिकरणमाल्यवदपेक्षया वेत्यर्थः यत्र यस्यावस्थितिस्तदपेक्षया मध्यत्वव्यवहारो हि लौकिकव्यवहार एवात आह पृथिवीमध्यञ्चेति एवञ्च सुग्रीवकृतभेदप्रतिपादने च तन्मध्यभागेति स्वावस्थितो मध्यान्हसूर्यसंयोगिदेशभिन्नो मध्यदेशरूपो भाग इत्यर्थः उदयाचलादीत्यादिना ऽस्ताचलपरिग्रहः पूर्वादिशब्दानामिति दिग्वाचकानामिति शेषः व्यवस्थालक्षणघटनायाह उदयाचलेति तदाकाङ्क्षत्वञ्चेति चो हेतौ यतस्तदाकाङ्क्षत्वमतो व्यवस्था ऽस्त्येवेत्यन्वयः तत्सम्मुखेति तत्कालिकसूर्यसम्मुखेत्यर्थः देशवृत्तीनामिति पूर्वादिशब्दानामिति शेषः ननु रूढ्या यैः शब्दैरर्थाः प्रतिपाद्यन्ते ते संज्ञाशब्दा यथेन्द्रादिशब्दाः एतेषाञ्च शब्दापेक्षया प्रवृत्तिनिमित्तमन्यदेव वाच्यमन्यथा शब्दरूपप्रवृत्तिनिमित्तभेदादिन्द्रशक्रादिशब्दानाम्पर्यायवाचकतानुपपत्तिः एकस्य धर्मस्य प्रवृत्तिनिमित्तत्वे हि तदिति पूर्वादिशब्दभिन्नं किम्प्रवृत्तिनिमित्तं तेषामित्याकाङ्क्षायामाह देशवृत्तीनामिति केवलरूढत्वेनेति अत्र केवलेत्यनेन योगरूढत्वादिव्यवच्छेदः इन्द्रादिपदाना-

मित्यनेन शब्दस्वरूपातिरिक्तम्प्रवृत्तिनिमित्तमिति ध्वनितम् आधुनिकसंकेतस्थले तु शब्दस्वरूपमेव प्रवृत्तिनिमित्तमिति भावः नन्वाधुनिकसंकेताभावेऽपि चिरन्तनसंकेताभावात्कथमेतदत आह किन्त्वैश्वरेति तत्र दक्षिणागाथका इत्यत्र आग्रह इत्यनेन नियमाभावो दर्शितः ननूपचारो हि लक्षणा सा च शक्यतावच्छेदकारोपरूपेति कथमुक्तं सेत्यत आह तत्वेति देशनिष्ठपूर्वोक्तशक्यतावच्छेदकारोपादित्यर्थः मूले स्वार्थविशिष्टार्थान्तरेत्यादि स्वार्थविशिष्टं यदर्थान्तरन्तद्विशेष्यकप्रतीतिजनकत्वमेवोपसर्जनत्वन्तु लाक्षणिकत्वमित्यत्र भाष्यीयप्रयोग एव प्रमाणमित्याह एतान्यपीतीति अत्रैतच्छब्दस्यैतत्प्रतिपाद्यवस्तुनि लक्षणायामपि त्यदाद्यत्वस्य दर्शनेन लाक्षणिकत्वमुपसर्जनत्वव्यवहारनियामकन्नेति भावः स्वार्थविशिष्टत्वस्योपसर्जनपदार्थत्वमपि भाष्यकारसम्मतमिति सूचयन्नाह इदञ्चेति तत्र हि त्रिग्यो विकारावयवार्थकः प्रत्ययस्तस्माद्विकारावयवार्थको त्रिदेव यथा स्यादित्यर्थं सूत्रमिति प्रयोजनं तस्य सूत्रस्योक्ता समुदाये दृष्टाः शब्दा अवयवेपि वर्तन्ते इति न्यायेन विकारविकारेपि प्राथमिकप्रत्ययान्तस्य प्रवृत्तिर्भविष्यतीति सूत्रन्निष्प्रयोजनमित्यभिधाय प्रकृतिवाचकस्य शब्दस्य यद्यपि प्रथमविकारे प्रकृतिप्रकृतिकप्रत्ययान्तस्यापि प्रवृत्तिरस्तीति ततो विकारे प्रत्ययः प्राप्नोतीत्याशङ्क्यानभिधानात्ततो न भविष्यतीति अभिधाने हि सत्यन्यतोऽपि मयड् न प्राप्नोति बैल्वस्य विकार इति यत्नभिधानन्नाश्रीयते तदा त्रितश्च तत्प्रत्ययादिति सूत्रमपनीय बैल्वमयादिनिवृत्त्यर्थन्तत्प्रत्ययान्तात्लुग्भवतीत्युक्ता यदि लुक् क्रियते पालाशी समिदिति न सिद्ध्यति अत्र पलाशशब्दात्पलाशादिभ्यो वेत्यञ् तदन्ताद्विकारे मयटि तस्य लुकि अनुपसर्जनलक्षण ईकारो न प्राप्नोतीति दूषणमभिधाय माभूदेवमञ् यो ऽनुपसर्जनमित्येवं गृह्यमाणविशेषणमनुपसर्जनादित्येतादिति पूर्वपक्षिणोक्ते इह तर्हि दोषः स्यात्काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी तामधीते काशकृत्स्ना ब्राह्मणी अत्राणन्तादितीकारः स्यात्तस्मादस्तु अनभिधानादित्येवेति भाष्ये उक्तम् अनेन भाष्यग्रन्थेन स्वार्थविशिष्टार्थान्तरबोधकत्वमुपसर्जनत्वमिति ध्वनितमित्यर्थः अयमपीति पूर्वादिशब्दानान्दिशि दिगवच्छिन्ने च स्वभावतो वृत्त्या ऽऽदेशो यथा शक्यस्तथा देशान्तरनिष्ठत्वविशिष्टत्वविशिष्टस्यापि दिगवच्छिन्नतया सो ऽपि शक्य एवेत्यर्थः तुल्यन्यायादिति यथा

परादिगवच्छिन्नदेशे वर्तमानानां शत्रूणां दिगवच्छिन्नत्वेन परशब्दस्य मुख्यावृत्तिः शक्तिरेव तथा सर्वनाम एतच्छब्दस्य बुद्धिस्थशक्ततया तत्र कैयटोक्तार्थे शक्तिरेवास्तु न लक्षणाया अवसर इति भावः । हिमवानवधिरिति अस्य श्रूयत इत्यत्रान्वयः क्व श्रूयत इत्याकांक्षायामाह ये केचनेति ऐतरेयब्राह्मणमाश्वलायनानाम् तत्र परेणेति एनबन्तम् उदीच्यान्दिशि हिमवत्सम्परेण हिमवत्परभागे जनपदा ग्रामविशेषा उत्तरकुरुनामकाः उत्तरमद्रनामका इत्यर्थः आधुनिकसंकेतत्वं व्यवस्थाविषयत्वञ्च स्पष्टयति उत्तरा इत्यादिना सम्भवतीति शत्रन्तात्सप्तमी अमर इति शेषः एतेन तत्र भिन्नार्थत्वकल्पनमन्याय्यमिति ध्वनितम् आपत्तेरित्यस्यात आत्मनि स्वमित्यन्वयेनेति विशेषः अस्या दमयन्त्याः मुखेन्दुना मुखचन्द्रेण सहैव उज्जिहाना उदयमाप्ता अधरोष्ठलेखा लेखाकारो ऽधरोष्ठः रागश्रिया स्वनिष्ठरक्तिमशोभया बन्धूकमध्यान्हविकासितम्पुष्पन्तस्य बन्धुः समभवत् अतिशयेन तत्सदृशमारक्तमिति यावत् स्वमात्मानं शैशवयौवनस्य सम्बन्धिनीं संन्ध्यामहमेव सन्ध्येति बोधयति बालस्यान्ते तारुण्यादौ अधरोष्ठे ऽधिका रक्तिमा भवतीति प्रसिद्धम् आख्याग्रहणस्य प्रयोजनान्तरसम्भवादेतदर्थमेवेत्येवकारो ऽनुपपन्न इत्याशयादाह एतदर्थमपीति पर्युदाससमर्पकवाक्योपादानेन तदर्थबोधनापेक्षया साक्षाद्बौध्यार्थवाचकशब्दोपादानमुचितमिति कस्यचिदुक्तिङ् खण्डयति आत्मेति लाघवाभावादिति यथास्थितसूत्रापेक्षया आत्मेत्यादुच्यक्तौ मात्राधिक्येन लाघवाभावादित्यर्थः पदलाघवं यद्यपि सम्भवति तथापि ज्ञातित्वेन धनत्वेनाख्यायाम्मा भूदित्येवमर्थमधुनाप्याख्याग्रहणस्यावश्यकतया लाघवन्नास्तीति भावः । उक्तबहिर्देशस्थमिति प्राकारपरिखाद्यावृत्तदेशाद्बहिर्देशस्थमित्यर्थः ननूपसंव्यानशब्दो यदि व्युत्पत्तिभ्यामुभयपरस्तर्हि तदुपादानमेव व्यर्थम्बहिर्योगेन गतार्थत्वादत आह एवञ्चेति तस्योभयपरत्वे चेत्यर्थः प्रसिद्धिमाश्रित्येति पाणिनेः सर्वज्ञत्वस्यानुपपत्तिः स्यादिति भावः आश्रित्येत्यनेन गतार्थत्वम्भाष्योक्तन्ध्वनितम् ननु त्रिसूत्रीसत्वे ऽकच्स्वरयोरपि विकल्पयोः सिद्धिर्भवति भवत्संमतत्याख्याने तु कथमत आह त्रिसूत्र्येति जसाधार एवेत्यनेनाकजादि नित्यमेवेति सूचितम् अव्यवस्थायां रूपद्वयापत्तिं वारयति व्यवस्थेति पाठविशेषणमिति त्रिष्वपि सूत्रेषु योगविभागं कृत्वा

पाठविशेषणत्वं संपादनीयं तिङो गोत्रादिनीत्यत्रैवेति भावः यदि जसः शीत्यत्रेव पूर्वादिभ्य इति सूत्रेपि सर्वनाम्न इत्यस्य सम्बन्ध इति स्वीक्रियते तदा गणे योगविभागो मास्तु अर्थनिर्देशस्य संज्ञाप्रवृत्तावेव निमित्तत्वमस्तु तथाच ततो ऽपि लाघवमित्यपि बोध्यम् ननु संख्ययाव्ययेति सूत्रविहितबहुव्रीहौ निरुक्तोपसर्जनत्वाभावेन तत्र निषेधार्थं सूत्रमस्त्वित्यत आह एकद्वेति अत एव तस्य विषये प्रथमसूत्रेणैव बहुव्रीहिसंज्ञामाश्रित्य तत्प्रत्याख्यानं भाष्यकृत्सम्मतं सङ्गच्छते सूत्रकारमते ऽप्याह समासान्त इति बहुव्रीहौ संख्येये डजिति समासान्ते कृत इत्यर्थः तेषां समासार्थालौकिकविग्रहवाक्यावयवत्वेन समुदायावयवत्वस्य सत्वादिति भावः उक्तामिति अर्थवदधातुरिति सूत्रे एवेति शेषः एतदर्थमेव अध्याहारार्थमेव एवञ्च बहुव्रीहिपदं वाच्यार्थपरमेवेति भावः अकृतव्यूहपरिभाषयैवेष्टसिद्धौ न बहुव्रीहाविति सूत्रञ्चिकीर्षित इति व्याख्याने व्यर्थमित्याशंकां निराचष्टे मूले नचेति अलौकिके प्रक्रियावाक्ये समासप्रयोजकैकार्थीभावारोपस्य सर्वजनप्रसिद्धत्वादेव निषेधस्य सिद्धौ सूत्रस्य वैयर्थ्यमेव एवञ्च तत्रैवानुपसर्जनत्वस्य .नष्टत्वाद्विनाशोन्मुखत्वादित्यसङ्गतमित्याशङ्क्य समाधत्ते यद्यपीत्यादिना आरोपः आहार्यारोपः स्वार्थविशिष्टेति स्वप्रधानीभूतो ऽर्थः समासात्प्राक् स्थितः स एवाधुना अर्थान्तरमिति विशेषणम्भवति अत एव भाष्ये संज्ञोपसर्जनेच विशेषे ऽवतिष्ठते इत्युक्तम् उपसर्जनत्वाभावादिति यद्यप्यारोपो ऽस्ति तथापि तस्यार्थबोधनाय न कस्यापि प्रयोग इति वस्तुगत्या तन्नास्तीति भावः । अत एव अनित्यत्वादेव सा अकृतव्यूहपरिभाषा न बहुव्रीहाविति सूत्रसत्वे तदुक्तेति परिभाषाया अनित्यत्वे ज्ञापकं तस्य सूत्रस्येष्टापत्त्या प्रत्याख्यानेतु किन्तस्या अनित्यत्वे ज्ञापकमित्याकाङ्क्षायां सतुक्कनिर्देशस्य ज्ञापकता मूले उक्ता तामुपपादयति छवोः शूडित्यादिना सतुक्केति रूपे विद्यमानार्थकसहशब्देन बहुव्रीहिसमासे कप् । तुको ऽन्तरङ्गत्वम्प्रकृतिसम्बन्धिवर्णमात्रापेक्षत्वेन बोध्यम् तत् सतुक्कग्रहणम् अलोन्त्यपरिभाषाप्रवृत्तिशङ्कां वारयति वाञ्छादीति नच सतुक्कनिर्देशे रालोप इति सूत्रेपि सतुक्कस्यैवानुवृत्तिः स्यात्तथाच हूः हुरावित्यादि न सिध्यतीति वाच्यम मूर्तौ घनः द्रवमूर्तिस्पर्शयोरिति निर्देशेन नक्येतिनिषेधारम्भेण च रा-

ल्लोपेति सूत्रे तुग्रहितस्यानुवृत्तिसम्भवात् भाष्ये स्वष्टमिति तत्र हि उत्पुच्छयतेरप्रत्ययः उत्पुदिति प्राप्नोति उत्पुदिति चेष्यते तथा वाञ्छयतेरप्रत्ययः वान् वानशौ वानश इति न सिध्यति वान्वाञ्छौ वाञ्छ इति प्राप्नोति यथालक्षणमप्रयुक्त इत्युक्तम् उत्पुच्छयतेरप्रत्यय इत्यनेन पुतञ्छादयतीति विग्रहे पृषोदरादित्वात्पुतशब्दात्लोपे छदधातोर्डप्रत्यये निष्पन्नो यः पुच्छशब्दस्तस्मादाख्याने णिजिति दर्शितं तन्निमित्तकादेशेति हनश्च वध इत्यनेनाप्सन्नियोगेन वधादेशस्य विधानात्सन्नियोगशिष्टत्वमात्रेण वधादेशस्य कृन्निमित्तत्वम् इदं चिन्त्यमिति वक्ष्यमाणं चिन्तनीयम् दृष्टान्ते हल्ङ्यादिलोपे यस्येति लोपे जातेपि प्रत्ययलक्षणेन यथा निमित्ताविनाशबुद्धिस्तथा कृल्लुक्यपि सन्नियोगाविनाशबुध्या ऽकृतेतिपरिभाषायाः प्रवृत्तिर्न भविष्यतीत्यभिहितम् पूर्वकार्य एवेति लुप्तप्रत्ययपरतो यः पूर्वस्तत्प्रकृतिभूतो लब्धाङ्गसञ्ज्ञकस्तदुद्देश्यकं कार्यमाङ्गमनाङ्गं वा तस्मिन्कर्तव्ये तेन प्रत्ययलक्षणस्य प्रतिषेधादिति भावः यद्यप्यत्र जायमानङ् कार्यम्पूर्वस्यैव तथापि प्रत्ययसन्नियोगेन तद्विधानन्तु तस्मिन्परतः पूर्वस्येति तत्रोक्तमिति तस्य निषेधस्यायमविषयः तस्मात् मूलोक्तज्ञापकासम्भवात् पुष्ययोगे ङीति अवङ्गीति सम्पदादिकिबन्ताद्भावाभिधायकान् ङौ रूपम् यद्यपि नक्षत्रयोगे ङीतिवार्तिके पाठः तथापि तत्संग्राहकवाक्यमिति तस्माल्लक्ष्यसंस्कारकवाक्यमेतादृशङ्कल्पनीयमित्याशयेनैवमुक्तम् नक्षत्रवाचिशब्दपूर्वपदकयोगशब्दान्तात्प्रातिपदिकाज्ज्ञानार्थे णिच् कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकमिति तदर्थः अत्र कुत्वनिमित्तस्य विनाशोन्मुखत्वात्कुत्वं न स्यात् एतदेवाह तत्र हीति अत्र घिति परे कुत्वस्य विधानेति नलुमतेतिनिषेधस्य प्राप्तिरस्तीति भावः प्रत्यङ्गमिति प्रत्ययवयवमित्यर्थः स्वरः स्वाङ्गशिटामिति विहितः मुक्तसंशयमिति क्रियाविशेषणघटितपाठान्तरम् तदुक्तिः भाष्यकारोक्तिः स्मृतिद्वयप्रामाण्याद्विकल्पस्तु नेत्याशयेनाह एतदेवेति यथोत्तरम्मुनीनाम्प्रामाण्यमेव तदिति उक्तमत्वविधानमित्यर्थः तत्प्रत्याख्यानेन धात्विति सूत्रस्य प्रत्याख्यानेन धात्विति सूत्रस्य प्रत्याख्याने अनेन उक्तरीत्या ऽत्वविधानप्रयोजनकथनेन कल्पनेति एवेन विकल्पकल्पनानिरासः दृष्टार्थत्वं न स्याद् दृष्टार्थत्वन्तवस्तु न तत्र विवादः अत एव तत्र तत्रापाणिनीयन्तु भवतीति भाष्यकारोक्तिः

सङ्गच्छते एवञ्च न बहुव्रीहाविति सूत्रमुपसर्जनप्रतिषेधानुवादकमेवेत्याशयेनाह दिगिति। द्वयेति न बहुव्रीहाविति सूत्रे सर्वादीनीत्यनुवृत्त्या बहुव्रीहौ यानि सर्वादीनि तेषामिति तेषामन्येषाञ्च यो बहुव्रीहिस्तस्य वा सर्वनामसंज्ञा नेत्येवं द्वयेत्यर्थः ननूत्तरग्रन्थस्य मतान्तराभिप्रायकत्वात्तद्विरोधो न क्षतिकरो अत आह न्यासकारस्यापीति प्रतिपादने एवेति त्वन्मत इति शेषः भवन्मते ऽवयवस्यैव निषेधे तात्पर्यन्न्यासकृतः समासावयवयोर्युष्मदस्मदोरिति दर्शनादिति वक्तव्यमेवञ्चाद्यपक्षे तद्विरोधः स्पष्ट एव तस्यार्थ इत्यस्यानन्तरं हेत्वनुपादानान्नाकाङ्क्षाशान्तिरत आह सो ऽनुचित इत्यादि तत्सम्मतत्वात् सूत्रकारासम्मतत्वात् ननु संज्ञोपसर्जनप्रतिषेध इति वार्तिककृतोक्तन्नु सूत्रकृतेति सूत्रवार्तिकेत्यनुपपन्नमत आह तन्मत इति सूत्रकृन्मत इत्यर्थः न्यासकृतापीत्यादि मूलोक्तो ऽन्यदीयो ग्रन्थ इति भ्रमनिवारणायाह स्वोक्तेति अत्र स्वशब्दार्थो व्याख्याता प्रसादकारः तत्त्वे उपसर्जनत्वे अभिमान इति एतद्बीजमग्रे स्फुटम् यदुक्तस्यागभिमान इति तद्बीजमकटयन्व्याघातमुपपादयति अजहदित्यादिना विशेषणतयैवेति परार्थाऽभिधानं वृत्तिरिति सिद्धान्तादिति भावः पूर्वोक्तमुपसर्जनत्वं बहुव्रीहावेवेति सामान्यत उपसर्जनत्वस्य स्वरूपमाह इतरार्थेति नन्ववर्णान्तादङ्गात्परस्य सर्वनाम्नो विहितस्य ङेः स्मै इत्यर्थाङ्गीकाराच्च किञ्चेत्यादिनोक्तदोष इत्यत आह मूले नहीति नचेति तथाच तदीयग्रन्थे पूर्वपदग्रहणं व्यर्थम् विनिगमकाभावेनोभयपदयोस्तुल्यत्वादिति भावः खण्डनञ्चदुक्तं विनिगमकं खण्डयति। नचेत्यादिना विशेषणेति सुन्दरादिविशेषणान्वयापत्तेरित्यर्थः पक्षद्वयसाधारणन्दोषमाह विनीति। ननु प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वमिति व्युत्पत्तिरुत्तरपदस्य लक्षणा साधिकास्तीत्यत आह एकार्थीभावेति तन्मते समुदायेन शक्त्यैव भवत्सम्मतलक्ष्यार्थस्य प्रतिपादनादिति भावः तद्घटकेति बहुव्रीहिघटकेत्यर्थः उचित इति तथा च बहुव्रीहाविति व्यर्थमेवेत्याह दिगिति स्वोक्तिर्न प्रकरणान्तरस्थेति विस्मृतिशङ्कापि न कार्येत्याह एतत्प्रकरणेति पुनः प्रसादकदुक्तिञ् खण्डयति मूले यदपीति तैरप्येति प्रकाशकृद्भिरपीत्यर्थः पुनरिति समाससंज्ञोत्तरकालमित्यर्थः न संज्ञेति न संज्ञाकार्यमित्यर्थः समुदायघटकस्य तदन्तस्य चेति शेषः न प्रवृत्तिरिति लुग्विषयतायाः सत्वादिति शेषः अभिमानपदोपादानसूचि-

तामरुचिम्प्रकटयति निमित्तापायेति एतेन यत्सूत्रारम्भस्य फलन्त्वत्कपि-तृकइत्यादिरूपसिद्धिरिति सा अधुनापि जातेति सूत्रवैयर्थ्यमेवेति भावः प्राक् प्रवृत्ता संज्ञा गतेति न ब्रूमो येन भवदुक्ता प्रतिबन्दिः स्यादित्याश-येन शङ्कते मूले ननु कार्यकालेति दुर्लभेति अतिसर्वायेत्यादाविति शेषः मूले विरोधादिति अनङ्गकार्यत्वेनेति हेतूक्त्या ऽऽनर्थक्यापत्तेश्चेत्यपि बो-ध्यम् तत्त्वम् किलष्टत्वम् ॥ विशेषविषयत्वमुपपादयति अन्यपदार्थेति त-स्यैव वृत्तिग्रन्थेति पूर्वोक्तरीत्या सूत्रस्यार्थद्वयमुक्त्वा प्रियविश्वायेत्यादुच्यदा-हृत्य त्वत्कपितृको मत्कपितृक इत्यत्राकञ्न भवतीति वृत्तिग्रन्थेत्यर्थः । ननु यत्किञ्चित्यदोपादानेन तृतीयेत्यादुच्चारणेन विहितत्वस्मृतिपदोक्त-त्वङ्कर्तृकरण इत्यस्यापि दुर्वारमत आह यदन्तत्वमिति तेन त्वयकास-दृशस्त्वकत्सदृश इत्यत्र निषेधो न अनेनायं निषेधोपि समुदायस्येति भा-ष्यीयसिद्धान्तार्थो ध्वनितः तृतीयासमास इति सूत्रे विभाषादिगिति सू-त्रात्समास इत्यनुवृत्त्यैव सिद्धे पुनस्तत्र समास इत्यस्योपादानमसमास इति पदच्छेदाय तेन समासभिन्नस्य समाससदृशस्य लौकिकविग्रहवाक्य-स्य लाभ इत्याशयेनाह वाक्यमपीति उभयोर्व्यावृत्तावाह तेनेति इति स-मास इति तृतीयातत्कृतेति सूत्रविहितसमास इत्यर्थः नत्वत्र पूर्वसदृशे-त्यस्य प्रवृत्तिस्तस्य यत्र हेतौ तृतीया तत्र चरितार्थतया करोतिद्वारा सामर्थ्येन प्रवृत्तिरिति भावः तत्र सूत्रे तयोर्मध्य इत्यर्थो वा तदर्थे स-मासार्थे मूले यदुक्तन्न्याय्यत्वादिति तद्बलस्यावयवनिषेधे फलाभावस्य कि-ञ्चेत्यादिनोपपादने ऽपि यत्फलादिति तस्यानुपपादनान्न्यूनतापरिहारायाह किञ्चावयवेति नन्वनेन निषेधात्सर्वार्थवाचकत्वं नास्तीति ब्रूम इत्यत आह न ह्यत्रेति मानाभावादिति संज्ञानिषेधे ऽपि स्वीयसर्वार्थवाचकसर्वादित्वा-नपायादिति भावः ननु तस्यैव निषेधः किन्न स्यादत आह लोकेति तस्य सर्वार्थवाचकत्वस्य तस्य द्वन्द्वान्तर्गतेतरशब्दस्य तस्य पाठस्य यद्य-पीत्यादिना मूलोक्तन्न्ययोजनङ्खण्डयति द्वन्द्वावयवेत्यादिना मात्रपदं का-त्स्न्र्ये तेन समाहारेतरेतरयोगयोः सङ्ग्रहः अभाव इति उभयत्र समू-हस्य विशेष्यतया ऽवयवस्य तद्विशेषणत्वेन पदार्थैकदेशत्वान्न तत्र विशे-षणान्वय इति भावः तद्विवक्षायाम् कुत्साद्यर्थान्वयविवक्षायाम् तदुक्तेरिति अवयवगतकुत्सादेरप्युक्तेरित्यर्थः एवञ्चोक्तार्थानामप्रयोग इति न्यायेना-

वयवेभ्य तदुत्पत्तिर्नेति भावः यद्ययम्प्रकारो भवता नाद्रियते तदा भवन्मते प्रत्येकङ्गप्रत्ययो ऽपि स्यात् चिन्त्यमेतदिति शास्त्रस्थान्यविषयता स्यादिति कथनेन परोक्तफलस्य स्वीकरणमिति यत्तच्चिन्त्यमित्यर्थः त्वच्छब्दस्योक्तरीत्या तात्पर्य सत्त्वमस्तु तथापि तस्य सर्वादौ पाठे प्रमाणाभावः बहूनामसम्मतश्च सः एवञ्चावयवनिषेधे फलाभावः इत्यपि बोध्यम् । ननु यद्ययन्द्वन्द्वात्मकसमुदायस्यैव सर्वनामसंज्ञानिषेधस्तर्हि द्वन्द्व इति समभ्यनुपपन्नेत्यत आह समुदायनिषेधेत्विति तद्विषयेति भाष्योक्तिविषयेत्यर्थः तदर्थकेति प्रथमार्थकत्वेत्यर्थः द्वन्द्वेत्यस्य समुदायस्य संज्ञाव्यावर्त्तकत्वम्प्रकारान्तरेण साधयति किञ्चेति फलाभावादिति शीभावे कर्तव्ये एव तेन विकल्पविधानं शीभावस्य च सर्वनाम्नो विहितस्य जसः स्थाने प्राप्तिरिति समुदायस्य तेन विकल्पेन संज्ञाविधानान्निषेधस्य विकल्पे विधिविकल्पस्य फलितत्वेन परमूले उक्तसंज्ञा वा स्यादित्युक्तमत एवात्र निषेधाभावेनेत्युक्तिसङ्गतिरिति भावः तत्साहचर्येणेति विभाषा जसीत्युत्तरसूत्रसाहचर्येणेत्यर्थः सूत्रान्तरसाहचर्यन्न व्यवस्थानियामकमित्याशयेनाह अर्थाधिकारेति खण्डनकदुक्तिङ्खण्डयति एतेनेति 'अकच्स्वरौ तु कर्तव्यावित्युक्तम्' किञ्चेत्यादुत्तरप्रकारद्वयेनेत्यर्थः सामर्थ्यादिति यदि समुदायस्यैव संज्ञानिषेधो ऽभिप्रेतः स्यात्तदा द्वन्द्वश्चेत्येव वदेदिति भावः विद्यमानानीति अत्र बहुवचनं समूहावयवाभिप्रायम् ननु द्वन्द्वे द्वंद्वस्य वर्तमानत्वङ्कथमभेदे आधाराधेयभावविरहादत आह तत्रेति तयोर्मध्ये इत्यर्थः ननु भसंज्ञावादौ व्यपदेशिवद्भावस्यावयवावयविभावस्याश्रयणस्थल एव प्रसिद्धिरत आह आधाराधेयेति अनद्यतन इत्यादि आद्ये अद्य ह्यो ऽभुक्ष्महीत्यत्र व्यामिश्रे लुङेव यथा स्यादित्येवमर्थमनद्यतन इत्यत्र बहुव्रीहिनिर्देशः कर्तव्यः अविद्यमानाद्यतने ऽनद्यतन इत्यभिधाय यद्येवमद्यतनेपि लङ् प्राप्नोति न ह्यद्यतने ऽद्यतनो विद्यत इति पूर्वपक्षे अद्यतने ऽप्यद्यतनो वर्त्तते कथम् व्यपदेशिवद्भावेनेत्युक्तम् द्वितीये आस्यशब्दस्य मुखमात्रपरत्वोपक्रमे किमास्योपादाने प्रयोजनमिति पूर्वपक्षः सिद्धन्त्वास्ये तुल्यदेशप्रयत्ने सवर्णमिति न्यासपक्षे कृतः ततः प्रयत्नविशेषणमास्योपादानम् सन्ति हि आस्याद्व्याद्याः प्रयत्नास्ते हापिता भवन्ति इति समाधाने एवमपि व्यपदेशो न प्रकल्पते आस्ये येषां तुल्यो देश इति

व्यपदेशिवद्भावेन व्यपदेशो भविष्यतीत्युक्तम् तृतीये कादित्यत्र सङ्घात-ग्रहणं वर्णग्रहणं वेति विचारे संघातग्रहणमिति पक्षे एतिकेति न सि-ध्यतीति पूर्वपक्षे वचनसामर्थ्याद्भविष्यतीति परेणोक्ते अस्ति वचने प्रयो-जनम् किम् कारिकेति अत्राप्येकादेशे व्यपवर्गाभावान्न प्राप्नोति अन्ता-दिवद्भावेन व्यपवर्ग इत्युक्तम् तत्फलमिति तादृशव्याख्यानफलमित्यर्थः अपिः समुदायप्रयुक्तत्वपरामर्शकः अवयवस्य सर्वनामसंज्ञानिषेधो याद्-शरूपव्याद्वृत्तये भवता स्वीक्रियते तादृशरूपत्वात्तादृशव्याख्याने ऽपि दर्वारामि-ति भवदीयत्वात्तादृशव्याख्यानान्निष्फलमित्याह इतरकशब्द इति एतेनाव-यवस्य संज्ञानिषेधे प्रमाणाभावमाशङ्क्याकञ्भि न भवतीति भाष्योक्त-रेव तत्र मानमिति कथनं परास्तम् तस्य भाष्यस्य समुदायस्य संज्ञानिषे-धे फलप्रदर्शनपरत्वात् दिगर्थस्तु न बहुव्रीहाविति सूत्रवद् द्वन्द्वेचेति सूत्र-मप्युपसर्जनप्रतिषेधानुवादकमेव इतरेतरयोगद्वन्द्वे ऽप्युद्भूतावयवभेदसमूहस्य विशेषत्वसिद्धात्तादिति समुदायादिति ज्ञापिताद्वाचनिकाद्वा तदन्तविधेरि-त्यादिः आधारसप्तमीति आधारवाचकसप्तमीत्यर्थः तथाच विद्यमानयोरे-व पदार्थयोराधाराधेयभावस्य प्रसिद्धतया जसाधारमित्यनुपपन्नमिति भा-वः हृस्वेकारात्मकसर्वनामकार्यस्याप्रसिद्धेराह इकारेणेति ननु भाष्यकृते-कारस्य प्रत्याख्यानमपि सूत्रकाररीत्या वृत्युक्तरूपमस्त्वित्यत आह प्रत्या-ख्यानेनेति वक्ष्यमाणः योगविभागादिरूपः एतेन यथोत्तरमुनीनाम्मा-माण्याद्भाष्यकारसम्मतलक्ष्यातिरिक्तस्य रूपस्यासाधुत्वमिति ध्वनितम् । मूले ऽत्र शसप्रभृतय इत्यादिना स्थानिलाभोपाय उक्तस्तत्र वाक्यभेदेन तेचेत्यादिना स्थानिलाभप्रदर्शनमधिकमेकवाक्यतया ऽप्युपपादनस्य कर्तुं श-क्यत्वादेवञ्चैवंकथनं यत्तदोर्नित्यसम्बन्धप्रदर्शनार्थमेवेत्याशयेनाह ये निमित्ते-ति आनुरुप्यप्रयोजकधर्मत्वर्शयति स्वार्थेत्यादिना अर्थविशिष्टस्य शब्दस्या-त्र शास्त्रे कार्यित्वेनाश्रयणादत्रार्थोपादानम् चरणादिशब्दव्याद्वृत्तये स्वस-दृशेति अनेकधर्मस्य सादृश्यप्रयोजकस्य सम्भवे तत्त्यागो ऽनुचित इति भावः नच पदाद्यादेशानां वैकल्पिकतया चरणशब्दस्य पदादेशे ऽपि पक्षे चरणशब्दस्य शसादौ प्रयोगः सिद्ध एवेति स्वसदृशवर्णवत्ता इति व्यर्थ-मिति वाच्यम् पदङ्घ्रिश्चरणो ऽस्त्रियामिति कोशाच्चरणशब्दस्य नपुंसक-त्वमप्यस्तीति यद्ययम्पदादेशश्चरणशब्दस्यापि स्यात्तदा तानि पन्दि पूजयेति

प्रयोगस्याप्यापत्तिरिति स्वसदृशेत्यस्यावश्यकत्वात् किञ्चोदकशब्दस्येवाप्-शब्दस्याप्युदन्नादेशे स्त्रीलिंगत्वस्यापि सम्भवेनास्मान्नान्तलक्षणङीर्वापत्ति-रपि स्यात् ननु स्वमते छन्दसीत्यस्यानुवृत्तिर्नास्तीत्यनुवर्त्तत इत्यनुपपन्नमत आह अस्येतीति अत्र स्यान्तम्पृथक्पदम् अत एव छन्दोग्रहणवैयर्थ्यापत्ति-दोषादेव मूले अत्र प्राञ्च इति काशिकाकृदादयः तथासतीत्येतादृशव्या-ख्याने सतीत्यर्थकं यदुक्तन्तस्य वैयर्थ्यन्दोषोपपादनमात्रस्योचितत्वादत आह प्राचीनेति एतेन यद्यपि मया तस्यादरः कृतस्तथापि तद्दुष्टमिति ध्वनितम् एतेन अङ्गस्येत्येतत्साहित्यकथनेन अत एव मूले अङ्गञ्चेतीत्य-भिहितम् अङ्गस्येत्यस्याप्रक्रान्तत्वशङ्कानिरासायाह अधिकारेति एवं सति वृषणश्व इत्यत्राल्लोपाभावो ऽपि द्रष्टव्यः अत्राङ्गस्येत्यस्याधिकारलब्धत्वकथनेन भस्येत्यस्यापि तथैव लाभ इति ध्वनितम् नन्वत्राङ्गस्य भस्येत्यस्य च यद्य-प्यधिकाराल्लाभ तथाप्यङ्गस्य भस्यान इत्येवार्थः स्यान्नतु प्रत्ययविशेषस्य ततो लाभः आक्षेपेणेति चेत्कोसावाक्षेपः अनुमानं वा भसंज्ञासूत्रेणैकवा-क्यता वा तत्राद्यः पक्षो न युक्त इत्याशयेनाशङ्कते नन्विति अनुमानमत्र प्रत्ययविध्युपादानम् असर्वनामस्थानयजादिस्वादिपरं भाङ्गपदोद्देश्यत्वा-दित्येवङ्कार्यम् तदवयवस्य तल्लाभ इति तस्य पक्षतावच्छेदकत्वन्तु पक्ष-त्वमिति भावः किञ्च पदभेदेनोद्देश्यताभेदान्न पदयोर्द्वित्वेन हेतुतावच्छे-दकत्वमिति भत्वादिनैव तत्वं वक्तव्यमेवञ्च वृषण्वस्वश्वयोरित्यनेन ययो-र्भसंज्ञा तयोरपि भत्त्वावच्छिन्नोद्देश्यत्वसत्वेन तत्र निरुक्तसाध्याभावेन व्यभिचारः एवं पदशब्दोद्देश्यत्वस्य राजभ्यामित्यत्रैव व्यभिचारः न द्वि-तीयः यथोद्देशपक्षे संज्ञाशास्त्रस्य पृथगेव वाक्यार्थबोधेनैकवाक्यताया ला-भात् कार्यकालपक्षे ऽपि वाक्यैकवाक्यता न पदैकवाक्यतेति निरुक्तार्थालाभाच्च प्रत्ययस्याङ्गांशे उत्थिताकाङ्क्षतया तद्विशेषणताया न्याय्यत्त्वाच्चेति परोक्तमन्विशेषणत्वमभ्युपगम्याप्याह किञ्चेति दोषः अतिव्याप्तिः भाष्य-मिति एवञ्च भाष्यन्तस्मिन् सूत्रे ऽनन्त्यविकारे ऽन्त्यसदेशस्येति परिभा-षायाः प्रयोजनखण्डनावसरे प्रवृत्तम् ननु प्रत्ययस्याङ्गसाकांक्षत्वमेवाङ्गस्ये-ति सूत्रभाष्ये परस्परमत्यङ्गं प्रत्ययसंज्ञाभावादित्यनेन दर्शितमित्यविशेष-णत्वङ्कथमत्रोक्तमत आह तस्यायभाव इति श्रुते अधिकारतो लब्धे जि-ज्ञासायामिति एतेन भपदस्य श्रवणमात्रेण कृत्रिमाकृत्रिमन्यायेन यस्येयं

संज्ञा कृता तस्यार्थस्योपस्थितिसत्वात्पुनर्वाक्यार्थबोधस्य नापेक्षेति निरस्तम् कार्यकालपक्षेण काल्यते खसन्निधिम्प्राप्यते इति व्युत्पत्त्या कार्यविधायकशास्त्रघटकसंज्ञाशब्दघटितं यत्संज्ञासंज्ञिभावसम्बन्धबोधकं शास्त्रं तस्य जिज्ञासां जनयित्वोपस्थितिः कार्यते इत्येव भस्येत्युपस्थितमिदम्भवति यच्चिभमिति भाष्येण लभ्यते तच्छास्त्रोपस्थितिमात्रेण विधायकशास्त्रवाक्यार्थबोधासम्भव इति पुनस्तत्र संज्ञासूत्रेण वृत्तिग्रहो भवति सच प्रकृतोपयोग्येव शास्त्रान्तरे पुनस्तथा जिज्ञासायाम्पुनरप्येवमेव कल्पनेति एतद्वाक्यार्थबोधकाले अन्विशेषणतापीत्यपिना ऽङ्गविशेषणतायाः समुच्चयः एवञ्चोभयविशेषणत्वं सकृदुपस्थितिमात्रेण न सम्भवत्यतस्तत्रादिन्यायाश्रयणम् अत एव भस्याङ्गस्थानो ऽकारस्यासर्वनामस्थानपरस्येति व्याख्यानस्योपपत्तिः। यदुक्तम्याग्विधावित्यादि तत्रेत्याह विधाविति एतच्च तस्याः परिभाषायाः सार्वत्रिकत्वन्नास्तीत्येतच्च तत्र विधीयत इत्यस्याध्याहारेण तद्विषयताया उचितत्वादिति भावः अत्रेदन्तत्वम् तस्यायम्भाव इत्यत्र तच्छब्दोपादानेन षष्ठः सम्प्रसारणामिति सूत्रस्थभाष्यमेकदेश्युक्तिः प्रत्ययस्याङ्गाशे उत्थिताकाङ्क्षत्वेन तद्विशेषणत्वस्यैव न्याय्यत्वात् आकडारादिकारीयभपदसंज्ञाविषये यथोद्देशपक्षस्यैव सिद्धान्ततत्वाच्च तथाच प्रकृतविषये दोषाभावो ऽनल्पविकार इति परिभाषयैव सम्पादनीय इति मूले सामर्थ्यादित्यस्य पदपदोपादानेत्यादिः अत एवाह। निमित्तेत्यादि तेन विभिन्नपदस्थानाम्मातुर्नमनमित्यादौ णत्वाभावः सिद्धः नन्वेकपदस्थत्वं यत्र निमित्तनिमित्तिनोस्तत्र णत्वमित्येतल्लब्धन्तावता रामनामेत्यत्रातिप्रसङ्गवारणासम्भव इत्यत आह तत्रञ्चेति नच निमित्तिमत्वं विधीयमानस्य णकारस्य नतु नकारस्येति कथन्निमित्तस्थानिनोरेकपदस्थत्वस्य लाभ इति वाच्यम् स्वप्रयोज्यकार्योद्देश्यत्वस्य षष्ठ्यर्थत्वमाश्रित्येति प्रत्ययस्य स्वीकारात् निमित्तानधिकरणनिमित्तिमत्पदघटितं यत्तद्भिन्नं यत्पदन्तदवयवत्वं यत्र द्वयोस्तत्र णत्वमित्यर्थः तेन निमित्तिमति पदत्वविशेषणेन तत्वाभावादिति पदत्वाभावादित्यर्थः आत्मन् विश्वेत्यनेन स्वप्रत्ययस्य मातृभोगशब्दाद्विधानेन तदर्थविशिष्टस्वार्थबोधकत्वमेव तस्य नतु भोगशब्दमात्रार्थविशिष्टस्वार्थबोधकत्वमिति वक्ष्यमाणपदत्वाभावः स्पष्ट एव अत एव उक्तस्य समानपदत्वस्याश्रयणादेव चरितार्थमिति तावन्मात्रेणातिप्रसङ्गवारणासम्भवादणत्वमित्यावश्यकमिति

भावः इत्यादिसिद्धये णत्वघटितप्रयोगस्य सिद्धये नन्वत्र पदत्वम्पारिभाषिकमुतार्थवत्वमात्रम् नाद्यः गन्धर्वगानम् रामनमनमित्यादौ सुबुत्पत्तेः प्राक् समासेनोत्तरपदस्य पारिभाषिकपदत्वाभावाण्णत्वापत्तेः नापि द्वितीयम् रामेणेत्यादावेव णत्वासिद्धेरत आह पदश्चात्रेति अत्र उक्तसमानपदत्वलक्षणे अर्थबोधकत्वमर्थबोधजनकसमुदायघटकत्वञ्च विभक्तिसहकारेण यस्य बोधकता तद्घटके खप्रत्यये ऽप्यस्तीति मातृभोगीण इत्यत्र णत्वाप्राप्तिरतो ऽभावद्वयनिवेशः तेन उक्तरूपस्य पदत्वस्य लक्षणघटकत्वेन निमित्तानधिकरणत्वन्निमित्तानवयवकत्वञ्च मातृभोगीण इत्यत्र भोगशब्दे ऽस्तीति तदनवयवकत्वरूपरूपत्वदघटितत्वसमुदायस्य नास्तीत्यत्र णत्वन्न स्यादतो निमित्तिमदिति ननु वर्णैकदेशा वर्णग्रहणेन न गृह्यन्त इति पक्षे ऋकारात्परस्य णत्वे क्षुभ्नादिगणे नृनमनशब्दपाठस्य ज्ञापकता भाष्ये उक्ता सा निरुक्तस्याखण्डपदत्वस्याश्रयणे कथं सङ्गच्छेत तत्र भवत्सम्मताखण्डपदत्वस्याभावेन णत्वप्राप्त्यभावादाह क्षुभ्नादिष्विति संज्ञाभूतो ऽखण्ड इत्यनेन पूर्वोत्तरसमुदायस्य संज्ञात्वसूचनेन पूर्वपदात्संज्ञायामग इति सूत्रस्य प्रवृत्तिर्ध्वनिता छन्दस्यृदवग्रहादित्यस्य तु न प्राप्तिरत्रावग्रहस्यादर्शनात् भाष्योक्तेति एओङ् सूत्रे इत्यादिः वस्तुतस्तु यदीयमखण्डा न शब्दान्ता संज्ञा तदा संज्ञात्वभङ्गापत्त्या तत्र णत्वाभावस्य सिद्धौ गणे तस्य पाठो व्यर्थ एव स्यादिति तस्य यौगिकत्वमेवास्ति नतु संज्ञात्वन्नचैवं सति पाठस्य वैयर्थ्यमाशङ्कनीयम् तेन निरुक्तस्याखण्डपदत्वस्य रषाभ्यामितिसूत्रे सत्तास्तीति बोधनद्वारा विध्यप्राप्तिरेव बोध्यते अत एवाह इति भाव इति नन्वेतादृशाखण्डपदत्वमेव यदि णत्वप्रवृत्तिसम्पादकन्तदा सर्वनाथरघुणेत्यत्र निमित्तानधिकरणनिमित्तिमन्नाथपदघटितत्वस्य समुदाये सत्वाण्णत्वं न स्यादिति चेन्न पदे निरुक्ताखण्डत्वन्निरुच्य नकारे तत्थत्वनिवेशापेक्षया लाघवान्नकार एव निमित्तानधिकरणनिमित्तिमत्पदावयवत्वविशेषणविवक्षासत्वेनादोषात् नचैवमपि रघुनरेणेत्यत्र नरशब्दावयवस्य नस्य णत्वन्दुर्वारमिति वाच्यम् निमित्तिमत्त्वमित्यत्र निमित्तिमत्त्वन्नकारे निविष्टन्तच्च स्वोत्तरत्वसम्बन्धेन रेफषकारान्यतरत्वरूपमेव एवञ्च यस्य खपदेनोपादानन्तत्र तस्यैव प्रत्यासत्त्या निमित्तानधिकरणेत्यत्र निमित्तपदेन ग्राह्यतया नरशब्दाद्यनकारस्य प-

रेण रेफेण निमित्तत्वव्यवहार एव नेति यद्रेफव्यक्तिमादाय निमित्तत्वव्यवहारस्तस्य नकारस्य तद्व्यक्त्यनधिकरणत्वस्य नरशब्दे सत्त्वेनादोषात् ननु मण्डशब्दस्य तण्डुलैर्निर्मिते द्रवे प्रसिद्धेर्मुद्गामलकयूषस्विति परवाक्यविरोधो यूषो मण्ड इति व्याख्याने प्राप्नोतीत्यत आह तद्विशेष इति एवञ्च यथा तण्डुलजलनिर्मिते यूषव्यवहारस्तथा मुद्गैः कृतेपि यूषव्यवहारस्यायुर्वेद एव सुप्रसिद्धतया न परवाक्यविरोध इति भावः मूले पाक्षिकतामिति तस्यानित्यत्वादनाश्रयणे ऽपि तत्साधनीयकार्यस्य प्रकारान्तरेण सिद्धतामित्यर्थः तामेवाह तथाहीत्यादिना तस्यानित्यत्वे प्रमाणन्तु निष्ठायां सेटीतिसूत्रे इटि कृते एव णिलोपो नतु ततः प्रागिति कालावधारणार्थकसेड्ग्रहणमिति वक्ष्यते स्पष्टञ्चेदङ्कृदन्ते मूले निषेधादिति भिदिरेव द्विःप्रयोगसत्त्वेन तस्योपदेशे एकाच्त्वादिति भावः पञ्चमीसमासात् अचः परस्मिन्पूर्वविधाविति सूत्रे पूर्वविधिशब्दे पूर्वस्माद्विधिरिति पञ्चमीसमासात् इतरयोः माथितिकः अपीपचन्निल्यनयोः तदप्रवृत्तिरिति इण्निषेधाप्रवृत्तिरित्यर्थः यत्तु पञ्चमीसमास आवश्यक इति तेनैवेष्टसिद्धौ विहितविशेषणाश्रयणे प्रमाणाभाव इति तन्न विभित्सतीत्यस्य सिध्यर्थन्तस्यावश्यकत्वाद्भाष्यकारसम्मतत्वाच्चेत्याशयेनाह विहितविशेषणत्वञ्चेति परिहृतमिति अत्र ह्यावृत्त्या द्व्यचकमङ्गन्नत्वेकाजिति निषेधाप्रवृत्तिरिति भावः यथाश्रुतत्वे एकाचो ऽङ्गात्परस्य बलादेरार्द्धधातुकस्येड् न स्यादित्यर्थकत्वे दोषवारणाय इण्निषेधानापत्तिरूपदोषवारणायेत्यर्थः सम्बन्ध इति तथासति य उपदेशे एकाच्ततः परस्याङ्गसंज्ञानिमित्तस्येड् न स्यादित्यर्थः बेभिदितेत्यादावपीति सौलभ्यार्थकैवकारार्थको ऽत्रापिशब्दः तस्य एकाचो ऽङ्गादिति भाष्यस्य आवश्यकमिति तस्य भाष्यस्य दोषवारणाय प्रवृत्तत्वेन यथा दोषपरिहारो भवति तदर्थकत्वन्तस्यावश्यकमिति भावः नन्वङ्गादित्येतावन्मात्रेण कथन्तस्य लाभो ऽत आह प्रत्ययविधेति यस्मात्प्रत्ययविधानन्तदादेरित्यर्थः अङ्गसंज्ञाविधायकसूत्रे तथोपादानादिति प्रत्ययविधानावधेरेकाचः परस्येति व्याख्येयमिति तात्पर्यम् यस्मात्प्रत्ययविधानन्तद्भिन्नस्य तदादेरप्यङ्गत्वम्भवामीत्यादौ दृष्टमतः प्रायेणेति इदमिति विहितविशेषणमित्यर्थः अदोषेणेति इट्प्रतिषेधानापत्तिरूपदोषाभावेनेत्यर्थः नच विहितविशेषणपरतया तस्य भाष्यस्य योजने गोधुक्शब्दा-

दाचारक्विबन्तादिट्प्रतिषेधो न स्यादिति वाच्यम् तत्र दुहित्यस्याङ्त्वाभावेन यथाश्रुते ऽपि निषेधाप्राप्तेः हलन्तेभ्य आचारे क्विपो ऽनभिधानाच्च स्थानिवत्त्वमिति अचः परस्मिन्निति स्थानिवत्त्वमित्यर्थः ॥ ठस्येक इत्यत्राकारान्तस्य ठेत्यस्य स्थानित्वेनाश्रयणमिति कथमल्विधित्वमत आह ठस्येक इत्यत्रेति प्रत्ययेषु ठकारादिप्रत्ययेषु एतेनाठचो व्यावृत्तिः अन्यथेति मूलोक्तरीत्या स्थान्यादेशयोरेव तस्याविवक्षायाम् लाक्षणिकत्वादिति स्थानिबोधकं यच्छस्येति तत्र व्यञ्जनमात्रस्य विवक्षितत्वे तस्य स्थाने ककाररूपव्यञ्जनादेशे पूर्वकालस्थिताकारान्तस्य कशब्दस्य लक्षणद्वयानुसंधानप्रयोज्यप्रतिपत्तिकस्वरूपत्वादित्यर्थः अत्र ह्रस्वत्वस्य प्रवृत्तावव्ययात्यप्सूत्रस्थम्भाष्यमेव मानम् तत्र हि निषादकर्षूनाम देशः नैषादकर्षूकः दाक्षिकर्षुक इत्युक्तं दाक्षिकर्षुनाम वाह्रीकग्रामः तत्र भव इति ठञ् इसुसुक्तान्तात्कः केण इति ह्रस्वः उक्तकल्पनायामपि मूलं नासमञ्जसमित्याह इकादेशस्थानिभूतेति स्थष्टमिति तत्र हि ठस्येत्यत्र वर्णस्य ग्रहणं सङ्घातस्य वेति विचारे प्रथमपक्षे धात्वन्तस्य प्रतिषेधो वक्तव्यः पठति पठितुम् अस्तु तर्हि सङ्घातग्रहणम् सङ्घातग्रहणञ्चेदुणादिमाथितिकानाम्प्रतिषेधो वक्तव्यः उणादिनान्तावत् कण्ठः शण्ठ इति इह च मथितम्पण्यमस्य माथितिक इति अकारलोपे कृते तान्तादिति कादेशः प्राप्नोति वर्णग्रहणे पुनः सति अल्विधिरयम्भवति तस्माद्विशिष्टग्रहणम् तस्माद्विशिष्टस्य ठकारस्य ग्रहणङ्कर्त्तव्यम् तस्माद्विशिष्टस्येति तद्धितस्य ठादेरिति कर्त्तव्यम् एवञ्च ठादेरिति वचनादल्विधित्वात्स्थानिवद्भावाभावात्कादेशाप्रसङ्गः अस्तु तावद्वर्णग्रहणन्नन्वेवं चोक्तण्ठादेशे वर्णग्रहणञ्चेद्धात्वन्तप्रतिषेध इति नैष दोषः अङ्गादिति वर्तते अर्थवशाद्विभक्तिविपरिणाम इति कैयटः एतेन वर्णमात्रस्य स्थानित्वमिति प्रतिपादितम् इदमिति अल्विधित्वेन समाधानमित्यर्थः सन्निपातेति अजादिसन्निपातेन जातस्य तान्तत्वस्य तद्विघातकादेशस्यत्वनिमित्तत्वमिति भावः एतच्च परसाहचर्यस्य बलीयस्त्वञ्च कैयटे स्थष्टमिति तत्रत्यभाष्ये भगवता बहव इमे विदयः पठ्यन्ते तत्र न ज्ञायते कस्य नित्यन्नत्वम् कस्य विभाषा कस्य इडिति प्रश्ने 'वेत्तेस्तु विदितो निष्ठा विद्यते विन्न इष्यते । विन्तेर्विन्नश्च वित्तश्च वित्तो भोगेषु विन्दतेरित्युक्तम्' एतेन विद सत्तायामित्यस्मान्नत्वम् विद विचारण इति धातोर्निष्ठायान्नत्वविकल्पः

उन्दिना परेण साहचर्यात् यद्यपि नुदविदेति सूत्रे नुदधातुस्तौदादिव आदौ पठितस्तथापि शब्दपरविप्रतिषेधादुन्दिरत्र व्यवस्थाहेतुनुदिरिति कैयटः विद्लृ लाभे इत्यस्मात्तु प्रतिषेधो भोगप्रत्यययोः विद ज्ञान इत्यस्मात्तु इटा व्यवधानान्नत्वाभावः यस्तु तुदादौ पठ्यते तस्माद्विभाषा गमहनविदविशामिति क्सुप्रत्यये इड्विकल्पाद्यस्य विभाषेतीण्निषेधः विभाषेति सूत्रे हनसाहचर्यादादादिकस्य तु न ग्रहणम्पूर्वसाहचर्यात्परसाहचर्यस्य बलवत्वादिति भावः । ननु विप्रतिषेधे परङ्कार्यमिति सूत्रे कार्यशब्दोपादानेनाप्राप्तस्यापूर्वस्य विधेयस्य ग्रहणमिति परसाहचर्यस्य बलवत्वाश्रयणमशक्यमत आह एतत्सर्वमिति अनुरोधेनेति अयम्भावः तेन हि पूर्वविधाविति न्यासपक्षे य आयन्धिन्वन्तीत्यादिप्रयोगस्तस्यानिर्वाह इति मनसि निधाय यद्वार्तिकम्प्रत्ययपरविधाविति त्विति तस्य युक्तत्वमित्याशयेन तादृशन्यासान्तरे निमित्तापेक्षया परत्वाश्रयेण वेभिदित्यादिसिद्धिरुक्ता ननु पूर्वविधाविति न्यासेनैव तेषां सिद्धिरित्यभिहितन्तद्वीत्येति वस्तुतस्तु पूर्वविधाविति न्यासेनैव सर्वेष्टसिद्धिर्भवति पंचमीसमासस्य वक्ष्यमाणप्रयोजनानुरोधेनावश्यकत्वात् यद्यप्यस्मिन् पक्षे हेगौरित्यत्र स्थानिवद्भावेनैङ्ह्रस्वादिति लोपः प्राप्नोति तथापि पञ्चमीसमासमाश्रित्य यः स्थानिवद्भावस्तस्यानित्यत्वेनैङ्ह्रस्वादिति सूत्रे एङ्ग्रहणसामर्थ्याद्वा तत्र स्थानिवत्त्वाप्राप्त्या दोषः परिहर्तुं शक्य इत्याशयेन दिगर्थमाह दिगर्थस्त्विति एतदर्थम् अपीपचन्निति रूपसिद्ध्यर्थम् शास्त्रीयस्यैव शास्त्रविधेयस्यैव अत्र साहचर्यविषये तदप्राप्तेरिति विप्रतिषेधशास्त्राप्राप्तेरित्यर्थः सामान्यतः परत्वाश्रयणे ऽपि न विप्रतिषेधशास्त्रस्य प्राप्तिरित्याशयेनाह नित्यः परेत्यादिभाष्योक्तरीत्येति पट्यामृड्भ्येत्यादेरचः परस्मिन्निति सूत्रारम्भाभावेपि सिद्धिर्यथोक्ता तद्रीत्येत्यर्थः अन्तरङ्गत्वम् पूर्वोपस्थितत्वरूपमत्रान्तरङ्गत्वम् नन्वेवं सति विभाषा गमेतिसूत्रविषये परसाहचर्याश्रयणपरभाष्यविरोध इत्यत आह विभाषेति तथाच लुग्विकरणपरिभाषानुरोध एव तत्र परसाहचर्याश्रयणबीजन्तु तस्य बलीयस्त्वेनेति भावः ननु यदि पूर्वसाहचर्य्यस्यान्तरङ्गत्वन्तदा नुदविदेतिसूत्रविषये कथम्भवन्मते लक्ष्यसिद्धिरत आह नुदेति परिभाषा पूर्वोपस्थितविषये प्रवर्तते या बहिरङ्गान्तरङ्गयोरन्तरङ्गम्बलीय इत्येषा परिभाषा सा अनित्य

त्वादिति ओमाङोश्चेतिसूत्रस्थाङ्ग्रहणादित्यादिः व्याख्यानेन पूर्वोक्ताकरसम्मतव्याख्यानेन प्रत्यैषिषन्निति अत्र प्रतिपूर्वकात्प्रश्लिष्टेकारात्मकाद्धातोः सन् तदन्ताल्लङ् एवमपि परसाहचर्यस्य बलवत्त्वाश्रयणे ऽपि ननु परसाहचर्यस्य बलवत्त्वानाश्रयणे ऽपि प्रत्यैषिषन्नित्यादेः पञ्चमीसमासानाश्रयणेनापि विलक्षणार्थग्रहणेन सिद्धिर्भविष्यतीत्यत आह पूर्वोत्तरेति अनपहृतविकरणकेति अत्र हि पररूपेण विकरणस्य चङो ऽपहारसत्वात्सूत्रविहितस्य जुस्भावस्य प्रवृत्तिर्न भविष्यतीति भावः अतिक्लिष्टमिति उभयसाहचर्यस्याश्रयणापूर्वार्धाश्रयणप्रयुक्तगौरवेणातिक्लेशकरमित्यर्थः यत्तु मूले परसाहचर्याश्रयणस्य बलवत्त्वमाश्रित्यापीपचन्नित्यस्य सिद्ध्या ऽऽश्रयणं न्यूनं यत उक्तरीत्या जुस्वारणे ऽपि अदभ्यस्तादित्यङ्गावस्यावारणादिति तन्न झल्त्वाभावेन तदप्राप्तेः स्थानिवद्भावेन तु तदलभ्यमल्विधित्वात् जुसादेशविषयेत्येवं वक्तुमशक्यत्वम् झेरितिसमुदायाश्रयणात् ननु यदा ऽपरविधाविति न्यासान्तरन्तदा परस्य विधौ स्थानिवद्भावस्य निषेधो भविष्यतीति तदा ऽपीपचन्नित्यस्य परसाहचर्यस्य बलवत्त्वाश्रयेव सिद्धिर्भवतापि वक्तव्यैवेत्यत आह अपरविधाविति परस्माद्विधिरिति पंचमीसमासस्तदा ऽपि वक्तुं शक्य इत्यर्थः न्यासान्तरम् अपरविधाविति न्यासान्तरम् स्वविधेरपीति तेन आयन्नासन्नित्यस्य सिद्धिः वस्तुतस्तु क्लृप्तानुपूर्वीकेनाचः परस्मिन्निति सूत्रेणैव सर्वेष्टसिद्धौ न्यासान्तराश्रयणन्न कार्यमिति तुशब्दोपादानेन ध्वनितम् ननु यदि न न्यासान्तरन्तदा कथमायन्नासन्नित्यनयोर्धिन्वन्तीत्यादेश्च सिद्धिरिति चेन्न असिद्धवत्सूत्रेण लावस्थायामडागमेन वा ऽऽद्ययोरचः परस्मिन्नित्यत्राभावातिदेशेनाल्यस्य सिद्धेः ननु यदि पञ्चमीसमास आश्रीयते तदा विगणय्येत्यादावतिप्रसङ्ग इत्यत आह अतिप्रसङ्ग इति । चक्रयत्रेत्यस्य यणन्तसंयोगाद्योः स्कोर्लोपो नेत्यर्थो यणः प्रतिषेधो वाच्य इति वार्तिकस्य क्रियते चेत्सिद्धिर्भविष्यतीत्यत असाधारणप्रयोजनमाह तक्षीति निगाल्यत इत्यस्यान्तरङ्गत्वाण्णिलोपात्प्राग्लकारादेशेन सिद्धिर्भविष्यतीत्याशङ्कान्निराचष्टे नचेत्यादिना प्रवृत्तियोग्यतयेति सपादसप्ताध्यायीस्थकार्यप्रवृत्तियोग्ये विषये त्रैपादिकं शास्त्रन्न प्रवर्तते इत्यर्थस्तस्यात्रित्यादिसिद्ध्यर्थमवश्यं वाच्यो ऽन्यथा ऽष्टुत्वस्य पूर्वसवर्णौ ततो द्विर्वचने ऽभ्यासे टकारस्य श्रवणापत्तिः एवमन्यत्रापि

बोध्यम् । स्थानिवत्त्वमिति प्रथमसूत्रेण स्थानिवत्त्वमित्यर्थः विशेषणत्व इति एवञ्च प्लायत इत्यस्य सिध्यर्थमावश्यकम् नचात्रैकदेशविकृतन्यायेनोपसर्गत्वम्परादिवद्भावेन चाकारादावयतीत्वमिति स्थानिवद्भावं विनापि लत्वभविष्यतीति वाच्यम् अर्द्धविकारस्य सत्वादुपसर्गत्वस्यापरिमाणनिष्ठत्वात् ननु माषवपनीत्यत्र माषाणां वपनीति समासे समासरूपं यत् प्रातिपदिकन्तदन्तो न नकार इति णत्वस्य प्राप्तिरेव नेति कथम्माषवपनीति णत्वोदाहरणमत आह इहेति प्राक्समास इति करणल्युडन्तवपनशब्दस्येत्यादिः गतिकारकोपपदानाङ् कृद्भिः सह समासस्य सुबुत्पत्तेः स्त्रीप्रत्ययोत्पत्तेश्च प्राक् प्रवृत्तेरिति भावः नन्वन्तरङ्गणत्वापेक्षया बहिर्भूतप्रत्ययापेक्षाल्लोपस्यासिद्धतया णत्वन्न भविष्यतीत्यत आह तस्यापीति णत्वस्यापीत्यर्थः ज्ञानसापेक्षत्वेन चेति प्राचामनुरोधेनेदम् स्वसिद्धान्तस्त्वित्याह त्रिपादीस्थत्वेति मूले कथञ्चिदिति पूर्वस्माद्विधौ स्थानिवद्भावस्यानित्यत्वादप्रवृत्तिस्वीकारादिति भावः एतत् रषाभ्यामिति णत्वमित्येतत् प्रागुक्तस्याभिप्रेतशब्दस्य नपुंसकत्वादाह अभिप्रेतेति अन्त्य इति प्रातिपदिकान्तस्येत्यत्र यत्प्रातिपदिकपदन्तत्रेत्यर्थः एतेनैकार्थीभावाभावः सूचितः व्यधिकरणषष्ठीत्वमुपपादयति प्रातीति यद्यप्युभयोरपि षष्ठ्योरवयववावयविभावार्थकत्वन्तथापि व्यधिकरणप्रातिपदिकप्रकृतिकत्वेन व्यधिकरणत्वन्द्रष्टव्यम् एतदेवाह परस्परेति अभेदस्य सम्बन्धत्वमत्र निरस्तमत आह सम्बन्धान्तरेति विशेष्यविशेषणभावनियामकसम्बन्धान्तरेत्यर्थः भाष्ये उक्तामिति एवञ्च सौत्रमन्तग्रहणं शक्यमकर्तुमित्यसङ्गतम् नराभ्यामित्यादौ नलोपव्यावर्त्यकत्वेनान्तपदस्य चरितार्थत्वात् नचान्तपदाभावेपि नेत्यनेन प्रातिपदिकं विशेष्यताम् पदस्येति तु व्यधिकरणमस्तु पदावयवस्य नान्तप्रातिपदिकस्य लोप इत्यर्थो ऽस्तु तावतापि नराभ्यामित्यस्य व्यावृत्तिर्भविष्यतीति वाच्यम् लोमनिशयाभ्यामित्यादौ नलोपस्य वारणाय तस्यावश्यकत्वात् सौत्रान्तपदस्य सत्वे तु चरमावयववाचकान्तपदस्यावयवीसाकाङ्क्षतया प्रत्यासत्त्या पदस्येत्यस्य सम्बन्धेन पदावयवस्य नान्तप्रातिपदिकस्य पदान्तस्य लोप इत्यर्थेनेष्टसिद्धेः तत्विति वैयधिकरण्येन सम्बन्धकल्पनन्त्वित्यर्थः मूले द्विवचनोपपत्तये आह समाहारेति न्याय्यत्वमुपपादयति अत्येति पूर्वनिपातप्रकरणस्यानित्यत्वादाह किञ्चेति असन्निधानादिति शब्दस्वरूपं विशेष्यमादाय तादन्तविधिस्तु सत्येव गमक इति शेषः

तत्प्रत्याख्याने एकदेशिसमासस्य प्रत्याख्याने दिनावयवे ऽपि तदवयवसङ्घावमात्रेणाप्यहरस्तीति लौकिकव्यवहारदर्शनादहःशब्दस्य प्रवृत्त्यात्र कर्मधारयः। मूले जहातीति हाशब्द उपपदे विच् नतु क्विप् इत्वस्य प्रसङ्गात् अमुना ब्राह्मणेनेत्यत्र नाभावे कर्तव्ये ऽप्यसिद्धत्वस्य निषेधाय नुम्यप्यस्त्वित्यत्रापिशब्दः एवञ्च नेत्यनेन कथमुभयस्मिन्कर्तव्ये निषेधलाभ इत्यत आह अयम्भाव इति तम्भतीति नाभावनकारोभयम्भतीत्यर्थः अन्यम्भतीति विभक्तिसम्बन्धिकार्यान्तरम्भतीत्यर्थः सुपि चेतिदीर्घव्यावृत्तये आह कृते चेति एतेन अन्यम्भतीति व्याख्यानेन नुमादेरिति पुंसि नाभावस्य सङ्ग्रहायात्रादिपदम् नन्वकारस्योच्चारणार्थत्वेनाभावस्यैव सङ्ग्रहो न स्यादत आह तत्र इति वक्ष्यमाणयोरमुकुले ऽमुयोरित्यनयोः सङ्ग्रहायाह विभक्तिनिमित्तेति नचैवं त्यदाद्यत्वस्याप्यप्रवृत्तिः स्यादिति वाच्यम् तस्याप्रवृत्तौ न मु न इति सूत्रविषयत्वस्याभावेनोपजीव्याविरोधाय तद्भिन्नस्यैव ग्रहणात् एवम्परूपस्यापि पूर्वम्प्रवृत्तिर्बोध्या तस्यापि नाभावसम्पादकत्वात् अत एवाह कमपीति नुमः प्रक्रान्तत्वेन झटित्युपस्थितत्वादाह विभक्त्यादेशमिति अत्र वाशब्दो ऽनाख्यायाम् एतेनैतादृशार्थकल्पनेनादेशासङ्ग्रहापत्त्या नुम्यप्यस्त्विति पूर्वग्रन्थासङ्गतिरित्यपास्तम् एत्वाप्रवृत्ताविति अमू इत्यत्र नपुंसकाच्चेति शीभावे सत्यादृ गुण इत्येकादेशसम्पाद्यस्य एत्वस्यामुयोरित्यत्र ओसि चेत्येत्वस्य चाप्रवृत्त्येत्यर्थः न्यूनतापरिहारायाह नमुटादेश इति एतच्च वार्तिकन्न मु न इति सूत्रस्य नादेशे कृते यत्कार्यम्प्राप्नोति तस्मिन्कर्तव्ये सुत्वन्नासिद्धमित्येवार्थ इत्यभिप्रायेण प्रवृत्तम् टादेश इत्यस्य टाया आदेशष्टायाम्त्वा य आदेश इत्यर्थः टाशब्दस्याऽजादिगणे पाठाट्टाप् स्वारस्येन आदेशपदोपादानस्वारस्येन एवम्पुंसीति न्यासे गौणेपि षट्त्रिचतुर्भ्य इत्यस्य प्रवृत्तिरिति मतेतु प्रियत्रिणा कुलेनेत्यत्र नाभावस्याप्रवृत्त्या तस्य स्वरस्याप्रवृत्तिः स्यादित्यपि बोध्यम् एतच्च मतं हलन्तप्रकरणे ऽष्टन्शब्दस्य निरूपणावसरे स्फुटम् तदुक्तिः न विभक्ताविति सूत्रे प्राचामुक्तिः इत्संज्ञकत्वस्येति यदुच्चारणार्थानां विनैवेत्संज्ञा निवृत्तिः स्यात्तदा येषाङ्कार्यार्थमुपादानन्तेषामपीष्टन्तत्तत्कार्यसम्पादकत्वेन चरितार्थानां स्वभावत एवोच्चारणार्थकस्येव निवृत्तिसभवेन तस्य लोप इति सूत्रस्य वैयर्थ्यापत्तिरिति भावः अष्टमुक्तत्वात् अष्टन्ध्वनितत्वादित्यर्थः अग्नावित्यत्र

स्वरितौकारादर्शनतात्पर्यकेण स्वरितत्वादित्यनेनौतस्कारः उच्चारणमात्रफलकः स्वरितत्वप्रयोजकत्वाभावादित्यनुमानन्ध्वनितम् किमोदिति सूत्रविधेयाच्छब्दघटकतकारो व्यतिरेके दृष्टान्त इति तत्र स्वरितत्वादर्शनस्योपायान्तरेणोपपत्तावुच्चारणमात्रफलकत्वकल्पनमन्याय्यमित्याशयेन शङ्कते नन्विति अग्निशब्दात्यवयवेकारस्यानुदात्ततया नात्रैकादेश उदात्तेनेत्यस्य प्राप्तिः किञ्चैकादेश उदात्तेनेति सूत्रे उदात्तस्वरितयोरिति सूत्रादनुदात्तस्येत्यस्यानुवृत्तिदर्शनेन न तत्र सूत्रस्य प्राप्तिरित्याशयेन तदुक्तिन्दूषयति ह्रस्वादित्यादिना अत्र ह्रस्वादित्युक्तिरुपलक्षणम् तस्यादित उदात्तमर्द्धह्रस्वमिति सूत्रस्थभाष्यमपि प्रमाणम् तत्र हि सुब्रह्मण्योमित्यत्र सुब्रह्मणि साधुः सुब्रह्मण्या इति स्वरितान्तः सुब्रह्मण्याशब्दः तत्र साधुरिति यति सुब्रह्मन्शब्दप्रकृतिकयदन्तः सुब्रह्मण्यशब्दस्तस्य टापो ऽनुदात्तस्य चैकादेश आन्तरतम्यात्स्वरित ॐशब्दो निपातत्वादुदात्तस्तस्यैकादेशो ऽप्युक्तरीत्या स्वरित एव तस्य स्थाने न सुब्रह्मण्यायामित्यनेनोदात्त इत्युक्तम् यद्येकादेशेति सूत्रे अनुदात्तस्येत्यस्यानुवृत्तिर्न स्यात्तदा भवदुक्तरीत्या सुब्रह्मण्योमितिप्रयोगघटकस्योकारस्योदात्ततया भाष्यासङ्गतिः स्यादेव एवं सति ह्रस्वादिति नारुचिकङ्किन्तु प्रामाण्यार्थमेवेति बोध्यम् यदुक्तमग्निशब्दस्यानुदात्तत्वन्तदुपपादयति शेषनिघात इति ननु भवदुक्तरीत्याग्निशब्देकारस्यानुदात्ततत्वेपि स्वरिते उदात्तभागस्यापि सत्वेनैकादेश उदात्तेनेत्यनेनाग्नावित्यत्रोदात्तत्वभविष्यतीति स्वरितत्वादर्शनादित्यसङ्गतमत आह स्वरितस्य त्विति ननूच्चारणार्थानामपीत्संज्ञास्वीकारे भवन्मते ऽप्यग्नावित्यत्र स्वरितत्वापत्तिरस्त्येव औतस्कारस्येत्वादित्यत आह उच्चारणार्थानामिति एतेनौतस्कार उच्चारणार्थो नेत्संज्ञक इति ग्रन्थः स्वरितत्वापत्तिपरिहाराभिप्रायको ऽसङ्गत एव स्वरितत्वस्य तत्र प्राप्तेरेवाभावादिति सूचितम् अत एव भाष्ये दिव उदित्यादौ दित्वमाश्रित्य तितिप्रत्ययग्रहणमिति वार्तिकम्प्रत्याख्यातम् स्वरितत्वस्य यत्र यत्रानिष्टत्वं तत्र दित्वस्यैव स्वीकारात् नचैवं तितिप्रत्ययग्रहणमिति। वार्तिकसद्भावे ऽग्नावित्यत्र स्वरितत्वम्प्राप्नोति दित्वपक्षेतु नेति फलभेदे प्रत्याख्यानासङ्गतिरिति वाच्यम् विधानकालिकप्रत्ययत्ववतो ग्रहणमित्यत्र वार्तिकस्य तात्पर्यात्। ननु यदुच्चारणार्थकवर्णविषये ऽपीत्संज्ञा तदा तत्र शास्त्रस्य व्यापारो जात एवेति तादृशकथनासङ्गतिः उच्चारणमेव फलं

नतु तत्र शास्त्रस्य प्रवृत्तिरिति तदर्थादत आह उच्चारणेति वर्णान्तरेति औकारादीत्यर्थः नत्वन्यफलार्थः प्रयोगसम्बन्धिफलान्तरन्तस्य नेत्यर्थः इत्संज्ञालोपश्चेत्येतौ तु न प्रयोगसम्बन्धिनाविति तयोर्न व्यावृत्तिरिति भावः इद्वृद्धौ पत्या वैश्वर्य इत्यादिनिर्देशा अत एव सङ्गच्छन्ते नन्वौतस्कारस्योच्चारणार्थत्व एवोक्ता कल्पना सम्भवति तत्रैव तु किम्मानमत आह अत एव भाष्य इति तदा डित्वपक्षे विंशताविति अर्थपरे विंशतावितिशब्द इत्यर्थः भाष्यप्रामाण्येन प्रत्याख्यानपरभाष्यप्रामाण्येन नच नस्तद्धित इति सूत्रस्थस्य तद्धित इत्यस्य मण्डूकप्लुत्या विंशतेरित्यत्रानुवृत्त्या लोपाभावेनोपपत्तावनभिधानकल्पनमन्याय्यमिति वाच्यम् मण्डूकप्लुतेः सम्बन्धतदभावकल्पनाभ्याङ्कुरुत्वादिति भावः परत्रोपात्तस्य तदपीत्यस्य साकाङ्क्षत्वादाह अस्येति ननु तपरोच्चारणे ऽणुदित्सूत्रादिप्राप्तसवर्णग्रहणस्य व्यावृत्तिरेवान्यत्र दृष्टेति टापा सह दीर्घो माभूदित्यसङ्गतमत आह भिन्नेति भाष्यमानेन सवर्णानां ग्रहणन्नेत्यनेनैव सिद्धे प्रकृतत्वकारोच्चारणमेतादृशार्थतात्पर्यकमिति भावः मूले टाप्तु स्यादेवेति तपरस्याकारस्य विधानेन यथा तस्य श्रवणम्भवति तथैव कल्प्यतां नतु तत्स्वरूपाश्रवणप्रयोजककार्यबाध इति भावः परोक्तङ्खण्डयति नचेति प्रकरणेन अष्टसूत्र्या अनेन टापो ऽपीति अत्रापिशब्दो भिन्नक्रमः अनेनेत्युत्तरं योज्यः यथा तत्र षष्ठ्येव यथास्यान्नतु तन्निवृत्तिप्रयोजकः समास इति कल्पना तथात्राप्यकारनिवृत्तिप्रयोजकष्टाब्न भवतीति कल्पना भविष्यतीति भावः नचात्रापि पत्या वैश्वर्य इत्यादिनिर्देशो मानमिति वाच्यम् सन्निपातपरिभाषयापि तस्योपपत्तिसम्भवात् । प्रकाशकारोक्तिङ्खण्डयितुमुपक्रमते सोर्देत्येवेति तद्भावः प्रकाशकारस्य भावः नन्वगतिकगतित्वेपि क्वचित्तदाश्रयणमस्त्येवेत्यत आह सोर्देतीति लाघवाभावः पदलाघवाभावः सोरिति रेफमादाय मात्रालाघवाभाव इत्यपि बोध्यम् प्रत्युत कल्पनागौरवमित्याह डित्वेति एवञ्च क्लृप्तां रीतिं परित्यज्याक्लृप्तकल्पनायां ज्ञानगौरवं स्यादेव नतु हल्ङ्याब्भ्य इत्यत्र विहितविशेषणत्वाभ्युपगमे ऽपि न मूलोक्ताव्याप्त्यतिव्याप्त्योरवसरः त्यदादीनाम इति सूत्रे विभक्तावित्यस्य विषयसप्तमीत्वाभ्युपगमेन विभत्युत्पत्तेः प्रागेव तस्य प्रवृत्त्या ऽव्याप्तेः परिहारसम्भवात् एवञ्च हलन्ताद्विधाना-

भावेन यः स इत्यादावतिव्याप्तिरपि परिहर्तुं शक्या एवमनङ्विधावपि सावित्यत्र विषयसप्तमीत्वमेवास्त्विति कर्त्तेत्यत्राव्याप्तिरपि परिहर्तुं शक्येत्यत आह चेतीति वक्ष्यमाणरीत्या ऽत्रैकदेशविकृतन्यायस्याप्राप्तिसत्वेन तस्य चेत्यादुक्तमूलासङ्गतिमभ्यर्लोच्याह स्थानिवत्वेति अर्द्धाधिकेति अर्द्धश्चाधिकश्चार्द्धाधिकौ तयोर्विकार इति समासः एवञ्च वर्णगणनायामर्द्धस्य मात्राया गणने तु तदर्द्धस्य विकारसत्वेन जातिव्यञ्जकभूयो ऽवयवसंस्थानाभावेन नात्रैकदेशविकृतान्यायस्य प्रवृत्तिरिति भावः षष्ठ्यन्तताप्रीति हलित्यस्येति शेषः बहुष्विति सुतिसि अपृक्तं हलित्यत्र चेत्यर्थः नात्र दोष इति अतिखट्वः निष्कौशाम्बिरित्यत्र सोर्विधानं यस्मात्तदादेराबन्तत्वङ्यन्तत्वयोरभावेन दोषाभाव इत्यर्थः सच दोषः सोर्लोपस्य प्राप्तिरूपः एवञ्च दीर्घग्रहणस्य कथमेतद्व्यावर्त्यमितिं भावः एतत्सिद्ध्यर्थमिति बहुश्रेयसीत्यस्य सिद्ध्यर्थमित्यर्थः अस्य आवश्यकत्वेनेत्यत्रान्वयः नच मूलविरोधः तत्रात एवेत्यस्योत्तरपदस्य ङ्याबन्तत्वेन ततः परत्वात्प्राप्तस्य सुलोपस्य व्यावृत्त्यर्थमत एवेत्युक्तमित्यर्थः प्रतीयत इति वाच्यम् तत्रत्यस्यात एवेत्यस्य बुद्धिस्थहेतोरित्यर्थात् अत्र प्रत्ययग्रहणपरिभाषयोक्तं विशेष्यमादाय तदन्तविधौ पुनर्येन विधिरिति पारिभाषया शब्दस्वरूपं विशेष्यमादाय तदन्तविधिरिति योजना बोध्या क्वचित्वेवमेव पाठः उक्तमित्यस्य तदादेरित्येतदित्यर्थः अत्र दोषः अतिखट्वः निष्कौषाम्बिरित्यत्र सुलोपस्य प्राप्तिरूपो दोषः सच दीर्घग्रहणेन परिहर्तव्य इति शेषः नन्वेवं सति मालेत्यादौ तदन्तविधिद्वयलभ्यार्थाभावेन सुलोपानापत्तिरत आह मालेत्यादाविति तस्येति तु व्यपदेशिवद्भावानाश्रयणपक्ष इति भावः नच व्यपदेशिवद्भावो ऽप्रातिपदिकेनेति निषेधो भविष्यतीति वाच्यम् तस्य प्रत्ययविधिविषयत्वात् एतच्च ङ्याब्ग्रहणे ऽदीर्घ इति स्थानिवत्सूत्रीयवार्तिकव्याख्यानावसरे निष्कौषाम्बिरतिखट्व इत्यत्र सुलोपापत्तिवारणन्तस्य वार्तिकस्य फलमित्यभिधाय ननु दीर्घादित्युच्यते तन्न वक्तव्यमित्युक्तम्भाष्यकृता तदभिप्रायेण व्याख्यातम् तदन्तविधिद्वयाभावे ऽपि दीर्घग्रहणमावश्यकमित्याशयेनाह श्रविष्ठास्विति श्रविष्ठा ज्येष्ठा तद्धितलुकि श्रविष्ठाफल्गुनीतिसूत्रविहिते लुकि स्त्रीप्रत्ययस्य लुक् लुक् तद्धितलुकीत्यनेन प्रत्ययलक्षणेन स्थानिवद्भावेन दी-

र्घग्रहणे तु न स्थानिवत्त्वमल्विधित्वात् प्रत्ययलक्षणसूत्रन्तु नियमार्थम् मूले गङ्गीयतेः किबिति नच पञ्चमीसमासपक्षे ऽल्लोपस्य स्थानिवद्भावेन कथमत्रातिव्याप्त्यभिधानमिति वाच्यम् तस्यानित्यत्वेन तदप्रवृत्तिरित्याशयेन तदभिधानात् देवदत्तेरिति अत्र देवदत्ते इत्येकारान्तस्य दीर्घङ्यन्तत्वम्पूर्वान्तवद्भावेन बोध्यम् मूले ङी ई आ आबिति ङीरूपो य ईकारः आब्रूपो य आकारस्तदन्तादित्यर्थ इति भावः ननु सूत्रकारमते दोष एव न चेष्टापत्तिः फलभेदे प्रत्याख्यानासम्भवादत आह दीर्घग्रहण इति उपस्थितत्वादिति । ङ्याप्पदेनोपास्थितत्वादित्यर्थः एवञ्च ङ्याप्पदेन यस्येकारस्याकारस्य च प्रथममुपस्थितिस्तादृशो य ईकार आकारो वा तस्यैव प्रत्यासत्त्या ग्रहणमिति देवदत्तेरित्यत्र तादृशस्याभावेन न सूत्रकारमते ऽपि दोष इति भावः एतेन कस्य स्त्री की तस्मादाचारकिबन्ताद्विचि गुणे केरित्यादौ सूत्रकारमते लोपो दुर्वारः एवमतिखट्वस्य अः अतिखट्वा निष्कौशाम्बेरीः निष्कौशाम्बीरित्यत्रापि दीर्घस्य सत्वाल्लोपः स्यादित्यपास्तम् यस्य प्रथममुपस्थितिस्तस्येहाभावात् सूत्रस्थभाष्येति तत्र हि णेर्णिच्युपसङ्ख्यानमिति वार्तिकमवश्यं वाच्यमन्यथा वादितवन्तम्प्रयोजितवानित्यर्थके ऽवीवदादित्यत्र णिजन्ताण्णिचि लुङि च्लिस्तस्य स्थाने चङि द्वितीयणिलोपस्य चङ्परनिर्द्देसे कर्तव्ये स्थानिवद्भावस्य निषेधे ऽपि तेनैव णिलोपे नाग्लोपित्वान्नाग्लोपीति निषेधः स्यात् एवमुक्ते परत्वाद्वृद्धौ सत्यां णिलोप इति नेहाग्लोप्यङ्गमिति पूर्वपक्षिणा शङ्किते वृद्धेर्लोपो बलीयान् अन्यथा ऽपपटदिति न सिध्यतीति नाग्लोपीतिसूत्रे प्रत्याहारनिर्देशेन ज्ञापकेनोक्तम् यद्यप्यरराजदित्यत्र ह्रस्वत्ववारणायाकारस्यावश्यकत्वन्तथापि प्रत्याहारनिर्देशो ज्ञापक एव एतच्च ज्ञापकमिदुदुपधेभ्यो णिज् नास्तीति कल्पनायामेव सङ्गच्छते अन्यथा स्वामिनमाख्यत् असस्वामत् गोदुहमाख्यत् अजुगोदुहदित्यत्र प्रत्याहारनिर्देशस्य चारितार्थ्येन तस्यासङ्गतिः स्यात् उक्तञ्च तत्रानभिधानङ्कैयटेन अत्र सुरासयतीत्यत्र तद्ग्राथस्य प्रत्याहारनिर्देशस्य ज्ञापकत्वप्रदर्शनपरभाष्यस्येत्यर्थः अप्रामाणिकामिति एवञ्चानभिधानकथनपरः कैयटाश्चिन्त्य इति भावः प्रत्ययाप्रत्ययोरिति परिभाषाया लक्ष्यसाधकत्वेन भाष्यकृता ऽनाश्रयणादाह सावनुनासिकेति एवञ्च साहचर्येण लोपाभावस्य सिद्धौ च पूर्वोक्ताऽन-

भिधानपदसूचितामरुचिन्ध्वनयाति वस्तुत इति चिन्त्यमिति यदि तेषामभिधानं स्यात्तदा ङ्याव्ग्रहणे ऽदीर्घ इति वार्तिकविरोधः स्पष्ट एवेति भावः मूले ऽब्राह्मुरिति वार्तिककृत इत्यस्य शेषः नकारविभक्त्योरिति विशेषोपादानसूचितमर्थम्प्रकटयति एवञ्चेति नकारविभक्त्योरानन्तर्ये सिद्धत्वस्य ज्ञापनेचेत्यर्थः अत्र विभक्तिपदोपादानेन विभक्तेर्यत्र संयोगान्तत्वहेतुको लोपस्तस्यैव सिद्धत्वङ्गोमानित्यत्र तल्लोपस्यासिद्धत्वन्तु भवत्येवेति भावः । ननु गोमानित्यत्र संयोगान्तलोपस्य प्रवृत्तत्वात्पुनः संयोगान्तलोपो लक्ष्ये लक्षणस्येति न्यायेन न भविष्यतीत्येवमभिधानमफलमत आह गोमानिति संयोगान्तपदत्वावच्छिन्नस्योद्देश्यत्वात् एवञ्चोद्देश्यतावच्छेदकाश्रयभेदाद्भवत्येव तस्य प्रवृत्तिरित्याशयात् मूले यत्त्वाहुरिति प्रकाशकृत इति शेषः तत्र हेब्रह्मन्नित्यत्र लुगित्यनेन संयोगान्तलोपस्याभावेनासिद्धत्वशङ्काया अभावः सूचितः ङिसम्बुद्ध्योरिति तु षष्ठीति तद्भावः सप्तमीति अयमेव पक्षो युक्तः यतो ऽस्मिन् पक्षे निषेधसामर्थ्यान्नलुमतेतिनिषेधस्य वैकल्पिकस्य प्रवृत्तिरिति वा नपुंसकानामित्यस्यापूर्वत्वाभावः सिध्यतीति लाघवम्भवति अत एव षष्ठ्यन्तत्वपक्षेपीत्यपिशब्द उपात्तः यन्मूले आवश्यकतयेत्यभिहितन्तत्तु षष्ठीपक्ष एवेत्याशयेनाह ङिसम्बुद्ध्योरिति अस्मिन्पक्षे निषेधसामर्थ्यकल्पनन्न कार्यमित्येतल्लाघवं यद्यपि भवति तथापि वचनान्तरानारम्भकृतं लाघवं सप्तमीपक्षे ऽस्तीति भावः षष्ठीपक्षे शङ्कते यद्यपीति सम्बुद्धिग्रहणञ्चेति अत्र ङिपदस्यानुपादानं भाष्यकारीयतत्प्रत्याख्यानाभिप्रायेण अत एव वा नपुंसकानामित्येतद्वचनोदाहरणप्रदर्शनसमये हेचर्मेति सम्बुद्धावेवोदाहृतम् एकदेशे स्वरितत्वप्रतिज्ञया च तावन्मात्रस्य तत्र सम्बन्धः तदर्थम् तत्र सम्बन्धार्थम् अत्र पाठेन नङीतिसूत्रे पाठेन अन्यथा वार्तिक एव तथा पठितं स्यादिति ज्ञापकताचेह किञ्चिन्न्यूनो इति न्यायेन एवञ्चान्यफलसिध्यर्थमावश्यकं सम्बुद्धिग्रहणमिति हेराजान्नित्यस्य सिद्धिः संबुद्धिपदमपि प्रत्याख्यातमिति परोक्तं खण्डयति सम्बुद्धिग्रहणमित्यादिना सूत्रस्थङिग्रहणस्येति ङौ भसंज्ञासत्वादेव न नलोपः अल्लोपस्तु न उभयसंज्ञान्यपीतिवचनात् वार्तिकस्थेति हेराजन्सुन्दरो ऽसीत्यत्रासामर्थ्यात्समासाप्राप्तेरत एव ङावुत्तरपदे प्रतिषेध इत्येव वाच्यमिति भाष्ये स्पष्टम् मूले तस्मादिति उक्तज्ञापकस्य

सुस्थत्वादित्यर्थः न प्रयोजनमिति हल्ङ्याबिति सूत्रारभ्यस्येति शेषः इह तर्हीत्यत्र यदिहेति तदर्थं स्पष्टप्रतिपत्तये आह अभिनइति व्याख्यानादिति भाष्योक्तिदर्शनमूलकव्याख्यानादित्यर्थः तमेव व्याख्यानमूलमाह अस्मिन्नेवेति इह ङ्याब्ग्रहणं सोरेव विशेषणमित्यत्र । ननु तस्माद्ग्राह्यात्कथञ्चवदुक्तार्थलाभ इत्यत आह यदीत्यादि तद्ग्राह्यमिति तथाच संयोगान्तलोपस्य ङ्याबन्तविषये ऽसम्भवेन ङ्याब्ग्रहणं सोरेव विशेषणमिति स्पष्टमेव संयोगान्तलोपोपक्रमेण भाष्यकारीयोक्तिर्व्याख्यातेत्यस्योरनभिधानाभिप्रायिकेति बोध्यम् अत्र इत्युपक्रम्येतिकथनेनोपक्रमोक्तेः पूर्वपक्ष्युक्तित्वेनापसिद्धान्तत्वेन तद्ग्राह्यमूलकस्यात्रायनिष्कर्ष इति ग्रन्थस्याप्यपसिद्धान्तोक्तित्वबन्ध्वनितम् प्रसादकारोक्तिङ् खण्डयितुमुपक्रमते यत्त्वित्यादि तत्र तन्नेत्यादि तदुक्त्यनुवादः असम्भव इति शपा व्यवधानादित्यादिः एवञ्चैतत्साहचर्यादापो ऽपि सोरेव लोपः एवम् पूर्वान्तवद्भावेनाव्यवधानोपपादने भाष्येति कृन्मेजन्तसूत्रस्थेत्यादि तत्रापि टापि सत्येकादेशे पूर्वान्तवद्भावेन सन्निपातावियातादिति भावः तेन पूर्वान्तवद्भावेन एतच्च सन्निपातावियातायापि पूर्वान्तवद्भावस्य प्रवृत्तिमभ्युपेत्योक्तम् वस्तुतस्तु तत्र कर्तव्ये ऽत्वादिवच्चेति शास्त्रन्न प्रवर्तत इत्याह अशास्त्रीयत्वादिति एतेन लोपस्य शास्त्रीयत्वात्तस्मिन्कर्तव्ये पूर्वान्तवद्भावस्य प्रवृत्तिः स्यादेवेति ध्वनितम् एतावता ग्रन्थेन प्राचीनोक्त्यनुवादमुपपाद्य पूर्वोच्चारिततुशब्दसूचितामरुचिं प्रकटयति अत्रेत्यादिना स्थानिवद्भावो ऽस्तीति तथाचावन्तादप्यसम्भव एव एतेन पञ्चमीसमासानावश्यकत्वाभिप्रायकप्राचीनोक्त्यनुवाद एव मूलकृता कृतो* नतु तत्रैव तात्पर्यमिति यत्पञ्चमीसमासावश्यकत्वेन मूलासङ्गत्यभिधानन्दण्डुयक्तन्त्रिरस्तमिति सूचितम् ननु पञ्चमीसमासस्यानित्यत्वेन तदप्रवृत्तौ निर्वाहो ऽत आह अस्येति अस्य अगङ्गादित्यादेः एतेनानभिधानन्ध्वनितन्तत्र बीजमाह आबन्तेभ्य इति सूत्रभाष्यप्रामाण्यादिति यदुक्तं तदुपपादयति तत्र वार्तिककृतेति इत्युक्तमिति त्कः श्न इत्यादिरूपसिद्धय इत्यादिः एवञ्चाबन्तेभ्य आचारे क्विप्सत्वे आतो धातोरिति न्यासे लोपो भविष्यति । वार्तिककारीयन्यासेतु नेति फलभेदस्य स्पष्टतया तदभिधानमेव नास्तीति दर्शितम् तद्बीजमिति अनभिधानबीजमित्यर्थः तदुक्तदोषान्तरं नास्तीत्याह आचारेति नास्त्ये-

वेति यङ्लुगन्तस्य छान्दसत्वेन छन्दसि दृष्टानुविधानस्य सत्वेन तादृशरूपस्य छन्दसि सत्वे छान्दसत्वेनैव निर्वाहस्यासत्वे तु अनभिधानं स्पष्टमेव किञ्च तस्याभिधाने ऽसिद्धवत्सूत्रस्थभाष्यविरोधो ऽपि भवति तथाहि जहीत्यत्रासिद्धवत्सूत्रस्य प्रयोजनमतो हेरिति लुग्वारणरूपमुक्तं उतश्च प्रत्ययादित्यतः प्रत्ययादित्यस्य सम्बन्धङ् कृत्वा ऽकारान्तात्प्रत्ययात्परस्य हेर्लुगित्यर्थेन जहीति प्रयोजनान्यथासिद्धिरुद्भाविता यद्याचारक्विबन्ताद्यङ्लुक् स्यात्तदा कशब्दादाचारक्विबन्ताद्यङ्लुकि लोटि तस्य ह्यादेशे सूत्रसत्वे लुकः प्राप्तिरत इत्यत्र प्रत्ययादित्यस्य सम्बन्धे तु नेति फलभेदस्य स्पष्टतया ऽन्यथासिद्ध्युद्भावनासङ्गतिः स्पष्टैव । तेन आचारक्विबन्ताद्यङ्लुङ् नास्तीतिकथनेन कस्येति ब्रह्मण इत्यर्थः शब्दादिभ्य इत्यत्रादिपदं स्वादिशब्दसमुच्चायकम् अभ्युपेत्यवादेनाप्याह ईकाररूपत्वेति एतेन तस्याभिधाने दीर्घग्रहणप्रत्याख्यानपरभाष्यविरोधो ऽपि सूचितः दीर्घग्रहणसत्वे दीर्घङ्यन्तत्वस्य सत्वात् मूले द्विहलपृक्तग्रहणन्तिस्योश्च ग्रहणन्न कर्तव्यमिति पक्षमाश्रित्याह अत्रायामिति एतेन पूर्वपक्ष्युक्त्यनुवादो ऽयमिति लब्धम् ङ्याब्भ्यां साहचर्यादिति यद्यपि ङ्यापौ प्रकृतिघटकौ लोपस्तु प्रत्ययस्य चिकीर्षित इति भेदस्तथाप्येकसूत्रोपात्तत्वसत्वादित्युक्तम् पूर्वोक्तभेदस्य स्फुटत्वादाह प्रत्ययेति संयोगान्तस्य लोपे हि नलोपादिर्न सिद्ध्यतीति पूर्वोक्तानुपपत्तिमपि परिहर्तुमाह राजेत्यादाविति पूर्वरूपमिति एतेन रोरुत्वइत्यनेन रुत्वे सिद्धेपि पूर्वरूपे कर्तव्ये ऽसिद्धत्वं स्यादेवेति मूलासङ्गत्यभिधानन्निरस्तम् रोरुत्व इत्येव तत्रोक्तमिति पूर्वरूपे कर्तव्य इत्यस्य कथं लाभ इत्यत आह कृते चेति इति वत्व इति इवर्णान्ताद्रेफान्तात्परस्य मतोर्मस्य वः स्यादित्यर्थकादित्यर्थः हरिवान् गीर्वानित्युदाहरणे रात्तु तेनैव लोपः स्यादित्युक्तदोषमुद्धरति मूले अबिभरिति तकारस्य श्लेषपक्षे सम्भावितदोषम्परिहरति कीर्तयतेरिति ननु संयोगान्तलोपविधायकशास्त्रदृष्ट्या संयोगादिलोपविधायकशास्त्रस्यासिद्धत्वेन नतूखास्रादित्याद्यसङ्गतमिति चेन्न पदान्ते ऽनवकाशेन संयोगादिलोपेनासिद्धत्वाभावस्य ज्ञापनादिति भावः नच यदुक्तम्भवता यङ्लुग्विषये न स्त इत्यादि तेन नामधातुस्थपरममूलेन विरोध इति वाच्यम् तस्य माधवमतानुसारित्वात् । यथेति अत्र यथाशब्दो योग्यतार्थकः अलक्षणमिति छेदः तेन यादृशार्थलाभस्तमाह

अप्रयुक्त इति तत्रैव हेतुमाह प्रयुक्तानामिति एतेनानभिधानत्वस्य ध्वनितम् ननु नलोपात्प्राक् संयोगान्तलोपसिद्धत्वस्योक्तज्ञापकेन कल्पनेनादौ तस्य प्रवृत्तौ राजा इत्यस्य निर्विसर्गस्य सिद्धावपि राजैधत इत्यादिप्रयोगासङ्गतिरेव वृद्धौ संयोगान्तलोपस्यासिद्धत्वादत आह नलोपविषय इति एतेन यत्र लोपस्य प्राप्तिस्तत्र तस्मिन्कर्तव्ये कृते च तस्मिन्नन्यशास्त्रदृष्ट्या ऽप्यसिद्धत्वमेति फलितम् एतेनेति उक्तार्थकल्पनेनेत्यर्थः इत्यादावित्यादिना राजाश्वः राजाइत्यादेः परिग्रहः प्रथमे सवर्णदीर्घस्य द्वितीये नलोपस्य च सिद्धिः एतेषु कर्तव्येषु नलोपस्यासिद्धत्वन्तु न भवति नलोपः सुविधिनियमात् विषयत्वनिवेशस्य फलान्तरमप्याह किञ्चेति तत्र पूर्वस्मिन्निति पूर्वस्थानिके सयोगान्तलोपविधायके शास्त्रे कर्तव्ये इत्यर्थः अन्त्य इति धीमानित्यादावित्यर्थः अदोषादिति सुविषयकसंयोगान्तलोपस्यासिद्धत्वे परस्मिन्सौ तान्तस्य पदत्वमिति संयोगान्तलोपस्य सिद्धेर्दोषाभावादित्यर्थः नचैवं सौ पदत्वमाश्रित्य नलोपो ऽपि स्यादिति वाच्यम् तस्मिन्कर्तव्ये तलोपस्यासिद्धत्वात् एवं पूर्वपरस्थानिभेदेनैकस्य शास्त्रस्य भेदकल्पनमपसिद्धान्त इत्यत आह आरोप इति अचः परस्मिन्निति सूत्रविषये पूर्वपक्षिणा विषयगतपौर्वापर्यारोपेण तथोक्तावपि विप्रतिषेधसूत्रस्य प्रवृत्तावन्यत्राष्टाध्यायीपाठकृतम्परत्वमेव वास्तवन्नियामकमिति स्वीकारादिति भावः अत एव षष्ठीस्वीकारादेव सार्थक इति एतेन ङौ निषेध एव एवोक्तार्थे सामान्यापेक्षज्ञापक इत्यत्र तात्पर्यम्। न दोष इति न ङौ निषेधवैयर्थ्यरूपदोष इत्यर्थः तदपेक्षया निषेधस्यानित्यत्वेन प्रकृते शास्त्रप्रवृत्तिकल्पनापेक्षया स्थितस्य पदस्य षष्ठ्यन्तत्वेन व्याख्याने लाघवमिति भावः मूलोक्तव्याख्याने न्यूनतां परिहर्तुं व्याचष्टे सम्बुद्ध्यन्तेति अत एव हल्पदघटितस्य सूत्रस्य करणादेव अन्यथा हल्पदमकृत्वा संयोगान्तलोपस्यैव स्वीकारे न स्यादिति सुस्थानिकस्य रेफस्य धात्ववयवत्वान्न स्यादित्यर्थः ज्ञापकाभ्यान्निर्वाहशङ्कान्निरस्यति तिप्यनस्तेरित्यादिना अत्र धातोरित्यस्य लाभस्तु अनस्तेरिति पर्युदासात् श्तिपा आक्षेपेण वा भवति नचैवं सति सिपि धातोरिति सूत्रे धातोरिति व्यर्थमिति वाच्यम् दश्चेत्युत्तरार्थत्वात् संयोगान्तलोपापवादस्य संयोगादिलोपस्य प्रवृत्तौ सूत्रद्वयवैयर्थ्यं स्पष्टमेव ननु पदान्तसंयोगादिलोपस्य

तदपवादत्ववद्दत्वरुत्वयोरप्यपवादत्वमस्त्वित्यत आह कसाहचर्येण चेति न किञ्चिल्लाघवमिति एवङ्कल्पनायां ज्ञानकृतगौरवस्यानुमानिकवचनकल्पनाप्रयुक्तगौरवस्यच स्फुटत्वादिति भावः न ङिसम्बुद्ध्योरित्यस्य षष्ठ्यन्तत्वमवलम्ब्य कृतं व्याख्यानमभ्युपेत्य न्यासं समर्थयति किञ्चेत्यादिना इति वार्तिकमिति एतेन तस्यापूर्वत्वाल्लाघवमिति ध्वनितम् एवञ्च उक्तवार्तिकस्योक्तरीत्या ऽपूर्वत्वाभावेच अपूर्ववचनकरणेनेति वा नपुंसकानामिति वचनस्यापूर्वस्य करणेनेत्यर्थः इदमेव नलोपदीर्घाद्यसाधनमेव मूलसम्मतन्यासे न्यूनतापरिहाराय व्याचष्टे इति सूत्रमित्यादिना । अत एव अपृक्तपदाघटितस्य सर्वस्य कृतत्वादेव अबिभाराज्यमिति तिप्सिपोरूपम् दीर्घसिद्धिरिति अन्यथा तस्मिन्कर्तव्ये संयोगान्तलोपस्यासिद्धत्वादीर्घो न स्यात् एतेनाबिभाराज्यमित्याद्यसिद्ध्या मौलान्त्यनिष्कर्षो ऽयुक्त इति परोक्तमपास्तम् ननु दूलोप इति सूत्रव्याख्यानावसरे शब्देन्दुशेखरे ऽजर्घा इत्यादौ सिपि धातोरुर्वेति रुत्वस्य लीढ इत्यादौ ढत्वादीनाम्पितूराज्यमित्यादौ संयोगान्तलोपस्यासिद्धत्वात्कथन्दीर्घ इत्याशङ्क्य प्रकृतसूत्रे ढग्रहणेन लणसूत्रभाष्ये ऽजर्घा इति भाष्योदाहरणेन च तत्तच्छास्त्रैकवाक्यतापन्नपूर्वत्रासिद्धमिति सूत्रस्थपूर्वग्रहणेनैतत्सूत्राग्रहणबोधनादित्युक्तन्तेनैव समाधानेनाबिभाराज्यमित्यस्य सिद्धाविहैतस्य सिद्ध्यर्थं यदिति सूत्रमित्यादिनोक्तन्निष्फलमिति चेन्न प्रकृतसूत्रभाष्ये उखास्रत् पर्णध्वदित्यस्य प्रकृतसूत्रे पञ्चम्यन्तहल्ग्रहणासत्वे संयोगान्तलोपापवादसंयोगादिलोपे कृते ऽसिद्धिरित्याशङ्क्य संयोगादिलोपात्प्राक् दत्वस्य सावपि पदामिति पक्षमाश्रित्य वस्त्रादिषु दत्वं सिद्धमिति वार्तिकोपष्टम्भेनच प्रवृत्तिरित्युक्त्वा यदि सावपि पदभवति राजा तक्षेत्यत्र संयोगान्तलोपस्यासिद्धत्वान्नलोपे कृते ऽसिद्धिर्विभक्तेः श्रवणात्प्राप्नोतीत्यभिधाय सूत्रशेषे तस्मादशक्यो हलपृक्तलोपः संयोगान्तलोपो विज्ञातुम् नचेद्विज्ञायते द्विहलपृक्तग्रहणन्तिस्योश्च ग्रहणङ् कर्तव्यमित्युक्तन्तदभिप्रायेणेह भाष्यकारोक्तिम्मनसि निधाय पाणिनीयन्यासेनैवाबिभाराज्यमित्यस्य सिद्धिरित्युपलक्षणमित्यादिना दर्शिता वस्तुतस्तु कृतेपि द्विहल्ग्रहणे तिस्योश्च ग्रहणे पितूराज्यमित्यादेः संयोगान्तलोपस्यासिद्धत्वादसिद्धिरेवेत्याशयेनाजर्घेतिभाष्यकारीयप्रयोगोपष्टम्भेन दूलोप इति सूत्रस्याग्रहणन्तत्र तत्तत्सूत्रैकवाक्य-

तापूर्वग्रहणेन प्रतिपादितमेतदेवाहेति दिगिति प्राचोक्तव्याख्याने न्यूनता-
म्परिहर्तुमाह हलन्तादित्येतादिति मूले सविशेषणानामिति एवञ्च प्राचा-
मनुरोधेनोक्तम् एतेनास्य वचनस्यैकार्थीभावलक्षणसामर्थ्यानाश्रयणपक्ष एव
सत्वेनैतद्वचनेन प्राचोक्तव्याख्यानासङ्गतिप्रदर्शनमनुचितमित्यपास्तम् कार्य
इति सावित्यनेन सामानाधिकरण्यासिद्धय इत्यादिः क्लृप्तत्वादिति यथा
इतोदितिसूत्रस्थसर्वनामस्थानशब्दाद्या सप्तमी सा पूर्वत्र चरितार्था तस्या
विपरिणामेन गोतो णिदितिसूत्रे णिदित्यनेन सामानाधिकरण्याय प्रथमा
कल्प्यते तथेहासंबुद्धिरिति प्रथमायाः कृतार्थाया उत्तरत्रानङ् सावित्यत्र
सप्तम्या विपरिणामः कार्य इति भावः न तन्निवृत्तिः न सर्वनामस्थान
इत्यस्य निवृत्तिः अभिमान इति अत्रारुचिबीजन्तु यद्यसम्बुद्धिरिति पठ्येत
तदा भिन्नविभक्तिकत्वाण्णलुत्तमो वेत्यनेन विच्छेदाच्च सर्वनामस्थान इ-
त्यस्य निवृत्तिः स्यादिति यथान्यासमेवोचितमिति मूले पर्युदस्यमानेति
संज्ञिविशेषणभेदप्रतियोगिबोधकेत्यर्थः यदि तदन्तविधिस्तदा सखिशब्दा-
न्तभिन्नमित्यर्थः इति तु सखिशब्दस्य घिसंज्ञा न भविष्यतीति भावः ननु
शब्दस्वरूपस्य विशेष्यत्वमस्त्वित्यत आह शब्दस्वरूपमिति अव्यावर्तकम्
सार्वत्रिकम् ननु कार्यकालपक्षे घिसंज्ञाशास्त्रस्य विधिप्रदेशे उपस्थितावङ्ग-
स्येति विशेष्यबोधकभविष्यतीत्यत आह किञ्च सत्यपीति इत्येव स्या-
दिति प्रतियोगिबोधकस्य सखिशब्दस्य तदन्तबोधकतया एवमेव स्यादि-
त्यर्थः आपन्नस्येति सखिशब्दस्येति शेषः अन्यत्र अङ्गे एवञ्च यदि स-
खिभिन्नान्तस्याङ्गस्येत्यर्थस्तदा केवले सखिशब्दे ऽतिप्रसङ्गो ऽस्त्येव सखि-
भिन्नेकारान्तत्वादिति पर्युदासस्य वैयर्थ्यमेव स्यादिति भावः भाष्यवि-
रोधाय मूलस्य तात्पर्यार्थमाह एवञ्चेति मूलोक्तहेतुना तदभिमतार्थस्य
साधने चेत्यर्थः इदं सर्वमिति समुदायस्येत्यादिना परममूलोक्तन्नचेत्या-
दिना मूलोक्तमित्यर्थः वस्तुतस्तु सखिशब्दस्य तदवयवलक्षणया सखि-
शब्दावयवभिन्नयोरिदुतोरित्येवार्थः यथा ऽत्वसन्तस्येतिसूत्रे धातुशब्दस्य
तदवयवे लक्षणा भवति अत एव पिण्डग्रइत्यत्र न दीर्घः एवञ्च सुस-
खिशब्दावयवस्यापि न घिसंज्ञा सखिशब्दस्य तदवयवलक्षणायाम्मान-
न्तु यस्येतिचेतिसूत्रस्थभाष्यमेव तत्रहि इवर्णस्य ईति किमुदाहरणम् अति-
सखेरागच्छतीत्युक्तम् अत्र सख्यशिश्वीति स्त्रीप्रत्यये सखिशब्दान्तस्य लो-

षेन निवृत्तौ श्रूयमाण इकारो न सखिशब्दावयव इति घिसंज्ञायाङ् घेर्ङि-तीतिगुणः सिद्धो भवति लोपाभावेतु सवर्णदीर्घे ऽल्त्वबद्भावेनासखिश-ब्दावयव एवेति घिसंज्ञा न स्यादिति तात्पर्यम् यदि परममूलसम्मत ए-वार्थः स्यात्तदा ऽतिसखिशब्दभिन्नतया सवर्णदीर्घे ऽप्यतिसखेरित्यस्य सिद्धौ भाष्योक्तलोपोदाहरणप्रदर्शनासङ्गतिः स्यात् नच लोपे ऽपि लिङ्ग-विशिष्टपरिभाषया दोषः तस्या अनित्यत्वात् ननु द्वितीयतृतीयेतिसूत्रस्थ-प्रयोगे सोमेति सम्बोधनान्तम्पृथक् पदमिति भ्रमः स्यादत आह तत्पु-रुषेति उभयमिति तत्पुरुषो बहुव्रीहिश्चेत्येतदुभयमित्यर्थः सोमसखेति ब-हुव्रीहिः कप्प्रत्ययस्तु वैकल्पिकत्वान्न कृतः अन्त्ये तत्पुरुषे ननु संख्या-त्वस्य नियतविषयपरिच्छेदकत्वरूपतया बहुगणयोस्तथात्वविरहेण सङ्ख्या-वाचक इत्यनुपपन्नमत आह व्यादीति व्यादिसङ्ख्या व्याप्या यस्य धर्मस्य तद्वाचक इत्यर्थः अत एव बहुत्वस्य निरूक्तसंङ्ख्यात्वविरहादेव नियते-त्यस्य नियत इतरव्यावृत्तो यो विषयपरिच्छेदस्तस्य हेतुत्वेत्यर्थः ननु यदि बहुगणौ न तथा तर्हि वक्ष्यमाणान्वर्थसंज्ञाप्रदर्शनविरोधो ऽत आह सा-क्षादिति साक्षान्नियतविषयपरिच्छेदहेतुत्वमेकादिशब्दानां प्रसिद्धमेव ननु कतिशब्दस्य संख्यानकरणीभूतार्थविषयकप्रश्नार्थकतया न साक्षात्परम्प-रया वा तथात्वमित्यत एवेत्यनुपपन्नमत आह बहुगणेति ननु षट्शब्दस्य नित्यबहुवचनान्ततया बहुवचनानिर्देश इत्याद्यनुपपन्नमत आह अन्यथेति अर्थपरस्य बहुवचनान्तत्वे ऽपि स्वस्वरूपपरस्यैकवचनान्तत्वमपि सर्वनाम्न इ-तिवत्सम्भाव्यते इति भावः अर्थप्राधान्येति मूलाद्बहुवचननिर्देशसामर्थ्यादिह नार्थविशिष्टः शब्दः संज्ञा किन्तु शब्दविशिष्टार्थ इत्यर्थः प्रतीयते स चा-युक्तः पंचका इत्यत्र लुगापत्तेरत आह षट्शब्देनेत्यादि अयम्भावः सूत्रे षड्भ्य इत्यत्र तत्रेण निर्देशः एकः षट्शब्द शब्दयुक्तार्थपरः अपरो ऽर्थयुक्तशब्दपरश्चेति शब्दादर्थाच्च परत्वं विवक्षितम् उभयमपीत्यपिशब्देन समुदायस्य निमित्तत्वमिह विवक्षितन्नतु प्रत्येकम् पंचका इत्यस्यान्त्येन प्रियपञ्चान इत्यादेराद्येन निरासः तत्रनिर्देशे ऽपि न द्विवचनानिर्देश इत्यत्र बीजमाह तेषामिति ननु प्रत्ययस्यार्थात्परत्वं कथमत आह तत्रार्थादिति तेन आद्येन प्राचां प्रकाशकृताम् तर्हि यत्र षट्संज्ञकानामर्थः प्रधानं तत्र षडर्थ-गतसङ्ख्याभिधायिनोर्जस्शसोर्लुगित्युक्तम् यदुक्तम्माचामिति तद्बीजमाह ॥

षड्भ्य इति तिसृभ्य इतिवादिति तत्र यथा प्रयोगभेदेन शब्दबाहुल्याद्बहुवचनन्तद्वदित्यर्थः अर्थगतं बहुत्वं शब्दे आरोप्य बहुवचनन्तिसृभ्य इति तु मनोरमायामुक्तम् षट्संज्ञकानामिति एवञ्च वचनं युक्तमेवेति भावः। ननु सर्वनाम्न इतिवज्जातिनिर्देश एवास्त्वित्यत आह नहीति विनिगमकाभावात् यदि सर्वत्र जातिनिर्देश एव तदोदात्तादनुदात्तस्येत्यादावपि तथात्वस्य सत्वे ऽनुदात्तसामान्यस्य स्वरितापत्तिः स्यात् संज्ञास्वरूपनिर्देशे एकवचनेनैव निर्देश इत्यपिना ऽचार्यशैलीत्याह आचार्येति सर्वनामानीत्यत्र व्यभिचारात् ननु टिद्गुभादिवदेकवचनान्तस्य संज्ञात्वेन विनियोगे कर्तव्ये बहुवचनान्तस्य करणमर्थविशेषस्य साधकत्वमित्यतीत्यत आह षष्शब्दस्येति अत्र षप्इति पृथक्पप्शब्दे नो ऽसमस्तम् अनुकार्यानुकरणयोरभेदविवक्षया निर्दिष्टमतो जश्त्वन्न अत्र चकारो ऽनुक्तस्यापि समुच्चयार्थः परशब्दस्य भवदुक्तार्थकत्वे प्रमाणाभावात् षट्संज्ञकस्य स्वार्थगतसङ्ख्याभिधायित्वसम्बन्धेन विभक्तावन्वयस्य दुरुपपादत्वाच्चेति कथन्तर्हि गौणव्यावृत्तिरत आह तस्मादिति परमपञ्चेत्यत्राव्याप्तिं वारयति परमेत्यादिना अपिः केवलसमुच्चायकः जनकत्वेनेति तृतीया तु यदि बोधजनकत्वमेव शक्तिरिति मतन्तदा ऽभेदे यदि शक्तिस्ततो भिन्ना तदा हेतौ नतु लोके ऽस्य गणनायामप्रसिद्धत्वात्कथङ् ग्रहणमत आह लोक इति पञ्चका इत्यादौ तु षट्त्वस्यैवाभावः स्यादृञ्चेदमिति तत्र हि उपसर्जनाप्रतिषेधखण्डनायाङ्गाधिकारे यदुच्यते गृह्यमाणविभक्तेस्तद्भवति यद्येवम्परमपञ्चेत्यत्र ल्युङ्न प्राप्नोति नैष दोषः षट्प्रधान एव समास इत्युक्तम् अस्माद्धात्वान्मदुक्तार्थस्य लाभः स्यादृ इत्याशयेनाह तत्त्वमिति नन्वतृणेडित्यत्रेमागमस्य हलादौ विधानेनालिधित्वात्कथं सिद्धिरत आह तृणह इतीति अचि नेत्यनुवृत्त्या नाभ्यस्तस्याचीति सूत्रादचीत्यस्य नेत्यस्य चानुवृत्त्या आशीरित्यस्याशासः क्वार्विति वचनेन सिद्धिम्मनसि निधायाह शास इदिति इदं सामान्यसूत्रम् अङिति तु नियमार्थमित्याह अजादाविति अजादिव्यावृत्तौ आशासातइत्यादिव्यावृत्तौ अन्यत्रापीति आर्द्रे चर्मन्नित्यत्र स्यानिवद्भावेन ङिपरत्वान्नङीति नलोपाभावस्य सिद्धिरित्यर्थः प्रत्ययलोप इति सूत्रस्य नियमार्थत्वे ऽपि नियमस्यैवंरूपत्वे मानमाह इदमिति प्रथमम्प्रत्ययग्रहणन्तु प्रत्ययपर्याप्त्यधिकरणलोपे यथा स्यादवयवलोपे

माभूदित्यर्थन्तेनाघ्नीतेत्यत्र नानुनासिकलोपः यदि पूर्वसूत्रस्थ प्रत्ययपदस्यानुवृत्त्या तस्य लाभ इत्युच्यते तदा तन्न कर्तव्यमिति भाष्ये स्पष्टम् इदमेव प्रत्ययपदमवयवे ऽपि प्रत्ययव्यवहारे ज्ञापकन्तनादेशप्रत्ययययोरित्यत्र न षष्ठीभेदकल्पना कार्या द्वितीयप्रत्ययपदाभावेतु लक्षणमित्येव वाच्यम् करणसाधनेनानेन प्रत्यासत्त्या प्रत्ययनिमित्तकककार्यस्य प्राप्तिर्भविष्यतीति भावः स्थानिवत्पदानुवृत्त्यैव सिद्धे इति तु नोक्तन्तादृशकल्पनायान्द्वितीयस्य प्रत्ययपदस्य वैयर्थ्यमेवेत्यस्य ध्वननायेति बोध्यम् प्रत्ययासाधारणमित्यस्य प्रत्ययमात्रवृत्तीत्यर्थः प्रत्ययत्वतद्व्याप्यान्यतरधर्मपुरस्कारेण यत्र प्रत्ययस्याश्रयणन्तत्रेति स्पष्टो ऽर्थः अन्योक्तनियमस्वरूपन्निरस्यति यत्र प्रत्ययस्येति पदत्वानापत्तेरिति अत्र पदसंज्ञारूपकार्यत्वदत्वस्येति स्पष्टमेव स्थानिवत्त्वेनासत्त्वे ऽपीति अत्र स्थानिवद्भावेन लुको ऽस्त्वमेवातिदिश्यते तस्य स्वरूपमितिशास्त्राच्छास्त्रीयत्वात् तदन्तत्वं त्वर्थसमाजग्रस्तमिति बोध्यम् तदनित्यत्वस्य साहचर्यपरिभाषाया अनित्यत्वस्येत्यर्थः अपिना पर्युदासानित्यत्वस्य समुच्चायकः अनेन सूत्रेण एतेन सोर्मनसी अलोमोषसीत्यत्र पर्युदासेन श्रूयमाणासत्त्वस्यैव ग्रहणमिति न सुदृषत्प्रासाद इत्यत्र स्वरस्य प्राप्तिरिति नियमो व्यर्थ एवेति निरस्तम् एतावता प्रबन्धेन भाष्यसंमतनियमार्थत्वपक्षसामर्थ्यवार्तिककारसंमतं प्रत्ययलक्षणसूत्रस्य विध्यर्थत्वपक्षमुपपादयति मूले यद्वेति ननु यत्र प्रत्ययस्य निमित्तत्वेनाश्रयणं तत्र कार्यिविशेषणत्वं तस्मिन्निति परिभाषयेति स्पष्टमेवेति तृणह इति सूत्रे प्रत्ययस्य कथम्प्राधान्यमत आह तत्वञ्चेति प्राधान्यञ्चेत्यर्थः वर्णविशेषणत्वम् वर्णनिष्ठविशेष्यतानिरूपितविशेषणत्वाभाव इत्यर्थः । एतल्लाभसाधनमाह एतच्चेति नच द्वितीयं प्रत्ययग्रहणङ्किमर्थमित्येव भाष्यकृतोक्तन्नतु प्रत्ययलक्षणग्रहणङ्किमर्थमित्युक्तमिति भवदुक्तकल्पनायाः कथम्भाष्यालाभ इति वाच्यम् बहुव्रीहिसमासेनोक्तार्थलाभात् वार्तिककारमते फलान्तरमप्याह मित्रशीरिति इत्वमिति शास इदित्त्वनेनेत्यर्थः ननु यत्र वर्णस्यान्यनिष्ठविशेष्यतानिरूपितविशेषणत्वाभावरूपप्राधान्यं तत्रैव चेत्प्रत्ययलक्षणस्य प्रतिषेधस्तदा चित्रायाञ्जाता चित्रेत्यत्राण् यो ऽकारस्तदन्तादिति व्याख्यानेनाकारस्य प्रातिपदिकविशेषणतया न निरुक्तं प्राधान्यमिति प्रत्ययलक्षणप्रतिषेधो न स्यादत आह वर्णस्य तात्त्वं चेति क्रमेण द्विविधप्राधान्यस्योदाहरणमाह अण् य इत्यादिना

इत्यादौ चेति अस्तीति शेषः तत्र तयोर्मध्ये ननु इको यणचीत्यस्य गवेहितमिति नोदाहरणमिति तेनेत्यनुपपन्नमिति चेन्न तस्योपलक्षणत्वात् तेन हरिहितमित्यादिस्थले यणादि नेति बोध्यम् चित्रायाञ्जातेति नक्षत्रेण युक्तः काल इत्यणो लुबविशेष इति लुपि युक्तवद्भावात्स्त्रीत्वं ततो जातार्थे सन्धिवेलेति सूत्रेणाण् तस्य चित्रारेवतीति वार्त्तिकेन लुक् लुक् तद्धितलुकीति टापो लुक् नच जातार्थकप्रत्ययान्तात्पुनष्टाप् प्रत्ययो लक्ष्ये लक्षणस्येति न्यायेन दुर्लभ इति वाच्यम् पूर्वकालजातस्य टापो नक्षत्रगतस्त्रीत्वद्योतकत्वे ऽपि जातार्थगतस्त्रीत्वद्योतकतया पुनस्तदुत्पत्तौ बाधकाभावात् तत्रान्यविवक्षया वैयर्थ्यमाशङ्क्य निराचष्टे नचेति निषेध इति तथाच यणादेः प्राप्तिर्न भविष्यतीति भावः समाधत्ते लुप्तेति निमित्तान्तो बहुव्रीहिः अङ्गत्वस्य विशेषणमेतत् तथाचाङ्गशब्दो ऽत्र संज्ञास्वरूपबोधकशब्दप्रकृतिक अर्शआद्यजन्तो बोध्यः अत एव उक्तार्थकल्पनादेव यणादेर्वर्णोद्देश्यकत्वन्नत्वङ्गोद्देश्यकत्वमिति स्पष्टमेव क्रमः परस्मैपदेष्वित्यस्याङ्गाधिकारीयत्वे ऽपि यथा दीर्घस्य न लुप्तप्रत्ययनिमित्ताङ्गोद्देश्यकत्वं तथोपपादयति परस्मैपदेति ष्ठिवुक्लम्बित्यतः शितीति तत्र वर्तते अत एव निश्चमर्तुर्निश्चपुरित्यत्र न दीर्घः। वार्तिकमते ऽप्याह तस्मिन्निति प्रकृत्युद्देश्यकेति प्रत्ययेनाक्षेपः प्रकृतेर्भवतीत्यभिप्रायेण ननु भाष्यकारेण विधिपक्षं दूषयित्वा नियमार्थत्वं स्थापितमिति मूलकारस्यापि तदुपपादनमेवादौ कर्त्तुमुचितन्तथा तु न कृतं किन्तु वैपरीत्येन कृतमित्यत्र किम्बीजमिति चेन्न भाष्यकृता प्रयोजनान्यथासिद्धिमदर्श्य विधिपक्षो दूषितो नतु दोषेणेति नियमाद्विधेर्लघुत्वं ध्वनयितुम्मूले वैपरीत्येनाभिधानात् वस्तुतस्तु यथोत्तरम्मुनीनामामाण्यन्नियमपक्ष एवोचित इत्याशयेनाह यद्वेत्यादीति यदुक्तम्मायेणेति तस्य प्रयोजनमाह विभक्तीति कस्याश्चित् कस्यचित् किञ्चित् रात्रौ सायम् चामित्यादेरित्यर्थः एवञ्च परमम्मूले लिङ्गत्रययोगे ऽपि सारूप्यप्रतिपादनपरन्तु लिङ्गाभावप्रदर्शनपरम् तथासत्यलिङ्गा इत्येव वदेत् वक्ष्यमाणरीत्या युष्मदस्मच्छब्दयोर्लिङ्गबोधकत्वमेव न षट्स्वस्रादिभ्य इति ज्ञापकाच्च षट्सञ्ज्ञकानामपि तत्त्वमस्त्येव त्रिषु सारूप्यञ्च लिङ्गबोधकप्रत्ययानुत्पत्त्या अलिङ्गे युष्मदस्मदी इति भाष्यस्य त्वयमर्थः पदान्तरसमभिव्याहारं विना तन्मात्रालिङ्गविशेषस्य न प्रतीतिरिति अव्ययन्त्वेतादृशं

न तस्य लिङ्गप्रतिपादकत्वसाधकानुपलम्भात् नचाव्ययादाप्सुप इति ज्ञापकस्य सूत्रस्य सदृशं त्रिषु लिङ्गेष्वित्यस्य चाव्ययानामपि लिङ्गप्रतिपादकत्वसाधकन्दृश्यत एवेति वाच्यम् अव्ययादाप्सुप इति सूत्रस्थाप्ग्रहणस्य प्रत्याख्यानात् सदृशमित्यादेरपि लिङ्गसङ्ख्याकारकाभावपरत्वस्य वक्ष्यमाणत्वाच्च ननु बहुवचनस्यार्थप्राधान्यबोधकत्वम्भाङ् निरस्तमिति तेन विरोधो ऽत आह बहुवचनस्येति तद्बोधकाभावात् तद्बोधकस्य विहितविशेषणस्याभावात् ननु गौणमुख्यन्यायेनैव तस्य गौणत्वे ऽप्रवृत्तिरित्यस्य लाभो भविष्यतीत्यत आह गौणमुख्येति इदञ्च न्यायस्य प्राप्तिमभ्युपेत्य वस्तुतस्तु सैव नेत्याह किञ्चेति वाशब्दः समुच्चये तथा गौणलाक्षणिकः तादृशस्यैव गौणत्वस्य परिभाषाघटकत्वादेवोपसर्जनप्रतिषेधो वार्तिककृता कृतः अत एव तादृशस्यैव गौणत्वस्य परिभाषाघटकत्वादेव । नन्वेवंसति गौणत्वे ऽपीति मूलविरोधो ऽत आह उपसर्जनेति मूले ऽन्य एवेति इञ्प्रत्ययान्ताकारप्रत्ययान्तयोर्भेदस्य स्पष्टत्वादिति भावः भ्रमनिवृत्त्यर्थमिति प्रत्ययविशेषोल्लेखाभिधानेन विशेषदर्शनस्य प्रतिपादनात्तादृशभ्रमनिवृत्त्यर्थमित्यर्थः ननु माधातोः क्विपि ईत्वमवकारादाविति वार्तिकादीत्वन्दुर्लभम् ङित्साहचर्यात्किदपि श्रूयमाण एव निमित्तत्वेन गृह्यते ऽत एव शंस्था इत्यत्रेत्वन्नेति केचित् तन्न युक्तमित्याशयेनाह मूले एतच्चेति ईत्वमवकारादाविति वार्तिकविरोधम्परिहरति ग्रुमेति वस्तुतस्तु ईत्वमवकारादाविति वार्तिकस्य पावान इत्यादेर्वनिपा साधनेन तत्प्रत्याख्यानपरभाष्यस्य च फलैक्याय प्वादिधातुभ्यः क्विपो ऽनभिधानमेव युक्तमित्याह तत इति प्वादिभ्य इत्यर्थः नन्वसिद्धवदत्राभादिति यणादेशे कर्तव्ये इत्वस्यासिद्धत्वम्प्राप्नोतीत्यत आह नचेति व्याश्रयत्वादिति ननूभयोरप्यङ्गसम्बन्धित्वमिति कथं व्याश्रयत्वमिति चेन्न प्रत्यासत्त्येकनिमित्ताङ्गसंज्ञासंबन्धित्वमेवोभयोस्तत्र व्याश्रयत्वाभाव इह तु न तथेत्याशयात् अत एव विगणय्येत्यादावयादेशे कर्तव्ये ऽतो लोपो नासिद्ध इति भाष्यं सङ्गच्छते ननु समासान्तविधौ लिङ्गविशिष्टपरिभाषाया अप्रवृत्त्या बहुश्रेयसीत्यत्र ईयसन्तोत्तरपदकत्वाभावेन कथं तेन न कबित्युक्तमत आह समासान्तेति अस्य ईयसश्चेत्यस्य तन्निषेधकत्वेन समासान्तनिषेधकत्वेन एवञ्च समासान्तकर्मकविधितात्पर्यकत्व एव भाष्यस्य प्रवृत्तिरिति तात्पर्यम् ईयसश्चेत्यत्र ब-

हुव्रीहिपदानुवृत्त्या इयसन्तोत्तरपदकस्य लाभे लिङ्गविशिष्टपरिभाषया ईयस्ग्रहणेनेयसीशब्दस्यापि ग्रहणे न निषेधस्य प्राप्तिः ईयसश्चेत्यस्योभयनिषेधकत्वे साधकमाह गोस्त्रियोरितीति यूस्त्र्याख्यावित्यनेन ईदूदन्तयोर्नदीसंज्ञा भवतीत्याशयेन सूत्रम्परममूले व्याख्यातमीदूदन्ताविति वर्णयोरेव संज्ञेति पक्षाभिप्रायेणाह मूले इह वर्णयोरेवेति तयोः इदूतोः स्त्र्याख्यपदस्य स्त्रियमाचक्षाते स्त्र्याख्यौ तयोः स्त्रीत्वद्योतकत्वमते ऽपि सिद्धान्तिसम्मते द्योतनया स्त्र्याख्यत्वं बोध्यम् स्वत इति स्त्रियामित्यधिकृत्य विधानात् क्वचित् श्रीभ्रूशब्दादौ शक्तीति स्त्रीत्वनिरूपिता या शक्तिस्तत्पर्याप्त्यधिकरणत्वस्येत्यर्थः। तेन पर्य्याप्त्यधिकरणत्वानिवेशेन नच ङीवादेर्द्योतकत्वमते तत्र शक्तिर्नास्त्येवेति शक्तीत्यसङ्गतमिति वाच्यम् बोधजनकत्वस्यैव शक्तिरूपतया लक्षणाव्यञ्जनयोरप्यत्रैवान्तर्भावात् तदन्तसंज्ञापक्षे ईदूदन्तयोर्नदीसंज्ञापक्षे नचायम्पक्षो निर्मूल इति शङ्क्यम् उत्तरसूत्रे ऽस्त्रीतिसामानाधिकरण्येन निर्देशस्यैव मूलत्वात् नन्वस्मिन्पक्षे ह्रस्वनद्याप इति सूत्रव्याख्यानावसरे यदुक्तन्नद्यन्तादिति तद्विरोध इत्यत आह नद्यन्तेति तत्त्वम् नद्यन्तत्वम् इउवर्णयोर्घिसंज्ञायां सम्मतिमाह अत एवेति वर्णयोर्घिसंज्ञास्वीकारादेव इदम् नत्विव्यादिकथनम् एतद्व्याख्यानबीजम्पाक् प्रतिपादितम् पूर्वप्रवृत्तेति अर्थान्तरसङ्क्रमात्पाक् प्रवृत्तेत्यर्थः इत्यभिमानेनेति अस्य तु समुदायघटकतया पुम्बोधकतापीति तन्मात्रबोधकत्वमित्याशयः जहदिति पदद्वयेपीत्यादिः अभिमानोक्तिबीजम्प्रकटयति भाष्यकृतेति यत्र रूढिर्विरोधिनी तत्रैव जहत्स्वार्थेति तेषाम्भावः अवयवस्य कुमारीश्रेयसीशब्दयोः कुमार्यै इति अत्र कुमारीमिच्छन्कुमारीवाचरन्ब्राह्मणः कुमारी क्यजन्तादाचारकिबन्ताद्वा कर्तरि क्विप् खरकुटीति खरकुटो वेत्यर्थे इवार्थे संज्ञायामिति कनो लुम्मनुष्य इति लुप् अत्र शास्त्रीयोपसर्जनत्वाभावान्न गोस्त्रियोरिति ह्रस्वत्वम् पञ्चम्यन्तद्वयस्य कार्यसिद्धावन्वयः समासे बहुश्रेयसीत्यादिसमासे यथाप्रत्याख्यातन्तम्प्रकारमाह अवयवेति एतस्य व्याख्या ऽवयवो ऽत्र स्त्रीविषयस्तदाश्रया नदीसंज्ञा भविष्यतीति भगवता कृता अत्र भविष्यतीति कथनेन कार्यकाले ऽपि सा भविष्यतीति ध्वनितम् यदि यथोद्देशपक्ष एवाभिमतः स्यात्तदा ऽवयवो ऽत्र नदीसंज्ञो ऽस्तीत्येव वदेत् एवं व्याख्यानेनोत्तरपदे जहत्स्वार्थत्वाभावः स्पष्ट

एव । नन्ववयवत्वस्य समुदायसापेक्षत्वेन समासावयवसङ्ग्रहे ऽपि कुमार्यै इत्यादेः कथं सङ्ग्रहो ऽत आह अवयवशब्देनेति शब्दग्रहणमिति शब्दसामान्यस्य ग्रहणमित्यर्थः क्यजाद्यन्ते प्रागुक्ते कुमार्यै इत्यादौ इच्छादीति आदिपदेनाचारपरिग्रहः एतेन कुमार्यै खरकुट्यै ब्राह्मणायेत्यादाववयवस्य नित्यस्त्रीलिङ्गस्यानुपलम्भान्न सूत्रेण नदीसंज्ञाप्राप्तिः कार्यकालपक्ष इति यथोद्देशपक्षाभिप्रायक एवायं ग्रन्थ इत्यपास्तम् तदज्ञानामिति एतेन प्रक्रान्तस्याङ्गस्येत्यस्य विशेषता सूचिता तेन सुभ्रुवावित्यादिसिद्धिः मूले वैयधिकरण्यदोष इत्येवाभिहितन्नत्र साधकमभिहितमिति निर्बीजाभिधानमयुक्तमित्याशङ्कावारणायाह सामानेति मात्रमिति एतेन विशेष्यविशेषणभावनियामकसम्बन्धान्तरस्य व्यवच्छेदः कृतः भेदसम्बन्धः विशेषणविशेष्यभावनियामकः कश्चन सम्बन्धः सच विशेषणविशेष्यभावश्च एवञ्चावयवावयविभावाद्यनपेक्षत्वेन सामानाधिकरण्येनार्थबोधकसामग्र्यास्तत्संसर्गप्रकारत्वघटिततात्पर्यज्ञानानपेक्षत्वेन भिन्नविषयकप्रत्यक्षप्रतिबन्धकतायां लाघवमिति ध्वनितम् ननु तात्पर्यज्ञानस्य नानार्थस्थल एवापेक्षा नतु सर्वत्रेत्यतस्था ऽन्वये दोषमप्याह क्षिपतीत्यादिना अत्र यणापत्तिरिति एतेन पूर्वलक्ष्ययोरियङापत्तिर्ध्वनिता ननु यण्विधाविवर्णान्तस्याङ्गस्येत्येव व्याख्या ऽस्तीत्यत आह तत्रापीति सम्भवति सामानाधिकरण्य इति न्यायानुसारेणाह यदीति लोपेन निर्वाह इति जातेपीयङादेशे लोपो व्योर्वलीति लोपेन निर्वाह इत्यर्थः असिद्धत्वादिति बहिर्भूतनिमित्तापेक्षत्वेनेयङादेशस्य लोपापेक्षया बहिरङ्गत्वमित्यसिद्धपरिभाषयासिद्धत्वादित्यर्थः तदभावे ऽपीति तस्याः परिभाषायाः प्रवृत्त्यभावेपीत्यर्थः ऊयतुरितीति अत्र वलपरत्वस्याभावेन लोपसम्भावनापि नास्तीति भावः क्लेशमुपपादयति अजादीति तथाच कल्पनाकांक्षां विहायाकल्पितकल्पनायाम्मनोव्यापारगौरवं स्पष्टमेवेति भावः व्याख्यानादिति । खरपदपूर्वेति वक्ष्यमाणवार्तिकानुसारिव्याख्यानादित्यर्थः वृत्तिरिति असंयोगपूर्वस्येत्यत्र वृत्तिरित्यर्थः । अत एव उक्तव्याख्यानेन उन्न्यावित्यादौ यणादेशस्येष्टत्वादेव निन्यतुरित्यस्य सिद्धये खरपूर्वेति पदपूर्वेति तथाचोन्न्यावित्यादिसिद्धिः उक्तोपायेन धातुना संयोगविशेषणेन तथा वृत्त्यादौ भाष्यकारोक्तिरपि प्रमाणमिति भावः नचोन्नीशब्दा-

दिभ्यः क्यजन्तेभ्यः क्विपि द्विवचने वार्तिकारम्भपक्षे यण् प्राप्नोति प्रत्याख्यानरीत्यातु नेतिफलभेदस्य स्पष्टतया कथम्प्रत्याख्यानमिति वाच्यम् प्रत्याख्यानपरभाष्यप्रामाण्येन तेभ्यः क्यजन्तेभ्यः क्विवादेरनभिधानमित्याशयात् खण्डनकारोक्तिमनूद्य खण्डयति नचेत्यादिना न दोष इति हरिमित्यादौ न दोष इत्यर्थः भवदुक्तः संयोग एवात्र नास्तीत्याशयेनाह तत्रीरित्यादाविति तदुक्तप्रकारान्तरमपि दूषयति परिमाणेतिसूत्रभाष्य इति तत्र हि सर्व्वेभ्य इत्यत्र सर्व्वग्रहणस्यैकस्खण्डुलनिश्रायः द्वौ शूर्पनिष्पावावित्यत्र घञ्सिद्धिः प्रयोजनमित्यभिधायाकर्त्तरि च कारक इत्यनेन सिद्धौ तन्न कार्य्यम् न सिद्ध्यति संज्ञायामिति हि तत्रास्ति नचैषा सञ्ज्ञा तत्प्रत्याख्यायते अथापि क्रियते तथापि न दोषः अजपावपि सञ्ज्ञायामेवेत्यादुच्यक्तम् यद्यप्ययन्न्यायः श्रमादौ व्यभिचरितस्तथाप्यत्र त्यागे न प्रमाणमत आह अङ्गश इत्यादि तत्प्राप्त्या यणादेशस्य प्राप्त्या तेन एरनेकाच इत्यनेन प्रकारान्तरेण दोषाभावशंकानिरस्यति यद्यपीत्यादिना निर्देशोपेति अन्यथा ऽत्रापि पूर्व्वसवर्णदीर्घबाधको यणादेशः स्यादिति भावः आश्रितेति आवृत्तौ पदजन्यपदार्थोपस्थितिघटितशाब्दबोधसामग्र्याः सिद्धिरस्तीति विवक्षितविशेषणाविशेष्यावगाहिविशिष्टार्थबोधो भवति आवृत्तिमकृत्वा तन्निर्देशरूपानुमानेन धात्ववयवसंयोगपूर्व्वभिन्नस्य धात्ववयवग्रहणमित्यर्थस्य कल्पने ऽनुमितेः परामर्शादिघटिता सामग्री स्वीकार्या ततो ऽनुमितेस्ततः शाब्दबोधस्य विलक्षणस्य कल्पने ऽतिगौरवमिति भावः दिगिति दिगर्थस्तु धात्ववयवसंयोगपूर्व्वभिन्नस्य धात्ववयवस्यानुमानेन कल्पनायामपि उदियायित्यादौ यणापत्तिर्दुर्वारैव यदि चानुमानेन धात्ववयवसंयोगपूर्व्वभिन्नस्य धात्ववयवपूर्व्वस्य ग्रहणमित्युच्यते तथापि लिडियायित्यादौ दोष एव ममतु आवृत्तधातुपदाभ्यान्तदर्थस्योपस्थितौ प्रत्यासत्त्या तद्धात्ववयवसंयोगपूर्व्वभिन्नस्य तद्धात्ववयवपूर्व्वस्य ग्रहणमिति तत्र नातिप्रसङ्गः यद्यनुमितिरपि तद्धातुघटितार्थस्य कल्प्यते तदा तत्पदं प्रत्येकस्य बोधकमिति यदि नीधातुघटितार्थविषयकानुमितिस्तदा चिच्यतुरित्यादावव्याप्तिरस्त्येवेति वैतण्डिकतयेति स्वपक्षस्थापनाग्रहरहितः परपक्षखण्डनतत्परो वैतण्डिकस्तस्य भावेन तादृशाग्रहेणेत्यर्थः तत्सिद्धेति तदुक्तिसिद्धेत्यर्थः यद्वैतण्डिकतया ष-

ष्ठीबाधनार्थमित्युक्तत्वदेव विरुद्धमित्याह वस्तुत इति यत्तु विभक्तिप्रकरण एवाकर्त्तरीतिसूत्रानन्तरम्भीत्रार्थानाम्भयस्येति सूत्रं कार्यं हेतावित्यस्य पञ्चमीत्यस्य चानुवृत्त्येष्टसिद्धिर्भविष्यतीति तन्न कारकत्वप्रयुक्तकार्य्यानापत्तेः मूले परत्वादिति लोपो व्योरित्येतदपेक्षया परत्वादित्यर्थः निमित्तत्वस्थानित्वयोरेकस्मिन्काले ऽसम्भवरूप एवात्र विरोधो बोध्यः मूले यादृशानुपूर्व्व्युक्ता वार्तिकस्य सा नोपलभ्यत इत्यत आह लोपो व्योरितीति इत्यर्थ इति लाघवादुचित इति शेषः सा च लोपसिद्धिश्च एवमुक्तामिति वेरपृक्तलोपाद्वलि लोपो विप्रतिषेधेनेत्येवमुक्तमित्यर्थः गौणलाक्षणिकत्वरूपगौणत्वं प्रकृते ऽभावादाह इच्छेति अन्यथा दीर्घस्यापि संग्रहाभावस्येष्टत्वे प्रकृतीति अन्यथेत्यादिः तदर्थमिति । गुणविषयव्यावृत्त्यर्थमित्यर्थः मूले विकृतनिर्देशश्चेत्यस्य विकृतस्य निर्देश इत्यर्थः सचानुकरणशब्दोच्चारणरूप एवेत्याशयेनाह यकारान्तानुकरणेति । अकारेति एतेनायं यणादेशार्थमागन्तुको निर्दिष्ट इति यत्र यणादेशस्तत्रैवास्य प्रसक्तिरिति कस्यचिदुक्तिः प्रत्युक्ता तथा सत्यागन्तुकाकारात्प्रागुच्चारितयोर्य्यादे ह्रस्वान्तत्वं तदा ऽस्य दीर्घे दीर्घान्तत्वे ह्रस्वान्ते सखिशब्दे पतिशब्दे चाप्रवृत्त्यापत्तिर्म्ममतु यणादेशानुकरणादुभयसंग्रह इति भावः मूले इत्यादीत्यस्य विदुरित्यत्रान्वयः ह्रस्वमात्रनिर्देशवादिन इति शेषः तदुभयमपि भाष्यगौरवात्साध्वित्यर्थः अतिरभसादिति यणादेशस्य करणेनेत्यादिः एतदेवाह संयोगेति विकल्पस्य निर्म्मूलत्वेन रभस्त्वं यणादेशकरणेन च तस्यात्यन्तिकत्वमिति भावः परमूले शुष्कीयतेः क्विपि शुष्कीः पक्कीरिति दीर्घान्तं व्युत्पाद्य इयङ् शुष्किकयौ शुष्किकय इति यदुक्तं तदसङ्गतमियङादेशे कर्त्तव्ये ऽऽल्लोपस्यासिद्धत्वादिति यत्केनचिदुक्तं तत्खण्डयति इयङ्यत इति ननु तुन्नन्तस्तृजन्तश्चेति द्वावप्यस्तु शृगालवचनौ तथापि यस्तुन्नन्तस्तस्य सर्व्वनामस्थाने तृज्वद्भावः सूत्राभावेन प्राप्त इति नियमार्थमित्यसङ्गतमित्याशङ्कायामाह फलत इति एतेन नियमार्थत्वं शाब्दीयन्यायेन नेति ध्वनितम् रूपमिति एतच्च वक्ष्यमाणसिद्धान्तरीत्योक्तम् निमित्तातिदेश इति येन निमित्तेन सनः प्रकृतिभूताद्धातोरात्मनेपदञ्भवति तन्निमितं सन्नन्ते ऽतिदिश्यते पूर्ववत्सन इत्यनेन यथा चिकीर्षति चिकीर्षत इत्यत्र सन्नन्ते त्रिलस्यातिदेशः यदि स्वातन्त्र्येणात्मनेपदस्य वि-

धायकं तत्सूत्रं स्यात्तदा क्रियाफलस्य परगामित्वविवक्षायामप्यात्मनेपदं स्यात्पूर्ववदिति तु परस्मैपदप्रकृतित्वयोग्यप्रकृतिकसन्नन्तान्माभूदित्येतत्प्रतिपादकतया चरितार्थम् कार्य्यसामान्यातिदेशस्तु न प्रचिक्रंसत इत्यादाविदप्रसङ्गात् आत्मनेपदप्रकरणविरोधापत्तेश्च नचात्मनेपदस्यैवातिदेशो ऽस्त्विति वाच्यम् कर्तृगामित्वविवक्षायामेव तस्य प्रवृत्तिरिति विशेषालाभः स्यादित्याशयात् व्यपदेशातिदेशोदाहरणमाद्यन्तवदिति व्यपदेशस्यादित्वान्तत्वव्यवहारस्यातिदेशः तेन यथाकर्त्तव्यमित्यादौ तव्यप्रत्यये आदित्वव्यवहारस्य मुख्यस्य सत्त्वादादुचदात्तत्वम्भवत्येव औपगव इत्यादावण्प्रत्यये ऽप्यादुचदात्तत्वंभवति तथा ऽन्तत्वाऽतिदेशेन आभ्यामित्यादौ दीर्घस्य सिद्धिः क्वचित्त्वेकस्मिन्नुभयधर्म्मातिदेशस्तेनैधत इत्यादौ टिसञ्ज्ञासिद्धिः तादात्म्यातिदेशोदाहरणं सुवामन्त्रित इति तेन परशुना वृश्चन्नित्यत्र परशुनेत्यस्य वृश्चन्शब्दाङ्गत्वातिदेशेन पकाराकारस्यामन्त्रितादुचदात्तत्वं भवति । तृज्वदित्यस्यापि निमित्तव्यपदेशातिदेशविधायकत्वशङ्कां वारयति तत्रेति आहत्येत्यस्य व्याख्यानं तृच्शब्दमिति अन्यथा ऋवदित्येव ब्रूयात् आपत्ताविति आपादने प्राप्त इत्यर्थः गुणावादेशयोरिति प्रकृत्यनन्तरमिति न स्यातामिति एतयोस्तृच्शब्दमुच्चार्य विधानाभावादिति शेषः कार्य्यसामान्यातिदेशशङ्कान्निरस्यति नचेति सामर्थ्यादिति स्त्रियान्तृतीयादावचि च तृच्शब्दमुच्चार्य्य कार्य्यविशेषस्य विधानन्नास्तीति अतिदेशसामर्थ्यादित्यर्थः प्रथमसूत्रविषये ऽप्याह अप्तृन्नित्यत्रेति सामर्थ्यादिति दीर्घप्रवृत्तिमात्रस्य फलत्वं प्रागुपपादितरीत्यास्ति तच्चाधुना ऽपि सिद्धमिति भावः कार्य्यमात्रेति अत्र मात्रपदं कात्स्न्र्ये गोतो णिदिति सूत्रे गकारवदत्र चकारो ऽपि सामर्थ्यादविवक्षितो भविष्यतीति भावः तत्सामर्थ्येन सूत्रत्रयसामर्थ्येन युक्तत्वादिति सूत्रत्रयसामर्थ्यादुच्चारितस्य चकारस्याविवक्षायाः कल्पनापेक्षया रूपातिदेशेन कस्यचिद्वैयर्थ्यशङ्केति भावः सहप्रयोगाभावादिति उभयोरेकार्थबोधकतया सहप्रयोगाभावादित्यर्थः शास्त्रातिदेशोदाहरणं कालेभ्यो भववदिति अनेन भवार्थे यच्छास्त्रं तत्र भव इत्यधिकारविहितं कालाट्ठञिति प्रावृष एण्य इति च तस्यातिदेशः क्रियते तेन मासो देवता ऽस्य मासिकम् प्रावृड् देवता ऽस्य प्रावृषेण्यमित्येव भवति यदि तत्र कार्य्यातिदेश एव स्यात्तदा प्रकृतिप्रत्ययानां साङ्कर्य्यापत्त्या मा-

सशब्दादप्येण्यः स्यात् कार्य्यातिदेशस्तु स्थानिवद्भावस्थले प्रसिद्ध एव आदुचदात्ततयेति निदर्शनत्वेनादुचदात्ततयेत्यर्थः एतेनान्त्यस्योकारस्यानुदात्तत्वं सूचितम् स्वरानापत्तेरिति क्रोष्टूत्यादाविवादिः असम्भवीति सर्वत्रासम्भव्येवेत्यर्थः । शब्दार्थसम्बन्धस्य नित्यत्वादिति भावः अभ्युपेत्यवादेन प्रकृताभिप्रायेणाह तयोरिति यद्वा यथा स्त्रीपुंव्वच्चेतिसत्रेणार्थातिदेशः क्रियते तथास्त्वत्यत आह तयोरिति मत्वेदमिति अत्र मत्वेतिकथनेन स्त्रीपुंव्वच्चेत्यस्य सत्त्वेनारुचिर्ध्वनिता तथाच सप्तविधत्वे ऽपीत्युचितमिति भावः । ननु पूर्वोक्तरीत्या सर्व्वेषां रूपातिरिक्तानां वारणे सिद्धे प्राधान्यादिति हेतूपादानस्य वैयर्थ्यमत आह युक्त्यन्तरमिति प्राधान्यं चास्य सर्व्वेष्टसम्पादकत्वेन बोध्यम् रूपातिदेशे ऽपि प्रयोगसमवायिनः कस्य रूपस्यातिदेश इत्याशङ्कायामाह तच्चेति रूपञ्चेत्यर्थः तृजन्तस्यान्वेषणार्थं शास्त्रान्तरपर्य्यालोचनापेक्षयोपस्थितत्वात्तदेव शास्त्रमधिकरणत्वेन कल्प्यत इति भावः स्वरासिद्धिमपि वारयति तच्चेति उणादीति नियमस्य सजातीयापेक्षत्वेऽसिद्धमेवेत्यस्य लाभः अत एतच्छेषात् भवत्येवेति उणादिव्युत्पन्नभिन्नत्वादिति भावः नन्वष्तृन्नित्यस्य सर्व्वनामस्थानेचेत्यस्य चैककार्य्यविधायकत्वेन विरोधाभावात्परत्वादित्यसङ्गतमत आह इदमिति परत्वादप्तृन्नित्यत्रोक्तमित्यर्थः अग्रिमं चेति हेरमे इत्यत्र हल्ङ्यादिलोपात्परत्वात्सम्बुद्धिलोप इत्यत्रोक्तमित्यर्थः विप्रतिषेधः अनयोरपि विप्रतिषेधो बाध्यबाधकभाव इत्यर्थः अभिमानेनेति भाष्यसम्मतस्य विप्रतिषेधपदार्थस्याभावेन विप्रतिषेध इति कथनमभिमानेनेत्यर्थः तत्र हि द्वयोः शास्त्रयोरन्यत्र लब्धावकाशयोर्य्युगपत्प्राप्तयोर्य्युगपदसम्भवे विप्रतिषेधस्य प्रतिपादनमेवास्ति विशेषविहितत्वेन प्रतिपदोक्तत्वेन निरवकाशत्वाभावे ऽपि पूर्व्वप्रवृत्तिप्रयोजकत्वमस्त्येव ननु तादृशनिष्कर्षस्य दूषितत्वादिति निष्कर्ष इत्यनुचितमत आह भाष्यस्थेति मूले नुण्नित्य इति कृताकृतप्रसङ्गित्वेन तस्य नित्यत्वमिति भावः तच्च कृताकृतप्रसङ्गित्वं दूषितं सन्निपातेत्यादिना रादेशस्य बाध्यसामान्यचिन्ता सप्रमाणा इत्याह साचेति । एवञ्च बाध्यसामान्यचिन्तायां भाष्यसम्मतत्वेच अभिमानेन प्रवृत्तमिति यदि तद्विषये बाध्यविशेषाचिन्ता सप्रमाणा स्यात्तदा पुरस्कादपवादन्यायेन रादेशस्य जसि यो गुणस्तद्बाधकत्वमेव स्यान्नतु सर्व्वनामस्थाने यो गुणस्तद्बा-

धकत्वम् एतेन वक्ष्यमाणदूषणेन गुणम् ऋतोऽङीतिगुणम् तद्दूषणमेवाह तृज्वदिति तत्र हि नृमिचिरेति वार्तिकव्याख्यानावसरे नुड्रेफयोर्विप्रतिषेधो न वाच्यः किन्तर्हि नुड्विषये रादेशस्य प्रतिषेध एव वक्तव्यः इतरथाहि सर्व्वापवादो रः स यथैव गुणं पूर्व्वसवर्णञ्च बाधते एवन्नुटमपि बाधेतेत्युक्तम् भाष्यान्तरविरोधमप्याह मपर्य्यन्तस्येतीति अचिरेणेति नुडागमस्येति शेषः अथ न तिस्रितिसूत्रं रेफादेशस्य नुडपवादत्वाभावे एव ज्ञापकत्वमस्तु एवञ्च विप्रतिषेधस्योपपत्तिर्भविष्यतीत्याशङ्कते यद्यपीति तेनैव ज्ञापकेनैव तम् नुटम् तन्दूषयित्वा विप्रतिषेधं दूषयित्वा तृज्वत्सूत्रभाष्य इति उक्तभाष्यान्तरन्तत्र तस्मान्नुड्विषये रप्रतिषेधो वाच्यः न वाच्यः आचार्य्यप्रवृत्तिर्ज्ञापयति न रादेशो नुटम्बाधत इति यदयन्न तिस्रिति नामि दीर्घत्वस्य प्रतिषेधं शास्तीत्युक्तम् अतिक्षोदः अतिविचारः तदंशे रांशे मूले नुमागमो ऽनुस्वारश्चेति परसवर्णार्थमिति शेषः अत्र दशपादीति विशेषतः कथने उभयेति नुमनुस्वारेत्यर्थः अनुस्वारेति अनुस्वारमात्रेत्यर्थः एवञ्च उभयथाप्यस्योकारस्योणादित्वे च चिन्त्य इति तत्रोवङादेशस्य प्रवृत्तेरत्र तु तदभावस्येति रूपे विशेषस्य स्पष्टत्वादिति शेषः कूप्रत्यय इति भुव इति शेषः तत एकादेश इति च एकादेशस्य प्रत्ययोकारेणैकादेशस्य एतेनात्र पक्षे भूशब्दस्य लाक्षणिकत्वान्न वार्तिकेन याणित्वापत्तम् अतिदेशविषये लक्षणप्रतिपदोक्तपरिभाषाया अप्रवृत्तेरन्यलोपपादनात् । भाष्ये पूर्व्वग्रहणमिति वर्षाद्दन्कारपुनर्भ्यो भुव इत्येव पाठे इष्टसिद्धेः एतेनेत्येतद्व्याचष्टे सूत्रेति वर्षाभ्वश्चेति सूत्रस्य वर्षाभूपुनर्भ्वश्चेति वार्तिकस्यानुरोधेनेत्यर्थः यन्मूले तन्निर्मूलत्वाच्चिन्त्यमित्येव वक्तव्ये उपेक्ष्यमित्युक्तन्तस्य बीजान्तरमप्याह कारा भूरित्यत्रेति अङीति टापि चेति शेषः एवञ्च काराशब्दो दुष्टाचरणकृता यत्र स्थाने निग्रहो राजकर्तृकस्तद्वाचकः यत्र तु कारागृहमिति प्रयोगस्तत्र सकीचकैर्मारुतपूर्णरन्ध्रैरितिवत्प्रयोगः तत्र यथा 'कीचका वेणवस्ते स्युर्ये स्वनत्यनिलोद्धता इति' कोशात्कीचकपदस्य मारुतपूर्णरन्ध्रत्वविशिष्टे शक्तिसत्वे ऽपि पुनर्मारुतपूर्णरन्ध्रैरित्येतदुपपादनाद्वेणुमात्रपरत्वन्तथा ऽत्र काराशब्दो बन्धनमात्रपरः प्रसिद्धत्वमुभयत्र तुल्यमित्याशयेनाह ह्रस्वेति गोत इत्यपहायेति मूलोक्तरीत्या समुदायस्य त्यागो न चमत्कारकारीत्यतस्तद्व्याचष्टे एतदवयवेति एतन्मूलकफक्किकायां गोत इत्यवयवावयविभावा-

र्थिका षष्ठीति भावः कैयटोक्तमकारान्तरमूलकारं आह गोत इत्योकार इति एवञ्च पूर्वङ्गकारो यद्यपि पाणिनिनोच्चारितस्तथाप्याचार्य्याः कृत्वा न निवर्त्तन्त इति न्यायेन तस्य न त्यागः कृत इत्याशयः केचित्तु गकारोच्चारणमङ्गलार्थम् ओत इति तु विवक्षितमत एव चित्रगुरित्यत्र न दोषः गकारस्य विवक्षितत्वे स्थानिवद्भावेन गुशब्दस्य गोशब्दतया ऽङ्गाधिकारे तदन्तविधिसत्वेन गोशब्दान्तत्वेन दोषः स्यादेव ममत्वल्विधित्वान्न सत्रस्य प्रवृत्तिः वस्तुतस्तु प्रकृतसूत्रे भाष्ये तपरत्वं प्रत्याख्यातम् चित्रगुरित्यत्रातिप्रसङ्गस्य तु गोः पूर्व्वत्वणित्वेत्यनेन स्थानिवद्भावस्य प्रतिषेधादेव निरासः द्योश्च सर्व्वनामस्थाने णित्वं वक्तव्यम् नन मूलोक्तबाधकत्वन्निरवकाशत्वं चेत्ययुक्तञ्चकारोपादाननिरवकाशत्वाभावे ऽपि बाधकत्वस्य प्रतीतेरत आह चो हेताविति मूले संराया भूयसेति यद्यय स्त्रीलिङ्गः स्यात्तदा भूयस्या इति स्यादिति भावः ननु स्थानिवत्सूत्रस्थभाष्यादेशब्दस्य छान्दसत्वप्रतीत्या वैदिकेष्वस्य प्रतिपादनं युक्तमितीह तस्य कथनमयुक्तमित्याशङ्कानिवारणायाह रायेरित्यादि उक्तभाष्ये व्याचष्टे राः शब्दे इति उच्चारणार्थ इत्यन्तो ग्रन्थः वस्तुतस्त्विकारः सप्तम्येकवचनरूप एवेत्याशयेनाह प्रायेणेति अत एव केवलस्य छान्दसत्वादेव अत एव उक्तोर्थः मूले स एवेति कैयट एवेत्यर्थः स्पष्टमेवेति यद्ययं केवलो ऽपि छान्दसः स्यात्तदापि शब्दोच्चारणवैयर्थ्यापत्तिः उक्तभाष्योक्तप्रयोगद्वयविरोधश्च स्पष्टमेवेत्यर्थः ॥ इत्यजन्तपुल्लिङ्गविवरणम् ॥ यत्तु लिङ्गविशिष्टपरिभाषया प्रातिपदिकत्वादिति तन्न युक्तम् परिभाषया तद्विशिष्टस्य ग्रहणमेव बोध्यते इति तन्नेत्याशयेनाह तयेति विशिष्टे लिङ्गबोधकप्रत्ययविशिष्टे बोधनेन अतिदेशेन ध्वनितमिति नञ्तत्पुरुषाद्बहुव्रीहेः कवित्यर्थे कुण्डोभ्रीत्यत्र कबापादनपरभाष्येण ध्वनितमित्यर्थः यदुक्तं प्रागग्रिमञ्चेति तदिह दर्शयति असंबुद्धाविति सावकाशमिति प्रत्ययलक्षणेनेति शेषः अपवादत्वात् निरवकाशत्वेनापवादत्वात् अभिमानेनेति एतेन पूर्वोक्तार्थः स्मारितः प्राचामाशयमाह समुदायेति भाष्ये स्पष्टमिति तत्र सर्वेषु सानुबन्धकनिर्देशेषु रूपमाश्रीयते यत्रास्यैतद्रूपमिति रूपनिर्ग्रहश्च नान्तरेणो लौकिकः प्रयोगन्तस्मिंश्च लौकिके प्रयोगे सानुबन्धकानामप्रयोगो नास्तीति द्वितीयः प्रयोग उपास्यते को ऽसावुपदेशो नामेत्युक्तम् । तेषाम् अनुबन्धत्वेनाभिप्रे-

तानाम् प्रकृताभिप्रायेणाह टकारेत्संज्ञकेति एतेन यदुपदेशप्रयुक्ता यस्येत्संज्ञा तस्यैव तदनुबन्धकत्वव्यवहार इति निदर्शितम् प्रकृतस्य टकारस्य तु स्यादुपदेशप्रयुक्तैवेत्संज्ञेति नाटश्चेत्यस्य प्राप्तिरिति भावः यथा टकारस्य नाडवयवत्वं तथाप्यन्यत्रानुबन्धविषये द्रष्टव्यम् त एव महिङिति ङकारस्समुदायस्यैवावयव इति वक्ष्यमाण इत्यत्र सम्प्रसारणन्न एतेन टकारेत्संज्ञकेति व्याख्यानेन नन्वाडजादीनामित्यत्राच्परत्वमस्त्येवेत्यत आह नेथत इति अन्तरङ्गत्वादिति याटः सर्वनामसंज्ञानपेक्षत्वेनान्तरङ्गत्वमसुङस्तु कार्यकालपक्षमाश्रित्य तत्प्रवृत्तिसापेक्षत्वेन बहिरङ्गत्वमिति भावः मूले इत्यादि न सिध्येदिति सर्वनाम्नो ऽसुङादेशे सकारस्य प्रत्ययावयवत्वाभावेन षत्वाप्राप्त्या न सिध्येदित्यर्थः ननु परादिवद्भावेनाकारस्य प्रत्ययतया तदादेशस्यासुङः प्रत्ययतया तदवयवस्य षत्वमभविष्यति नच सर्वनामत्वम्पूर्वान्तवद्भावेन वाच्यमित्युभयत आश्रयणे नान्तादिवदिति निषेधो भविष्यतीति वाच्यम् विभिन्नकार्यसम्पादकशास्त्रयोः प्रवृत्तये उभयाश्रयणेपि तन्न्यायविषयत्वाभावाद्यत्रैककार्यार्थमुभयाश्रयणन्तत्रैव तस्य प्रवृत्तेरत आह इत्याद्येवेति पूर्वमसुङीति मुत्वस्यासिद्धत्वेन पूर्वमसुङीत्यर्थः न मुने इति सूत्रे नेति योगविभागाभिप्रायेणाह पूर्वम्मुत्व इति तथाच तृतीयव्याख्यापक्षे अः सेरित्यस्य वाक्यस्य प्रवृत्त्या ऽसुमुयङिति यथा भवति तथा यद्यप्यसुङादेशस्य पूर्वमप्रवृत्तिपक्षे मुत्वमभविष्यति तथाप्याद्यव्याख्यायान्न सिद्ध्येदिति भावः एवञ्चेति अमुष्यै इत्यस्यैवेष्टत्वे च तत्र अदसो ऽसेरिति सूत्रे स्याट्ग्रहणमपीति अपिना ऽसुमुयङिति लक्ष्यस्य सङ्ग्रहः संज्ञाकृतेति नलोपः सुविधिसूत्रे कृतिग्रहणात्तदनाश्रयणम्बोध्यम् ।
इति न्यास इति अत्र चकारस्य विधेयबोधकपदोत्तरमुपादानेन विधेयान्तरस्य समुच्चयो भविष्यतीति भावः उभयोरपीति असुङो याडागमस्य चेत्यर्थः एवञ्चास्य याडाप इति सूत्रबोध्ययाडागमस्यापि पक्षे रूपासिद्धिः स्फुटैव इत्याद्येत्यादिपदेनामुष्यै इत्यस्य सङ्ग्रहः नच द्वितीयायाञ्चेति निर्देशरूपज्ञापकान्न तस्य सूत्रस्योभयविकल्पबोधकतेति वाच्यम् ज्ञापकाश्रयणेन प्रतिपत्तिगौरवस्य स्फुटत्वात् दूषणान्तरमप्याह किञ्चेति ननु विषयभेदात्कथमपवादत्वमत आह अचिरेति सर्वनाम्न इति सूत्रस्य याडपवादत्वेपि अस्य ङादेशेनेष्टसिद्धिर्भविष्यतीत्याशङ्कां निराचष्टे यद्यपीत्या-

दिना ह्रस्वश्चेति न वाच्यमिति पूर्वपक्ष्यभिप्रायः अवङ्सूत्रस्थभाष्यरीत्येति गोरवग्वचनं स्वरसिध्यर्थमिति वार्तिकस्य व्याख्यानावसरे उक्ता या रीतिस्तयेत्यर्थः एवञ्च तस्यै इत्यत्र ताशब्दस्यान्तोदात्तत्वबुद्ध्या तस्य स्थाने आन्तरतम्यादन्तोदात्ते ऽस्य डादेशे ऽयन्दोषो बोध्यः यदा स्थानिन आदुच्चदात्तत्वबुद्धिस्तदा यद्यपि सिद्धिस्तथाप्यन्तोदात्तत्वबुद्धिरपि कदाचित्स्यादिति तात्पर्यम् अमुष्यै इत्यत्र सस्य प्रकृत्येकदेशत्व एव दूषणम् यदि तु याट एव सुट् तदा सकारः प्रत्ययावयव इति सुत्वे कृते षत्वभविष्यतीत्यभिप्रायेणाह मूले वस्तुतास्त्विति युक्तम् आमीतिसूत्रानन्तरमेवम्पठितुम् युक्तम् सर्वनाम्न इत्यस्य तत्रानुवृत्त्या सर्वनाम्नः परस्य याटः सुट् ह्रस्वश्चेति तदा ऽर्थः एवंसति सर्वनाम्न इत्यस्य पञ्चम्यन्ततया स्थानित्वासम्भवेन याट इति षष्ठी यथा ऽवयवावयविभावार्थिका तथा स्थानपदार्थनिरूपितसम्बन्धार्थिका ऽपि भविष्यतीत्यभिप्रायिकामाशङ्कान्निराचष्टे नचेति दीर्घ इति याट इत्यत्र दीर्घ इत्यर्थं यडागमे कर्तव्य इत्यादिना। नन्वेवं यशब्दावयवो ऽकारो ऽपदान्त इत्यतो गुण इति पररूपापत्तिरित्यत आह ह्रस्वोच्चारण इति युडागमे कर्तव्ये विवक्षिताकारविशिष्टयडागमविधानसामर्थ्यादित्यर्थः याटो निष्पत्तिरावन्तादेवेति आप इत्यस्य प्रकृतस्याभावे ऽप्यस्य सूत्रस्यावन्त एव प्रवृत्तिः आमीत्यस्यास्मिन्सूत्रे न सम्बन्धः नन्वेवंसति युडाद्यागमे यथोकार उच्चारणार्थो भवति तथा यडागमेप्यकारस्तथास्त्वित्याशङ्कान्निराचष्टे उच्चेति व्याख्यानादिति सेनायावेतिसूत्रनिर्देशदर्शनमूलकव्याख्यानादित्यर्थः यद्यकार उच्चारणार्थः स्यात्तदा निर्देशासङ्गतिः स्पष्टैव ननु प्रकृतसूत्रवत्तेरित्यादावप्यामीत्यस्य तर्हि सम्बन्धो न स्यादत आह त्रेस्त्रय इति मण्डूकानुवृत्तौ मानन्त्वत्रैव त्रेरिति निर्देशस्त्रेः सम्प्रसारणञ्चेति निर्देशश्चेति गृहाण बहुषु सौत्रत्वकल्पनापेक्षया मण्डूकानुवृत्तिरेव ज्यायसी मूले ऽवधेयमित्यनेनान्यदपि सूचितम् तथाहि यदि मण्डूकप्लुतिर्मध्ये सम्बन्धाभावो ऽग्रेच सम्बन्धकल्पनाभ्याङ्गुरुभूत्येत्याग्रहस्तर्हि सर्वनाम्नो याटः सुट् ह्रस्वश्च आमि त्रेस्त्रय इति सूत्रत्रयमस्तु आमीत्यत्र आज्जसेरिति सूत्रादादित्यस्य सम्बन्धो भविष्यति विभाषा द्वितीयातृतीयाभ्यामिति सूत्रमप्यत्रैव पाठ्यम् तत्राविशेषादुभयोरपि विधेययोर्विभाषेत्यस्य सम्बन्धः एवञ्चाश्वक्षीरेति सूत्रानन्तरं यदामीति सूत्रन्तत्र-

त्यं सर्वनाम्न इति पदमस्तदस्तु याडाप इति सूत्रानन्तरं यत्सर्वनाम्नः स्या-
डिति सूत्रमस्तु कार्यमिति एवञ्च या मण्डूकानुवृत्तिरुक्ता सा आमीति पृ-
थक्सूत्राकरणपक्षे इति दिक् सप्तमी विशेषण इति सूत्रेण विशेषणवाचकस्य
पूर्वनिपातो विधीयते पूर्वादिशब्दयोर्दिग्वाचकतया द्रव्यार्थाभिधायकत्वेन
गुणत्वाभावात्कथम्पूर्वनिपातवैपरीत्यापत्तिरत आह अयम्भाव इति वाक्य
इति समासार्थप्रदर्शकलौकिकविग्रहवाक्य इत्यर्थः प्रतीयत इति यच्छ-
ब्दयोगः प्राथम्यमित्यादुद्देश्यलक्षणम् तच्छब्द एवकारश्च स्यादुपादेय-
लक्षणमित्यभियुक्तोक्तेः नच यत्र यच्छब्दयोगः प्राथम्यं वा तस्यैवोद्दे-
श्यबोधकत्वमिति नियमो न सम्भवति लोहितोष्णीषा ऋत्विजः प्रचरन्ति
व्यङ्गैः स्विष्टकृतं यजतीत्यादौ व्यभिचारादिति वाच्यम् तत्रापि विशिष्टस्य
विधेयता आदौ प्रतीयते तात्पर्यन्तु गुणविधान इति कल्पनायाः सम्भवात्
यद्वा पूर्वोक्ताभियुक्तवाक्ये आदिपदमुपात्तन्तेन प्राप्ताप्राप्तविवेकन्यायस्यापि
सङ्ग्रहः कार्यः उद्देश्यविधेयत्वमिति द्वन्द्वोत्तरत्वप्रत्ययः इत्यर्थादिति अन्यथा
द्वयोः पदयोः सामानाधिकरण्याभावेनानेकमन्यपदार्थ इति समासानुपप-
त्तिः स्यादिति शेषः । ननु या पूर्वा सा उत्तरेत्येव विग्रहो ऽस्तु उत्त-
रापदमेव लाक्षणिकमस्तु तथापि बहुव्रीहिर्भविष्यतीत्याशङ्क्याह निराचष्टे न
विधाविति जैमिनिशास्त्रप्रसिद्धो ऽयन्न्यायः उपक्रमोपसंहाराभ्यां यदर्थे ता-
त्पर्यग्रहस्तत्रैवैकस्योद्देश्यत्वमपरस्य विधायकत्वम् यदि विधायकस्यापि ला-
क्षणिकत्वन्तदा लक्षणाया अनुपपत्त्यादिग्रहसापेक्षत्वेन गुरुतया स्पष्टप्रति-
पत्तये विवक्षितार्थबोधकस्य वाचकशब्दस्यैव प्रयोगः कर्तुमुचित इति भा-
वः गुणवचनतयेति गुणोपसर्जनद्रव्यवाचकतयेत्यर्थः भाष्य इति अन्तर-
म्बहिर्योग इति सूत्रभाष्य इत्यर्थः खण्डनकदुक्तन्निरासितुम्भूमिकामारच-
यति तृतीयाशब्देति साहचर्येणेति सदृशयोरेव सहायत्वस्य लोके विपरा-
भ्याञ्जेरित्यादिसूत्रभाष्यादौ च स्पष्टत्वादिति भावः ननु द्वितीयाविभ-
क्तिर्द्वितीयेत्यस्तु पूरणाद्भाग इत्यनप्रत्ययान्तो ऽयं शब्दोस्तु एवञ्चान्नन्त-
स्य तीयप्रत्ययान्तत्वाभावेन वार्तिकाप्रवृत्ताविदमावश्यकमित्याशङ्कानुत्थाना-
याह भागार्थ इति अनभिधानादिति अत्र मानन्तु सूत्रप्रत्याख्यानपर-
म्भाष्यमेव एतेन अनभिधानादस्त्रीत्वे न तत्र अन्नन्ते अभावादिति अ-
नो ऽभावे ऽपि टाबेकादेशेन सर्वस्य लाक्षणिकत्वादिति भावः प्रका-

रान्तरेण सूत्रसार्थक्यशङ्कां वारयति नचेति अङ्गीकारादिति अत एव प्राग्दिश इति सूत्रात्प्राक् तदधिकार इति वृद्धाः सिद्धान्तिमतेनाह आदुग्यदात्तस्येति मातुर्मातजिति वार्तिके सम्बुद्धाविव्यधिकाराभावादनुपादानाच्च तस्य सम्बुद्धावेव प्रवृत्तिरिति कुत इत्यत आह अत्रोपेति पुत्रार्थमित्यस्य पुत्रायेत्यर्थः अर्हते इति पुत्रायेत्यस्य विशेषणम् तादर्थ्ये चतुर्थी ब्राह्मणाय पायसमित्यत्रेवोपकार्योपकारकभाव ऊहनीयः अम्बार्थेति सूत्रात्सम्बुद्धाविव्यस्य सम्बन्धः यद्वा मातुरित्यस्य प्रयुज्यमानस्येत्यादि अभिधातुमिति तुमुन्नन्तमप्रयुज्यमानमिति क्रियार्थोपपदस्येति चतुर्थी तत्फलितार्थमाह अर्हन्तमिति नन्वेवमर्हत इति पुत्रायेत्यस्य विशेषणमिति सापेक्षत्वात्कथमर्थशब्देन समास इत्यत आह सापेक्षत्वे ऽप्यत एवेति यः पुत्र उत्कृष्टगुणयोगादुत्तमकुलसम्भूतत्वाच्च कुलीनायाम्मातरि अयञ्जात इति व्यपदेशयोग्यो भवति स एव यदा गार्गी मातेत्यादिबहुव्रीहिसमासेनाभिधीयते तदा ऽयम्मातजादेश इष्यते अत्र मातृपदार्थप्रशंसया पुत्रस्य प्रशंसा विवक्षिता अर्हत इत्यत्राहः प्रशंसायामिति शता मातृगतप्रशंसामूलकपुत्रप्रशंसाया गम्यमानत्व एवास्य प्रवृत्तेरिष्टत्वादत एव भाष्ये मातृणाम्मातच् पुत्रार्थमर्हत इति वार्तिके मातृणामिति बहुवचनमुपात्तम् गार्गी मातेत्यादौ जातेश्चेति पुंवद्भावस्य प्रतिषेधः समास इति अर्थशब्देन समास इत्यर्थः मातत्र जनन्येव नत्वपरमाता जनन्याः पूत्यासत्र्योपस्थितेः मातृद्वारकपूशंसा पुत्रस्य समासात्मकसमुदायेन प्रयुज्यमानेन गम्यते समासात्तस्य स्वलौकिके प्रक्रियावाक्ये प्रवृत्तेरिति नात्र येन नाप्राप्तिन्यायेनापवादत्वमत आह यदीदामेति तथाचोपजानिष्यमाणेति न्यायेन कपो ऽयम्बाधकः यत्तु परैरुक्तमतिखट्वायेत्यत्र लाक्षणिकत्वान्नयाडिति तन्मतमाश्रित्य शङ्कते नान्विति ननु लाक्षणिकत्वं यदि याडप्रवृत्तिसाधकत्वंहिं खट्वायै इत्यादावपि न स्यादित्याशङ्क्याह नचेति तैः परैः प्रकाशकारादिभिः अपिशब्दः कैयटादिपरामर्शकः अभिमान इति एतेनारुचिर्ध्वनिता तथाहि ओदितिसूत्रभाष्ये ऽदो ऽभवदित्यसूत्रौदिति प्रगृह्यत्वप्राप्तिमाशङ्क्य लक्षणप्रतिपदोक्तपरिभाषया समाधानङ्कृतं यदि वर्णग्रहणे तस्याः परिभाषाया अप्रवृत्तिस्तदा भाष्यविरोधः स्पष्ट एव अत एव स्थानिवत्सूत्रभाष्ये अतिखट्वायेत्यत्रापः प्रत्ययत्वात्तदन्तस्य

लाभे तस्याङ्गविशेषणत्वेनावल्लान्तं यदङ्गमित्यर्थेनातिखट्वायेत्यत्र प्राप्तस्यापि याटो ङ्याब्ग्रहणे ऽदीर्घे इति वार्तिकेन समाधाने ऽपि श्रुताकारस्मृतानुबन्धाभ्यामाप्त्वमाश्रित्य पुनरपि याटः शङ्काकृत्वा लाक्षणिकत्वेन समाधायाकारप्रश्लेषे वार्तिकप्रत्याख्यानपक्षे समाधानान्तरन्न कृतमिति लक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तिरेव समाधानमिति ध्वनितम् नचाङ्गस्येत्यस्य विशेषणत्वेनाङ्गसंज्ञकं यदावल्लमित्यर्थ एवोचित इति वाच्यम् पदाङ्गाधिकार इति वचनेन तस्य विशेष्यतायां एवोक्तत्वात् अत एवार्द्धखट्वायै इत्यत्र याटः प्रवृत्तिः एवञ्चात्रत्यम्परममूलम्मूलञ्च प्राचामनुरोधेनेति तत्त्वम् अत एव ह्रस्वयोरप्राप्तेरेव नेति निवृत्तमिति निषेधस्य प्राप्तिपूर्वकत्वेन यू स्त्र्याख्यावितिसूत्रे च दीर्घस्य ग्रहणेन विधेरप्राप्तेर्नेति । निवृत्तमित्युचितमेवेति भावः ननु ह्रस्वघटितवाक्यव्याख्यानावसरे तथाकथनेन दीर्घघटितेनेत्यस्य सम्बन्धो ऽस्तीति गम्यते तथाच तदघटितवाक्यस्य वा न स्यादित्येव व्याख्यानमुचितमत आह भावेति भावमात्रेत्यर्थः उभयत्र तात्पर्यकल्पनापेक्षया ऽप्राप्तभावस्यैकस्य कल्पने लाघवम्भवति अत एव ह्रस्वघटितवाक्येनैकवाक्यतापि भवति नच दीर्घघटितवाक्ये ऽपि नेत्यस्य निवृत्त्या तदंशे उभयत्र विभाषात्वमेवास्त्विति वाच्यम् अकल्पितकल्पनापेक्षया कल्पितार्थस्य कल्पनायां लाघवात् ननु स्त्र्याख्यपदस्य प्रकान्तत्वात्स्त्रियामित्येवेत्ययुक्तमत आह इष्वादीनिति उपक्रमानुरोधात् इष्वादिष्वप्राप्तिशङ्का या कृता सा आख्याग्रहणप्रयोजनप्रदर्शनोपक्रमानुरोधात् तथाहि भाष्ये आख्याग्रहणाद्धिमर्षेण नदीसंज्ञायामाख्याग्रहणं स्त्रीविषयार्थम् स्त्रीविषयावेव यौ निल्लयोरेव नदीसंज्ञा यथा स्यात् इह माभूत् ग्रामण्ये सेनान्ये स्त्रियै इति अत्र कैयटः आख्याग्रहणसामर्थ्यान्नियम आश्रीयते स्त्रियमेव यावाचक्षाते ननु लिङ्गान्तरयुक्तयोरित्यर्थः आख्याग्रहणप्रयोजनप्रदर्शके ऽस्मिन्वार्तिके विषयशब्दो ऽनन्यपरे तदर्थोतक एवकारो व्याख्यानपरभाष्ये एवकारार्थ एतीति निल्लशब्देनाख्यातः ग्रामण्ये इति ग्रामणीशब्दः क्रियाविषयत्वात्तिङ्गत्वान्स्त्रीविषयो न भवतीति स्त्रियामपि वर्तमानो नदीसंज्ञो न भवति एवम्भाष्यं व्याख्याय शङ्कितं यद्येवमिष्वशनिप्रभृतीनामुभयलिङ्गानामप्यूवादीनाञ्च गुणवचनत्वात्तत्तल्लिङ्गानां स्त्रीविषयत्वाभावात्स्त्रियां वृत्तौ ङिति ह्रस्वश्चेति नदी-

संज्ञा न प्राप्नोति इति। ततः एवन्तर्हि ङिति ह्रस्वश्चेत्यत्रैवंविधो नियमो नाश्रीयते इति समाहितम् क्रियाविषयत्वादित्यनेन प्रवृत्तिनिमित्तैक्यन्दर्शितम् यत्र प्रवृत्तिनिमित्तभेदस्तत्रैव वाचकशब्दभेदः विशेष्यभेदे लिङ्गभेदे च न तत्तद्भेदे ऽपि शब्दभेदव्यवहाराभावात् ततः स्पष्टप्रतिपत्त्यर्थङ्केवलस्य स्त्रीशब्दस्यानुवर्त्तनाददोष इति चोक्तम् तदुक्तेर्ह्रस्वांशमात्रपरत्वे भाष्यमेव साधकमस्तीत्यत आह यू स्त्र्याख्यावितीति तदाहेति ह्रस्वघटितवाक्यस्य नित्यस्त्रीलिङ्गभिन्ने ऽपि प्रवृत्तिरित्येतदाहेत्यर्थः एवञ्चोपक्रमभाष्यं ग्रन्थस्यात्र दीर्घघटितवाक्ये ऽनुवृत्तं यत्स्त्र्याख्यपदन्तन्नित्यस्त्रीलिङ्गबोधकमित्यर्थकमिति कटप्रुवे ब्राह्मण्यै इत्यत्र नदीसंज्ञा नेति भावः वस्तुतस्तु ङितीतिसूत्रे ऽनुवृत्तं यत्स्त्र्याख्यपदन्तत्स्त्रीवाचकमित्येतन्मात्रार्थकं शब्दाधिकारानुरोधात् तच्च ङिदाक्षिप्ताङ्गविशेषणमिति कटप्रुवे ब्राह्मण्यै इत्यत्र विकल्पो भवत्येव ङितीत्यत्रैवंविधो नियमो नाश्रीयते इत्युक्तिरुभयसाधारणी मूलन्तु प्राचामनुरोधेन परममूलन्तूभयसाधारणमत एव ङिति ह्रस्वश्चेति प्रतीकमुपादाय ह्रस्वघटितवाक्ये दीर्घघटितवाक्ये चैतदिति भाष्यप्रदीपोद्योते उक्तम् लिङ्गान्तरविशिष्टेति अत्र प्रवृत्तिनिमित्तैक्य इत्यस्याकथनेन यत्र प्रवृत्तिनिमित्तभेदस्तत्र शब्दस्य वाचकभेद एवास्तीति ध्वनितम् तेन कैयटेन हरदत्तसम्मतार्थस्य लाभोपायमाह पूर्वभाष्य इति। स्त्रीविषयावेव यौ नित्यमिति भाष्य इत्यर्थः व्याचष्टे प्रकाशयति शब्दार्थ एव शब्दवाच्य एव एवञ्च केवलस्याप्शब्दस्य प्रयोगे यथा स्त्रीत्वस्य प्रतीतिस्तथेष्वादिमात्रप्रयोगे ऽपि भवतीति भावः व्यावर्त्त्याभाव इति व्यावर्त्तत्वाभाव इत्यर्थः तन्मते व्यावर्त्त्यन्तु अतिकौशाम्बिरित्यादिरिति यद्यपि सम्भवति तथापि वार्त्तिकेन प्रथमलिङ्ग्रहणञ्चेत्यनेन तु दुर्वारमिति खलप्वादिकं व्यावर्त्त्यम्बोध्यम् वृत्त्याशयं स इत्यनेनात्रारुचिर्ध्वनिता उक्तभाष्याज्झटिति तादृशार्थाप्रतीतिरिति ह्रस्वघटितवाक्ये ऽपि स्त्र्याख्यपदमेव सम्बध्यते नतु स्त्रीत्येकदेश एव अत एव यू स्त्र्याख्याविति सूत्रे ह्रस्वयोर्ग्रहणमिति पक्षे शकट्यै इत्यत्र गुणो न प्राप्नोति नदीसंज्ञया बाधितत्वादिति शङ्कां कृत्वा यू स्त्र्याख्यौ नदी नेयङुवङ्स्थानावस्त्री वामि ततः ङिति ङितिचेयङुवङ्स्थानौ यू वा अस्त्री नदीसंज्ञौ न भवतः ततः ह्रस्वौ ह्रस्वौ स्त्र्याख्यौ यू ङिति नदी-

संज्ञौ भवतः इयङुवङ्स्थानौ वा नेति निवृत्तम् ततो धि घिसंज्ञौ भवतः स्त्र्याख्यौ यू ह्रस्वौ ङिति इत्युक्तम् एतत्पक्षे घिनदीसंज्ञयोरेकविषयत्वादेकसंज्ञाधिकारात्पर्यायेण प्रवृत्तौ शकट्यै शकटये इति भवति एवं योगविभागेन समाधाय ह्रस्वदीर्घयोरविशेषेण नदीसंज्ञां विधाय तस्याः ह्रस्वयोर्घिसंज्ञा बाधिका तस्मान्नित्यं प्राप्तायामियंङिति विभाषा आरभ्यते इति योगविभागाभावमाश्रित्योक्तम् एतस्मिन्भाष्यग्रन्थे ह्रस्वघटितवाक्ये ऽपि स्त्र्याख्यपदस्यैव सम्बन्धः कृतो नत्वेकदेशस्येति केवलस्त्रीपदमात्रानुवृत्तिर्न युक्ता एवंसति मूलासङ्गतिः प्राप्नोति तद्योजनायाह नित्यत्वार्थकमिति परत्वादित्यत्र विशेषाकाङ्क्षानिवृत्तये आह ङेरामिति नच परत्वादौत्वे ऽपि पुनः प्रसङ्गविज्ञानन्यायेन ङेरामित्यनेनैव सिद्धमितीदुद्भ्यामिति व्यर्थमिति वाच्यम् पुनःप्रसङ्गविज्ञानन्यायानित्यत्वज्ञापनार्थन्तस्य सत्वात् तेन सकृद्गताविति नापूर्वामिति बोध्यम् ननु रादेशविषये विशेषचिन्तायामपि तिस्र इत्यस्य जसि रादेशो वक्तव्यो गुणस्य परत्वादित्यर्थकेन जसि रादेशो गुणपरत्वादित्यनेन सिद्धिर्भविष्यतीत्याशयेनाह इदमिति इदम् लक्ष्यम् आदिना प्रियचतस्रावित्यस्य सङ्ग्रहः इदञ्चेति बाध्यसामान्यचिन्ताश्रयणञ्चेत्यर्थः मूले विशेषचिन्तापक्षे यो दीर्घोत्वयोर्बाध उक्तः स केवल मध्ये ऽपवादन्यायमात्राश्रयणपक्षे यदि त्वनन्तरस्येति न्यायस्यापि प्रवृत्तिचिन्तनन्तदाप्याह अनन्तरस्येतीति अथ विशेषचिन्तायामपि रादेशविषयताव्यापकविषयताकत्वञ्च कस्याप्यस्तीति येन नाप्राप्तिन्यायविषयतायाः अभावात्सर्वशास्त्रस्य बाधः सिद्ध एवेति बाध्यसामान्यचिन्ताश्रयणं व्यर्थमित्याशङ्कते नन्विति येन नाप्राप्तेति परिभाषायां येनेत्यस्य यद्धर्मावच्छिन्नकार्येणेत्यर्थः एवञ्च परूपत्वावच्छिन्नकार्ये ऽवश्यमाप्ते आरभ्यमाणया वृद्ध्या परूपसामान्यबाधे प्राप्ते व्यवस्थापकन्यायविशेषस्य सञ्चारो भवति यथा तथात्र नास्ति कुत्रापि शास्त्रे स्वविषयताव्यापकविषयताकत्वसत्वस्याभावादिति भावः समाधत्ते किमिदमिति अयम्भावः लक्ष्यानुरोधेन प्रकृते व्यक्तिपक्ष आश्रीयते। तस्मिन्पक्षे लक्षणस्य भेदेनैकैकलक्षणेन येन नाप्राप्तिन्यायस्य निरूपणङ्कर्तुं शक्यमिति गुणस्य गुणपरत्वादिति परत्वादित्यर्थः प्राप्ताविति शेषः वक्तव्य इत्यस्य पूर्वविप्रतिषेधेनेति शेष इति तदभिप्रायः बाध्यसामान्यचिन्तेति एतेन तस्य वार्तिकस्य बाध्यविशेषचिन्तायामारम्भः कृत इति न पूर्वविप्रतिषेधाभि-

प्रावकत्वन्तस्येति सूचितम् किञ्च भाष्ययोरेकवाक्यत्वोपपत्तये रादेशइत्यस्य बाध्यसामान्यचिन्तयेत्यादौ पूरणीयमित्येव युक्तमित्यत आह बाध्यसामान्येति क्लिष्टञ्चेतीति ऐकेन हेतुना सर्वबाधसिद्धावनेकहेतुना तस्य कल्पनं क्लिष्टमित्यर्थः अश्रुतत्वादिति अङ्गस्याश्रुतत्वात्तत्सम्बन्धस्य श्रुतत्रिचतुर्विशेषणत्वेन विशेष्याकाङ्क्षानिवृत्तेरनाकाङ्क्षत्वेनासम्भवादिति भावः ननु स्त्रिया अत्यपदार्थत्वेन समुदायस्य स्त्रियां वृत्तिर्नत्ववयवयोस्त्रिचतुःशब्दयोरिति स्त्रियां वर्तत एवेत्यसङ्गतमतो भावं व्यनक्ति अजहदिति त्रिशब्देनापीति अपिनाङ्गस्य समुच्चयः नच स्त्रीनिष्ठसङ्ख्यासमर्पकयोरित्यथनानयोः स्त्रियामित्येतद्विशेषणवैशिष्ट्यमिति वाच्यम् स्त्रियां वर्तमानयोरित्यर्थस्य तद्ग्रन्थे दर्शनेन तद्दीत्याद्य दोषस्याभिधानात् अन्तरङ्गं यत्स्वगतं स्ववाच्यार्थगतं वा स्त्रीत्वन्तत्रैवादेशो नतु पदान्तरसन्निधानजन्यप्रतीतिविषयस्त्रीत्व इत्याशयिकामाशङ्कान्निराचष्टे नचेति बहिरङ्गमिति एतेनान्तरङ्गं यत्पुंस्त्वं नपुंसकत्वन्तदेव कार्यस्य प्रयोजकन्नत्वेतादृशम्बहिरङ्गमत एव पञ्चाजीत्यत्र न टाविति सूचित् तात्पर्यग्राहकान्तरानपेक्षप्रतीतिविषयत्वमन्तरङ्गत्वञ्च स्त्रीत्वे नास्तीत्याशयेन तदुक्तिन्निरस्यति त्रिशब्देनेत्यादिना ननु कथम्पुन्नपुंसकवृत्तिता सङ्गच्छतामिति मूलासङ्गतिः यदि पुन्नपुंसकवृत्तित्वाभावस्यादेशप्रवृत्तौ निमित्तता स्यात्तदा पुन्नपुंसकवृत्तित्वाभावाभावाभिन्नस्य पुन्नपुंसकवृत्तित्वस्यादेशाभावप्रयोजकत्वं स्यात्तथातु नास्तीत्यत आह । स्त्रियामिति तत्र च पुन्नपुंसकयोश्च तथाच मूलग्रन्थस्य तदुक्तानियमखण्डन एव तात्पर्यमिति भावः नच स्त्रियान्तत्र चेत्यसङ्गतम् विरुद्धलिङ्गद्वयवृत्तित्वस्यासम्भवादिति वाच्यम् दारानित्येतस्मात्पुंस्त्वेन वस्तुत स्त्र्यर्थस्य प्रतिपादनदर्शनेन लिङ्गयोर्विरोधस्यैव भावात् उक्तार्थे अत्रेदं वक्तव्यमित्यादिग्रन्थेनोक्तार्थे । रूढेरविरोधित्वेनेति जहत्स्वार्थातु तत्रैव यत्र रूढिर्विरोधिनीति वृद्धव्यवहारस्य सत्वादिति भावः रूढिः समुदायशक्तिर्यत्रावयवार्थाभिन्नार्था वृत्तिस्तत्रैव जहत्स्वार्था यथा रथन्तरमण्डपादिषु तथा त्विहनास्ति समुदायशक्तेस्तद्विरुद्धत्वाभावात् ननु वृद्धोक्त्यनादरेण मूलग्रन्थस्य योजनं स्यादेवेत्यत आह किञ्चेति इत्येवार्थ इति जहति पदानि स्वानि यं स जहत्स्वः जहत्स्वो ऽर्थो यस्यां सा जहत्स्वार्था एवमजहत्स्वार्थेत्यत्रापि बहुवचनं प्रयोगभेदेन अयमत्र विवेकः यत्र रूढिर्विरोधिनी

तत्रावयवानां वाक्यदृष्टस्य स्वार्थस्य सर्वथा त्याग एव समुदायशक्त्यैवार्थविशेषस्य प्रतीतिः यत्र तु न रूढिर्विरोधिनी राजपुरुष इत्यादौ यथा तत्रापि राजपदस्य राजत्वनिष्ठप्रकारतानिरूपिता या मुख्यविशेष्यता तदवच्छिन्नो ऽर्थस्तद्घटकस्य प्राधान्यांशस्य त्यागो वृत्तावेतावतैव जहत्स्वार्थावृत्तिरिति व्यवहारः सर्वथानर्थकत्वे ऽवयवशक्तिग्रहाभावे ऽपि समुदायशक्तिग्रहाद्बोधापत्तिरिति अत एवावयवशक्तिसहकृतसमुदायशक्त्या विशिष्टैकोपस्थितिजनकत्वमेकार्थीभाव इति वदन्ति भाष्येपीत्थं व्युत्पाद्य पक्षान्तरमुक्तमथवा ऽन्वयाद्विशेषणभविष्यतीति एतत्पक्षे राजादुच्चपसर्जनपदे वृत्तौ स्वार्थस्य त्याग एव पुरुषादिपदमेव राजसम्बन्धविशिष्टपुरुषे शक्तमिति यथा चम्पकादिपुष्पाणामभावे ऽपि तदीयामोदान्वयमात्रेण चम्पकपुटमित्यादिव्यवहारस्तद्वत्पुरुषादिपदेन राजसम्बन्धवत्पुरुषादीनाम्प्रतिपादनेन राजत्वविशिष्टस्य तत्र भानाद्राजपदार्थः पुरुषे विशेषणमिति व्यवहारः एतत्पक्षे जहति पदान्युपसर्जनीभूतानि स्वार्थं यस्यामिति जहत्स्वार्थेत्यस्यार्थः अजहत्स्वार्थापक्षेतु नैवम् अजहत्स्वार्थापक्ष एव व्यपेक्षां सामर्थ्यमेक इत्यनेनोक्तः अन्य इति अजहत्स्वार्थापक्षे प्रागुक्तार्थके सः अन्यपदार्थः इत्याशय इति स्त्रियां वर्तनवादिन इत्यादिः तुल्यमिति तथा चाजहत्स्वार्थापक्षावैशेषोपादानमफलमिति भावः समुदायघटकत्वेन स्त्रीयां यद्यपि वृत्तिस्तथापि त्रिशब्दमात्रे न पर्याप्तिसम्बन्धेन स्त्रीवाचकत्वमुक्तं च तादृशी विवक्षाभिप्रेतेत्याशयेन शङ्कते यदीति तुल्यमिति प्रियात्रिरित्यादावुक्तयुक्तिद्वयकृतभेदाभाव इत्यर्थः एतेन ग्रन्थेन यत्त्विल्यादिना यत्प्रसादकारमतन्दर्शितत्तदेव युक्तन्नतु मूलोक्तमिति दर्शितम् । नन्विकोचीति सूत्रे ऽङ्ग्रहणाभावे भ्यामादौ नुमः प्रवृत्तिस्वीकारे या इष्टापत्तिः सत्यपि नुमि तल्लोपसभ्वादित्यनेन दर्शिता सा न युक्ता पञ्चत्रपुभ्यामित्यादौ परत्वान्नुमि तस्य लोपे ऽपि स्वरविधौ नलोपस्यासिद्धत्वेनानिगन्तत्वादिगन्तकालेत्यादिसूत्रविहितस्वरानापत्तेरत आह पञ्चेति प्रकृतिस्वर इति सिद्ध इति शेषः अन्तरङ्गत्वादिति नुमागमापेक्षया ऽन्तरङ्गत्वादित्यर्थः नुण्विभक्तिसापेक्षत्वेन बहिरङ्ग इति भावः एवञ्च नुम इगन्तत्वविघातकत्वमभ्युपेत्योक्तम् नन्वकृतव्यूहपरिभाषया तर्हि पूर्वं स्वरो न भविष्यतीत्याशङ्कायामाह अकृतेति अनित्या ह्यवोरितिसूत्रे सतुक्ग्रहणादिति शेषः तथा-

चासिद्धमिति परिभाषया नुमः पूर्वं स्वरो भविष्यतीति भावः नन्वेवमप्यतिराभ्यामित्यादौ नुमः समुदायभक्ततया ऽवयवस्य रैशब्दस्य हलादिविभक्तिपरत्वाभावादाल्वन्न स्यादत आह अतिराभ्यामित्यत्रेति नन्वाकारस्य ह्रस्वसंज्ञकत्वेन पूर्वविप्रतिषेधेनादौ नुमागम एव स्यादित्याशङ्कां वारयति वृद्ध्याविति उक्तरीत्या प्रियतिसृभ्यामित्यत्र तिस्रादेशाप्रवृत्तिशङ्कां वारयति प्रियेति नन्वेवमपि शुचीनामित्यादौ पूर्वविप्रतिषेधेन नुटि सति नुमागमेन लोपे तस्यासिद्धत्वादिन्नन्तत्वेन दीर्घो न स्यादिति शङ्कां वारयति शुचीति तथाच लक्ष्यानुरोधेन सकृद्गतिन्यायस्यैव प्रवृत्त्या दोषपरिहारो भविष्यतीति भावः बहुभिरित्यत्र नुमागमेन लोपेपि तस्यासिद्धतया नान्तसङ्ख्यावाचकत्वेन षट्त्वात्षट्त्रीति स्वरापत्तिरिति शङ्कां वारयति बहुभिरित्यादिना। षट्त्वेपि नलोपस्यासिद्धत्वात्षट्त्वेपि तदभावेपीति अज्ग्रहणसत्वे तदभावेपीत्यर्थः अन्तोदात्ततयेति फिट्त्वेनेत्यादिः उत्तरार्थम् तृतीयादिष्विति सूत्रार्थम् युक्तत्वात् स्वरितत्वाकल्पनेन तत्रैव पाठस्य युक्तत्वादिति शेषः अन्यत्र भाष्यादौ ननु निषेधानित्यत्वेन प्रियतिसृशब्दे यदि तिस्रादेशस्तदा तथैवानडपि स्यादत आह तथैवेति सन्निपातपरिभाषाया अनित्यत्वे प्रकृते ज्ञापकान्तरन्नोपन्यस्तमिति चकारासङ्गतिरत आह चो हेताविति स्थानग्रहणलभ्यार्थस्योपलक्षणत्वाभिप्रायेण व्याचष्टे इत्यडादीति तेन उपलक्षणत्वस्य सूचनेन निषेधसिद्धिरिति श्रियावित्यादावियङः स्थितेः सत्वादिति भावः उपलक्षणत्वे मानन्तु यू स्त्र्याख्यावितिसूत्रस्थभाष्यमेव तत्र हि आध्यै प्रध्यै इत्यादौ आसमन्ताद्धीर्यस्येत्यर्थके ऽवयवस्य स्त्रीविषयत्वादित्यर्थे ऽवयवस्य स्त्रीविषयत्वात्सिद्धमिति चेदियङ्स्थानस्य निषेधो यण्स्थाने ऽपि स्यादवयवस्येयङ्स्थानत्वादित्याशङ्क्य सिद्धन्त्वङ्गरूपग्रहणात् यस्याङ्गस्य इयङुवङौ भवतस्तस्येदङ्ग्रहणमिति नचैतस्याङ्गस्येयङुवङौ भवत इत्युक्तम वामि अत्र केचित् वाचि ह्रस्वश्चेत्येकयोग एव कर्तव्ये वामि डिति ह्रस्वश्चेति सूत्रद्वयकरणाङ्किमर्थमिति आत्राहुः श्रियै श्रिया इत्यादावाद्सम्पादकतया नदीसंज्ञायाश्चरितार्थाया श्रीणामित्यत्र नुट्प्रयोजकत्वन्न स्यात्सन्निपातपरिभाषाविरोधादिति सुदत्यावित्यादौ नदृच्यतश्चेति कबापत्तेश्चेति परे आट् परेतु सूत्रद्वयकरणमुभयोः सूत्रयोर्विभिन्नावस्थासिद्धय इति कल्प्यते वामीति सू-

त्रं वृत्तावङ्गस्य स्त्रीत्वे ऽस्त्रीत्वेच ङि-तीतिसूत्रन्तु यदा वृत्तौ प्रवर्तते तदा इयङुवङ्स्थानिनोः ह्रस्वस्य च तदन्ताङ्गस्य च स्त्रीत्व एव नचैवंसति श्री-शब्दात्कनि लुपिच श्रियै ब्राह्मणाय श्रिये ब्राह्मणायेति न स्यात् इयङ्स्थानिनः पुंस्त्वादिति वाच्यम् लुपि युक्तवदित्यनेन प्रत्ययार्थनिष्ठलिङ्गप्रयुक्तकार्याभावस्यातिदेशात् एवञ्च प्रत्ययार्थनिष्ठं यत्पुंस्त्वन्तत्प्रयुक्तस्याङ्गस्य स्त्रीत्व एवेति नियमप्रयोज्यस्य विकल्पाभावस्याभाव एव यथा चश्चाः पश्येत्यत्र प्रत्ययार्थनिष्ठपुंस्त्वाभावातिदेशेन नत्वाभावो भवति तद्वत् नचैवञ्चञ्चा अभिरूप इति भाष्यीयप्रयोगस्याप्यसङ्गतिः विशेषणानाञ्चाजातेरित्यनेन विशेषणे पुंस्त्वाभावातिदेशस्य प्राप्तेरिति वाच्यम् मनुष्यलुपि प्रतिषेध इत्यनेन प्रतिषेधात् एवञ्च विशेष्यस्य न्यायप्राप्तं यत्पुंस्त्वन्तदवच्छिन्नसामानाधिकरण्यादभिरूपपदस्य पुंस्त्वम् अत एव लुबन्ते शकट्यै ब्राह्मणायेत्यत्रापि विकल्पो भवत्येव यथा दारादिशब्दानां शक्तिस्वाभाव्याच्छास्त्रीयोपचयरूपपुंस्त्वाभिधायकत्वन्तथा लुबन्तस्य लुपि युक्तवदित्यनेन प्रकृतिगतलिङ्गातिदेशाच्छास्त्रीयापचयरूपस्त्रीत्वाभिधायकत्वं स्वीक्रियते इति वदन्ति ननु ङितीति सूत्रे ऽनुवृत्तं यदूच इति तद्विभक्तिविपरिणामेन य्वोर्ह्रस्वाविल्येतदर्थकञ्ज्ञातमिति पुनर्यू इत्यस्य विशेष्यस्य कथं लाभ इति चेन्न ह्रस्वश्चेति चकारस्य ह्रस्वातिरिक्तसंज्ञिसमुच्चायकतया ऽकल्पितकल्पनापेक्षया प्रकरणप्राप्तस्य यूइत्यस्य समुच्चये लाघवात् हेसुश्रु इत्यत्र नेयङुवङ्इत्यस्य यथाप्राप्तिस्वदर्शयति इयङादीत्यादिना । अङ्गाधिकारे ऽस्य सूत्रस्थापाठादाह आक्षेपादिति बाधकाबाधितेति तेन प्रकृष्टाधीः प्रधीः प्रध्यै इत्यत्र न निषेधस्तत्र यणादेशेनेयङो बाधस्य सत्वादिति भावः नचाक्षिप्तार्थस्य शाब्दबोधे भानाभावेनाङ्गघटितवाक्यार्थबोधः कथमिति वाच्यम् यू स्त्रार्ख्याविति सूत्रस्थभाष्यप्रामाण्येनाक्षिप्तस्याप्यङ्गस्य तत्र भानाङ्गीकारात् तत्राहि क्विब्लुप्समासस्थले कुमार्यै ब्राह्मणाय खरकुट्यै ब्राह्मणाय अतितन्त्र्यै अतिलक्ष्म्यै इत्यत्र च नदीसंज्ञासिद्ध्यर्थम्प्रथमलिङ्गग्रहणञ्चेति वार्तिककृतोक्तम् यः शब्दः प्रथमं स्त्रीत्वविशिष्टार्थमाह पश्चात्तु प्रकारान्तरेणार्थान्तरं लिङ्गान्तरयुक्तमतिपादयति तस्यापि नदीसंज्ञा भवतीति तदर्थः तत्तार्हि वक्तव्यन्न वक्तव्यम् अवयव स्त्रीविषयत्वात्सिद्धम् अवयवो ऽत्र स्त्रीविषयस्तदाश्रया न-

दीसंज्ञा भवतीत्येवंरीत्या तस्य वार्तिकस्य प्रत्याख्यानङ्कृत्वा अवयवस्त्री-विषयत्वात्सिद्धमिति चेदियङ्उवङ्स्थानप्रतिषेधे यण्स्थानप्रतिषेधप्रसङ्गो ऽवयवस्येयङ्उवङ्स्थानत्वात् आध्यै ब्राह्मण्यै इत्याशंक्य सिद्धन्त्वङ्गस्वरूपग्रहणात् यस्याङ्गस्येयङ्उवङौ भवतस्तस्येदङ्ग्रहणन्नचैतस्याङ्गस्येयङुवङौ भवत इत्युक्तामिति प्रतिपादितं एवञ्च प्रकृष्टाधीर्यस्या यस्य वा प्रधीरित्यत्रावयवस्य धीशब्दस्य नदीसंज्ञा ऽस्त्येवेति भावः रामस्य वाक्ये इति रावणकृतसीतापहारे रामविलापो ऽयम् सीताया इति हेसुभ्रु इत्यस्य हे-सीते इत्यर्थे एव कवितात्पर्यम् इदमपि सामान्ये नपुंसकत्वमपि केचिन्तु सुभ्रु क्रियाविशेषणमित्याहुः तच्चिन्त्यम् हेइत्यस्यानन्वयापत्तेः धात्वर्थफलाभेदान्वयविवक्षायाङ्क्रियाविशेषणानाङ्कर्मत्वक्रीवत्वयोरङ्गीकाराच्च वस्तुतस्तु हापितः इति विधिना त्वया ऽहं हापितस्त्यजितः हेसुभ्रु त्वङ् क्वासि इत्येवं बहु विललापेत्यर्थः एवञ्च विरहपीडितत्वादनवधानतया तथोक्तौ विरहस्य पुष्टता गम्यत इति काव्यगुणत्वेन यत्परममूले प्रमाद एवायमित्यनेनावधानलक्षणः प्रमादो ऽभिहितः स एव समाधिर्युक्त इति बोध्यम् अत्र प्राचीनोक्तं समाधानन्निरस्यति नच्चघटितमिति ॥ इत्यजन्तस्त्रीलिङ्गविवरणम् ॥ वक्ष्यमाणरीत्या म्इतिच्छेदेपीष्टसिद्धिरित्यभिप्रायेणाह एकेनेति तेनच संयोगान्तस्य झलो लोप इति वाक्येनच पूर्ववाक्यस्य संयोगान्तस्य लोप इति वाक्यस्य क्वचिदिति एतच्च यणः प्रतिषेधो वाच्य इत्यनेन फलाभेदायोक्तम् सन्निपातपरिभाषाप्रवृत्तिमुपपादयति ह्रस्वाकारेति जातस्येति मादेशस्येत्यर्थः मूले भाष्यकृता ध्वनितत्वादिति तत्र हि श्रमः शित्करणङ्किमर्थमिति विचारे शकाराभावेनान्तलोप इत्यस्य यत्रानामित्यत्रातिप्रसङ्गमाशङ्क्य दीर्घे जाते नास्ति लोपस्य प्राप्तिरिति पूर्वपक्षिणा शङ्किते परत्वादीर्घबाधित्वा नलोपः स्यादिति सिद्धान्तिनोक्तम् तत्र कैयटः अग्नीनामित्यत्र दीर्घस्य हिनस्तीत्यत्र नलोपस्य चरितार्थतया परत्वान्नलोपः स्यात् यद्यपि लोपात्परत्वात्सुपिचेति दीर्घः सम्भवति तथापि सन्निपातपरिभाषया न भविष्यति नामीति दीर्घेतु सन्निपातपरिभाषा न प्रवर्तते आरम्भसामर्थ्यात् ॥ यद्यपि कण्ठाय क्रमणइतिनिर्देशेन सुपचेतिदीर्घे ऽपि सन्निपातपरिभाषाया अनित्यत्वादप्रवृत्तिरिति लभ्यते तथाप्यत्रानित्यत्वे न मानमिति तात्पर्यम् अत एव परिभाषेन्दुशेखरे यादेशः

सुपिचेति दीर्घत्वस्येत्युक्तम् वस्तुतस्तु एङ्-ह्रस्वादितिसूत्रे हेकुलेत्यादेः साधनाय वैयधिकरण्येनान्वयरूपस्य प्रयासस्य भाष्ये कृतत्वेनास्मिन्पक्षे तस्य वैयर्थ्यापत्त्या मुइति छेदो भाष्यविरुद्ध इति बोध्यम् मूलन्दूषयति परेत्वित्यादिना प्राप्तयोरिति कुण्डानि अतिजरस इत्यत्र चरितार्थयोरित्यादिः पूर्वम् जरसादेशात्पूर्वम् पक्षान्तरमाह अधिकेति अधिका व्यापिका या विभक्तिर्यस्मिन्निमित्ततत्वेन स अधिकविभक्तिर्जरस् तदपेक्षयेत्यर्थः अन्तरङ्गतेति पाठः । अन्यथा उक्तरीत्यनङ्गीकारे असङ्गतिरिति तदा तस्यासर्वनामस्थानत्वेन नुमः प्राप्त्यभावेन विप्रतिषेधविचारासङ्गतिर्मतु जरसादेशात्प्राक् शिभावे तस्य सर्वनामस्थानत्वात्तत्सङ्गतिः अत्रापि द्वितीयैकवचनेपि अत इति तपरत्वस्य दीर्घाभावृत्तिर्न फलम् ह्रस्वो नपुंसकइति ह्रस्वस्यैव सत्वादत आह अत इतीति ननु अतोमिति सूत्रे मुइति छेदे पूर्वोक्तरीत्या सन्निपातपरिभाषाप्रवृत्तिसम्पादनद्वारा तपरकरणञ्चरितार्थमित्युच्चारणार्थ इत्यसङ्गतमितिचेन्न तस्य अन्यस्यामितिछेदाभिप्रायकत्वात् । एतेन स्वस्यामिति छेद एवाभिमत इति ध्वनितम् पूर्वोक्तार्थं स्फुटयति नत्विति ननु विभक्तित्वस्यापेक्षायामपि तस्य नपुंसकत्वेन स्त्रीत्वस्योपपादनासम्भव इत्यत आह तद्वतेति साहचर्यपरिभाषावान्निरनुबन्धकपरिभाषाया अपि प्रवृत्तिः स्यादिति शङ्कां वारयति निरनुबन्धकेति तदनुच्चारण एवेति ज्ञापकसाजात्यादिति शेषः तेन प्राचीनोक्तसंज्ञाकरणेन सन्निपातपरिभाषयेति अस्य तृतीयान्तस्य जरसभावे ऽन्वयः मूले सान्तेति पृथक्पदमिति इदमत्र बोध्यम् पृथक्पदञ्च न बहुव्रीहिसंज्ञकम् किन्तु समासानात्मकलुप्तषष्ठीकपदद्वयसमुदायरूपम् अत एव हंस इत्यत्र न दीर्घः सेति संयोगस्य समानाधिकरणं विशेषणम् तदन्तसंयोगस्य लाभः अङ्गस्येतितु प्रकृतत्वदन्तपदार्थे चरमावयवे ऽन्तपदार्थश्च सान्तसंयोगस्य विशेषणमिति सम्बुद्धिभिन्नसर्वनामस्थानपरकाङ्गचरमावयवाभिन्नसान्तसंयोगस्य यो नकारस्तदुपधाया इत्यर्थात् ननु सर्वनामस्थानस्य सान्तसंयोगविशेषणत्वेन निर्दिष्टपरिभाषया हंस इत्यादौ न दोष इतिचेन्न प्रत्ययस्याङ्गांशे उत्थिताकाङ्क्षत्वेन तद्विशेषणत्वस्य न्याय्यत्वात् अत एवानत्यविकारइतिपरिभाषया हंसशिरांसीत्यादिप्रयोजनान्युपपद्यन्ते षड्भः सम्भसारणमिति सूत्रभाष्ये निमित्तस्य कार्यविशेषणत्वकल्पनेनोक्तपरिभाषाया प्रयोजनात्य-

थासिद्धिप्रदर्शनन्तु शिष्यबुद्धिवैशद्यार्थमत एव परिभाषाया आवश्यकत्वाभिप्रायेण तत्सूत्रव्याख्यानशेषे उदात्तनिर्देशात्सिद्धिमित्युपसंहारः कृतो भगवता तया परिभाषया हंसो व्यंसक इत्यत्र दोषपरिहारस्तु न सम्भवति अन्त्यसदेशानन्त्यसदेशयोर्युगपत्प्राप्त्यभावेन तस्याः प्राप्त्यभावात् नच हंसइत्येतत्सिद्धये या रीतिरुक्ता तयैव हंसशिरांसीत्यत्र दोषाभावे सिद्धे ऽनन्त्यविकारइतिपरिभाषायास्तत्र सञ्चारो विफल इति वाच्यम् सान्तेतिसूत्रस्य यथाश्रुतार्थपक्षाभिप्रायकत्वात् पारिभाषिकार्थस्य अन्त्याल्व्यवहितपूर्वस्य श्रीपायेत्यत्र सन्निपातपरिभाषया दोषाभावप्रतिपादनं यत्परमम्लेच्छ कृतन्तदुपपादनमवर्णमाश्रित्येत्यादिना मूले कृतन्नोपपद्यते यादेशोपजीव्यस्य ह्रस्वाकारस्य दीर्घेणैव निवर्तनात्तस्यासत्वेनातो धातोरित्यनेन तदनिवर्तनादतो भावं व्यनक्ति ह्रस्वत्वविशिष्टमित्यादिना । तत्र श्रीपायेत्यत्र अवर्णत्वम् अत्वजातिः अनुवर्तते अस्तिग्रहणादिति पूर्वान्तवद्भावलभ्यधात्ववयवत्वस्याचः परस्मिन्नित्यनेनाकारे ऽतिदेशादित्यर्थः इत्याशङ्क्येति तद्व्याहत्या चरितार्थण्ठकः किन्त्वङ्कथमाकारस्य गुणो नेत्यर्थे ज्ञापकभविष्यतीति भावः सन्निपातपरिभाषयेति एतत्परिभाषाप्रवृत्तिश्चोक्तरीत्यैव अकित्वेपीति एतेन किन्त्वस्य ज्ञापकतोपपादिता कौस्तुभोक्तरीत्योक्तां ज्ञापकताङ्खण्डयति परेत्वित्यादिना व्याप्यात्वजातीति व्याप्या ऽत्वजातिर्यस्मिन्नित्यर्थः यादेशो लोपस्यानिमित्तमित्यर्थः परिभाषया न लभ्यते जातिः पदार्थ इति पक्षे तपरसूत्रस्य जातिपक्षप्राप्तसवर्णग्रहणवारकत्वस्यैव सत्वेन यत्र यत्र तपरकरणन्तत्र सर्वत्र व्याप्यजातिनिर्देश एव बोध्यते एवञ्च प्रकृते ङेर्यइत्यस्य प्रवृत्तौ यादृशव्याप्यजातिविशिष्टसन्निपातो निमित्तन्तस्य दीर्घेणैव निवर्तनात्तद्घातकत्वन्नलोपस्यास्तीति भावः ननु परिभाषायाः सन्निपातलक्षणो विधिः स्वनिमित्तसन्निपातस्य साक्षात्परम्परया यद्घातकन्तस्यानिमित्तमित्यर्थो ऽस्त्वेवेति परिभाषाप्रवृत्तिः स्यादेवेत्यतस्तत्परिभाषार्थमाह सन्निपातपरिभाषायाश्चेति परिभाषाघटकतत्पदस्य यच्छब्दसाकाङ्क्षत्वेन यद्व्यक्तिसन्निपातनिमित्तककार्यमग्रिमकार्योपजीव्यमवद्यत्तन्तस्य तस्य निमित्तस्य तादृशमग्रिमङ्कार्यं विघातकत्वेत्यर्थ एव लभ्यते एवञ्च न मूलोक्तरीतिमादाय परिभाषायाः सञ्चारः किन्तु यजादिप्रत्ययत्वावच्छिन्नसन्निपातनिमित्तो दीर्घो लोपे नि-

मित्तन्न भवतीत्येव परिभाषायाः प्रवृत्तिर्भवतीत्याशयः ननु लुकः सर्वापेक्षया बलवत्त्वस्य सिद्धान्तसिद्धतया ऽतुल्यबलत्वेन पूर्वविप्रतिषेधेनेत्ययुक्तमत आह अन्तरङ्गेति मूलासङ्गतिम्परिहरति अत्रेति तत्र भाष्ये अत्र तुना न्यायसञ्चारेणैव समाधानमुचितन्नतु विप्रतिषेधशास्त्रेणेति ध्वनितम् मूलासङ्गतिं शेषपूरणेन परिहरति द्वितीयेति ननु पुंवद्भावेन पुंसि यत्कार्यं विहितन्तद् भाव एव लभ्यते न नत्वभावातिदेश इत्यत आह पुंसीति अभावद्वयातिदेशे हेतुमाह व्याश्रित्यायादिति स्वराभावस्याप्यतिदेशो भविष्यतीति शङ्कां वारयति नवितिभिन्नेति पाणिनिभिन्नशान्तनवकर्तृकत्वादित्यर्थः ननु पाणिनिना यथा ऽयामन्तेतिसूत्रेणान्याचार्यविहितप्रत्ययानुवादेनायादेशविधानङ्कृतन्तथात्रान्यविहितस्वराभावस्याप्यतिदेशः स्यादत आह विषयपदेनेति ह्रस्वान्तस्य स्त्रीविषयस्येत्यतो विषयपदानुवृत्त्यैव सिद्धे पुनर्विषयपदोपादानसामर्थ्येनातिदेशिकालिङ्गान्तरयोगाय तस्य प्रवृत्तिरित्यर्थो भविष्यतीति भावः न्यूनताम्परिहर्तुमाह ह्रस्वाभावेनेति एतेन नुमो ऽभावेपि परत्वान्नाभावेनेयङादेशस्य बाधापत्तिरिति कस्यचिदुक्तिः प्रत्युक्ता । उपसर्जनह्रस्वस्यैव यथाबाधस्तथोपपादयति ईयसइत्यादिना प्रत्यासत्त्या तत्र पाठात्तच्छेषत्वस्य झटिति प्रतीतिरित्येवम्प्रत्यासत्त्या तदेव तद्वार्तिकमेव एवञ्चानुपूर्वीव्यत्यास एवात्र नत्वर्थभेद इतीयसो बहुव्रीहेर्नेति वचनन्निर्मूलमिति शङ्का न कार्येति सूचितम् अन्योक्तसाधकन्निरस्यति नचेति व्यर्थमिति एवञ्च तृतीयादिष्विति सूत्रस्थपुंवदिति पद इवात्रापि तथास्त्विति भावः वार्तिकेष्विति एतद्विशेषोपादानेन सूत्रेषु लाघवगौरवविचारार्थं वार्तिककारस्य भाष्यकारस्य च प्रवृत्ता तत्र तथाकल्पनमुचितमिति ध्वनितम् अत्र आहुरित्युपादानविषये तादेति पुंवद्वचनमित्यर्थः तेन तादृशभाष्येण अस्य उपक्रान्तदीर्घत्ववचनस्य ननु दीर्घत्वविधायकवचनस्याप्युभयबोधकत्वमस्त्वित्यत आह दीर्घत्वं हीति प्रत्यासत्त्या उपसर्जनपदोपादानरूपप्रत्यासत्तिनिमित्तेन प्रत्याख्यानपरभाष्यप्रामाण्येन पुंवद्भावबोधकवचनस्थले न प्रत्यासत्तिर्विवक्षिता अत्र तु सा विवक्षितेतिभावः नचैवम्पुंवद्भावेन ह्रस्वमात्रबाधवज्जश्शसोः शिरित्यादिबाधोपि स्यादिति बहुश्रेयसीनी बहुश्रेयसीनीत्यादिरूपाणामसिध्यापत्तिरिति वाच्यम् ह्रस्वप्रकरणे पाठे तत्तदभावबोधकत्वस्यैव कल्पनात् अत एवाह दिगिति

मूले पूर्वविप्रतिषेधेति वृद्ध्यौत्वेति पूर्वविप्रतिषेधसूचकभाष्येत्यर्थः । ननु पूर्वविप्रतिषेधादस्तु नुमागमस्तथापि पुनःप्रसङ्गविज्ञानन्यायेन निर्दिश्यमानपरिभाषया चोक्तेः रूपं स्यादेवेति शंकानिरासायाह अङ्गाधिकार इति सूत्रे षष्ठीनिर्देशाभावेनेति कथनेन तस्याः परिभाषाया अत्र विषयतैव नास्तीति सूचितम् एतेन नुम्नित्यः तृज्वद्भावस्तु कृते नुमि तेन व्यवधानान्न प्राप्नोतीत्यनित्य इति नित्यानित्ययोरतुल्यबलत्वेन विप्रतिषेधासङ्गतिरिति कस्यचिदुक्तिः प्रत्युक्ता अत्रानयोः वार्तिकबोध्यलक्ष्ये नुमतृज्वत्वयोः असम्भवेनेति स्वस्वनिमित्तानन्तर्यविघातकत्वेनेत्यादिः अन्यथा तृज्वत् क्रोष्टुरितिसूत्रविहितबाधकत्वस्यापि कल्पने मूले उदाहृतत्वाच्चेत्यन्तेन भवदुक्त्या पूर्वविप्रतिषेधपरवचनस्य चारितार्थ्यन्न सम्भवतीति प्रतिपादितत्वन्त्वान्यकृतशङ्कां वारयति नचेति वचनेति पूर्वविप्रतिषेधवचनेत्यर्थः भाषितेत्यादिसमाहारे द्विगौ तस्य स्वनपुंसकामिति नपुंसकत्वविधानादिति भावः प्रियक्रोष्टूनीत्येवेत्येवकारेण नित्यतृज्वद्भावविषयकत्वन्तस्येति लभ्यते तच्चायुक्तम् प्रागुक्तभाष्यीयप्रयोगविरोधादत आह इत्यपीति प्रातिपदिकांशस्यापीत्यपिना तदवयवस्य परिग्रहः अत एव भाष्ये कृशक्रोष्टुनेत्यस्योपादानेपि मूले प्रियक्रोष्टुने इत्युदाहृतम् एतच्च मूलग्रन्थसङ्गमनायोक्तम् वस्तुतस्त्वेवङ्कल्पनोचिता भाष्यकृतो ऽज्ञानकल्पनापत्तेरतो दिगर्थमाह दिगर्थस्त्विति अभावकल्पनेति अभावस्यैव कल्पनेत्यर्थः तदुदाहृतमिति चतुर्थ्यन्तमुदाहृतमित्यर्थः अस्य उक्तवार्तिकस्य । न्याय्या स्वार्थसिद्ध्यर्थमारब्धस्याहावस्य पान्थोपकारकत्वे ऽधिकाभ्युदयवदेषा न्याय्या नचोदाहरणेतिग्रन्थस्योदाहरणत्यागः कार्य इत्यर्थो यद्यप्यागतः प्रतीयते तथापि तदुदाहरणप्रदर्शनान्यथानुपपत्त्या स नोचित इत्याशयेनाह उदाहृतेति ननु सुद्योशब्दनिष्ठस्य भाषितपुंस्कत्वस्य सुदुचशब्दे ऽतिदेश एकदेशविकृतन्यायेनेति वक्तव्यन्तच्च नोचितभाषितपुंस्कत्वस्याशास्त्रीयत्वादत आह स चेति विकारे चेतीति चकारेण शास्त्रीयविकारसमुच्चयः भाष्यसम्मतत्वादिति तत्रहि दीर्घतिशब्दैकदेशदीर्घच्छब्दानुकरणमित्युक्त्वा किमर्थं विकृतनिर्देशः क्रियते एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषा एकदेशविकृतमनन्यवदिति अत एव रामावित्यादौ मकाराद्यन्ते यस्माद्धितस्तत्स्यातिदेशेन पदत्वस्य सिद्धिः ननु पुंवद्भावेन जातस्य ह्रस्वत्वस्य

निवृत्तिरित्येतदयुक्तम्भुक्तवन्तमिति न्यायविरोधादित्यत आह जातनिवृत्तेरिति जातस्य स्त्रीप्रत्ययस्य निवृत्तेरित्यर्थः उपजीव्यविरोधेन पुंवद्भावस्य प्रवृत्ताविह यदुपजीव्यमिगन्तत्वं तद्विरोधेन अत एव उपजीव्यविरोधस्यान्याय्यत्वादेव अनाव इति प्रतिषेधस्य ज्ञापकत्वमुपपादयति नाश्यमित्यादाविल्यादिना यत्रयत्रोदात्तादिविधानन्तत्र गुणविधानस्याशक्यत्वात्तत्तद्धर्मविशिष्टधर्मिविधानमेवेत्याशयेनाशङ्क्य निराचष्टे नचेति अन्तरतमाज्रूपः स्थानतो ऽन्तरतमलृकाररूपादेशनिवर्त्योस्तु एवंहि नकारस्य स्थाने तादृशादेशकल्पने हि निमित्तभूतेति यतो ऽनाव इति सूत्रप्रवृत्तिनिमित्तभूतेत्यर्थः तदाशयः उक्तस्थानाद इति प्रतिषेधस्य ज्ञापकत्वप्रतिपादनाशयः । माधवाद्यनुरोधेनेति अयमाशयः यदि नुटि कृते ऽप्यात्वन्तदा सन्निपातपरिभाषा नुड्विषये न प्रवर्तते इति वक्तव्यम् नचैवं सति रामाणामित्यादौ सुपि चेत्येव दीर्घे नामीत्यस्योपन्यासो व्यर्थः स्यादिति वाच्यम् नित्यत्वेन तदुपन्यासात् एवञ्च यथा ऽनित्यायास्त्रयाः कार्यसम्पत्त्यर्थङ् प्रवृत्त्यप्रवृत्तिमध्ये आत्वायाप्रवृत्तिकल्पना तथेहापि पुंवद्भावेन जातदूखनिवृत्तये तस्या अप्रवृत्तिकल्पना स्यादिति ॥ इत्यजन्तनपुंसकविवरणम् ॥ यत्तु ङः सि धुडितिसूत्रे सप्तमीनिर्देशसत्वेन सादेः पदस्येत्यर्थकल्पनात्कथमत्र धुडिति कस्यचिदुक्तिः सा नोचिता विशेषणबोधकस्य सप्तम्यन्तस्य तदादिबोधकत्वं सप्तम्यन्तविशेष्यबोधकसन्निधान एवेति सिद्धान्तादितीह पदस्येति व्यधिकरणमेवेत्याह ङः सीतीति एके इत्येतदर्थस्यान्यत्वविशिष्टस्याभियुक्तत्वसूचनायाह अत्रेति अपदान्तभाजमित्यपदान्तशब्दस्य भावप्रधाननिर्देशेन पदान्तत्वपरतया पदान्तत्वरहितमित्यर्थः स्यात्तथाच सुगणट्षष्ठ इत्यस्यासिद्धिरतस्तदर्थमाह इदमचर्त्वेति धातुपदस्य दादेरिति सूत्रे स्थितस्य धातुप्रकृतिककर्तृकिबन्तदामालिहादिव्याख्या तस्य चारितार्थ्येनोपदेश इत्यर्थलाभप्रयोजकत्वन्न नस्यादत आह मूले धातोरित्यावर्तत इति अयम्भावः सौत्रस्यातोरिति पदमेकाच इत्युत्तरसूत्रस्य तद्वाद्शब्दावयवाद्वाह इत्यस्यैकाचः सत्वेन दस्य धकारवारणायावश्यकामिति प्रकृतसूत्रेप्युपकारकोस्तु तावताप्युपदेशकाल इत्यर्थालाभः स्यादत आवृत्तिर्युक्तेति प्राचाम् हरदत्तादीनाम् प्राचामित्युक्तिबीजमुत्कटयति धातोरिति न संगृह्णातीति तथाचाग्निरस्त्येवेति भावः कालमात्रे लक्षणायामपीष्टासिद्धिरत आह

तात्कालिकमिति एवञ्चोपदेशकालपदे बहुव्रीहिरिति स्वीकार्यम् उपदेशकालिकदादित्ववतो धातोरिति सूत्रार्थः । वाच्यार्थत्वे मूलवाक्यवाच्यार्थपरत्वे सप्तम्या तदन्तेन अपिना आवृत्तिलक्षणायाः समुच्चयः । मूलासङ्गतिम्परिहरन्नाह धातोरित्यस्यैवेति अत एव दादिपदस्यैवौपदेशिकदादित्ववत इत्यर्थकत्वादेव एतेन स्वोक्तव्याख्या भाष्यकारसम्मतेति दर्शयति अपवादत्वेनेति दादेरिति विशेषत उपादानेन विधीयमानङ्कित्वन्निरवकाशत्वेन ढत्वस्य बाधकमिति भावः अथवेति संहितया सूत्रपाठाभिप्रायेण होढो ऽदादेरिति पृथक्करणम् तथाच दुहधातोर्दादित्वान्न ढत्वप्राप्तियोग्यतेति धुगित्यत्र घत्वमेव भविष्यति अस्मिन्पक्षे घत्वमुत्सर्गः ढत्वमदादिधातोर्विहितमपवाद इति घत्वमर्थादादिधातोरेव भविष्यतीति दादिपदं यथाश्रुतार्थकमनर्थकमिति भावः ततो धातोरितीत्यस्य धातोर्घ इत्यर्थः नन्वेवन्न्यासे दुहधातोर्वादुहेतिसूत्रविहितघत्वाभावपक्षे ढत्वन्न स्यादत आह दुहेस्त्विति तत्रोपात्तो वाशब्दस्समुच्चयार्थ इति व्याख्यास्यत इति भावः तदाशयः भाष्याशयः तत्र अन्त्यपक्षे फलान्तराभावेन अदादिव्यावृत्तिरूपफलाभावेन असिद्धत्वेनादादौ तस्याप्रवृत्तिः सिद्धैवेति भावः तत् दादिपदम् नन्वेवमुत्तरसूत्रे ऽनुवृत्तिसामर्थ्यात्तल्लाक्षणिकमस्तु पूर्वसूत्रेतु दादिव्यावर्तकत्वेन चरितार्थमिति दामलिडित्यादौ ढत्वन्न प्राप्नोतीत्यत आह अर्थाधिकारोति चस्त्वर्थे एवम् औपदेशिकदादित्ववल्लक्षकम् अत एव उक्तार्थलाक्षिकत्वादेव यद्यप्यन्यत्रोपदेशोदेशपदविषये सङ्कीर्णता दर्शिता तथाप्यत्र दादिपदसामर्थ्याद्भेदः कल्प्यत इति भावः एवञ्च उक्तरीत्येष्टसिद्धौ च तदेकवाक्यतया उत्तरपदैकवाक्यतया उचितेति द्वयोः पक्षयोः फलैक्यस्यौचित्यप्रयोजकत्वम् नन्वेवमावृत्तिकथनविरोधो ऽत आह आवृत्त्येति स्फुटप्रतिपत्तये उपदेशे इत्येव वाच्यमिति कस्यचिच्छङ्कान्निरस्यति नचेति गौरवेति पदगौरवेत्यर्थः । नन्वेवमुपदेशे दादिर्धातुरेवेति धातोरिति व्यर्थमत आह धातोरिति त्विति इत्यादिव्यावृत्तये इत्यादौ भष्भावलक्ष्यत्वस्य व्यावृत्तये अधोगित्यादावपि नाव्याप्तिरित्याशङ्कते नन्विति यदि दादिपदमौपदेशिकदादित्ववल्लक्षकन्तदोत्तरभाष्यविरोध इति शङ्कान्निरस्यति नचेति प्रागुक्तभाष्येति घत्वस्यासिद्धत्वादित्यादि निवृत्तिमित्यन्तभाष्येत्यर्थः । व्यर्थमिति आवश्यकदादिपदलक्षणयैवेष्टसिद्ध्या तद्व्यर्थमिति भावः तथोक्तोरिति वैय-

धिकरण्येनान्वयोक्तेरित्यर्थः अत एव पूर्वसूत्रे सामानाधिकरण्येनोक्तरीत्या ससम्बन्धेपीष्टसिद्धेरेव यङ्लुवदीयव्याख्यानफलत्वदन्यथासिद्धमित्याह धुग्भ्यामिति खण्डनकृदुक्तिन्निरस्यति एतेनेति निष्फलत्वकथनेन वस्तुतः स्वरितत्वाभावादाह कल्पनेति ननु यदि स्तिपाशपेत्याश्रीयते तर्हि भष्भावो ऽपि न स्यादत आह भष्भावस्त्विति स्वसिद्धान्तरीत्याह स्तिपाशपेति वैचित्र्यायेति लघुना शब्देनेष्टार्थस्य लाभेपि क्वचित् स्वष्टप्रतिपत्तये गुरुभूतशब्दोच्चारणमपि साध्वित्येव वैचित्र्यमिति भावः तथा मूलोक्तरीत्या न्यायस्य स्वरूपन्दर्शयति अस्येत्यादिना तेन सम्यसारणशब्देन जातस्येतिव्याख्यानेन ननु परममूलोक्तोदाहरणे ऊठि कृते न सवर्णदीर्घस्य प्राप्तिरत आह भूवाडिति अनकारान्तोपपद इत्यर्थभ्रमवारणाय भत्वेति एतेन सर्वत्र तदभाव इति कस्यचिदुक्तिः प्रत्युक्ता यावता विना ऽनुपपत्तिस्तावत एव ज्ञाप्यत्वात् मूले अथवा ऊहतेरिति एतच्च समाधानं वायूर्ह इत्येतद्विषयम् नच प्रौह इत्यत्राप्यस्त्विति वाच्यम् अस्याकारान्तस्योहशब्दस्याकृदन्तत्वात्प्रादूहोढो इत्यत्रोढसाहचर्येण कृदन्तस्यैव ग्रहणात् अर्थवत एव तत्र ग्रहणाच्च अस्यानर्थक्यन्तु स्वष्टमेवेति आह एतदिति ननु स्रंसुध्वंस्वोरपि विचि हल्ङ्यादिलोपसंयोगान्तलोपयोः कृतयोः सकारान्तत्वाभावाद्व्यभिचारसम्भवाद्व्यभिचारादित्यसङ्गतमत आह स्रंस्वित्यादि अत एव अनुवर्तमानसग्रहणस्य वसुमात्रविशेषणत्वस्य तादृशस्थले विचो ऽनभिधानस्याभिप्रेतत्वादेव ननु नचोदाहरणमादरणीयमिति न्यायेन वस्वन्तोदाहरणमुपलक्षणमस्त्वित्यत आह अनुवृत्ताविति यदुपलक्षणत्वमभिप्रेतं स्यात्तदा प्रथमम्परित्यज्याग्रिमकथनं सन्दर्भविरुद्धं स्यादिति भावः न्यासपदस्य ग्रन्थाभिधायकत्वेन न्यासो हि नेत्यसङ्गतमत आह न्यासकृदिति अतथात्वादिति सानुबन्धकत्वाभावादित्यर्थः डकारस्य प्रत्ययोपदेशमादायेत्संज्ञाप्रवृत्त्या तदनुबन्धत्वमेवेति अत्र न्यासकृदित्यनेन तस्य व्युत्पन्नत्वन्नम्मते स्वमते त्वव्युत्पन्नत्वमेवेति ध्वनितम् अक्षदूरित्यत्र निरनुबन्धकपरिभाषया दोषाभावप्रतिपादनमसङ्गतं तत्रत्यसोर्दिव्प्रकृतिकत्वविरहादेवाप्राप्तेरिति तु न शङ्कनीयम् अङ्गाधिकारे तदन्तग्रहणस्य सम्भवात् । अत एव परमद्यौरित्यत्र भवति सूत्रप्रवृत्तिरत एवाह इदञ्चेति एतेन सा परिभाषा भाष्यप्रामाण्या-

दप्रचयग्रहणेपि प्रवर्तत इति ध्वनितम् उच्चारणार्थ इति शब्द उच्चारणमेवार्थ इत्येवकारगर्भबहुव्रीहिसंज्ञकस्तेवकारव्यवच्छेद्यं स्पष्टयति नान्विति तदप्रवृत्तिः स्वराप्रवृत्तिः ननु सुडुचभ्यामित्यत्र दीर्घप्रवृत्तिसञ्चार एवासङ्गतः सम्प्रसारणशब्देन जातस्यैव सम्प्रसारणशब्देन ग्रहणादत आह अतादिति अत्र पक्ष इत्युपादानम्भाष्यकारासिद्धान्तविरुद्धत्वेन तस्य पक्षस्य स्वानभिमतत्वसूचनाय अथ प्रत्ययस्य शब्दादेव परत्वान्नत्वर्थादिति शब्दस्य द्वारत्वकल्पना कृता तथाच प्रियपञ्चनशब्दे दोष इत्याशङ्क्य निराचष्टे नचैवमित्यादिना इदम् बहुवचननिर्देशेनार्थविशेषस्य कल्पनम् ननु द्विवचननिर्देशे गौरवात्समाहारद्वन्द्वैनैकवचननिर्देश एवास्त्वित्यत आह समाहारेणेति ननु सर्वत्र तथानिर्देशाभावेपि स्तोश्चुनाश्चुरितिसूत्रे तथानिर्देशो दृश्यत एवेत्यत आह षट्संज्ञकानामिति ननु सज्ञिनाम्बहुत्वेप्येकवचनं वृद्धिर्यस्याचामादिरित्यादौ दृश्यत एवेत्यत आह किञ्चेति ननु बहुवचनस्योक्तरीत्योपपत्तावपि गौणस्य वारणान्न स्यादितिचेन्न विहितविशेषणाश्रयणेन तस्यापि सम्भवात् तदुच्चेति बहुवचनवच्चेत्यर्थः अत्र इम इति सूत्रे अनुवर्तत इति अत एव क्विबन्तानियमादावतिप्रसङ्गो न नन्वनुवृत्तिकल्पनाप्रयुक्तगौरवमत आह अत एवेति तदनुवृत्तिसत्वादेवेत्यर्थः एवङ्कल्पनायां लाघवमप्यस्तीत्याशयेनाह किं सर्वनामेति । ननु किम्शब्दस्य द्वेः प्राक् पाठस्य करणकथनमसङ्गतम् त्यदादीनिचेत्यत्र व्यभिचारादिति चेन्न सर्वत्र तादृशानियमाभावेपि त्यदादीनाम इति सूत्रे त्यदादिपदस्य द्विपर्यन्तबोधकत्वमेव भाष्यकारेष्ट्या ऽस्तीत्यर्थाधिकारानुरोधादत्रापि तथाभावित्यतीत्यतस्तथापाठकल्पनमुचितामित्याशयात् । इमाविति विभक्त्या सहैकादेशेपि परादिवद्भावेन विभक्तिपरत्वमस्तीति भावः अङ्गकार्यमत्रात्वम्मत्वञ्च बोध्यम् नचाचः परस्मिन्नित्येकादेशस्य स्थानिवद्भावेन न विभक्तिपरत्वमिम् इत्यस्येति वाच्यम् विभक्तावित्यस्याङ्गविशेषणत्वात् नानर्थकपरिभाषाया भाष्यकृता प्रत्याख्यानादाह मूले आरम्भेति इदमुपलक्षणम् लक्षणप्रतिपदोक्तपरिभाषयापि तत्रातिप्रसङ्गवारणसम्भवात् ममतु किमः क इति क इति समुदायरूपादेशविधानसामर्थ्यादित्यर्थः अत्र किम्शब्दोपादानसामर्थ्यादिति तु नोक्तम् तस्योत्तरार्थत्वात् । ननु यदर्थमयम्प्रयासस्तस्य प्रकारान्तरेण दुर्वारतया

प्रयासवैयर्थ्यमित्याशङ्क्याह निराचष्टे नचेति सुवन्तादिति कुत्सितइतिसूत्रस्थ-भाष्यात्तथालाभादिति भावः यद्यपि जायमानस्कुद्धित उक्तरीत्या सुवन्ता-द्भवति तथापि शब्दतस्तथा नोक्तमित्याशयेन समाधत्ते प्रातिपदिकादित्यादिना अनाश्रयणादिति सुप इत्यर्थासम्भव इति शेषः ननूक्तरीत्या तस्य लाभः स्यादेवेत्यत आह अङ्गसंज्ञेति उत्तरार्थत्वमुपपादयति कुतिहोरिति उतिहोरिति अत्र उ इति लुप्तप्रथमान्तम् तादौ हादौ चेम उः स्यादिति प्र-थमस्य अतिचेम उः स्यादिति द्वितीयस्यार्थो भविष्यति सच न युक्तइत्याह उकारस्येति गुणस्य ओर्गुण इति गुणस्य च क्लेश इत्यत्र यश्चकारस्तस्य क्लेशपदोत्तरं योजना कार्या अङ्गवृत्तपरिभाषाया भाष्यकृता लक्ष्यसिध्यर्थ-मनाश्रित्वाद्भवता तस्या इहार्थकल्पनायाङ् क्लेश इति भावः पूर्वग्रन्था-विरोधायाह किम इति अयम्प्रयोगः भोअच्युत इति प्रयोगः वार्तिकमि-त्यस्य मतुवसोरितिसूत्रमित्यादिः मूले इदमस्तित्वत्यादिः अत्र विषयपदा-ध्याहारेण सन्निकृष्टं वस्तित्वदमो विषय इत्यर्थः एवमदस इत्यस्यापि अ-भिमुखीकरणेत्यादि सम्यक् ज्ञापनं हि सम्बोधनविभक्त्यन्तशब्दप्रयोगस्य फलत्वच्च दूरदेशस्थत्वे ऽपरोक्षत्वे चोचितमिति भावः । न्यूनताम्परिहर्तुमाह परोक्षस्यचेति अस्यांशस्य अनभ्यासविकार इत्यंशस्य नन्वनादेशो-त्तरम्भवतु स्मैभावस्ततो हलि लोपेनेष्टसिद्धिः स्यादत आह तत्र कृत इति ननु नित्यत्वमनित्यापेक्षया बलवत्वप्रयोजकमिह तु अनादेशस्य स्मैभावे कृ-तेपि प्राप्तिरित्युभयोर्नित्यत्वमिति नित्यत्वादित्यनुपपन्नमत आह लक्ष्येति प्रसङ्गस्य कृताकृतप्रसङ्गस्य अत्र प्रकृतप्रयोगे ज्ञापनमेवेति एवकारेण इद-मेव यत्र कथनन्तत्रेत्यस्यानादरो ध्वनितः उभयत्रापि कार्यं विधातुङ्कार्यान्तरं विधातुमित्यनयोः नाग्रह इति अत एव वन्यद्विपेनोन्मथिता त्वगस्य अथै-नमद्रेस्तनया शुशोचेत्यस्योपपत्तिरिति भावः ननु विधानस्य परित्यक्तत्वान्न विधीयन्त इत्यनुपपन्नमत आह नाज्ञातेति यत्तु नन्वस्य निदेशत इति तस्य यच्चस्य व्याख्यानन्तदसङ्गतम् चिरकालिकरहःकेलीनाम्नात्मर्यविषयत्वानुप-पत्तेरत आह सखीवाक्यमिति ननु पूर्वत्रासिद्धे न स्थानिवदित्याश्रयणेन दीर्घग्रहणस्यापि प्रत्याख्यानादीर्घविधावित्यनुपपन्नमत आह नपदान्तसूत्र इति दीर्घस्यापीति अपिना त्रैपादिकस्य परिग्रहः ध्वनितत्वादिति तत्र हि शंशमयतेः अशंशमि अशंशामि शंशमम् शंशमम् शंशामम् शंशामामित्यत्र

विकल्पेन दीर्घसिध्यर्थं यङ्लोपे उपसंख्यानमिति वार्तिककृतोक्तम् तदभिप्राये यश्चात्र णिश्चिण्णमुलपरो न तस्मिन्नङ्गमित्युक्त्वा लोपे कृते चिण्णमुलपरो भवतीत्याशंक्य स्थानिवद्भावान्न चिण्णमुलपरः । ननुच प्रतिषिध्यते स्थानिवद्भावः दीर्घविधिभ्यति न स्थानिवदिति समाहितम् अत्र नपदान्तसूत्रस्योपन्यासेन सपादसप्ताध्यायीस्थदीर्घस्यापि तेन दीर्घशब्देन ग्रहणभवतीति ध्वनितत्वादित्यर्थः वरे यलोपस्वरवर्जेन्द्विर्वचनादीनि न वक्तव्यानीत्यत्र वर्ज्यकोक्तो दीर्घस्यापि तस्य वाक्यस्योपलक्षणतया सङ्ग्रहः कार्यः पाठे ऽपीति अस्य लाघवमस्तीत्यत्रान्वयः तथाच षष्ठ्यन्ततया व्याख्यानपक्षे निषेधसामर्थ्यं यद्यपि नाश्रयणीयन्तथापि वा नपुंसकानामिति वचनारम्भः कार्य इति गौरवं सप्तम्यन्ततया व्याख्यानेतु निषेधवचनारम्भेण नलुप्तेत्यस्याऽनित्यत्वमात्रङ्कल्प्यन्तावतैव न ङिसम्बुद्ध्योरिति वचनस्य प्रवृत्तिर्भविष्यति वा नपुंसकानामिति नापूर्वमिति लाघवात्सप्तम्यन्ततया व्याख्यानमुचिततरमिति भावः प्राप्तस्य नलोपः प्रातिपदिकान्तस्येतिसूत्रे ऽनुवर्तमानं पूर्वत्रासिद्धमित्यनेन सुबादिविधौ प्राप्तस्यासिद्धत्वस्य संकोचस्य स्वरूपमाह तदितरपरतेति तथाच पूर्वत्रासिद्धमिति नलोपातिरिक्तविषयकमिति लब्धम् एवञ्च यथाफलितन्तथाह सङ्कोचश्चेत्यादिना दृष्टान्तप्रदर्शनेनोक्तार्थदार्ढ्यायान्यत्रापि सामान्यशास्त्रतात्पर्यसङ्कोचमाह अर्थवत्सूत्रेचेति एवञ्च पूर्वत्रासिद्धमित्यस्य नलोपाविषयकत्वसिद्धौच अस्य नलोपः सुबितिसूत्रस्य इदमेवच नियमशास्त्रस्य सामान्यशास्त्रतात्पर्यसङ्कोचकत्वरूपमेवच न केवलनियमशास्त्राणां विधायकत्ववादिमत एवैषा कल्पना किन्तु तेषामनिषेधरूपेण प्रवृत्तिरिति वादिमतेपीत्याह निषेधवादीति अस्य इतरसङ्कोचस्य अन्यथा सामान्यशास्त्रस्य निषेधविषयविषयकत्वस्यापि कल्पने विकल्पापत्तेरिति षोडशिग्रहणाग्रहणयोरिव विकल्पापत्तेरित्यर्थः ननु यदि नियमशास्त्राणां विधिरूपेण प्रवृत्तिरुभयप्राप्तौ कर्मणीतिसूत्रे षष्ठ्याः प्रतिषेध ऽकादिप्रयोगे ऽप्रतिषेध इति वार्तिककारीयप्रतिषेधत्वकथनासङ्गतिरत आह सामान्यशास्त्रेत्यादि अन्यत्र कर्मातिरिक्ते कर्तरि तदभावस्य षष्ठ्यभावस्य प्रकृतसूत्रविषयेतु सुबादिचतुष्कादिभ्यो ऽन्यत्रेति कल्प्यम् तम् निषेधम् एवञ्च तत्रतत्र प्रतिषेधत्वव्यवहारः फलितार्थकथनपरो नतु शब्दार्थपर इति भावः नन्वेवं समासग्रहणकृतनियमेन सामान्यशास्त्रस्यार्थ-

वत्सूत्रस्यैव सङ्कोचः स्यान्नतु कृद्ग्रहणस्येति मूलकेनोपदंशमित्यादौ कृद्ग्रहणे गतिकारकेति परिभाषया दोषः स्यादेवेत्यत आह कृत्तद्धितेतीति बाध्येति लक्ष्यानुसारादित्यादिः नायमकारः पाणिनीयनियमशास्त्रविषय एव किन्तु स्मृतावपीत्याह पञ्चपञ्चेति प्रमाणरागेति प्रमाणपदान्तस्य रागपदेन कर्मधारयः तदितरेति शशकादिपञ्चनखेतरपञ्चनखकर्मकत्वाभावरूप इत्यर्थः नन्वेवम्पतिः समासएवेति सूत्रे एवकारं विनापीष्टसिद्धावेवकारवैयर्थ्यमत आह पतिरिति स्फुटमिति समासपदोत्तरमेवकारोपादानेन यत्रैवकारस्ततोन्यत्र नियम इति सामान्यतः कल्पितो यो व्यवहारस्तद्विषयतायाः सत्त्वेनेष्टार्थसिद्धिः स्फुटेति भावः तात्त्रिकव्यवहारस्याप्युपपत्तिमाह अन्ययोगेति अत्र तुना प्रकारान्तरेण तस्यायुक्तत्वमेवेति ध्वनितम् दुचद्भ्यो लुङीतिसूत्रस्याख्यानादाह दुचद्भ्य इति तत्रहि अनुपराभ्यामितिसूत्रस्य प्रयोजनकथनावसरे स्वरितञितइत्यनेन परस्मैपदस्य प्रतिषेधात्कृञादिष्वनेन परस्मैपदं विधीयते इत्युक्त्वा यद्यनेन परस्मैपदं विधीयते तर्हि आत्मनेपदस्य प्रतिषेधो वक्तव्य इति पूर्वपक्षे नवा दुषतादिभ्यो वावचनात् यदयं दुषतादिभ्यो वावचनङ्करोति तज्ज्ञापयत्याचार्यो न परस्मैपदविषये आत्मनेपदभवतीत्युक्त्वा यद्वा यथा कर्त्रभिप्राये क्रियाफले आत्मनेपदेन परस्मैपदं बाध्यते एवमपरस्मैपदेनाप्यात्मनेपदम्बाधिष्यत इति कृञादिभ्य आत्मनेपदस्य प्रतिषेधो न वाच्य इत्युक्तम् यदि नियमशास्त्रस्य निषेधमुखेन प्रवृत्तिः स्यात्तदा निषेधस्य शाब्दत्वाद्बाध्यत इत्युक्तिरसङ्गता स्यात् नियमस्थले प्रतिषेधत्वव्यवहारो गम्यमानार्थमादाय नतु शाब्दार्थमादायेत्यत्र भाष्यमपि प्रमाणमित्याह पञ्चपञ्चेति नच पञ्चपञ्चेत्यस्य परिसङ्ख्योदाहरणत्वात्कथन्नियमत्वव्यवहारः परिसङ्ख्यातो नियमे ऽस्ति विशेषः पाक्षिकाप्राप्तिकांशपरिपूरणफलो नियमः परिसङ्ख्यातु अन्यनिवृत्तिफलेति वाच्यम् नियमेप्यप्राप्तांशपरिपूरणेनार्थिकान्यनिवृत्तेः सत्त्वेनाभेदमाश्रित्य परिसङ्ख्याविषयेप्यत्र शास्त्रे नियमत्वव्यवहारस्य कृतत्वात् प्रकृते नियमश्चात्मनेपदादिविधायकादीनाम्बोध्यः निषेधरूपेण प्रवृत्तिप्रकारन्दर्शयति सुवादीति नन्वत्र निषेध्याभावादेतदयुक्तमत आह निषेधश्चेति अत एव निषेधरूपेण प्रवृत्तौ लक्षणाङ्गीकारादेव अत्रेति अस्य मीमांसकैरुच्यत इत्यत्रान्वयः अत्रेत्यस्य परिसङ्ख्यायामित्यर्थः अयम् नियमः

यद्यपि मीमांसकमते भेदस्तथाप्युक्तभाष्यादस्मच्छास्त्रे नियमोपि तादृश एवेति परिसङ्ख्याविषयेपि नियमत्वव्यवहारः ननु निषेधरूपेण नियमशास्त्रस्य प्रवृत्तिरिति पक्षे ऽस्तु तथा विधिरूपेण प्रवृत्तिरिति पक्षेतु कथमुभयोरभेदलाभ इति चेच्छृणु यथाश्रुतशब्दात्प्रतीयमाने ऽर्थे तात्पर्याभावात्तात्पर्यतस्त्यागः अन्यार्थे तात्पर्यकल्पनेन तात्पर्यतः परार्थकल्पना प्राप्तस्यार्थस्य बाधश्चेति लक्षणायाम् उभयत्र लक्षणायाम् फलाभावः विधिरूपेण प्रवृत्तिस्वीकारेणोपपत्तौ पक्षान्तरं स्वीकृत्य लक्षणाकल्पने फलाभावः तदभावे फलस्याभावे रूढ्यन्यलक्षणायाः फलवत्वनियमादिति भावः ननु लोपस्यासिद्धत्वेपि व्यञ्जनस्याविद्यमानवद्भावेनावर्णान्तत्वमस्त्येवेत्यत आह स्वरविधाविति स्वरोद्देश्यविधित्वञ्च स्वरविशेषानुवादेन विधित्वम् तत्र मानमाह नोत्तरपद इति अत्रानुदात्ताविति कथनेन स्वरोद्देश्यकविधित्वं स्पष्टमेव व्यञ्जनस्याविद्यमानवद्भावाभावे पृथिव्यादीनामनुदात्तादित्वाभावादप्राप्तौ तद्वैयर्थ्यं स्पष्टमेव स्वरोद्देश्यकविधावेव तस्य प्रवृत्तौ गमकान्तरमाह अत एवेति तत्रैव तत्प्रवृत्तेरेवेत्यर्थः अचः कर्तृयाकि अजन्तानामित्यर्थः स्वरकर्मकविधावप्यविद्यमानवद्भावे ऽज्ग्रहणवैयर्थ्यं स्पष्टमेव अत एव उक्तो ऽर्थः अस्याकर इत्यत्रान्वयः इदमिति प्रागुक्तमित्यर्थः इदमेव स्वरविधाविति परिभाषायाः स्वरोद्देश्यकविधौ प्रवर्तनमेव तत्रैव समासस्येतिसूत्रभाष्य एव परिभाषान्तरस्य प्रयोजनन्तु राजदृषदित्यादि ननु प्रतिदीन्व इत्यत्रानुपधात्वादिति कथनमसङ्गतन्तस्योपधात्वस्य स्पष्टत्वादित्यत आह धातोरिति एतेन मूले ऽनुपधात्वादित्यस्य धातोरित्यादिः सूचितः यत्तु प्रतिदिवन्शब्दादाचारक्विबन्तात्कर्तरि यत्र क्विप् तत्परएवायङ्ग्रन्थ इति कश्चित् तन्नेत्याह प्रतिदिवन्नित्यादि अन्यत्र ह्रस्वनद्याप इति सूत्रस्थे विवरणे तत्र सूत्रभाष्ये कास्प्रत्ययादिति विहितस्यामो ह्रस्वनद्याप इति सूत्रे ग्रहणमाशङ्क्याकारेणानुबन्धेनास्यामः सानुबन्धकत्वात्समाधायाकारो ऽनुबन्धो न कार्यः नच तदभावे मस्येत्वापत्तिः फलाभावादित्संज्ञा न भविष्यतीति कथिते मिदचोन्त्यात्परत्वम्प्रयोजनम्भविष्यतीत्याशङ्क्याम्प्रत्ययादयमाम् विधीयते तत्र नास्ति विशेषो मिदचोन्त्यात्परत्वे प्रत्ययपरत्वे वेत्युक्तम् यदि हलन्तेभ्य आचारे क्विप्स्यात्तदा विशेषः स्पष्ट एवेति तथाकथनेनाभिधानन्ध्वनितामिति भावः दृष्टान्तदार्ष्टान्तिकयोरेकत्वाभावात्तथेत्यनु-

पपन्नमतस्तद्योजयति यथोपधेति एवञ्च वैषम्ये ऽयन्दृष्टान्तः नन्वेवंसति पर्यीनाति मथीनतीत्यादावप्युपधादीर्घो न स्यादिति नामधातुस्थपरमसूत्रविरोध इतिचेन्न माधवानुरोधेन तस्य ग्रन्थस्य सत्वात् अयंहि तदाशयः नियमस्य सजातीयापेक्षत्वं सुप्रसिद्धमिति सर्वनामस्थाननिष्ठसर्वनामस्थानत्वस्यैवानपेक्षा नतु तद्वतसुप्त्वस्येति सुबानन्तर्य एव नियमफलनिषेधस्य प्रवृत्तिरिति परेतु तेषामप्युक्तरीत्यानभिधानमेवेत्याहुः। मूले पञ्चमीसमासो मास्त्विति बेभिदिता माथितिको ऽपीपचन्नित्येतदुदाहरणानामन्यथासिद्धेः प्रदर्शनान्मास्त्विर्थः वस्तुतस्तु प्रत्यैषिषन्नित्यादेरुक्तरीत्या तदुदाहरणत्वसम्भवेन तस्यावश्यकत्वेपि निष्ठायां सेटीतिसूत्रे सेड्ग्रहणेन तस्यानित्यत्वं ज्ञापितामिति स सार्वत्रिको नेति मास्त्वित्यस्य इहेत्यादिः पूरणीय इत्याशयेनाह सार्वत्रिक इति तस्य दोष इति वचनस्यणत्वग्रहणस्याभावेपि तदीयप्रयोजनान्यथासिद्धिमुपपादयति भाष्येत्यादिना इदम् बहिरङ्गत्वेन यस्येतिचेति लोपस्यासिद्धत्वप्रदर्शनम् अन्यथासिद्धेति उक्तरीत्या ऽन्यथासिद्धेत्यर्थः अभिमान इति एतद्बीजन्तु त्रिपाद्यां सर्वथा बहिरङ्गपरिभाषा न प्रवर्तत इत्यसकृदावेदितामिति न्याय्यत्वे साधकमाह तस्येति रत्नाकरोक्तं खण्डयति नचेति सन्निपातपरिभाषया घत्वस्य नकारसन्निपातजन्यतयेति भावः तदप्राप्तिः कुमतिचेत्यस्याप्राप्तिः सर्वेति अट्कुप्वाङ्नुम्ग्रहणस्य सर्वत्र सम्बन्धादिति भावः तद्विषये णत्वविषये अनित्यत्वावश्यकत्वादिति यदि तस्या अनित्यत्वादप्रवृत्तिर्न स्वीक्रियत इति तदा णत्वमात्रस्य कवर्गनिमित्तकत्वेन सन्निपातपरिभाषाप्रवृत्तेर्दुर्वारत्वादत्पूर्वग्रहणस्य हादेशेतिवार्तिकस्य च वैयर्थ्यापत्तिरिति भावः हादेशेष्वितीति कुव्यवायनिमित्तके णत्वे हस्यानिकेषु आदेशे प्रत्यासत्त्या कवर्गरूपेषु सत्सु प्रतिषेधो वक्तव्य इति वार्तिकार्थः फलितार्थमाह हादेशेत्यादिना हादेशेष्वित्युक्तेरिति हकारविशिष्टादेशपदोक्तेरित्यर्थः एवञ्च विशेषणाभिधानफलप्रदर्शनमेतादिति लब्धम् घनादेशश्चेति करणे ऽयोविद्धुष्वित्यनेन साधित इति शेषः अत एवेति तत्र तादृशोक्तेरेवेत्यर्थः। सूत्रेण वार्तिककारोक्तस्यार्थस्य सम्भव एव चेत्तदा न्याय्यत्वमित्याशङ्कान्निराचष्टे नचेत्यादिना बहिरङ्गत्वेनेति यथोद्देशपक्षे त्रिपाद्यान्तस्या अप्रवृत्तिः कार्यकालपक्षेतु प्रवृत्तिरिति भावः दोषः णत्वापत्तिरूपो दोषः उपलक्षणे-

नेति अत्र मानन्तु अत इति पञ्चम्यैव निर्वाहे पूर्वग्रहणम्भूमार्थकबहुव्रीहिलाभार्थम् अकारः पूर्वो यस्माद्धन्ति नकारादिति तेन लब्धन्तथाचोपलक्षणत्वं स्फुटमिति भावः मानान्तरमप्याह प्रधाणप्रघणयोरिति नलोपिन इति विशेषणविशिष्टाञ्चतिपरमत्राञ्चतिपदमित्यत्र साधकमाह नलोपेनेति एतेनोगिदचामिति सूत्रव्याख्यानावसरे नलोपिनो ऽञ्चतेरिति यत्परममूले उक्तन्तेनैकवाक्यता भवतीति ध्वन्यते नचैवंसति नलोपिन एव यथास्यान्न पूजार्थस्येत्यस्य लाभार्थमञ्चतिग्रहणञ्चरितार्थमिति कथम्मूलादुच्यक्तनियमलाभ इति वाच्यम् भाष्यप्रामाण्येनाचामित्यस्यात्तत्योभयार्थलाभ इत्याशयात् तत्रैको नियमो मूले एव दर्शितो द्वितीयस्तु अञ्चतेश्चेन्नलोपिन एवेति बोध्य इति तेन नियमस्य सामान्यापेक्षत्वेन एवञ्चाधिकलक्ष्यसङ्ग्रहस्योचितत्वात्सामान्यापेक्षनियम एवोचित इति भावः ङीबपीति अपिना नुमः परिग्रहः दिगिति दिगर्थस्तु प्रथमानियमेन पर्णध्वादित्यत्रैव गोमानित्यत्रापि ङीप्न किञ्च प्रकृतसूत्रे झल्ग्रहणापकर्षेण नुम् झलन्तलक्षण एव ग्राह्यः तेन शमी शमिनाविवादौ नातिप्रसङ्ग इति बोध्यम् अत्र भाष्य इति तत्र मूलोक्तरीत्या स्पष्टम् अन्त्ये धातोरुगितः प्रतिषेधः कार्यः अञ्चतेश्चोपसङ्ख्यातम् प्राचीनोभयङ्कर्त्तव्यम् उक्तनियमेन सिद्धिरित्युक्तम् कैयटग्रन्थस्य तादृशस्याप्रसिद्धत्वशङ्कां वारयति अयञ्चेति तृइति इदञ्च स्वरूपपरन्नपुंसकम् ननु तृविधायकसूत्रयोश्छन्दसीत्यस्यानुक्तेश्छान्दसमित्यसङ्गतमत आह सामान्यत इति अत एव तृज्वत्सूत्रे भाष्यकृतोक्तम् अविशेषविहिता अपि शब्दा नियतविषया दृश्यन्ते इति तथाच मतुपः सामान्यतो विधानेपि अर्वन्मघवच्छब्दयोश्छन्दस्येव प्रयोगो भविष्यतीति भावः। एवंहीति उक्तसूत्रद्वयवाद्धि विजन्तादिति ऋधातोर्यो विच् तदन्तादित्यर्थः नित्य इति विकल्पबोधकस्य पदस्य तत्रानुक्तेर्नित्य इत्यर्थः तदभावोपीति उक्तरीत्येतिभावः उक्तरीत्या प्रत्याख्याने फलान्तरस्यापि सिद्धिमाह एतदिति दीर्घः अत्वसन्तेति विहितः उदात्तत्वमिति ह्रस्वनुड्भ्यामिति प्राप्तस्य मतुपे उदात्तत्वस्य नगोश्वन्नितिप्रतिषेधे तस्य पित्वादनुदात्तत्वे फिट्स्वरस्यैवावस्थानादिति भावः एतेन उक्तव्याख्याने अस्य मघवेतिसूत्रस्य इत्येवेति संयोगान्तलोपस्यासिद्धत्वात्तदा दीर्घाप्राप्तेरित्येवेत्यर्थः तथाऽप्रतीतेरिति मघवेति

सूत्रस्य छान्दसत्वाप्रतीतेः किन्तु तत्साध्यप्रयोगस्यैव प्रतीतेः नन्वेवम्पूर्वोक्तकैयटविरोध इत्यत आह केशाद्य इतीति अन्योक्ताङ्कैयटासङ्गतिङ्खण्डयति यच्चिति इत्याश्रित्येति इति परिभाषामाश्रित्येत्यर्थः वयस्यास्विति अत्र तद्वानासामिति मतुपो लुक् यत्प्रत्ययश्च तस्य सूत्रस्य छन्दस्येव प्रवृत्त्या छन्दोभिन्ने सूत्रे तथोच्चारणेन सा ज्ञाप्यता इति ताद्भावः इदञ्चिन्त्यमिति विशेषोपादानञ्चिन्त्यमित्यर्थः । सङ्कोचे वनिवन्तविषयकत्वकल्पने बहुश इति बहूनामित्यर्थः तम्पातयाम्रथममासेत्यादीनां यथा आर्षवचनेति वार्तिककारीयवचनेत्यर्थः दिगर्थस्तु येषां छान्दसत्वन्तेषाम्भाषायां सर्वथा ऽप्रयोग एव कविना र्क्षषिभिन्नेन प्रयोगेतु तस्य प्रयोगस्यासाधुत्वमेव यदि मघवन्शब्दो वनिवन्तस्तदा मघोन इत्यादौ यस्येतिचेति लोपापत्तिरपि न छान्दसत्वात् अत एव मघोनामिति सूत्रनिर्देशस्याप्युपपत्तिः यस्येति लोपे आभीयासिद्धत्वन्तु न व्याश्रयत्वात् नच तत्र लोपे कर्तव्ये बहिरङ्गस्य सम्प्रसारणस्यासिद्धत्वम् असिद्धमिति परिभाषाया वाह ऊठितिसूत्रस्थोग्रहणेन ज्ञापितायास्तस्या अप्याभीयतया तत्प्रवृत्तिकाले आभीयस्याऽन्तरङ्गस्यासिद्धत्वेन तस्याः परिभाषाया अप्रवृत्तेः समानाश्रयत्वन्त्वन्तरङ्गस्य शास्त्रस्य य आश्रयः स एव परिभाषाया अप्याश्रय इति कनिप्रत्यय एवोचित इति व्युत्पत्तिपक्षे वस्तुतस्तूणादीनामव्युत्पन्नत्वस्यैव सिद्धान्तिसम्मततया तत्र प्रत्ययकल्पना नोचिता अत्र भाष्यमपि साधकमित्याह तथाचेति प्राप्नोतीति ङीब्रादेश-श्चेत्यादिः अत्र कविप्रयोगविषये एतेन कविप्रयोगदर्शनेनार्थविशेषस्य कल्पकाः प्रत्युक्ताः ननु गुणा अभेदका इत्यस्योदात्तत्वादयो गुणा उच्चार्यमाणा अपि न विवक्षिता इत्यर्थः एवञ्च प्रकृते निरनुनासिकस्यैवोच्चारणाद्विशेषस्यानुपादानात्कथमविवक्षेत्यत आह अस्थिदधीत्यादि उदात्तपाठेन उदात्तत्वगुणयुक्तस्याकारस्य पाठेन तथाच गुणकृतभेदाभाव एव ज्ञाप्यते नतु भवदुक्तो ऽर्थ इति भावः यत्नः उदात्तादिशब्दोच्चारणेन बोधनरूपः अविवक्षया ऽभेदकत्वमित्यत्र तृतीया ऽभेदे प्रकृत्यादित्वात् तथा निर्गुणस्योच्चारणमशक्यमिति निरनुनासिकत्वस्य भेदकत्वन्न स्यादिति नकारस्य स्थाने ऽनुनासिकः प्राप्नोतीति भावः यद्वा स्वरूपेण नान्तरीयकतया उच्चारितस्यापि गुणस्याविवक्षया व्यावर्तकत्वाविवक्षया अभेदकत्वं स ए-

वायमित्याकारा या प्रत्यभिज्ञा तद्विषयत्वं ज्ञाप्यत इत्यर्थः एवञ्चाविवक्षये-त्यत्र तृतीया हेतौ नचास्थ्यादीनामन्त्यानुदात्तत्वात्तदनुरूपे ऽनुदात्त एवो-च्चारयितव्ये उदात्तोच्चारणं विवक्षार्थमभविष्यतीति कथमुदात्त इति श-ब्दोच्चारणस्य ज्ञापकत्वमिति वाच्यम् परमास्थ्यादिशब्दान्त्यस्योदात्तत-या उदात्तत्वगुणकोच्चारणमपि स्थान्यनुरूपमेवेति उदात्तशब्दोच्चारणस्य ज्ञापकत्वसम्भवात् ननु यत्रोदात्तादिशब्दोच्चारणन्तत्रैव भेदप्रतीतिर्यत्र ते-षां शब्दानामनुच्चारणन्तत्र यत्नाभावादविवक्षेति चेदुञ ऊमित्यत्र उदात्ता-दिशब्दोच्चारणाभावादनुनासिकोच्चारणे ऽपि निरनुनासिकः स्यादत आह उञ ऊमिति एतेन उदात्तादिशब्दोच्चारणमेव न यत्नः किन्तु प्रयत्ना-धिक्यमेव विवक्षितमिति यत्र प्रयत्नाधिक्याभावस्तत्राविवक्षा ऽन्यत्रतु वि-वक्षेत्येव ज्ञाप्यशरीरमित्यनुनासिकस्य ऊमित्यस्योच्चारणं विवक्षार्थमभवती-ति भावः अत एव चतसर्यादुच्चदात्तनिपानङ्करिष्यत इत्यादीनामुपपत्तिः सर्वेषाम् सर्वाख्यातॄणाम् ननु यदि निपातनस्थले विशेषोच्चारणमेव विवक्षाहेतुस्तदा पथ्यादीनामन्त्यस्यानुनासिकत्वात्तदनुरूपे ऽनुनासिक ए-वोच्चारयितव्ये निरनुनासिकोच्चारणमेव विवक्षाया हेतुर्भविष्यतीति प्रश्लेषो व्यर्थ इत्यत आह भेदकत्वेपीति दोष इति स्यादिति शेषः ननु तपरसूत्रे ऽप्रत्ययग्रहणानुवृत्तिरस्तु तस्यच भाष्यमानभिन्नबोधकतास्त्विति नानुनासि-कस्य प्राप्तिरत आह तत्रेति तत्र तपरसूत्रे तथा तपरसूत्रमनणीव विधीय-मानेपि विध्यर्थमस्त्विति भावः एवञ्च तस्य तत्रानुवृत्यभावस्य भाष्यका-रसम्मतत्वेच तत्सम्बन्धे अप्रत्ययग्रहणसम्बन्धे भेदकत्वेपि शुद्धैकव्यक्तेरुच्चा-रणस्य भेदकत्वेपीत्यर्थः अतादृश्युक्तिः सर्वेषां सङ्ग्रहप्रतिपादकशब्दानु-च्चारणरूपा उक्तिः निषेधाद्राकारो नानुनासिक इत्यसङ्गतम् निषेधस्य प्राप्तिपूर्वकत्वेन प्रकृते प्राप्तेरेवाभावेन तथाभिधानमसङ्गतमित्याह सवर्णे-ति मूले तद्विशिष्टस्येति घटकत्वसम्बन्धेन थकारविशिष्टसमुदायस्येत्यर्थः अ-नयोस्तदंतविधिना समुदायस्य प्राप्तिमाह तदन्तेति विभक्ताविति परिभा-षाया यस्मिन्कार्ये विभक्तिरेव निमित्तन्तत्रैव प्रवृत्तिरित्याशङ्कान्निराचष्टे न-चेति अन्यत्र विभक्तिभिन्ने प्रातिपदिकप्रकृतिकाणीचि विभक्तिनिमित्तत्व-मात्रेति विभक्तेर्निमित्तत्वमात्रेत्यर्थः । अत एव तावतैव परिभाषायाः प्रवृत्तिसत्वादेव श्वयुवेत्यादेरिति श्वयुवेत्यादिशब्दनिमित्तस्य नगोश्वन्निति

निषेधस्य सम्प्रसारणस्यचेत्यर्थः शुन्याइत्यादि प्रथमस्योदाहरणं युवतीः प-
श्येत्यादि द्वितीयोदाहरणम् द्वितीयाविधायकसूत्रे ऽतिप्रसङ्गपरिहारायाल्लोपोन इतिसूत्रादन इत्यस्यापकर्षो नाश्रयणीयः शुन्येत्यादौ निषेधस्य निवृत्तये सा परिभाषा ऽवश्यमाश्रयणीया तयैव निर्वाहादिति भावः अत्रोभयोरपि सूत्रयोर्विभक्तौ परतः प्रवृत्तिमात्रेण परिभाषायाः प्रवृत्तिः मूले ऽन्यः पन्थाइति नचास्य स्वीकारे यवोरनाकाविति सूत्रभाष्ये विभक्ताविति परिभाषायाः प्रयोजनकथनावसरे पथीमथीइत्यत्रात्वन्नेत्युदाहरणत्वेनोपन्यस्तन्ततः परेण न केवलः पथिशब्दः स्त्रियामस्तीत्युक्तन्तदस्य पथीशब्दस्य स्त्रियां सत्वसम्भवाद्विरुध्यत इतिचेन्न एतदजानता एकदेशिना तथोक्तत्वात् ततो भगवता सुपथीत्युदाहृतम् केवलं स्त्रियां ङ्यभावेपि तदन्तस्य सम्भवति तत्र प्रयोग इत्याशयः नचैतदाचारक्विपापि सम्भवतीति वाच्यम् हलन्तेभ्य आचारक्विपो ऽनभिधानात् यद्वा न केवलेत्यस्य स्त्रीबोधकप्रत्ययान्तो नेत्याशयः कल्प्यः वस्तुतो झटिति प्रतीयमानतदर्थविरोधादेतदसङ्गतमिति अस्याप्यभिधाने न दृढम्मानमिति बोध्यम् ननु समबलस्थले व्यवस्थापकत्वम्परत्वस्य नित्यानित्ययोस्तु तथात्वविरहात्कथन्तत्र परत्वस्य नियामकत्वमत आह अभ्युच्चय इति अर्थवादवाक्यवत्प्रकर्षमात्रतात्पर्यकस्तथावादो नतु स्वार्थतात्पर्यक इति भावः अभिव्यक्तेति न्यायस्य सामान्यतः प्रवृत्त्यभिमानः शङ्कानिरस्यति नचेति स्वीयसिद्धान्ताभिप्रायेणाह तस्येति प्राचीनरीत्या ऽऽह तपरकरणादिति पूर्वोक्तार्थन्द्रढयितुं शङ्कासमाधाने करोति नचेत्यादिना स्त्रीप्रत्ययाप्रवृत्त्येति एतेन स्त्रीप्रत्ययस्तत्प्रकृतिको नास्तीत्यर्थः सूचितस्तथाच तादृशस्त्रीप्रत्ययान्तो नास्तीति फलितम् मूले पन्थियावित्यत्र न्थादेशकल्पने थेन्थइत्येवसिद्धे इतोद्वचनमभुक्षिन्नर्थमिति पूर्वग्रन्थविरोध इति तु न वाच्यं ऋभुक्षिन्नर्थमित्यस्यैतदुपलक्षणत्वात् सुप्निमित्तकविधावित्यर्थमात्राभिप्रायिकामाशङ्कानिरस्यति नन्वित्यादिना । अत एव नलोपः सुप्तिसूत्रे सुप्त्वतद्व्याप्यधर्मावच्छिन्नविधेरेव ग्रहणादेव पत्व इति कर्तव्य इति शेषः असिद्धत्वन्नेति सुब्विधावसिद्धत्वस्यापूर्वविधित्वन्नेत्यर्थः एतेन षत्वविधिः परो नलोपशास्त्रन्तु पूर्वमिति कथं षत्वे कर्तव्ये नलोपासिद्धत्वस्य प्राप्तिरिति परास्तम् अस्य ग्रन्थस्य खरादिविधौ यथा नियमत्वन्तथा सुब्विधावापि तदेकवा-

क्यतया नियमत्वमेवेत्याशयात् तच्च नियमत्वं सुब्विधिशब्दस्य सुप्त्वत-
द्व्याप्यधर्मावच्छिन्ननिमित्तकविधावित्यर्थकत्व एव सङ्गच्छत इति तात्पर्यम्
तस्याः अङ्गवृत्तपरिभाषायाः अत्वं दुर्वारमिति एतदवयवस्य ह्रस्वेकारस्य
सन्निपातपरिभाषयेति इयङादेशे इत्वावच्छिन्नस्य सत्वन्निमित्तत्वेयङा-
देशेप्यनुवर्तत एव यद्यस्येकारस्यात्वं स्यात्तदा तद्विघातः स्यष्ट एवेति भावः
मतान्तरङ्खण्डयति नचेति प्रकृतीत्यादेः पथ्यादिप्रकृतिसर्वनामस्थानरूप-
प्रत्ययविशेषापेक्षेत्यर्थः यण्विधौ चेवर्णान्तधात्वादिरूपसामान्यस्याजादिप्र-
त्ययरूपसामान्यस्याचापेक्षेति यणन्तरङ्ग इति भावः यत्र विशेषापेक्षशास्त्र-
निमित्तत्वं सामान्यापेक्षशास्त्रनिमित्तत्वस्य व्याप्यं तत्रैव सामान्यापेक्षे ऽधि-
कस्याप्यपेक्षासत्वेन बहिरङ्गत्वव्यवहारः प्रकृतेतु तथा नेत्याशयेनाह प्राति-
पदिकेति अत्र थोन्थ इत्यत्र प्रकृतित्वेन सर्वनामस्थानप्रकृतित्ववत्त्वेन हला-
देः सोः यण्प्रकृतीति यणादेशशास्त्रोक्तप्रकृतित्वतत्रत्यनिमित्तप्रत्ययत्वव्या-
प्यत्वाभावादित्यर्थः एतेन सामान्यापेक्षशास्त्रनिमित्तत्वनिष्ठव्यापकतानिरू-
पितव्याप्यत्वाभावः सूचितः विशेषापेक्षात्सामान्यापेक्षमन्तरङ्गमित्यस्यतु य-
त्र सामान्यापेक्षे विशेषापेक्षशास्त्रीयनिमित्तस्य ततो ऽधिकस्य चापेक्षा त-
त्रैवोक्तव्यापकतानिरूपितव्याप्यतायाः सत्वात्प्रवृत्तिरित्यभिप्रायः परि-
भाषाया एतादृशार्थबोधिकायाः प्रवृत्तिस्तु रुदादिभ्यः सार्वधातुक इ-
त्यत्र स्फुटा तत्रहि रुदादित्वं सार्वधातुकत्वञ्च निमित्तावच्छेदकम् तत्र
सार्वधातुकत्वज्ञानाय प्रकृतेर्धातुत्वज्ञानम्प्रत्ययस्य प्रत्ययत्वज्ञानञ्चावश्यकमि-
ति यासुडन्तरङ्गः एतन्निमित्तावच्छेदकधातुत्वप्रत्ययत्वरूपसामान्यधर्मनिष्ठ-
व्यापकतानिरूपितव्याप्यता रुदादित्वसार्वधातुकत्वयोरस्ति वस्तुतस्तु तत्र
नित्यत्वाद्यासुडित्येव। नत्वन्तरङ्गत्वात् विशेषस्य व्याप्यत्वेन तद्व्यापक-
स्यानुमानेनोपस्थितावपि तस्य निमित्ततत्वे मानाभावादत एव भाष्यकृतैता-
दृशान्तरङ्गबहिरङ्गभावस्यासिद्धपरिभाषाप्रवृत्तौ हेतुता नोक्ता न भाष्यानु-
क्तत्वमात्रात्तादृशान्तरङ्गबहिरङ्गभावस्यानाश्रयणे बीजङ्किन्तु भाष्यान्तरमपि
तत्र बीजमित्याह तदोः सः सावितीति तत्रहि विभक्तिरूपसामान्य-
धर्मावच्छिन्ननिमित्तकषत्वं तदोरिति तु सावितीति विशेषापेक्षमिति यथाश्रु-
तार्थकया तया परिभाषया ऽत्वस्यान्तरङ्गतया पूर्वम्प्रवृत्तावनन्त्यस्यैव भावि-
ष्यतीत्यनन्त्ययोरिति व्यर्थं स्यात् एवं योगविभागेन गुरुभूतेन तत्प्रत्याख्या-

नमपि वृथा स्यादुक्तरीत्या ऽनन्त्यस्यैव सिद्धेरिति भावः सर्वत्रेति एव-
मुक्तिस्तु कैयटेनानुदात्तङितइतिसूत्रे लादेशानाम्पूर्वम्प्रवृत्तये एषोक्तेत्यभि-
प्रायेण यत्तु आत्वात्मके सुब्विधौ नलोपस्यासिद्धत्वे नस्यात्वे पन्थ्या इति
रूपामिति तन्न सुपि यो विधिर्नकारेण खसत्तया प्रतिबध्यते तस्यैव तत्र ग्र-
हणात्स्वरसाहचर्येण तादृशस्य पूर्वमुपस्थितत्वात् थोन्थइत्यस्य प्रवृत्तिप्रति-
बन्धकानुपलम्भेनात्वमात्राभिधाने न्यूनतेत्यत आह न्थादेशस्येति वैया-
त्यादिति धात्वर्थादित्यर्थः नात्रातिदेश इति अत्विधावेकदेशविकृतन्याय-
प्रवृत्तिरप्यनिष्टेति तद्भावः वस्तुत एतदयुक्तम् नान्तप्रकृत्यनुकरणेपि ना-
न्तानाम्पथ्यादिनामित्यर्थे मानाभावेन विकृतावयवनिबन्धनकार्याभावेन
तेन न्यायेन पथिन्शब्दत्वातिदेशस्य दुर्वारत्वात् न्यूनतापरिहारायाह अ-
त्वस्येति निषेध इति पदस्यान्तः पदान्त इत्यर्थाभिप्रायेणेयमाशङ्का अ-
नान्ततयेति सम्प्रतीत्यादिः पदत्वाभावादिति कार्यकालपक्षाभिप्रायेणेदम्
नचाकडारादिकारस्थभपदसंज्ञाविषये यथोद्देशपक्षस्यैव स्वसिद्धान्ते सत्वे-
नेदमसङ्गतमिति वाच्यम् यत्र तदधिकारीयसंज्ञाद्वयप्रसक्तिस्तत्र यथोद्देश-
स्यैवाश्रयणमिहतु न तथेत्याशयात् अत्र उक्तरूपेषु वस्तुतस्तु पदे ऽन्तः
पदान्तइति भाष्यकारीयोक्त्या परपदस्थाजादेशस्यैव स्थानिवत्वस्य तेन
सूत्रेण निषेधादेतत्सर्वमाचीनरीत्येति न कापि क्षतिरिह तद्रीत्या ग्रन्थ-
सङ्गमनमिति बोध्यम्। सखीयतेः सख्युरिति भाष्यकारोक्त्याभिप्रायेणाह
तत्प्रकृतिकेति यण् एरनेकाजिति यण् अकारलोपस्य स्थानिवद्भावादाह
क्यजेति अधुना यण्तु इको यणचीति बोध्यः नचास्मिन्कर्तव्ये क्किनिमि-
त्तकयलोपस्य बहिरङ्गासिद्धत्वं स्यादिति वाच्यम् बहिरङ्गपरिभाषाया अ-
नित्यत्वात् लोपापत्तिः लोपो व्योरिति लोपापत्तिः नच स्थानिवद्भावयलोपे
तन्निषेधादपूर्वविधित्वाच्च निमित्तकस्यत्विति यण इति शेषः इदङ् काव्यु-
पसङ्ख्यातमिति वार्तिकाभिप्रायेण अन्यथा ङस्निमित्तकस्य वल्परत्वन्नास्ती-
ति लोपस्य प्राप्तेरेवाभावेनेदमनुपपन्नं स्यात् वार्तिकप्रत्याख्यानेतु वेरपृक्त-
स्येति सूत्रे वेरिति योगं विभज्य तत्र व्योरित्यनुवर्त्य विप्रत्ययान्तयोर्व्यो-
रिति व्याख्यानेन लोपो बोध्यः स्थानिवत्वेहीति क्यजल्लोपस्येत्यादिः
व्यवधानादिति तेनैव व्यवधानादित्यर्थः तन्निमित्तकः ङस्निमित्तक इत्यर्थः
तस्माद्भाष्यप्रामाण्यात्क्यजाद्यल्लोपे स्थानिवद्भावप्रवृत्तिरावश्यकीति भावः

आत्वादिति आदिना ऽत्वन्थादेशयोः सङ्ग्रहः न्यायानामिति अभिव्यक्ते-
ति न्यायस्येत्यर्थः न्यायानामिति बहुवचनं स्थानिवद्भावसङ्ग्रहाय एवङ्
कौ लुप्तमिति न सार्वत्रिकम् किन्तु कौ विधिस्मतीत्येवतु तथेत्यपि बोध्यम्
मूले स्त्रीलिङ्गनिर्देश इति बहुव्रीहुचत्तरस्त्रीलिङ्गनिर्देश इत्यर्थः अत एवाह
विशेष्येति संज्ञिपरमित्यत्र यः संज्ञाशब्दः स एतच्छास्त्रीयसंज्ञापरो भविष्य-
ति कृत्रिमाकृत्रिमन्यायात् तथाच न तद्बोध्यार्थस्य ष्णान्तत्वमित्याशङ्कते यद्य-
पीति तत्वेन संज्ञित्वेन विवक्षिता इतीति उभयगतिरिह भवतीति परिभाष-
येति शेषः प्रतिपादितेनेति स्त्रीप्रत्ययप्रकरणस्थेनेति शेषः मूले बाधे दृढ इति
अत्र बाधे दृढ इति छेदः तत्र तन्त्रान्तरीयप्रसिद्धिविषयबाधस्यानुपयोगादाह
दूषण इति। ननु विशेषणस्य विशेष्यसम्बन्धित्वात्सर्वत्र ससम्बन्धिकत्वमत
आह नित्यमिति नित्यसापेक्षस्थले समासस्य प्रवृत्तौ बीजन्दर्शयति सापेक्षस्ये-
ति ततः वाक्यात् पूर्वार्द्धोक्ते ऽर्थे साधकमाह तदेवाहेति व्यपेक्षालक्षणसाम-
र्थ्यस्य वाक्य एव सम्भवादाह आकाङ्क्षेति तथाचैतादृशस्थले बोधो भ-
वत्येवेति न वृत्तिप्रतिबन्धः गुर्वादीनिति गुरुकुलेति समुदायावयवत्वङ् गु-
रोः समुदायजन्यशाब्दबोधीयविशेष्यतानिरूपितविषयताश्रयत्वात् एवञ्चै-
तादृशस्थले चैत्रादिपदार्थस्य धर्मिपारतन्त्र्येण कुलेनान्वयस्वीकारेण यद्य-
पि निर्वाहः संस्पृश्येत्यक्षरस्वारस्यञ्चोपपद्यते तथापि स्पष्टप्रतिपत्तये आह
तद्द्वारकेत्यादि गुरुद्वारकसम्बन्धश्च स्वीयगुरूत्वाद्यत्वरूपो बोध्यः वस्तुतस्तु
नित्यसाकाङ्क्षत्वमेव नैतादृशरीत्या ऽन्वयेपि वृत्तिप्रयोजकङ्किन्तु गमकत्वमे-
वेत्यन्यत्र निरूपितम् इहोपसर्जनस्यान्तपदस्य तथात्वादाह ष्णापदमिति
नित्यसाकाङ्क्षत्वमेवैतादृशस्थले समासप्रयोजकमित्येतेन दर्शितम् नित्य-
साकाङ्क्षत्वञ्च सम्बन्धविषयकोत्थिताकाङ्क्षाप्रयोजकत्वम् एतेन यादृश-
स्थले नोत्थिताकाङ्क्षा किन्तूत्थाप्या तत्र न समास इति दर्शितम्भवति
राज्ञः पुरुषस्य धनमित्यादौ यथा मूले सङ्घचेत्यस्येति अन्तपदाभावे ष्णा-
इत्येव यदुच्यते तदा पदान्तरसन्निधानाभावेन बहुव्रीह्यर्थस्यालाभः स्या-
त् ष्णापदोपादानसामर्थ्यादिदम्पदं षकारनकारान्तस्त्रीशब्दबोधकमिति य-
दि ब्रूषे तर्हि तादृशशब्दमात्रस्य ग्रहणापत्तिः एवञ्चातिषडादिशब्दे ऽति-
प्रसङ्ग इत्यन्तपदं सूत्रे सार्थकम् एतदेवाह अन्तग्रहणमित्यादिना तत्सम्पा-
दकम् आकृष्टस्य संख्यापदस्य तदन्तत्वासम्भवेन तस्य तत्संज्ञिपरत्वसम्पा-

दकम् ननु स्वरितत्वं संख्यापदस्य कल्प्यताम् शब्दाधिकारश्च कल्प्य इति प्रकृतसूत्रे ऽल्पदाभावेपि तत्सम्पादनीयार्थलाभे ऽल्पदमुक्तार्थगमकमविष्यतीत्यत आह किञ्चेति । तदर्थत्वे उपदेशकाले इत्यर्थकत्वे पूर्वनिपातप्रकरणस्यानित्यत्वेप्याह उणादीनामिति नन्वेवंसत्युपदेशग्रहणङ्कर्तव्यमिति वार्तिकासङ्गतिरत आह उपेति स्वप्रकृतिकेति षकारनकारान्तप्रकृतिकेत्यर्थः ननु मयाप्येवं सुवचमत आह त्वयात्विति हलीत्यस्यापकर्षे प्रमाणमाह हलीत्युभयोरिति नुटि कृते कथं सन्निपातपरिभाषाप्रवृत्तिरत आह नान्तत्वेत्यादि ननु सन्निपातपरिभाषाया अनित्यत्वादात्वमिति स्वीकारो व्यर्थः इष्टस्याष्टानामित्यस्य प्रकारान्तरेण सिद्धेरित्याशङ्क्याह नचेति वाच्यमिति परेणान्वयः सन्निपातपरिभाषया ऽप्राप्तिरिति नान्तसन्निपातेन षट्संज्ञायान्नुटि सति भसंज्ञाप्रतिबन्धेन पदसंज्ञाप्रवृत्तिस्ततो नलोपस्य प्राप्तिरिति परम्परया नुड्विषये सन्निपातपरिभाषाप्राप्तिरिति भावः असिद्धत्वेनेति सन्निपातपरिभाषायाः कृन्मेजन्तसूत्रभाष्ये पाठेनास्याः सपादसप्ताध्यायीस्थत्वादिति तद्दृष्ट्या सन्निपातविघातकशास्त्रासिद्धत्वेनेत्यर्थः अत्रासिद्धत्वङ्किम्परिभाषादृष्ट्या उत सन्निपातनिमित्तकनुड्विधिदृष्ट्येति वितर्क्य दूषणम्प्रथमपक्षे दोषमाह कृदिति प्रत्ययलक्षणसूत्रस्य नियमार्थत्वपक्षाभिप्रायेणहि स्थानीति अभावादित्यन्तस्यासङ्गतौ हेतुत्वम् तत्र गौरीत्यादौ भाष्येति नदीहूस्वत्वं सम्बुद्धिलोपस्येति भाष्येत्यर्थः यदि दोषनिरूपणपरभाष्यसङ्गमनाय तत्राशास्त्रीयत्वं स्थानिवद्भावरूपातिदेशस्याप्रवृत्तौ हेतुस्तर्हीहापि नलोपस्यासिद्धत्वातिदेशः कथमिति परिभाषादृष्ट्या ऽसिद्धत्वमप्रयोजकामिति भावः द्वितीये आह किञ्चेति तत्र कृते पूर्वस्मिन् कृते एवञ्च नुट्प्रवृत्युत्तरकालिकप्राप्तिकर्तृकनलोपशास्त्रस्य नुटम्प्रत्यसिद्धत्वस्याप्राप्तिरेवेति सन्निपातपरिभाषाया अनित्यत्वेनैव नलोपो वाच्य इतिचेन्न लोपस्यासिद्धत्वेन परिभाषाया अनित्यत्वादात्वमिति युक्तमिति भावः नन्वेवं षट्संज्ञाया अपि कृताकृतप्रसङ्गित्वेन नित्यतया नित्यत्वादित्यसङ्गतमत आह कार्यकालपक्ष इति तथाच षट्संज्ञाया नुडेकवाक्यतापन्नत्वेन तत्कालप्रवृत्तिकतया आत्वे कृते न षट्संज्ञैकवाक्यतापन्ननुडप्राप्तिरिति कृताकृतप्रसङ्गित्वमधुना आत्वस्यैवेति तस्यैव नित्यत्वम् नच नित्यादप्यन्तरङ्गस्य बलवत्त्वमित्यपरानिमित्तकत्वेन षट्संज्ञान्तरङ्गा आ-

त्वात्प्राग् भविष्यतीति वाच्यम् कार्यकालपक्षे षट्संज्ञाया नुडेकवाक्यतया तस्यच प्रकृतिप्रत्ययोभयसापेक्षतया आत्वसमलक्षतया षट्त्वमपि बहिरङ्गमित्याशयात् ननु कार्यकालपक्षे लक्ष्यासिद्धिश्चेत्तर्हि यथोद्देशपक्षे एवास्त्वित्याशङ्क्याह नि राचष्टे मूले नचेति सुलभेति तथाच नुड् भविष्यतीतिशेषः नुड्विधायकशास्त्रस्य नाल्विधित्वमितिचेत्तत्राह षट्संज्ञाया इति अल्विधित्वमिति तथाचैतत्पक्षेपि हलीति प्रकृतसूत्रे ऽपकृष्येति भावः अभिमानपदसूचितामरुचिमकटयति यदित्विति अत्र रूपस्येत्यन्तम्परिचायकं षट्त्वस्य नतु विशेषणतेन स्थानिवद्भावस्य षट्त्वबुद्धिसम्पादनायापेक्षा नतु तादृशविशेषणविशिष्टषट्त्वसम्पादनायेति विशेषणतया ऽलाश्रयणमस्त्येवेति न शङ्क्यम् स्थानिवत्वेनेति सर्वे सर्वपदादेशा इति न्यायेनादेशकल्पनया स्थानिवत्वेनेत्यर्थः तदभावेप्याह एकदेशेति एतेन षट्त्वयात्वसन्निपातनिमित्तक इह नुट् सच न सन्निपातपरिभाषया इह प्रवृत्तिसम्पादकः आत्वनलोपयोः षट्त्वाविघातकत्वादिति मूलोक्तस्य सन्निपातपरिभाषाया अनित्यत्वस्य नोपयोग इति ध्वनितम् तत्सिद्धिरिति अष्टानामित्यस्य सिद्धिरित्यर्थः हलीत्युभयोः शेष इति भाष्यमपि कार्यकालपक्षाभिप्रायकम् अनुवृत्तेरिति अनु पश्चाद्वृत्तेः सम्बन्धस्येत्यर्थः जश्शसोरिति तथाचेह ज्ञापकं सामान्यापेक्षं सामान्ये प्रमाणानाम्पक्षपातादिति भावः । पर्यवसितार्थाभिप्रायेणाह ह्रस्वे ऽन्तोदात्तेति सावकाशस्येति कार्यकालपक्षे ऽनात्मत्वेन षट्संज्ञाया अत्राप्राप्त्या षट्त्रीत्यादेरप्राप्त्या सावकाशस्येत्यर्थः षट्स्वरस्तु पञ्चभिरित्यादौ चरितार्थः अप्रवृत्तेरिति अष्टन इति सूत्रस्थाप्रवृत्तेरित्यर्थः कार्यकालपक्षमभिप्रेत्यैव समाधत्ते दीर्घेति न्यायानित्यत्वस्यापीति एवञ्च तस्यानित्यतया तदप्रवृत्तौ पुनःप्रसङ्गविज्ञानन्यायस्येह प्रवृत्तेरिति भावः ननु पूर्वोपपादितरीत्या ऽष्टभिरित्यस्य दीर्घग्रहणव्यावर्त्यता सिद्धेति तद्वैकल्पिकत्वे ज्ञापकत्वङ्कथमिति चेन्न यावता विना ऽनुपपत्तिस्तस्य सर्वस्य ज्ञाप्यत्वमिति न्यायेनोभयत्र दीर्घग्रहणस्य ज्ञापकत्वात् अत एवाह अपीति अत्रेदम्बोध्यम् यदुभयोर्ज्ञाप्यता स्वीक्रियते तदा लाघवाभावात्कृतात्वस्य षट्संज्ञासत्त्वे आत्वस्य वैकल्पिकत्वे च तज्ज्ञापकमस्तु एतावतापीष्टार्थसिद्धिर्भवतीति पूर्वोक्तरीत्या दीर्घग्रहणं वैकल्पिकत्वे ज्ञापकङ्कार्यकालपक्षे यदि त्विह यथोद्देश-

पक्ष एव ज्ञाप्यते तदा हलीत्यस्यात्वविधायकसूत्रे ऽपकर्षो न कार्य ए-वञ्च लाघवम्भवतीत्याशयेनाह यद्वेति अत्र षट्संज्ञायाम् पक्ष एवेत्येव-कारेण सकृद्गतिन्यायानित्यत्वस्य कृतात्वस्य षट्संज्ञा भवतीति कल्पनस्य च निरासः अस्मिन्पक्षे ऽष्टनो दीर्घादिति दीर्घग्रहणस्यात्ववैकल्पिकत्वमा-त्रांशे ज्ञापकता कल्प्या बहिरङ्गतया विभक्त्युत्पत्त्युत्तरकालिकतया प्रागिति विभक्त्युत्पत्तेरिति शेषः जात इति ततो विभक्तिस्थत आत्वमिति प्र-क्रियात्र एवञ्चाष्टाभिरित्यत्रापि षट्त्रीतिसूत्रस्य प्राप्त्या ऽष्टनइतिसूत्रस्या-चारितार्थ्येनापवादत्वेनाष्टाभिरित्यत्रेवाष्टाभिरित्यत्रापि स्यादिति दीर्घग्रहण-मिति भावः स्वरादेरिति षट्त्रीति झल्युपोत्तमामिति वा विहितस्वरादेरि-त्यर्थः आदिना ऽष्टानामित्यत्र नुटः परिग्रहः स्थानिवद्भावेनेति सर्वे स-र्वपदादेशा इति न्यायेन समुदायस्यादेशत्वकल्पनया स्थानिवद्भावेनेत्यर्थः एकदेशविकृतन्यायेन वेति नहीदानीन्नान्तत्वस्यापेक्षा किन्तु षट्त्वमात्र-स्य इत्थञ्च विकृतावयवत्वस्य नानयनमित्येकदेशविकृतन्यायस्य प्रवृत्तिर्भ-विष्यतीति भावः । ननु विभक्त्युत्पत्तेः प्राक् षट्त्वस्य न फलमत आ-ह तत्र पक्षे ननु कृतात्वेपि चेत्षट्त्वन्तदा ऽष्टाविंत्यत्रापि लुक्स्यादत आह औश्विधिसामर्थ्यादिति एवमिति औश्विधिसामर्थ्यादष्टाविंत्यत्र लु-गभाव इत्यर्थः अष्टाविंत्यत्र द्वितीयाबहुवचने व्यपवर्गाभाव इति अन्त-रङ्गत्वादेकादेशे षट्संज्ञकात्परत्वाभाव इत्यर्थः अप्रवृत्तेरिति अस्य ध्वनि-तत्वादित्यत्रान्वयः एहीत्यत्रेति तत्र भाष्ये रोहावैहीतिप्रयोगे रोहावएहीति-स्थिते आङः परत्वमिहीत्यस्येति तिङ्ङतिङ इति प्राप्तस्य निघातस्य लोट्च गत्यर्थलोटा युक्तइतिच निषेधमाशङ्क्य छान्दसत्वेन समाहितम् कैं-यटश्च तत्र नित्यत्वादेकादेशे निघाताप्राप्तिमाशङ्क्य एवंविधभाष्यविचारा-त्पूर्वं सन्धिकार्याप्रवृत्तिरनुमीयत इत्याह नेन्द्रस्य परस्येतिसामान्यापेक्षं ज्ञा-पकमिति तदाशयः एतद्भाष्येति दीर्घग्रहणस्य ज्ञापकतापरभाष्येत्यर्थः पा-ठादन्तोदात्तत्वमिति अन्यथा नृःसङ्ख्याया इत्यादुचदात्तत्वं स्यात् तत्र अ-ष्टाविंत्यत्र नन्विति एवमपीति शेषः षट्स्वराविधायके षट्संज्ञकात्परत्व-माश्रित्य प्राप्तस्वरविधायकसूत्रद्वये अत एव विहितविशेषणाश्रयणादेव वाच्य इति अन्यथा शसि कृतान्तोदात्तत्वकचतुरशब्दस्य स्थाने चतस्रा-देशोप्यन्तोदात्तः स्यात्तथाचोदात्तयणो हल्पूर्वादिति स्वरः स्यात् यदि-

तु शब्दान्तरप्राप्त्योभयोरानित्यत्वेन स्वरविधायकशास्त्रात्परत्वात्त्रिचतुरोरि-त्यस्याचिर ऋत इत्यस्य च प्राक्पदृत्तिस्तस्य स्थानिवत्वेन चतुरशब्दत्वा-च्चतुरः शसीत्यस्य प्रवृत्तौ तकाराकारस्योदात्तत्वं स्यात् आदृच्यदात्तनि-पातनादिति समासत्वात्सूत्रे ऽन्तोदात्तपाठे कर्तव्ये चतसृशब्दावयवच-कारस्योदात्तस्य पाठादित्यर्थः ननु वार्तिकारम्भे चतुरः शसीत्यस्यैवाप्र-वृत्तिः निपातनेतु तस्य सर्वबाधकतया षट्त्रीत्यस्यापि बाधापत्तिरत आ-ह । तान्निपातनपीति अपिर्वार्तिकारम्भसमुच्चायकः विभक्तिस्वरः वि-भक्तेरुदात्तत्वम् निपाते हीति निपातनस्य सर्वबाधकत्वे हीत्यर्थः चत-सृशब्दादिति एतत्सम्बन्ध्यजादिविभक्तिवारकतयैव तस्य चरितार्थ्यम-स्ति यदि निपातनस्य सर्वबाधकत्वन्तदा तद्व्यर्थमेव स्यादिति अयम्भावः षट्त्रिचतुर्भ्य एकवचनद्विवचने न भवत एवं षड्भ्यो जश्शसोर्लुगेव अ-न्याः सर्वा हलादिविभक्तय एव त्रिचतुरोर्जसितु न प्रयोजनम् अच्चे-श्छन्दसीतिसूत्रादसर्वनामस्थानग्रहणस्य षट्त्रीतिसूत्रे ऽनुवर्तनात् त्रीनि-त्यत्र शसितु एकादेश उदात्तेनेतिसिद्धम् तिस्रः पश्येत्यत्र तृदात्तयण इत्येव सिद्धम् चतुरः पश्येत्यपि न व्यावर्त्यञ्चतुरः शसीत्यस्यारम्भात् तस्माच्चतस्रः पश्येत्येव व्यावर्त्यमिति यदि निपातनस्वरस्य सर्वबाधक-त्वन्तदा तद्वैयर्थ्यं स्यादेव एतेन प्रकारेण निपातनस्वरस्य विभक्तिस्व-राबाधकत्वे ज्ञापिते चतसृणामित्यत्र विभक्तिस्वरः सिद्ध इति अन्यथा विहितविशेषणानाश्रयणे तदसङ्गतिः नह्यन्यदिति ग्रन्थासङ्गतिः अष्टावि-त्याद्यपि न व्यावर्त्यमित्याह अष्टावित्यादि नचेति वाच्यमिति परेणा-न्वयः कदष्टावित्यस्य प्रदर्शनमव्ययपूर्वपदप्रकृतिस्वरस्यात्र प्रवृत्त्या एकादे-शस्वरेणासिद्धिप्रदर्शनाय ततः षट्संज्ञकात् एतद्ज्ञाप्यमिति चतुरः शसी-त्यत्रोक्तभाष्येत्यर्थः तदनभिधानम् कदष्टावित्याद्यनभिधानम् एतज्ज्ञापकेति दीर्घग्रहणस्य ज्ञापकतापरभाष्येत्यर्थः वस्तुत एतत्सर्वमभ्युपेत्यवादेन सि-द्धान्तोक्तनभिधानमेवेत्याह प्रियाष्टादीनामिति तिसृभ्य इति तत्रहि जस्-ग्रहणङ्किमर्थमिति प्रश्ने तिसृकेति कन्प्रयान्तस्मत्युदाहरणमुक्त्वा जसग्रहण-मनर्थकमन्यत्राभावादित्युक्तम् अस्य नित्यम्बहुवचनान्तताया तदन्ययोरभा-व एव शसितूदात्तयणइत्येव सिद्धम् अन्याः सर्वा हलादयस्तत्र षट्त्रिच-तुर्भ्य इत्येव भविष्यति तिसृकेत्यपि न प्रयोजनम् मध्ये ऽपवादन्यायेन

तिसृभ्य इत्यस्यानुदात्तौ सुप्पितावित्येतद्बाधकतया नित्स्वरेण तिसृभ्य इत्यस्य बाधो भविष्यतीत्युक्ता उपसमस्तार्थमेके जसो ग्रहणमिच्छन्ति अतितिस्रौ अतितिस्रः इति जस्ग्रहणस्य व्यावर्त्यं दर्शितम् यद्यपि वार्तिककृता तत्खण्डितत्तथाप्याचार्यान्तरसंवादेन जस्ग्रहणस्य प्रयोजनमाथकारो ऽभिहितवान् तच्च प्रयोजनं विहितविशेषणसत्वेतु नोपपद्यत इति परत्वमेव नियामकमिति जस्ग्रहणाभावे त्रिभक्तेरुदात्तत्वं स्याद्धस्ग्रहणसत्वेतु तस्याप्रवृत्तौ समासस्वरबाधकाव्ययपूर्वपदप्रकृतिस्वरबाधकेनातेरकृत्पदइत्यनेनातेः परमकृदन्तम्पदशब्दश्चान्तोदात्त इत्यर्थकेनान्तोदात्तत्वे कृते उदात्तस्य ऋकारस्य यणादेशे उदात्तस्वरितयोरिति स्वरित औकारो ऽकारश्च भवति तुल्यन्यायादिति यथा तिसृभ्यो जस इति सूत्रस्य प्रवृत्तिविषये व्यवस्था तद्वत् अपिना अष्टन्स्वरस्य परिग्रहः नन्वेवं विशेषणाश्रयणबोधकोक्तभाष्यस्य का गतिरत आह चतुरइति वार्तिकम् विभक्तिस्वरभावश्च हलादिग्रहणादित्येतत् दूष्यमिति जस्ग्रहणस्योपसमस्तार्थत्वव्यत्र सूत्रे हलादिग्रहणस्यापि समस्ते प्रियत्रीनित्यादौ प्रयोजनलाभाद्दूष्यम् नन्वेवमेके इत्युक्त्वा तस्य सिद्धान्त्युक्तित्वङ्कथमत आह एके इतीति दिगिति दिगर्थस्तु चतुरः शसीतिसूत्रस्थं स्त्रियाम्प्रतिषेधो वाच्य इति वार्तिकमपि न कार्यम् चतस्रः पश्येत्यत्र स्वररेफादेशयोः प्राप्तौ परत्वाद्रेफादेशे तस्य स्थानिवत्त्वेन व्यवधानात्तकाराकारस्य स्वराप्राप्तेः नच रेफस्यैव स्वरो भवत्विति वाच्यम् हल्स्वरप्राप्तौ व्यञ्जनस्याविद्यमानवद्भावात् नच स्थानिवद्भावस्य स्वरे कर्तव्ये निषेधो भविष्यतीति वाच्यम् स्वरदीर्घयलोपेषु लोपाजादेशस्यैव स्थानिवद्भावनिषेधात् एवमादुचदात्तयोश्चतुरोरान्तरतम्यादादुचदान्ते आदुचदात्तनिपातनमपि न कार्यम् हलीत्यस्यापकर्षस्तु प्रतिपत्तिलाघवायेति वर्णग्रहणे प्रतिपदोक्तपरिभाषाया अप्रवृत्तिवादिमतेप्याह संयोगादीति तदेकवाक्यतया प्रत्याख्यानैकवाक्यतया अत्र सूत्रे णग्रहणस्य सत्वपक्षे यत्तु णग्रहणं संज्ञापूर्वकविधेरनित्यत्वबोधनाय तेन दुर्भवानीत्यत्र णत्वन्न एवं पदान्तस्येतिसूत्रमपि नञ्घटितमनित्यमित्येतद्बोधनद्वारा सार्थकम् । तेन हेप्राणित्यस्यासिद्धिरित्याहुस्तन्न युक्तमित्यत आह प्रत्याख्यानेनचेति फलान्तरेति निरुक्त्येत्यर्थः णत्वग्रहणप्रत्याख्यानस्य भाष्यानारूढत्वादाह णग्रहणेति कैयटध्वनितेति प्रागुक्तरीत्या कै-

यटध्वनितमत्याख्यानेत्यर्थः अत्र कैयटेत्युपादानमरुचिबोधनायात एवाह वस्तुत इति प्रागिति युष्ण इत्येतन्निरूपणावसरे इत्यर्थः प्रत्याख्यानेति पञ्चमीसमासस्येत्यादिः तत्सम्भवतीति अनिदृत्वं सम्भवतीत्यर्थः विकल्पितेदृत्वेन तनिपतीति विकल्पितेदृत्वेन ननु वादान्तेतिसूत्रेण विकल्पेनेड्विधानात्तद्भावे णिजन्तात्तत्सम्भवतीति तङ्व्याहृत्यर्थं सेड्ग्रहणमस्तु तत्सामर्थ्यात्पूर्वसूत्रेणापि न णिलोप इत्यत आह वादान्तेति सिद्धान्तमाह यदित्विति विहितविशेषणपक्ष इति एतच्च प्राङ्निरूपितम् भाष्योदाहरणादिति प्रगदय्य प्रस्तनय्येत्यस्याप्युपलक्षणम् अल्लोपस्य स्थानिवद्भावेन तस्यैव लघुपूर्वत्वमाश्रित्य णेरयादेश इतितु न सत् पूर्वत्वस्य सावधिकत्वेनाकारस्य सम्प्रत्यश्रवणात्तादृशव्यवहारासम्भवात् नापि स्थानिवत्त्वेन पूर्वस्य परस्य वा विधौ स्थानिवत्त्वस्य प्रवृत्तिर्नतु स्वस्यैव व्यवहारविशेष इति स्थष्टमेव ननु बहुवचननिर्देशस्य साधकत्वमन्यत्र निराकृतमत आह वस्तुत इति इत्येतत्साहचर्यादिति यथा तत्सूत्रङ्गौणे न तथेदमपि तत्र न प्रवर्तते नच सूत्रान्तरसाहचर्यस्यानियामकत्वसिद्धान्तादिदमसङ्गतमिति वाच्यम् षड्ग्रहणस्य ततो ऽपकर्षङ् कृत्वा तत्सूत्रस्थं षड्ग्रहणं वक्ष्यमाणरीत्या प्रधानीभूतार्थबोधकमितीहापि तादृशस्यैव बोधनमुचितमित्यभिप्रायात् तस्य गौणे ऽप्रवृत्तिं स्थष्टयति तस्य चेति भाष्ये एवकारादर्शनेनैवकारघटितं व्याख्यानं भाष्यविरुद्धमित्याशङ्कानिवृत्तये आह यद्यपीत्यादि अत्र न भवत्येवेति व्याख्याने युक्तेति यथालक्षणमित्यस्य लक्षणमनतिक्रम्येत्यर्थः प्रथमव्याख्यायाम् द्वितीयव्याख्यायान्तु यथेति पृथक्पदम् अलक्षणमिति छेदः यथाशब्दो योग्यतार्थकः लक्षणाभावस्य योग्यतेत्यर्थः आद्यव्याख्यायां भाष्यकाराभिप्रेतत्वे इत्थत एवैतदिति ब्रूयादिति भावः प्रकारान्तरेण तस्य व्याख्यानस्यासाङ्गत्यमाह आद्येति तादृशव्याख्यानमनुचितमपीत्याह किञ्चेति मूलङ्कौमुदीस्थो गौणत्वेत्यित्यारभ्य इतीत्यन्तो ग्रन्थः टीका मनोरमा पूर्वसमादित्यारभ्य प्रियाष्ट्न इतीत्यन्तो सिद्धान्तभूतद्वितीयव्याख्यानुरोधेनाह । वस्तुतइति दिगिति दिगर्थस्तु बहुवचननिर्देशाद्गौणे नेत्येतद्व्याख्यानमष्टाभ्य औशितिसूत्रस्थभाष्यविरुद्धमपि तत्रहि विभाषा आत्वं यदयमात्वभूतस्य ग्रहणङ्करोत्यष्टाभ्य इति अन्यथा अष्टन इत्येव ब्रूयादित्युक्तम् यदि कैयटोक्तरीत्या गौणे ऽस्याप्रवृत्तिरिष्टा स्यात्तदा ऽष्टन

इत्येव ब्रूयादित्यसङ्गतं स्यादिति । अष्टाभ्य इति सूत्रस्य प्राधान्येनौशादेशविधायकत्वमेवाव्यन्त्वनुमीयत इत्याशयेनाह अत्र वृत्तिकृतेत्यादि अन्तरङ्ग इति अङ्गाधिकारस्थभिन्नत्वादित्याशयः समत्वादिति अत एव भाष्यकृता तदुपन्यासो न कृत इति शेषः अभिमान इति एवङ्कथनबीजन्तु यथालक्षमप्रयुक्त इत्येतत्सूचितानभिधानमेवेति प्रागुक्तम् ननु परेश्च घाङ्योरितिसूत्रस्थवक्ष्यमाणभाष्यविरुद्धम्मूलोक्तन्नलोपाभावस्त्वधिक इति व्याख्यानमत आह कुश्चयातुरिति सम्मताकारो ग्रन्थकारविशेषः ओपध इति उपदेश इत्यादिः अत एव कुञ्च्यादौ ञकारस्य श्रवणं सिध्यति नोपधत्वे नलोपः स्यात् ननु निपातनस्य बाधकतया यदि कुत्वाभावो निपात्यते तदा कुङ् इत्यत्रापि कुत्वन्न स्यादत आह निर्देशेनचेति चयोग इति तथाच झलनिमित्तककुत्वस्याभावो निपात्यत इति किन्प्रत्ययस्येति भवत्येवेति भावः केचित्तु सामान्यतो ऽकारोच्चारणेन तत्सामर्थ्यात्कुत्वाभावो ऽनुमीयत इत्याहुः तन्न कुङ्इत्यस्यासिद्ध्यापत्तेः उच्चारणार्थानामपि इत्संज्ञयैव निवृत्तिरिति सिद्धान्तेनाह नतु तदिति तस्य इकारस्य सा इत्संज्ञा भाष्यविरोध इति तत्रहि अनुबन्धलोपे भावाभावयोर्विप्रतिषेधादप्रसिद्धिः न ज्ञायते केनाभिप्रायेण प्रसज्यति केन निवृत्तिङ्करोतीत्याशङ्क्य भावेहि कार्यार्थो ऽनेन्यार्थो लोपः कार्यङ्करिष्यामीत्यनुबन्ध आसज्यते कार्यादन्यन्माभूदिति लोप इत्युक्तम् एतेन यस्योच्चारणार्थ उपदेशस्तस्योच्चारणे साहायकत्वात्प्रयोगे इत्संज्ञायाः सत्वेन निवृत्तेर्न्याय्यत्वादश्रवणम्भवतीति सूचितम् कुत्वस्यासिद्धत्वादिति सम्मति कुत्वङ् किन्प्रत्ययेतिसूत्रेण न प्राप्नोतीत्याशयेनाह चोः कुरितीति नन्वत्र प्रथमतश्चोः कुरित्यस्य प्रवृत्तिर्भवतु ततः सुलोपप्रत्ययलक्षणयोर्नुमि लोपकुत्वाभ्यां युङिति निर्बाधमत आह इदमिति परत्वादित्यस्यावधिसाकाङ्क्षत्वादाह हलिति ननु झलो झलीतिप्रक्रान्तं सन्निहितमेवेति मूले ऽसन्निहितत्वादित्यनुपपन्नमत आह स्वोर्ग्रहणेति ननु मण्डूकप्लुत्या सम्बन्धो ऽस्त्वित्यत आह निष्ठादेशेति तथाच प्रकरणव्यवधानेनानुवृत्तिः क्वापि न दृष्टा सा इह कथम्भविष्यतीति भावः एतेन वक्ष्यमाणविशेषेण अत्रैव किन्प्रत्ययस्येत्यत्रैव तत्रैव चोः कुरित्यत्रैव कुग्रहणमिति एकेनैव कुग्रहणेन निर्वाहे द्वितीयं व्यर्थमित्यर्थः तत्सम्बन्धात् झलीत्यस्य सम्बन्धात् अत एव पक्केत्यादेः सिद्धिः

अत्र क्विन्प्रत्ययस्येत्यत्र तदसम्बन्धादिति अत्र तदसम्बन्धे हेतुः प्रागुक्तः नन्वनिष्टफलसम्पादनार्थमेव तस्य सम्बन्धो ऽस्त्वत्यत आह सिद्धान्तिसम्मतेति प्रत्युत तत्सम्बन्धो ऽनिष्टफलसम्पादक इत्याह मूले स्पष्ट इत्यादाविति स्पृशो ऽनुदके क्विनित्यस्मात्क्विनो विधानादत्यत्र प्राप्तिः एतेन पृथक्पदत्वस्वीकारेण उपसर्जनस्य संयोगस्य ननु नोपसर्जनविशेषणत्वमत्राभिमतङ्किन्तु विशेष्यस्यादिपदार्थस्यैवेत्यत आह पदान्त इत्यादि मूले प्राचो विपरीतोक्तिरिति सस्य दत्वं श्चुत्वमिति प्रसादोक्तिरित्यर्थः यत्तु नमुनइति योगविभागान्न जश्त्वासिद्धत्वमिति तन्न योगविभागस्यादर्शनात् डसो नावेयजइतिसूत्रविहितण्विन्प्रत्ययमात्रापवादत्वमत आह सूत्रद्वयेति प्रसङ्गादाह तत्रेति तत्र डस्विधायकवचनवाच्यसूत्रयोर्मध्ये पृथगिति कोटिद्वयेनेत्यर्थः । समुदायोच्चारणमिति धातूपपदसमुदायोच्चारणमित्यर्थः तत्र प्रथमसूत्रे प्रतिपादितानात्रयाणाम्मध्ये सूत्रे श्वेतवहशब्दे ऽकार उच्चारणार्थः कर्मणि प्रत्यय इति श्वेतैरुह्यतइत्यर्थः उक्थइति सामविशेषबोधकइति शेषः शंसेः प्रत्ययइति कर्तरीति शेषः अस्य शंसेः तस्य रोः एतेनान्येषान्निपातनमिति ध्वनितम् विशेषविधिनिषेधयोः शेषनिषेधाभ्यनुज्ञाफलकत्वमिति न्यायात् दाशृ दान इति पुरो दाश्यत इति विग्रहः उक्तभाष्यादिति उक्थशस्शब्दस्येत्यादिभाष्यादित्यर्थः परस्य शङ्कान्निराचष्टे नचेति रुत्व इति हादीनामिति शेषः वृद्धिस्तु ण्विन्प्रत्ययनिमित्तिकासिद्धैवेति भावः पदान्त एव निपातनेनापदान्ते श्वेतवाहाविल्यादौ दोषाभावादाह वृद्धाविति प्रकाशकारोक्तिसमर्थनायाह नन्विति उभयोः ण्विनन्तडसन्तयोः अत एव ण्विनः सत्वादुभयोर्निपातनादेव अन्यथा ण्विनो सत्वे तत्प्रकरणे दीर्घप्रकरणे ऽर्थान्निपातनमिति हादीनामेव रुत्वविधानार्थमित्यर्थः तन्नेति डसैव रूपस्य सिद्धत्वादवया इति निपातनन्न कर्तव्यमित्यर्थः तद्वक्तव्यम् निपातनं वक्तव्यमित्यर्थः । अन्यथा पदान्तो वासरूपन्यायेन ण्विनोपि सत्वे तस्य निपातनस्य अत्र डस्विषये नन्वेवंसति रुत्वस्य सिद्ध्या दीर्घप्रकरण एव तत्सूत्रम्पठनीयमत आह रुप्रकरण इति मात्रादेन दीर्घनिरासः तादिष्टत्वात् सूत्रकृदिष्टत्वात् नन्वेवमुक्तरीत्या श्वेतवोभ्यामित्येतन्न स्यादत आह श्वेतवोभ्यामितीति उक्तभाष्यानुसारिसिद्धान्तिमतमाह केचित्त्विति श्वेतवहादीनामित्यनन्तरपदाध्याहारेण त-

न्निरूपितसम्बन्धार्थिका षष्ठी अत एवाह एतत्सम्बन्धिन इति ननु ङसुत्पत्तिवेलायाम्पदत्वङ्कथमत आह तदन्त इति अत एव ङसो ण्विनादेशत्वादेव एवञ्चेति तस्य सूत्रस्यापवादविषय एव प्रवृत्तेरिति भावः मूले हेस इति नचासम्बुद्धेः पुरःस्फूर्तिकत्वात्तदुपेक्षा नोचितेति वाच्यम् सत्वप्यन्त्यस्य सत्वे हलङ्यादिलोपरुत्वविसर्गौरिष्टस्य रूपस्य सिद्धेः नचात्वसन्तस्येति दीर्घापत्तिरिति वाच्यम् प्रतिपदोक्तस्यासन्तस्यानुसाहचर्येण ग्रहणात् ननु नित्यान्न परस्य बलवत्वमत आह नित्यत्वमिति एकस्यैव सत्वमित्यत्र नियामकाभावादाह उभयोरपीति सामान्यापेक्षस्यान्तरङ्गत्वाभिमानिनः शङ्कान्निराचष्टे नचेति तादृशान्तरङ्गत्वस्य सामान्यापेक्षान्तरङ्गत्वस्य न्यूनताम्परिहर्तुमाह कृताकृतेति पूर्वोक्तरीत्या अनित्यत्वेप्याह शब्दान्तरेति अभ्युपेत्येत्यनेनोक्तस्य कृताकृतप्रसङ्गित्वस्याश्रयणे लाघवमिति दर्शितम् तदाशयः भाष्याशयः । कैयटोक्तद्वितीयव्याख्यानुसारेणाह वस्तुत इति अत्र पृथक्पदत्वे गौरवमिति तदा ङेशब्दादुत्पन्नषष्ठ्या लुक्कल्पना एकस्य प्रथमाशब्दस्य द्वितीयायां लक्षणाङ्कृत्वा एकशेषस्य कल्पना ततो द्वन्द्वस्य कल्पनेति गौरवमित्यर्थः मत्वेति एतेन प्रथमपक्ष एव भाष्यसम्मत इति ध्वनितम् तत्रहि प्रथमयोरित्युच्यते कयोः प्रथमयोः विभक्त्योः वचनयोस्तु न ग्रहणम् द्वितीयायाञ्चेति लिङ्गादिति कथितम् ननु तस्यापीत्यसङ्गतम् एकस्मिन्काले पक्षद्वयाङ्गीकारस्यानुचितत्वादत आह अन्त्यलोपेति अपिरेवार्थइति भावः ननु शेषग्रहणेन बोधितत्वाट्टिलोपपक्षोऽपि सूत्रकारसम्मत एवेत्यत आह किञ्चेति ननु त्वमित्यादौ टाबभाव एव फलमत आह अन्त्यलोप इति अस्य अन्त्यलोपस्य बुद्धाविति तत्रेति इदञ्च कृन्मेजन्तसूत्रभाष्ये स्थितम् तत्रहि सन्निपातपरिभाषायाः प्रयोजनकथनावसरे शकटौ पद्धतौ अत्वे कृते अत इति टाप् प्राप्नोति सन्निपातलक्षणो विधिरनिमित्तन्तद्विघातस्येति न दोषो भवतीत्युक्तम् एतेन नयासयोरिति लिङ्गाट्टाब्विषये सन्निपातपरिभाषा न प्रवर्तत इति परास्तम् तेन निर्देशेनानित्यत्वम्परं ज्ञाप्यतान्त्स्याः सर्वथा ऽप्रवृत्तिकथनमयुक्तमेव नन्वेकस्य प्रत्याख्याने ससुट्कनिर्देश एव प्रत्याख्यायतामत आह ज्याय इति ससुट्कनिर्देशस्य करणे लाघवादस्य ज्यायस्त्वम् ननु त्यदादीनाम इति सूत्रभाष्ये 'टिलोपष्टाबभावार्थः शेषे लोप इति स्मृतः लुप्तशिष्टेहि तस्याहुः का-

र्थसिद्धिम्मनीषिण' इत्युक्तम् लुप्ते यः शिष्टस्तस्मिन्कार्यस्य टाचभावस्य सिद्धिं तस्य शेष इत्यस्य फलमाहुरित्यर्थः यदि टिलोपो नैव स्वीक्रियते तदैतद्विरोध इत्यत आह त्यदादीनाम इतीति बोधितारुचिक इति एतद्बीजन्तु गौरवरूपमुक्तमेव अन्यत्र उद्योते। ननु यदि जानातीत्यत्र जादेशे कृतेपि अतो दीर्घो यञीति दीर्घस्तर्हि जानातीत्यत्र प्वादित्वाद्ध्रस्वमाशङ्क्य दीर्घनिर्देशसामर्थ्यान्न ह्रस्व इत्युक्तत्वद्विरुध्यत इतिचेन्न तस्य ग्रन्थस्याङ्गवृत्तपरिभाषाज्ञापनद्वारा न ह्रस्व इत्यर्थात् अतो दीर्घो यञीतिसूत्रीयग्रन्थविरोधोद्भावनमत्यक्तं क्षमते नास्तीत्येतद्वक्तुमुपक्रमते नन्विति तत्सम्बन्धादिति टिसम्बन्धादित्यर्थः अन्त्यस्य पदस्य टेरनन्त्यस्य पदस्याचश्चेत्यर्थादिति भावः हेत्वन्तरमाह वाक्येति क्लृप्तसम्बन्धेति वाक्यस्य टेरिति सूत्रे क्लृप्तसम्बन्धेत्यर्थः यथा तदत्यागस्तथा दर्शयति तेनेति पदस्येति अच इति शेषः नन्वान इति तपरकरणेन प्लुतस्यावृत्तिर्भविष्यतीत्यत आह तपरकरणेनेति अत एव त्रैपादिकस्यासिद्धत्वेन तपरकरणेन तदव्यावृत्तेरेव दीर्घः वोरुपधाया इति दीर्घः ननु दीर्घविधायकशास्त्रदृष्ट्यापि प्लुतस्यासिद्धत्वात्कथन्तेन तद्व्यावृत्तिरत आह दीर्घग्रहणेत्विति क्लिष्टमिति तत्र तात्पर्यग्राहकाभावेन स्वकल्पनया तथाकल्पनङ्क्लेशकरमित्यर्थः ननु लाघवमेव तात्पर्यग्राहकभविष्यतीत्यत आह अस्तुवेति उक्तज्ञापकेति ज्ञाजनोर्जेति दीर्घनिर्देशस्य ज्ञापकतापरभाष्येत्यर्थः अन्यथोक्तरीत्या दीर्घग्रहणस्यावश्यकतया ज्ञापकतापरभाष्यविरोधः स्पष्ट एवेति भावः तत्र पचामि अजानामीत्यादौ वैकल्पिकत्वादिति तदुक्तभाष्ये सर्वः प्लुतः साहसमनिच्छता विभाषा कर्तव्य इति नन्वेवन्दीर्घग्रहणस्य वैयर्थ्यं स्यादत आह अतो दीर्घइत्यत्रेति अस्य नार्थसाधकमित्यत्रान्वयः यथा तदनेकपदघटितसूत्रे पदलाघवगौरवविचार एव मुख्यो मात्रागौरवन्तु क्वचिदेव दुष्टमित्यर्थबोधकत्वभेदमपि भविष्यतीति भावः। सत्वेनेति दीर्घग्रहणस्येति शेषः वस्तुतस्त्वत्रत्यन्दीर्घग्रहणस्य ज्ञापकत्वप्रदर्शनपरम्मूलम्भाष्यस्यज्ञापनपरैकदेशिमतानुसारेण अत एव भाष्ये पिवतेर्गुणप्रतिषेध उक्तः स न वक्तव्यो भवतीत्येव तस्य प्रयोजनमुक्तन्नत्वसाधारणलक्ष्यसिद्धिरूपमिति दिगित्यनेन दर्शितम्। वाचनिकत्व इति परिनिष्ठितस्येत्यस्येति शेषः ज्ञाप्यकोटिप्रविष्टत्वे आह ज्ञापकद्वयेति

अभ्यमिति छेदस्यैव मुख्यतान्ध्वनयितुमाह· स्पष्टश्चेदमिति अत एव अभ्यमिति छेदस्यैव मुख्यत्वादेव नन्वङ्गवत्तपरिभाषया एत्वस्य निवृत्तिः सिद्धेत्यकारोच्चारणसामर्थ्यादीर्घः स्यादत आह अङ्गवत्तपरिभाषेति द्वयोरिति निर्देशवदिदमपि तदानित्यत्वे ज्ञापकमिति भावः एवञ्च परिभाषाया अनित्यत्वबोधनद्वारा ऽकारोच्चारणस्य चरितार्थत्वेच वैयर्थ्येनेति एवञ्चादेः परस्येत्यस्यानुपस्थितिरित्यत्र तात्पर्यम् लक्षणैकचक्षुष्कशङ्कां वारयति नचेति न्याय्यत्वादिति गुणे त्वन्याय्यकल्पनेतिपरिभाषाबाधो न्यायानुगृहीत एवेति तात्पर्यम् शिष्यस्य यथा चारितार्थ्यन्तत्प्रकारमाह आदेरित्यादिना उक्तप्रयोजनान्यथासिद्धिवादिनः शङ्कानिरस्यति नच योच्येति एकवचनत्वादिनेति आदिना ङित्वपरिग्रहः एवञ्च युवयोरित्याद्यसिद्धिरिति भावः प्रसज्यप्रतिषेधपक्षे आह युष्मदस्मदोरिति नत्वात्वं हलादिहेतुकमिति कथन्तस्य प्राप्तिरत आह हलादाविति योचीत्यज्ग्रहणपरिशेषसिद्ध इत्यर्थः एवञ्च ङसोपि परिशिष्टत्वेन तत्राप्यात्वापत्तिरिति भावः यदितु युष्मदस्मदोरित्यत्र हलीत्यस्यानुवृत्तिरिति स्वीक्रियते तदा योचीतिसूत्रे ऽज्ग्रहणाभावेनैतादृशस्य न्यासस्य करणासम्भव इति बोध्यम् । ननूक्तरीत्या आदेशस्य सत्वात्कथमनादेशता इत्यत आह अनादेश इति हीति तत्पुरुषः कर्मधत्वन्तादेशशब्दस्य नञ्समासः लाघवादिति अन्यपदार्थबोधकबहुव्रीह्यपेक्षया वर्तिपदार्थमात्रबोधकत्वेन तत्पुरुषत्वे लाघवादित्यर्थः एवञ्च तत्पुरुषत्वेच प्रकृते आदिस्थानिकादेशघटिते एवम् उक्तस्थले कृतेप्यादेशे यत्वापत्तौ आदेरकारविधानम् आदेः परस्येति शास्त्रैकवाक्यतया आदिस्थानिकाकारकर्मकं विधानम् तत्र तस्मिन्नन्त्यस्थानिकाकारे पररूप इति प्रत्ययावयवमात्रसम्बन्धिवर्णापेक्षत्वेनान्तरङ्गत्वात्कृत इति शेषः अन्तरङ्गपरिभाषाबाधकपरिभाषया यत्केनचित्कृतं समाधानन्तन्निरस्यति नचेति एकस्थानिकत्वे अङ्गसम्बन्धिन्याङ्गे अत्रैकस्थानिकत्व एवेत्युपादानमेकानिमित्तकत्ववादिमतनिरासाय धर्मिग्राहकेति धर्मी वार्णादाङ्गं बलीय इति परिभाषाबोध्यार्थः तद्ग्राहकेति तज्ज्ञापकेत्यर्थः यदि समाननिमित्तकत्वम्परिभाषाप्रवृत्तौ नियामकं स्यात्तदा इयायेत्यादावुभयोस्समाननिमित्तकत्वाभावेन परिभाषाया अप्रवृत्तौ संपूर्णसूत्रस्य चारितार्थ्यन्दुरुपपादमिति भावः तत्प्राप्तेः प-

रिभाषायाः प्राप्तेः युष्मदस्मदादिग्रहणेन युष्मदादिशब्दमुच्चार्य न तथेति न युष्मदादिशब्दोच्चारणेन विहितादेशरूपविभक्तिरूप इत्यर्थः एवञ्च उक्तसिद्धान्ताङ्गीकारेच अत्र उक्तपद्ये अर्थवद्गृह्यत इति पद्यते गम्यते ऽर्थो ऽनेनेति व्युत्पत्तेरिति भावः एतेनेति कल्पितार्थवत्त्वस्य ग्रहणेन त्कादिप्रत्ययस्यापि भावाभिधायकतया तस्य यादेशे स्थानिवद्भावेन ङित्वा तुकः सिद्धिरिति भावः ननूक्तपदशब्दार्थाभिन्नश्चिल्नास्तीति तस्य सिजादयो न स्युरित्यत आह सिजादीनामिति सोपि च्लिरपि एवञ्च मूलञ्चिल्व्यमिति भावः इत्यस्य इत्याकारविधानस्य भाष्यविरोधादिति ज्यायानित्यत्रेयस आदेर्लोपे प्रकृते दीर्घे सति व्यर्थं यदाकारविधानन्तस्य स्वविषये चारितार्थ्यन्न स्याल्लोपदीर्घयोरङ्गसम्बन्धित्वाभावेन परिभाषायास्तत्र प्रवृत्तिर्न स्यादिति परिभाषाज्ञापकत्वपरभाष्यविरोधः स्पष्ट एवेति भावः ननु ससुट्कस्य स्थानित्वेन निर्देशसामर्थ्यादित्यनुपपन्नं वक्ष्यमाणरीत्या गौणस्यावर्तकत्वेन ससुट्कनिर्देशस्य चारितार्थ्यादत आह अयम्भाव इति इति सूत्रार्थ इति भाष्यकारीयसिद्धान्तरीत्या इति सूत्रार्थः तेन प्रसज्यमानतादृशसमुदायस्य स्थानित्वकल्पनेन न केवलमत्रैवेयं रीतिः किन्तु स्थान्यादेशभावविषये सर्वत्रेत्याशयम्प्रकटयति यथेत्यादिना अत्रेको यणचीत्यस्यैव दृष्टान्तत्वेनोपादाने कर्तव्ये आर्द्धधातुकाधिकारो यादेशस्य प्रदर्शनं समुदायादेशत्वेनाष्टाध्यायीपाठेनच पुरःस्फूर्तिकतयेति बोध्यम् ननु सतो निवृत्तिरिति आदेशेन विद्यमानस्य स्थानिनो निवृत्तिर्नेत्यर्थः प्रसङ्गादिति निवृत्तेर्ध्वंसरूपतया विद्यमानस्य ध्वंसकल्पने घटादिपदार्थवदनित्यत्वापत्तेरिति भावः प्रसक्तबुद्धेरिति स्थानित्वेनाभिप्रेतस्येत्यादिः एवञ्च बुद्धिनिष्ठनिवर्त्यनिवर्तकभावस्य बुद्धिविषये आरोपः सर्वत्र कल्प्य इति भावः प्रकृतार्थमाह तत्रेति बुद्विद्वयमध्ये नन्वेवमपि कथम्प्रकृते तद्बुद्धिनिवृत्तिरत आह तन्निवृत्तिश्चेति ननु स्थानिवद्भावेनामूत्वज्ञानम्भविष्यतीत्यत आह । अत्रेति प्रकृतसूत्र इत्यर्थः उक्तार्थस्यावश्यकत्वध्वननायाह अत एवेति उक्तार्थाङ्गीकारादेवेत्यर्थः ननु प्रयोगे आम एव सत्वेन कथं सामः स्थानित्वकथनसङ्गतिरत आह आम्येवेति अत्रारोपस्य फलन्तु यत्र मुख्यता तत्राकमादेशे कृते सुटो ऽप्रवृत्तिर्नुडभावस्य लाभस्त्वधिक इत्याशयेनाह आदेशस्येति परोक्तन्दूष-

यितुमुपक्रमते नचेति व्याख्यानमिति लक्ष्यानुसारित्वेचतुर्युष्मदस्मद्ग्रहणेष्वर्थग्रहणं शब्दविशेषणन्द्रष्टव्यमिति भाष्यकारोक्त्यनुसारिनियामकमित्यर्थः अर्थपरत्वाश्रयणे ऽन्वयानुपपत्तिरितितु नेत्याशयेनाह द्वयोरेकस्येति वाच्यो ऽर्थ इति सूत्रद्वयस्येत्यादिः अभिमानेनेदमिति एतेन सा अत्र नोचितेति ध्वनितम् जहत्स्वार्थातु तत्रैव यत्र रूढिर्विरोधिनीति सिद्धान्तात् नच वृत्तौ सङ्ख्याविशेषस्याभानेन द्वित्वैकत्ववाचकत्वमसङ्गतमिति वाच्यम् यत्र सङ्ख्याविशेषणभाने साधकाभावस्तत्रैव तथा इहतु सङ्ख्याभासकस्यादेशस्य तदभावस्य वा सत्वात्सा भासत एवेति विशेषात् यत्तु द्वयोरेकस्मिन्नित्युक्ते सन्निहितत्वात्तयोर्युष्मदादिविशेषणत्वापत्तिरतो वचनग्रहणन्तथाच कृत्रिमयोरेव ग्रहणमिति विपरीतमपि सम्भाव्यत इति मूलोक्तञ्चिन्त्यमिति मतन्तत्खण्डयितुमाह उभयगतिरिहेति अन्यथा उक्तप्रकारानङ्गीकारे मूलोक्तस्यैवादरे युष्मदादिविशेषणत्वञ्चोक्तभाष्याद्वचनग्रहणसत्वेपि नतु तदन्तविशेषणत्वमिति बोध्यम् मूले न स्यानिविशेषणमिति तदाहि सुट्साहित्यावच्छिन्नस्योद्देश्यत्वं स्यात्तथाचोद्देश्याप्रसिद्धिः स्यादिति तात्पर्यमाह बाधादिति बाधमुपपादयति आकामिति द्वन्द्वनिर्देशरूपतृतीयप्रकारसत्वशङ्कान्निराचष्टे मूले नच सुडामोरिति योग्यतावलादिति साहित्यान्वययोग्यतावलादित्यर्थः। तां योग्यतामुपपादयति आमूसमभिहार इति युष्मदस्मद्भ्यामिति परस्येति शेषः साहित्यं यदि सहितधर्मस्तदा सहितपदार्थाप्रसिद्ध्या तद्धर्माप्रसिद्धिरत आह समूहेति प्रसादकारोक्तं द्वन्द्वपक्षे समाहारद्वन्द्वपक्षे प्रक्रान्तदोषं खण्डयित्वा मूलतात्पर्यमाह एवञ्चेति उक्तरीत्या समाहारद्वन्द्वाङ्गीकारेच तत इति स्थानिवद्भावेनेति शेषः ननु पुनराकमादेशः सकारमात्रस्यैव स्यान्नतु तद्विशिष्टस्य साधकाभावादत आह सकारग्रहणमिति एवमिति उक्तरीत्येत्यर्थः तदीयैः समाहारद्वन्द्वाङ्गीकर्तृसम्बन्धिभिः मूले तत्रेणेति नतु साम इति द्वन्द्वः तथासति स्थानिभेदादादेशद्वयापत्तेः यथा पूर्वपरयोरिति द्विवचननिर्देशादादेशद्वयवारणायैकः पूर्वपरयोरित्यत्रैकग्रहणङ्कृतमिति सन्नियोगशिष्टन्यायेन गौणे आकमभावापत्तेश्च यदितु सुसहित आम् सामिति मध्यमपदलोपिसमासाङ्गीकारस्तदा सूत्रस्यैव स्थान्यलाभाद्वैयर्थ्यापत्तौ लक्ष्यासिद्धिरेव स्यादिति भावः दुष्टमिति अयमभावः एवंविधद्वन्द्वपक्ष एतादृशतत्रस्य

शास्त्रे प्रसिद्धिसत्वे उपपादयितुं शक्यः स एवतु नास्ति तत्रस्वीकारोहि यत्रोपात्तशब्दस्य तदर्थाभिधायकता तत्र सम्भवति नहि साम्शब्दस्याम्-शब्दोपि वाच्यः तथासति नाम्शब्दोपि केवलामो बोधकः स्यादिति चर्मणामित्यत्र नोपधाया इति दीर्घापत्तिः स्यादिति मूले ऽत एव तत्र-निर्देशाङ्गीकारादेव सिध्यतीति अन्यथा टिलोपपक्षे सुटः सर्वथा ऽसम्भवित्वेनाकमनापत्तौ फलभेदः स्पष्ट एवेति भावः एवञ्च टिलोपपक्षे यथा न फलभेदस्तथाह तत्पक्षेपीति सिध्यतीत्येवमभिधानेन तस्य व्याख्यान-स्वाभिमतत्वमेवेति भ्रमनिवृत्तये आह सिध्यतीत्यस्येति त्वदीयैरित्यनेन स्वानभिमतत्वन्दर्शितम् एतेन त्वदीयैरिति कथनेन । पूर्वन्तत्रङ् कृत्वा आम्पदमात्रे तत्रं कृत्वा ततः समासे सूपदेन समासे तत्सम्बन्ध इति स सम्बन्धइत्यर्थः आपत्तिरिति तथाच सूत्रासङ्गतिरेव स्यात् तुष्यतु दुर्जन-न्यायेनैकत्रैव तत्सम्बन्धाभ्युपगमेप्याह किञ्चैवामिति एवमपि एकत्रैव त-त्सम्बन्धाभ्युपगमेपि गौणे अतित्वाकमित्यादौ अशक्य इति केवलस्यामः स्यानित्वेनाकमादेशेपि स्यानिवत्त्वेनाम्त्वान्नुटः प्राप्तेरिति भावः गौणे नु-ड्वारणाय परो हितकल्पनान्निरसितुमाह नचेत्यादिना आमा सहितो वर्त्तत इति साम् इति तेन सहेति तुल्ययोग इति बहुव्रीहिः एवन्नुट् सुट्स-हितस्यामः पुनरादेशः असङ्गत्यापत्तेरिति तत्राप्युभयवाक्यार्थविषयतया वारद्वयमादेशकल्पनादिति भावः अशक्यत्वादिति सामपदे तन्त्रस्वीकार-प्येकत्र साहित्यप्रतिपत्तिरन्यत्र नेत्यस्य निरूपयितुमशक्यत्वादिति भावः अदोषादिति प्रागुक्तसिद्धान्ते दोषाभावादित्यर्थः ननु खण्डनानुवादकरण-मफलमत आह तदनुवादेति तेषामिति प्रसादकृतान्तदीयानाञ्च परमत-दूषणम् प्रसादकारमतदूषणमित्यर्थः अत्र गौणे सर्वस्य पदस्येत्यधिकारा-दिति मूलग्रन्थस्य सर्वस्य पदस्येत्युभयाधिकारादित्यर्थ इति ध्वननाय शङ्कते नन्विति ननु चतुर्थ्यां विभक्त्यविशिष्टस्य पदत्वलाभेपि षष्ठीद्वितीययोर्विभ-क्तिविशिष्टयोरेव पदत्वलाभेन तत्साहचर्याच्चतुर्थ्यामपि विभक्तिविशिष्टस्यै-व ग्रहणभविष्यतीत्यत आह षष्ठीति अवयवयोरिति युष्मदस्मदोरिति शे-षः त्वदुक्तार्थे विभक्तिविशिष्टयोरित्यर्थे न मानमिति तथाच प्रकृतमात्रस्या-देशापत्तिः परोक्तन्निरस्यति नचेति तदनुवृत्तिसामर्थ्यात् पदस्येत्यनुवृत्ति-सामर्थ्यात् तदर्थलाभः मूलोक्तार्थलाभः उत्तरत्र तिङन्तिङ इत्यादौ ।

तत्सामर्थ्यात् उभयाधिकारसामर्थ्यात् अत्र सर्वस्येत्यस्यानुपादानात्कथन्ता-दृशोभयाधिकारलाभ इतिचेत् न शङ्कनीयम् अनुदात्तं सर्वमित्यतः सर्व-मित्यनुवर्त्तते विभक्तिविपरिणामश्चेत्याशयात् अत एव उक्तार्थकरणादेव प्र-कृतिभागस्य प्रकृतिभागमात्रस्य ननु युवाभ्यामित्यादौ प्रकृतिभागमात्रे यु-ष्मदाद्यवयवकत्वं व्यपदेशिवद्भावेनास्तीति दोषस्तदवस्थ एवेति शङ्कां वा-रयति असाहाय्य एवेति अभ्युपेत्यवादेनाह एकाजिति ननु युष्मदाद्य-वयवकस्य सर्वस्य पदस्येत्यर्थे ऽतितवेत्यादावत्यादिविशिष्टस्य प्राप्नोतीति शङ्कां वारयति अतीत्यादिना प्रकृतिकस्येति षष्ठ्यादेरित्यर्थः भक्तत्वे हे-तुकथनमिति सर्वनाम्नाम्नाक्रान्तपरामर्शकत्वस्यौत्सर्गिकत्वादिति भावः अ-ज्ञातज्ञापनरूपः यः पुरुषो बोधयितुमिष्टस्तेनाज्ञातस्य ज्ञापनरूपः मूले प्र-क्रान्तार्थत्वाच्चेत्यादिः अत एव सप्तमोल्लासे काव्यप्रकाशकृता प्रक्रान्त-प्रसिद्धानुभूतार्थकतच्छब्दोपादानेन यच्छब्दापेक्षेत्युक्तम् हेत्वाकाङ्क्षाया अ-भाव इति तथाच तेन कारणेन भक्त इत्यर्थासम्भव इति भावः हेत्व-र्थकस्येति शब्दस्येति शेषः तेन भक्तत्वेनेतिशब्दाध्याहारपक्ष इति भा-वः अध्याह्रियमाणशब्दार्थे तेनेत्यस्यान्वये कारकाणाङ्क्रिययैव सम्बन्धस्य प्रसिद्धत्वात्कर्तृतृतीयनियमभङ्ग इति बोध्यमित्याशयेनाह शब्दमर्यादयेति भ-क्तस्त्वमप्यहन्तेनेति पद्ये स मामित्यस्य त्रायत इत्येतद्ग्रहणेन यद्विद्यमान-पूर्वत्वोपपादनन्तन्न युक्तमित्यभिप्रायिकामाशङ्कान्निराचष्टे मूले नचेति श-ङ्काभिप्रायमाविष्करोति त्रायत इत्यस्येति अध्याहार इति एवञ्चोच्चा-रितभिन्नवाक्यस्थमिति तात्पर्यम् युक्तत्वादिति यत्रानुपपत्तिप्रतिसन्धानन्त-त्राध्याहारस्तच्चात्र एवेति तत्रैवाध्याहार इति भावः। ननु शब्दा-ध्याहारे तत्सम्भवो ऽस्त्येवेत्यत आह किञ्चेति स्वसिद्धान्तासिद्धाध्याहारप-दार्थमाह स मामित्यस्येति तथा परसम्मताध्याहारपक्षे स मां त्रायत इति वाक्यरचना स्याद् द्वितीयपक्षेतु स मामित्येव तदर्थकमिति विद्यमानपूर्व-कत्वाभावः स्पष्टः ननु त्रायत इत्यन्तमेव पूर्वं विद्यमानमिति नानुपपत्ति-रत आह श्रूयमाणमिति एतेन समानवाक्यस्थेन विद्यमानपूर्वकत्वमुपपा-दनीयन्तच्च त्रायत इत्यन्तेन न सम्भवतीति भावः शङ्काया निराकर-णाभिप्रायमाह स हरिरित्यादिना मूले तत्रेणानेककारकेति एतेन त्रा-यते इत्यस्य कर्मभेदेन वस्तुतो भिन्नो यो ऽर्थस्तत्प्रतिपादकत्वेप्येकत्वान्न

वाक्यान्तरस्थत्वमिति तात्पर्यम् एतेन प्रकृतप्रयोगान्यथानुपपत्त्या निषेधविधायकवाक्ये समानवाक्ये इत्यस्यासम्बन्ध इति कल्पयन्तः पूर्ववाक्यस्थत्वायत इति पदमादायैव विद्यमानपूर्वकत्वं स मामित्यत्रास्तीति कथयन्तो निरस्ताः स्वाभिमतप्रकारेण समानवाक्यस्थत्वमुपपाद्य परोहि तदूरीत्या समानवाक्यस्थत्वोपपादनन्त्वयुक्तमिति ध्वनयन्स्वरूपव्याक्रियैव परा क्रियेति न्यायेन तदुक्तमनुवदति मूलकारो ऽनुषङ्गेत्यादिना अस्य युक्तत्वञ्चापिशब्दोपादानेन ध्वनितम् तदेतद्विशदयति अनुषङ्गोहीत्यादिना तत्र प्रथमपक्षे उपात्तस्य श्रूयमाणस्य त्रायत इत्यस्य अन्वयाभावेनेत्यनेन कल्पितस्य शब्दान्तरस्यैव तत्रान्वय इत्येतत्सूचितम् द्वितीयपक्षे त्रायत इति शब्दस्य तद्वाक्यघटकता नास्तीतितु स्फुटमेवेति भावः 'एकतिङ् वाक्यमि'त्यत्रैकशब्दस्य स्वसजातीयद्वितीयरहितत्वरूपत्वे ब्रूहि ब्रूहि देवदत्तेत्यस्यैकवाक्यत्वन्न स्यादत आह एकशब्दोहीति तथाच समानानुपूर्वीकतिङन्तघटितमिति फलितम् एतच्च स्वशास्त्रीयकार्योपयोगी तेन पचति भवतीत्यत्र लौकिकवाक्यत्ववति नाव्याप्तिः लौकिकवाक्यत्वन्तु 'सुप्तिङन्तचयो वाक्यं क्रियावा कारकान्विते'त्यनेन दर्शितम् एतादृशमेकवाक्यत्वमयन्दण्डो हरानेनेत्यत्र नास्तीति हरेत्यस्य न निघातापत्तिरिति भावः मूले त्रिसूत्रीसिद्ध्वादिति अयमाशयः यत्र सम्बोधनविभक्त्यन्तस्य विशेष्यपूर्वत्वमग्ने तेजस्विन्निल्यादौ तत्राविद्यमानवद्भावस्य नामन्त्रिते समानाधिकरण इत्यनेन निषेधाद्भवत्येव निघातः हरे दयालो नः पाहीत्यत्र न सादेशश्च एवं सम्बोधनेतरपूर्वस्थले इमम्मे गङ्गे यमुने सरस्वतीत्यादौ सम्बोधनेतरपूर्वत्वाद्भवत्येव देवाः शरण्या वो भज इत्यत्रतु विभाषितसूत्रस्य प्राप्त्या ऽविद्यमानवद्भावाभावपक्षे आदेशो भवति यत्रतु नोक्तः प्रकारो देव माम्पाहीत्यादौ तत्र निषेधाप्राप्त्या देवेत्यस्याविद्यमानवद्भावेन मामित्यस्यादेशो नेति परमसूलोक्ते ऽदसोद्रेः पृथङ्मुत्वमिति वाक्ये लत्ववत्केचिदिच्छन्तीत्यत्र केचिदित्यस्यानन्त्यविकार इति परिभाषायाः प्रवृत्तिमविचारयन्त इत्यर्थः केचिदन्त्यसदेशस्येतितु तस्याः परिभाषायाः प्रवृत्तिवादिमतेन नेत्येक इति स्फुटमेव पूर्वस्यैव सुत्वमिति हेतुरहितम् तादृशवार्तिकासम्मतामितितु न वाच्यङ्किन्तु वार्तिकसम्मतमेवेति तन्मतोपपत्तये आह केचित्तु पूर्वस्यैवेतीति तदाशयः पूर्वस्यैवेति वदता आशयः उपेक्षाबीजमाह केचि-

दन्त्येति पूर्वोक्तरीत्यैव तद्बोध्यार्थलाभादिति भावः तथावादिनोऽभिप्रायस्तु प्रथमोपस्थितत्वात्प्रथमोच्चारितस्य सुत्वमादौ भवति ततो लक्षणस्य प्रवृत्तत्त्वात्पुनर्न भवतीति परन्त्विदमप्रथमोपस्थितत्वन्न नियामकन्निजाज्त्रयाणामिति सूत्रे त्रयाणाङ्ग्रहणात् उद्देश्यस्य भेदेन पुनः प्रवृत्तौ बाधकाभावाच्चेति अत एवाहुः अदसोद्रेः पृथङ् सुत्वमिति तत्र विभक्ते ऽधातोरिति सूत्रे मूलाशयं वर्णयित्वा भाष्यसिद्धान्तरीत्याह अत्विति सौत्रश्चशब्दस्त्वर्थे द्रष्टव्यः अतुइत्यस्य पृथक्पदत्वादेव गोमत्यतेरप्रत्यये गोमानिति भाष्यकारीयप्रयोगः सङ्गच्छते इदम् अधातोरिति योगविभागेनोक्तासन्नघटितवाक्य एवाधातुरित्यस्य सम्बन्ध इत्येतत् यद्यपि द्वे इत्येतदेकाच इति सूत्रे विधेयबोधकन्तथापि पूर्वो ऽभ्यास इत्यत्र द्वे इत्यस्य विधेयाबोधकताया दर्शनादिह तथात्वन्न भविष्यति किन्त्वनुवाद्यत्वमित्याशयेनाह अनुवृत्तमिति पूर्वो ऽभ्यास इति सूत्रात्पूर्व इत्येतत्तु न सम्बध्यते ऽत्वरितत्वात्संज्ञान्तरकरणसामर्थ्याच्च यत्वत्रोभे ग्रहणाभावेपि द्वे इत्यनुवृत्त्यैव सिद्धे पुनरुभेग्रहणं सहभावोपसर्जनद्वित्वविशिष्टार्थकमिति तन्न तादृशार्थस्य शक्त्या अलाभात् अत एव भाष्ये समुदायप्रतिपत्त्यर्थमित्येतत्तात्पर्यकस्य उभे ऽभ्यस्तं सहेतिवक्तव्यमिति वार्तिकस्यसहग्रहणस्य प्रत्याख्यानाय गर्गदण्डनन्यायो दर्शितस्तदेवाह गर्गा इति। अन्यथा एतन्न्यायानङ्गीकारे एतेनोक्तवार्तिकस्यसहग्रहणवदुभे ग्रहणमपि तेन न्यायेन प्रत्याख्येयमिति ध्वनितम् मूले ऽन्यथेत्यस्य शतभोजनन्यायस्य प्रवृत्त्यङ्गीकारे इत्यर्थ इत्येतत्तात्पर्येणाह प्रत्येकमिति यद्यपि जक्ष् इति पृथक् पदन्तथापि इतिशब्दस्योपस्थितपरामर्शकतया जक्ष इत्यस्यैव परामर्शे तद्गुणसंविज्ञानबहुव्रीह्यङ्गीकारे षण्णामेव लाभः स्यादतो ऽत्रा-तद्गुणसंविज्ञानबहुव्रीहिरेव स्वीकार्यः सचादिशब्दस्यावयववाचकत्वे ऽनुपपन्न इत्याशयेनाह आदिशब्द इति जक्षित्यस्य पृथक्पदत्वेन समवायसम्बन्धेन सम्बन्धी नान्यपदार्थ इत्यतद्गुणत्वं सुलभम् भाष्ये कर्मणीत्येतदधिकाराबाधाय व्युत्पत्त्यन्तरन्दर्शितन्तत्र तमिवेत्येतत्पूरणेन व्याख्यातुं शक्यमित्याशयेन व्याचष्टे तमिवेत्यादिना पश्यन्तीत्यत्र दृशधातुश्चाक्षुषज्ञानविषयत्वानुकूलव्यापारार्थकः तत्र भाष्योक्तौ अध्यारोपितप्रेषणपक्षे दृशधातोरेव कर्मनिष्ठो यो विलक्षणो व्यापारस्तस्य पूर्वोक्तव्यापारानुकूलत्व-

विवक्षया चाक्षुषज्ञानविषयत्वानुकूलव्यापारार्थकत्वविवक्षापक्षे तत्र कर्मणः कर्तृत्वे अधिकेति विषयीकरणापेक्षया तदनुकूलव्यापाररूपाधिकार्थकत्वादित्यर्थः अज्ञानार्थत्वम् प्रधानीभूतचाक्षुषज्ञानविषयत्वानुकूलव्यापारभिन्नार्थकत्वम् न केवलमध्यारोपितप्रेषणपक्ष एव भाष्यसंगमनङ्किन्तु पक्षान्तरेपीत्याशयेनाह निवृत्तप्रेषणेति सामर्थ्यादिति सूत्रसामर्थ्यादित्यर्थः अत्र पक्षे पूर्वकालस्थितप्रधानीभूतव्यापारस्य त्यागेनाज्ञानार्थत्वं स्यादेव पूर्वम्पूर्वमित्यस्य पूर्वम्पूर्वं शास्त्रमित्यर्थभ्रमवारणायाह पूर्वम्पूर्वमिति पूर्वपूर्वस्थानिकमित्यर्थः संज्ञाकृतबहिरङ्गत्वस्य सिद्धान्तविरुद्धत्वादाह बहिर्भूतेति। तदपेक्षया पूर्वपूर्वस्थानिकमन्तरङ्गमित्येतदपेक्षया अत्र सुबन्तात्पिञ्चो भावेनातिदेशेन लभ्यस्येत्यधिकमतस्तन्मूलं योजयति विभक्त्याश्रयेति अनभिधाने हेतुमाह पूर्वम्पूर्वमित्यस्य चेति चोद्यार्थे इत्येवेति भाष्यसम्मतत्वादिति शेषः अन्यत्र शेखरादौ स्थानिवद्भावेनापीत्यपिशब्दसमुच्चयार्थस्य स्यष्टप्रतिपत्तये आह ङित्त्ववदिति अनुबन्धकार्ये ऽनल्विधाविति निषेधस्याप्रवृत्तेरिति भावः तदिति उगित्त्वमित्यर्थः तत्सिद्धेरिति तत्परिभाषायाः प्रवृत्तेर्यत्फलन्तस्य सिद्धेरित्यर्थः वस्तुतस्तु वसुसादेशेनास्यापि ह्यनुबन्धकत्वमिति भाष्ये स्यष्टम् तेन मासश्छन्दसीति वार्तिकस्थछन्दोग्रहणेन कल्पनयेति तृतीयान्तपदघटककल्पना शब्दार्थे ह्ययं हेतुः क्वचित्तु एतेनेति पाठः तत्रैतेनेत्यस्य कथञ्चित्पदोल्लेखेनेत्यर्थः तस्य मासश्छन्दसीतिवार्तिकस्थछन्दोग्रहणस्य कथञ्चित्पदस्वारस्येनायमेव पाठो युक्तः एवञ्च कविप्रयोगाणामुपपत्तिस्तु निरङ्कुशा इति न्यायेन कार्या मूले तेनेति विवक्षितइत्यर्थकरणेन परत्वादिति समासान्तोदात्तत्वादित्यादिः वक्ष्यमाणमूलोक्तप्रकारस्यायुक्तत्वध्वननायाह अन्तरङ्गत्वादिति कृतमपीति परिभाषाया गुरुत्वेन खण्डनादाह अकृतव्यूहेति अकृतव्यूहपरिभाषामाश्रित्य कृतस्य पूर्वपक्षस्य तद्बाध्यासिद्धपरिभाषया निराकरणं यन्मूले कृतन्तदयुक्तमिति भ्रान्तिनिवारणाय मूलकारस्य भावं व्याचष्टे अकृतेत्यादि तदेवाह उक्तार्थस्य सिद्धान्तत्वमेवाह विवक्षितव्याख्यानस्य निरालम्बनत्वशङ्कानिवारणायाह भाष्येप्युपेतिकर्त्तव्यमिति अस्य स्वरसिध्यर्थम् बहिरङ्गलक्षणत्वादिति शेषः एतेनोपदेशिवद्वचनारम्भ एव युक्तः विवक्षित इति व्याख्यानेपि विभक्तिबुद्धिनिमित्तकत्वेनासुङादेशस्य बहिरङ्गत्वादन्तरङ्गत्वेन स-

मासान्तोदात्तत्वस्य पूर्वम् प्रवृत्तौ मूलोक्तरीत्या दोषः स्यादेवेति सूचितम्। अकृतव्यूहपरिभाषामाश्रित्य कृतस्य वस्तुतस्त्वित्यारभ्यावधेयमित्यन्तग्रन्थेन परसप्तमीपक्षसमर्थनस्यापसिद्धान्तत्वमिति ध्वननायाह सत्व इतीति मूले नन्वेवमिति एवम् असुङादेशोत्तरं स्वरस्य प्रवृत्त्यङ्गीकारे नन्वेतदित्यत्र यदेतादिति तदर्थमाह अन्तोदात्तत्वेत्यादि एतेन हरदतोक्तत्वस्यैतच्छब्दार्थत्वमिति शङ्काया निरासः एतदित्यस्य प्रातिपदिकत्वप्रयुक्तेत्यादिः तत्र हेतुमाह फिडिति यद्यपीति शङ्काया भावार्थमाह नित्वाभावेपीत्यादिना निष्कर्षान्तग्रन्थेन कृतस्य सिद्धान्तस्यापसिद्धान्तत्वध्वननायाह व्युत्पत्तिपक्षे इतीति साच पूत्रो डुमुसुन्निति पातेर्डुम्सुन्निति वा स्त्रियामिति सूत्रस्थभाष्यकारकृता सूतेः सस्यपो ह्रस्वोस्सुन् प्रत्यय इति बोध्या वस्तुतस्तूणादीनामव्युत्पन्नत्वस्यैव भाष्यकृता सिद्धान्तितयान्तरङ्गतयोदात्तत्वमुकारस्यादौ भवति ततो ऽसुङनुदात्त एवेत्युकारस्योदात्तस्य श्रवणसिद्धिरिति उच्चारणार्थानामपीत्संज्ञयैव निवृत्तिरिति सिद्धान्तात्प्रक्रियोक्तरीत्या ग्रन्थसङ्गमनं युक्तमेवेति मूलमसङ्गतमिति केनचिदुक्तन्तत्प्रक्रियोक्त्याशयानभिज्ञतयेति ध्वननायाह लोपेतरदिति तद्व्याख्याता प्रक्रियाव्याख्याता प्रकाशकारः असकाविल्यत्रेत्वापत्तिरूपदोषस्य प्रकारान्तरेण परिहारशङ्कानिरस्यति नचेत्यादिना नेत्वमिति अस्य वार्णपरिभाषया वृद्धेः प्रागित्यादेः नन्वेवंसति प्रश्लेषो व्यर्थ एव स्यादिति तत्सामर्थ्याद्वार्णपरिभाषा बाध्यतामत आह कारिके इत्यादाविति अत्रापि प्रश्लेषसामर्थ्यात्प्राग्विभक्तिकार्ये कृते आकाररूपाप्परत्वाभावेनेत्वानापत्तेरिति भावः। अत्रैव अदस आवितिसूत्र एव एतेनेति वक्ष्यमाणदोषेणेत्यर्थः यदि विभक्ताविति विषयसप्तमी तदा ऽल्परङ्गत्वादत्वे टापि विभक्तावेकादेशे आकाररूपस्यापो ऽभावेन नेत्वस्यप्राप्तिरिति भावः तन्दोषमेवाह एवंहीत्यादिना सिद्धान्तेपीत्यादिः अन्त्यस्य आकारस्य वस्तुतस्तादृशं व्याख्यानमेवासङ्गतमित्याह निर्दिष्टेति प्रमाणसद्भाव एवैतत्परिभाषाया अप्रवृत्तिः प्रमाणाभावेतु सर्वत्र प्रवर्तत एवेति भावः एतेनादसो डौरिति सूत्रम्पाठ्यम् विभक्ताविति तु विषयसप्तमी एवञ्च विभक्त्युत्पत्तेः प्रागत्वेपि सोर्डौ आदेशे टिलोपेच रूपस्य सिद्धिरिति परास्तम् विषयसप्तमीत्वे प्रमाणानुपलम्भात् दिगिति दिगर्थस्तु वार्णादाङ्ङ् बलीय इति परिभा-

षामाश्रित्यासकावित्यत्रेत्वापादनमसङ्गतम् तस्याः परिभाषायाः समानकार्यित्व एव प्रवृत्तिरिति सिद्धान्तात् असौ ब्राह्मणि इत्यत्र संबुद्धौचेतिसूत्रेणेत्वस्य प्राप्तिरेवं स्यादितितु वक्तुमशक्यम् तत्र बहुवचने झल्योदेति सूत्राज्झलीत्यस्य सम्बन्धात् हेअसावित्यत्र एङ् ह्रस्वादितिलोपापत्तिरपि न हल्ग्रहणस्य तत्र सम्बन्धात् असकौ ब्राह्मणीत्यत्र प्रत्ययः स्यादितीकारादेशवारणाय तत्राकारस्य प्रश्लेषः कल्प्यते चेत्कारिके इत्याद्यसिद्धिरिति नन्वसुक इत्यत्र सत्वेन सुत्वस्यास्तु बाधः तथाप्यदकः शर्मेत्यत्र न सत्वस्य प्राप्तिरित्येवमिति शब्दस्य प्रयोगासङ्गतिरत आह क्वचिदिति अदक इत्यत्र सान्तत्वेन सुत्वाप्राप्तिः असुकीत्यत्रतु सत्वेन सुत्वस्य बाध इत्येवंशब्द उभयत्र सुत्वाप्राप्तिसूचक इति भावः यत्रतु प्रामाणिकाऽसुकशब्दस्य प्रयोगो दृश्यते तत्र तस्याव्युत्पन्नत्वमिति वाच्यम् मूले ऽन्यथेति विषयसप्तमीत्वानङ्गीकार इत्यर्थः नाभावे कर्तव्य इत्यर्थस्वीकारे नाभावस्य सिद्धावपि सुत्वस्यासिद्धत्वेनैनादेशगुणौ स्यातामिति रूपासिद्धिरेव दोष इति सूत्रासङ्गतिरस्त्येवेति विषयसप्तमीत्वमावश्यकत्वाच्च नाभावविषये सुत्वन्नासिद्धमित्यर्थः एवञ्चैनादेशगुणदृष्ट्याप्यसिद्धत्वन्नेति फलितम् तरुमूलमित्यत्र हशिचेत्यस्य व्यावृत्तिर्यथानुनासिकनिर्देशस्य फलन्तथा तर्वर्थमित्यत्रातो रोरिति सूत्रस्य प्रवृत्तिवारणमपि फलामिति प्रथमस्य तस्य त्यागे बीजाभाव इत्यत आह। तर्वर्थमिति आदिना तर्वर्थरीत्यादेः सङ्ग्रहः अत्र योगविभागाभावे इत्संज्ञालोपौ प्रति चोत्वविधायकशास्त्रदृष्ट्याप्यसिद्धत्वं स्यादित्युत्वविधायकसूत्रमेवासम्बद्धं स्यादिति तत्सामर्थ्यादुत्वं सर्वादेशः स्यादिति केचित् वस्तुतस्त्वादेः परस्येति शास्त्रैकवाक्यतया तर्वर्थमित्यादावादौ रेफस्योत्वं स्यादिति बोध्यम् ननूत्वविधायकशास्त्रस्थरुशब्दः प्रतिपदोक्तस्य बोधको भविष्यतीति न तर्वर्थमित्यादौ दोष इति शङ्कानिरस्यति मूले नचेति एवमपि प्रतिपदोक्तस्य रुशब्दस्य ग्रहणेपि रुहीति अत्र रुशब्दः प्रतिपदोक्त एवेति भावः रुहीत्यत्र रुशब्द इति रुधातुः लोडन्तमेतत् मूले एवञ्चोति योगविभागेनान्यत्राप्यसिद्धत्वन्नेत्यर्थकल्पनेचेत्यर्थः स्थानिवत्सूत्रस्थापीति अन्यथा एतद्दृष्ट्याप्यसिद्धत्वं स्यादिति स्थानिवद्भावानापत्तिः स्यात् दिगर्थस्तु यद्यपि योगविभागः प्रकृतसूत्रे ऽप्रामाणिक इति शङ्का भवति तथापि यत्ववि-

धावशग्रहणाल्लिङ्गात्कचिदसिद्धत्वाभावो ऽनुमातुं शक्यते तथाहि प्रत्ययः परश्चेत्यादिनिर्देशाद्विसर्गविधावेवासिद्धत्वाभावोनुमातुं शक्यते इति यद्यपि सभवति तथापि भोभगो इति सूत्रे ऽशग्रहणन्देवाः सन्तीत्यादौ यत्वस्यासिद्धत्वाद्विसर्गेपि तस्य स्थानिवद्भावेन रुत्वाद्यत्वम्माभूदित्येवमर्थङ् कृतत्तच्च त्रैपादिकस्य शास्त्रस्यासिद्धत्वे व्यर्थमिति तत्कचिदसिद्धत्वज्ञेत्यंशे लिङ्गमिति अशग्रहणमनर्थकमिति रीत्या तत्प्रत्याख्यानेतु हलो ऽनन्तरा इत्यादि निर्देशाः पदान्तत्वप्रयुक्तपूर्वरूपप्रवृत्त्योपपाद्यमानाः प्रकृतार्थज्ञापका भविष्यन्ति अत एव तेष्वनन्तरा इत्यादीनामुपपत्तिर्भवतीति अत्र अशग्रहणविषये योगविभागविषयेच तदुक्तमिति अशग्रहणं व्यर्थमेव योगविभागोप्यप्रामाणिक एवेति सर्वं सन्धिप्रकरणे उक्तमित्यर्थः । इति हलन्तपुलिङ्गविवरणम् ॥ प्रक्रियालाघवमूलिकामाशङ्क्याह नरस्यति मूले दइत्येव नोक्तमिति सन्निपातपरिभाषयेति या ह्यसिद्धत्वविषयेपि भवतीति प्रागुक्तम् ननु हस्य धकारादेशेपि नद्धमित्यत्र जशत्वं सन्निपातपरिभाषया न स्यादसिद्धत्वादत आह अनित्यत्वादिति अत एव पास्यर्द्धीत्यादौ जशत्वम्माधवादिभिरुक्तम् नच दइतिन्यासे सन्निपातपरिभाषया नत्वं वार्यते धइतिन्यासेतु तस्याः परिभाषाया अनित्यत्वादप्रवृत्तिं स्वीकृत्य जशत्वमुपपाद्यत इति पूर्वापरविरोध इति वाच्यम् इष्टानुरोधेनानित्यस्य वचनस्य प्रवृत्त्यप्रवृत्त्योः स्वीकारस्य सुप्रसिद्धत्वात् मूले गृ निगरण इति तुदादिरयम् शब्देचेति अयङ्क्रचादिः । इति हलन्तस्त्रीलिङ्गविवरणम् ॥ अम्येवेतीति यद्येनादेशः क्रियते तदा ऽतोमित्यमि कृते एनमिति स्यादत एनद्विधिरिति भावः औशसादिष्वित्यत्रादिना ओसोर्ग्रहणम् एतेनैव सिद्धिरिति विशेषविहितत्वात् नचेति वाच्यमिति परेणान्वयः अपवादत्वेनेति अत्वे कृते ऽकृतेवा एनदादेशे विशेषाभावादिति भावः उपसर्जने ऽसर्वनामत्वेनान्तर्गणकार्याप्रवृत्तेरपि स्वीकारे ह्यपवादत्वमेनदादेशस्य न सम्भवतीति शङ्कां वारयति नचोपेति भाष्यासङ्गत्यापत्तेरिति एतदस्ततसोरिति पूर्वसूत्रस्थ त्रतसोरित्येतदनुवादेन सर्वनामत्व एव प्रवृत्तिस्वीकारेणैतच्छब्दस्यानुपसर्जनार्थप्रतिपादकस्यैव तत्र ग्रहणादर्थाधिकारानुरोधादनुपसर्जनस्यैवेहापि ग्रहणमिति भावः उक्ताशयादेवाह एनदोप्युपेति तच्चारितार्थ्यमिति तत्र लुग्विधेः प्रवृत्त्या ऽत्वस्याप्राप्तेरिति भावः द्वितीयादिग्रहणस्य तत्सूत्रपठितद्वितीयादिग्रहणस्य पू-

र्वमेव प्रवृत्तेरिति आर्द्धधातुक इतिवद् द्वितीयाटौस्वितिविषयसप्तमीति भावः उक्तार्थस्याग्रे निराकरिष्यमाणतया ऽनभिमतत्वं सूचयन्नाह एतत्सर्वमिति तद्विषयेति स्वमोर्नपुंसकादिति सूत्रविषयेत्यर्थः बहिरङ्गलुग्विषयेति बहिरङ्गो यो द्वितीयाश्रितेति समासस्तत्प्रयुक्तसुपो धात्विति लुग्विषये नलुमतेति सूत्रबाध इत्यर्थः अत्रापि सामासिकलुक्यपि सामर्थ्यादिति स्पष्टार्थम्पुनरुपादानम् परिभाषाऽप्रवृत्तेः परिभाषायाः प्रवृत्त्यभावात् अन्तरङ्गानपीति न्यायादिति भावः अत एव तत्र तदप्रवृत्तेरेव एनदादेश इति सूत्रेण क्रियमाण इति शेषः एतच्छ्रुतक इति पाठः एतत्सूत्रोतिमक्रान्तद्वितीयाटौस्वेनादिति सूत्रेत्यर्थः तदाशयः भाष्याशयः एवमेकदेश्युक्त्या मूलन्दूषयित्वा सिद्धान्तमाह एषामिति अन्वादेशविषये इदमेतदोद्वितीयाश्रितेति समाससंज्ञकसमुदायानामित्यर्थः अस्याम् यद्येनदित्यादिना सूचितायाम् यदार्धधातुक इत्यादिना प्रागुक्तन्दूषयति विषयेति आर्द्धधातुक इत्यत्र विषयसप्तम्या भाष्यसम्मतत्वेपीह तदाश्रयणे मानाभाव इति भावः पृथगिति अन्यथोक्तरूपाणामसिद्धिः स्यात् अत एव भाष्ये नपुंसकैकवचने एनद् वक्तव्यः कुण्डमानय प्रक्षालयैनदित्युक्तम् अत्र नपुंसकैकवचन इत्युक्त्या ऽन्यत्रैनादेशो वाच्य इति स्पष्टमेवोक्तं वार्तिककृता सिद्धान्तिना इत्याहुरिति भाष्यतत्त्वविद इत्यर्थः नपुंसकस्येति सूत्रे ऽच इत्यस्य सकृच्छ्रुतत्वात्कथमर्थद्वयलाभ इत्यत आह नपुंसकस्येतीति अन्यथा उभयविशेषणत्वानङ्गीकारे झल्विशेषणत्वे प्रमाणन्तु प्रथमवार्तिकप्रत्याख्यानपरभाष्यमेव अङ्गविशेषणत्वे प्रमाणाकाङ्क्षायामाह आवृत्ताविति अच इत्यस्य झल्विशेषणत्वे ऽव्याप्तिशङ्कां वारयति काष्ठेत्यादिना दिव औदिति सूत्रीयभाष्यस्थोयम्प्रयोगः ऊर्गशब्दादाविति रेफे झल्त्वजातेरभावात् एतेन वक्ष्यमाणदोषेण तद्दूषणमुपपादयति युजेरित्यस्येति स्वीयसिद्धान्तमाह वस्तुत इति नुम्विषय इति यदंशे फलभेदस्तत्रैवानभिधानमिति भावः अन्यथा अनभिधानाकल्पने फलभेदेति वार्तिकमते बहूर्जिशब्द एव नुम्प्रतिषेधो नोदात्तौ भाष्यमतेतु तत्रापि नुमो ऽप्राप्तिरिति फलभेदापत्तिरित्यर्थः आकर इति एतेन भाष्यकैयटादिग्रन्थस्य प्रामाण्यलाभः । तत्कृत्यमिति सङ्कलनाकृत्यमित्यर्थः मूले हेत्वकथनादाह पूजेति विसर्गस्याकारोपरिपाठेनाण्त्वादनुनासिकापत्तिं वारयति विसर्गेत्विति भा-

व्यतिरिक्तमित्यनेन भाष्यासम्मतत्वमुक्तम्तदुपपादयति भाष्यमत इत्यादिना मूले त्रिसप्तत्यधिकामिति परमपूर्वोक्तानि नवाधिकशतरूपाणि नचेह षण्णामाधिक्यामिति शङ्काग्रन्थरीत्या षट् अष्टपञ्चाशदधिकानि प्रक्रियाप्रकाशे उक्तानि एवं संकलनया ऽष्टपञ्चाशतो रूपाणां वृद्धौ त्रिसप्तत्यधिकशतरूपाणि सम्पद्यन्त इत्यभिप्रायः तावतामेव रूपाणां वृद्धिरित्यत्र प्रमाणाभावेन भवदुक्ता सङ्ख्या ऽनुपपन्नेत्याशयेन दूषयति अष्टपञ्चाशत इति ननूक्तरीत्योपपत्तिः सम्भवत्येवेत्यत आह नियम इति अष्टापञ्चाशत एव वृद्धिरिति नियमे मानाभाव इति भावः प्रामादिकत्वे हेत्वनुक्तेर्न्यूनतेत्यत आह शास्त्रेणैवेति । इति नपुंसकलिङ्गविवरणम् ॥ तदर्हमिति अस्य अनयोर्ग्रहणमिति शेषः विहितस्येति आम इति शेषः आम इति लेरिति तत्र नानुवर्तत इति भावः तस्य तद्विहितस्यामः तत्वे अव्ययत्वे चण् अयञ्चेदर्थे णिदिति मूले उक्तम् निपातैर्यद्यदीति सूत्रे ऽस्य ग्रहणम् अवेत्यस्य प्रादिपठितावशब्दसमानानुपूर्वीकत्वेप्युपसर्गत्वाभावे मानमाह अवदत्तमित्यादि गुणभूतेति अच उपसर्गात्त इति सूत्रस्थ प्रवृत्तिनिमित्तांशविशेषणीभूतेत्यर्थः क्रियायोगसत्वेनोपसर्गत्वेपि तत्वस्य भाष्यकारीयप्रवृत्तिरिति यदि ब्रूषे तदा तत्त्वस्य विधेयत्वेन प्राधान्यात्तस्य बाधो ऽनुचित इति गुणबाधएवोचित इति भावः स्वरादीनिति अत्र स्वरादिशब्दो मूलपठितस्वरादिसमुदायपरः तेन पुनःशब्दस्य निरासः । यदुक्तं लक्ष्यविसंवादादिति तस्य लक्ष्यविसंवादस्य बोधनायाह व्यङ्स्वरावितिं एतेन स्वरशब्दस्य स्वरितत्वविधानेनान्तोदात्तता इत्ययुक्तमिति भावः इदमुपलक्षणमन्तरिक्षमथो स्वरितस्वरितस्य प्रयोगोपि बोध्यः अन्त्ये लक्ष्यविसंवादमाह सनादिति शास्त्राभावादिति एतेन निपातनेन कल्पनायान्दृढतरमानसत्वे साधुत्वमिति दर्शितम् ननु यदि शप्श्यनित्यो भावे भवति तदा सार्वधातुके यगित्यस्यापत्तिरत आह व्यत्ययेनेति यत्तु शप्यपि पुगन्तेति गुणापत्तिमाशङ्क्य व्यत्ययेन गुणाभाव इति तन्न भावे प्रत्ययसत्वेन शपः प्राप्तेरेवाभावात् नन्वन्तग्रहणस्य वैयर्थ्ये सति ज्ञापकता वाच्या सैवतु कुत इत्यत आह मेङ्भ्यामिति लक्षणप्रतिपदोक्तपरिभाषाया वर्णग्रहणेपि प्रवृत्तेर्भाष्यसम्मतत्वान्मूलं युक्तमेवेत्याह क्वचिदिति वर्णग्रहणे तस्याः परिभाषाया अप्रवृत्तिमभ्युपेत्याह सन्निपातेति भूतमियमित्यत्र भूतशब्दः स्त्रियाङ् क्लीबेवा आद्ये भूतेयमिति

स्यात् अन्त्ये स्त्रीसमानाधिकरणादिति पक्षे टाप्यपि नपुंसकहूस्वत्वेनेष्टसिद्धिर्भविष्यतीत्यत आह भूतशब्द इति पौतन्यम्पूतनाया भावः पूतनाहत्यसाधारणो धर्मः सामान्ये नपुंसकम् धर्मधर्मिणोश्चाभेदेन ब्राह्मणीपदेन सामानाधिकरण्यम् अन्तरङ्गत्वादिति टाबपेक्षयेत्यादिः लक्ष्य इति विकारस्यानुपूर्व्यैक्येन लक्ष्यभेदाभावादिति भावः आदिना ब्राह्मणीभिर्दारैरित्यस्य सङ्ग्रहः। इत्यव्ययानां विवरणम् ॥ तस्यहि अनुपसर्जनाधिकारस्यहि हिशब्द एवार्थः एतेनापिशलिना प्रोक्तमधीते आपिशलमिति न व्यावर्त्यम् प्रोक्ताणः स्त्रियामवर्तमानात् अध्येत्रण्तु लुप्तः अध्येत्रर्थगतस्त्रीत्वमादाय श्रूयमाणाणन्तात्प्रत्ययस्तु न स्त्रियामित्यस्य गृह्यमाणविशेषणत्वात् काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी तामधीते काशकृत्स्ना ब्राह्मणी अत्राध्येत्रर्थकस्याणो लुकापहारे लुक्तद्धितेति स्त्रीप्रत्ययस्यापि लक्ष्ये लक्षणमिति न्यायेन पुनर्न ङीविति नान्यव्यावर्तकत्वेन तदधिकारचारितार्थ्यमिति ध्वनितम्। एवञ्च बहुकुरुचरेत्यस्य तदन्तविधिम्विना ऽनुपपन्नत्वेच वनोरचेतिसूत्रे तदन्तविधेर्वनोरचेतिसूत्रे स्पष्टमुक्तत्वात्तस्य दृष्टान्तता ननु संज्ञाशब्दस्थले शब्दस्वरूपमेव प्रवृत्तिनिमित्तान्न जातिरिति मृणकशब्दस्य संज्ञायां व्युत्पादितस्य कथञ्जातिवाचकत्वमत आह कवुनादीति अतएव संज्ञापदेन रूढिग्रहणादेव साच रूढिर्व्याघ्रत्वजात्यवच्छिन्न एवेति व्याघ्रीत्यस्य सिद्धिः दिगिति दिगर्थस्तु त्रयीशब्दानाम्प्रवृत्तिर्न सन्ति यदृच्छाशब्दा इति पक्षे सर्वेषां संज्ञाशब्दानाञ्जातिशब्दत्वमेवेति तदा शङ्कैव नास्ति मूले तेनेति जन्यजनकभावरूपस्यापि पुंयोगस्य ग्रहणादेव यदि दाम्पत्यभावरूप एव पुंयोगो विवक्षितः स्यात्तदा वैश्याशूद्र्योरित्यनुपपन्नं स्यात् या शूद्रेण विवाहिता सा राजन्येन विवाहिता न भवति माहिष्यादिव्यवहारश्च विवाहितायामुत्पन्नानामेव विन्नास्वेपविधिः स्मृतत्प्रकरणशेषात् गौणी वृत्तिरिति तथाच गौणमुख्यन्यायेन सिद्धे जातिरिति व्यर्थमिति भावः ननु सादृश्याद्यत्र प्रयोगस्तत्रैव गौणत्वव्यवहाराद्गौणीत्यनुपपन्नमत आह लाक्षणिकत्वेति अभिमानपदसूचितामरुचिं सूचयन् सिद्धान्तार्थमाह सदृशेति एवञ्च गौणमुख्यन्यायस्य नात्र विषयता यत्र पुंयोगाज्जातिवाचकस्य शब्दस्य स्त्रियां वृत्तिस्तत्र तस्य शब्दस्यारोपेण प्रवृत्तेः स्वीकारान्न वस्तुतः शुद्रत्वजातिसत्वस्य शब्दप्रवृत्तिनियामकत्वमिति प्रकृते

जातिरित्यस्याभावे टाप्स्यादिति जातिरित्यावश्यकमित्याशयः गौणत्वमभ्युपेत्याप्याह पदकार्येति अत एव वस्तुतः शूद्रत्वस्य महाशूद्रशब्दवाच्येऽसत्त्वादेव स्मृतिषूक्तमिति 'शूद्राणान्तु सधर्माणः सर्वेऽपध्वंसजाः स्मृता' इति अपध्वंसः शूद्राविवाह इति तद्व्याख्यातारः नतु शूद्रा इति वस्तुतः शूद्रत्वजातिशून्या इत्यर्थः अत एव तेषां शूद्रकर्मणि नाधिकारः मूले यातु महती शूद्रेति अत्र शूद्रशब्दः शूद्रत्वजातिविशिष्टायामेव महच्छब्दार्थस्त्रीभेदेन विशेषणम् नतु समुदायस्य जात्यन्तरविशिष्टार्थाभिधायकत्वम् नैतदिति नामहत्पूर्वग्रहणमित्यर्थः समासात्प्रागन्तरङ्गत्वात्प्राप्तस्य टापो वारणासम्भवात् । भाष्यवार्तिककाराविति इति मन्येते इत्यत्रान्वयः शूद्रजातिवृत्तिमत्त्वेनेति शूद्रशब्दः शूद्रत्वात्मकधर्मपरस्तद्बोधकस्य जातिपदेन सप्तम्यर्थे बहुव्रीहिस्तस्य षष्ठ्यन्तस्य वृत्तिपदेन षष्ठीतिसूत्रेण समासान्मतुपि त्वः प्रत्ययः वृत्तिशब्दश्च जीवनोपायपरः शूद्राणां यो जीवनोपायः सएवैषामित्यत्र मानन्तु शूद्राणान्तु सधर्माण इति पूर्वोक्ता स्मृतिरेव तथाच शूद्रसमानधर्मत्वमूलकशूद्रत्वजात्यारोपविषयत्वेन तत्र शूद्रशब्दस्य प्रयोग इति भावः टापः प्राप्तिरिति महाशूद्रीशब्द इति शेषः अयमभावः यद्यपि ब्राह्मणादुग्रकन्यायामाभीरो तामजायत इत्यनेन संज्ञान्तरमेषामिति बोधितत्तथाप्याभीरीतु महाशूद्री जातिपुंयोगयोः समेति कोषेण महाशूद्रशब्दस्य तत्र वृत्तिर्बोध्यते एवञ्च महाशूद्रशब्दः पङ्कजशब्दवद्योगरूढस्त्र नतु केवलरूढः प्रवीणादिशब्द इवेति शूद्रशब्दोप्यर्थवानेव अजहत्स्वार्थैव वृत्तिरत्रेत्यतिप्रसङ्गवारणायामहत्पूर्वेत्यावश्यकमिति भावः नन्वेवंसत्यमहत्पूर्वग्रहणस्य चारितार्थ्यात्तदन्तविधिज्ञापकता भाष्योक्ता कथं सङ्गच्छतामत आह शूद्रशब्दार्थेति अत एव अनुलोमसङ्कराणाम्मातृजातिवृत्तित्वादेव शङ्केनेत्यस्य इत्युक्तमित्यत्रान्वयः मातृजात्यारोपेणेति मातरि वर्तमाना या जातिस्तस्या आरोपेणेत्यर्थः प्रागुक्तशूद्रसधर्माण इति स्मृतिरारोपितशूद्रत्ववत्त्वं तत्र नतु वास्तवं शूद्रत्ववत्त्वमिति बोधयितुमभ्युक्तेति भावः शूद्राचामहत्पूर्वा जातिरित्यत्र शूद्रा जातिरित्येकं वाक्यम् अमहत्पूर्वेति द्वितीयम् जातिरिति द्वितीयस्यापिशेषः तत्र द्वितीयवाक्ये कुक्कुटाण्डवदिति यथा कुक्कुटस्यादीनामण्डादिष्वित्यनेन पुंवद्भावेन साधनीयप्रयोगाणाङ्कुक्कुटत्वं जात्यवच्छिन्नस्याण्डमित्यर्थविवक्षया समासेन साधयित्वा तद्वचनस्य-

ख्यारूयातन्तथेत्यर्थः शूद्रशब्देनेति शूद्रत्वजातिमात्रविवक्षयेत्यादिः ततः स-
मासोत्तरम् पूर्वं शूद्रशब्दस्य प्रवृत्तिस्तु जात्यन्तरनिवृत्तितात्पर्याभिप्रायेणा-
त्रापि स्त्रीत्वविवक्षायान्तु महती शूद्रा इत्यर्थो ऽभिप्रेतः टाम्नस्यादिति महा-
शूद्राइत्येव तत्रेष्यते याहि महती शूद्रा महाशूद्रेत्येव सा भवतीति भाष्यात्
द्वितीयवाक्ये जातिरित्यस्य सम्बन्धेतु न निषेधः विशिष्टस्य जातिवाचक-
त्वाभावादिति भावः अन्यत्र उद्योतादौ मूले ऽदन्ता अपीति अपिना
हलन्तानां सङ्ग्रहः भाष्ये ङ्याप्सूत्रभाष्ये एवञ्च गणे तत्रेणोभयोर्ग्रहणम्
तत्रादन्तानाङ्ग्रहणन्तु स्त्रीत्वविवक्षायाञ्जातिलक्षणङीष्बाधनार्थमिति भावः
भाष्ये भवती अतिभवती महती अतिमहतीति प्रयोग उगितश्चेति सूत्रे
दृश्यते यद्ययं व्युत्पन्न एव तदोगित्वस्य प्रत्ययमात्रसम्बन्धित्वेन प्रत्य-
यग्रहणपरिभाषया ऽतिमहतीत्यत्र ङीम्नस्यादिति भवच्छब्दस्याव्युत्पन्नोगि-
त्वं स्वीकार्यमिति व्युत्पादितश्चेत्यसङ्गतमत आह न्यासकृतेति भाष्यसङ्गते-
रिति उक्तरीत्या भाष्यविरोधादित्यर्थः क्कनिबिति। अन्येभ्योपि दृश्यते इ-
त्यनेन भाषायामपि क्कनिप्प्रत्ययः ईत्वमवकारादाविति वार्तिकम्पावानइति
प्रयोगसाधनायारब्धत्वाद्विरोधात्कथङ्घुमास्थेतीत्वमित्याशङ्कायामाह पावान
इत्यस्येति उपायस्योपायान्तरापकर्षकत्वादाह स्थः कचेतीत्यादिना तदभाव
इति इत्वाभाव इत्यर्थः व्यवस्थितविभाषापरिगणितस्थल एवेत्याशयेनाह
तत्रेत्यादि तत्र शंस्थासव्येष्ठाशब्दयोः ईत्वमवकारादाविति वार्तिकप्रत्या-
ख्यानस्य सिद्धान्तत्वन्द्रढयितुमाह अत एवेति तत्प्रत्याख्यानादेव अत्र द-
धातेर्वेत्युक्तिर्वार्तिकासत्व एव सङ्गच्छते ननु धीरित्यत्र क्विपो लोपे हला-
दिकृङित्यरत्वाभावात्कथमीत्वम् नच स्थानिवद्भावेन विशेषणतया ऽला-
श्रयणात् प्रत्ययलक्षणसूत्रन्तु नियमार्थमत आह घुमास्थेत्यत्रेति अनजा-
दावित्यस्याजादौ नेत्यर्थः लक्षणायाम्मानन्तूक्तभाष्यमेव वस्तुतस्तु हलीति-
सूत्रे न पाठ्यम् दीङो युडचीत्यतो ऽचीत्यप्यनुवर्तनीयम् न ल्यपीत्यतो
मण्डूकप्लुत्या नेत्यस्यापि सम्बन्धश्च वाक्यभेदेन। तेन प्रसज्यप्रतिषेधलाभ
इति बोध्यम् नियमार्थत्वेपीत्यपिना विध्यर्थत्वपक्षसमुच्चयः कार्यमिति धी-
रित्यत्रेत्वरूपङ्कार्यमित्यर्थः नन्वेवमपि क्विङ्त्वे ऽनल्विधाविति निषेधात्क-
थन्तल्लाभ इतिचेन्न नल्यपीतिनिषेधेनानुबन्धकार्ये ऽनल्विधाविति निषे-
धाप्रवृत्तेः एवञ्च ध्याप्योः सम्प्रसारणञ्चेति वार्तिकमपि न कार्यम् अत

एवाह दिगिति । ननु भाष्यकारादिभ्यो ऽधिकदर्शित्वन्तस्यास्त्वित्यत आह अत इति अप्रमाणम् भाष्यासम्मतस्यार्थस्याप्रमाणत्वं सर्वसम्मतमिति भावः ष्णान्तेति सूत्रे ऽन्तशब्दोपादानेनोपदेशकाल इत्यस्य लाभ इत्येतदूषितमिति व्याख्यानमित्यसङ्गतमत आह उपदेश इतीति मूले ऽन्तविधाविति विशेषणतया ऽन्ताश्रयके विधावित्यर्थः नान्तत्वसामानाधिकरण्यविशिष्टसंख्यावाचकत्वसामानाधिकरण्यविशिष्टषट्त्वस्य स्थानिबद्धावेनानयनन्न सम्भवति नकारस्याल आश्रयणादिति भावः नान्तधर्म इति नान्तसङ्ख्यावाचकत्वं षडिति संज्ञाप्रवृत्तावुपयोगि आदेशे आनयनन्तु षट्त्वमात्रस्य तस्य समुदायधर्मतया नान्तविधित्वमिति भावः मूले वचनसामर्थ्यादिति सूत्रत्रयकरणसामर्थ्यादित्यर्थः यदि डापो नित्यत्वन्तदा मनो डाप् अनो बहुव्रीहेरित्येव वदेदिति भावः एवञ्च उक्तरीत्या तस्य सिद्धत्वेचेत्यर्थः मूले मन इति निवृत्तम् योगविभागस्येष्टसिध्यर्थत्वादिति शेषः तेन दाम्नीति न प्रयोग इति भावः अन उपधेत्यस्य प्रागुपात्तत्वेन योसावित्येतच्छब्देन तस्य बोधनमिति भ्रमवारणायाह अन्यतरस्यामितीति ननु विभक्तसूत्रेण विकल्पसिद्धावन उपधेत्यत्रान्यतरस्याङ्ग्रहणं व्यर्थमत आह अन इति सूत्र इति विकल्पानियमलाभ इति विकल्पस्य विभक्तसूत्रेण प्राप्तस्य नियमलाभ इत्यर्थः अन्यथा तत्र सूत्रे ऽन्यतरस्यामित्यस्याभावे तस्य सूत्रस्यानुपसर्जनाधिकारे पाठादाह अनुपसर्जनस्य बहुव्रीहेरिति अत्रानुपसर्जनग्रहणस्य बहुव्रीहिविशेषणत्वाद्बहूनि दामानि सन्ति येषु तानि बहुदामानि बहुदामान्यतिक्रान्ता नगरी अतिबहुदामेत्यत्र ङीम्न नच शेखरे ऽनुपसर्जनादित्यनुवृत्तमप्यत्र न सम्बध्यते तस्य गृह्यमाणविशेषणतया गृह्यमाणस्य चान्नन्तबहुव्रीहावनुपसर्जनस्यासम्भवादित्युक्तन्तदेवंसति विरुध्येतेति वाच्यम् तस्य ग्रन्थस्य भाष्यकाराभिधानसंवादित्वात् अत एव तत्रत्यशेखर एव स्वोक्त्युपष्टम्भाय ध्वनितञ्चेदं वनोरचेतिसूत्रभाष्ये तत्र ह्यनो बहुव्रीहेरित्यनन्तरमुपधालोपिनोवेति न्यासो दर्शित इत्युक्तम् अत्रत्यमनुपसर्जनस्येत्यस्य सम्बन्धेन व्याख्यानन्तु मूलकारतात्पर्यवर्णनपरमतो न विरोध इति निषेधार्थमित्यत्र प्रतियोग्याकाङ्क्षायामाह योगविभागेनेति निषेधार्थकमित्यस्य निषेधतात्पर्यकमित्यर्थः यथाश्रुताभिप्रायेणाह नियमशास्त्राणामिति अन उपधेत्यस्य विध्यर्थत्वे व-

हुधीवरीत्यत्र योगविभागमात्रेण ऋन्नेभ्य इत्यंतद्विषयता न सिध्यतीत्यत आह अन उपधेत्यस्येति अयमभिसन्धिः विभक्तान्यतरस्यामित्यनेन ऋन्नेभ्य इत्यस्यैव पक्षे प्रवृत्तिरभ्यनुज्ञायते अन उपधेतितु तस्यानुवादः एवञ्च ऋन्नेभ्य इति सूत्रविहितङीबनुवादेन विहितो रेफादेशः सिध्यति बहुव्रीहौवेतितु न वक्तव्यमिति शेषभूतान्यथेत्यस्यार्थमाह अन उपधेति तेन प्रकरणान्तरस्थत्वकथनेन अनन्तरत्वमिति अन उपधेत्यस्येति शेषः ममतु अन्यतरस्यामित्यस्य ऋन्नेभ्य इति सूत्रप्राप्तङीप उपजीवकत्ववादिनो ममतु न केवलमस्मिन्पक्षे लाघवमेव फलं किन्तु फलान्तरमपीत्याह वनोरचेत्यादिना अनन्तरत्वात् अन्नन्तोदेश्यकप्राप्तियोग्यविधिसूत्रव्यवहितभिन्नत्वात् मूले निषिद्धे रोपीति अपिशब्दो निषिद्ध इत्यनन्तरम्बोध्यः वनोरचेतिसूत्रविहितस्य ङीपो निषेधे तत्सन्नियोगशिष्टस्य रेफादेशस्याप्रवृत्तौ प्रकरणान्तरस्थेनान उपधेत्यनेन ङीप्यपि रो दुर्लभ इति योजना ननु बहुधीवरीत्यत्र बहुव्रीहौवेत्यस्य प्रवृत्तिः स्यादेव तस्यापि अन उपधेतिसूत्रवद्विधायकत्वादत आह किञ्चेति एवम् अनो बहुव्रीहेरित्यस्य वनोरचेति सूत्रमात्रनिषेधकत्वे बहुश्वन्शब्दो न वन्नन्त इति निषेधाविषयतया ऽनन्तरेण ऋन्नेभ्य इत्यनेन ङीप्स्यादिति भावः नन्वेवमनो बहुव्रीहेरिति बाध्यसामान्यचिन्तयोभयोर्निषेधकमिति स्वीकुर्म इत्यत आह किञ्चेति अपिना वनोरचेत्यस्य समुच्चयः अपूर्वेत्यस्य ङीब्रयोरित्यादिः तस्य वार्तिकस्य वनोरचेतिसूत्रस्थत्वादुभयविधायकत्वमिति अव्याप्तिपरिहारेप्यतिव्याप्तिः स्यादिति भावः सिद्धान्ते वनोरचेत्यस्य ऋन्नेभ्य इत्येतत्प्रापितङीबनुवादेन रभावमात्रविधायकत्वसिद्धान्ते तेन बहुव्रीहौ वार्तिकेन अन्तपक्षः अनो बहुव्रीहेरिति ऋन्नेभ्यइत्यस्यैव बाधकमिति पक्षः एतेनेत्यस्यार्थमाह बहुव्रीहौ वेत्यनेनेति दिगिति दिगर्थस्तु आद्यपक्षे ऽनो बहुव्रीहेरित्यस्य बहुव्रीहौ वेतिवार्तिकसत्वेन वैयर्थ्यम् किञ्च बहुराज्ञीत्यादौ ऋन्नेभ्य इत्यनेन ङीपः सिध्या ऽन उपधेत्यस्य वैयर्थ्यापत्तिः तस्मादन्यतरस्यामित्येतद्विधायकम् वनोरचेतितु नोभयविधायकमन उपधेतिनियामकमेव बहुव्रीहौवेतितु नापूर्वमिति ननु मूलोक्तरीत्या भाष्यसम्मतः सूत्रभङ्गेन पाठश्चेत्तदा ऽन उपधेत्यस्यानुपसर्जनाधिकारे प्रागुक्तम्फलन्त्यस्य निर्वाहः कथमत आह अन इत्यादि अस्मिन्पक्षे ऽन्यतरस्याङ्ग्रहणमनावश्यकमत-

स्तस्यानुपादानम् उपधालोपिनो वेत्यत्रानो बहुव्रीहेरित्यनुवर्तते तथाचात्र बहुव्रीहेरुपधालोपिनो ऽनुपसर्जनाङ्टाप्स्यादित्यर्थः अत्र वाग्रहणमृन्नेभ्य इति ङीपासह विकल्पलाभार्थमेवञ्चानुपधालोपिनि सुपर्वेत्यादौ नित्यस्य ङीपः प्रतिषेधेन डापो ऽभावः सिद्धः यश्चोपधालोपी बहुराजन्शब्दस्तस्योक्तरीत्या रूपत्रयम् एवं बहुधीवरीत्यादौ डाप्समुच्चितस्य ऋन्नेभ्य इति ङीपः प्रवृत्त्या तत्सन्नियोगशिष्टो रेफादेशः सिद्धः अस्मिन्पक्षे ङीपः प्रकरणान्तरत्वस्य शङ्कैव न यथाश्रुते मूलोक्तपाठस्यैवाश्रयणे अत एव अनुपसर्जनादित्यस्य करणादेव तस्य सम्बन्धे त्वनुपसर्जनं योन्नन्त उपधालोपी बहुव्रीहिस्तदन्तात्प्रातिपदिकादित्यर्थः वस्तुतस्त्वेतत्सूत्राशयवर्णनमात्रम्नतु भाष्यकारीयसिद्धान्तरीत्या तत्र ह्यनो बहुव्रीहेरित्यनन्तरमुपधालोपिनो वेति न्यासो दर्शितः तदोपधालोपिन इति वाक्ये ऽनुपसर्जनपदसम्बन्धसम्भव एव नेति तद्व्याप्यैकवाक्यतया ऽनुपसर्जनाधिकारे ऽन उपधालोपिन इति सूत्रस्य स्थितिपक्षेप्यनुपसर्जनस्येत्यस्य गृह्यमाणविशेषणत्वं वक्तव्यङ् गृह्यमाणञ्चान्नन्तत्व बहुव्रीहावुपसर्जनमेवेति बाधापत्त्या तत्रानुपसर्जनस्येत्यस्यासम्बन्ध एव एवञ्च बहुदामानि पुराण्यतिक्रान्ता नगरीत्यर्थप्रयोगे सत्यभिधाने ङीब्भवत्येव नोचेत्तदर्थकवाक्यप्रयोग एवेति बोध्यम् । यदर्थोयंभाष्यकारीयप्रयासस्तदनुक्तेर्न्यूनतापत्तिरिति तत्परिहारायाह चेनेति ननु मूले ऽन्यतरस्यामित्यस्य पृथक्करणेन पृथग्व्यवस्थामुक्त्वा भाष्येत्यित्यादिना भाष्यसम्मतमार्गो दर्शितस्तेन पूर्वोक्तो न भाष्यसम्मत इति प्रतीयते सचायुक्तः वनोरचेतिसूत्रभाष्ये बहुव्रीहेश्चेतिवचनस्य प्रत्याख्यानाय भगवता तस्य प्रदर्शनादत आह पूर्वोक्तेति गुरुभूत इति एतेन तस्यापसिद्धान्तत्वेनात्र तदीयत्वेन नोक्त इति भाष्याशय इत्यनेनाभिहितम् वस्तुतस्तु मूले भाष्येत्यित्यत्र तुशब्दोपादानेन तस्य पक्षव्यारुचिग्रस्तत्वन्ध्वनितम् साच सूत्राक्षरमर्यादया समीहितार्थलाभे सम्भवतिसति सूत्रभङ्गकल्पनमन्याय्यमिति एवञ्च समाहितमित्यस्य वार्तिककृतेति शेषः अत एव भगवता सूत्रभङ्गस्योपपादनङ् कृत्वा तत्तर्हीत्यादिना पूर्वोक्तः प्रकारो दर्शितः तथाच पूर्वोक्तप्रकार एव भगवतो निर्भर इति पर्यवसितम् एतेन सूत्रभङ्गेन समाधानं वार्तिककाराभिमतन्नतु भाष्यकारस्येति भाष्येत्यित्याद्यभिधानमयुक्तमिति कस्यचित्प्रलपितमपास्तम् परमूले ऽन उपधेत्यस्य निय-

मार्थत्वन्नोक्तमितीत्युक्तमित्यसङ्गतमत आह डाप्सूत्रइति नन्वकचि ककारादुत्तरत्राकारस्योपलम्भादकचि न स्यादित्ययुक्तमत आह तदकारइति पचतकीत्यादीति तिङश्चेति टेः प्रागकच् न प्रयोगसमवायीति न लौकिकप्रयोगघटकाकच्यत्ययावयवकोत्तरकालिकश्रुतिविषय इत्यर्थः किन्तूच्चारणार्थत्वादविवक्षितः अत एव नयासयोरितिसूत्रं सार्थकम् ननु वर्णत्वपर्य्याप्त्यधिकरणस्य बोधने वर्णात्कार इत्यनेन विधीयमानकारप्रत्ययः समुदायान्न स्यादतो मूले उक्तं यन्नसाध्य इति तावता सौत्रप्रयोगोपपत्तावपि चकारएवकारइत्यादिप्रयोगाणाङ्का गतिरत आह एतत्प्रयोगेति तथाच वर्णात्कार इति निर्देशः समुदायादपि कारप्रत्ययः क्वचिद्भवतीत्यर्थे ज्ञापक इतिकल्प्यते अतिप्रसङ्गपरिहारस्तु ज्ञापकसिद्धस्यासार्वत्रिकत्वात्कार्य इति भावः आपः प्रत्ययतया तस्याङ्गविशेषणत्वन्न्यायप्राप्तस्य त्यागेतु किम्बीजमत आह सन्निहितेति । मूले तत्र सामर्थ्यादिति तत्र आपीत्यस्याकारविशेषणत्वे सामर्थ्यात् सूत्रारम्भसामर्थ्यात् अत एव ककाराकारमात्रव्यवधाने प्रवृत्तिस्वीकारादेव आद्याकारस्य सकाराकारस्य नच कात्पूर्वस्येत्यनेन कादव्यवहितपूर्वस्यैव स्यादिति कथमाद्याकारस्य प्राप्तिरिति वाच्यम् तत्राव्यवधानांशलाभे मानाभावात् एतच्च पाणिन्युच्चारितानुपूर्वीकसूत्राभिप्रायेणोपपादनम् प्रत्ययेकीतितु स्वोत्प्रेक्षामात्रमतो न विरोधः तत्र सूत्रारम्भसामर्थ्यात्ककारव्यवधानेपि प्रवृत्तिः अकारावेषयेतु काद्वैलक्षण्यमित्याशयेनाह अवकारयोरिति अकारशब्देन ककाराकाराभ्यामित्येतद्वाक्यघटकाकारशब्देन एतच्च यथाश्रुतमूलरीत्या यदितु श्रौताव्यवधानमकारांशे गृह्यते तदातु न जातिग्रहणस्य प्रयोजनम् एवमुपपादनं वार्णपरिभाषाया अनित्यत्वादप्रवृत्तिमभ्युपेत्य यदितु तस्याः प्रवृत्तिस्तदा ऽकारव्यवधाने प्रवृत्तिरपि सामर्थ्यादेवेति बोध्यम् अत एव अकारांशे जातिग्रहणादेव ननु मूलोक्तरीत्यास्यैतिकेत्यत्र त्रिव्यवधाने प्रवृत्तिर्दृश्यते एवेत्यत आह श्रौतत्रीति ननूत्तरस्येत्यंशविकलायास्तस्मादिति परिभाषाया उपस्थितावाद्याकारस्य कथम्प्राप्तिरत आह इदञ्चेति अत्र मत इत्युपादानात्तस्याः परिभाषाया असत्वं सूचितम् वस्तुतः पूर्वस्य कार्यविधानादुत्तरस्येत्यस्यानुपस्थितावव्यवधानांशस्याप्यनुपस्थितेः कल्प्येति तात्पर्यम् मूले आपीत्यस्य ककारविशेषणत्वपक्षे रथकटचेत्यत्र दोषोपपादनमनूद्यमानविशेषणनिया-

मिकात्र तस्मिन्नितिपरिभाषा न भवतीतिमतेन साच परिभाषा साक्षादनूद्यमानविशेषणे इको यणचीत्यादौ दृष्टैवेत्यत आह अनूद्यमानविशेषणतयेति एवञ्चानूद्यमानविशेषणविशेषणनियामिका परिभाषा न भवतीति तदर्थः अस्तिच प्राचीनसम्मतव्याख्याने आपीत्यस्यानूद्यमानाकारविशेषणककारविशेषणत्वमिति भावः मूले शालीयादिसिद्धिरिति यद्यनूद्यमानविशेषणविशेषणनियामिकापि परिभाषा स्यात्तदा गुणो वृद्धिरिति यल्लोच्यते तत्रेक्परिभाषोपतिष्ठत इतीको गुणवृद्धीतिसूत्रार्थमाश्रित्य वृद्धिर्यस्येति सूत्रेपीक्परिभाषोपतिष्ठत तथाच यत्समुदायाद्यजभिन्नेक्स्थानिका वृद्धिरिति सूत्रार्थः स्यात्तथाचौपगवादिशब्दस्यैव वृद्धिसंज्ञाप्रवृत्तावौपगवीय इत्यादिसिद्धावपि शालीयादिसिद्धिर्न स्यादिति भावः वक्ष्यमाणरीत्या मूलासङ्गतिपरिहारायाह अस्येति अस्य रथेत्यारभ्य सिद्धिरित्यन्तग्रन्थस्येत्यर्थः तैः प्रकाशकृद्भिः उक्तम् वृद्धिर्यस्येतिसूत्रे उक्तमिति शेषः यद्यप्यनूद्यमानविशेषणेष्विति तेन नोक्तन्तथाप्यन्यथानुपपत्त्या तथा कल्प्यत इति तदपि तदनुमतमेवेति भावः ननु निष्प्रयोजनकानुवादो नोचितो ऽत आह अनेनेति तादृशोक्तानुवादेन तत्र सूत्रे वृद्धिर्यस्येतिसूत्रे एतस्यैव स्थानेग्रहणस्यैव अत्रच प्रकृतसूत्रेच एवम् अनूद्यमानविशेषणेष्वित्यभिप्रायकमनुवादे इत्येवम् यदि स्थानेग्रहणस्य ज्ञापकता तदा साक्षादनूद्यमानविशेषणनियामिका नेत्यर्थो भविष्यति तथासति प्रकृतानुपयोगः इको यणचीत्यादौ दोषश्च स्यात् अनूद्यमानविशेषणविशेषनियामिका सा नेति तदर्थश्चेत्तदा ऽस्या न ज्ञापकसाध्यत्वमिति पूर्वापरविरोधस्तवेति भावः इति भाव इत्यत्र यदितीति तस्य ध्वनितमिति शेषः शेषपूरणे फलमाह यदित्यादिना स्थानसम्बन्धलाभः स्थानपदार्थनिरूपितसम्बन्धलाभः भाष्ये स्पष्ट इति तत्राहि यद्यपि लोके बहवः सम्बन्धा दृष्टास्तथापि शब्दस्य शब्देन कोन्यो ऽभिसम्बन्धो भवितुमर्हति अन्यदतः स्थानात् यद्यप्यानन्तर्यादयोपि सम्बन्धास्तथापि तस्यैवान्तरङ्गत्वाद्ग्रहणमिति प्रतिपादितम अस्तेर्भूरित्यादौ स्थानपदार्थनिरूपितसम्बन्धार्थकत्वं षष्ठ्या इत्यत्र स्थानिवदादेश इति हल इतिच सूत्रं ज्ञापकमप्यस्ति ज्ञापकासंभवात् ज्ञापकत्वासम्भवात् ननु यदि सा परिभाषा न स्वीक्रियते तदा वृद्धिर्यस्येत्यत्र पूर्वोक्तानुपपत्तिरेवेत्यत आह वृद्धसंज्ञायामिति ज्ञापकादिति प्र-

स्थे ऽङ्गद्धमित्यनेन प्रथशब्दे उत्तरपदे परे कर्क्यादिवर्जितमङ्गम्पूर्वपदमा-
दुचदात्तमित्यर्थकेन मालाप्रथ इत्यन्तादुचदात्तत्वे सिद्धे मालादीनामिति सू-
त्रे ह्रद्धार्थमारब्धं यत्तद्रूपज्ञापकादित्यर्थः एवञ्चोदीचामिति सूत्रे स्थानेग्रहणं
व्यर्थमेव षष्ठीस्थान इति सूत्रन्तु निर्दिश्यमानस्यादेशा भवन्तीति परि-
भाषार्थलाभायेति बोध्यम् निर्मूलामिति यदि परिभाषा न ज्ञापकसाध्या
तदा निर्मूलमित्यर्थः भाष्यकारानुक्तत्वन्तस्य सत्वे बाधकमपि द्रष्टव्यम् ।
प्राचान्तादृशोद्घोषस्य तस्य का गतिरत आह यद्वेति तत्र ह्रद्धसंज्ञायाम्
तस्याः इक्परिभाषायाः विधौ परिभाषोपतिष्ठत इत्युक्तसूत्रद्वयविषयक-
मेवेत्र साधकमाह अत एवेति तस्यानिर्मूलत्वात्तदुभयाविषयकत्वादेव वे-
त्यर्थः विभाव्यत इति तथाचापीत्यस्य ककारविशेषणत्वेपि निर्दिष्टपरिभा-
षया रथकट्यादावदोष एवेति भावः ननु यद्यनुवादेपि निर्दिष्टपरिभा-
षाप्रवृत्तिस्तदा आपीत्यस्याकारविशेषणत्वस्वीकारे किम्बीजमत आह स-
न्नीति आदिपदेन साक्षाद्विध्युद्देश्यत्वप्रयुक्तप्राधान्यस्य परिग्रहः । मूले स्व-
कीय इत्येवोक्तन्तु तत्र हेतुरुपात्त इति तत्र हेतुमाह विधेयस्येति श्रुते-
नेति श्रुतानुमितयोः श्रुतसम्बन्धो बलीयानिति परिभाषया तथा प्रति-
पादनादिति भावः ननु ककारमात्रस्य प्रत्ययत्वाभावात्प्रत्ययस्य विशेष्य-
त्वमेवास्तु कादितितु विशेषणन्तदन्तपरमस्त्वित्यत आह कान्तादिति ता-
दृशार्थकल्पने सर्विकेत्यादावकचि पूर्वसूत्रस्याचारितार्थ्येपि कारिकेत्यादा-
वव्याप्तिः स्यादतस्तदन्तविधिर्न वस्तुतः प्रत्ययस्य विशेषणत्वमेवाभिमतम्
क्षिपकादीनाञ्चेति सूत्रारम्भसामर्थ्यादित्याह क्षिपकादीनामिति तेषामि-
कारादेशनिषेधकस्य क्षिपकादीनाञ्चेतिसूत्रस्येत्यर्थः तेनैव न्यायेन येन ना-
प्राप्तिन्यायेन वस्तुत इदानीमित्यनिरवकाशत्वेनैकादेशस्य बाधकम् येन ना-
प्राप्तिन्यायस्यतु तक्रकौण्डिन्यन्यायमूलकतया तस्य यत्रोत्सर्गप्रवृत्त्युत्तरम-
पि प्रवृत्तिस्तत्र प्रवृत्तेः स्वीकारादिति तद्विषयताया इहाभाव इति बो-
ध्यम् बाधकत्वमुभयथेति साधर्म्यादेवमुक्तम् मूले प्रत्यये के इति क्व-
चित्पाठः सत्वयुक्तः केतिसमुदायस्य प्रत्ययस्य यत्राज्ञाताद्यर्थे कस्तत्र स-
त्वेपि सर्विकाकारिकेत्यादावप्राप्तेः किन्तु बहुषु प्रत्ययस्थे के इत्येव पा-
ठः ततोपि लाघवादाह प्रत्ययेकीति व्यधिकरणे सप्तम्यौ नतु समानाधि-
करणे अज्ञातकादिविधिशङ्कैव नास्ति अत एव नयासयोरिति चरि-

तार्थम् तथाच प्रत्यय इति ककारस्य विशेषणमेव सामर्थ्यात् कीत्युक्तिसामर्थ्यात् तत्र कपरत्वमव्यवहितत्वसामानाधिकरण्यविशिष्टपूर्वत्वात्मकम् अकारव्यवधानांशेतु गतिरुक्तैव दिग्वाचकस्यापीति अपिना आजन्तपरिग्रहः मूले यच्चिति प्रक्रियोक्तिरियम् साहचर्यानाश्रयणे विनिगमनाविरहादुभयोर्ग्रहणमिति भावः सङ्गृहीत इति तथाच नोभयोर्ग्रहणशङ्केति भावः वर्णयतीति चौरादिकाद्वर्णधातोर्ण्यन्ताण्ण्वुल् मूले अत्राहुरिति प्रकाशकृत इति शेषः स्थानेशब्दे जागरूकइति स्थानेशब्दो विधाविति परिभाषाज्ञापकत्वेन स्थापित इत्यभिप्रायेणेत्थमुक्तिः वस्तुतस्तु पूर्वोक्तरीत्या तस्यानावश्यकत्वादाह स्थाने पदेति स्थाने इति पदइत्यर्थः एवञ्च यकपूर्वस्थानिकाकारस्येति वाक्यार्थः यकपूर्वत्वञ्चाव्यवहितमेव गृह्यते यकौ पूर्वौ यस्या इति विग्रहे उत्तराङ्गविकलायास्तस्मादिति परिभाषाया अनुवादेप्युदात्तस्वरितयोरित्यादाविव प्रवृत्त्या तत्समानार्थकवृत्तेरपि तदर्थकत्वात् तेन कृशराशब्दादल्पे कुत्सायां वा के इत्वस्य विकल्पो न विहितस्याटावादेरिति शेषः लक्षणप्रतिपदोक्तपरिभाषाघटकस्य प्रतिपदोक्तस्येत्यस्य साक्षादुच्चारितस्य तत्तच्छब्दानुवादेन वा विहितस्येत्यर्थ इत्याशयेनाह विशिष्येति ननु क्विप्प्रत्यय एव धाधातोर्वक्तुमुचित इत्याशङ्कान्निरस्यति नदीसंज्ञेति तत्रहि तत्सूत्रभाष्येहि तथाच यथा तत्र छान्दसत्वाद्विज्ञेयोचितः लोकेत्वीदृशानामनभिधानम् कैयट इति उक्तभाष्यविरोधरूपा ऽरुचिरनेन ध्वनिता ध्वनने कर्त्राकाङ्क्षायामाह स्वशब्दस्येति ननु स्वशब्दस्यात्मीयवाचिनः सर्वनामत्वादकचि तद्विशिष्टाट्टापः सत्वे सर्वनाम्नः स्याड्ढ्रस्वश्चेति स्यादिति स्विकायामित्यनुपपन्नमत आह स्वाशब्दादिति तथाच कान्तस्यासर्वनामत्वेन नेह स्याटः प्राप्तिरत्र कात्पूर्वो ऽकार आकारस्थानिकोपि भवतीति युक्तमस्योदाहरणत्वमत एवाह साध्विति । अकचः स्वार्थिककापवादत्ववदत्यन्तस्वार्थिककापवादत्वमस्तीति शङ्कां वारयति नह्यकाजिति अकचो ऽपवादत्वन्तत्रकौण्डिन्यन्यायेन वाच्यन्तच्च न सम्भवति कुत्साद्यर्थविवक्षायामकचः प्राप्तिस्तदातु नात्यन्तस्वार्थिकस्य विवक्षेति भावः नन्वेवं स्विकायामिति प्रयोगवक्ष्याख्यातृग्रन्थस्याप्युपपत्तिर्भवतीति व्याचक्षाणा उपेक्ष्या इति मूलासङ्गतिरत आह अकचमिति स्त्रीत्वाभावे साधकमाह स्वो ज्ञातावात्मनीत्यादि ननु संज्ञाभू-

तस्य कथमेतत्सूत्रोदाहरणत्वन्तस्याभाषितपुंस्कत्वादत आह संज्ञाया अ-पीति पुंवत्वनिषेधोहि पुंवत्वस्य प्राप्तिपूर्वकस्तस्य प्राप्तिश्च भाषितपुंस्कत्वं विना नेति भावः ननु तेन निषेधो न संज्ञाभूतस्याभाषितपुंस्कत्वमेव बो-ध्यते सिद्धानुवादत्वे लाघवात् किञ्च क्तिच् क्तौचेति संज्ञायां विहि-तस्य क्तप्रत्ययस्य देवदत्तादिशब्दे सत्वेन क्रियाप्रवृत्तिनिमित्तकत्वस्य स-त्वेनच तस्यास्तु भाषितपुंस्कत्वमस्यतु तथात्वे न प्रमाणम् यद्यस्यात्मीयत्व-प्रवृत्तिनिमित्तीकृत्य संज्ञात्वेन विनियोग इति ब्रूषे तदा सर्वनामत्वादक-जपि स्यादित्यातः स्थानिकाकारस्यालाभ इत्यत आह अत्यन्तस्वार्थिकेति अत्रेदं बोध्यम् अत्यन्तस्वार्थिककान्तमपि तस्योदाहरणन्न सम्भवति तस्य ङ्याबुत्पत्तेः प्रागुत्पत्तेरातः स्थानिकत्वस्येहालाभः एवञ्च तत्र नित्यमेवेत्वम् व्याख्यातृग्रन्थस्योपेक्षणीयत्वञ्च पूर्वोक्तरीत्या काशिकोक्तिस्तु संज्ञाविष-यिण्येवेति विकृतनिर्देशस्य विवक्षितविषयत्वे मानमाह भस्त्राशब्देति एवञ्च भस्त्राशब्दस्य निर्णायकतयाभ्यर्हितत्वेन पूर्वनिपातः सङ्गच्छते साहचर्यस्य सर्वत्र व्यवस्थापकत्वे मानाभावादाह व्याख्यानेनचेति शिष्टकृतव्याख्याने-नचेत्यर्थः तेषां व्याख्यानं सप्रमाणमित्याशयेनाह अत एवेति तादृशस्य ग्रहणादेवेत्यर्थः अन्यथा उपलक्षणत्वे एतेन उक्तरीत्या साधुत्वस्य व्युत्पा-दनेन अतत्वेन अभाषितपुंस्कत्वेन। ह्रस्वत्वपक्षे विकल्पस्योपपत्तिमाह ब-ह्वीति मूले अत एवेति यूनस्तिरिति सूत्रमभिव्याप्यानुपसर्जनादित्यधिका-रस्य सत्वादेव गृह्यमाणेति श्रुतानुमितयोरिति न्यायादिति भावः नात्र दोष इति बहुयुवा शालेत्यत्रातिव्याप्तिरूपो दोषो नेत्यर्थः नन्वेवमनुपस-र्जनाधिकारवैयर्थ्यमत आह अनुपसर्जनेति सहि बहुकुरुचरा इत्यादौ ङी-पः प्रवृत्तिवारणायारब्धः यदि स्त्रियामिति गृह्यमाणस्यैव विशेषणं स्यात्त-दा टितः स्त्रियामवर्तमानाङ्ङीपः प्राप्तिर्नास्तीति तदधिकारो व्यर्थः स्यादिति यावता विनेति न्यायेनोभयोरपि ज्ञाप्यत्वमिति भावः अदोषादिति नचेत्या-दुक्तदोषाभावादित्यर्थः अत एव स्त्रियामित्यस्य स्त्रीप्रत्ययप्रकृतित्वाभिमत-विशेषणत्वादेव यदि श्रुतविशेषणत्वमेव स्यात्तदा वन एव श्रुतत्वात्तद्विशेष-णत्वं स्त्रियामित्यस्य स्यादित्यत्र वन्नन्तस्य स्त्रियामवर्तमानाद्वनोरचेत्यस्य प्रवृत्ति र्न स्यादिति भावः न केवलं लक्ष्यानुरोध एवं स्त्रियामित्यस्य स्त्रीप्रत्ययप्रकृ-तित्वाभिमतविशेषणता तात्पर्यग्राहकः किन्तु प्रधानाप्रधानयोः प्रधानानुरोध-

एव प्रबल इति न्यायोपि स्त्रियामित्यस्य तत्त्वे नियामक इत्याशयेनाह प्राधान्येनेति साक्षाद्विध्युद्देश्यत्वेनोपात्तनिष्ठप्रकारतानिरूपितविशेष्यत्वरूपमस्य प्राधान्यन्द्रष्टव्यम् नन्वेवमनुपसर्जनादित्यपि प्रधानस्यैव विशेषणं स्यादिति बहुकुरुचरेत्यस्य तद्व्यावर्त्यत्वानुपपत्तिरिति तदधिकारस्य तदन्तविधिज्ञापकत्वानुपपत्तिरत आह अनुपसर्जनादितित्विति विशेषणमिति अनुपसर्जनादित्यस्य तदन्तविधिज्ञापकतापरभाष्यप्रामाण्यादिति शेषः अत एव अनुपसर्जनाधिकारेण तदन्तविधेर्ज्ञापनादेव सिद्धिरिति तन्मात्रस्य सिद्धिरित्यर्थः व्यतिरेकप्रदर्शनमुखेनोक्तार्थत्वन्द्रढयति अन्यथेति अन्यथा तज्ज्ञापिततदन्तविध्यभावे। अपिशब्दोत्रेष्टसिद्धिसमुच्चायकः साच तदन्तविध्यभावे केवलात्कारशब्दान्ङीप्यप्यनुपसर्जनस्त्रीप्रत्यये तदादिनियमाभावेन समुदायस्य स्त्रीप्रत्ययान्ततया ततो ढकि बोध्या नच समुदायस्य स्त्रीप्रत्ययान्तत्वेपि न प्रातिपदिकत्वमिति वाच्यम् तत्र प्रातिपदिकादित्यस्यासम्बन्धात् अन्यथा ङ्याब्ग्रहणस्यैतदर्थमावश्यकतया ऽन्यार्थत्ववर्णनपरङ्याप्सूत्रस्थभाष्यविरोधः स्यादिति आपाद्यं रूपं व्युत्पादयति कुम्भेनेत्यादिना समासेपीति अपिशब्दो ऽयङ्कारस्येत्यनन्तरं द्रष्टव्यः तेन कारशब्दस्य समासात्मकसमुदायस्यच प्रातिपादिकत्वलाभः तदर्थस्यापीति अपिशब्दः समुदायपरामर्शकः एकार्थीभूतस्यापीति अस्य तस्येत्यत्रान्वयः विशिष्टस्य ङीप्विशिष्टस्य तस्य कारीशब्दस्य अयोगस्य तदर्थेनायोगस्य अपत्यार्थेनसहेत्यादिः वक्तुमशक्यत्वादिति अजहत्स्वार्थवृत्तिसद्भावात् जहत्स्वार्थातु तत्रैव यत्र रूढिर्विरोधिनीति सिद्धान्तात् तेनापियोगे तदर्थेनापत्यार्थेन योगे एवञ्चोभाभ्याम्प्रत्ययोत्पत्तिसम्भव इत्याशयेनाह कदाचिदिति विशिष्टस्य समासात्मकसमुदायस्य ननु कुम्भेनैकार्थीभूतस्य तस्य कथमपत्येन योगो ऽत आह निष्कृष्यैकेति न मानमिति अत एव तद्धितार्थेत्यनेनोत्तरपदे परे समासविधानं सङ्गच्छते अत एवच येन विधिरितिसूत्रे प्रत्ययग्रहणपरिभाषायाः प्रयोजनङ्गार्ग्यायणः परमगार्ग्यायण इत्युपात्तम् कृद्ग्रहणपरिभाषात्वत्र न प्रवर्तते कृन्मात्रग्रहणाभावात् कस्यचिच्छङ्कानिरस्यति नचेति एतदधिकारसामर्थ्येन अनुपसर्जनाधिकारसामर्थ्येन नतु न्यूनस्येति तदाशयः चातुर्थिकस्यानुपसर्जनादित्येतत्प्रयोजननिरूपणपरप्रधानेन तदन्तविधिर्यथा स्यादित्येतद्भाष्यस्याशयः नच तद-

स्तविधावपि व्यपदेशिवद्भावेन कारीशब्दस्याण्णन्तत्वात्कुम्भकारेयो दुर्वार इति वाच्यम् एतदधिकारसामर्थ्यादसहाय एव व्यपदेशिवद्भावप्रवृत्तेः तत एव स्वस्वचेत्यपि न प्रत्ययग्रहणपरिभाषया ऽधिकस्यैव व्यावृत्तिर्नतु न्यूनस्येतितु युक्तमेव अत एव अस्य गोत्रापत्यमित्यर्थे इञि यस्येति लोपेपि यूनि फक्सिद्धिः ननु कुम्भेन समासेपि केवलस्य कारस्य प्रातिपदिकत्वेनेत्यसङ्गतम् शेखरोक्तरीत्या केवलस्य सूत्रद्वयसाधारणपारिभाषिकार्थवत्वाभावात् प्रत्ययान्तत्वेन पूर्वसूत्रस्याप्राप्तेश्च नच कृदन्तत्वादुत्तरसूत्रेण प्रातिपदिकत्वम् एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वरूपप्रशस्यार्थवत्वाभावेनोत्तरसूत्राप्राप्तेरितिचेन्न व्याघ्रीअश्वक्रीतीकछपीत्यत्र गतिकारकोपपदानामित्यस्य प्रयोजननिरूपणावसरे स्त्रीप्रत्ययोत्पत्तेः प्राक् यथा घ्रशब्दादीनां प्रातिपदिकत्वन्तथा ऽत्र कारशब्दस्यापि भविष्यति कृत्तद्धितेतिसूत्रस्यैवच प्रवृत्तिरत्राभिप्रेता विभिन्नवृत्तिद्वयस्यात्र सत्वेन तन्मात्रवृत्त्येकार्थीभावस्यात्र सत्वमस्ति पञ्चगवधनइत्यत्रतु समासद्वयरूपा सजातीया वृत्तिरित्येकार्थीभाव एकएवेत्याशयात् ननु सर्वादीनीतिसूत्रे भाष्ये ऽनुपसर्जनादिति योगः प्रत्याख्यायत इत्युक्तमिहतु प्रधानेन तदन्तविधिर्यथास्यादित्यनुपसर्जनादित्यस्य प्रयोजनमुक्तमित्येतद्द्वयं विरुद्धमितिचेत् अत्राहुः कैयटादयः प्रत्याख्यायत इत्युक्तिः सिद्धान्तिनः प्रकृतसूत्रस्थापनपरा चतुर्थाध्यायस्थातु एकदेशिनः तदन्तविध्यभावेपि स्त्रीप्रत्यये तदन्तविध्यभावेन कुम्भकारीतिसमुदायादवयवात्स्त्रीप्रत्ययोत्पत्तावपि ढक् भविष्यति एकाज्द्विर्वचनन्यायात् नच केवलकारीशब्दादपि कदाचित्स्यादिति वाच्यम् कुम्भेनैनमरभूतत्यनेष्कृष्यापत्येनानन्वयात् अन्यथा तदन्तविधावपि केवलकारशब्दादपि कदाचित्स्त्रीप्रत्यये सति ततो ढकि कुम्भकारिण्यादुत्तरएव स्यात् नच पुण्यस्थाकारीत्यस्य न योगस्तथाकारेत्यस्य स्त्रीत्वेन कथं योग इति वाच्यम् अमहत्पूर्वग्रहणेन तदन्तग्रहणज्ञापनात् नचास्य सूत्रस्यानारम्भे स्यपतशब्दौ ङीषापत्तिरिति वाच्यम् टिड्ढाणञित्यादावुपात्तस्य स्त्रीत्वेन विशेषणात् पूर्वत्रतूपात्तन्तदन्तञ्च तथा व्याख्यानात् व्याख्यानञ्च प्रामाणिकस्त्रीप्रत्ययोत्पत्तावावश्यकमेव अत एव पञ्चाजीत्यत्र टाप्नेत्याहुः वस्तुतस्तु प्रत्याख्यायत इत्युक्तिर्वार्तिकरीत्या चतुर्थेतु भाष्यकारीयसिद्धान्तः निष्कृष्यैकार्थीभाव एव वृत्तिप्रयोजक इति न भाष्यका-

रस्य सम्मतम् अनुपसर्जनस्त्रीप्रत्यये तदादिनियमाभावेपि कदाचिदवयवाद-
पि ढक् स्यादेव यदपि समुदायादेव प्रत्ययोत्पत्तावेकाज्द्विर्वचनन्यायोपन्य-
सनन्तन्न युक्तम् यत्र युगपद्विवक्षा समुदायकार्येणावयवानुग्रहश्च तत्र त-
न्न्यायप्रवृत्तेः ङद्ग्रहणपरिभाषया कुम्भकारशब्दादेव स्त्रीप्रत्ययो भविष्य-
तीतितु वक्तुमशक्यम् तस्याः परिभाषायाः ङन्मात्रग्रहणे प्रवृत्तेः सि-
द्धान्तात् यदितु तदन्तविधिरमहत्पूर्वग्रहणेन ज्ञाप्यते तदा बहुकुरुचरेत्य-
त्र ङीपो ऽभावायानुपसर्जनादित्यावश्यकम् स्त्रियामि त्य स्त्रीप्रत्ययप्रकृति-
त्वाभिमतविशेषणतायान्तस्यानुपदं ज्ञापकत्वस्याभिधास्यमानत्वादित्येवंरीत्या
भाष्ययोरविरोध उपपादनीयस्तदेतद् ध्वनयन्नाह विस्तरस्त्विति। मूले
ऽन्यथेति ङीन्विधायके जातेरित्यस्याऽननुवृत्ताविति्यर्थः पुंयोगेपीति ङीष-
म्बाधित्वा परत्वादिति शेषः नह्येवंसति फलाविशेषः अजन्तान्ङीनि स-
मुदायस्यादुदात्तत्वमेव भविष्यति ङीपितु सतिशिष्टप्रत्ययस्वरेणान्तोदात्त-
त्वमिति विशेषस्य स्पष्टत्वात् तत्रेष्टापत्तिन्निराचष्टे इथत इति इत्यर्थः इति
तात्पर्यार्थः ननु टिड्ढेतिसूत्रस्थाञ्ग्रहणेनाजन्तान्ङीष्यौत्सीत्यादेः सि-
द्धौ शार्ङ्गरवेतिसूत्रे ऽञ्ग्रहणस्य वैयर्थ्यमत आह अनेनैवेति अपत्यं स्त्री-
ति गोत्रापत्यं स्त्रीत्यर्थः एतेन गोत्रञ्च चरणैः सहेति जातित्वमस्तीति
सूचितम् मूले इहानेकमिति नच ऋन्नेभ्य इत्यादावपि लक्ष्यभेदेनानेकवा-
क्यता ऽस्त्येवेति वाच्यम् तत्र सङ्ग्राहकवाक्यस्यैकत्वमिहतु तस्य नानात्व-
मित्याशयात् अत एव पञ्चाश्चेत्यत्र न ङीप् नचैवमिति एवम् आपि-
शलमधीते आपिशलेत्यस्य व्यावर्त्यस्य लाभे व्याख्यानेनेति मूलोक्तरीत्या
ऽनुपसर्जनादित्यस्य प्रयोजनमुक्त्वा एतदपि नास्ति प्रयोजनम् स्त्रिया-
मिति वर्त्तते नाणं विशेषयिष्यामः स्त्रियां योण् विहितः एवमपि का-
शकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी तामधीते काशकृत्स्ना ब्रा-
ह्मणी अत्र प्राप्नोति नैष दोषः अध्येतव्यमभिधेयायामण ईकारेण भवि-
तव्यम् पश्चादध्येतव्यमभिधेयायामण लुप्तः सः यश्च श्रूयते उत्पन्नस्तस्मा-
दीकार इति पुनर्न भविष्यतीति भाष्यकृदुक्तग्रन्थमूलकव्याख्यानेनेत्यर्थः त-
स्मात् उक्तरीत्या तद्वारणात् एतच्चेति तस्य तद्व्यावर्त्यत्वञ्चेत्यर्थः नन्वेव-
मुक्तरीत्या तस्य तदन्तविधिज्ञापनेपि स्वविषये चारितार्थ्यन्दुरुपपादमिति
कथं ज्ञापकत्वमत आह स्त्रियामित्यस्येति तत्करणे तद्व्यावृत्त्यर्थमनुपसर्जना-

दित्यस्य करणे एतद्व्याद्वत्तिरपीति आपिशला कासकृत्स्ना एतयोरपीत्यर्थः अनेनैवेति प्रक्रान्तेनानुपसर्जनाधिकारेणेत्यर्थः ननु प्रतियोगिसमर्पकमुपसर्जनपदं शास्त्रीयोपसर्जनबोधकमिति कथं व्याद्वत्तिरत आह उपसर्जनेति कृत्रिमाकृत्रिमन्यायोत्रानुपसर्जनाधिकारप्रयोजनप्रदर्शनपरभाष्यप्रामाण्येन बाध्यत इति भावः इत्याशयादिति मूलस्येति शेषः । अण्कार्यमित्यत्राण्रूपं कार्यमित्यर्थस्य भ्रमवारणायाह ङीबित्यर्थइति इदमुपलक्षणम् अणो द्यच इति फिञ्सिद्धिरपि प्रयोजनम् एतेन यदि ङीप्सिद्धिरेव प्रयोजनन्तदा स्वातन्त्र्येण ङीप्विधानेन सिद्धे ज्ञापनस्य नोपयोग इति परास्तम् नच छत्रादिभ्यो लाघवादणेव कार्यः किमनया कुसृष्ट्येति वाच्यम् ज्ञापकसिद्धस्यासार्वत्रिकत्वेन छात्रेत्यस्य सिध्यर्थमेवमभिधानात् दाण्डेत्येवेति एवन्त्वाच्छीलिकइत्युक्तौ तत्पदोपादानेन यत्र प्रथमान्तात्तच्छीलार्थे णस्तत्रैवाण्कार्यमित्यपि बोधितमतएव शीलिकामीतिवार्तिकस्य मांसशीला मांसकामेत्याद्येवोदाहृतम् मूले ऽत एवेति आपत्यशब्दस्यापत्याधिकारविहितपरत्वादेव अयजाति अयमकारो ऽनुनासिकस्तस्येत्संज्ञया निवृत्तिरिति बोध्यम् अकारप्रश्लेषस्य फलमाह तद्वार्त्तिकेति एवञ्च तद्वार्तिकप्रत्याख्यानपरभाष्यमेवापत्यशब्दस्यापत्याधिकारविहितपरत्वे मानमिति दर्शितम् ननु स्थलत्रय एव यद्यकारस्य प्रश्लेषस्तदाभिजिदितिसूत्रविहितयञ्लान्ङीबनापत्तिरत आह अभिजिदिति अस्त्रियामित्यनुवृत्तेरिति व्रातच्फञ्इतिसूत्रादित्यादिः साच मंण्डूकप्लुत्या कार्या गोत्रार्थकत्वेपीति किमत्रमानमिति चेत् तत्सूत्रभाष्यप्रघट्टकमेव तथाहि तत्रहि गोत्रमिति वक्तव्यम् अस्य गोत्रत्वप्रयुक्तङ्कार्यम्भवतीति तदर्थः किम्प्रयोजनम् आभिजितकः आभिजिदित्यस्यायमित्यत्र गोत्रचरणादिति वुञ् यथास्यात् तच्चाकर्तुं शक्यम् गोत्रादयं स्वार्थिको गोत्रे एव भवति अत्र भाष्ये वुञ्एव फलत्वेनोक्तो नतु ङीप् एतेन गर्गादिभ्योऽयञित्यत्रेवाभिजिदितिसूत्रेप्यकारप्रश्लेष इति वदन्तः परास्ताः पीष्टइति एवञ्च स्त्रियां यञेव स नास्तीति न तत्र ङीपः सम्भावना किन्तु गोत्रार्थबोधकत्वातिदेशाज्जातिलक्षणङीष एवेति न तत्राकारस्य प्रश्लेषः स्त्रियामित्यस्यासम्बन्धे ऽपि ननु गर्गादिभ्यइतिसूत्रे ऽकारस्य प्रश्लेषे सङ्घाङ्केतिसूत्रे ऽस्य द्व्यनुबन्धकत्वाद्ग्रहणन्न स्यादत आह सङ्घाङ्केतीति एतद्भाष्येति सङ्घाङ्केतिसूत्रे

गांगो घोषः गार्गो ऽङ्ग इत्युदाहरणपरभाष्येत्यर्थः अभिजिदित्यस्याप-
त्याधिकारपठितभिन्नत्वात्तत्र गोत्रपदेन ऋष्यपत्यरूपं लौकिकं गोत्रमिति
बोध्यम् कस्यचिदुक्तिङ्खण्डयति नचेति एतत्समानार्थेति तद्धितेतिकिमर्थम् ।
षितः प्रातिपदिकाधिकारार्थम् नैतदस्ति प्रयोजनम् षित्करणसामर्थ्यादे-
वात्रेकारो भविष्यतीति भाष्येत्यर्थः अस्याः लिङ्गविशिष्टपरिभाषाया इ-
त्यर्थः । तेन अकारस्योच्चारणार्थत्वेन तदकारस्य विवक्षितार्थत्वे रेफप-
रस्याकारान्तत्वाभावेनादेशो न स्यादिति भावः उच्चारणार्थत्वे मानन्तु
फढखच्छघामिति निर्देश एव अत्र ढक इति फिनोप्युपलक्षणम् मूले
फिनो नित्करणादिति यद्यायनादेशावयवस्य नस्येत्संज्ञा स्यात्तदा ऽनेनै-
व ञ्नित्यादिरित्यस्य प्रवृत्तिसिद्धौ फिनो नित्वं व्यर्थं स्यादिति भावः
ननु आयनो नित्करणसामर्थ्यात्फिनो नस्य नेत्त्वमिति वैपरीत्यमेव कु-
तो नेत्यत आह असञ्ज्ञातेति असञ्ज्ञाताविरोधात्सञ्ज्ञताविरोधस्य संकोच
एवोचित इति न्यायेत्यर्थः न सञ्जातो विरोधो वैयर्थ्यशङ्कया विरोधो
यस्य तस्येत्यर्थः उत्तरकालिकप्रतीतिविषये यदीत्संज्ञा तदा प्राथमिकप्र-
तीतिविषये फिनि नित्वार्थं नकारोच्चारणं व्यर्थमिति शङ्का भवतीति तत्रे-
त्संज्ञाप्रापकशास्त्रसंकोच एवोचित इति भावः एवञ्च तादृशन्यासस्सहक-
तं यन्नित्करणन्तत्सामर्थ्यादिति फलितम् अल्पवयसि प्रथमवयसि अपि-
ना ऽनूढासमुच्चयः एवञ्च या ऽल्पवयस्का ऊढाच तस्यान्तादृशप्रयो-
गदर्शनेनाद्य प्रथमवयसः प्रवृत्तिनिमित्तकत्वमावश्यकम् नन्वेवंसति वृद्ध-
कुमारीत्येवम्प्रयोगो नसुन इतिभाष्ये दृश्यते तस्य कथमुपपत्तिरित्यत आ-
ह । मूले वृद्धकुमारीति गौणः लाक्षणिकः लक्षणाप्रयोजकसम्बन्धमाह
पुंसा ऽसम्प्रयोगइति कौमारयौवनवृद्धत्वात्मकानि त्रीणि वयांसि यथाहुः
'पिता रक्षति कौमारे भर्त्ता रक्षति यौवने पुत्रस्तु स्थविरे भावे न
स्त्री स्वातन्त्र्यमर्हतीति' केचित्तु बाल्यमध्यत्वहद्धत्वात्त्रीणि 'आषोडशाद्ध-
वेद्बालो यावत्क्षीरान्नवर्तकः मध्यमः सप्ततिं यावत्परतो वृद्ध उच्यते' इ-
त्याहुः आयुषश्चतुर्भागैश्चत्वारीत्यन्ये यथाहुः 'आद्ये वयसि नाधीतन्द्वि-
तीये नार्जितन्धनम् तृतीये न तपस्तप्तञ्चतुर्थे किं करिष्यतीति' वयश्चर-
म इति वार्तिकं सर्वथा ऽऽरब्धव्यमेवेति बोध्यम् ननु पञ्चाश्वेत्यत्र य-
दि ठगन्तत्वान्ङीपः प्राप्तिस्तदा निषेधवैयर्थ्यमत आह द्वाभ्यां शता-

भ्यामिति आदिना पञ्चानामजानान्निमित्तं धनपतिसंयोगइत्यर्थे गोद्व्यचइति यतो ऽध्यर्द्धेति लुकि पञ्चाजेत्यस्य सङ्ग्रहः अपरिमाणेति सूत्रे परिमाणशब्दः पारिभाषिकस्यार्थस्य बोधकः यथाहुः 'ऊर्द्ध्वमानङ्किलोन्मानम्परिमाणन्तु सर्वतः आयामस्तु प्रमाणं स्यात्सङ्ख्या बाह्यातु सर्वत इति अत एव द्वे वर्षे भूता द्वाभ्यां शताभ्याङ् क्रीता द्विवर्षा द्विशतेत्यादौ तिर्यञ्चाने द्विहस्ता भित्तिरित्यादौच निषेधस्य सिद्धिः । नन्वेवंसत्युन्मानवाचकौ विस्तकाम्बल्यशब्दौ नोपादेयावपरिमाणत्वादेव सिद्धेरत आह अपरिमाणेति ननु श्रुतस्य शब्दस्य तदन्तपरतया श्रुतत्वादित्येतन्मात्रोपादानेन कथमिष्टसिद्धिरत आह अवान्तरेति तत्काले अवान्तरवाक्यार्थबोधकाले अयम्भावः येनविधिरित्यस्य प्रवृत्तिर्विशेषणज्ञानाधीना तज्ज्ञानत्वमवान्तरवाक्यार्थबोधोत्तरमेवेति मानाभावइति प्रत्युत निराकांक्षत्वमत्र प्रतिबन्धकमस्तीति बोध्यम् अपिशब्दोपादाने इहतु न स्यादित्युत्तरवाक्यासङ्गतिरत आह इहैवेति तथाचापिशब्द एवार्थे इति भावः तिर्यगिति प्रकृत इत्यादिः आयामपरिच्छेदकत्वेन प्रमाणवाचित्वादिति भावः मूले आयामपरतया आयामपरिच्छेदकपरतया आरोहतः उच्छ्रायात् परिणाहतः विस्तारात् अत एव आयामपरिच्छेदकस्यापरिमाणार्थत्वादेव येन कर्षादिना इदञ्च ऊर्द्ध्वायामपरिच्छेदकञ्च एवञ्चास्य द्विरूपत्वमिति फलितम् ननु पुरुषशब्दस्य प्रमाणवाचित्वाभावेनेत्यसङ्गतम्पूर्वग्रन्थविरोधादत आह तिर्यञ्चानस्यैवेति इत्युक्तेः इति पृथगुक्तेः ननु श्लोकवार्तिके प्रमाणे ल इत्यस्य भिन्नवाक्यत्वेन तत्प्रकृतेर्निर्बाधतया तदुक्तिरदुष्टैवेत्यत आह द्विगोरिति शमादीनाम्पुरुषतुल्यत्वशङ्कां वारयति शमादीनामिति शमशब्दो हस्तवाची 'पाणिः शमः शयो हस्त' इत्यमरोक्तेः 'पञ्चशाखः शमः पाणिरिति' पाठान्तराच्च आदिना ऽङ्गुल्यादीनाङ्ग्रहणम् वस्तुतोपीति अत एव द्विशमी द्विशमेति तत्र रूपद्वयम्भवति वस्तुत आद्ये लुगप्राप्त्या द्विशमद्वयसीत्येव तत्त्वेन तिर्यञ्चानत्वेन अत एव वितस्तिर्द्वादशाङ्गुल इति प्रसिद्धिः पुरुषशब्दस्यतु ऊर्ध्वाधरदिगवस्थितवस्तुमात्रपरिच्छेदकत्वेन क्वचिदपि न प्रमाणवाचकत्वम् । प्रयोगसिद्धिरिति लुको वैकल्पिकतयोक्तप्रयोगसिद्धिः आद्यपदयोः समर्थानाम्प्रथमादित्यनयोः तयोः प्रत्ययविधावुपयुक्तत्वेनायोग्यत्वादत्रासम्बन्ध इति भावः असम्बन्धा-

दिति सन्नियोगशिष्टन्यायो ऽत्र साधक इति भावः दृष्टान्तप्रदर्शनेन कथितस्य दार्ढ्यम्भवतीत्याशयेनाह शमइत्यादाविवेति सामर्थ्यं स्फुटयति तिर्यगेवेति सामर्थ्यात् तदुपादानसामर्थ्यात् इदमपि वस्तुतस्त्वित्यादिना मूलोक्तमपि उपादानसामर्थ्यमेव नास्तीत्याह वस्तुत इति आर्हादितिसूत्रे परिमाणम्पारिभाषिकमेवेत्याशयेनाह ढक इति उन्मानस्याग्रहणमिति मतेनाह ढञ इति उत्तरसूत्रेति सङ्ख्यायाः संज्ञासंघेतिसूत्रेत्यर्थः संख्या बाह्यातु सर्वत इत्युक्तेस्तद्वाचकस्यापरिमाणवाचकत्वात्सामानाधिकरण्यानुपपत्तिरन्यथा स्यादिति भावः अत एव षष्टिर्जीवितपरिमाणमस्य षाष्टिक इत्यस्य सिद्धिः मूलस्थपूर्वपक्षदार्ढ्यायाह अत एवेति नादेशेन सिद्धत्वादेव एतेन उक्तार्थस्य वार्तिककारसम्मतत्वेन न स्यादिति एतेनाकारोच्चारणस्य फलमुक्तम्। ङकारोच्चारणस्य फलमाह कुण्डोध्न्यादिभ्य इति एतेनेत्येतदर्थं स्फुटयति अत्रत्येति अनुग्रहण इति अर्थवत्परिभाषावादिति शेषः तद्भावकल्पनमात्रेणोपपत्तौ क्विबभावकल्पनन्नोचितमित्याशयेनाह आत्मनेपदेति मूले सुमङ्गलीरियमिति अत्र सुमङ्गली इत्युदाहरणम्बोध्यम् सुमङ्गलीरियमिति त्वीप्रत्ययान्तम्मसङ्गादुच्चारितम् क्वचित्तु सुमङ्गली शिवेति पाठः यदितु सुमङ्गलीरित्येवोदाहरणमित्याग्रहस्तदा छान्दसत्वात्सुलोपाभाव इति बोध्यम्। अनुक्तत्वे हेतुमाह अन्तरिति ननु न तन्सुधा यज्ञसंयोगाभावादत आह विभाषेति अत एव यज्ञसंयोग इत्यस्य तत्रासम्बन्धादेव तद्वैयर्थ्यम् उदात्तशब्दोपादानवैयर्थ्यम् ततश्च मनुशब्दस्यादुचदात्तत्वेनान्त्यस्यानुदात्ततयाच एतच्च समासात्मकसमुदायस्यानुपसर्जनत्वस्य प्रदर्शनञ्च गृह्यवच्यनुसारेणेति तत्रहि नारायणेन बहुव्रीहिङ्कृत्वा ऽनेन ङीबित्युक्तम् भाष्यसम्मत इति तत्रहि शस्त्री श्यामा इत्यत्र श्यामाशब्दः शस्त्र्यामेव वर्तते उपमेयन्तु समासवाच्यमिति पक्षे शस्त्री श्यामो देवदत्त इत्यत्र ह्रस्वत्वन्न सिध्यति यदुचपसर्जनह्रस्वत्वन्तदा कुम्भकपाललोहिनीत्यत्रानुपसर्जनलक्षण ईकारो न प्राप्नोतीत्युक्तम् त्रिषु एनीत्यत्र सुप्सुपेति समासः सुप्सुपेति समासकल्पनस्यागतिकगतित्वादाह छांदसत्वादिति आर्षत्वादित्यर्थः असंज्ञात्वादाह णत्वञ्चेति यदित्वस्य संज्ञारूपत्वन्तदा छान्दसत्वन्ङीबंशे एव हेतुः वस्तुतस्त्वित्युक्त्वरीत्या कैयटमते एक इत्यस्य वैयर्थ्यम्प्राप्नोतीत्यतः कैयटाद्याशय-

माह छांन्दसेष्विति तेषाम् कैयटादीनाम् तत्रहि दशपाद्यांहि षिद्गौरादिभ्यश्च अस्मिन्गणे गवयादीनामपि पाठ इति कस्यचिन्मतन्तन्न युक्तञ्जातेरस्त्रीतिसूत्रे योपधप्रतिषेधे गवयहयमुकयमनुष्यमत्स्यानामप्रतिषेध इति वार्त्तिकविरोधादिति कैयटः एवञ्चात्र सूर्यतिष्येतिसूत्रस्थ लेखो गौरादिषु मत्स्यशब्दस्य पाठभ्रमादिति बोध्यम्। उक्तरूपमित्यस्य शुनीतिरूपमिति नार्थः ङीप एवाप्राप्तेरत आह नान्तमिति एवञ्च नान्तत्वाभावेन क्रन्नेभ्य इत्यस्य न प्राप्तिरिति भावः एतदेवोपपादयति णिचीत्यादिना तदभावः नान्तरूपाभावः खण्डनकारोक्तिन्निरस्यति नचेति नेष्टवद्भावेनेति यदिष्टानि दृष्टान्तस्थातिदेशो ह्यनेन क्रियते नस्वद्धितटिलोपस्तु न दृष्टरित्यस्यैव प्रवृत्तेः परत्वाद्ब्रह्मिष्ठ इत्यादौ दर्शनात् निषिद्धमिति प्रकृतिभावेहि तस्य प्रवृत्तिर्भवतीति निषेधफलसम्पत्त्या निषिद्धमित्युक्तम् नच प्रकृतिभावेनैव नस्वद्धित इत्यस्यापि प्रवृत्त्यभावे सिद्धे नस्वद्धित इति न दृष्ट इति हेतूपन्यासो ऽयुक्त इति वाच्यम् येन नाप्राप्तिन्यायेन प्रकृतिभावस्य टेरिति सूत्रबाधकत्वस्यैव निर्णयात् एवञ्च प्रकृतिभावाट्टिलोपासम्भवान्नान्तस्य लाभ इति मूलञ्चिन्त्यमिति तदाशयः अस्य मतस्य प्रकृतिभावस्य टेरिति सूत्रमात्रबाधकत्वमिति मतस्य यदि प्रकृतिभावष्टेरित्यस्यैव बाधकत्वदा नैकाजित्येव सिद्धे प्रकृत्येत्येतदुपादानस्य वैयर्थ्यमिति भावः प्रकृतिभावस्य सर्वबाधकत्वादेवाल्लोपो ऽन इत्यल्लोपोपि तद्विषये नेतिप्रतिपादितम् प्रकृत्येत्येतदुपादानसामर्थ्यात्तद्विषये न्यायाप्रवृत्तिरित्याशयः अत एवाह नस्वद्धितइत्यस्यापीति अपिना टिलोपसामान्यसङ्ग्रहः षपूर्वेतीति तत्रहि किमिदं षपूर्वादीनाम्पुनर्वचनमल्लोपार्थमाहोस्विन्नियमार्थम् कथंवा अल्लोपार्थङ्कथंवा नियमार्थम् यद्यविशेषेणाल्लोपटिलोपयोः प्रकृतिभावस्ततो विध्यर्थम् अथहि आणि टिलोपस्यैव प्रकृतिभावस्ततो नियमार्थमिति भाष्ये उक्तम् तत्र कैयटः प्रकृत्यैकाजित्यादिः प्रकृतिभावः प्राकरणिकानि कार्याणि भेदेनापेक्ष्येरन्नभेदेनवेति पक्षद्वयोपपत्तिरित्याह अविशेषेणेति अल्लोपटिलोपसमुदायमपेक्ष्य प्रकृतिभावो विधीयते भेदेनेत्यनेन बाध्यविशेषचिन्तोक्ता तदा अनन्तरस्येतिन्यायाट्टिलोपस्यैव प्रकृतिभाव इति पक्षः अस्मिन्पक्षे ऽल्लोपोन इति सिद्धे नियमार्थम् यदि बाध्यसामान्यचिन्ता तदा प्रकृतिभावस्य सर्वबाध-

कतया ऽल्लोपस्यापि प्रकृतिभावेन निवृत्तौ प्राप्तायां विध्यर्थमिदं सूत्रम् अत्र भाष्ये ऽल्लोपटिलोपयोरिति बाध्यसामान्यचिन्ताभिप्रायेणोक्तत्वात् नस्तद्धितइत्यस्यापि प्रकृतिभावेन निवृत्तिरिति युक्तमेव अत एव नैकाजितिना सूत्रीयप्रकृत्यैकाजितीति तत्राहि प्रकृत्यैकाजिति किमिष्टेमेयस्सु आहोस्विदविशेषेण किन्त्वतः यद्यविशेषेण खीखीशौवमधुना अत्रापि प्राप्नोति तद्धितसामान्ये प्रकृतिभावविधानादत इनिठनाविति खखशब्दयोरिनौ प्रकृतिभावे सति यस्येति लोपाप्रसङ्गः शौवमित्यत्र शुनो विकारावयवयोः प्राण्यङ्गे ऽते नस्तद्धितइति टिलोपो न प्राप्नोति अधुनेत्यत्र इदमः इशादेशो ऽधुना प्रत्ययश्चेति यदा प्रक्रिया तदा यस्येति लोपाप्रसङ्ग इति पूर्वपक्षे 'एकाक्षरात्क्रतो जातेः संख्यायाञ्च न तौ स्मृतानि'त्यनेन खिखिनोरनभिधानस्मृतिपाद्य शौवमित्यस्य श्वन्शब्दादञि द्वारादित्वादैजागमस्य टिलोपस्यच प्राप्तौ परत्वादैजागमे प्रकृतिभावस्याप्राप्तौ पुनःप्रसङ्गविज्ञानाट्टिलोपस्य प्रवृत्त्या सिद्धिमुक्त्वा ऽधुनेत्यत्र सम्प्रत्ययकस्य स्थाने निपातनाङ्क्रियत इत्युक्त्वा तस्य सिद्धिरुक्ता तत्रान्यथासिद्धिप्रदर्शनेन सूत्रस्य प्रत्याख्यानेप्यारम्भपक्षे प्रकृतिभावस्य नस्तद्धित इति टिलोपबाधकत्वं शौवमित्युदाहरणप्रदर्शनेन ध्वनितमित्यर्थः तस्य नान्तरूपस्य तदुक्तमिति तदेतदभिप्रेत्योक्तमित्यर्थः एकदेशविकृतन्यायेनेति स्वानिवद्भावेनेत्यर्थः अनेन कथंञ्चिदित्युपादानेन एषाम् किबन्तात्किबन्तानाम् भज्येतेति यद्यस्याभिधानं स्यात्तदैतद्वारकतया तदधिकारस्य प्रकृतसूत्रे चरितार्थतया वैयर्थ्याभावेन ज्ञापकता भज्येतेत्यर्थः अभिधानमभ्युपेत्याह किञ्चेति आचक्षाणकर्त्रादिरूपार्थस्य आचक्षाणरूपो यः कर्त्रादिरूपो ऽर्थस्तस्य स्वशब्दार्थत्वेनेति यः शिष्यते स लुप्यमानार्थाभिधायीति न्यायेन श्वन्शब्देनैव श्वकर्मकाख्यानकर्तुः प्रतिपादनादिति भावः एवञ्च दृष्टान्तदार्ष्टान्तिकयोर्वैषम्येनोपसर्जनत्वान्ङीषभाव इत्युपादानं विरुद्धमिति तात्पर्यम् नन्वभिव्यक्तेतिन्यायेनैतादृशस्य श्वन्शब्दस्य गणपठितशब्देन बोधनेपि ततो ङीष् न भविष्यतीत्यत आह अभिव्यक्तेतीति ह्रस्वनद्यापइति सूत्रस्थभाष्यप्रामाण्येन हलन्तेभ्य आचारे किबभावाच्चेदृशानामनभिधानमित्यपि बोध्यम् मूले उत्तरार्थमिति नित्यञ्छन्दसीति सूत्रार्थमित्यर्थः । अत्रेति आहुरिति कथने अतिरिक्तप्रातिपदिकमात्र-

स्येति तत्रहि कानि पुनरस्य योगस्य प्रयोजनानीत्युपक्रम्य बाध्याः बाधिकाश्च संज्ञा दर्शिताः तन्मध्ये या याः परा अनवकाशाश्च तास्ताः पूर्वाः सावकाशाश्च बाधन्ते इत्युक्ता अर्थवत्प्रातिपदिकम् गुणवचनञ्च गुणवचनसंज्ञकञ्च भवत्यर्थवदित्युक्तम् अत्र चकारोपादानेन प्रातिपदिकगुणवचनसंज्ञयोः समावेशो दर्शितः ततः समासकृत्तद्धिताव्ययसर्वनामासर्वलिङ्गाजातिरिति क्रमेण दर्शिताः तत एतच्च वक्तव्यमित्युक्ता सङ्ख्या सङ्ख्यासंज्ञा वक्तव्या द्रुच द्रुसंज्ञका वक्तव्या का पुनर्द्रुसंज्ञा षट्संज्ञा एकद्रव्योपनिवेशिनी संज्ञा एकद्रव्योपनिवेशिनी संज्ञा इत्येतच्च वक्तव्यम् किमर्थमिदमुच्यते यथान्यास एव भूयिष्ठाः संज्ञाः क्रियन्ते सन्तिचैवात्र काश्चिदपूर्वाः संज्ञाः अपिच एतेनानुपूर्व्येण सन्निविष्टानाम्बाधनं यथास्यात् गुणवचनसंज्ञायाश्चैताभिः संज्ञाभिर्बाधनं यथास्यादित्युक्तम् एवङ्क्रमेण बाध्यबाधकभावे पाणिनेरपि सम्मतिमाह अत्रार्थ इति नचैवंसति राजपौरोहित्यादौ समाससंज्ञया गुणवचनसंज्ञाया बाधात्कथं व्यक्तिति वाच्यम् ब्राह्मणादित्वात् ननु बहुशब्दस्य वोतो गुणवचनादितिसूत्रभाष्योक्तगुणलक्षणाक्रान्तत्वाद्गुणवचनत्वमस्त्येवेत्यत आह सत्व इति 'सत्वे निविशतेपैति पृथग्जातिषु दृश्यते आधेयश्चाक्रियाजश्च सो ऽसत्वप्रकृतिर्गुण' इति गुणलक्षणमप्याकडारसूत्रस्थगुणवचनलक्षणैकवाक्यतापन्नमिति संङ्ख्यासंज्ञयास्या गुणवचनसंज्ञाया बाधः स्यादेवेति भावः सत्वे निविशते द्रव्ये निविशते प्रवर्तते अपैति द्रव्यस्य सत्वेपि नाशो भवति एताभ्यां विशेषणाभ्यां संज्ञाया जातेश्च निरासः नहि संज्ञा जातिश्चाश्रयस्य द्रव्यस्य सद्भावेपि रक्तादिशब्दवाच्यवत्कदाचित्प्रवर्त्तते कदाचिन्नेति पृथग्जातिषु दृश्यते जात्याश्रयेषु पृथग्भिन्नो ऽभिन्नश्च शब्दो दृश्यते एतेन सर्वनाम्नो निवृत्तिः यथा शुक्लादिगुणतौल्येपि गोत्वाश्रये शुक्ल इत्येवाश्वेतु कर्क इति व्यवह्रियते नैवं सर्वनामशब्दाः एवञ्जातिरूपं यद्द्रव्यत्वन्तद्वाचकस्य द्रव्यशब्दस्य घटपटादिषु विभिन्नजातीयेषु प्रवृत्तिदर्शनेपि कदाचिदपैतीत्येतन्नास्ति तेन तस्यापि निरासः आधेयः यत्नेन निष्पाद्यः यथा रक्तादिगुणा आश्रयसद्भावेपि यत्नेन निष्पाद्या भवन्ति एतेन सङ्ख्याया निरासः अक्रियाजश्चेत्यनेन क्रदन्तनिरासः क्रियाबोधकधात्वर्थवाच्यार्थप्रवृत्तिनिमित्तकत्वम्पाचकादिशब्दानामिति । ते-

षाक्रियाजत्वं प्रसिद्धमेव सो ऽसत्वप्रकृतिरित्यनेन सत्ववाचकप्रकृतिभिन्न-इत्यर्थकेन समासतद्धितान्तयोर्निरासः यद्वा ऽद्रव्यस्वभाव इति तदर्थः यथा द्रव्यस्यासमवायिकारणन्तु संयोगनिवृत्तेर्नाशस्तथा यो न भवति स इति अन्यत्र भाष्यप्रदीपोद्योते प्रपञ्चितमिति यथासम्भवं विशेषणानां सार्थक्यमुपपाद्य तस्य लक्षणस्यैकदेश्युक्तित्वङ्कथितमित्यर्थः तथाहि आधेयश्चाक्रियाजश्चेत्येव लक्षणं कार्यमाधेय इत्यनेनानित्यत्वस्याक्रियाजश्चेत्यनेन नित्यत्वस्य लाभे सति नित्यानित्यवृत्तिजातिमत्वमित्येव वक्तव्यम्। नचैवन्तादृशसत्ताजातिमत्वङ्क्रियायामपि वर्तत इत्यतिव्याप्तिरिति वाच्यम् द्रव्यावृत्तित्वेनापि जातेर्विशेषणात् एतेनैव सर्वगुणसङ्गृहे सत्वे निविशते इत्यादुक्तिर्विफलेति तद्ग्राह्यमेकदेश्युक्तिरत एव तथापाठोत्तरन्तेषां विशेषणानां व्याख्यानेन सार्थक्यञ्च प्रदर्शितम्भगवता मूले इत्येक इति यथेयम्भर्तृयापक्रतान्वयादीन् लभते तथा तच्छब्दमपीति भाष्याक्षरस्वारस्यविदः अपरेतु तद्ग्राह्यमुपलक्षणमित्याशयेन जन्यजनकभावात्मकोपि पुंयोगो ग्राह्य इति मेनिरे तन्मतन्दर्शयति वस्तुतस्त्वित्यादिना देवकी व्याख्यातेति जनपदशब्दादित्यत्रत्तस्तु नायन्देवकस्य जनपदवाचकत्वाभावात् न्यूनतापरिहारायाह उत्तरार्थमितीति सादृश्यसम्बन्धमूलेति बहुव्रीहिः लक्षणाहि शक्यतावच्छेदकारोपात्मिका तत्र सादृश्यसम्बन्धो यत्र मूलन्तत्रैव लोके गौणीतिव्यवहार इति भावः प्रसादोक्तिम्मूले खण्डयति यत्त्वित्यादिना तत्र अजादिइति लुप्तपञ्चम्यन्तम् दीर्घोच्चारणस्य परोक्तरीत्या सार्थक्यञ्चण्डयति नचेति तत् दीर्घोच्चारणम् अदन्तत्वाभावेनेति नच ब्रह्माणीत्येतत्सिद्धितात्पर्यकदीर्घोच्चारणसामर्थ्यादत इत्यधिकारोपि बाध्यतामिति वाच्यम् प्रतिलक्ष्यं लक्षणभेदेन नान्तप्रकृतिकब्रह्माणीत्यस्य साधकवाक्ये ऽत इत्यधिकारबाधे ऽप्यन्यत्र तद्बाधे मानाभाव इत्याशयात् ननु पदविभागेपि पूर्वमनुगागमस्ततो ऽन्त्यस्याकारादेश इत्येव प्रक्रिया कुतो नेत्यत आह तत्रेत्यादि तत्र अनुकि यद्यागमोत्तरमाकारादेशः स्यात्तदा नकारस्यैवादेशः स्यादिति नकारोच्चारणवैयर्थ्यापत्तिरिति भावः मन्विन्द्रादिशब्दे फलाभावादाकारादेशाभावेन तेष्वेव नकारोच्चारणञ्चरितार्थमित्यत आह श्रुतक्रमेति यथा धिन्विकृण्व्योरचेति सूत्रोदाहरणे श्रुतक्रमानुरोधेनादेशस्य प्रवृत्तिरादौ भवति तथेहाप्याश्रीयत इति

तात्पर्यम्। ननु ह्रस्वाकारादेश एव विधेयस्तेन ब्रह्मन्शब्दान्त्यनकारस्य निवृत्तौ तेन सह पररूपेपि अनुनासिकाकारेण सह सवर्णदीर्घेण रूपस्य सिद्धौ दीर्घाकारस्य विधानवैयर्थ्यमित्यत आह स्पष्टार्थमिति सामर्थ्यात्पररूपबाधकल्पनापेक्षया दीर्घादेशे तच्छङ्कैव नोदेतीति भावः उक्त इति प्रकाशकृतेति शेषः पररूपप्रसङ्गादिति यद्यपि ब्रह्माणीत्यत्राकारादेशेन सिद्धिस्तथापि भवतैवेन्द्रादिशब्देष्वाकारादेशस्याकल्पनेन मूलोक्ता पररूपापत्तिरिन्द्रादिशब्देष्वित्यत आह इन्द्रादिशब्द इति अकारोच्चारणे सन्दिग्धमत आह अनुकीर्तीति यत्तु नुगागमे ऽनो लाक्षणिकत्वेनाल्लोपोन इत्येतन्न स्यादिति मूलञ्चिन्त्यमित्याहुस्तदुक्तिन्निरस्यति अल्लोपोन इत्यत्रेति सूत्रभाष्येति ऊधसो नकारो लिङ्गाधिकार इत्येतद्व्याख्यानावसरे प्रतिपादितमेतत् अकाराभावे अनुक्यकाराभावे अवश्यप्राप्तस्येति पररूपस्यतु नावश्यप्राप्तत्वमिति तद्बाधे मानाभाव इति भावः एवञ्च आगमलिङ्गकाकारोच्चारणसामर्थ्येनाल्लोपाप्रवृत्तिसिद्धौचेत्यर्थः तद्बाधनार्थम् अल्लोपबाधनार्थम् पररूपस्येति स्वाभावे प्राप्तस्यापीत्यादिः तेन अकारोच्चारणेन अल्लोपबाधनेनेति स्वाभावे ऽवश्यप्राप्तिकस्याल्लोपस्य बाधनेन चरितार्थस्याकारस्य सत्वेतु वार्णादाङ्गमिति न्यायेनैकादेशात्पूर्वस्याप्तस्याल्लोपस्य बाधनेनेत्यर्थः नचासमाननिमित्तकत्वात् कथं वार्णपरिभाषाप्रवृत्तिरिति वाच्यम् अङ्गसम्बन्धित्वाङ्ग एव प्रवृत्तेः स्वीकारात् त्वदुक्तेति प्रकाशादुक्तपूर्वोक्तेत्यर्थः ननु यथा ब्रह्माणीत्यस्य सिद्धिः कृता तथैवेन्द्राणीत्यादिसिद्धाविन्द्ररुणेति सूत्रस्य वैयर्थ्यमत आह इन्द्ररुणेतीति इन्द्रीत्यादिव्यावृत्त्यर्थम् पुंयोगे प्राप्तस्येन्द्रीत्यादेर्व्यावृत्त्यर्थम् यत्तु सूत्रारम्भे इन्द्राणीत्यन्तोदात्तमिन्द्रमानयतीति रीत्या तत्साधनेतु ङीबन्तत्वेनानुदात्तान्तत्वमिति स्वरेपि विशेष इति तन्नेत्याशयेनाह उदात्तनिवृत्तिस्वरेणेति वस्त्रेण क्रीता इति विग्रहस्थले ऽलौकिकविग्रहवाक्ये सुबुत्पत्तेः प्राक् समासेपि टाबुत्पत्त्यनन्तरं यदि समासस्तदा वस्त्रक्रीतीत्यस्यासिद्धिरत आह टाबुत्पत्तेरिति एवञ्च गतिकारकोपपदानामिति वचने सुब्ग्रहणं स्त्रीप्रत्ययस्याप्युपलक्षणम्। वचनान्तरानारम्भकृतलाघवन्दर्शयति तत एवेति बहुलग्रहणादेवेत्यर्थः गणपाठे सुखादिपदर्शनाभावादाह सुखादयश्चेति कृच्छ्रादय इत्यत्रादिना आत्रअलीकादयो विवक्षिताः तथा-

च जातिकालसुखादिभ्य इत्यत्र गणपाठाप्रदर्शनेपि सुखादिभ्य इति सूत्रे ये निदर्शितास्ते ऽत्र ग्राह्या इति भावः लिङ्गानाञ्च न सर्वभागित्वेन द्वितीयलक्षणमिति भ्रमवारणायाह सकृदित्यन्तमिति तत्र लक्षणे आख्यातपदन्न तिङन्तपरमित्याह तत्रेति लिङ्गानाञ्चेति चशब्दनिर्ग्राह्येत्यनन्तरम्बोध्यं उपदेशइति कथनमित्यर्थः परममूले जातेरस्त्रीतिसूत्रे द्वितीयलक्षणलक्ष्यप्रदर्शनावसरे वृषलीति प्रदर्शितन्तेन ब्राह्मणत्वन्न जातिरिति भ्रमः स्यादत आह ब्राह्मणत्वमप्येवमिति अपिना क्षत्रियत्ववैश्यत्वयोर्ग्रहणम् वक्ष्यमाणदोषस्य प्रकृते ऽभावायाह गोत्रेति गोत्रार्थके ऽर्णीत्यर्थः एको गोत्रइतिसूत्रस्थभाष्यविरोधेनापत्यप्रत्ययांत इत्येतन्मात्राभिधानं यत्परममूले कृतत्वदयुक्तमिति यत्केनाचिदुक्तत्वदयुक्तमित्याह एतेनेति परममूलस्यापि भाष्यसम्मतरीत्या व्याख्यानेनेत्यर्थः जातिलक्षणे जातेरस्त्रीति जातिलक्षणे भाष्यप्रामाण्येनेति तत्रहि गोत्रादूचनि प्रत्ययो भवति स्त्रियान्तु लुगिति न्यासे औपगवी माणविकेत्यत्राण् यो ऽनुपसर्जनमित्यनुपसर्जनलक्षण ईकारो न प्राप्नोति माभूदेवमणन्तादनुपसर्जनादित्येकदेशिनोक्तं तदभ्युपेत्य इह तर्हि औपगवीभार्यः जातिलक्षणः पुंवत्वस्य प्रतिषेधो न प्राप्नोति भाभूदेवम् वृद्धिनिमित्तस्येत्येवम्भविष्यति एवन्तर्हि ग्लुचुकायनीभार्य इत्यत्र दोष इत्यनेन युवापत्यप्रत्ययान्ते ऽजातित्वादोषाधानङ्कृतम् तत्र औपगवी माणविकेत्यत्र टिड्ढेतिसूत्राज्जातेरिति सूत्रस्य परत्वात्तस्यैव प्रवृत्त्यभिधाने कर्त्तव्ये टिड्ढेत्येतदभिधानमपत्यसामान्यस्य जातिलक्षणे ग्रहणे विरुध्येत एवञ्जातिलक्षणपुंवत्वस्य प्रतिषेधो न प्राप्नोतीत्यपि विरुध्येत नन्वेवमवन्तीत्यत्रानन्तरापत्यप्रत्ययान्ते वृद्धेत्कोसलेत्यनेन ञ्यङि तस्य स्त्रियामवन्तीत्यनेन लुकि इतो मनुष्यजातेरिति ङीषित्यनुपसर्जनादिति सूत्रभाष्ये उक्तत्वद्विरुध्येतेत्यत आह अवन्तीत्यादेरिति गोत्रत्वारोपेणेति यथाश्वत्थाग्नि द्रौणायनित्वारोपस्तद्वत् यूनितु न गोत्रत्वारोपः तत्र युवैव न गोत्रमिति नियमस्य प्रदर्शनात् प्राचीनोक्तम् प्रकाशकृदुक्तम् अदुष्टमिति एको गोत्र इत्यत्र पारिभाषिकस्य ग्रहणेपि प्रकृते पारिभाषिकस्यैव गोत्रत्वे मानाभाव इति तदाशयः किञ्चात्र तैः साधारण्येनोक्तं तत्रतु विशिष्येति तेषाम्पूर्वापरविरोधोपि दोषः खण्डनकृता लिङ्गविशिष्टपरिभाषयेति मूलोक्तमर्थतो व्याख्याय स्व-

ण्डितन्त्वन्न युक्तमित्येतद्बोधयितुं तदुक्तमनूद्य दूषयति यत्त्वित्यादिना वैपरीत्येनान्वयोत्र बोध्यः अयम्भावः यत्र प्रकृतौ प्रातिपदिकत्वस्य लिङ्गबोधकप्रत्ययान्तत्वस्यच सत्ता तत्र तादृशसमुदायस्य तया परिभाषया ग्रहणम्बोध्यते यथा पक्त्री दण्डिनीत्यादौ सद्भाव उभयोरस्तीति तस्य समुदायस्य प्रातिपदिकग्रहणेन ग्रहणम्भवतीति नात्रेति कुरूरित्यत्र तथा नास्तीत्यर्थः अत्रहि पूर्वान्तवद्भावं विना प्रातिपदिकत्वस्य परादिवद्भावं विना लिङ्गबोधकप्रत्ययान्तत्वस्यच सत्ता नास्तीत्युभयोरावश्यकतया उभयत आश्रयणे नान्तादिवदिति निषेधः प्रवर्तत इति यत्र न पूर्वान्तवत्वपरादिवत्वयोरुपयोगस्तस्य ग्रहणम्परिभाषया भवतीति भवदुक्तमिन्द्राणीत्यादौ नास्ति अत्र स्त्रीप्रत्ययान्तसमुदाये प्रातिपदिकत्वन्नास्ति यत्रच प्रकृतिभागे प्रातिपदिकत्वमस्ति तत्र तादृशप्रत्ययान्तत्वन्नास्ति अन्तशब्दस्य चरमावयववाचकत्वात् इन्द्राणीत्येतदेकदेशाभावोदाहरणोपलक्षणन्तेन दण्डिनीत्यादेरपि भवदुक्तरीत्या ग्रहणन्न स्यादिति प्रातिपदिकग्रहण इति परिभाषा निष्फला स्यादिति भावः तस्मात् परिभाषया यस्य समुदायस्य ग्रहणम्भवता बोधनीयन्तस्यैव ग्रहणाभावापत्तिसद्भावात् उपयोग इति परिभाषायाः प्रवृत्तिकोटाविव्यादिः नन्वन्तशब्दो न सर्वत्र चरमावयवस्यैव बोधकोस्ति अतोऽन्तस्येत्यादौ व्यभिचारात् किन्तु समीपवाच्यपि तथाच परिभाषावाक्यं यद्विशिष्टपदन्तस्यान्तपरत्वेपि तदर्थः समीपे इत्येव एवञ्च गृह्यते येन तद्ग्रहणम्प्रातिपदिकस्य ग्रहणम्प्रातिपदिकग्रहणमिति समासाश्रयणेन प्रातिपदिकवाचकः शब्दो बोध्यते तस्मिन् लिङ्गबोधकप्रत्ययः समीपो यस्य तद्वत्तामात्रम्परिभाषया बोध्यत इति नेन्द्राणीत्याद्यसङ्ग्रह इत्यता आह नापीति इदम्भवदुक्तान्तादृशपाठसत्वे वक्तुं शक्यं वस्तुतो यत्परिभाषायाः क्त्वान्तदाह तयेति दिगिति दिगर्थस्तु प्रातिपदिकग्रहण इति सप्तमी कर्त्रर्थे व्यत्ययेन प्रातिपदिकपदञ्च प्रातिपदिकत्वताद्व्याप्यान्यतरधर्मविशिष्टपरम् तथाच प्रातिपदिकत्वतद्व्याप्यान्यतरधर्मविशिष्टस्य ग्रहणं यत्र शास्त्रे तेन लिङ्गबोधकप्रत्ययविशिष्टस्य ग्रहणम्बोधनभवतीत्येव परिभाषार्थ इति न कुरूरित्यत्रादिवत्त्वोपयोग इति कुरूरित्यस्य साधुत्वन्न लिङ्गविशिष्टपरिभाषया भवतीति ब्रूमः किन्त्वन्तादिवच्चेति सूत्रेणेति वदामोऽत आदिवद्भावादिति पदे

यदर्थकस्तदाह मूले यत्तु व्याचख्युरित्यादिना तदपि तादृशव्याख्यानमपि क्लिष्टम् आदिशब्दस्याद्यावयवत्वावच्छिन्नबोधकत्वस्याद्यंतौ टकितावित्यत्र क्लृप्तस्य त्यागेन क्लिष्टमित्यर्थः स्वपरग्रन्थेति स्वस्य व्याख्यातुर्यः परग्रन्थस्तद्विरोध इत्यर्थः काण्डे कुड्ये इत्यत्र यथा प्रसज्यप्रतिषेधाश्रयेण भवता सुबुत्पत्त्यापत्तिरूपो दोषो वार्यते तथा कुरूरित्यादावपि सुबभावापत्तिः स्यादित्याह उक्तरीत्येति प्रक्रियाव्याख्यानपरप्रकाशग्रन्थे यथा न स्वपरग्रन्थविरोधात्मको दोष आपतति तथा शङ्कते नन्विति ज्ञापनादित्यन्तेन मूलोक्तप्रकारमुद्भाव्य सिद्धान्तयति उत्सर्गेत्यादि असार्वत्रिकत्वादिति गमकसद्भाव एव तत्प्रवृत्तेः स्वीकारादिति भावः सत्वप्रधान एवेति ह्रस्वो नपुंसके यत्तस्येति न्यासेन सिद्धे प्रातिपदिकग्रहणं सत्वप्रधानप्रातिपदिकलाभार्थमिति भावः मूले आवश्यकत्वाच्चेति तथाच लिङ्गविशिष्टपरिभाषासञ्चारस्यावश्यकतया तयैव कुरूरित्यस्यापि सिद्धावादिवद्भावादिति कथनस्य नोपयोग इति भावः परोक्तां श्वश्रूरित्येतत्साधकरीतिमनूद्य दूषयति यत्त्विति भाष्ये तादृशवचनानुपलम्भादाह ङ्यादीति मूले अंतोपीति अतः श्वश्रुरः श्वश्रूवतिनिर्देशात् अपिना ऊङ्सन्निहितत्वस्य समुच्चायकः ङ्यापसूत्रस्थभाष्यस्वारस्यात्तु श्वशुरशब्दादूङि श्वश्रूशब्दस्य सिद्धिरिति न किन्त्वव्युत्पन्नोयमिति तत्रहि ङ्याब्ग्रहणङ्किमर्थम् न प्रातिपदिकादित्येव सिद्धम् न सिध्यति अप्रत्यय इति प्रातिपदिकसंज्ञायाः प्रतिषेधः प्राप्नोति यद्येष ङ्याब्ग्रहणे हेतुः रित्यूङ्ग्रहणमपि कर्तव्यम् तावपिहि प्रत्ययौ तिग्रहणे तावद्वार्तम् तद्धितः प्रातिपदिकमिति प्रातिपदिकसंज्ञा भविष्यति ऊङ्ग्रहणेचापि वार्तम् उवर्णान्नादूङ् विधीयते तत्रैकादेशः एकादेशे कृते पूर्वस्यान्तवद्भावात्प्रातिपदिकसंज्ञा भविष्यति एवमूङ्ग्रहणस्याकर्तव्यतोक्ता यदि मूलोक्तरीत्या ऽस्य सिद्धिस्तदा तत्रोङैकादेशाभावेनैतदर्थमूङ्ग्रहणस्यावश्यकत्वेन पूर्वान्तवद्भावेन तस्यानावश्यकत्वप्रतिपादनं विरुध्येतेति । ननु वस्तुत उपमानत्वादुपमानाभावादित्यसङ्गतम् किञ्चोरूत्तरपदेतिसूत्रे उपमानेति शब्दो नोपात्त इत्युपमानाभावादित्यसङ्गतमत आह उपमा उपमानमिति उपमानशब्दे भावे ल्युडिति ध्वननायोपमा उपमानमित्युक्तम् अत एवाह सादृश्यमिति ननु करभोरूरित्यत्रोदाहरणे पीवरशब्दस्योपमावाचकस्याभावादुपमायाः कथमतीतिः तस्येवादिशब्द-

सत्व एव प्रतीतेरत आह तस्येति सादृश्यस्येत्यर्थः एवञ्च करभोरूरित्यत्र सादृश्यान्तर्भावेन वृत्तिस्वीकारादुपमायाः प्रतीतिरस्ति करभोपमोरूरित्यत्रतु सादृश्यस्य समासवाच्यत्वन्नास्तीति भावः मूलस्थोपमानशब्दः करणल्युडन्त एवास्तित्वाशयेनाह यद्वेति प्रतीत्यभावादिति पूर्वपदार्थस्येत्यादिः एवञ्चोपमीयते ऽनया सा उपमा उपमानत्वम् सादृश्यमित्यर्थः तद्बोधकम् उरूत्तरपदम्प्रातिपदिकमत्र नास्ति यादृशस्थले समासस्य सादृश्यान्तर्भावेण शक्तिस्तत्रेष्यते सूत्रस्थ प्रवृत्तिः उर्वन्तादित्येव वक्तव्ये उत्तरपदग्रहणेन पूर्वपदस्याक्षेपाद्यत्र पूर्वपदस्योपमावाचकत्वन्तत्रास्य सूत्रस्य प्रवृत्तेरिति भावः यत्तु खण्डनकृदाह शफौ खुरौ तावित्र संश्लिष्टत्वादुपचारादिति चिन्त्यम् उपचारेपि पूर्वपदस्योपमानवाचित्वाभ्यघातात्पूर्वसूत्रेणैव सिद्धेह शफग्रहणवैयर्थ्यमतः संहितवाचकः शफशब्द इति तन्नेत्याशयेनाह शफोरूरित्यत्रेति एवञ्च शक्यतावच्छेदकस्यारोपोत्र नतु सादृश्यान्तर्भावेण वृत्तिरिति न पूर्वसूत्रस्य प्राप्तिः एवञ्च पूर्वत्रारोपस्य सिद्धौच करोरुभिरिति व्याख्यातमिति विचकरे च करेण करोरुभिरितिमाघस्यपद्य इति आदिः तस्य संज्ञापूर्वकइतिवचनस्य न नियामकतेति यद्धि वचनभाष्यकारसम्मतत्तस्यैव साधुतानियामकत्वमिति भावः अन्यो ऽकार इति व्याख्याने साधकमाह। अत एवेति सूरसेनीत्यत्रातिव्याप्तिवारकतया तादृशव्याख्यानस्यावश्यकत्वादेव तद्धि यौधेयादिग्रहणंहि अणञाविति इति सूत्रेण विहितेत्यर्थः तत्फलम् निषेधस्य फलम् ढगन्तत्वादिति युधाशुक्राशब्दाभ्यां ढ्रञ्चइतिसूत्रविहितढकः सत्वात् यदि त्रञो लुक् स्यात्तदा वर्णप्राधान्ये प्रत्ययलक्षणाभावेन ङीप्न स्यादिति भावः। नृनरयोरित्यत्र नरशब्दोपादानाभावेपि नारीतिरूपन्नृशब्दोपादानमात्रेण सिद्धम् नरीतिरूपव्यावृत्तिस्तदुपादानस्य फलमित्यपि न पुंयोगे तस्यैव दुर्वारत्वादित्याक्षिप्य समाधत्ते यद्यपीत्यादिना पुंयोगे नरीतिप्रयोगोपि दृश्यते किन्नरीणान्नरीणाम् इति जातिमात्रेति अत्र मात्रपदेन पुंयोगस्य व्यवच्छेदः नृशब्दावयवऋकारस्य यथा ऽलोन्त्यपरिभाषया वृद्धिर्भवति तथा नरशब्देपि प्राप्नोतीत्याक्षेपो मूले नन्विति तत्र स्थानेन्तरतम इति रन्तम्यन्तपाठाभिप्रायेण समाधानवादिमतमनुवदति यत्त्वत्राहुरित्यादिना अन्त्याकारस्य वृद्धौ यदि यस्येतिचेत्यनेन तस्य लोपस्तर्हि वृद्धिविधानं

र्थमिति तत्सामर्थ्याल्लोपस्य बाधोस्त्वित्याक्षिपति नन्विति यद्यलो-न्त्यपरिभाषैकवाक्यतया ऽन्त्यस्य वृद्धौ तत्सामर्थ्याल्लोपस्य बाधस्तदा साक्षाद्विधिशास्त्रस्य बाधस्तदपेक्षया लोपस्यादौ प्रवृत्तावपि यो ऽन्त्र-तमो ऽवशिष्टावयवस्तस्य स्थाने वृद्धिर्भविष्यतीत्याशयेनाह गुणे त्वन्या-य्येति गुणे गुणीभूतशास्त्रे परिभाषारूपे ऽन्याय्यस्याप्रवर्त्तनस्य कल्पना उचितेति शेषः तथाप्यादौ वृद्धेरेव प्रवृत्तिः स्यात्तस्याश्च सामर्थ्यान्नि-वृत्तिर्न स्यादिति भावेन समाधत्ते तन्नेति अन्तरङ्गत्वे सन्नियोगशिष्टत्व-मत्र हेतुः एवञ्चादौ वृद्धेरन्तरङ्गा या अन्तरतमपरिभाषाऽलोन्त्यपरिभाषा-भ्यामेकवाक्यतया प्रवृत्तिस्ततो लोपस्य यदि प्रवृत्तिः स्यात्तदा वृद्धि-विधानवैय्यर्थ्यमिति सामर्थ्यात्परस्यापि लोपस्य बाधेन वृद्धेः श्रवणं स्या-न्नात्र केवलान्तरङ्गपरिभाषाया एव प्रवृत्तिः किन्तूक्तयोरपीति न्यायप्रा-प्त एव लोपस्य बाधः सामर्थ्यादिति तात्पर्यम् कथञ्चिदित्युक्तेस्तात्पर्य-माह सन्नियोगशिष्टेति तथाच वस्तुतः सन्नियोगशिष्टत्वेपि यदि तस्या-नङ्गीकारस्तदा क्लेशः स्पष्ट एव तथाच परलोपोत्तरम्पूर्वान्तरतमपरिभाषा-पेक्षया परत्वेन बलवती या ऽलोन्त्यपरिभाषा सैव वृद्धे रेफस्थानिक-त्वे नियामिका स्यादित्यनिष्टापत्तिः नन्वत्र गुणेत्वन्याय्येति पूर्वोक्तन्या-येनालोन्त्यपरिभाषाया अप्रवृत्तिः कल्प्यते ऽन्तरतमपरिभाषातु प्रवर्तत इ-ति तदेकवाक्यतया नकाराकारस्य वृद्धिः स्यादितीष्टसिद्धिरत आह मू-ले अपिचेति नतु स्थानिनमिति कुमार्यत्रेत्यादौ दीर्घस्य स्थाने यणादे-शः स्थानेन्तरतमे इति सप्तम्यन्तपाठे न स्यात् तादृशपाठे स्थानिनः स-ङ्कोचादिति स पाठो नोचितः किन्तु स्थाने ऽन्तरतम इति प्रथमान्त-पाठ एव तथाचान्तरतमादेशस्य निवृत्तिरित्यादेशसङ्कोच एवेति भावः एतावता परोक्तरीत्या ऽलोन्त्यपरिभाषाया बाधमभ्युपेत्यान्तरतमपरिभा-षयापि नेष्टसिद्धिरित्यभिहितम् वस्तुतस्तु परोक्ता गुणेत्वनाय्येति री-तिरेव प्रकृते ऽयुक्ता परिभाषयोः समत्वात्किन्तु परत्वमलोन्त्यपरिभा-षाया इति सैव प्रवर्त्तेतेत्याशयेनाह किञ्चेति ननु परिभाषयोर्गुणगुणि-भावोत्र न केनाप्युक्त इति कथमेवं वदसीत्यत आह तद्व्याख्यात्रिति प्रकाशव्याख्यातृग्रन्थानुसारेणेत्यर्थः यद्वा तच्छब्दो ऽत्र बुद्धिस्थायाः प्र-क्रियाया बोधकः एवञ्च प्रक्रियाया व्याख्यातृणां ये ग्रन्थाः प्रकाश-

प्रदीपादयस्तदनुसारेणेत्यर्थः परोक्तमकारं सन्दूष्य युक्तं समाधानमाह अ-त्रेदमित्यादिना लुप्तेति यस्येतेचेतिसूत्रेण लुप्तेत्यर्थः एवं व्याख्याने य-स्मात्प्रत्ययस्य विधानन्तस्य स्थानित्वेन निर्देशो न जात इति वानरशब्दे ऽतिप्रसङ्ग इत्यरुचेराह यद्वेति मूलोक्ताभ्यामकाराभ्यां वृद्धिरूपादेशस्य स्था-निनो निश्चयेपि प्रत्ययविधानावधेरलाभ इत्यत आह नृनरयोरित्यावर्तत इति अत एव द्वितीयपक्षाश्रयणेनावृत्त्याचार्थविशेषस्य स्वीकारादेव तदे-व स्फुटयति यत इति ततः वानरशब्दावयवनरशब्दात् नन्वात्मज इति कोशबलात्सर्वेषां दुहितृप्रतिपादकतया स्त्रीत्वविवक्षायामप्यकारान्तपुत्रशब्द-स्य प्रयोगापत्तेरत आह तत्रेति पुत्रशब्दइत्यर्थः पुत्रशब्दनिष्ठईकारसम-भिव्याहारे ईकाराव्यवहितपूर्वोच्चरितत्वम् पुत्रशब्देन स्त्रीत्वबोधे तत्रान्नियामक-मित्यर्थः पुत्रशब्देनेति स्त्रीत्वबोध इत्यस्यादिः अतएव केवलाकारान्तस्य पुंस्त्वविशिष्टप्रतिपादकत्वादेव ननु भवदुक्तार्थस्वीकारे पुमांसम्पुत्रमाधेहीति श्रुतौ पुमांसमिति विशेषणोपादानमनर्थकमापद्येतेत्यत आह पुमांस-मित्यादि अतिशयितपुंस्त्वम् पराक्रमातिशयः एवञ्च स्त्रियामपि ह्रस्वि-रकारान्तपुत्रशब्दस्यैव परंतु स्त्रीत्वे बोधनीये स्त्रीप्रत्ययसमभिव्याहारो द्यो-तक इति सिद्धम् अत एवाह मूले यत्त्वक्ष्येत्यादिना इदन्तु चिन्त्यमिति इदं वक्ष्यमाणम् खण्डनकारोक्तञ्चिन्ताबीजमाह चिन्ताबीजन्त्विति पुंश-ब्देभ्यः पुंवाचकशब्देभ्यः ङीनन्ते तत्पुरुषे ङीनन्तोत्तरपदकतत्पुरुषे ङा-ते सूतपुत्रीत्यादाविति शेषः ननु पुत्रीशब्दः पुत्रशब्दाभिन्नएवेत्यत आह लि-ङ्गेति उदात्तत्वमिति भवतीति शेषः उदात्तनिवृत्तिस्वरेण टित्वान्ङीपि ङा-ते ऽनुदात्तस्यच यत्रोदात्तलोप इत्यनेनेत्यादिः यत्तु कश्चित् पुत्रडादेश-पक्षे सूतपुत्र्यादिनी त्वमसि पापे इति प्रयोगे सानुबन्धकत्वादपुत्रस्य ना-दिन्याक्रोश इति सूत्रे न ग्रहणमित्येव चिन्ताबीजमिति तदपेशलमि-त्याह नादिन्येति आदिनीशब्दपरत्वासम्भवादिति ङीपात्र व्यवधानेन ये-न नाव्यवधानन्यायेन रेफाकारमात्रव्यवधान एव तस्य प्रवृत्तेरिति भावः ननु पुत्रडादेशपक्षे सूतपुत्रीत्यत्र स्थानिवद्भावेन दुहितृशब्दत्वान्नषडिति निषेधः स्यादत आह पुत्रट इति ऋन्नेभ्य इतीति येन नाप्राप्तिन्याये-नेत्यादिः ननु टापोपि निषेधस्य सिध्यर्थन्तत्र षट्संज्ञकेभ्यः स्वस्रादि-भ्यश्च यत्प्राप्तामिति प्राग्व्याख्यातमिति टिड्ढेत्यस्यापि निषेधः स्यादेवत्यत

आह द्वित्वसामर्थ्यादिति कारेसत्येतिसूत्रस्य तत्पुरुषे एव प्रवृत्तौ साधकमाह तच्चेति कारेसत्येतिसूत्रञ्चेत्यर्थः पूर्वोत्तरेति वाचंयमेति श्येनतिलेतिसूत्रयोरित्यर्थः एतेनोग्रजातीया कन्येत्यस्य सम्भवादन्यासम्भवादित्यसङ्गतमिति तत्परास्तम् साहचर्यस्य बलवत्त्वप्रयोजकतायां दर्शनात् एतेन उक्तरीत्या सूतोग्रेत्यस्य वार्तिकस्य तत्पुरुषसमासे एव प्रवृत्तेरेव बहुव्रीहौ ङीबर्थमित्यर्थः यद्येतद्वार्तिकन्न स्यात्तदा सूता पुत्री यस्येत्येव विग्रहे समासो वाच्यस्तथासति नदृचतश्चेति नित्यकबापत्तिः स्यादिति तात्पर्यम् । ङीबर्थमित्यप्यसङ्गतमित्याह उपसर्जनत्वेपीति मूले ङित्करणसामर्थ्यादिति यङो ङित्करणसामर्थ्यादित्यर्थः एतद्भावमाह यङश्चेत्यत्रेति प्रकारान्तरेणाप्युक्तार्थानामिति न्यायस्यात्रापवृत्तिमाह द्योतकत्वादिति स्त्रीप्रत्ययस्य द्योतकत्वादित्यर्थः द्योतकविषये द्वौ ब्राह्मणावित्यादौ पञ्चकन्त्यातिपदिकार्थपक्षे द्वित्वसंख्यायाः प्रकृत्या ऽभिधानेपि तस्या समुच्चयस्य दर्शनादिति भावः तेन अनुक्तानामिति व्याख्यानेन ग्रामटिकेति अल्पो ग्रामो ग्रामटिका ग्रामशब्दाट्टिकन्प्रत्ययस्य प्रयोगः इदम् बहुवचनोपादानेनानुक्तानां सङ्ग्रह इत्येतत् ननु टापः प्रागधिकारकरणे ङीबाद्यवयवङकारस्यातद्धितइति निषेधादित्संज्ञा न स्यादत आह ङीबादीष्विति ननु चुटू इति सूत्रे ङकारोच्चारणे गौरवमत आह टीबादयइति ङकारस्य स्थाने टकारस्यैवोच्चारणमस्त्वित्यभिप्रायः टाबादीनान्तद्धितसंज्ञायान्तदन्तप्रातिपदिकत्वापत्त्या फिषोन्त उदात्त इत्यन्तोदात्तत्वापत्तिरित्याशङ्क्य वारयति तद्धितान्तेति नन्वेवंसति सर्वनामधातुजमाह निरुक्ते व्याकरणे शकटस्य तोकमिति शाकटायनमते सर्वत्रैव प्रकृतिप्रत्ययविभागसम्भवात्तादृशसमुदायस्याप्रसिद्धिरत आह पकारेति पकारषकाररूपौ यौ भिन्नावनुबन्धौ तत्करणसामर्थ्यादित्यर्थः यदि सर्वत्र फिट्स्वरः स्यात्तदान्तोदात्तत्वमेव स्यादिति तयोर्वैयर्थ्ये स्यादेव अत एव तादृशेष्वेव फिट्स्वरस्य प्रवृत्तिस्वीकारादेव सिद्धान्ते यूनस्तिरिति सूत्रात्प्रागेव पाठरूपसिद्धान्ते टापः प्राक् तद्धिताधिकारकरणे लाघवान्तरमप्याह डाप्प्रत्यय इति यस्येतिचेति सूत्रे ईकारग्रहणाभावे औङः श्यामिति वार्तिकमपि न कार्यमित्याह औङ इति इद्ग्रहणमिति यस्येतिचेति सूत्रे ईद्ग्रहणमित्यर्थः ईद्ग्रहणेन ईकारादौ स्त्रीप्रत्यये एव साजात्यात्तद्धितकार्याभावकल्पने कुरुरित्यादौ तद्धित-

कार्यापचिरतः स्त्रीप्रत्ययत्वेन साजात्यमादाय ज्ञाप्यं वचनं स्वीकार्यम् तथाचाग्निरित्याह कुरूरित्यादीति अत एव टापः प्राक् तदधिकारादेव दिगीति दिगर्थस्तु ईद्ग्रहणेनाङ्गूपस्त्रीप्रत्यये तद्धितकार्याभावो ज्ञाप्यतात्पर्यतैवासुरायणीत्यादिसिद्धिर्यद्यपि भविष्यति तथापि ज्ञापकसिद्धवचनान्तरकल्पनापेक्षया यथाश्रुतमेव लघ्विति योगार्थमात्रं वृद्धायामतिप्रसक्तमत आह आत्मानमिति मूले उभयथेति शत्रन्तस्य कतिप्रत्ययान्तस्य च सत्त्वेपि यौवनमिति भस्याढइति पुंवद्भावः अनयोरयं विशेषः शत्रन्तादुदितश्चेति ङीप् कतिप्रत्ययान्तात्तु कृदिकारादिति ङीष् आद्ये शतुरनुम इत्यस्य प्रवृत्त्या नद्या उदात्तत्वमिति वृत्युक्तन्दूषयति भिक्षादीति अत एव पूर्वोक्तरीत्या युवतीत्याकारकस्य शब्दद्वयस्य स्वीकारादेव ननु युनस्तिरितिसूत्रात्प्राक् तद्धिता इत्यस्य पाठो न कार्यः लिङ्गविशिष्टपरिभाषयैव सिद्धेरत आह युवतिशब्दइति दिगीति दिगर्थस्तु ऋन्नेभ्यइति ङीपि यूनीशब्दोपि साधुरिति कश्चित् तन्न येननाप्राप्तिन्यायेन यूनस्तिरित्यस्य ऋन्नेभ्यइति सूत्रापवादत्वात् कृतेपि ङीपि लिङ्गविशिष्टपरिभाषया ऽस्य प्राप्तेरिति ॥ इति स्त्रीप्रत्ययविवरणम् ॥ श्रीगणेशाय नमः अथ स्वौजसमौडित्यादिना विहितानामत्ययानामर्थविशेषे व्यवस्थान्दर्शयति प्रातिपदिकार्थेति मूले मात्रशब्दस्येति अत्र शब्दशब्दोपादानेन नायम्मात्रच्प्रत्यय इति स्पष्टयति अजपदविग्रह इति मयूरव्यंसकादिसमासस्य विभाषाधिकारीयत्वेपि मात्रशब्दस्य शब्दशक्तिस्वभावाद्वृत्तिविषयत्वमेवेत्येवमुक्तम् अत एव कार्त्स्न्यैकमात्रशब्देन घटमात्रं रूपवदित्यादौ सर्वे घटा इति वृद्धानां विग्रहः इदमपि सूत्रङ्कियायोगे एव प्रवर्तते तिङ्समानाधिकरणे प्रथमेतिवार्तिकोक्तेः ननु न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर इति वचनं वृत्तिद्वयाकल्पनमूलकमस्ति यथा नीलघटम्भूतलमित्येव प्रयोगो ननु नीलघटवदिति मत्वर्थबहुव्रीहिणैव विवक्षितार्थलाभात् बहुव्रीहिश्चेदित्युपादानात्कृष्णसर्पवानित्यादि भवत्येव अत्र कृष्णसर्पशब्दस्य कर्मधारयसंज्ञकस्य जातिविशेषावच्छिन्ने रूढिर्बहुव्रीहिस्तु न तादृशजातिविशेषावच्छिन्नप्रतिपादकः एवञ्च तद्वचनविरोधान्नीलरूपवदित्यनुपपन्नमत आह नीलरूपवदितीति भाष्यप्रयोगेणेति तत्रहि असुप इति किम्बहुव्रीहिः न विद्यते सुप्सुबन्तं यस्मिन्नङ्गे तदसुपिति आ-

होस्विन्नसुप् असुविति तत्पुरुष इति वितर्क्य यदि विज्ञायते असुव्वतो ऽङ्गस्येति बहुव्रीहिकेत्यत्रेत्वन्न प्राप्नोतीत्युक्तम् आपि परे यदङ्गमविद्यमानसुबन्तकन्तदवयवाकारस्य प्रत्ययस्यकात्पूर्वस्येत्वमिति सूत्रार्थस्य तदानीनिष्पत्तेः तत्र लाघवानादरेण स्पष्टप्रतिपत्त्यर्थंस्वहुव्रीहेर्मतुपि असुव्वतइति दर्शितमिति लाघवानादरो भाष्यसम्मत एवेति भावः नामार्थयोरित्यस्य नान्न अर्थाविति समासं कृत्वा ऽभेदः संसर्गः प्रतिपाद्यत इति वाच्यन्तदनुपपन्नम् पुष्पवन्तपदार्थयोः सूर्याचन्द्रमसोरभेदाप्रतीतेरत आह नामार्थश्चेत्यादि नच नान्नोरर्थौ नामार्थौ तयोरिति षष्ठीतत्पुरुषोस्त्विति वाच्यम् वृत्तावभेदैकत्वसङ्ख्याया यत्नं विना भानस्यान्यत्र सिद्धान्तितत्वेन द्विवचनान्तेन समासासम्भवात्तत्सम्बन्धस्य सम्बन्धिनो यत्र भेदस्तत्रैव विशिष्टबुद्ध्युपपत्तये ऽङ्गीकार इति सिद्धान्तात्कथमभेदः संसर्ग इत्याशङ्कते यद्यप्यभेद इति औपाधिकभेदेनेति दिवसावच्छिन्नो राहुशब्दार्थो घट्यावच्छिन्नः शिरःशब्दार्थ इति कल्पनया ऽवयवावयविभावरूपसम्बन्धोपपादनेनेत्यर्थः किञ्चाभेदो यदि संसर्गस्तदा नीलो घट इत्यत्र नीलशब्दान्नियमेन षष्ठी स्यादिति तादृशवाक्योच्छेदापत्तिः नचैवंसति समानाधिकरणाधिकारे समासविधानानुपपत्तिरिति वाच्यम् विशेषणवाचकप्रातिपदिकात्षष्ठीसत्वेपि विरुद्धविभक्त्यर्थानवरुद्धत्वे सत्येकविशेष्यकप्रतीतिजनकत्वरूपसामानाधिकरण्योपपादनसम्भवेन तस्य सार्थक्यात् अत एव तक्षकस्य सर्पस्येत्यादौ समानाधिकरणेन षष्ठीसमासनिषेधस्याप्युपपत्तिः किञ्चाभेदस्य संसर्गत्वे कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानभावप्रत्ययो नेतिसिद्धान्ताद्राजपौरुषमित्यादौ भावप्रत्ययेन सम्बन्धस्येव नीलोत्पलत्वमित्यादावपि सम्बन्धाभिधानापत्तिः नचाभेदसंसर्गः प्रथमावाच्य एवेति भ्रमितव्यम् धान्येन धनवान्नीलङ्घटस्पर्श्येत्यादावपि तदभिधानदर्शनात् सम्बन्धानवच्छिन्नेति यत्राभेदः संसर्ग इति व्यवहारस्तत्र विशेषणतायाः सम्बन्धानवच्छिन्नायाः सम्बन्धघटकतया भानेन सम्बन्धानवच्छिन्नविशेषणविशेष्यभावे एव पदार्थयोः संसर्गत्वेन व्यवह्रियत इति भावः अयमपि विशेषणतावच्छेदकविशेष्यतावच्छेदकधर्मभेदमूलकारोपित आश्रययोर्भेदो यत्र तत्रैव संसर्गतया भासते तेन घटोघटइत्यादि न प्रयोगः । तादृशसम्बन्धस्य भाने दृष्टान्तमाह नीलमुत्पलमिति प्राप्तोदको

ग्राम इत्यादौ तादृशनियमे व्यभिचाराशङ्कानिरस्यति मूले नचेति षष्ठ्यर्थे बहुव्रीहिश्चित्रगुरित्यादौ तज्जन्यबोधश्चित्राभिन्न गोसम्बन्धीत्याद्याकारकस्तत्र पूर्वपदार्थस्योत्तरपदार्थे तादृशसम्बन्धस्य विशेषणतानियामकत्वदर्शनादषष्ठ्यर्थे इति अत्र उक्तनियमे अव्यभिचारादिति वीरूपस्य पूर्वपदार्थस्योत्तरपदार्थे तादृशसम्बन्धेन विशेषणतया भानस्य दर्शनादिति भावः प्राप्तोदकादाविति प्राप्तपुदकं यमिति वाक्याद्यत्कर्मकप्राप्तिकर्तृउदकमिति बोधः समासात्तूदककर्तृकप्राप्तिकर्मेतिरीत्या बोधस्तलोदकस्य प्राप्तौ कर्तृतयान्वयदर्शनेन व्यभिचार इत्यर्थः व्यपेक्षारूपस्य सामर्थ्यस्य सत्वं समास इति मतमाश्रित्य कृतामाशङ्कानिराचष्टे नचेति क्लृप्तत्यागस्येति वक्ष्यमाणेन भावप्रधानमाख्यातमिति वचनेन प्रत्ययार्थकर्तुः प्रकृत्यर्थक्रियायां विशेषणतया भावस्यानुभवसिद्धत्वादिति यद्यपि कृदन्ततद्धितान्तजन्यबोधे प्रकृत्यर्थनिष्ठप्रकारतानिरूपिता प्रत्ययार्थनिष्ठा विशेष्यता तथापि तिङन्तजन्यबोधे प्रत्ययार्थो विशेषणतयैव भासते उक्तवचनबलात् तद्वृत्तिजन्यबोधेपि विशेषणविशेष्यभावस्य वैपरीत्यं कल्प्यते विशेषणविशेष्यभावस्य वैपरीत्यञ्च भवतामपि क्लृप्तमेव चित्रगुरित्यादौ विग्रहवाक्यजन्यबोधस्य गोपदार्थे मुख्यविशेष्यकस्य समासजन्यस्यतु गोविशेषणकान्यपदार्थमुख्यविशेष्यकस्य दर्शनात् प्रकारीभूतकेति गत्यर्थाकर्मकेत्यनेन कर्तरि क्तप्रत्ययस्य विधानात् उक्तदृष्टान्तेन प्रकृत्यर्थस्य विशेष्यतया भानस्वीकारे प्रत्ययार्थस्य तत्र विशेषणत्वन्तस्मिन्कर्तरि उदकशब्दार्थो विशेषणमिति न व्यभिचार इति भावः नामार्थयोरिति व्युत्पत्तौ नामपदं सुबन्तपरमेवेति स्फुटीभविष्यति एवञ्च तज्जन्यबोधविशेष्यता ऽधुना कर्तृविशिष्टप्राप्तिक्रियायां सम्पन्नेति तादृश्याक्रियायामेवान्वयो वाच्यः तच्च भवता परित्यक्त इति व्यभिचारो दुरुद्धरः विशेष्यस्यैव ग्रहणे साधिकाच गौर्नित्या परशुपशुरिति वाक्यस्य प्रामाण्यापत्तिवारणाय स्वीकृतायांपदार्थः पदार्थैनान्वेति नतु पदार्थैकदेशेनेति व्युत्पत्तिः सैवेत्याशयेन दूषयति नामजन्येत्यादिना । इत्येतत्सिद्धइति एतेनेयं व्युत्पत्तिर्यद्यपि लौकिकी तथापि सहकारित्वेनाश्रीयते नामजन्यप्रतीतिविशेष्ययोर्भेदसम्बन्धेनापि राज्ञः पुरुषइत्यादावन्वयो भवति यद्यपि तथापि यत्र सामानाधिकरण्यस्तत्राभेदेनैव भेदसम्बन्धेनाप्येतादृशस्थले तत्स्वीकारे रा-

जा पुरुष इति वाक्यादपि स्वत्वसम्बन्धावच्छिन्नराजत्वावच्छिन्नप्रकारताकबोधापत्तिरिति भावः परोक्तरीत्या क्तप्रत्ययार्थकर्तुर्विशेषणत्वमभ्युपगम्याप्युक्तरीत्यान्वयबोधानुपपत्तिर्दर्शिता वस्तुतः प्रत्ययार्थस्य विशेषणत्वे एव न किञ्चिदत्र साधकमित्याशयेनाह पचतीत्यादौ तिङामिति अयमाशयः श्रूयमाणानामनेकतिबादीनाङ्क्त्रादौ शक्तिकल्पनापेक्षायामप्रत्ययानुपूर्व्या नानात्वाच्छक्तावच्छेदकता नानाधर्मे कल्पनीयेति गौरवम्तत्प्रकृतिभूतैकानुपूर्व्यवच्छिन्नधातावेव शक्तिः पञ्चसु कल्प्यतेचेल्लाघवम्भवति तिङन्तु द्योतकतैवेति काल इव द्योत्यः कर्ता तत्र विशेषणमित्यस्तु अत एवाधोक् अलेट्इत्यादौ धातुमात्रादपि कर्तृविशेषणकधात्वर्थक्रियाविशेष्यकबोधोपपत्तिः द्योत्यार्थस्य विशेषणताच हेतुमतिचेतिसूत्रभाष्ये स्थिता अत एव स्त्रियामिति सूत्रभाष्ये स्त्रीत्वस्य टाबादिवाच्यत्वपक्षे तस्य प्राधान्यापत्तौ द्विवचनाद्यनुपपत्तिरुक्ता ननु स्त्रीत्वस्य प्रत्ययद्योत्यत्वपक्षे यत्रतु प्रत्ययार्थाधान्ये साधकमस्ति तत्रतु तस्य विशेष्यत्वमेव एवञ्च तयोरेवेति कर्तरि क्तृदिति गत्यर्थाकर्मकेत्यादिशास्त्रबलात्कृत्प्रत्ययसमभिव्याहारे तस्य कर्तुर्विशेष्यत्वमेवोचितमिति ननु नात्र प्रत्ययार्थप्राधान्यस्य त्यागः प्रत्ययस्य कर्मणि लक्षणाया अभ्युपगमाद्विशेषणीभूतक्रियायाङ्कर्तृतासम्बन्धेनोदकस्यान्वय इति नानुभवसिद्धशाब्दबोधानुपपत्तिरिति यत्केनचिदुक्तत्दूषयति प्राप्तावुदकस्येति दुरुपपादत्वादिति भवदुक्तरीत्या कर्मणोऽन्यपदार्थत्वेनाभिप्रेतस्य प्राप्तपदेनैव लाभादिति भावः एवम्बहुव्रीहुच्यपजीव्यस्यैकधर्मविशेष्यकबोधजनकत्वस्य भवदुक्तरीत्या त्यागेन बहुव्रीहिसमासानुपपत्तिरपि द्रष्टव्या एकार्थीभावेतीति वाक्ये पृथगर्थबोधकत्वेन दृष्टानामपदानामेकशक्त्या विशिष्टविषयैकोपस्थितिजनकत्वमेवैकार्थीभावः स एवात्र समर्थः पदविधिरिति शास्त्रादाश्रीयते । व्युत्पत्तयः नामार्थयोरित्यादयः भिन्नोपस्थितिविषयाः विभिन्नशब्दाभ्याञ्जनिता या भिन्नशक्त्योपस्थितिस्तद्विषयाः एतेन एकार्थीभावाभ्युपगमेन व्यभिचार इति तत्पुरुषे एव व्यभिचारदर्शनाद्बहुव्रीहिपर्यन्तानुधावनं व्यर्थमिति भावः अत्रेदम्बोध्यम् व्यपेक्षावादेप्यषष्ठ्यर्थबहुव्रीहौ व्यभिचारप्रदर्शनं वृत्तिवाक्ययोः समानार्थबोधकत्वमिति नियमस्य त्यागेन वस्तुतस्तु तादृशनियमानुरोधेन प्राप्तोदकेत्यादिसमुदायाद्वाक्याच्च प्राप्तिकर्त्रभिन्नोद-

ककर्मेत्येव बोधः अत एव पूर्वोत्तरपदयोः सामानाधिकरण्ये एव विहितबहुव्रीहिसमासस्योपपत्तिः अत एव प्राप्तभार्यइत्यादौ प्राप्तिकर्माभिन्नभार्याकर्तेतिबोधात्प्राप्तपदभार्यापदयोः सामानाधिकरण्यात्पुंवद्भावस्य सिद्धिः उदकादौ कर्तृतानिरूपकत्वबाधेपि विशेषणीभूतक्रियायान्तत्पर्यवसानम्बोध्यम् शिखी ध्वस्त इतिवत् शाब्दबोधस्तु विशिष्टे आरोपेणोपपाद्य इति शब्देन्दुशेखरे स्थितम् मूलेनापि निपातार्थ इति व्यभिचार इति शेषः यथा घटः पटश्चेत्यत्रच शब्दार्थसमुच्चये पटस्य निरूपितत्वसम्बन्धेनान्वयदर्शनात् तेषाम् निपातानाम् एवञ्च पटससुच्चितः पटशब्दार्थ एव तस्य घटे ऽभेदेनान्वयान्न व्यभिचार इति भावः एवञ्च घटः पटश्चेत्यादौ पृथग्बुद्धेन संसर्गो यत्र तत्रान्वयबोध इति व्यवहारेण नानुपपत्तिरिति भाव इति अत एव निपातानान्द्योतकताभ्युपगमादेव सकर्मकत्वमिति प्रकृते भूधातुरन्वित्युपसर्गसमभिव्याहारादनुभवानुकूलव्यापारबोधक इति स्वार्थफलव्यधिकरणव्यापारबोधकत्वात्सकर्मकत्वमित्यर्थः केचित्तु निपातानां वाचकत्वेपि नानुभूयते सुखमित्यादौ धातोः सकर्मकत्वस्य सुखादेः कर्मत्वस्यच नानुपपत्तिः स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचकत्वस्य सकर्मकत्वरूपत्वात्कर्मत्वस्याप्युक्तान्यतरार्थफलसम्बन्धित्वेनोद्देश्यत्वरूपत्वात् एवञ्च सुखादेर्धातुयुक्तनिपातार्थफलसम्बन्धित्वात्कर्मणि लकारसिद्धिरितिचेन्न वैकुण्ठमधिशेते हरिरध्यासिता भूमयइत्याद्यसिद्धिप्रसङ्गात् वैकुण्ठादेर्भवदुक्तकर्मत्वस्यासम्भवात् तस्मादेतच्छास्त्रीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वमेतच्छास्त्रबोधितकर्मसंज्ञकत्वङ्कर्मत्वमित्येव युक्तम् धात्वर्थान्वायित्वविवक्षायान्द्योतकत्वमेव तदतिरिक्तनिपातानां वाचकत्वमपि। अतएवाव्ययंविभक्तीत्यादि सङ्गच्छते एवञ्चानुभूयते सुखमित्यादावेतच्छास्त्रीयकर्मसंज्ञाया उपपत्तये ऽन्वित्यस्य द्योतकत्वमेव एवं शरैरुस्रैरिवोदीच्यान्नुद्धरिष्यन् रसानिवेत्यादावपि विशेषणविशेष्यवाचकपदयोरेकविभक्तिकत्वोपपत्तये द्योतकत्वमेव घटः पटश्चेत्यादावपि वाचकत्वस्वीकारे निपातार्थयोर्भेदसम्बन्धेनान्वयबोधस्याव्युत्पन्नतया द्योतकत्वमेव युक्तम् सङ्कटमुद्धृतमित्यादौतु वाचकतेति नानुपपत्तिरित्यन्यत्र विस्तरः अन्येतु घटः पटश्चेत्यादौ चार्थे पटादेरन्वयोपपत्तये वाचकत्वपक्षेपि निपातातिरिक्तनामार्थयोर्भेदसम्बन्धेनान्वयबोधो ऽनुपपन्न इति निपा-

तातिरिक्तत्वन्नास्ति विशेषणन्देयमिति वदन्ति तन्मतमाह निपातातिरिक्तत्वेनेति अन्ये इत्यरुचिवीजन्त्वेतादृशस्थले द्योतकत्वस्वीकारेणैवोपपत्तौ निपातातिरिक्तत्वविशेषणदाने गौरवमिति मूले सिद्धान्तेपीति परिमाणाधिक्ये प्रथमेति सिद्धान्ते इत्यर्थः देवतार्थकेत्यादि प्रथमान्तात्प्रातिपदिकादेवतासम्बन्धित्वर्थे ऽणिति साच्च देवतेति सूत्रार्थादेवतायाः प्रत्ययार्थत्वम् तत्रैकदेशान्वयस्वीकारे देवताविशिष्टन्देयम्प्रत्ययार्थः तदस्वीकारेतु देवतादेयञ्च प्रत्ययार्थ इति विभिन्नशक्तिः स्वीकार्या अतएवाह आमिक्षामित्यादि वस्तुतस्तु तन्न स्वमतमित्याह एकार्थीभाव इति ननु द्रोणो व्रीहिरित्यादौ परिमाणरूपप्रत्ययार्थे द्रोणादेस्तस्यच व्रीह्यादावन्वयोपगमे द्रोणपदव्रीहिपदयोः सामानाधिकरण्याभावेन व्रीहिपदार्थस्य क्रियान्तरम्प्रति कर्मत्वविवक्षायान्द्रोणो व्रीहिमानयेत्यादिप्रयोगापत्तिरत आह द्रोणो व्रीहिमिति अनभिधानादिति प्रातिपदिकार्थादिसाहचर्येण समानविभक्तिकनामान्तरार्थे भेदेनान्वयविवक्षायामेव परिमाणाधिक्ये प्रथमायाः स्वीकारात् एवञ्च प्रथमान्तार्थस्य द्रोणाभिन्नपरिमाणस्य प्रथमान्तार्थे व्रीह्यादौ भेदेनान्वयेपि व्रीहिपदस्य तिङ्सामानाधिकरण्यादभिहिते प्रथमा तिङ्समानाधिकरणे प्रथमेति वार्तिककारोक्तेः नन्वेवं सर्पिः कुडवमित्यादौ कुडवाभिन्नपरिमाणस्य सर्पिः पदार्थे ऽन्वयादिसुसोः सामर्थ्य इति षष्ठापत्तिरत आह सर्पिरिति दिगिति दिगर्थस्तु तिङ्समानाधिकरणे प्रथमेति वार्तिकैकवाक्यतया नीलो घट इत्यादावुभयत्र प्रथमायाः साधुत्वोपपत्तये समानविभक्तिकनामार्थयोरभेदान्वयादुभयत्र तिङ्सामानाधिकरण्यं यथा तथा यत्र परिमाणाधिक्ये प्रथमा तत्रापि परिमाणे वर्तमानात्प्रातिपदिकाद्यत्र प्रथमा तत्रापि तत्साहचर्यान्नामान्तरार्थे भेदसम्बन्धेन नान्वयः किन्त्वभेदेनैवेति। द्रोणो व्रीहिमानयेत्यस्य नापत्तिरिति सिद्धान्तार्थमाह वस्तुतस्त्विति परिमाणे वर्तमानात्प्रातिपदिकाद् यत्र प्रथमा तत्रापि परिमाणत्वेन परिमाणसमवेतत्वर्थे प्रकारतया भासत इति द्रोणः खारी आढकमित्याद्येवोदाहरणम् एतेभ्यः परिमाणाभिन्नो द्रोण इत्याद्याकारक एव बोधः यत्रच तिङन्तम्पदन्न श्रूयते तत्राप्यस्तिभवन्तीपरो ऽप्रयुज्यमानोप्यस्तीति भाष्योक्तेरस्तीत्यध्याहारेण तिङ्सामानाधिकरण्यम् हरीतकीम्भुंक्ष्व राजन्मातेव हितकारिणीमित्यादिरसाधुरेव नच ति-

ङ्सामानाधिकरण्ये एव चेत्प्रथमा तदा ऽधिकरणशक्तिप्रधानेभ्य उच्चै-रादिभ्यः कथम्प्रथमासिद्धिः तिङ्सामानाधिकरण्याभावादिति वाच्यम् अव्ययादाप्सुप इति ज्ञापकात्तदुपपत्तेः तिङ्सामानाधिकरण्ये प्रथमैवेति नि-यमाद्वा ननु द्रोणादिशब्दानाम्परिमाणत्वेन परिमाणमपि वाच्यमिति प्रा-तिपदिकार्थे प्रथमेत्येव सिद्धे परिमाणग्रहणमनर्थकमित्याशङ्क्यान्निराचष्टे न-चेति द्रव्ययोरेवेति एवकारेण लिङ्गव्यवच्छेदः यद्यपि पञ्चकम्प्रातिपदि-कार्थः तथापि प्रकृतसूत्रे प्रातिपदिकार्थपदेन द्वयोरेव ग्रहणम् एवञ्च प्रा-तिपदिकार्थमात्रे प्रथमेत्यस्योदाहरणम् उच्चैर्नीचैरित्याद्यलिङ्गाः स्त्रीपुमान् नपुंसकमिति लिङ्गप्रवृत्तिनिमित्ताकञ्च कृष्णः श्रीः ज्ञानम् तटस्थटी तट-मित्यादीनिच लिङ्गाधिक्ये इत्यस्य अथ परिमाणग्रहणस्य सार्थक्यमाह द्रो-णादिपदानामिति द्रोणत्वाद्येवेति लाघवादित्यादिः एवकारेण तादृशा-खण्डोपाधिसमानाधिकरणत्वेन प्रतीयमानं यदियत्ताविशेषावच्छिन्नधान्या-दिपरिच्छेदकत्वं तस्य प्रवृत्तिनिमित्तावटकत्वस्य व्यवच्छेदः एतेन द्रोणत्वा-दिना प्रतीयमानेर्थे यत्परिमाणत्वेन परिमाणभासते तस्याधिक्यात्प्रथ-मासिध्यर्थम्परिमाणग्रहणमिति ध्वनितम् यद्यपि परिमाणन्तदर्थस्तथापि तस्याभेदेन द्रोणत्वावच्छिन्ने द्रोणादिशब्दजन्यप्रतीतौ विशेषणतया भान-म् ननु यदि द्रोण इति शब्दमात्रात्परिमाणाभिन्नो द्रोण इति प्रतीतिस्त-दोक्तार्थानामप्रयोग इति न्यायाद् द्रोणः परिमाणमिति प्रयोगानुपपत्तिरत आह द्रोणः परिमाणमिति त्विति इतिवदिति तत्र यथा द्विवचनेन द्वि-त्वस्योपस्थितिरस्ति यद्यपि तथापि सम्भेदेनान्यतरवैयर्थ्यमिति न्यायेन द्विशब्दप्रयोगस्योपपत्तिस्तथा परिमाणशब्दस्यापि प्रयोग उपपद्यते इदमत्र बोध्यम् धान्यपरिच्छेदके 'परिमाणन्तु सर्वत' इति लक्षणलक्षिते परिमाण-विशेषे एव द्रोणादिशब्दानाम्प्रयोगः तदुक्तम् 'अष्टमुष्टिर्भवेत्किञ्चित्कि-ञ्चिदष्टौतु पुष्कलः पुष्कलानितु चत्वारि आढकः परिकीर्तितः चतुरा-ढको भवेद्द्रोण इत्येतन्मानलक्षणमिति धान्यपरिच्छेदके एवैषाम्ग्रहणौ मानन्तु पलञ्च कुडवः प्रस्थ आढको द्रोण एवच धान्यमानेषु विज्ञेयाः क्रमशोमी चतुर्गुणा इति' आढकद्रोणशब्दावर्द्धचार्दी तदुक्तममरसिंहेन 'अस्त्रियामाढकद्रोणौ खारीवाहो निकुञ्चिकः कुडवः प्रस्थ इत्याद्याः प-रिमाणार्थकाः पृथगिति' पलन्निकुञ्चिकम्मुष्टिः कुडवस्तच्चतुष्टयम् चत्वारः

कुडवाः प्रस्थश्चतुःप्रस्थमथाढकम् अष्टाढको भवेद्द्रोणो द्विद्रोणः शूर्प उच्यते सार्द्धः शूर्पो भवेत्खारी द्विशूर्पा गोण्युदाहृता तामेव भारञ्जानीयाद्वाहो भारश्चतुष्टयम् शुष्कमेयेष्विदम्मानन्द्विगुणन्तद्वेषुत्विति' सूत्रे परिमाणग्रहणमुन्मानप्रमाणयोरप्युपलक्षणम् अत एव तुलादिशब्देभ्यः प्रथमासिद्धिः ननु लक्षणया साध्वित्वनुपपन्नं लक्ष्यार्थानामनियततया प्रातिपदिकजन्यनियतोपस्थितिकत्वस्य तत्रासत्वादत आह लक्षणाचेति तथाच यस्य पदस्य लक्षणया वाक्यार्थबोधजनकता तत्पदशक्यतावच्छेदकस्यारोपो लक्ष्ये आदौ भवतीति कल्पनीयम् सचारोपो मुख्यार्थबाधज्ञानानन्तरमिति मुख्यार्थबाधज्ञानमस्याः कारणम्मुख्यार्थसम्बन्धग्रहश्च तथा लक्षणाच स्वरूपसती हेतुर्नतु शक्तिवज्जाताशाब्दबोधहेतुपदपदार्थसम्बन्धत्वस्यैव वृत्तित्वात् गङ्गायाङ् घोष इति वाक्याद्गङ्गावृत्तिर्घोष इत्येव बोधः तदुक्तङ्काव्यप्रकाशे मुख्यार्थबाधे तद्योगरूढितोर्थयोजनात् अन्यो ऽर्थो लक्ष्यते यत्सा लक्षणारोपिताक्रियेति अत्र मुख्यार्थबाधादित्रितयं हेतुः आरोपिता क्रिया आरोपितो व्यापार इति तद्व्याख्यातारः एवञ्च मुख्यार्थबाधज्ञानञ्च मुख्यार्थोपस्थितिसाध्यामिति मुख्यार्थस्य प्रथममुपस्थितिः पदादेव भवति तच्च पदं स्वार्थ एव प्रथमतः संस्कृतभवतीति पदे एव लक्षणा सिंहो माणवक इत्यत्र मुख्यार्थस्य सिंहस्य क्रौर्यादयो ये गुणास्तत्सजातीयगुणानाम्माणवके दर्शनेन सिंहत्वस्य तत्रारोपो भवति सिंहइति पदञ्च स्वप्रवृत्तिनिमित्तरूपप्रातिपदिकार्थे एव संस्कृतभवति यथा तथा द्रोणो व्रीहिरित्यादावपि व्रीहौ द्रोणत्वारोपानन्तरं द्रोणाभिन्नो व्रीहिरित्याकारकबोधः एवं एतेभ्य आरोपितद्रोणत्ववान्व्रीहिरित्याद्याकारक एव बोध इति केचित् । तन्न कचतस्त्रस्यति वदनमित्यादिभ्यश्चमत्काराभावापत्तेः एतेन द्रोणाभिन्नपरिमाणपरिच्छेद्यो व्रीहिरिति बोधोपपत्तये देवतार्थकतद्धितादि दृष्टान्तोपादानमयुक्तमिति ध्वनितम् एवञ्च प्रवृत्तिनिमित्ततदाश्रययोरेव प्रातिपदिकार्थपदेन ग्रहणस्य सिद्धौच अलिङ्गाः अव्ययानि लिङ्गप्रवृत्तिनिमित्तकाः लिङ्गमेव प्रवृत्तिनिमित्तं येषान्ते स्त्री पुमान् नपुंसकमिति यथा अन्ये सर्वे कृष्णः श्रीः ज्ञानमित्यादयः उपलक्षणमिति तेन यौतवन्द्रुवयम्पाय्यमित्यादिसङ्ग्रहः तद् ध्वनयन् द्रोणाभिन्नपरिमाणपरिच्छेद्यो व्रीहिरिति रीत्या शाब्दबोधकृतवैलक्षण्यानादरन्ध्वनयन् तद्-

च्चेति तज्जन्यनियतोपस्थितिकत्ववच्चेत्यर्थः प्रवृत्तिनिमित्ततदाश्रयरूपलिङ्ग-स्याप्युपलक्षणम् तेन यत्र दारानित्यादौ लिङ्गस्यापि नियमेन प्रातिपदिक-जन्यनियतोपस्थितिकत्वन्तत्र प्रातिपदिकार्थे प्रथमेत्यनेनैव प्रथमासिद्धिः परिमाणग्रहणस्यानावश्यकत्वं स्यादिति परिमाणञ्चेति प्रातिपदिकांश इ-त्यस्य नियतोपस्थितिकमित्यत्रान्वयः यदि कृष्णादिशब्दजन्योपस्थितौ लि-ङ्गस्यापि नियमेन भानन्तदा तेभ्योपि प्रातिपदिकार्थ इत्येवसिद्धमित्याश-येनाह लिङ्गप्रत्ययेति यत्र लिङ्गबोधकप्रत्ययविशिष्टाद्रमागौरीत्यादेर्लिङ्गमा-त्रमधिकं बुध्यते तत्र तावन्मात्रस्य यत्नतु पुंयोगमहत्वादिकमपि यस्मात्प्र-थमा विधीयते तज्जन्यनियतोपस्थितिकमिति तत्रापि तावन्मात्रेणैव प्रथ-मायाः सिद्धिरिति भावः ननु लिङ्गग्रहणन्तर्हि व्यर्थमेव स्यात्तत्राह लिङ्गो-दाहरणमिति अत्र किमपि लिङ्गन्न प्रातिपदिकजन्यनियतोपस्थितिकमिति लिङ्गग्रहणेनैव तादृशेभ्यः प्रथमासिद्धिः । मूले यथान्यास इति प्रातिप-दिकपदघटितन्यास इत्यर्थः लिङ्गग्रहणेनेति मात्रपदसहितेनेति शेषः अर्थे लिङ्गेचेत्येतावन्मात्रोपादानेपि यथान्यासे यत्परिमाणग्रहणोपादानस्य फ-लन्तदन्यथासिद्धमित्याशयेनाह द्रोणादिशब्देभ्य इति प्रथमासिद्धिरिति एवञ्च परिमाणग्रहणमनर्थकमिति शेषः तथाबोधार्थम् द्रोणाभिन्नपरिमा-णपरिच्छेद्यो व्रीहिरित्येतादृशबोधार्थम् स्यादेवेति एवञ्च मूलं यथाश्रुतमू-त्राशयवर्णनपरामिति भावः मूले यदित्यित्यादिना लिङ्गग्रहणमपि न कार्यमिति प्रतिपादितन्तत्र पूर्वलक्षणारम्भपक्षे शक्यार्थस्यार्थपदेन ग्रह-णनियमांशस्य प्रवेशो द्विकञ्च प्रातिपदिकार्थ इति पक्षस्तदा लिङ्गग्र-हणङ्कर्तव्यम् यदि नियमांशस्य त्यागस्त्रिकम्प्रातिपदिकार्थ इति पक्षो ऽर्थ-शब्दश्च वृत्तिविषयसामान्यपर इति पक्षस्तदा लिङ्गग्रहणन्न कार्यमिति प्रतीयते इति यत्केनचिदुक्तन्तदाशयाज्ञानेनेति ध्वनयन्नाह इदमिति इ-दम् लक्षणाया वृत्तिशब्दप्रतिपाद्यत्वप्रदर्शनम् प्रकृतोपयोगित्वाभावन्दर्शय-ति पदस्येत्यादिना स्वार्थे प्रवृत्तिनिमित्ततदाश्रयरूपे पदान्तरसमभि-व्याहारे स्वार्थान्वयित्वेनाभिप्रेतो यो ऽर्थस्तद्वाचकसमभिव्याहारे मुख्या-र्थबाधग्रहसत्वेचेति शेषः इति सिद्धान्तादिति तथाच पदसंस्कारवेला-यां लक्षणाया अवसर एव नास्तीति लक्षणाया गौण्याश्च वृत्तिशब्द-वाच्यत्वव्यवस्थापनमप्रकृतानुपयुक्तमिति भावः मूलकेति लक्षणा न शक्या-

सम्बन्धरूपा किन्तु शक्यार्थसम्बन्धज्ञानोत्तरज्ञायमानो यः शक्यतावच्छेदकारोपस्वरूपा तत्र पूर्वकालिकसम्बन्धग्रहविषयः सम्बन्धो यदि सादृश्यरूपस्तदोत्तरकालिकारोप एव गौणीत्वेन व्यवह्रियते यथा लक्ष्यस्तदा लक्षणेत्येव व्यवहार इति भावः मीमांसकरीत्येति अभिधायाः पदार्थान्तरत्ववत्तदनुपपत्तिज्ञानोत्तरं जायमानज्ञानविषयस्यापि पदार्थान्तरत्वमिति तेषामपि मते लक्षणाया मुख्यार्थबाधादिकान्नियामकमस्ति तत्र यदि सादृश्यात्मकसम्बन्धज्ञानम्पूर्वम्भवति तदा गौणीव्यवहारो ऽन्यदाशुद्धेति । स्वार्थः प्रवृत्तिनिमित्तम् अस्य त्रिकपक्षस्य एतेन सूत्रारम्भे द्विकपक्षमाश्रित्यैव लिङ्गग्रहणस्य सत्वाच्चदा प्रातिपदिकार्थपदेन प्रवृत्तिनिमित्ततदाश्रययोर्ग्रहणमिति यत्तन्मूलकाराभिप्रेतमेवेति ध्वनितम् एवञ्च अर्थशब्दमात्रस्योपादानेच शास्त्रबलेनेति नपुंसकशब्दस्य नपुंसकाभिधायकशब्दपरतया लिङ्गस्य यस्मात्स्वादयो विधीयन्ते तदर्थत्वेन सूत्रे लिङ्गपदाभावेपि न क्षतिरिति भावः क्वचित् कृष्णः श्रीः ज्ञानम् गौरी मृडानी दाराइत्यादौ क्वचित् तटस्थटी तटमित्यादौ तदाह तदभिप्रायेणाह तदर्थत्वन्तज्ज्ञन्यबोधविषयत्वमात्रन्तच्च सर्वसाधारणम् ननु प्रकृतसूत्रभाष्ये कस्यापि पदस्याप्रत्याख्यानात्तत्तदुक्त्या यद्यपि प्रातिपदिकादिपदानामनावश्यकत्वस्य लाभस्तथापि तेषाम्प्रत्याख्यानम्भाष्यविरुद्धमत आह प्रातिपदिकग्रहणस्येति सूत्रोपक्रमे सूत्रार्थकथनप्रारम्भे एतदग्रे प्रातिपदिकग्रहणस्येत्यस्य विधानार्थत्वमित्यत्रान्वयः द्येकयोर्द्विवचनैकवचनइतिसूत्रैकवाक्यतया अर्थे प्रथमेत्यस्य एकत्वे द्वित्वे बहुत्वेचैकवचनादीत्यर्थे प्रत्ययनियमपक्षे ऽन्येभ्यः प्राप्तावप्यव्ययेभ्यस्तेषामप्राप्त्या तेभ्यः प्रथमासिध्यर्थम्प्रातिपदिकग्रहणं विध्यर्थमित्यर्थः प्रकारान्तरेण एकत्वादावेकवचनमेवेत्यादिरीत्या ऽर्थनियमेन प्रत्याख्यातम् तत्फलस्यान्यथासिध्या प्रत्याख्यातप्रायम् आरोपादिति एवञ्च यस्यारोपविषयता तद्धर्मप्रकारिका प्रतीतिः शाब्दबोधरूपा भवतीति प्रत्याख्यानम्भाष्यसम्मतमेवेति भावः भाष्ये स्थूमिति तत्रहि एको द्वावित्यादौ प्रातिपदिकेनोक्तत्वाद्विभक्तिर्न स्यादित्याशङ्क्य अर्थतः समयाद्धविष्यतीत्युक्त्या भगवता वचनग्रहणमपि प्रत्याख्यातप्रायमेव अर्थत इत्यस्यानुवादकविभक्तेर्न्याय्यत्वमित्यर्थ इति कैयटः। इदम् अनन्वितार्थकेतियुक्तेराश्रयणम् यथान्यासइति वचनग्रहणस्य सत्वे अन्यथा

तस्यानादरे दुर्वारइति सङ्ख्यामात्र इत्यनेन विधीयमाना प्रथमा एकादिश ब्देभ्यो वचनवैपरीत्येनापि स्यादिति भावः मूले सम्बोधनेचेतीति अत्र प्रथमेति प्रथमा सम्बोधनाधिक्येपि भविष्यतीति तस्य सूत्रस्य वैयर्थ्ये तस्य ज्ञापकत्वमित्यर्थः नच तेन सूत्रेण प्रथमायां सामन्त्रितमित्यामन्त्रितसंज्ञा भवति तस्य सूत्रस्याभावे उद्देश्यतावच्छेदकरूपापरिचयात्कथन्तन्निर्वाह इति वाच्यम् सम्बोधने आमन्त्रितमित्येकयोगः कार्यः प्रथमेत्यस्यानुवृत्तिश्च सम्बोधने या प्रथमा तदन्तमामन्त्रितमित्यर्थः महासंज्ञाकरणेन प्रत्ययग्रहणेपि तदन्तविधिः एवञ्च योगविभागो व्यर्थ इति तत्सामर्थ्येन ज्ञापकत्वमित्यर्थः अत्र केचित् स्वौजसमौडिति सामन्यसूत्रेण सिद्धे ऽर्थे इत्येतन्नियमार्थं प्रातिपदिकार्थे एव प्रथमेति तेन प्रथमाया अर्थान्तरसम्बन्धनिवृत्त्या कर्मसम्बन्धाभावे सिद्धे योगविभागकरणस्य ज्ञापकत्वाश्रयणमयुक्तमिति तन्मतमनूद्य दूषयति नन्वित्यादिना अर्थ इति सूत्रवत्कर्मणीत्यादापि सूत्रन्नियमार्थमिति तत्र प्रत्ययनियमपक्षे व्यवस्था तथैवात्रापि स्यादित्याशयेनाह यथा कर्मण्येवेति कर्मत्वाभावसमानाधिकरणस्य कर्मत्वशक्तिप्रकारकज्ञानासमानाधिकरणशक्त्यन्तरप्रकारकज्ञानविशेषस्य नत्विति कर्मत्वज्ञानसमानाधिकरणशक्त्यन्तरज्ञानविषयस्य न व्यावृत्तिरित्यर्थः सामानाधिकरण्यञ्चैककालावच्छिन्नैकाधिकरणवृत्तित्वसम्बन्धेन तत्रार्थे आकडारादेकेति सूत्रस्थभाष्यं मानामित्याह अत एवेति उक्तनियमादेवेत्यर्थः द्वितीया भवतीति अपादानमुत्तराणि कारकाणि गान्दोग्धि पय इत्यत्र परत्वात्कर्मसंज्ञेति भाष्यमत्र मानमिति शेषः अपादानत्वादि शक्तिबोधेपीति विभागानुकूलव्यापारो दुहेरर्थः गोर्विभागावधित्वादपादानत्वमाप्तप्रधानीभूतव्यापारप्रयोज्यविभागाश्रयत्वात्कर्तुरिति कर्मत्वमाप्तमुभयविवक्षाच तत्र कर्मसंज्ञायाः परत्वात्सैव भवति तत्र शक्तिद्वयज्ञानयोः सत्वेपि न नियमेनोक्तरीत्या व्यावृत्तिरिति भावः यथा यत्र सूत्रे नियमस्तथा प्रातिपदिकार्थसूत्रेपि स्यादित्याह तथेति अत्रहि प्रातिपदिकार्थसत्व एव प्रथमा नतु तदसत्वे इत्याकारको नियमः स्यात् तेन यस्य व्यावृत्तिस्तमाह प्रातिपदिकार्थत्वाभावेति। तत्सत्वे प्रातिपदिकार्थत्वसत्वे इभावइति सम्बोधनेचेत्यस्य ज्ञापकत्वं वर्णयतो भाव इत्यर्थः तत्समानाधिकरणेति प्रातिपदिकार्थत्वसमानाधिकरणेत्यर्थः अपिरेवार्थः अर्थान्तरङ्कर्मत्वादिप्रत्ययनियमपक्षे ताद-

शनियमसामर्थ्यादन्ययोगव्यवच्छेदेन कर्मत्वाद्याधिक्यइव सम्बोधनाधिक्ये ऽपि सा न स्यादिति सम्बोधनेचेतिसूत्रे विध्यर्थङ्कार्यमिति भावः सजातीयापेक्षोत्र नियमः स्यादित्याशयेनाह प्रातिपदिकार्थ एवेति नच निरर्थका प्रसिद्धिः चवैतुहीत्यादिपादपूरणार्थानामनर्थकनिपातानाञ्च सत्वात् नचेष्टापत्तिः धार्मिकोसि वै त्वा सुखमाप्नोतीत्यादौ सपूर्वाया विभाषेत्येतत्प्राप्तेरेव फलत्वात् तत्सत्वेतु ज्ञापकसत्वेतु न दोष इति अनर्थकेभ्यः प्रथमाया अप्राप्तिरूपो दोषो नेत्यर्थः ननु पूर्वोक्तनियमस्वीकारे पञ्चकम्प्रातिपदिकार्थ इति पक्षे सङ्ख्याधिक्ये प्रथमा न स्यादत आह सङ्ख्याधिक्य इति एकवाक्यत्वादिति एकत्वादिविशिष्टे प्रातिपदिकार्थे कर्मत्वादियोग्यार्थकप्रातिपदिकाच्चोदित्येवन्नियमादिति भावः अर्थनियममिति प्रातिपदिकार्थे प्रथमैव न द्वितीयादीत्येवंरूपो ऽर्थनियममित्यर्थः तदानीं विभक्त्यन्तरस्य व्यावृत्तिर्नत्वर्थान्तरसम्बन्धस्येति सम्बोधने लिङ्गाधिक्येच प्रथमा भविष्यति कर्मत्वाद्याधिक्येतु कर्मादौ द्वितीयाद्येवेत्येवंरूपनियमार्थङ्कर्मणि द्वितीयेत्यादिसूत्रमिति द्वितीयाद्येव भवति दिगिति दिगर्थस्तु यद्यपि प्रत्ययनियमः सूत्रकारसम्मतस्तथाप्यर्थनियमपक्षे लाघवमित्ययमेव युक्त इति मूले सन्नित्येव केवलमिति स न वर्तमानइत्याकारा या प्रतीतिस्तद्विषयो भवति केवलपदार्थमाह न जात्यादिरूप इति अत्रैव पदादिपदस्यद्योध्यार्थमाह न लिङ्गसङ्ख्याकारकेति तत्र न जात्यादिरूप इत्यस्य न जात्यादिस्वरूप इत्यर्थोपि सम्भाव्येत नचेष्टापत्तिः सन्नित्येव केवलमित्यनेन विरोधात् तादृशप्रतीतिविषयस्य जातिस्वरूपत्वानपायादत आह जात्यादिनेति तथाच वर्तमानत्वमाधेयत्वन्धर्मिणि सत्ता तया यद्भासते इत्येव विवक्षितन्धर्मीतु न धर्मिणि स तया भासते इति तद्व्युदास इति भावः । ननु जात्यादीत्यत्रादिना ऽखण्डोपाधेरपि ग्रहणं स्यात्तथाच सर्वस्यैव जात्यादिविशिष्टधर्मिरूपतया लक्ष्याप्रसिद्धिरित्याशयेनाह ननूच्चैरादीनामिति तद्व्याचष्ट इति सन्नित्येतत्पदं व्याचष्ट इत्यर्थः एवञ्च जात्यादिपदं लिंगादेरुपलक्षणम् लिङ्गादिविशिष्टो ऽर्थो यो न भवतीत्यत्र तात्पर्यमिति भावः न जात्यादिरूप इत्यस्य न लिङ्गादिविशिष्ट इत्येवार्थ इत्येतद् ध्वनयति मूले ऽव्ययार्थो ह्यादिना अमुकलिङ्गादिरित्यन्तादिना संख्यायाः परिग्रहः अव्ययार्थः स्त्रीलिङ्गः पुंलिंगो नपुंसकलिङ्गः प-

कत्वादियुक्त इत्येवं वक्तुं न शक्यते इत्यर्थ इति इति तात्पर्यार्थः सन्नि-
त्येव केवलभासते इत्यस्य प्रातिपदिकजन्या या सन्नित्याकारिका प्रती-
तिस्तद्विषय इति अस्तिसामानाधिकरण्येन यो भासते इत्यर्थोवा तत्र
नाद्य इत्याह मूले उच्चैर्नीचैरित्यादीति न द्वितीय इत्याह अस्त्यादीति
दुर्लभत्वादिति यदि अस्तिसामानाधिकरण्यत्वदा कारकत्वं सम्पन्नमि-
त्यसत्वार्थकत्वस्यैव हानिः स्यादिति भावः ननु नास्तिसामानाधिकरण्य-
मात्रेणासत्त्वार्थकत्वस्य हानिः स्वरादिषु स्वोस्ति स्वः पश्येत्यादिदर्शना-
त्तेषामप्यस्तिसामानाधिकरण्यस्य सुलभत्वादत आह न लिङ्गसङ्ख्येति
यद्यस्तिसामानाधिकरण्यत्वदा तदर्थस्य कारकत्वमिति न लिङ्गेत्यादुच-
क्तिविरोधः स्पष्ट एव एवम्प्रकारेण स्वरादीनामस्तिसामानाधिकरण्यस्य
वक्तुं शक्यत्वेपि चचाशब्दयोरुच्चैरादिशब्दानामधिकरणशक्तिप्रधाना-
नामस्तिसामानाधिकरण्यन्दुरुपपादमित्यपि बोध्यम् ननु तैः प्रतिपादिता
ये ऽर्थास्ते यदा समुच्चयविकल्पाधिकरणादिपदैः प्रतिपादिता भवन्ति
तदा ऽस्तिसामानाधिकरण्यमस्त्येवेत्यस्तिसमानाधिकरणार्थप्रतिपादकत्वं स-
र्वत्र सुलभमत आह पदांतरोपेति तस्य पदांतरोपस्थितिमादायास्तिसा-
मानाधिकरण्यस्य अव्यावर्तकत्वादिति सर्वत्रैव तस्य सत्वेन व्यावर्तकत्वा-
भावात् तत्सत्वे पदान्तरोपस्थापितस्य तस्यास्तिसामानाधिकरण्यसत्वे लि-
ङ्गादेरपीति गृहस्योच्चैः पताका ऽस्तीत्यस्यार्थस्य विवरणे ऊर्ध्वदेशे स्ती-
त्यादौ ऊर्ध्वदेशनिष्ठाधिकरणतायाः प्रतिपादक उच्चैःशब्द इत्यादौच
पदान्तरोपस्थिताधिकरणतायां लिङ्गसङ्ख्ययोः सम्भवेनेत्यर्थः ननु यदि
प्रातिपदिकार्थ इत्यस्याव्ययान्येवोदाहरणानि तदा कृष्ण इत्यादीनि क-
स्योदाहरणानि प्रातिपदिकार्थ इत्यस्य लिङ्ग इत्यस्यवा तत्र नाद्यस्ये-
त्याह मूले कृष्ण इत्यादि अव्याप्तिमुपपादयति तत इति योर्थः स-
न्नित्येव केवलम्भासत इत्यस्य यतः सन्नित्याकारा प्रतीतिर्भवति तस्य प्रा-
तिपदिकात्प्रथमेत्यत्र प्रातिपदिकपदेन ग्रहणादिति भावः न द्वितीयस्ये-
त्याह मूलेनच लिङ्गग्रहणादिति कृष्णत्वादेरिति भवदुक्तव्याख्यानेन प्रा-
तिपदिकार्थपदस्य सत्ताबोधकतया लिङ्ग इत्यस्य सत्तापेक्षया लिङ्गमात्रं य-
लाधिकम्भासत इत्येवं वचननिष्पत्तिर्भवदुक्तरीत्या स्यात्तथाच कृष्णत्वादे-
धिकस्य तज्जन्यबोधे भानेन तेष्वव्याप्तिरिति भावः ननु प्रातिपदिका-

र्थः सत्तेत्यत्र सत्तापदमप्रवृत्तिनिमित्तस्यैव बोधकत्वन्तु तद्भिन्नसत्ताबोधकमिति न भवदुक्तो दोष इत्यर्थमनूद्य दूषयति मूले यदपि प्राचेति जात्यादीति आदिनोपाधिपरिग्रहः तथाचोच्चैरादीनामूर्ध्वदेशनिष्ठाधारताद्रव्याधारतात्मकप्रवृत्तिनिमित्तप्रतिपादकतया नाख्यातिरित्याशयः इत्यन्वय इत्यनेन जात्यादीति निरपेक्षमितिच भिन्ने पदे इति ध्वनितम् प्रवृत्तिनिमित्तमात्रं यज्जन्यबोधविषयो भवतीत्यर्थः स्यात्तथाचासम्भव इत्याशयेन दूषयति मूले प्रवृत्तिनिमित्तं हीति तन्मात्रबोधासम्भवमुपपादयति प्रकारताया इति। नच प्रातिपदिकजन्यनिर्विकल्पके प्रवृत्तिनिमित्तमात्रस्य भानं स्यादिति वाच्यम् प्रातिपदिकजन्यज्ञानस्य स्मृतिरूपता शाब्दबोधरूपता वोभयथापि विशेष्यविशेषणोभयविषयकत्वस्यानपायादिति भावः कैयटे स्फुटमिति तत्र भाष्यकृता ध्वनितङ्कैयटेन प्रकटीकृतमित्यर्थः तत्र भाष्ये अनदः अदः समभवत् अदोभवदित्यत्र प्रगृह्यत्ववारणाय वार्तिककृता ओतश्चेत्यप्रतिषेध इत्युक्तत्वस्य लक्षणप्रतिपदोक्तपरिभाषया सिद्धमित्यनेन प्रत्याख्याने एवमप्यगौर्गौः समभवद्गोभवदित्यत्र प्राप्नोतीति शङ्काया गौणमुख्यन्यायेन समाधाने कृते कथन्तर्हि वाहीके वृद्ध्यास्त्वे भवत इति परेण शङ्किते अर्थाश्रये एतदेवम्भवति शब्दाश्रयेच वृद्ध्यात्व इति समाहितम् एतेन यत्रार्थविशेषपुरस्कारेण कार्यं विधीयते तत्र मुख्यार्थः प्रथमम्बुध्यारूढो भवति गौणार्थप्रतीतिस्तु पदान्तरसम्बन्धवेलायामिति पदकार्यविषयकत्वमस्य न्यायस्येति ध्वनितम् कैयटेनतु स्वकृतयैवोक्तम् अर्थाश्रय इत्यस्य लौकिकार्थवत्त्वयोग्यपदाश्रय इत्यर्थः मूले सिद्धान्तादित्यनेन यत्र तस्य न्यायस्य प्रवृत्तियोग्यता तत्र तेन न्यायेन कार्यनिष्पत्तिर्वाच्या वस्तुतस्तु प्रकृते तत्प्रवृत्तियोग्यतैव नेति ध्वनितन्तदेतत्स्पष्टयति इदमेवेति इदमेव गौणमुख्यन्यायाविषयत्वमेव। युक्तत्वे हेतुमाह विशिष्टेति अर्थबोधकतावच्छेदकानुपूर्वीविशिष्टेत्यर्थः गौणमुख्येति न्यायो ऽर्थवद्ग्रहणपरिभाषामूलकः सा परिभाषा यत्र विशिष्टरूपोपादानन्तत्रैव प्रवर्तते तत्रैवार्थोपस्थितिसत्वेनोपस्थितस्यार्थस्य शब्दस्मृति विशेषणत्वसम्भवात् एतेनापदस्य प्रयोगानर्हत्वेन पदस्यैव पदान्तरार्थसम्बन्धवेलायां गौणार्थत्वावगतिरिति द्रोणादिपदानां स्वार्थ एव साधुत्वान्वाख्यानङ्कार्यम् तदानीन्तु मूलभूता या ऽर्थवत्परिभाषा तद्विषय-

तैव नास्ति उपात्तं विशिष्यार्थोपस्थापकं रूपं यत्र तत्रैव तस्याः प्रवृत्तेः प्रकृतसूत्रेतु न तादृशरूपोपादानमिति परिमाणग्रहणमनर्थकमिति ध्वनितम् वस्तुतस्तु परसम्मतगौणमुख्यन्यायप्रवृत्तिमभ्युपेत्य प्रादिपादिकसंस्कारवेलायान्तस्याः प्रकृते प्रवृत्त्यभावकथनमित्याशयेनाह द्रोणादिशब्दानामिति गौणत्वाभावादिति सदृशलाक्षणिकस्यैव गौणत्वादिति शेषः यदुक्तं सम्बोधनपदस्य क्रियाविशेषणत्वन्तत्र साधकमाह अत्रेति सविशेषणम् साक्षात्परम्परयाच यद्यद्विशेषणन्तद्बोधकसहितम् तेन गभीरायान्नद्याम्मीनोस्तीत्यस्यैकवाक्यत्वम् तत्र सम्बोधनेचेतिसूत्रविहितप्रथमान्तपदघटितसमुदायमध्ये अस्य देवदत्तेत्यादिपदस्य निघातो न स्यादिति आष्टमिकेनामन्त्रितस्यचेत्यनेन समानवाक्यस्थस्यामन्त्रितस्य पदात्परस्यैव निघातविधानादिति भावः व्रजानि देवदत्तेत्यस्मात्पुञ्जराजसम्मतो देवदत्तसम्बन्धिसम्बोधनविषयो मत्कर्मकङ्गमनमिति शाब्दबोधः तत्र साक्षाद्यक्रियाश्रयति विशेषणान्तत्सहितस्यैवैकवाक्यत्वमिति कश्चित् तन्न युक्तमित्याशयेनाह वस्तुतस्त्विति एतेन उक्तसमर्थसूत्रसम्मतनिघातापाप्तिरूपदोषेण नियम इति समानवाक्ये इति वार्तिकबोध्य इति शेषः यत्तु सम्बोधनविभक्त्यन्तस्य विधेयभूतक्रियायामेवान्वयः स एव निघातस्य प्रयोजको वक्ष्यमाणहरिग्रन्थस्वारस्यादेवञ्च व्रजानि देवदत्तेत्यत्र व्रजनस्य विधेयत्वाभावेन कथमत्र निघातसिद्धेः फलत्वेन कथनमिति केचित् तन्मतेपि निघातसिद्धये आह वस्तुतो व्रजानीत्यादि । न दोष इति व्रजनस्याविधेयतया देवदत्तेत्यनेनान्वयाभावान्निघातापाप्तिरूपदोषो नेत्यर्थः अवबोधनरूपा या क्रिया विधेयत्वेन विवक्षिता तस्यामुभयोरन्वयेन समानवाक्यत्वस्थ सत्वात् नच जानीहीत्यस्य शेषत्वे तिङन्तद्वयघटितवाक्यस्यैकतिङ् वाक्यमिति परिभाषितं यन्निघातोपयोग्यैकवाक्यत्वन्तदभावे न दोषोऽस्त्येवेति वाच्यम् जानीहीति शेष इत्यस्य व्रजानि देवदत्त इति समुदायस्य व्रजानि देवदत्त जानीहीत्यस्य यो ऽर्थस्तत्र वृत्तिर्वाक्यैकदेशन्यायेनेति श्रूयमाणैकतिङ्घटितत्वेन निघातस्य प्राप्तिरित्याशयात् अभिमुखीभवद्देवदत्तोद्देश्यकं मत्कर्तृकं प्राप्तकालाधिकरणकगमनकर्मकम्प्रेरणाविषयो ज्ञानमित्याकारको ह्यस्माच्छाब्दबोधः प्राप्तकाल इति गमनयोग्यस्य कालस्य विवक्षायामित्यर्थः लोट् प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेत्यनेन लोट्

दिगिति दिगर्थस्तु यत्र विधेयभूतक्रियावाचकम्पदन्नास्ति केवलसम्बोधनविभक्त्यन्तस्यैव प्रयोगस्तत्र तादृशक्रियावाचकपदाध्याहारेण शाब्दबोधः यथा मूर्खेत्यादौ अत्र सम्यगाचरेतिपदाध्याहारे सति मूर्खोद्देश्यकं सम्यगाचरणम्प्रेरणाविषय इति बोधो भवति सम्बोधनन्त्वभिमुखीकरणम् तच्च प्रयोक्तृवचनार्थग्रहणे सादरत्वसम्पादनम् तत्फलम्प्रवृत्तिनिवृत्ती मुखपरावृत्त्यादिकन्तु तस्याभिव्यञ्जकम् सादरत्वसम्पत्त्यनुकूलो व्यापारश्च सम्बोधनविभक्त्यन्तशब्दप्रयोग एव उद्देश्यतावच्छेदकरूपेण सिद्धश्च यदा ज्ञातो भवति तदा तद्धर्मावच्छिन्नोद्देशेन क्रिया विधीयत इति सम्बोध्यतावच्छेदकरूपेण सिद्धत्वं सम्बोधनविभक्त्यन्तशब्दप्रयोगे नियामकमतो व्यवस्थैव राजन्युध्यस्व राजा भव युध्यस्वेत्यनयोः प्रयोगाः तदुक्तं हरिणा 'सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यत' इति सिद्धस्य सम्बोध्यतावच्छेदकरूपेण सिद्धस्य अभिमुखीभावमात्रमित्यनेन फलनिर्देशः सुखपराङ्मुखादिना सम्बोध्यतावच्छेदकावच्छिन्नो यदा फलवत्त्वेनानुमितो भवति तदा क्रिया विधीयते तदाह प्राप्ताभिमुख्य इति आभिमुख्यं सादरत्वम् प्राप्ताभिमुख्यं येन स एवार्थः अर्थपूर्णः आत्मा सम्बोध्यः उष्ट्रमुखवत्समासः प्रयोक्तृवचनार्थज्ञानवान् क्रियासु बोधनीयक्रियासु विनियुज्यते प्रवर्त्यते एवञ्च सम्बोधनमभिमुखीकृत्याज्ञातार्थज्ञानानुकूलव्यापारानुकूलव्यापार इति फलितम् यत्र सम्बोध्यो ऽसन्निकृष्टो ऽचेतनोवा तत्र सन्निकृष्टत्वारोपेण चेतनत्वारोपेणच गौणः सम्बोधनविभक्त्यन्तशब्दस्य प्रयोग इति । किञ्च तिङ्समानाधिकरणे प्रथमेति वार्तिकस्वारस्यात्प्रथमापि क्रियाजनकरूपकारकार्थिका विभक्तिः अत एव सहयुक्ते प्रधानइतिसूत्रे ऽप्रधानग्रहणस्याकर्तव्यत्वमप्रधानग्रहणं शक्यमकर्तुम् नचैवम्पुत्रेण सहागतः पितेत्यत्र पितुरपि तृतीयापत्तिः उपपदविभक्तेः कारकविभक्तिर्बलीयसीति प्रथमा भवितीत्यभिहितभाष्ये उपपदविभक्तेरिति परिभाषातु वाचनिकीति दिक् इति प्रथमाविवरणम् अनेनेति व्युत्पत्तिप्रदर्शनेनेत्यर्थः अस्य सूचयतीत्यत्र व्याख्यानादित्यस्यतु रूढिरित्यत्रान्वयः रूढ इति नचाभीष्टमीप्सितं हृद्यदयितं वल्लभं प्रियमिति कोशे पाठाद्रूढिरेवाभिप्रेतेति वाच्यम् योगरूढेः स्वीकारात् अत्र मानन्तु वारणार्थानामीप्सितइतिसूत्रस्थभाष्यमेव

तथाहि किमुदाहरणम् माषेभ्यो गा वारयति भवेद्यस्य माषा न गावस्तस्य माषा ईप्सिताः स्युः ईप्सितशब्दस्याभिप्रेते रूढत्वाभिप्रायेण यस्य स्वामिनः पुरुषस्य माषास्तस्य त एव ईप्सिताः पूर्वोक्तमेवार्थं द्रढयितुमाह यस्यतु खलु गावो न माषाः कथन्तस्य माषा ईप्सिताः स्युः तस्यापि माषा एवेप्सिताः इप्सितशब्दः क्रियाशब्द आश्रीयते तत्र वारणक्रियया परकीया अपि माषा वारयितुराप्तुमिष्टा भवन्ति मानशब्नेते इत्येभ्यो ऽसौ गा वारयतीति कैयटः माषा एवेत्यत्र एवकारो भिन्नक्रमः माषा ईप्सिता एवेत्यर्थः अत एव भाष्यकार आह आतश्चेप्सिताः यदेभ्यो गा वारयति पूर्वापेक्षया किञ्चिद्वैलक्षण्याभिप्रायेण पुनराह इह कूपादन्यं वारयतीति कूपे ऽपादानसंज्ञा न प्राप्नोति नहि तस्य कूप ईप्सितः कस्मात्तस्य न प्राप्नोतीति अन्वसम्बन्धे सति कूपस्य न विनाशो नापि राजभयमिति पृक्षः कस्मात्तस्य इति तस्यात्यनुकम्पायाः सद्भावात्तस्येप्सितत्वमन्यते तस्यापि कूप एव ईप्सितः पश्यत्यन्धमन्धः कूपमापूपादिति तस्यापीति वारणक्रियया आप्तुमिष्ट इत्यर्थः एतेन ईप्सितशब्दस्य क्रियाशब्दतया कूपस्यापि तत्संयोगाभावरूपफलाश्रयतया कूपस्येप्सितत्वमस्त्येवेति प्रघट्टकेन ईप्सितशब्दो यौगिक इति सूचितम् एकदेश्याह इहाग्नेर्माणवकं वारयतीति माणवके ऽपादानसंज्ञा प्राप्नोति सिद्धान्त्याह कर्मसंज्ञा बाधिका भविष्यतीति ईप्सितमात्रे सावकाशा अपादानसंज्ञा परत्वादीप्सिततमस्य कर्मसंज्ञया बाध्यत इति भावः करणाकाङ्क्षा सन्प्रकृतेराप्नोतेः करणाकाङ्क्षा मानाभावादिति यथा सोमेन यजेतेत्यत्र भावनायाः करणाकाङ्क्षायामुपस्थितत्वात्फलांशस्य करणत्वेनान्वयो भवति तथा प्रकृतेपि कारकाधिकारात्कर्तृग्रहणस्य सूत्रे सत्वाच्च कर्तृकारकवृत्तिव्यापारस्यैव तथान्वय इति प्रकृतधात्वर्थप्रधानीभूतव्यापारलाभ इति भावः ईप्सितपदेनेति ननु सूत्रस्थकर्तृपदेनेति पूर्वोक्तरीत्या वक्तव्ये ईप्सितपदेनेति पूर्वविरुद्धमितिचेन्न यथा वारणार्थानामीप्सित इति सूत्रे कर्तृपदाभावेपि कर्मणि क्तप्रत्ययस्येप्सित इत्यत्र सत्वात्कर्मणः कर्तृव्यापारजन्यफलाश्रयत्वज्ञानसत्व एव तदुपपत्तिरित्यध्याहारेण कर्तुर्लाभस्तथा प्रकृतसूत्रेपीप्सितपदेनैव विवक्षितार्थस्य लाभे कर्तृग्रहणं स्पष्टार्थमिति ध्वननायेत्थमभिधानात् ननु वारणेतिसूत्रे वारणेत्यस्य विशेषत उपादाना-

क्तदर्थभूतो यः प्रधानीभूतो व्यापारस्तत्प्रयोज्यफलाश्रयस्यैव लाभाद्यवा-
नामेवेप्सितपदेन ग्रहणमिति तेषामेवापादानसंज्ञा नत्वाक्षिप्तकर्तृपदार्थसा-
मान्यस्य यो व्यापारस्तत्प्रयोज्यफलस्य अत्यर्थोत्तरदेशनिष्ठसंयोगानुकूलव्या-
पारवतो गवादेर्यथा यवेभ्यो गां वारयतीत्यादौ कर्तृत्वसत्त्वात्तन्निष्ठव्या-
पारजन्यफलाश्रययवादीनामपादानत्वप्रसक्तिस्तथा वारणकर्तुरप्याक्षिप्तक-
र्तृपदार्थतया तद्वृत्तिव्यापारजन्यफलाश्रययवादीनामप्यपादानत्वं स्यात् भ-
क्षणादिफलानुकूलव्यापारवत्त्वेन यथा गवादीनां कर्तृत्वन्तथा पराङ्व्या-
दिफलानुकूलव्यापारवत्त्वाद्वारयितुरपि परावर्तयतीत्यत्र कर्तृत्वदर्शनात् त-
था प्रकृतसूत्रे न धात्वर्थविशेषोपादानमिति माषेष्वश्वस्वध्नातीत्यादौ ग-
लाधःसंयोगानुकूलव्यापारवतो ऽश्वस्यापि आक्षिप्तकर्तृपदार्थतया त-
न्निष्ठव्यापारजन्यफलाश्रयमाषाणामपि कर्मत्वापत्तेर्वारणाय व्यानधीनस्य क-
र्तुरेव कर्तृपदेन ग्रहणार्थं कर्तृपदमस्तीतिचेन्न प्रकृतसूत्रे प्रकर्षार्थकत-
मप उपादानात् प्रकृतधात्वर्थप्रधानीभूतव्यापारवत एवाक्षिप्तकर्तृपदेन
लाभसम्भवात् एवञ्च माषेष्वश्वस्वध्नातीत्यत्र प्रकृतधातुर्ध्वंधातुस्तदर्थो
देशान्तरसञ्चारविरोधिशङ्कादिसंयोगानुकूलव्यापारस्तदाश्रयचैत्रादेराक्षि-
प्तकर्तृपदार्थत्वमिति कर्तृव्यापारप्रयोज्यफलाश्रय इति अत्र प्रयोज्यत्वनिवे-
शस्य फलन्तु न साक्षात्प्रधानीभूतव्यापारजन्यफलस्यैव ग्रहणङ्किन्तु तज्जन्य-
जन्यस्यापि ग्रहणमिति सूचनाय तेन यत्र माषभक्षणेन पुष्टिर्जायतामिती-
च्छया माषक्षेत्र एवाश्वस्य बन्धनन्तत्रापि माषेष्वश्वस्वध्नातीति प्रयोग इ-
ष्यते अत्र प्रकृतधातुर्ध्वंधातुस्तदर्थव्यापारप्रयोज्यस्फलङ्गलाधःसंयोगोपि
तदाश्रयत्वान्माषाणामपि कर्मत्वापत्तिरतः फलेपि प्रकृतधात्वर्थत्वनिवेश-
नीयमिति ध्वननमेव एवञ्च प्रकृतधात्वर्थव्यापारप्रयोज्यप्रकृतधात्वर्थफला-
श्रयस्यैवेप्सिततमपदेन ग्रहणमिति तदाश्रयस्यैव कर्मसंज्ञा भवति नचो-
क्तरीत्या फले प्रकृतत्वनिवेशनस्य प्रयोज्यनिवेशे एवचेत्सार्थक्यं यदि तदा
प्रकृतधात्वर्थजन्यत्वमेव निवेश्यताम् फले प्रकृतत्वं त्यज्यतामिति वाच्यम्
भाषपठितदुहादिभिन्नानाद्विकर्मत्वस्यानुपपत्तेः व्यापारद्वयार्थकत्वेनैव ते-
षान्तत्फलस्योपपादनीयत्वादत एव दुहिपच्योर्बहुलं सकर्मकयोरिति सूत्रि-
युज्योः स्यंस्तित्वस्योपपत्तिरिति तत्र दृष्टान्तमाह यथा तण्डुलम्पचतीति अत्र प्रकृतो धातुः पचिति तदर्थः पूर्वकालस्थितरूपादिनिष्टत्तिपूर्वक-

रूपाद्यन्तरोत्पत्तिरूपफलानुकूलव्यापार इति पूर्वानव्यापारप्रयोज्यप्रकृतधात्वर्थतादृशरूपाद्यन्तराश्रयत्वात्तण्डुलानाङ्कर्मता तण्डुलपदञ्च तण्डुलावयवे लाक्षणिकम् घटम्पचतीत्यादौतु पिठरपाकवादिमते घटपदङ्घटपरमेव पीलुपाकवादिमतेतु घटावयवे लाक्षणिकम् भूतानि कालः पचतीत्यादौ वैलक्षण्यनिष्पत्त्यनुकूलव्यापारः पचधात्वर्थ इति यथायथमूहनीयम् नन्वेवन्तण्डुलपदार्थे कर्मत्वसिद्धावपि स्तोकम्पचतीत्यादौ स्तोकादेर्न तादृशफलाश्रयत्वमिति कथन्तेषाङ्कर्मत्वसिद्धिः नच स्तोकपदार्थे ऽभेदेन फलवत्त्वसत्त्वात्स्यादेव कर्मत्वमिति वाच्यम् फलतावच्छेदकसम्बन्धेन फलाश्रयस्यैव कर्मत्वात् अन्यथा पर्वतस्यापि कालिकसम्बन्धेन विक्लित्याश्रयत्वात्पर्वतम्पचतीत्याद्यापत्तेः फलतावच्छेदकसम्बन्धश्च प्रकृते समवाय एवात आह फलस्यापीति स्वज्ञानस्य क्रियोत्पत्तिप्रयोजकत्वात्फलस्य कारकत्वम्बोध्यम् व्यपदेशिवद्भावेनेति अत्र मानन्तु ओजः सहोम्भसा वर्तत इत्यतो वर्तत इति प्रकृते तत्प्रत्यनुपूर्वमीपलोमकूलमित्यनेन द्वितीयान्तेभ्यः प्रत्ययविधानमेव अत एव प्रतीपं वर्तते प्रातीपिकमिति व्याख्यानं सङ्गच्छते अत एव फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात्कर्मत्वस्य स्वीकारादेव एतेन क्रियाविशेषणानां कर्मत्वमिति वचनमुक्तयुक्तिमूलकमेव नत्वपूर्वमिति बोध्यम् एतच्च न सर्वदा किन्तु विवक्षाधीनमन्यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र ज्योतिष्टोमपदात्तृतीयानापत्तिः स्यात् ममतु धात्वर्थफलस्य व्यपदेशिवद्भावेन फलाश्रयत्वविवक्षा यदा तदा कर्मत्वं यदातु भावनाम्प्रति भावनाभाव्यनिर्वर्तकत्वरूपपारिभाषिककरणत्वविवक्षा तदा करणत्वस्य सत्त्वेनाभेदेन तदन्वय्यर्थवाचकात्तृतीया भवति अत एव भाष्यकृता क्रियाविशेषणानाङ्कर्मत्वमिति वचनन्न पठितम् अपूर्ववचनसत्त्वेतु तेन बाधस्य प्राप्तेस्तृतीयाया अनुपपत्तिः स्यात् नतु वाक्यभेदेन संज्ञाद्वयविधानेपि संज्ञाद्वयसमावेशः कथमत आह योगविभागेनेति एतेन यदि योगविभागो न स्यात्तदा द्वितीयवाक्ये कारकस्योद्देश्यत्वालाभः स्यान्नचैकयोगे ऽनुवृत्तिर्भवतीति न्यायादिति ध्वनितम् कारक इति सप्तमीतु प्रथमार्थ इत्याशयः । तदुक्तम् कारकइत्यस्य कारकसंज्ञाविधायकत्वमुक्तम् एवमपि योगविभागेन संज्ञाद्वयविधानेपि प्रथमवाक्ये ध्रुवमित्यस्योपादानं संज्ञिनिर्देशार्थम् पर्यायापत्तिरिति कारकसंज्ञयेत्यादिः परोक्तं संज्ञाद्वयसमावे-

शप्रकारन्दूषयति नचेत्यादिना अयंहि तेषाभावः व्यत्ययेन कारक इति सप्तमी प्रथमार्थे एव तथाच कारकमित्येवैकं वाक्यम् तत्र संज्ञिलाभस्त्वाक्षेपादिति इयञ्च सञ्ज्ञान्वर्था करोतीति कारकम् निर्वर्तयतीत्यर्थः निर्वर्तनञ्च साध्यत्वेन प्रतीयमानक्रियाया एवेति क्रियावाचकपदाक्षेपो भविष्यति द्रव्यगुणयोः पदान्तरसमभिव्याहारेणैवार्थिकसाध्यत्वस्य प्रतीतिर्मनसा भवति क्रियायास्तु शब्दतः साध्यत्वस्य प्रतीतिरिति शेषः तथाच क्रियाजनकमित्यस्यचाक्षेपाल्लाभ इति योगविभागेनेति ध्रुवमपाय इति योगविभागेनेत्यर्थः अनुवृत्त्या कारकइत्यस्यानुवृत्त्या आक्षेपे महासंज्ञाबलादाक्षेपे नटश्रुतमित्यादाविति अत्र नटशब्दात्कारकवाचकादपि सम्बन्धसामान्यविवक्षायां षष्ठीङ् कृत्वा षष्ठीसमासः कर्तरि षष्ठीतु न नटशब्दात् नलोकेतिनिषेधात् श्रुशब्दोहि नटेन श्रावितमित्यर्थविवक्षया ऽन्तर्भावितण्यर्थाच्छ्रुधातोः क्तिच्क्तौच संज्ञायामित्यनेन गीतरूपे कर्मणि विवक्षिते कर्मकान्तो निष्ठाच द्र्यजनादित्यनेन निष्ठान्तस्य द्र्यच आकारमिन्न आदिरुदात्तइत्यर्थकेनादुचदात्तः स्वरवारणायेति समासस्येत्यन्तोदात्तत्वबाधकगतिकारकेतिकृदुत्तरपदप्रकृतिस्वरेणोत्तरपदादुदात्ते प्राप्ते तम्बाधित्वा कारकाद्दतश्रुतयोरेवाशिषीत्यनेन आशिषि संज्ञायान्दत्तश्रुतयोरन्त उदात्त इत्यर्थकेनान्तोदात्तत्वम्प्राप्तं तद्वारणायेत्यर्थः स्वरितपाठेति कारकशब्दस्य स्वरितस्य पाठ आश्रयणीय इत्यर्थः नच कारकशब्दे लितीतिसूत्रेणाकारस्य स्थाने उदात्ते तदेकवाक्यतापन्नशेषनिघातेन रेफाकारस्यानुदात्तत्वे उदात्तादनुदात्तस्येत्यनेन स्वरितत्वत्तस्य भवत्येवेति कथमेतद्दोषावसर इति वाच्यम् स्वरितेनाधिकारइतिसूत्रघटकं स्वरितपदन्न समाहारः स्वरितसूत्रबोध्यपरम् किन्तु दोषविशेषपरम् तादृशदोषविशिष्टरकारघटितस्य कारकशब्दस्य पाठः कार्य इत्याशयात् आदिपदेन अधिकः कारो ऽधिकारः सच कारकाधिकारीयापादानादिसंज्ञाप्रवृत्तिरूपो यत्रास्ति तस्य ग्रहणङ्कार्यमित्येवंरूपस्यान्यत्राश्रितस्य परिग्रहः कारकत्वन्तु नटशब्दार्थे ऽस्त्येव आख्यातोपयोगइतिसूत्रे उपयोगग्रहणं प्रत्युदाहरणपरत्वेनास्योपन्यासस्येदृशस्थले करणात् तत्रहि उपयोगे किम् नटस्य शृणोतीत्युक्तम् ननु कारकशब्दानुवृत्तिर्गृहस्य द्वारादागत इत्यत्र गृहस्यापादानत्ववारणाय चरितार्था किञ्च पुनः कारकेतिमूलात्तत्रैव पुनरनुवर्तमानस्यावृत्तिरित्यर्थः प्र-

तीयते सचायुक्तः आवृत्तेर्व्यर्थत्वादत आह विभक्तेष्वपादानेति एतेन तस्य मूलस्य विभक्तेषु पश्चादुच्चारितसूत्रेष्वित्यर्थ इति सूचितम् तदनुवादेनेति पूर्वसूत्रवदस्यापि कारकसंज्ञानिष्ठविधेयताशालिशाब्दबोधस्य जनकत्वेनेत्यर्थः अपाये ध्रुवङ्कारकं सदपादानं स्यादित्येवंवचनकल्पनयेति तात्पर्यम् तत्र कारकसंज्ञाया विहिताया एव पुनर्विधानेन तस्या अनुवादः सम्पद्यते वनोरचेतिसूत्रेण ङीब्र्योर्विधानेपि ङीबनुवादेनेति व्यवहारवत् केचित्तु पूर्वसूत्रविहितसंज्ञाविशिष्टस्योद्देश्यत्वकल्पनेन तदनुवादेनेत्युक्तमिति तन्न एकसंज्ञाधिकारबाधापत्त्या पर्यायत्वापत्तेः एवञ्च प्रकल्प्यापवादविषयमिति न्यायेनोद्देश्यतावच्छेदककारकसंज्ञावैशिष्ट्यमपवादतत्तत्संज्ञाविधानकाले प्रसिद्धमिति शङ्काया अवकाशोपि न नचैवंसति योगविभागो न कार्यः प्रथमार्थसप्तम्यन्तस्य कारकइत्यस्योत्तरसूत्रेष्वनुवृत्तिङ्कृत्वा ऽपाये ध्रुवङ्कारकं सदपादानमिति व्याख्यानङ्कार्यमिति समावेशो भविष्यतीति वाच्यम् विधेयभेदे सति वाक्यभेदस्य सर्वतन्त्रप्रसिद्धत्वेन फलतो योगविभाग एव पर्यवसानमितीह योगविभागस्य कथनमित्याशयात् उत्तरसूत्रे कारकशब्दानुवृत्तिसामर्थ्यात्समावेश इति तु न युक्तम् ब्राह्मणस्य पुत्रम्पन्थानम्पृच्छतीत्यादौ क्रियानन्वयिनाम्ब्राह्मणादीनामकथितञ्चेत्यनेन कर्मसंज्ञावारकत्वेन कारक इति शब्दानुवृत्तेः सफलत्वात् अत एव सर्वथा ऽपादानत्वादीनां यत्राप्रसक्तिस्तत्र कारकसंज्ञाया आख्यातोपयोगे इति सूत्रे उपयोगपदोपादानेन सत्वादकथितञ्चेत्यनेन कर्मत्वम्प्राप्नोतीत्याशङ्क्य दुह्यादिपरिगणनेन भाष्ये समाहितम् उपयोगाभावादपादानत्वमपि न तादृशमुदाहरणन्नटस्य शृणोतीति यत्तु कैयटेन कारकसंज्ञायां विभक्तसूत्रेण सत्वस्य प्रयोजनन्नटश्रुतमित्युक्तन्नटश्रुतिर्नटश्रवणमित्यनयोरुपलक्षणमत्र हि कारकसंज्ञाया असत्वे समासस्येत्यन्तोदात्तत्वं सतितु तस्मिन्गतिकारकोपपदात्कृदित्युत्तरपदप्रकृतिस्वरेणोत्तरपदादुदात्तत्वमिति विशेषस्य स्पष्टत्वात् उभयोरपि नित्स्वरलित्स्वराभ्यामादुदात्तत्वात् नटश्रुतमित्येवतु न युक्तङ्कारकसंज्ञायाः सत्वे ऽसत्वेवा तत्र विशेषस्यासत्वात्तथाहि तस्याः सत्वे गतिकारकोपपदादित्येतद्बाधकथाथादिस्वरेणान्तोदात्तत्वस्य सत्वात्तस्या असत्वेतु समासस्येत्यन्तोदात्तत्वबाधकयोः कृदुत्तरपदप्रकृतिस्वरथाथादिस्वरयोरप्राप्तावन्तोदात्तत्वस्यैव प्राप्तेः कैयटेनतु श्रुतेति

समुदायस्य संज्ञात्वमाशीर्विषयत्वञ्चाभ्युपेत्य कारकादित्तश्रुतयोरेवाशिषीत्यन्तोदात्तत्वमपादानादिसंज्ञाया विषये एव जायत इतिच स्वीकृत्योक्तम् तच्च संज्ञायामनाचितेतिसूत्रात्संज्ञायामित्यनुवृत्तेः वस्तुतस्तु तादृशसंज्ञाया अप्रसिद्धतया तस्योदाहरणस्योपलक्षणत्वमेव युक्तामिति ध्येयम् । ग्रामे वास इति शयवासेति सप्तम्या अलुक् क्रदुत्तरपदप्रकृतिस्वरश्चेति अस्य समासस्येत्यन्तोदात्तत्वबाधकतत्पुरुषे तुल्यार्थेतिपूर्वपदप्रकृतिस्वरबाधकस्य गतिकारकोपपदात्कृदितिसूत्रविहितक्रदुत्तरपदप्रकृतिस्वरस्य प्राप्त्या वासशब्दस्य घञन्तत्वेन मध्योदात्तत्वमिति नार्थः गतिकारकेत्येतद्बाधकस्य थाथेतिसूत्रस्य प्राप्तेः किन्तु क्रदुत्तरपदप्रकृतिस्वरप्रवृत्तेर्निदानस्य कारकत्वस्य सत्त्वेन थाथेत्यनेनान्तोदात्तत्वमित्यर्थः तत्रापि कारकादित्यनुवृत्तेः नच भीत्रार्थानाम्भयहेतुरित्यादावुक्तरीत्या योगविभागासम्भवेन कथं संज्ञाद्वयसमावेश इति वाच्यम् तेषु कारकशब्दस्याव्यया ऽर्थाधिकाराद्वाक्यभेदेन संज्ञाद्वयसमावेश इत्याशयात् क्रियामिति स्वभावतः साध्यत्वेन प्रतीयमानाम्प्रधानीभूतव्यापारात्मकक्रियामित्यर्थः एवञ्च कारकस्य प्रत्यासत्त्या तत्रैवान्वय इत्याह तज्जनकञ्चेति ननु क्रियानन्वयिन इति मूलग्रन्थात् क्रियान्वायित्वङ्कारकत्वमिति प्रतीयते इति मूलविरोध इत्यत आह तदन्वयेति यदि क्रियान्वायित्वङ्कारकत्वं स्यात्तदा कारकाणाङ्क्रियान्वायित्वमिति वाक्यस्योद्देश्यतावच्छेदकविधेययोरेकत्वेन घटोघट इति वाक्यस्येवाबोधकत्वापत्तिरिति क्रियाजनकत्वङ्कारकत्वमित्येव युक्तमिति भावः ब्राह्मणस्य पुत्रमित्यादिवाक्ये ऽतिप्रसङ्गमुपपादयति अत्रेत्यादिना निमित्तस्येति अनेन दुहादिपरिगणनलभ्यस्योपयोगनिमित्तमित्यस्य सत्त्वन्द्योतितम् अन्यथासिद्धेरिति अन्यथासिद्धस्य न कारणत्वम् 'अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता कारणत्वम्भवेदित्यभियुक्तोक्तेः अत्रान्यथासिद्धिरन्वयव्यतिरेकाभ्यामेव पूर्वभावइति न पुत्रजनकत्वघटितधर्मेण पूर्ववर्तित्वस्याकल्पनात् किन्तु जनकम्प्रतीति तुरीया अवश्यक्लृप्तेति पञ्चमीवा ब्राह्मणस्य पुत्रम्पन्थानम्पृच्छतीत्यत्र प्रश्नपदार्थः स्ववृत्तिजिज्ञासाज्ञानानुकूलशब्दोच्चारणरूपव्यापारात्मिका क्रिया तद्विशेषणज्ञानाश्रयत्वात्कारकत्वम्पुत्रस्य पथस्तु जिज्ञासाविषयत्वात्पृच्छिकर्मत्वन्तदाश्रयेण स्वविषयकज्ञानाश्रयत्वम्ब्राह्मणस्येति स्वसमवेतज्ञानविषयत्वसम्बन्धेन कर्मयुक्तत्वम् एतेन प्रश्नक्रियाजनकत्वेन ब्रा-

ह्मणे कर्मत्वमाप्नोतीति शङ्का निरस्ता । नन्वकथितञ्चेतिसूत्रे ऽकथितश-
ब्दोपादानेन यत्रापादानत्वादीनाम्प्रसक्तौ तदविवक्षायामत्र तस्य प्रवृत्तिरि-
ति कथन्तस्य सूत्रस्य प्राप्तिरत आह अकथितञ्चेत्येतदिति तदप्राप्तौ अ-
पादानत्वादीनामप्राप्तौ अत एवाकथितशब्दस्यासङ्कीर्तितपरता वक्ष्यमा-
णा साधु सङ्गच्छते सर्वथा तदविवक्षायामपि तस्य सूत्रस्य प्रवृत्तौ प्रमा-
णन्तु नटस्य शृणोतीत्यादौ सर्वथा तदविवक्षाविषये ऽस्य सूत्रस्य प्राप्ति-
माशङ्क्य दुहादिपरिगणनेन समाधानपरभाष्यम् अत एव ब्राह्मणस्योक्त-
कारकत्वाभावादेव अस्य ब्राह्मणस्य पुत्रस्यतु जिज्ञासाविषयार्थज्ञानानुकू-
लव्यापारस्य पृच्छार्थतया तद्घटकज्ञानजनकत्वेन एवञ्च पुत्रपदार्थस्याश्र-
यतया ज्ञाने ऽन्वयः स्वजनकत्वेन क्रियाजनकत्वेन एतान् कर्त्रादिरू-
पान् द्वितीयाख्यायाभाष्यसम्मतिमाह तदुक्तमिति सप्तम्यर्थान्वय्या-
काङ्क्षाशान्तये आह विषय इति अत्र विषयता न ज्ञानादिसम्बन्धरूपा
क्रियायास्तादृशविषयत्वाप्रसिद्धेः किन्तु जनकतारूपैव क्रियायामिति स-
प्तम्यर्थो निरूपितत्वम् तस्य जनकपदार्थैकदेशजनकतायामन्वयः ध्रुवमित्या-
दिसूत्राणामपाये यद् ध्रुवक्रियाजनकमिति रीत्यार्थः कार्यः पूर्वकल्पवदत्र
पक्षे न वाक्यभेदादिकल्पनेति लाघवमत्र पक्षे पूर्वोक्ताभिप्रायेण व्याचष्टे
क्रियान्वययोग्यतेत्यादि अत एव स्वरितत्वप्रतिज्ञया कर्त्रादिषट्कस्य ग्र-
हणादेव नटश्रुतमित्यादाविति गीतद्वारा नटस्य क्रियाजनकत्वेपि उक्तष-
ट्कभिन्नत्वेनातिप्रसङ्गो नेति भावः क्रियान्वयीति यथाश्रुतमूलन्दूषयति
तदन्वयेत्यादिना तुल्यतापत्तेरिति उद्देश्यतावच्छेदकविधेययोरैक्येनाबोध-
कत्वापत्तेरित्यर्थः अत एव तस्य वाक्यस्यानर्थक्यापत्तेरेव तज्जनकत्वञ्च
क्रियाजनकत्वञ्च अत एव कारकइतिसूत्रभाष्ये करोति क्रियान्निर्वर्तय-
तीति व्युत्पत्तिप्रदर्शनङ्कृतम् तक्रियोपयोगीति धात्वर्थक्रियोपयोगीत्यर्थः
तदुपयोगिक्रियातु स्वस्वावान्तरक्रिया बोध्या अत एव क्रियाजनकत्वरू-
पस्य कारकत्वस्य ग्रहणादेव क्रियान्वयः क्रियायामेवान्वयः तत्र प्रमाण-
म्परस्याकाङ्क्षारूपत्वं दर्शयति क्रियाजनकमित्यादिना ननु सन्निहितेन स-
म्प्रदानेन मह्यन्देहीतिशब्दोच्चारणादिरूपव्यापारेण दातुः प्रवृत्तिर्जन्यता
इति तस्यास्तु तज्जनकत्वमसन्निहितस्यतु तत्कथमत आह अविद्यमानस्ये-
ति स्वज्ञानद्वारा दातृसमवेतं यत्क्रियाहेतुभूतप्रवृत्तिपूर्वकालिकम्मदीयमिद-

न्द्रयन्तत्स्वत्ववद्भवत्वित्यादीच्छाजनकज्ञानन्तद्द्वारा एवमेव क्रियाविशेषणानां शोभनादीनामपि बोध्यम् नच घटङ्करोतीत्यादौ घटादेः क्रियाजनकत्वमुपपद्यते तेषाङ् क्रियोत्तरकालिकत्वादिति वाच्यम् तद्विषयकस्मृतेः क्रियापूर्वकालिकत्वेन विषयेपि तक्रियापूर्वकालिकत्वव्यवहारात् सकार्यवादसिद्धान्ताद्वा नचैवमपि सर्वेषाङ्कारकाणां स्वस्वक्रियाजनने स्वातन्त्र्यात्कर्मणः कर्तृसंज्ञापि प्राप्नोतीति वाच्यम् स्वतन्त्रः कर्तेतिसूत्रे कारकइत्यस्य सम्बन्धेन स्वातन्त्र्ये उक्तरूपात्मके लब्धे पुनः स्वतन्त्रपदोपादानं यस्य स्वातन्त्र्यमेव नतु पारतन्त्र्यमपि तद्व्यावृत्त्यर्थमित्याशयात् अत्रेदम्बोध्यम् यस्य यस्य ज्ञानङ् क्रियापूर्वकालिकन्तेषां सर्वेषाङ्कारकत्वमिति ब्राह्मणस्य पुत्रम्पन्थानम्पृच्छतीत्यत्र पुत्रज्ञानवत्कदाचिद्ब्राह्मणज्ञानस्यापि क्रियापूर्वकालिकत्वसम्भवादतिव्याप्तेः किन्तु क्रियान्वयित्वविवक्षापि प्रयोजिका क्रियाच धात्वर्थप्रधानीभूतव्यापाररूपैव कर्मणस्तक्रियाजनकत्वम्फलद्वारा अधिकरणस्यतु कर्तृकर्मद्वारा यदि साक्षाज्जनकत्वमात्रं विवक्षितं स्यात्तदा ग्रामङ्गच्छति ग्रामे गच्छतीति प्रयोगद्वैविध्यासंगतिः स्यात् फलस्य क्रियात्वस्वीकारस्तु प्राचामनुरोधेन धात्वर्थप्रधानव्यापारान्वयित्वञ्च न विशेषणतयैव किन्तु क्वचिद्विशेष्यतयापि अत एव पाचकस्य स्थितिरित्यादौ स्थितिक्रियाम्प्रति विशेषणत्वेपि पाचकस्य पुरुषस्य ग्राममित्यादौ कर्तृकारके ण्वुल्प्रत्ययोपपत्तिः एवञ्च कारकाधिकारपठितसंज्ञावत्वं यस्य तस्य प्रधानीभूतव्यापारान्वयित्वात्कारकपदेन ग्रहणम् नतु यथाकथञ्चिक्रियान्वयिनामिति यत्तु तदधिकारपठितापादानादिसंज्ञकत्वमेव कारकत्वम् अन्यथा सम्बोधनान्तङ्कृत्वोर्थाः कारकम्प्रथमोवतिरित्यत्र सम्बोधनान्तस्य पृथगुपादानवैयर्थ्यापत्तिः कृत्वसुजर्थकप्रत्ययान्तानाङ्कारकत्वापत्तिश्च एवम्प्रथमवत्यन्तेपि नचेष्टापत्तिः द्विर्ध्यानकर्तारइत्यर्थे ध्यायतेः क्विपि द्विर्धियौ द्विर्धियइत्यादौ ब्राह्मणवद्धीरित्यादौच कारकपूर्वत्वेनैरनेकाचइति यणापत्तिरिति केचित् तन्न कारकशब्दस्य करोतीति कारकमिति व्युत्पत्तेर्भाव्यकृतैव दर्शनात् प्रथमान्तस्य कारकार्थत्वमिष्टमेव ब्राह्मणवसिष्ठन्यायेन सम्बोधनान्तस्य कृत्वोर्थानाङ्क्रियाभ्यावृत्तिगणनार्थत्वन्नतु क्रियाजनकत्वमेवमेव वत्यन्तस्यापीति न यणापत्तिरित्याशयेनाह अलमिति नतु पञ्चकम्प्रातिपदिकार्थ इति पक्षे प्रातिपदिकेन कर्मादावुक्तेपि यथा द्वितीयादि

भवति तथा क्रियते कट इत्यादावपि स्यात् द्विर्बद्धं सुबद्धभवतीति न्यायेन द्वौ ब्राह्मणावित्यादौ समावेशस्य दृष्टत्वात् विभक्तिसमभिव्याहाराभावे कारकप्रतीत्यभावेन तत्तद्विभक्तीनान्तत्तदर्थद्योतकत्वम् क्वचित्तु सत्यपि सम्भव इति न्यायेन द्योतकविषयेपि बाध्यबाधकभावः यथा भ्रम्यासुड्भ्यां सीयुटः शपश्च बाध इत्यत आह तैरेवेति तिङादिभिरेवेत्यर्थः तस्याः शक्तेः कर्मादिशक्तेः उक्तौ वाचकत्वेन द्योतकत्वेनवोद्भूततया बोधने उद्भूते कर्मणि वर्तमानात्प्रातिपदिकाद् द्वितीयेतिरीत्या कर्मणि द्वितीयेत्यादिसूत्राणामर्थादिति भावः नन्वेवमनभिहितइतिसूत्रन्तर्हि व्यर्थमेव स्यादत आह अनभिहितसूत्रमपीति अभिधानविषये तिङादिभिर्यत्र बोधनन्तद्विषये ननु कटङ्करोतीत्यादावपि प्रातिपदिकार्थसद्भावात्प्रथमा प्राप्नोतीति कथं साधकाशत्वमत आह मात्रग्रहणेनेति संबोधनेचेत्यस्योपलक्षणमेतत् अत एव प्रतीयमानक्रियासत्वादेव अस्तिभवन्तीपरो ऽप्रयुज्यमानोप्यस्तीति न्यायस्याभियुक्तानुभवसिद्धत्वादिति भावः नन्वनावश्यकत्वकथनमसङ्गतमुक्तन्यायस्य जागरूकत्वादत आह तदभिमानेति सङ्ख्याया विभक्त्यर्थत्वमुपपादयति द्व्येकयोरित्यादिना नच संङ्ख्याया नित्यपरतन्त्रतया एकत्वविशिष्टे कर्मणीत्येवम्परतयैवार्थ उचित इति वाच्यम् कारकस्य प्रातिपदिकार्थत्वेन तत्र विभक्तिविधानानुपयोगात्सङ्ख्याया विशेष्यत्वकल्पनया तत्र विधानं युक्तमित्याशयात् यत्तु द्व्येकयोरिति षष्ठीति तन्न बहुष्वित्यादिभिर्वैरूप्यापत्तेः। सप्तम्यर्थस्तु वाचकत्वम् इयंच वाक्यैकवाक्यतया ऽन्वयपक्षे स्वीकार्या परन्त्वेवमर्थकल्पनेन सूत्राणां स्वत एव लक्ष्यसंस्कारकत्वं किन्तु तदनन्तरं कल्पितकर्मणि यदेकत्वमित्येवंरीत्या यद्वाक्यन्तद्द्वारेति गौरवमतः पदैकवाक्यतयैवादौ नित्यसाकाङ्क्षयोः सङ्ख्यासङ्ख्येययोरन्वय इति दर्शयति सङ्ख्येत्यादिना पदैकवाक्यतातु कर्मत्वादियोग्यार्थकप्रातिपदिकात्तदर्थमात्रगतैकत्वे प्रथमैकवचने सुर्भवति कर्मत्वशक्तिसमानाधिकरणैकत्वे द्वितीयैकवचनमिति स्वीकार्या गुणानाञ्चेति न्यायसञ्चारस्तु यत्रानेकगुणोपस्थितिर्नित्यसाकाङ्क्षत्वाभावश्च तत्रैव अरुणयैकहायन्या पिङ्गाक्ष्या सोमङ् क्रीणातीत्यादौ यथा तत्र ह्यनेकगुणवाचकपदश्रवणेन परस्परनिरपेक्षाणान्तेषां प्रधानीभूतभावनायामेवारुण्यादिकरणिका सोमकर्मककक्रयकरणिका भावनेतिरीत्यान्वयः नत्वारुण्यपिङ्गाक्षित्वैकहायनीत्वविशिष्टैकद्रव्यकरणिका भा-

वनेति बोधः उक्तन्यायविरोधादिति नचैवमत्रेति भावः स्यष्टुञ्चेदमिति उक्तरीत्या संख्याया विभक्त्यर्थत्वप्रतिपादनं स्यष्टुमित्यर्थः अत्रैव अनभिहितइतिसूत्र एव पूर्वोक्तरीत्या न्यायेन नात्र पक्षे निर्वाह इति दर्शयति उक्तार्थानामितीति विशेषणार्थमिति सूत्रजन्यशाब्दबोधविषयप्रधानार्थे उक्तेन न्यायेन वारणं युक्तमप्रधानकर्मादिरूपार्थोक्तौतु तुल्यार्थत्वाप्रधानत्वादेव न्यायाप्रवृत्तिरित्याह न्यायश्चेति एवञ्चातिव्याप्तिवारणाय सूत्रमावश्यकम् यदि तस्य न्यायस्याप्रधानार्थविषयत्वमपि स्यात्तदा एकन्द्वौ त्रीन् पश्येत्यत्रैकवचनादेरुत्पत्तिर्न स्यात्प्रकृत्या सङ्ख्याया उक्तत्वात् दर्शनक्रियाकर्मगतमेकत्वन्तु प्रकृत्या नोक्तमिति भवत्येव विभक्तिः सङ्ख्यया विभक्त्यर्थत्वञ्च कर्मण एकत्वे कर्मणो द्वित्वे इत्यादिभाष्येण ध्वनितमेव कैयटेन तत्प्रकटीकृतमत एवाह कैयट इति प्रधानप्रत्ययार्थेति प्रधानीभूतो यः प्रत्ययार्थः सङ्ख्यारूपस्तस्येत्यर्थः एवञ्च उक्तरीत्या तत्तत्सूत्राणामेकवाक्यत्वसत्वेच अप्रधानेतिसूत्रजन्यशाब्दबोधविषयेत्यादिः मूले परत्वात्प्रथमेति अत्र परत्वादिति पदं विप्रतिषेधसूत्रे ऽस्तीति तत्स्मरणेनोक्तम् ततोपीति प्रथमायाः परत्वेनेत्यर्थः निषेधापत्तिरिति प्रथमाबाधकषष्ठ्या इत्यादिः कर्तव्यः कटश्चैत्रेणेति शेषपूरणेनोभयत्र प्राप्त्युद्भावनमेतत् । ननु कर्मण उक्तत्वान्न कर्मणि षष्ठीप्राप्तिरितिचेच्छृणु अनभिहिताधिकाराभावे कर्तरि कर्मणि यदेकत्वन्तत्र ङस्इतिरीत्या तस्यापि सूत्रस्यार्थात् सर्वत्रैवेति नच सकर्मकधातुप्रकृतिककृत्यप्रयोगे भवदुक्तरीत्या यद्यप्युभयप्राप्तिसत्वन्तथाप्यकर्मकप्रकृतिककृत्प्रयोगे चैत्रस्य शायिका मैत्रस्यासिकेत्यादावुभयोः सत्वस्यैवाभावेन सर्वत्रैवेत्यसङ्गतमिति वाच्यम् वक्ष्यमाणरीत्या देशकालादिकर्मसत्वस्य तत्रापि सम्भवात् नच यत्र स्वार्थव्यापारकरणके ऽर्थे धातोर्न वृत्तिस्तत्रैवाकर्मकधातुप्रयोगे नोभयप्राप्तिरिति वाच्यम् देशः कालो भावो गन्तव्यो ऽध्वाचेति वार्तिकात्सर्वत्र तथा कल्पनात् वैयर्थ्यापत्त्येति भवदुक्तरीत्या ऽवच्छेदकावच्छेदेनोभयप्राप्तिसम्भवेन कर्तरि षष्ठीनिषेधस्य प्राप्त्या कर्तृग्रहणस्याव्यावर्त्यकतयोभयप्राप्तौ कर्मणीतिसूत्रस्यच वैयर्थ्यापत्तिरित्यर्थः भाष्यप्रामाण्येनेति इत्थंहि तत्र भाष्यम् आत्ममानइति किमर्थम् परमाने माभूत् कृतेपि तत्र प्राप्नोति कुत एतत् आत्मन इति कर्तरि षष्ठीमान् इत्यकारो भावे स्वकर्मकमानत्वत्परकर्मकमानोपि स्वकर्तृक एव भवति नैष दोषः

आत्मन इति कर्मणि षष्ठी कर्तृकर्मणोरिति ननुच कर्तर्यपि तेनैव विधीयते तत्र कुत एतत् कर्मणि भविष्यति न पुनः कर्तरि एवन्तर्हि आत्मग्रहणसामर्थ्यात्कर्मणि विज्ञास्यते अत्र कैयटः आत्मशब्दः प्रत्यगात्मनः परस्य व्यावृत्तिङ्करोति तत्र यदि कर्तरि षष्ठी स्यादात्मग्रहणमनर्थकं स्यात् कर्तृसम्बन्धाव्यभिचारान्मननक्रियाया इति अत्र भाष्ये आत्मग्रहणसामर्थ्यात्कर्मणि षष्ठी प्रतिपादिता नतूभयप्राप्ताविति कर्तरि निषेधेन तस्माद्यत्रोभयोः प्रयोगस्तत्रोभयोः प्राप्तिरिति सामर्थ्यपर्यन्तकथनेन कल्प्यते स्यादेतत् सङ्ख्या विभक्त्यर्थ इति नोचितम् कर्मणि द्वितीयेत्यादिसूत्रेषु कर्मणोत्यादिसप्तम्याः श्रुतानुमितयोरिति न्यायेन श्रुतद्वितीयादिभिरेव सम्बन्धस्य युक्तत्वात् एकत्वादिकन्तु शास्त्रान्तरैकवाक्यतया लभ्यते किञ्च सङ्ख्यायाः सङ्ख्येयपरतन्त्रतया विशेषणत्वस्यैव घटोस्ति पटोस्तीत्यादौ दृष्टत्वेनैकत्वविशिष्टे कर्मणीत्येवार्थ उचितः किञ्च स्वौजसमौडितिसूत्रेण द्वितीयायाः कर्मणि सिद्धतया कर्मणि द्वितीयेतिसूत्रं नियमार्थमिति भाष्यसिद्धान्तः अत एव 'सुपाङ्कर्मादयोप्यर्थाः सङ्ख्याचैव तथा तिङाम् प्रसिद्धो नियमस्तत्रेति' भाष्ये उक्तम् सच नियमो ऽर्थस्य वा प्रत्ययस्यवेत्यन्यदेतत् यत्तु देशकालादिकर्मणः सर्वत्रैवाकर्मकधातुप्रयोगे ऽकर्मकधातुयोगे देशः कालो भावो गन्तव्यो ऽध्वाच कर्मसंज्ञक इति वार्तिकात्सम्भव इति प्रागभिहितम् तन्न तादृशवार्तिकानुपलम्भात् भावकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् देशश्चेति भाष्ये उक्तम् तत्र हिशब्दोपादानेन यदा धात्वर्थकरणकव्यापने ऽर्थे धातोर्वृत्तिस्तदा तेषाङ्कर्मत्वस्य प्रसिद्धत्वन्ध्वनितम् यदातु जननादिरूपार्थमात्रस्य धात्वर्थत्वविवक्षा तदा न तेषाङ्कर्मत्वम् अत एव समां समां विजायत इति सूत्रव्याख्यानावसरे समायां समायां विजायत इति विग्रहप्रदर्शनभाष्ये संगच्छते तादृशवार्तिकसत्वे तेन द्वितीयायास्तत्र साधुत्वस्य बोधनेन तदसङ्गतिः स्पष्टैव नच कोचित्कालादिभिरकर्मका इति भाष्यस्य तर्ह्यसङ्गतिरिति वाच्यम् धातुमात्रस्य स्वार्थकरणकव्यापने ह्रत्या केचिदपि कालादिकर्मसम्बन्धाभाववन्तो नेति तदर्थात् एवञ्च कालादिकर्मणाम्प्रयोगत्वसामानाधिकरण्येन सत्वमित्यत्र तत्तात्पर्यम् एवञ्च सङ्ख्या विभक्त्यर्थ इति पक्षो न युक्त इति अत एव वक्ष्यति कारकं विभक्त्यर्थ इति पक्ष इत्यादि ननु यत्रोभयोः प्रयोगस्तत्रैव चेद्-

भयप्राप्तिस्थदा क्त्वानामिति विभक्तसूत्रस्थ यदुदाहरणं भाष्योक्तङ्गाम-माकृष्ट्या शाखेति तस्य कथमुपपत्तिरत आह आकृष्टव्येति आश्रयपदा-ध्याहारस्य प्रयोजनन्तु यत्राश्रयस्मतिपाद्यन्तत्र कर्ता ऽसमर्थ आकर्षणाकि-यायां दुराकर्षाच शाखा परन्तु सा तादृशेन कर्त्रा आकृष्यत इत्यर्थस्य प्रतिपत्तिस्थदैव तत्प्रतिपत्तिरिति इत्थम्भाष्यकारमतेनोदाहरणं संयोज्य मुनित्रयमतेनाह आदिनेति अकर्तरिच कारके संज्ञायामिति सूत्रे संज्ञाया-मित्यस्य प्रायिकत्वाल्लाभ इत्यत्र कर्मणि घञ् भवन्निष्ठव्यापारजन्यलाभा-श्रयो जिज्ञासाविषयो ऽश्वः क इति ततः शाब्दबोधः अत्राश्वपदादन-भिहिताधिकाराभावे षष्ठी स्यात्संख्यायाः कर्मनिष्ठाया अनभिधानादतः सूत्रमावश्यकमिति 'सुपाङ्कर्मादयोप्यर्थाः संख्याचैव तथा तिङामिति' भाष्योक्तरीत्या कर्मादीनां विभक्तिवाच्यत्वे तथा वाक्यनिष्पत्तिस्थथाह सङ्ख्याया इति विभक्तिद्योत्यसङ्ख्याया इत्यर्थः विशेषणतया भानादिति न-च घटपटादिशब्दप्रकृतिकविभक्त्यन्तशब्दजन्यशाब्दबोधो यद्यपि सङ्ख्याप्र-कारको जायते तथापि सङ्ख्यावाचकेभ्यो यत्र विभक्तिस्तत्र सर्वत्र न वि-भक्त्यर्थसङ्ख्यायाः प्रकारत्वानुभव इति वाच्यम् आदशतः संङ्ख्यायाः स-ङ्ख्येये इति सिद्धान्तात्तेभ्यो विभक्तौ संङ्ख्यायाः प्रकारता स्यष्टैव यत्रतु ब्राह्मणानां विंशतिरिति सङ्ख्यानार्थकशब्दादेकवचनन्तत्रापि विभक्तिद्यो-त्यमेकत्वम्प्रकृत्यर्थे तादृशसमुदाये प्रकारतया भासत एवेत्याशयात् ननु सङ्ख्येयार्थकशब्दाद्भावप्रत्यये सति तज्जन्यशाब्दबोधेन सङ्ख्यायाः प्रका-रत्वम् नच तस्माद्विभक्तावेकत्वं पश्येत्यादौ विभक्त्यर्थैकत्वम्प्रकारतया भा-सत एवेति वाच्यम् तत्रापि प्रत्ययार्थसङ्ख्यायाः प्रकृत्यर्थसङ्ख्यातो ऽन-तिरेकात् एवन्द्व्येकयोरित्यत्रापि न सङ्ख्यायाः प्रकारत्वम् नचादशतः स-ङ्ख्याः सङ्ख्येय इति सङ्ख्ययाव्ययेति सूत्रस्थसिद्धान्तविरोध इति वाच्यम् तेषां संख्येयार्थकत्वम्बहुषु प्रसिद्धं सङ्ख्यार्थकत्वन्तु क्वचिदेवेत्याशयात् एवञ्च सर्वत्रेत्यसङ्गतमितिचेन्न सर्वत्रेत्यस्यानेकप्रयोगेष्वित्यर्थात् नन्वेकत्व-स्याधेयतया एकत्ववद्यत्कर्मेत्येव व्याख्यानमुचितमित्यत आह वृक्षे शाखे-तीति तत्र यथा शाखाया वृक्षावयवत्वेन समवायिकारणतया शाखैव वृक्षाधारस्तथापि स्वनिष्ठाधारतानिरूपिताधेयतासम्बन्धेन सा वृक्षनिष्ठेति तादृशसम्बन्धावच्छिन्नाधारत्वं वृक्षस्य विवक्षितमिति वृक्ष इति सप्तमी

तथात्रापीति भावः एवमन्यत्रापि बोध्यम् एवं विवक्षया प्रसिद्धस्य लौकिकप्रयोगस्योपपत्तिः कार्या नतु सर्वत्र तेन शुक्ले वर्णे घट इति न प्रयोगः किन्तु घटस्य शुक्ल इति वा भवति एवञ्च अधिकरणसप्तम्यङ्गीकारेच प्रत्याख्यातमित्यत्र हेत्वाकाङ्क्षायामाह न्यायेनैवेति उक्तार्थानामप्रयोग इति न्यायेनेत्यर्थः नच द्योतकवाचकयोर्द्योतकयोः समुच्चयो दृष्टः द्वौ ब्राह्मणौ व्यतिलुनीत इत्यादौ यथा उक्तार्थानामितितु तत्र न प्रवर्तते द्विर्बद्धं सुबद्धमिति न्यायात् तथा कृतः कटः क्रियते कट इत्यादावपि स्यादिति अनभिहितइतिसूत्रङ्कर्तव्यमिति वाच्यम् यद्यपि क्वचित्समुच्चयो दृष्ट इत्यत्रापि तथा स्यादिति वक्तुमशक्यमन्यथोक्तार्थानामिति न्यायस्य निर्विषयत्वापत्तिरिति लक्ष्यानुरोधेन प्रकृते तस्य न्यायस्याश्रयणं युक्तमित्याशयात् अत एव प्राप्तोदको ग्राम इत्यादौ समासेन कर्मादेरुक्तत्वात्सा सा विभक्तिर्न भवति अत्रेदं बोध्यम् कर्मादीनां द्योत्यत्वमेव युक्तम् यथैकत्वादिसङ्ख्यायाः प्रकारतया भानस्यानुभवसिद्धतया तेषान्द्योत्यत्वन्तथा हरिम्भजतीत्यादिभ्यः कर्मीभूतहरिकर्मकभजनमित्येवंरीत्या शाब्दबोधस्यानुभवसिद्धत्वात् सुपां कर्मादयोप्यर्था इत्यादिभाष्ये ऽर्थपदन्द्योत्यतया तेषाम्बोध्यत्वेन निर्वाह्यम् अत एव कर्मणि द्वितीयेत्यादिशास्त्राणान्नियमार्थत्ववर्णनं सङ्गच्छते उक्तार्थानामिति न्यायसञ्चारस्तु प्रातिपदिकार्थलिङ्गेति सूत्रव्याख्यानावसरे विभक्तेरुक्तार्थत्वादप्राप्तौ वचनमित्यनेन परममूले एव कृत इति ननु मूले सङ्ख्या विभक्त्यर्थ इति पक्षे सूत्रारम्भादित्यनेन सङ्ख्यातिरिक्तश्चतुष्कम्प्रातिपदिकार्थ इति पक्षे सूत्रारम्भस्यावश्यकता लभ्यते तत्र देवदत्तो वामेनाक्ष्णा पश्यतीत्यादौ विशेषविधिनिषेधयोः शेषनिषेधाभ्यनुज्ञाफलकत्वमिति न्यायेन यथा दक्षिणेन न पश्यतीति लभ्यते तथा ऽत्रापि कारकस्य विभक्त्यर्थतापक्षे सूत्रारम्भस्यानावश्यकता लभ्यत एवेति कारकं विभक्त्यर्थ इति पक्षे इति विशेषाभिधानमनर्थकमत आह अनेनेति कारकं विभक्त्यर्थ इति ग्रन्थेनेत्यर्थः पञ्चकेति अयम्पक्षः कुत्सित इति सूत्रभाष्य एवोक्तः तत्राहि स्वार्थमभिधाय शब्दो द्रव्यमाह समवेतम् समवेतस्य वचने लिङ्गसङ्ख्या विभक्तिश्च अभिधाय तान्विशेषानपेक्षमाणश्च कृत्स्नमात्मानम् प्रियकुत्सनादिषु ततः प्रवर्तते ऽसौ विभक्त्यर्थ इति कर्मणि द्वितीयेत्यादिसूत्राणान्नियमार्थत्ववर्ण-

नमपि पञ्चकम्प्रातिपदिकार्थे इति पक्षे साधु सङ्गच्छते सामान्यसूत्रेणा-निर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीति न्यायेन विभक्तेर्विशेषाभिधायक-ताया लाभात् अत एव यत्र न विभक्तेः श्रवणन्दधिराजेत्यादौ तत्रा-पि पञ्चकप्रतीतिः लोपमजानतोपि बोधाल्लुप्तविभक्तिस्मरणेन सर्वेषाम्बो-ध इतितु न युक्तम् अत एव कीतात्करणपूर्वादिति सूत्रभाष्ये गवा कीतेत्यादावतिप्रसङ्गमाशङ्क्य विभक्त्या व्यवधानान्नेति समाहितम् यदि करणस्य विभक्त्यर्थत्वं स्यात्तदा विभक्त्यन्तस्य करणार्थतया समाधाना-सङ्गतिः स्यादेव अपिशब्दो मूलोक्तसङ्ख्याविभक्त्यर्थ इति पक्षसमुच्चायकः तत्रेति पञ्चकपक्षेत्यर्थः उक्तेपि स्यादिति समुच्चयस्यान्यत्र दृष्टत्वात् पू-र्वोपात्तापिशब्दसमुच्चितार्थस्यदृष्टप्रतिपत्तये पुनराह एवमिति पञ्चकपक्षव-दित्यर्थः पञ्चकपक्षस्य मुख्यत्वसूचनायात्र सादृश्यप्रदर्शनम् तत् अनभि-हित इति सूत्रम् एवञ्च मूले सङ्ख्या विभक्त्यर्थ इत्यस्य तन्मात्रं विभ-क्त्यर्थ इत्यर्थः ननु तद्वत्कारकं विभक्त्यर्थ इति ग्रन्थस्यापि कारकमात्रं विभक्त्यर्थ इति पक्ष इत्यर्थो लभ्यते सच न युक्तः स्वार्थादित्रयस्य प्रातिपदिकार्थत्वपक्षेप्यनावश्यकत्वस्य लाभादत आह एवञ्चेति यत्रय-त्र पक्षे इति त्रिकम्प्रातिपदिकार्थ इति पक्षे सङ्ख्याकारके विभक्तिवाच्ये एव संङ्ख्यात्वचतुष्कं प्रातिपदिकार्थः कारकं विभक्त्यर्थ इति पक्षेचेत्यर्थः अनावश्यकमिति उक्तार्थानामिति न्यायेनैव सिद्धेरिति भावः यद्यपि य-च्छब्दयोगः प्राथम्यमित्यादुद्देश्यलक्षणम् तच्छब्द एवकारश्च स्यादुपा-देयलक्षणमित्यभियुक्तोक्तेर्यत्र द्विरुक्तयत्पदेन नानाव्यक्तीनामुपस्थितिस्तत्र तावन्निष्ठोद्देश्यतावच्छेदकव्यापकत्वं विधेयसंसर्गे भासते एतद्भासनार्थमेव वीप्सायान्द्विर्वचनमेवञ्चैकेन तत्पदेन तावद्व्यक्तिपरामर्शेन निरुक्तव्याप-कत्वलाभान्न तत्पदे वीप्सा अत एवाकाथितञ्चेति सूत्रभाष्ये 'कारकञ्चे-द्विजानीयाद्यां याम्मन्येत सा भवेदि'त्यत्र वीप्साया विवक्षितत्वेपि तत्पदे द्विर्वचनन्न कृतम् अत एवच यो यो धूमवान् सोग्निमानिति नैयायिक-वृद्धप्रयोगसङ्गतिः एवञ्च तत्र तत्रेत्यनुपपन्नम् तथापि 'यं यन्देशं समुद्रस्य जगाम स महाकपिः स स तस्याङ्गपातेन सोन्माद इव लक्ष्यत' इति रामायणीयप्रयोगा'द्यां याम्प्रियः पश्यति कातराक्षीं सा सा ह्रिया नम्र-मुखी बभूवे'ति महाकविप्रयोगाच्च तत्पदेपि द्विर्वचनप्रवृत्तिः स्यादृष्टप्रतिपत्तये

भवतीति न दोषः । तत्प्रीतिरेवेति हरिप्रीतिरेवेत्यर्थः एवकारेण तदनुकूलव्यापारनिरासः ननु क्रियाव्याप्यत्वेनेति मूलमसङ्गतम् क्रियानिष्ठव्यापकतानिरूपितव्याप्यतायाः कर्मण्यसत्वादत आह क्रियासम्बन्धित्वेन इति तथाचात्र व्याप्तिसम्बन्ध एव विवक्षितः ननु क्रियाशब्दः कर्तृनिष्ठव्यापारबोधकस्तत्सम्बन्धित्वञ्च न कर्मण इत्यत आह तज्जन्येति तत्वम् सम्बन्धित्वम् एवमेवेति मौलप्रयोगाद्व्यापारविशेष्यकः शाब्दबोधः कर्माख्यातेपीति प्रतीयते यद्यपि तथाप्येवन्तात्पर्येण न मूलकृता तथोक्तमित्याशयेनाह धात्वर्थेति कर्तृप्रत्ययसमभिव्याहाराद्व्यापारविशेष्यकफलप्रकारकः कर्मप्रत्ययसमभिव्याहाराच्च व्यापारप्रकारकफलविशेष्यकः शाब्दबोधः उभयथापि धात्वर्थविशेष्यकत्वस्य न क्षतिरिति भावः पक्वस्तण्डुल इत्यादिभ्यः फलविशेष्यकबोधः सर्वानुभवसिद्ध एव अत एव प्रत्ययानाम्यक्त्वर्थविशेष्यान्वय्यर्थप्रतिपादकत्वमिति नियमस्य न त्यागः स्वाभिमतेर्थे साधकमप्याह अत एवेति भिन्नार्थत्वादिति अस्य वृत्तिबोध्यार्थबोधकवाक्यादित्यादिः समानविशेष्यबोधजनकत्वंहि समानार्थत्वन्तच्चात्र नास्तीत्येवंविग्रहे न क्यच् किन्तु पुत्रमिच्छतीति विग्रह एवेति तत्वम् नच कर्मणि यत्र कृत्प्रत्ययस्तत्र फलस्यास्तु व्यापारविशेष्यता कर्माख्यातेतु तत्सत्वे मानाभाव इति वाच्यम् इष्टः पुत्र इत्यत्र यथोभयोः पदयोः सामानाधिकरण्यन्तथा इष्यते कल्पम्पुत्रइत्यत्रापि सामानाधिकरण्यमिति फलस्य विशेष्यत्वस्वीकारस्यावश्यकत्वात् अत एव भाष्यकृता अथेह कस्मान्न भवति इष्टः पुत्रः इष्यते पुत्र इति इत्याशङ्क्य भिन्नार्थत्वादित्येकमेव समाधानङ्कृतम् । वाक्यमेवेति इष्टः पुत्र इत्यादि नतु क्यच् क्यजन्तस्याकर्मकतया ततः कर्मणि प्रत्ययानुत्पादादिति भावः तस्याकर्मकत्वन्तु धात्वर्थसङ्गृहीतकर्मकत्वेन बहिर्भूतकर्माकांक्षाया अभावाच्च यत्र कर्मणि लकारस्तत्रैकाश्रयकव्यापारजन्या पुत्रकर्मिका इच्छेति बोधः पुत्रमिच्छतीत्यस्मात्तु एकाश्रयकपुत्रकर्मकेच्छानुकूलव्यापार इति बोध इति भिन्नार्थत्वं स्पष्टमेव प्रतीकान्तर इति स्वशब्देनोक्तत्वादित्येतद्घटकस्वशब्देनेति प्रतीक इत्यर्थः अत्रापीति भिन्नार्थत्वोपपादके इह भवन्त इत्यादिप्रतीक इत्यर्थः प्रतीकान्तरे एतदर्थकथनम्प्रासङ्गिकमेतत्तु तस्यावश्यकत्वमेवेत्याशयेनाह अत्रैवचेति नच हरिः सेव्यत इत्यस्माद्यदि फलविशेष्यकबो-

धस्तदा फलस्यैव प्राधान्येन कालान्वयोपि तत्रैव स्यादिति वाच्यम् व्यापारेणैव तस्य साकाङ्क्षत्वाद्विशेषणीयभूतेपि तस्मिन्कालान्वयात् अत एव 'क्रियाभेदाय कालस्तु सङ्ख्या सर्वस्य भेदिकेति' हरिणोक्तम् नचैवम्फलानुत्पत्तौ व्यापारस्य सत्वे पच्यत इति स्यादिति वाच्यम् इष्टापत्तेः पचतीत्यादिभ्यो व्यापारविशेष्यकबोधस्येष्टतया प्रधानभूते तस्मिन्कालान्वय उचित एव नच पच्यते तण्डुल इत्यादिभ्यः फलविशेष्यकबोधस्वीकारे प्रधानीभूतधात्वर्थाश्रयत्वे तण्डुलस्य कर्तृत्वापत्तिरिति वाच्यम् कर्तृप्रत्ययसमभिव्याहारे इत्यस्यापि तत्र निवेशात् अत्र लः कर्मणीत्यनेन कर्मणि लकारविधानमेव मानम् एतेन पच्यतइत्यादिभ्यः फलविशेष्यकबोधस्वीकारे फले कालान्वयः स्यात् एवङ्क्रियाप्रधानमाख्यातमिति वचनविरोधश्च क्रियापदस्य व्यापार एव प्रसिद्धः किञ्च प्रधानीभूतधात्वर्थाश्रयस्य कर्तृत्वेन प्रधानफलाश्रयतण्डुलादेरेव कर्तृत्वापत्तौ देवदत्तेन पच्यते तण्डुल इत्यत्र देवदत्तपदात्तृतीयानुपपत्तिः किञ्च पाकानुकूलक्रियाम्पश्येत्यर्थे पचति पश्येतिवत्पच्यते पश्येत्यपीष्यते तच्च फलस्य प्राधान्ये न स्यात् क्रियायाः फलविशेषणत्वात् नाप्यस्मिन्मते सुप आत्मन इति सूत्रस्थभाष्यविरोधः पुत्रीयतीति शब्दजन्यशाब्दबोध एकाश्रयकव्यापारजन्यापुत्रकर्मिकेच्छेत्याकारकस्तस्मिन् कर्तुः कर्मण इच्छाया विषयता इष्यते पुत्र इत्यस्मात्तु जातशाब्दबोधेन कर्तुः विषयत्वमिति भिन्नार्थत्वं स्पष्टमेवेति परास्तम् उक्तरीत्या ऽनुपपत्तिपरिहाराय विशेषणीभूतेपि व्यापारे कालान्वयस्य स्वीकारात् भावप्रधानमाख्यातं सत्वप्रधानानि नामानीत्यस्य यास्कीयवचनस्य भावपदस्य धात्वर्थपरतया क्रियाप्रधानमिति वचने क्रियापदस्य साध्यत्वेन प्रतीयमानार्थपरतया चोपपत्तेश्च तण्डुलादेः कर्तृत्वापत्तिस्तु न कर्मणि लकारविधानानुपपत्तेरिति प्रागेवावेदितम् अस्मादेव ज्ञापकात्कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयस्यैव कर्तृत्वमिति स्वीकारात् किञ्च वृत्तिः क्यजन्तात्तदर्थमध्ये न कर्तुः प्रवेशो यथा तथा पुत्रअमुइषइति समुदायार्थेपि न तस्य प्रवेशः एवमिष्यते पुत्र इत्यर्थेपि न तस्य प्रवेश इति कर्तारङ्गृहीत्वा भिन्नार्थत्वोपपादनमयुक्तमेव विक्लित्त्यनुकूलक्रियाम्पश्येत्यर्थे पच्यते पश्येत्यस्य साधुत्वे मानाभावाच्च यत्तूक्तम्याक् धात्वर्थ एव विशेष्य इति तद्घटकैवकारेण प्रथमान्तार्थस्यापि निरासे ध्वनिते प्रथमान्ता-

र्थविशेष्यकशाब्दबोधस्वीकारे दोषोप्यस्तीति प्रतिपादयितुं शङ्कते नन्वित्यादिना नव्यपदोपादानेन तच्चिरन्तनमते ऽस्मदभिमतरीत्यैव बोध इते ध्वनितम् । इदञ्चेति सिद्धान्तार्थसूचकवाक्यञ्चेत्यर्थः रूपप्सूत्रभाष्य इ[illegible] तत्रहि पचतिरूपम्पचतोरूपमित्यादेरसिद्धिमाशङ्क्य क्रियाप्रधानमाख्यातन्द्रव्यप्रधानन्नाम यतः क्रियाम्पृष्टस्तिङाचष्टे किञ्चैत्रः करोति [illegible]तीति द्रव्यम्पृष्टः कृताचष्टे कतरश्चैत्रो यः पाचक इत्युक्तम् अत्र कृतेत्यस्य कृदन्तप्रकृतिकसुबन्तेनेत्यर्थः कृत्पदञ्च तद्धितादेरप्युपलक्षणम् ह्रस्वो नपुंसक इति सूत्रभाष्येपि प्रातिपदिकग्रहणं तावन्न व्याडित्यर्थमित्युक्का तद्व्यावर्त्य रमते काण्डे इत्यभिधाय रमते इति क्रियाप्रधानम् काण्ड इति विभक्त्यर्थप्रधानञ्चैतयोरर्थयोर्लिङ्गसङ्ख्याभ्यां योगोस्तीत्युक्तम् ननु पूर्वोक्तभाष्यद्वयेपि क्रियापदस्यैव सत्वेन व्यापारविशेष्यकबोध एवायातीत्यत आह अंशद्वयस्यापीति क्रियायाः प्राधान्यन्तु प्रत्ययार्थनिष्ठप्रकारतानिरूपितविशेष्यत्वम् नामार्थनिष्ठप्रकारतानिरूपितविशेष्यत्वञ्च आद्यं यथा पचति देवदत्त इत्यादौ अन्त्यम्भूयते घटेनेत्यादौ अत्रेदं बोध्यम् धातोः फलव्यापारयोः पृथक्शक्तिः कर्तृप्रत्ययसमभिव्याहारे व्यापारस्य कर्मप्रत्ययसमभिव्याहारेतु फलस्य प्राधान्यमिति सम्प्रदायः परेतु फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफलेच पृथक्शक्तिः तत्प्रत्ययसमभिव्याहारश्च तत्तद्विशेष्यकबोधनियामकः प्रामाणिकञ्चौरवन्न दोषायेत्याहुः द्रुत्व इति क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरमित्यत्र कर्तृकर्मव्यवहितामसाक्षाद्धारयक्रियामित्यत्रच हारग्रन्थ इत्यर्थः अत्र क्रियात्वं साध्यत्वेन प्रतीयमानत्वरूपन्तेन हिरुगादिषु नातिव्याप्तिः तेषु क्रियाप्रधानत्वव्यवहारस्तु क्रियामात्रविशेषणत्वेनोपपाद्यः सिद्धान्तत्वेनाप्रतीयमानत्वेनेति उक्तद्विविधक्रियायाङ्कारकान्वयः यत्तु क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकवैजात्यावच्छिन्ने कारकान्वय इति तन्न ओदनम्भुक्का ग्रामङ्गच्छतीत्यादौ क्त्वाप्रकृत्यर्थे कारकान्वयानापत्तेः अन्येतु यद्यप्याख्यातमाख्यातेनेत्यत्राख्यातपदन्तिङन्तपरम् तथापि आख्यायते सर्वप्रधानीभूतोर्थो ऽनेनेति व्युत्पत्त्या ऽऽख्यातपदेन धातुरेवोच्यते अत एव नामाख्यातोपसर्गनिपाता इति भाष्ये निरुक्तेच प्रकृतीनामेवोल्लेखः कृतः अत एव नामान्याख्यातजानीति शाकटायनोक्तेरप्युपपत्तिः अत एवोणादयो बहुलमिति सूत्रे भाष्ये सर्वत्रा-

मधातुजमाह निरुक्ते व्याकरणे शकटस्यच तोकमित्युक्तम् एतेन कृतिराख्या-
तार्थः भावना आख्यातार्थ इति नैयायिकानामपवादो न श्रद्धेयः आख्या-
तमाख्यातेनेत्यादौ त्वाख्यातपदन्धातुप्रकृतिकतिङन्ते लाक्षणिकमिति एवञ्च
विशेष्यतासम्बन्धेन कारकप्रकारकशब्दबुद्धिम्प्रति धातुजन्योपस्थितिः का-
रणमिति कार्यकारणभावः कर्तृकर्मोभयसाधारण एव नचोक्तकार्यकार-
णभावात्यक्तण्डुल इत्यत्रापि न तण्डुलपदार्थस्य धात्वर्थविशेषणत्वापत्ति-
रिति वाच्यम् सत्वप्रधानानि नामानीति विशेषवचनेन द्रव्यप्राधान्यस्यो-
पपत्तेरित्यूचुः। वस्तुतस्तु धातुमात्रस्योक्तव्युत्पत्त्या आख्यातपदेन ग्रहणे
आख्यातमाख्यातेनेत्यत्र लक्षणाया आपत्तेः शिश्ये इत्यादि तिङन्ते
ऽतिव्याप्तेश्चाख्यातपदन्तिङन्तपरमेवेत्याशयेन व्याचष्टे आख्यातशब्देनेति
अत एव आख्यातपदस्याख्यातावयवधातुलाक्षणिकत्वादेव मूले अत ए-
वेति धात्वर्थविशेष्यकबोधस्वीकारादेव। एकवाक्यत्वाभावमपपादयति
पाककर्तृकेति ननु नैकं वाक्यमित्ययुक्तम्पदसमूहस्यैव वाक्यत्वादत आह
साधु इति शेष इति लौकिकवाक्यत्वलक्षणानाक्रान्तत्वादिति भावः लौ-
किकैकवाक्यत्वञ्च 'सुप्तिङन्तचयो वाक्यङ् क्रियावा कारकान्विते'त्यनेना-
मरसिंहेनोक्तम् अत्र वाशब्दश्चेदर्थे एवञ्च कारकान्वितक्रियाबोधकत्वे स-
ति सुप्तिङन्तचयो वाक्यमिति फलितम् सुप्तिङन्तचय इत्यस्य सुबन्तचयति-
ङन्तचयइति सुप्तिङन्तचय इत्यर्थः कारकपदार्थस्तु क्वचित्सुबन्तवाच्यः क्व-
चित्तिङन्तवाच्यश्च आद्यं यथा देवदत्तेन शयितव्यमिति अत्रास्तीत्यध्या-
हारलभ्यत्वेपि तदननुपादानात्सुबन्तचयत्वमव्याहतम् द्वितीयं यथा पच-
तिभवतीत्यादि तृतीयन्तु चैत्रः पचतीत्यादि क्रियावा कारकान्वितेत्येतदु-
पादानन्तु दध्यदाडिमानि षडपूपा इत्यादीनां समुदायस्यैकवाक्यत्वव्यव-
हारापत्तिवारणाय एकतिङ् वाक्यमितितु समानवाक्ये निघातयुष्मदस्म-
दादेशा इत्येतद्विषयं क्वचित्तिङन्तस्य ब्रूहिब्रूहीत्यस्य यत्र द्विर्वचनन्तत्र प्र-
श्नोत्तरत्वे ऽनन्त्यस्यापि प्रश्नाख्यानयोरित्यनेन यत्र प्लुतस्तद्विषयञ्च जैमि-
निनातु अर्थैक्यापादकं वाक्यं साकाङ्क्षञ्चेद्विभागे स्यादित्युक्तम् विभागे
पृथक्प्रयोगे यदि साकाङ्क्षं स्यात्तदा तादृशसाकाङ्क्षपदसमुदायस्यार्थै-
क्यादेकविशेष्यकाविशिष्टार्थविषयकप्रतीतिजनकत्वादेकवाक्यत्वव्यवहार इति
तदर्थः अत्र कारकान्वितक्रियाबोधकसुप्तिङन्तचयस्य देवदतः पचतीत्य-

स्यैकवाक्यत्वं सर्वमतसिद्धन्तच्च प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकर्तृमते नोपपद्यत इति तेषान्नादृशोद्घोषो नादर्तव्य इति बोध्यम् यदि तेषाम्मतसिद्धमेवैकवाक्यत्वं शास्त्रीयकार्यप्रवृत्तिसम्पादकं स्यात्तदा वाक्यादेरमन्त्रितस्येति द्विर्वचनस्य देवदत्त शिश्ये त्वयैत्यादौ चरितार्थस्य कर्तरि कर्मणि वा यत्र लकारस्तत्र प्रवृत्तिर्न स्यात् यत्तु क्रियावेत्यनेनार्थनिष्ठैकवाक्यत्वसूचकं लक्षणान्तरङ् कृतमिति तन्न वचो ऽशब्दसंज्ञायामिति कुत्वनिषेधेन तत्र वाच्यत्वव्यवहारस्यैव मुनिसम्मतत्वादत एवोक्तं साधु इति शेष इति तस्य तत्वमिति एकवाक्यत्वमित्यर्थः चैत्र इत्यस्याध्याहारेण पाकानुकूलकृतिमांश्चैत्रो व्रजनानुकूलकृतिमानित्यन्वयबोधस्य सम्भवेनैकवाक्यत्वन्दुर्वारमिति भावः नच प्रथमान्तपदाध्याहाराभावेनैकवाक्यत्वाभावस्योपपत्तिर्भवत्येवेति वाच्यम् कर्तुराख्यातार्थत्वेन तस्य विशेष्यत्वम्प्रत्ययार्थत्वेन स्यादिति पाककर्ता व्रजनकर्त्रभिन्न इति बोधस्यैकविशेष्यकस्य सम्भवात् कृतिराख्यातार्थ इति तु न युक्तम् आख्यातवाच्यसङ्ख्यायाः स्वान्वययोग्यस्य शब्दानुपस्थितत्वेनानन्वितत्वापत्तेः संख्यापि नाख्यातवाच्येतिचेत्यचतीत्यादिजन्यबोधानन्तरङ्कर्ता एक अनेकोवेति संशयापत्तिः पचति पचतइत्यादीनाम्पर्यायत्वापत्तिश्च स्यात् क्रियाप्राधान्यबोधकह्रस्वोनपुंसकइत्यादिसूत्रस्थभाष्यविरोधापत्तिश्चेति दिक् मूले नैयायिकोद्घोष इति कर्तुर्वाच्यत्वे ऽवाच्यत्वेचेति शेषः । अस्य साधुत्वापत्तेश्चेति पचतिव्रजतीत्यस्य साधुत्वापत्तेश्चेत्यर्थः तद्भाष्यकारः यास्कोक्तिभाष्यकारः तच्च नामच अतिरिक्तमिति एवञ्च तेषां सत्वप्राधान्याभावेपि न क्षतिः यदितु पचतिव्रजतिचेति चकारः प्रयुज्यते तदा चशब्दार्थस्यत्युभयोर्विशेषणत्वेनैकवाक्यत्वन्दुर्वारमेव एतेन भवन्मतेपि पचतिव्रजतीत्यनयोरेकवाक्यत्वापत्तिर्दुर्वारैव एककर्तृका पचिक्रियाव्रजिक्रियाचेति बोधस्य सम्भवात् भवन्मतादस्मन्मते एतावानेव विशेषः भवन्मते एकप्रकारकोभयविशेष्यको ऽस्माकम्मतेतूभयप्रकारकैकविशेष्यक इति मूलोक्तञ्चिन्त्यमिति परानुयायिप्रतिपादितमपास्तम् चकारं विना जायमानस्य बोधस्योभयविशेष्यकतया ऽवैक्याभावेन वाक्यभेदस्य सत्वात् चकारस्य सत्वेतु समुच्चयस्यैकस्य विशेष्यतया ऽस्त्येवैकवाक्यत्वमिति प्रागेवाभिहितम् नामपदस्य सुबन्तपरत्वे साधकमाह नमन्त्याख्यातेति ननु पञ्चकम्प्रातिपदिकार्थ इति पक्षे यथा

द्रव्यस्य स्वार्थादिनिरूपितप्राधान्यन्तथा क्रियात्वक्रियाकालकारकसङ्ख्येति-पञ्चकस्य धात्वर्थत्वमिति क्रियाप्रधानमाख्यातं सत्वप्रधानानि नामानीत्य-स्मिन्मतेपि नासङ्गतिरत आह किञ्चेति तन्निरुक्तोत्तरम् भावप्रधान-माख्यातं सत्वप्रधानानि नामानीति निरुक्तोत्तरम् अथ पुनर्यत्र ते उभे भवतो वाक्ये तत्र ते भावप्रधाने आख्यातार्थप्रधाने वाक्ये ह्याख्यातप्र-धानन्तदर्थत्वाद्गुणभूतन्नाम तदर्थस्य भावनिष्पत्तावङ्गत्वादेवन्तावद्वाक्ये आ-ख्यातप्रधानामिति यन्निरुक्तन्तस्य यो ऽर्थः शेषपूरणेन व्याख्यातस्तन्दर्श-यति। यत्रोभे इति व्याख्यानान्तरम् पूर्वोक्तं व्याख्यानम् एवञ्चोत्तरनि-रुक्तानुरोधेन पूर्वनिरुक्तस्यापि तथैवार्थः कल्पनीय इति स्वीयसिद्धान्त इति भावः एवंसति प्रकृतिप्रत्ययौ सहार्थम्ब्रूतस्तयोः प्रत्ययार्थः प्रधान-मित्यौत्सर्गिकस्य नियमस्य तिङन्ते त्यागः उक्तनिरुक्तवाक्यत्वात् स्वक-ल्पितव्याख्यानेतु स्वीयभाष्यविरोधोप्यस्तीत्याह किञ्च कर्तृविशेष्यकेति औत्सर्गिकनियमानुरोधेन कर्तृविशेष्यकबोध इत्यर्थः आपादित इति ओ-दनकर्मकविक्लित्त्यनुकूलभूतकालिकैकत्वसङ्ख्यावद्व्यापाराश्रयाभिन्नदेवदत्तक-र्म्मकदर्शनानुकूलव्यापारविषयकप्रवर्तनाविषयप्रवृत्तिमांश्चैत्र इति हि तस्मा-द्बोधः स्यादेवञ्चात्र शत्रादेः प्रसङ्ग एव नास्ति इति ध्वनितम् ननु क-र्तुः प्रथमोपस्थितत्वात्तन्निमित्ता प्रथमा पूर्वम्भविष्यति ततो दर्शनक्रियायां सम्बन्धेपि जातसंस्कारस्य बाधनन्न सम्भवतीति भाष्याद्यसङ्गतिरत आह यद्यप्यन्तरङ्गेति प्रधानकार्यस्यान्तरङ्गादपि बलवत्त्वं हेतुमतिचेतिसूत्रभाष्ये स्पष्टम् तदाशयः उक्तभाष्याशयः तदनुसारेण उक्तभाष्यानुसारेण अत्रापि मृगशब्दाद् द्वितीयापादानमुक्तरीत्यैवेत्याह मृगस्यति धावनक्रियाविशिष्टस्य मृगस्य कर्मत्वे विशिष्टस्य शुद्धानतिरेकान्मृगस्य दर्शनक्रियाविषयत्वात्कर्म-मस्त्येवेति भावः धातूपस्थितक्रियायाः क्रियान्तरविशेषणत्वे हरिसम्मतिर-स्तीत्याह हरिणेतीति। ननु राज्ञो दण्डधरम्पुरुषम्पश्येत्यादौ राजन्शब्दा-दपि पूर्वोक्तरीत्या द्वितीया प्राप्नोति राजसम्बन्धविशिष्टदण्डधराभिन्नस्य पुरुषस्य दर्शनकर्मत्वन राज्ञापि तद्विषयत्वसम्भवादितिचेन्न अभेदसम्बन्धेन विशेष्यान्वाये यद्विशेषणन्तद्वाचकादपि विशेष्यवाचकपदप्रकृतिकाविभक्ति-सजातीयविभक्त्युत्पत्तिस्वीकारात् कटम्भीष्मङ् कर्वित्यादौ यथा विशेष्य-स्यतु कारकाधिकारीययत्संज्ञाविशिष्टत्वन्तद्बोधिका विभक्तिर्भवत्येवेति भ-

वन्मते मृगस्य विशेष्यतया कर्मत्वेन तद्वाचकाद् द्वितीया प्राप्नोतीति भावः 'श्रुत्वा मामैतन्माहात्म्यन्तथाचोत्क्रमयः शुभा' इतिवार्षम् क्रियायाः ईप्सितत्वे मानन्तु कर्मणा यमभिप्रैतीतिसूत्रस्थङ् क्रियापि क्रियया ईप्सिता भवति कया क्रियया सन्दर्शनादिक्रिययेति भाष्यमेव मन्मते धावनस्य प्राधान्यात्तस्य कर्मत्वेपि तद्वाचकस्याप्रातिपदिकत्वान्न ततो द्वितीया सुबन्तत्तिङन्तशब्दौ रामः पचतीत्यादिशब्दपरौ तयोश्च न विशेषणविशेष्यभावः प्रसिद्ध इत्यत आह तिङन्तेत्यादि स्वोक्तार्थे प्रामाण्यमदर्शयितुमाह स्वतम्भूवादिसूत्रभाष्ये इति तत्र क्रियावचनो धातुरिति न्यासे कथम्पुनर्ज्ञायते क्रियावचनाः पचादय इति प्रश्ने यदेतेषाङ्करोतिना सामानाधिकरण्यम् किङ्करोति पचति किङ्करिष्यति पक्ष्यति किमकार्षीत् अपाक्षीदित्युक्तम् ततः शङ्कितम् अस्तिभवतिविद्यतीनान्धातुसंज्ञा न प्राप्नोति यथाहि भवता करोतिना पचादीनां सामानाधिकरण्यन्दर्शितन्न तथा ऽस्त्यादीनान्निदर्श्यते नहि भवति किङ्करोति अस्तीति इत्यादुयत्का यदि पुनर्भाववचनो धातुरित्येतल्लक्षणं क्रियेतेत्युक्तम् कथम्पुनर्ज्ञायते भाववचनाः पचादयः यदेतेषां भवतिना सामानाधिकरण्यम् भवति पचति भवति पक्ष्यति भवति अपाक्षीदिति कथितम् तादृशन्यासे पचादीनान्धातुसंज्ञा न प्राप्नोति यथाहि भवता क्रियावचने धातौ करोतिना सामानाधिकरण्यान्निदर्शितन्न तथा भाववचने धातौ निदर्श्यते करोतिः पचादीनां सर्वान्कालान्सर्वान्पुरुषान्सर्वाणि वचनान्यनुवर्तन्ते भवति पुनर्वर्तमानकालञ्चैकत्वञ्च तत्र कैयटः भवति पुनरिति नहि भवति पक्ष्यति अभूदपाक्षीत् भवतः पचतः भवन्ति पचन्ति । ततो भाष्यकृतोक्तम् कातर्हीयं वाचोयुक्तिः भवति पचति भवति पक्ष्यति भवत्यपाक्षीदिति प्रश्ने एवैषा वाचोयुक्तिः पचादयः क्रियाः भवति क्रियायाः कर्त्र्यो भवन्ति यद्यपि तावदेतच्छक्यते वक्तुम् यत्रान्याचान्याच क्रिया यत्रतु खलु सैव क्रिया तत्र कथम् भवेदपि भवेत् स्यादपि स्यादिति अत्रैकैव क्रिया तस्याः साध्यसाधनभावो विरुद्ध इति भावः अत्राप्यन्यत्वमास्ति कुतः कालभेदात्साधनभेदाच्च एकस्यात्र भवतेर्भवतिः साधनम् सर्वकालश्च प्रत्ययः अपरस्य बाह्यं साधनम् वर्तमानकालश्च प्रत्ययः यावतात्राप्यन्यत्वमास्ति पचादयश्च क्रियाः भवति क्रियायाः कर्त्र्यो भवंतीत्युक्तम् ननु यो ऽश्वमेधेन यजते स ब्रह्महत्यान्तरतीति

वाक्यादश्वमेधयागकर्त्ता यः स ब्रह्महत्यातरणकर्त्तेति बोधो जायत इति क्रियाविशेषक एव शाब्दबोध इति सिद्धान्तो व्यभिचरित इत्यत आ यो ऽश्वमेधेनेति इत्येव बोध इति एवञ्च न सिद्धान्तभङ्ग इति भावः य त्तदोर्नित्यसम्बन्धादुभयक्रियाकर्तृत्वमेकस्य मनसा निश्चीयत एव नन्वेव म्पचतिभवतीत्यादिभ्योपि यत्कर्तृका पाचिक्रिया तत्कर्तृका भवनाक्रियेति बोधः कस्मान्न भवतीतिचेन्न तत्र तादृशशाब्दबोधजननगमकयत्तत्पदस्य स त्वादत्र गमकाभावात् किञ्च पचतीत्यनेनैव पाचिक्रियाकर्तुर्वर्तमानत्वम वगतमिति भवतीत्यस्य वैयर्थ्यापत्तिश्च अत एव भविष्यति पश्यति अ भूदपाक्षीदिति न भवति नैयायिकमतेतु तथापत्तिरुक्तभाष्यविरोधश्चेति दिक् अन्यत्र उद्योतादौ ननु पदार्थत्वम्पदजन्यप्रतीतिविशेष्यत्वन्तदभाव श्च न प्रकारत्वाभावसाधकः घटादिशब्दजन्यशाब्दबोधे घटत्वादेः प्रका रत्वमस्ति पदजन्यप्रतीतिविशेष्यतातु तेपान्नास्तीत्यत आह तन्नय इति शब्दज्ञानादेवार्थबोध इति नय इत्यर्थः एवञ्चापदार्थत्वादित्यस्य पदज न्यप्रतीतिविषयत्वाभावादित्येवार्थः ननु तन्नयेपिधिर्धेहीत्यादिभ्यो द्वारमि त्यादिशब्दाध्याहाराद्यथा शाब्दबोधस्तथात्रापि तामित्यादिशब्दाध्याहारे ण शाब्दबोधो भवत्वित्यत आह पदाध्याहारस्येति अत्र धावति पश्य प चति भवतीत्यादौ। असम्भवादिति यद्यत्र तामित्यादिपदमध्याह्रियते तदा वाक्यभेदः स्यान्नत्वेकवाक्यतेति पदाध्याहारेप्येकवाक्यताया अ सम्भवादिति भावः सर्वपक्षे शब्दाध्याहारार्थाध्याहारोभयपक्षे संसर्गत्वम संसर्गत्वमेव समर्थसूत्रेत्यादि राज्ञः पुरुष इत्यादिवाक्ये तयोरभिसम्ब न्धस्य षष्ठी वाचिका काष्ठं श्रित इत्यत्र क्रियाकारकयोरभिसम्बन्धस्य द्वि तीया वाचिका भवतीति भाष्याक्षरस्वारस्येन सर्वत्र विभक्त्यर्थस्य संस र्गत्वमेव स्वीक्रियत इति भावः ननु विभक्तिजन्योपस्थितिविषयस्य प दार्थत्वात्प्रकारत्वमेव न्याय्यमत आह शब्दोपस्थितस्यापीति तथाच प दादनुपस्थितस्य प्रकारत्वन्नेत्येव नियम इति भावः मूले फलस्यापी त्थमेव मतभेदेन व्यवस्थेति शब्दाध्याहारवादे फलस्य कर्मतासम्बन्धेन व्यापारविशेषणत्वमर्थाध्याहारवादे कर्मत्वस्य प्रकारत्वमपि सम्भवति वि क्लित्यादिकर्मिका भावनेति शाब्दबोधस्य सम्भवादिति भावः नच फ लस्य कर्मत्वानङ्गीकारेपि शोभनादिपदार्थस्य धात्वर्थफलसमानाधिकरण-

स्य कारकत्वाभावात्तत औत्सर्गिकमेकवचनम्प्रथमाया अस्तु नपुंसकत्वञ्चास्त्विति वाच्यम् निपुणस्त्वम्पचसि मृदु त्वा राजा द्रविणेन योजयति इत्यत्र त्वामौ द्वितीयाया इत्यस्यैव प्रवृत्तिर्भवति प्रथमान्तत्वेतु सपूर्वायाः प्रथमाया विभाषेत्यस्य भवन्मते प्रवृत्तिः स्यात्त्वां वेत्यपि स्यादिति शोभनादिपदाद् द्वितीयैव भवतापि स्वीकार्येत्याशयात् सङ्गृह इति कर्मप्रत्ययसमभिव्याहारे फलव्यापारयोर्विशेष्यविशेषणभावव्यत्यासस्यानुभवसिद्धत्वेन फलनिरूपिता प्रकारता व्यापारे ऽस्ति तस्य तम्प्रति कर्तृत्वमप्यस्तु भावनाकर्तृका विक्लित्तिरित्यादिप्रकारेण शाब्दबोधोस्तु तत्कर्तृत्वविषये मानव्यवस्थातूत्करीत्यैव स्वीकार्येति भावः । स्यादेतत् शोभनम्पचतीत्यादौ कर्मणि फले ऽभेदेनान्वितशोभनार्थवाचकाद् द्वितीयावज्ज्योतिष्टोमेन यजेतेत्यादौ करणफलान्वयिवाचकात्तृतीयावच्च शोभनेन पक्व इत्यादौ शोभनादिपदार्थस्य कर्तृव्यापारे ऽभेदेनान्वितस्य कर्तृत्वमिति तद्वाचकात्तृतीयाया अपि साधुत्वं स्यात् नचेष्टापत्तिः कतृकर्मणोः कृतीतिसूत्रव्याख्यानावसरे शब्देन्दुशेखरे स्तोकम्पाकइत्यादौ स्तोकपदात्षष्टीवारणाय धात्वर्थे भेदसम्बन्धेनान्वयि यत्कर्म तद्वाचकात्षष्ठी भवति कर्तृसाहचर्यादित्युक्तत्वद्विरोधापत्तेः भवन्मते कर्तुरप्यभेदेनान्वयस्य दर्शनादितिचेत् सत्यम् परेत्वित्यादिनोपदर्शितं यन्मतम्फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले धातोः पृथक्शक्तिः कर्तृकर्मवाचकप्रत्ययसमभिव्याहारश्च तत्तदर्थोपस्थितौ तात्पर्यग्राहक इति तद्रीत्या पक्व इत्यत्र व्यापारस्य विशेषणतया भासमानस्य पदार्थैकदेशतया तत्राभेदेन शोभनाद्यन्वयासम्भवात् नच शोभनम्पचतीत्यत्र फलावच्छिन्नव्यापारस्योपस्थितिरस्तीति तत्रापि फलस्य पदार्थैकदेशतया तत्र कथं शोभनादिपदार्थान्वय इति वाच्यम् तत्र तत्प्रत्ययानुपूर्वमित्युक्तज्ञापकात्तथान्वयस्वीकारेपि प्रकृते पदार्थैकदेशव्यापारे तथान्वयस्वीकारे मानाभाव इत्याशयात् ननु पचतिभवतीत्यादौ पृथक्पदाभ्यामुपस्थितयोस्तथान्वयो ऽस्तु नाम पक्व इत्यादौ त्वेकेनैव पदेनोपस्थितयोस्तथान्वयस्यादृष्टतया ऽध्याहारस्यासम्भवदुक्तिकतयाचेत्थमेवेत्यनुपपन्नमित्यत आह सर्वसम्मत इति प्रकृतेपीति पश्य मृगो धावतीत्यादावपि भाष्यसम्मतरीत्याह वस्तुत इति तत्रापि पचतीत्यादिस्थलेपि संसर्गतैवेति कर्मत्वस्येति शेषः पदाध्याहारस्य सम्भवे कदाचिद्विशेषणत्वसम्भावनास्था-

त्तस्यात्रासम्भव एवेत्याह उपस्थितिपूर्वकमिति तत्र भावनायाम् तस्य फलस्य धात्वादिप्रतिपाद्यतयोभयसम्मतस्य दृष्टान्तत्वमित्याशयेन शोभनम्पचतीत्यादेर्दृष्टान्तत्वमित्याह तत्र नव्येत्यादिना धावतीत्येतद्घटकधातुजन्योपस्थितिविषयक्रियायाः सर्वदा न विशेषणत्वमत आह अन्वयबोधकाल इति एवञ्च द्वितीयानुत्पत्तेर्दुरुपपादत्वेन तथा प्रयोगविलय एव पश्य मृगो धावतीति प्रयोगविलय एव यत्तु वासरूपन्यायेन तिङ् भविष्यति मृगपदादुत्तरङ्गत्वात्प्रथमास्त्विति न प्रयोगविलय इति तन्न लादेशेषु वासरूपन्यायाभावस्य भाष्यकारमतसिद्धत्वात् प्रधानकार्यस्यान्तरङ्गादपि बलवत्त्वस्य हेतुमातिचेतिसूत्रभाष्यसम्मतत्वाच्च अध्याहारेणेति यत्तदोर्नित्यसम्बन्धेन य इत्यस्य तमित्यस्य वाध्याहारेणेत्यर्थः वाक्यभेद इति यो धावति मृगन्तम्पश्येत्येवंरूपवाक्यभेद इत्यर्थः प्रामाणिकमिति प्रामाणिकस्य पश्य मृगो धावतीत्यादिवाक्यस्योपपत्तिप्रयोजकमित्यर्थः शतृसूत्रस्थेनेति शतृविधायकसूत्रस्थेनेत्यर्थः तत्रहि लस्याप्रथमासमानाधिकरणेनायोगादादेशानुपपत्तिरिति वार्तिकम् अयम्भावः लः कर्मणीत्यनेन विधीयमानो लकारः क्रियाप्रधानीभूताख्याति गुणभूते कर्तृकर्मणी प्रतिपादयति क्रियाप्रधानमाख्यातमिति सिद्धान्तात् एवञ्चैकविशेषणत्वेनोपस्थितस्य कारकस्याप्यत्र तथान्वयाऽयोगादप्रथमासामानाधिकरण्यन्नोपपद्यत इति एवम्पूर्वपक्षे अभ्युपेत्यवादेन अथ मतमेतत् । भवति योग इति चेत् अन्यत्रापि योगः स्यात् क्वान्यत्र लडि अपचदोदनन्देवदत्त इति अत्रापि लवाच्यसाधनस्य देवदत्तेन सामानाधिकरण्ये सति अपचदोदनन्देवदत्तम्पश्येति प्रयोगापत्तिरिति भावः एवञ्चेदं सूत्रमनुपपन्नं स्यादिति समाहितम् अथवा आदेशे सामानाधिकरण्यन्दृष्ट्वा ऽनुमानाद्वन्तव्यक्तेरपि सामानाधिकरण्यं भवतीति शत्राद्यादेशयोग्यो लकारः अप्रथमासमानाधिकरणः अप्रथमासमानाधिकरणादेशस्यानित्यात् तादृशलकारो यद्यप्रथमासमानाधिकरणो न स्यात्तदा ऽप्रथमासमानाधिकरणत्वेन शास्त्रानुवादविषयो न स्यादित्यनुकूलस्तर्कः भूवादिसूत्रस्थेन का तर्हीत्यादिना कथितेन मुनिवचनेन यथाक्रमं वार्तिकभाष्यकारवचनेन उभयसङ्ग्रहार्थमेवात्र मुनिपदोपादानम् नव्यनैयायिकानामपि शास्त्रार्थनिर्णायकतया तान्प्रति त्वदीयेतिकथनमनुचितमित्याह ऋषीणामिति द्वितीया दुर्वारेति देवदत्तशब्दादिति शेषः नैयायिकानुयायिनः शङ्कान्नि-

रस्यति नचेत्यादिना विशिष्टस्येति पाकानुकूलभूतकालिकव्यापारविशिष्टस्य देवदत्तस्य धावनानुकूलवर्तमानव्यापारविशिष्टस्य मृगस्येत्यर्थः एवञ्च यत्रावयवस्य कर्मत्वादिकमस्ति द्वितीयादितु न दृश्यते तत्रायमेव प्रकारो बोध्यः अत्र साधकन्दृष्टान्तमाह श्रुत्वेत्यादिना द्वितीयानापत्तेरिति । तस्माद्विशिष्टस्याप्रातिपदिकत्वेपि वाक्यावयवस्य प्रातिपदिकस्य तत्तच्छक्तियोग्यतायां तत्तद्बोधिका विभक्तिर्भवत्येवेति कल्पनीयमत एव कटम्भीष्मसुदारं शोभनमित्यत्र द्वितीयोपपादकभाष्यसङ्गतिः तस्माद्विशेष्यवाचकाद्यत्र द्वितीयादिविभक्तिस्तत्र तत्समानाधिकरणविशेषणवाचकेभ्योपि सा भवति राज्ञः पुरुषम्पश्येत्यत्रतु राज्ञ इति व्यधिकरणमेव श्रुत्वेत्यादेरुपपत्तिमाह आर्षमिति एवञ्चार्षत्वाद्व्यत्ययेन द्वितीयास्थाने प्रथमा पूर्वसवर्णदीर्घप्रवृत्तिरप्यत एव बोध्या 'पश्य लक्षण पम्पायां बकः परमधार्मिक' इत्यादावपीयमेव गतिः सति सम्भवे नांचेदसाधुत्वमेव नच पश्य मृगो धावतीत्यादौ क्रियाया एव कर्मत्वे तण्डुलमपाक्षीद्देवदत्तोवेहीत्यादौ तण्डुलादीनां कर्मणा यमभिप्रैति स सम्प्रदानमिति सूत्रेण सम्प्रदानसंज्ञायाञ्चतुर्थी स्यादिति वाच्यम् एतादृशे स्थले स्वार्थे परिपूर्णस्यार्थान्तराकाङ्क्षेति न्यायेनान्तरङ्गत्वादेककियासम्बन्धेन कर्मत्वादिकम्भवत्येव अत एव यदन्न पश्यामि इत्यत्र पश्यान्नमर्थान्वयः पुरीमवस्कन्देत्यादौ पुर्यादिपदोत्तरद्वितीयाङ् कृत्वा तद्विशिष्टार्थस्यास्यपदार्थान्वय इत्याशयादित्याशयेनाह अलमिति धावनादिक्रियायाः क्रियान्तरमिति विशेषणत्वेपि न यास्कवचनविरोध इत्याशयेनाह क्रियाप्रधानमित्यत्रेति नैयायिकानुयायिनस्तु पश्य मृगो धावतीत्यादौ धावनानुकूलकृतिविशिष्टमृगादेर्दर्शनक्रियाप्रति कर्मतासम्बन्धेन विशेषणत्वम् नच नामार्थधात्वर्थयोर्भेदेनान्वयबोधो व्युत्पन्न इति व्युत्पत्तिविरोधः विशिष्टस्य नामार्थत्वाभावात् नच शुभ्रस्तण्डुलः पचतीत्यप्येवंसति स्यादिति वाच्यम् प्रामाणिकप्रयोगस्थल एवैतादृशकल्पना नतु सर्वत्रेति स्वीकारात् वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वस्वीकाराद्राक्षसो धावति न पश्येत्यादौ नानुपपत्तिरित्याहुः तन्न तादृशकल्पनायामपि भावप्रधानमाख्यातमित्यादिवाक्यस्य भाष्यादिसम्मतार्थकस्य विरोधो दुर्वार एवेत्याशयेनाह दिगिति । शतृविधायकस्थमिति तच्च प्रदर्शितमधस्तात् ननु धातूपस्थितफलव्यापारयोरन्यतरस्यान्यतरस्मिन्

कर्मत्वकरणत्वकर्तृत्वस्य स्वीकारादिदन्नासत्त्वरूपतामतिबन्धकमत आह क्रियान्तरेति तथाच तयोरन्यतरस्य परस्परस्यति तथात्वेपि क्रियान्तरनिरूपितत्वत्वस्यतिबन्धकं स्यादेवेति भावः ननु कारकशब्दस्य शक्तिमत्परत्वे न पूर्वपक्षविरोधापत्तिरत आह करणादीति भिन्नपदोपात्तक्रियान्तरनिरूपितेत्यादि अत एव वक्ष्यति स्वव्याचकेत्यादि ननु क्रियान्तरस्यति क्रियायाः करणत्वं हरिन्नमेदित्यत्र भुक्त्वा तृप्तो न पीत्वेत्यत्रच नमनभोजनयोर्दृष्टमेवेत्यत आह हरिन्नमेदित्यादिदर्शनादिति एवञ्च पृथक्पदोपात्तक्रियानिरूपितकरणत्वाद्ययोगित्वमसत्त्वरूपत्वमिति फलितम् सर्वत्र तद्वाचकविभक्तेः सत्वे ऽसत्वेवा आद्यमेवेति इदञ्च सामान्यतो ऽभिहितम् वस्तुतस्तु लिङ्गसङ्ख्यानन्वयित्वङ्करणादिशक्तिरूपेण भिन्नपदोपात्तक्रियायामनन्वयित्वंवा ऽसत्वरूपत्वमिति लक्षणद्वयमेव बोध्यम् कारकस्य विभक्त्यर्थत्वपक्षे उक्तार्थानामिति न्यायेनाभिधानस्थले विभक्तेरप्राप्तावपि सङ्ख्या विभक्त्यर्थ इति पक्षे सूत्रस्थावश्यकर्तोक्तैवेत्यत आह तिङादिभिरिति भाष्यकृत्परिगणनलब्धमिदम्। उद्भूतेति उद्भूतकर्मत्वादिशक्तिके ऽर्थे वर्तमानादित्यर्थे ऽनभिहित इति सूत्रात्तात्पर्यग्राहकमिति भावः उद्भूतत्वञ्च तिङाद्यर्थोत्वत्वम् प्रथमातु प्रातिपदिकार्थस्याभिधानेपि भवत्येव अत एवाभिहिते प्रथमेति वार्तिकमभिहितं ततः सो ऽर्थो ऽन्तर्भूतः प्रातिपदिकार्थः सम्पन्न इति भाष्यञ्च सङ्गच्छते अभिधानादिति ओदनपदार्थातकर्मत्वशक्तेरित्यर्थः प्रधानविषयेत्यादिना प्रदर्शितानुरोधेन प्रक्रान्ताशङ्कासमाधानासम्भवादाह तुल्यन्यायादिति अत एव उक्तानुरोधस्य सत्वादेव सदिनिरूपितेति प्राङ्पूर्वात्सदधातोरधिकरणे क्विप् आदिना शयने आस्त इत्यस्य सङ्ग्रहः स्यादुमि णमुलिति सूत्रे भाष्ये इति इदमनुपदमेव व्यक्तीभविष्यति अनुरोधमेव विशदयति एवमुभयेति इतिचेति। गत्यर्थकर्मणीति द्वितीयाचतुर्थ्यौ प्रकृतार्थं भाष्यान्तरतो द्रढयति इष्यत इति न कदापि गन्तुमित्यत्र ग्रामपदार्थस्यान्वयकाले एतेनार्थान्वयः शाब्दान्वयो वोभयथा चतुर्थीद्वितीययोरप्रवृत्तिर्ध्वनिता सच शाब्दो ऽन्वयः सकृच्छ्रुतस्य न सम्भवतीत्यावृत्तिरपि सूचिता कदापीत्यस्योपादानात् सन्सूत्रइति सन्निधायके धातोः कर्मण इति सूत्र इत्यर्थः वस्तुतस्त्वित्यादिना यन्मनोरमायामभिहितन्तत्स्वादुमीतिसूत्रस्थभाष्यविरुद्धमिति केचित्तन्न मनोर-

माकारस्य तत्र निर्भराभावादिति सूचयन्नाह एवञ्चैतद्विरोधादिति अत्र प्रयोग इत्यारभ्य यत्कैयटेनोक्तन्तद्विरोधात् यद्यपि स्वादुमीतिसूत्रस्थभाष्यमादावेव वक्तुमुचितन्तथापि कैयटोक्तमपि समर्थमिति बोधयितुं तद्भाष्यमाह अत एवेत्यादिना उक्तार्थस्येष्टत्वादेवेत्यर्थः आचतुर्मुनः समानाधिकरणे प्रत्यया इति हि तत्र वार्तिकन्तस्य व्याख्यानपरभाष्यमाह तुमुन्ण्वुलौ क्रियायामिति तुमुनस्तत्रत्यमुदाहरणं भोक्तुमोदनः पच्यत इति वार्तिकस्थं यत्समानाधिकरणपदन्तदर्थस्य प्रतियोग्याकांक्षाशान्त्यर्थम्पूरणेन यद्भाष्यकृतोक्तन्तदाह स्वान्वयिनेति तुमुनादिप्रकृत्यर्थान्वयिनेत्यर्थः एतस्यैव विवरणं समभिव्याहृतेनेत्यारभ्यानुप्रयुज्यमानेनेत्यन्तम् आख्यातेनेति शेषः समानाधिकरण इति समानमेकं यदधिकरणन्द्रव्यरूपङ्कारकन्तस्मिन्नित्यर्थः अत एवाह तद्वाच्येति । एवञ्चाख्यातवाच्यकारकाभिन्नं यत्कादिप्रकृत्यर्थकारकन्तस्मिन्निति फलितम् कारकभेदेतु गुणीभूताक्रियाकर्मत्वबोधिका द्वितीया भवत्येव पक्वौदनङ्गामो गम्यत इति यथा पूर्वोक्तवचनारभ्यफलमाह तेनेति द्वितीया नेति पच्यर्थकर्मत्वबोधिकेति शेषः न वक्तव्यमिति उक्तार्थकत्वद्वार्तिकमित्यर्थः विधानादिति अव्ययकृतो भावे इति वचनादित्यर्थः लभ्यते इति अन्यथा आरम्भप्रत्याख्यानयोः फलभेदापत्त्या तादसङ्गतिः स्यात् एतदेवोपपादयति तत्रेति आरम्भप्रत्याख्यानयोर्मध्ये एषाम् मूलोक्तानाम् सनादीति आदिना स्वादुमीत्यस्य सङ्ग्रहः असाध्वेवेति अत एव क्षुत्प्रतिहन्तुं शक्यमिति भाष्यकारीयप्रयोगस्य सङ्गतिः एवञ्चोक्तभाष्यद्वयबलाद्यत्फलितं तादर्शयति तुमुनाद्यन्वयीति स्वसमानाधिकरणेति अत्र स्वपदं शक्तिपरम् तद्भदेवेति खण्डनीयमेवेत्यर्थः मैवमित्युक्त्वा शाब्दबोधवैलक्षण्यसूचनाय कर्तुरीप्सिततममित्यस्यारम्भ इति नोक्तमिति न्यूनतापरिहाराय स्वयमाह ग्राममिति । ईप्सिततमत्वोपलक्षितमिति इच्छार्थकसन्प्रत्ययसत्त्वात् तेनोद्देश्यत्वं लक्ष्यते अत एव उद्देश्यत्वस्य भानादेव गामिति अस्य विप्रायेत्यादिः गोरपीत्यपिना विप्रसमुच्चयः तत्रैव गव्येव अयाभावः काकेन पुण्डरीकादिकं यथा परिचाय्यते तेन गृहविशेषस्य प्रतीतिस्तथा ईप्सिततमशब्दस्येच्छार्थकसन्प्रत्ययघटितत्वात्तेनोद्देश्यत्वमुपलक्ष्यते अत एव प्रकृताधात्वर्थप्रधानीभूतव्यापारजन्यप्रकृताधात्वर्थफलाश्रयत्वेनोद्देश्यत्वमीप्सिततमत्वमिति क-

थयन्ति तथाच विप्राय गान्ददातीत्यत्र स्वस्वत्वध्वंसविशिष्टपरस्वत्वोत्पत्त्यनुकूलव्यापारस्य धात्वर्थतया इच्छारूपतादृशव्यापारस्य विप्रविषयकत्वेन विप्रस्य सम्प्रदानसंज्ञा जायते कर्मणेत्यस्य सत्वे तदभावेतु यमभिप्रैति यं फलाश्रयत्वेनाभिसम्बन्धुमिच्छतीत्यर्थः स्यात्तथाच गोः सम्प्रदानत्वस्य प्राप्तिरिति दाधातुप्रयोग एव सम्प्रदानसंज्ञा भवतीत्यस्यानाश्रयणाद्धात्वन्तरार्थयोगेपि तस्य प्राप्तिरित्याशयेनाह पर्यायेणेति तदनाश्रयणे यानन्तु प्रकृतभाष्यमेव यमभिप्रैतीत्यत्र कर्तृबोधकतिङ्सत्वात्केनाभिप्रैतीत्याकाङ्क्षायां स्वनिष्ठक्रिययेति प्रतीतं स्यात्तया क्रिययां प्रथमतो गौरभिप्रेयते पश्चाद्वा विप्र इति गोरन्तरङ्गत्वात्सम्प्रदानसंज्ञाप्राप्तिः एतेन विप्रे सम्प्रदानसंज्ञा चरितार्था धात्वन्तरार्थयोगे कर्मत्वञ्चरितार्थमिति परत्वाद्धोः कर्मसंज्ञैव स्यादिति कर्मण एव स्यादिति भाष्यस्य तात्पर्यमिति ध्वनितम् उद्देश्यत्वञ्च फलात्मकधात्वर्थे ग्राह्यम् क्रियायाः फलेच्छापूर्वकेच्छाविषयत्वात् तदाश्रयत्वाद्ग्रामादेरप्युद्देश्यत्वव्यवहारः चतुर्थ्या उद्देश्यत्वार्थकत्व एवोक्तभाष्यसङ्गतिरित्याशयेनाह चतुर्थ्या इति शक्तिः सम्प्रदानत्वशक्तिः। उद्देश्यत्वन्तु उद्देश्यपदशक्यतावच्छेदकम्पदार्थान्तरम् यत्तु इच्छाविषयत्वमेवोद्देश्यत्वमिति तन्न घटो द्रव्यमित्यादौ उद्देश्यविधेयभावेनान्वय इति व्यवहारस्येच्छाविषयत्वस्याप्रतीतावपि दर्शनात् उद्देश्यत्वमेव चतुर्थीवाच्यमिति प्राचीनमतन्तत्समानाधिकरणं सम्प्रदानत्वमिति प्राचीननवीनोभयसम्मतमित्याशयेनाह सर्वसम्मतमिति एतेन प्रयट्टकेनोद्देश्यत्वस्य भानार्थङ्कर्तुरीप्सिततममिति सूत्रमनुद्देश्यत्वभानार्थन्तथायुक्तमितिसूत्रमितिसूत्रकाराशयो वर्णितः विप्राय गान्ददातीति शब्दाद्विप्राभिन्नसम्प्रदाननिष्ठोद्देश्यतानिरूपकन्दानमिति सम्प्रदानविप्रीयं विप्रसम्प्रदानकमितिवा बोधः फलान्तरम् पृथक्सूत्रद्वयोपादानस्य फलान्तरम् यदुक्तम्मूले माणवकस्यापादानत्वप्राप्तमिति तदाशयमाह ईप्सिततमपदाभाव इत्यादिना तदपवादत्वापत्तेः वारणार्थकधातुयोगे ईप्सितस्यापि कर्मत्वं प्राप्तमिति निरवकाशतया कर्मसंज्ञापवादत्वापत्तेरित्यर्थः तत्रापि वारणार्थानामिति सूत्रेपि अत एव कूपादन्धं वारयतीत्यादौ कूपादेरपादानत्वस्य सिद्धिः यदीप्सितशब्द इच्छाविषयपरः स्यात्तदा तत्र कूपस्येच्छाविषयत्वाभावान्न स्यात् ईप्सिततमामित्युक्तामिति वारणार्थकधातुयोगे माणवकादेः कर्मणो

ऽपवादत्वात्प्राप्तापादानत्ववारणायेप्सिततममित्येतत्पदघटितसूत्रकरणे इत्यर्थः सावकाशस्येति अयमाशयः शुक्लतमः पट इत्यादौ यथाप्रवृत्तिनिमित्तशौक्ल्यगतप्रकर्षे तमप्प्रत्ययो भवति तथात्रापीप्सिततशब्दस्य यत्प्रवृत्तिनिमित्तमाप्तीच्छा तस्याः प्रकर्षे तमपा भवितव्यमिच्छायाः प्रकर्षस्तु यद्यपि स्वतः सम्भवति तथापि व्याख्यानात्तद्विशेषणाश्रितः प्रकर्ष इह विवक्षितः आश्रिश्च धात्वर्थफलानुकूलव्यापारात्मकः सम्बन्धस्तत्प्रकर्षश्च प्रकृते तादृशसम्बन्धघटकफले धात्वर्थप्रधानीभूतव्यापारप्रयोज्यत्वरूपः एतच्च वारयतेरुत्तरदेशसंयोगानुकूलव्यापाराभावानुकूलव्यापारार्थकतया तद्घटकतादृशव्यापाराभावात्मकफले प्रधानव्यापारप्रयोज्यत्वसत्त्वात्तदाश्रयमाणवकादौ कर्मसंज्ञा प्रवर्त्तते यवेभ्यो गां वारयतीत्यादौतु भक्षणानुकूलव्यापाराभावानुकूलव्यापारात्मकः प्रवृत्तिविघात एतद्घटकप्रधानव्यापारप्रयोज्यभक्षणानुकूलव्यापाराभावात्मकफलाश्रयत्वाद्गोः कर्मत्वमवति ईप्सिततमशब्दघटकेन सना इच्छार्थकेनोद्देश्यत्वमुपलक्षितमिति प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वङ्कर्मसंज्ञाप्रयोजकञ्च न कूपादाविति तेष्वपादानसंज्ञा चरितार्थेति सा ईदृशप्रकर्षयुक्तफलाश्रये कर्मसंज्ञया बाध्यते वारणार्थानामिति सूत्रघटकेप्सितशब्दार्थस्तु वारणार्थकधातूपस्थाप्यफलाश्रयत्वरूपः एतद्घटकाभावप्रतियोगित्वव्यापारप्रयोज्यं यत्फलमुत्तरदेशसंयोगादि तदाश्रयत्वादग्निकूपादावपादानसंज्ञा भवतीति ततः सन्प्रत्ययेनोद्देश्यत्वमुपलक्षितमत एवाह अत एवेति यत ईप्सिततमत्वमुक्तरूपात्मकं विवक्षितमत एवेत्यर्थः तत्र अग्नेर्माणवकं वारयतीत्यत्र उक्तरूपात्मकेप्सिततमशब्दार्थघटकफलव्यापारयोः प्रकृतत्वन्तु प्रत्यासत्त्या लब्धम् तत्फलन्तु यदा माषभक्षणेनाश्वस्य पुष्टिर्जायतामितीच्छया माषक्षेत्र एवाश्वबंधनङ्केनापि पुरुषेण कृतत्वात्र माषेष्वश्वम्बध्नातीति प्रयोगो भवति तादृशस्थले कर्तृसमवेतो यः प्रधानीभूतो व्यापारस्तत्प्रयोज्यम्फलङ्गलाधःसंयोगोपि तदाश्रयत्वान्माषाणाङ्कर्मसंज्ञा स्यादिति तद्वारणम् भक्षणरूपफलस्य बन्धधात्वर्थत्वाभावात् उक्तरीत्या ईप्सिततमपदघटितसूत्रे कृते द्वेष्यस्योदासीनस्यच कर्मसंज्ञासिध्यर्थन्तथायुक्तामितिसूत्रमपि कार्यन्तच्चेप्सिततममिन्नसङ्ग्रहार्थमिति द्वेष्योदासीनयोः सङ्ग्रह इत्याशयेनाह द्वेष्यसंग्रहोपीति । नन्वनीप्सितपदाभावे तथायुक्तामित्यस्ये-

प्सिततमक्रियायुक्तं क्रियाजन्यफलाश्रयः कर्मेत्यर्थः स्यादेवञ्च कूपादन्यं वारयतीत्यादौ कूपादेर्निरुक्तेप्सिततमभिन्नत्वात्पुनरपि वारणार्थानामिति सूत्रान्निरवकाशमिति वाच्यम् द्वेष्योदासीनयोरेव कर्मसंज्ञा यथा स्यादित्येवमर्थमनीप्सितपदमपि कर्त्तव्यन्तदर्थश्चेप्सिततमभिन्नमित्येव न किन्तु नञो ऽसुराधर्मादिपदघटकनञ्वदीप्सिततमविरोधीत्यर्थः तद्विरोधश्च द्वेष्योदासीनयोः तत्रोदासीनत्वमिच्छाद्वेषयोर्यत्राभावस्तत्वमेवञ्च कूपादेर्निरुक्तोदासीनत्ववत्वेपि प्रधानीभूतधात्वर्थव्यापारजन्यफलाश्रयत्वरूपं तथायुक्तत्वमिह विवक्षितमिति तथायुक्तत्वाभाववत्त्वेन न तथायुक्तमित्यस्य प्राप्तिरित्याशयात् नचैवन्तथायुक्तमित्येवास्त्विति वाच्यम् पयसः करणत्वविवक्षया पयसा ओदनं भुंक्त इति यत्र प्रयोगस्तत्र पयसः कर्मत्ववारणाय तथायुक्तञ्चानीप्सितमित्यस्याप्यावश्यकत्वात् नचैवन्नत्वावश्यकमिति मूलविरोध इति वाच्यम् मूलस्य यथाश्रुताभिप्रायकत्वात् अत एवेहोक्तभाव इति मूलकारस्य भावो वस्तुतस्तु तदावश्यकमित्यत्र तात्पर्यम् पयसो यदा करणत्वमात्रविवक्षा तदा प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यता पयसो नेति तस्य न कर्मसंज्ञा द्वेष्योदाहरणञ्चोरान्पश्यतीति अत्र चोराणामिन्द्रियसंयोगाद् दृश्यमानत्वेपि न ते दर्शनोद्देश्या इति न पूर्वसूत्रस्य प्राप्तिरिति बोध्यम् व्याख्यानादेवेति तथाशब्दोपादानमूलकादित्यर्थः केचित्तु प्रकृतधात्वर्थफलवत्कर्मेत्येव सूत्रङ्कार्यन्तथायुक्तमिति न वाच्यमिति लाघवम् नचैवम्मूलोक्तरीत्या वारणार्थानामीप्सित इति सूत्रमनवकाशतया कर्मसंज्ञया वारणार्थकधातुप्रयोगे बाधकं स्यादिति वाच्यम् प्रवृत्तिविघातोहि वारणम् प्रवृत्तिविघातश्च प्रवृत्तिध्वंसानुकूलव्यापार एव स एवच सर्वत्र वारयतेरर्थः एवञ्च कूपान्यादौ नैतादृशधात्वर्थफलाश्रयत्वमिति कूपादेर्न कर्मत्वप्राप्तिरिति वारणार्थानामित्यस्य चरितार्थत्वात् द्वेष्योदासीनयोस्तु धात्वर्थफलाश्रयत्वाद्भविष्यति कर्मत्वमित्याहुः तदपेशलम् उक्तरीत्या शाब्दबोधकृतवैलक्षण्यसम्पादनाय सूत्रावश्यकत्वस्योक्तत्वात् । किञ्च यदा न गवि प्रवृत्तिः किन्तु सम्भावितप्रवृत्तिप्रागभावस्यात्यन्ताभावस्यवा विवक्षा तादृशस्थले ध्वंसस्य प्रतियोगिपूर्वकत्वेन प्रवृत्तिध्वंसस्य सम्भवाद्यवेभ्यो गां वारयतीति प्रयोगानुपपत्तिरिति प्रवृत्तिध्वंसानुकूलव्यापारमात्रस्य वारयत्यर्थत्वमयुक्तमेव

द्वेष्योदाहरणञ्चोरान्पश्यति व्याघ्रान्पश्यतीत्याद्येव नतु विषम्भुङ्क्त इति महाभयादिभ्यो दुःखस्य सम्भावितस्य निवृत्त्यर्थं यदा विषम्भक्षयति तदा भक्षणक्रियाजन्यफलाश्रयत्वादुद्देश्यत्वाच्च तस्य कर्तुरित्येव कर्मत्वस्य सिद्धत्वात् अत एव य एष मनुष्यो दुःखार्तो भवति सो ऽन्यानि दुःखान्यनुनिशम्य विषभक्षणमेव ज्यायो मन्यते अतश्चेप्सितं यत्तद्भक्षयतीति भाष्यकारेणोक्तम् उदासीनोदाहरणन्तृणं स्पृशतीत्याद्येव यद्यपि द्वेष्योदासीनयोः प्रधानीभूतव्यापारजन्यफलाश्रयत्वन्तथापि तेषान्न मुख्योद्देश्यत्वमिति कर्तुरित्यस्य तत्राप्राप्तिरिति बोध्यम् वैरूप्यरहितइति तेनोद्देश्यत्वभानकृतवैरूप्यस्य सत्वेपि न क्षतिरिति भावः भासत एवेति एतच्च कर्मणा य मभिप्रैतीतिसूत्रस्थभाष्याल्लभ्यत इति प्रागेवाभिहितम् ईप्सागतेति इच्छाविशेषणीभूतव्याप्तिगतेत्यर्थः ननु सर्वत्राधारवाचकत्वमनुपपन्नं दिवः कर्मचेतिसूत्रविषये आधारप्रतीत्यभावादत आह इदमुपलक्षणमिति नन्वेवमिति एवम् अनन्यलभ्यस्यैव शब्दार्थत्वे तस्यैव आधारत्वस्यैव शक्तिविशेषरूपस्य अखण्डोपाधिरूपस्य चिन्त्यमिति चिन्ताबीजन्तु अखण्डोपाधिरूपधर्मस्य वाच्यत्वे तस्य विशेषणतया शाब्दबोधविषयत्वकल्पनेच प्रकृतिप्रत्ययाविति न्यायविरोधः कर्मणि द्वितीयेतिसूत्रस्थ सुपाङ्कर्मादयो ऽप्यर्था इति भाष्यस्यच विरोधापत्तिरिति किञ्च धर्मस्याखण्डोपाधिरूपस्य वाच्यत्वे तन्निष्ठधर्मस्य वाच्यतावच्छेदकत्वे तस्यच कर्मेतरावृत्तित्वविशिष्टसकलकर्मवृत्तित्वरूपत्वे महागौरवत्वस्याप्यखण्डोपाधिरूपत्वे तदाश्रयाखण्डोपाधिरूपधर्मस्य वाच्यतावच्छेदकत्वं युक्तमिति वस्तुतस्तु पञ्चकम्मातिपादिकार्थ इति पक्षस्य मुख्यतया कर्मादीनां द्योत्यत्वेन प्रकृत्यर्थविशेषणत्वमेव युक्तम् । विशेष्यविशेषणभाव इति इतरसम्बन्धानवच्छिन्नेत्यादिः पदजन्योपस्थितावेशेषपि फलव्यापारयोर्धातुजन्योपस्थितिविषयत्वस्य समानत्वेपि इदमुपलक्षणमिति फलभूतशाब्दबोधवैलक्षण्यप्रतिपादनमुपलक्षणमित्यर्थः संज्ञया कर्मादिसंज्ञया अर्थस्य संज्ञिनः निमित्तत्व इति शाब्दबोधजनकोपस्थितिनिमित्तत्व इत्यर्थः तत्रापि पदार्थोपस्थितावपि इत्याशय इति आधारादिरूपधर्मेण एव वाच्यत्वमिति प्रतिपादकमूलस्याशय इत्यर्थः निरूपकाश्रयसम्बन्धभेदेन क्वचिदाश्रयतानिरूपकं विक्लित्तिरूपम् फलञ्च क्वचित्संयोगः क्वचिद्विभाग इति यथायथमूहनीयमित्यर्थः आश्रयः

तण्डुलादिः सम्बन्धभेदेनेति पचति गच्छतीत्यादौ फलाधारता समवाय-सम्बन्धावच्छिन्ना यवेभ्यो गां वारयतीत्यादावभावरूपफलाधारता स्वरूप-सम्बन्धावच्छिन्नेति भेदेनेत्यर्थः । नन्वेवमाधारस्य शक्यत्वे तन्निष्ठाधारत्वस्योक्तरीत्या भिन्नस्य शक्यतावच्छेदकत्वे शक्यतावच्छेदकभेदाच्छक्तिभेदापत्तिरत आह आधारत्वस्य शक्यत्व इति आधारतात्वेन अखण्डोपाधिरूपेणेति शेषः अनुगमादिति अनुगताकारप्रतीतिविषयत्वात् अनुगतधर्मावच्छिन्नशक्यतावच्छेदकतया एकत्वेन शक्तेरेकत्वमिति व्यवहार इति भावः शक्तिरपि कर्मत्वादिरूपा शक्तिरपि एतैः कर्मादिपदैः धर्म्यभेदम् शक्तिमदभेदम् एवञ्च कर्मत्वादिशक्तिमान् द्वितीयार्थ इति रीत्या स्वीकार्यमिति भाष्यसम्मतमेव युक्तामिति बोध्यम् यत्प्रपञ्चितन्तदाह लादेशेति नटस्य शृणोतीत्यादौ यथा नटे ऽतिप्रसङ्गप्राप्तिस्तथाह अपादानादीति अन्त्येति सर्वथा ऽप्रसक्त्या ऽविवक्षारूपा इति शास्त्रकल्पितमिति उपयोगग्रहणस्य नटे ऽपादानसंज्ञाव्यावर्त्तकत्वेन भाष्यकृता चारितार्थ्यस्योक्तत्वेन तच्छास्त्रकल्पितमित्यर्थः नच नटीयगीतेन श्रवणक्रियासम्भवे तद्भिन्नस्य नटस्यान्यथासिद्धतया क्रियाजनकत्वमिति वाच्यम् द्वारेण द्वारिणो ऽन्यथासिद्धत्वाभावात् तदंशस्य कर्मयुगित्यंशस्य नच दुहादिपरिगणने कृतेपि स्यान्दोग्धि पय इत्यत्र स्यान्दोग्धि पय इत्यत्र स्यान्दो अधिकरणत्वाविवक्षायामनेन कर्मसंज्ञा स्यादिति वाच्यम् धात्वर्थव्यापारात्प्राक्कर्मयुक्तस्य संज्ञानिमित्तत्वात् द्विविधा ऽविवक्षायाः प्रकृतसूत्रे ग्रहणे मानन्तु गान्दोग्धि पय इत्युदाहरणपरम्प्रकृतसूत्रभाष्यन्नटस्य शृणोतीति प्रत्युदाहरणपरञ्च भाष्यमेव । ननु नटस्य शृणोतीत्यत्रान्त्या ऽविवक्षा स्वीकृता सा न सङ्गच्छते श्रुधातोर्निःसरणविशिष्टश्रवणार्थकत्वेन प्रथमाया अपि तस्याः सम्भवादिति कस्यचिच्छङ्कानिरस्यति नचेत्यादिना अनिष्टत्वेति यदि निःसरणावधित्वाविवक्षायान्नटस्येति षष्ठी तदा निस्सरणावधित्वविवक्षायान्नटाच्छृणोतीत्यस्याप्यापत्त्या आख्यातोपयोगे इति सूत्रस्थोपयोगग्रहणवैयर्थ्यापत्तिरिति श्रुधातोर्लक्षणया तादृशार्थबोधकत्वन्नेति कल्पनीयमिति भावः अकथितञ्चेति सूत्रस्थ षष्ठीबाधनार्थमारम्भेणतत्सूत्रसाध्यकर्मसंज्ञायां या द्वितीया सा सम्बन्धार्थिकेति प्राञ्चस्तन्न युक्तं सर्वकारकविषयेष्वेवमपवादत्वस्य सम्भवेन सम्बन्धार्थकत्वापत्तेरित्याशयेन व्याचष्टे गोकर्मकमि-

ति स्यादेतदित्यादिना शङ्काकरणसमये ऽकथितञ्चेति सूत्रस्योपन्यासः कृतस्तत्प्रयोजनन्दर्शयति तत्र पयस एवेति ईप्सिततमत्वे तदुपलक्षितोद्देश्यत्वे अत्र यत्र यत्रोद्देश्यत्वन्तत्र कर्तुरित्यस्य यत्र तदभावस्तत्राकथितश्चेत्यस्य प्राप्तिरिति विवेकः इति प्रतीतेरिति एतेन व्यापारद्वयार्थकत्वन्दर्शितम् विभागानुकूलव्यापारानुकूलव्यापारोहि दुहेरर्थ इति भावः यदुक्तन्न्यायसिद्धतयेति तत्रान्यायासम्भवादाह सूत्रद्वयेति गतिबुद्धीतिसूत्रस्य नियमार्थत्वम्भाष्यकारमतसिद्धमिति प्राचामित्यसङ्गतमत आह हेतुमतिचेतीति एतच्च भाष्यम् अपादानमुत्तराणीति भाष्यम्। अस्य अकथितञ्चेति सूत्रस्य असङ्गतेरिति पूर्वस्य परस्य च यत्र प्राप्तिस्तत्रैव विप्रतिषेधसूत्रस्य प्राप्तिरिति कर्तुरित्यादिसूत्रद्वयविषयकमेव तथाचाकथितमिति सूत्रन्न कार्यमित्येतदभिप्रायकमिति भावः पञ्चकमित्यादीति एतेन पञ्चम्या अवधित्वन्द्वितीयाया फलाश्रयत्वम्प्रतिपाद्यमित्युभयविवक्षा वक्तुमशक्येति शङ्काया नावकाश इति सूचितम् गोशब्दस्यैव शक्तिद्वयप्रतिपादकत्वसम्भवात् पञ्चम्या अपादानत्वशक्तिविशिष्टार्थाभिधायकत्वमिति सिद्धान्ताभिप्रायेणाह अपादानत्वेति ननु यदि शक्तिद्वयविवक्षा तदा शक्तिद्वयप्रतिपादकत्वं विभक्तेरुपपादनीयन्तच्च न सम्भवति परत्वाज्जातकर्मसंज्ञायाङ्कर्मत्वमात्रस्य द्वितीयया प्रतिपादनसम्भवादत आह ईदृशेचेति उभयोः शक्त्योः प्रातिपदिकेन प्रतिपादनविवक्षा जाता त्वेकैव विभक्तिस्तादृशविषय इत्यर्थः इति स्थितमित्यस्माद्भाष्ये स्थितमित्यर्थः प्रतीयते परन्त्वेवं वक्तुमशक्यम् वक्ष्यमाणानुपपत्तेरत आह प्राचाङ्ग्रन्थ इति अत्र प्राचामित्यनेन प्रतिपादने अपादानत्वविवक्षायां गोः पयो दोग्धीत्येव भवतीत्याशयेनाह अपादानत्वाविवक्षायामिति अन्येन शास्त्रान्तरेण असिद्धेरिति कर्मसंज्ञाया इति शेषः एकव्यापारार्थकत्वं यदा पचादिधातूनान्तदा तत्कारकस्य कर्मसंज्ञार्थमकथितञ्चेति सूत्रम् यदुक्तम्प्राक् षष्ठीबाधनार्थमिदं सूत्रमित्येतत्साध्याविभक्तेः सम्बन्धार्थकत्वमिति तद्दूषयति। किञ्चेति क्रियाजनकतासमानाधिकरणेति एतेन कारकत्वमपि शक्तिविशेष एव तेनैव रूपेण शाब्दबोधविषयता संज्ञिन इति ध्वनितम् अपादानसम्प्रदानाधिकरणानामपादानत्वादिना ऽविवक्षायामनेन कर्मसंज्ञायाङ्कर्मत्वशक्तिमत्त्वेनैव शाब्दबोधविषयतेति बोध्यम् मूलङ्खण्डयितुमुपक्रमते

व्यापारद्वयेति अपिस्तथायुक्तमिति सूत्रसमुच्चायकः यथाप्रयोगमित्यनेनाऽतिप्रसङ्गो वारितः बहूनामिति मूलपरिगणितभिन्नानामपि ग्रहणमित्यनेनोक्तम् उक्तरीत्या धातूनान्द्विकर्मकत्वे बोधिते लकारादुद्यत्तिविषये व्यवस्थामाह तत्रेत्यादिना ये दुहादयः पच्यादयश्च इत्युक्तेरिति इति भाष्यकारोक्तेरित्यर्थः इष्टव्यवस्थासिद्धये प्रधानकर्मत्वन्दर्शयति प्रधानेति कर्तृप्रत्ययसमभिव्याहृतधातुजन्यशाब्दबोधे यः प्रधानभूतो व्यापारस्तस्मिन्साक्षाद्विशेषणं यत्फलन्तदाश्रयत्वम्प्रधानकर्मत्वम् व्यापारेति कर्तृनिष्ठेतिच स्वरूपकीर्त्तनम् मात्रपदेन परम्परया विशेषणत्वव्यवच्छेदः गर्गाः शतन्दण्डयन्तीत्यादिति भाष्यीयप्रयोगे यद्यपि न कर्तृप्रत्ययस्तथापि गर्गरूपकर्मणि लकारोत्पत्तिव्यवस्थामाह गर्गा इति गर्गाणामेवेति कर्तृप्रत्ययसमभिव्याहारे गर्गान् शतन्दण्डयतीत्यत्र स्वसम्प्रदानकदानानुकूलव्यापारानुकूलव्यापारो दण्डयतेरर्थः तत्र प्रधानभूतो व्यापारो द्वितीयस्तन्निष्ठविशेष्यतानिरूपिता साक्षात्प्रकारता प्रथमव्यापारस्येति तदाश्रयगर्गाणाम्प्रधानकर्मत्वम् नन्वेवं वृद्धिरादैजिति सूत्रभाष्ये ऽप्रधानकर्म गर्गाणाम्बहुत्वेपि न प्रधानस्य शतस्यावृत्तिरिति प्रतिपादितन्तद्विरोध इत्यत आह उद्देश्यत्वेति। दुहादीनामेकव्यापारार्थकत्वे ऽकथितञ्चेति सूत्रेण तद्योगे गवादीनामिति प्रागभिहितन्तदापि गवादिकर्मणि लकारादिव्यवस्थामाह एकव्यापारेति तदाहि विभागानुकूलव्यापार एव दुहधात्वर्थः विभागरूपफलाश्रयव्यापारविशेषणत्वादाश्रयत्वात्प्रयसः प्रधानकर्मत्वन्तद्विन्नत्वङ्गवादीनामिति तेषामप्रधानकर्मत्वम् एवञ्चेति उक्तरीत्येष्टव्यवस्थासिद्धौच भाष्यानुक्तानाम्पचादीनाम् भाष्योक्तास्तु दुहादय एकव्यापारार्थकत्वेपि तेषामप्रधानकर्म यस्याकथितञ्चेति सूत्रेण कर्मसंज्ञा तदेव एषान्तद्धात्वर्थप्रधानीभूतो यस्यादृशव्यापारस्तद्विशेषणं फलाश्रयभिन्नत्वमस्त्येव इत्थंहि तत्रत्यं भाष्यम् केनाकथितम् अपादानादिभिर्विशेषकथाभिः इयं करणे तृतीया भूतकालो ऽत्राविवक्षितः तेन सर्वथा यत्रापादानादीनामप्रसक्तिस्तेषामप्यसङ्कीर्तितत्वादकथितत्वव्यवहारः किमुदाहरणम् दुहियाचिरुधिप्रच्छिभिक्षिचिआमपयोगनिमित्तमपूर्वविधौ ब्रुविशासिगुणेनच यत्सचते तदकीर्तितमाचारितङ्क्विना उपयोगनिमित्तमिति उपयुज्यते इत्युपयोगः पयः फलादि तस्य निमित्तङ्गवादि पय आदीनापुपयोगरदर्थव्यवहार्यत्वप्रदर्शनेन तेषामीप्सित-

तमत्वन्दर्शितम् गवादीनाञ्च तान्निमित्तत्वेन धात्वर्थव्यापारात्प्राक् पय आदि कर्मयुक्तत्वन्निदर्शितम् गवादीनान्तथायुक्तत्वाभावादकथितञ्चेत्यनेनापि कर्मसंज्ञा न भवति अपूर्वविधावित्यत्र पूर्वत्वमुपलक्षणन्तेन परविधावपीयं संज्ञा न भवति ब्रुविशासिगुणेनेति ब्रुविशास्योर्गुणः साधनम्प्रधानङ्कर्म धर्मादिकन्तेन यत्सचते सम्बध्यते इत्यर्थः क्रियायाः साध्यत्वात्प्राधान्यङ्कारकाणान्तु तदर्थत्वादगुणत्वम् एवम्परिगणनेन नटस्य शृणोतीत्यादावतिप्रसङ्गवारकेणाकथितञ्चेति सूत्रोदाहरणत्वमेषान्धातूनामिति पूदर्श्य दुहि गां दोग्धि पयः नैतदस्ति कथितात्रापादानसंज्ञा गोः पय आदत्ते इत्यर्थावगमादपादानत्वङ्गवादीनाम् अनेन यदा गवादीनामपादानत्वविवक्षा तदा न भवति यदातु न तथा धात्वोर्व्यापारद्वयार्थकताच तदा कर्तुरित्येव कर्मत्वमिति पूदर्शितम् याचि इदन्तर्हि पौरवङ्गां याचते नैतदस्ति कथितात्र पूर्वापादानसंज्ञा पौरवाद्गाञ्जिघृक्षत इत्यर्थस्य पूतीतेः एतेनाप्यनुदाहरणत्वन्दर्शयित्वा तात उक्तं न याचनादेवापायो भवति याचितोसौ यदि ददाति तदापायेन युज्यते एतेन सर्वथा ऽविवक्षायामनेनासङ्कीर्तितपौरवस्य कर्मत्वम् रुधि अन्ववरुणद्धि गां व्रजन् नैतदस्ति कथितात्र पूर्वा ऽधिकरणसंज्ञा गां व्रजे स्थापयतीति सम्भवात् एतेन यदा गौर्व्रजम्प्रविशति गवा व्रजम्प्रवेशयतीत्यर्थविवक्षा तदा व्यापारद्वयार्थकत्वेन पूर्वसूत्रस्य प्रवृत्तिरित्यर्थादुक्ताभवति प्रच्छि माणवकम्पन्थानम्पृच्छति नैतदस्ति कथितात्र पूर्वापादानसंज्ञा माणवकान्मार्गोपदेशं जिघृक्षताइत्यर्थविवक्षा दर्शिता तदा ऽनुदाहरणत्वं यदातु पृच्छमात्रमनङ्गीकृतापायन्यात्वर्थस्तदभिप्रायेण न पृच्छादेवापायो भवति पृष्टोसौ यद्याचष्टे तदा ऽपायेन युज्यत इत्युक्तमनेन सर्वथा ऽविवक्षायामुदाहरणत्वम्पृच्छेर्दर्शितम् भिक्षि पौरवं गां भिक्षते नैतदस्ति कथितात्र पूर्वा ऽपादानसंज्ञा न भिक्षणादेवापायो भवति भिक्षितोसौ यदि ददाति तदा ऽपायेन युज्यते अनेन भिक्षधातुविषये याचिधातुवदुदाहरणमनुदाहरणत्वञ्च कल्पनीयमिति कथितम् चिञ् वृक्षमवचिनोति फलानि वृक्षस्यापादानत्वाविवक्षायामनेन कर्मत्वम् नैतदस्ति कथितात्र पूर्वा ऽपादानसंज्ञा वृक्षात्फलान्यादत्त इत्यर्थावगमात् एतेनात्रापादानत्वाविवक्षैव नास्तीति निदर्शितम् ब्रुवि शासि पुत्रन्धर्मम्ब्रूते पुत्रन्धर्ममनुशास्ति पु-

त्रो धर्मम्प्रतिपद्यते पुत्रन्धर्मम्प्रतिपादयतीत्यर्थः अनेन सम्प्रदानत्वाविवक्षायामुदाहरणत्वमित्युक्तम् नैतदस्ति कथितात्र पूर्वा सम्प्रदानसंज्ञा वचनानुशासनकर्मणा धर्मेण पुत्रस्याभिप्रेयमाणत्वात्सम्प्रदानत्वम् तस्याविवक्षाचात्र नास्तीति प्रदर्शितम् तस्मात् त्रीण्येवोदाहरणानि पौरवं गां याचते माणवकम्पन्थानम्पृच्छति पौरवं गां भिक्षतइति । इतिचायुक्तमिति भाष्योक्तपरिगणनपरवाक्ये याच्यातुसमानार्थकभिक्षेरुपादानादिति शेषः एवन्द्व्यर्थत्वेन दुहादिवद्द्व्यर्थत्वेन अतिप्रसङ्ग इति गमादिधातूनां संयोगानुकूलव्यापारानुकूलव्यापाराद्यर्थकतामाश्रित्य भृत्यङ्ग ग्रामङ्गच्छतीत्यादिप्रयोगापत्तिरूपो ऽतिप्रसङ्ग इत्यर्थः विस्तरस्त्वन्यत्र द्रष्टव्य इत्याशयेनाह दिगिति ननु क्रियायामन्वयेपि कदाचित्षष्ठीसम्भवात्क्षीरविशेषणत्वमात्रेण षष्ठीप्रतिपादनमयुक्तमित्याशयेनाशङ्क्याह कृत्वा तान्निराचष्टे नचेति षष्ठ्यन्तार्थस्येति शेषेत्यादिः स्वान्वययोग्यानामसमभिव्याहारइति कथनेन यत्र तत्समभिव्याहाराभावः क्रियायामन्वयविवक्षाच शेषत्वविवक्षाच तत्र षष्ठी भवत्येव मातुः स्मरति नटस्य शृणोतीत्यादौ यथा इति व्युत्पत्तेरिति एतेन पयःपदसमभिव्याहारे धात्वर्थानन्वय इति दर्शितम् अत एवेति उक्तव्युत्पत्तिसत्वादेव आदिना तण्डुलानोदनम्पचतीत्यस्य सङ्ग्रहः अत्र निर्वर्तनं विक्लेदनंच पचेरर्थः तण्डुलान् विक्लेदयन्नोदनन्निर्वर्तयतीति वाक्यार्थः इत्युक्तञ्चाथ इति कर्तुरीप्सिततमामिति सूत्रभाष्ये उक्तमित्यर्थः तत्रहि अथेह कथम्भवितव्यम् तण्डुलानोदनम्पचतीति आहोस्वित्तण्डुलानामोदनम्पचतीति उभयथा भवितव्यम् कथम् इह तण्डुलानोदनम्पचतीति द्व्यर्थः पचिः तण्डुलान्पचन्नोदनन्निर्वर्तयतीति इहेदानीन्तण्डुलानामोदनम्पचतीति द्व्यर्थश्चैव पचिः विकारयोगे षष्ठी तण्डुलविकारमोदनन्निर्वर्तयतीत्युक्तम् यद्यपि फलव्यापारावादाय सर्वेषामेव धातूनान्द्व्यर्थत्वमिहेह द्व्यर्थत्वाभिधानमनुपयुक्तमिति शङ्का भवति तथापि विक्लेदनविशिष्टन्निर्वर्तनम्पचेरर्थ इत्यर्थाभिप्रायेण द्व्यर्थत्वाभिधानम् विक्लेदनविशिष्टञ्चक्वचित्सामानाधिकरण्येन यथा आद्ये तत्र विक्लित्तिरूपफलाश्रयत्वात्तण्डुलानान्निर्वृत्तिरूपफलाश्रयत्वात्तु ओदनस्य कर्मता द्वितीयप्रयोगेतु करणत्वेन विक्लित्तिविशिष्टन्निर्वर्तनम्पचेरर्थः तत्र तण्डुलानान्त्वर्थप्रधानव्यापारविशेषणफलाश्रयत्वाभावान्न कर्मत्वन्किन्तु विकारयोगविवक्षया शेषे षष्ठी-

तिबोध्यम् विक्लित्तेश्च सम्बन्ध्याकाङ्क्षायां सन्निधानात्तण्डुलसम्बन्धिनी सेति विज्ञायते अत्र भाष्ये यथा मातुः स्मरतीत्यत्र कर्मणः शेषत्वविवक्षया षष्ठी भवति तथैव तण्डुलपदादपि सा सिद्धैवैति विशिष्य विकारयोगे षष्ठीत्यभिधानेन षष्ठ्यन्तार्थस्य स्वान्वययोग्यानामसमभिव्याहारे तत्रैवान्वय इत्युत्सर्गतो व्युत्पत्तिः सूचिता । मूलन्नास्तीतीति भाष्यानुक्तत्वादिति हेतुः पूरणीयः अत एवाह द्विकर्मकत्वमिति ननूक्तरीत्या द्विकर्मकत्वे साधितमेवेति कथमक्रियाकुदुक्तोदाहरणस्यायुक्तत्वाभिधानमित्याकाङ्क्षायामाह शक्रादिति एतेन तादृशप्रयोगाभाव एवेति ध्वनितम् इतरेषान्द्विकर्मकत्वन्न व्यापारद्वयार्थत्वेनाभिहितमित्याशयेनाह अकथितेति ननु भाष्यानुक्तत्वेनेतरेषान्द्विकर्मकत्वस्य प्रामाणिकत्वाभिधानमयुक्तमत आह कैयटेति तद्दीत्यैवेति कैयटादुक्तरीत्येत्यर्थः ननु ग्रहणार्थत्वेपि निग्रहार्थत्वं सिद्धमेवेत्यत आह शारीरेति तस्मादेवेति अर्थिनश्चेत्येतस्मादित्यर्थः एवञ्च मूले अर्थिनश्चेत्यादिवाक्यशेषादित्यन्तन्देहलीदीपकन्यायेनोभयत्रान्वेति । मूलादि खण्डयितुमुपक्रमते एतत्सर्वमिति सर्वम् सूलम्परमयूलं श्लोकस्य पठनमर्वाचीनखण्डनमप्रागुक्तं वक्ष्यमाणञ्च सर्वम् प्रागुक्तमिति कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थव्यापारविशेषणेत्यादिना प्रागुक्तमित्यर्थः ननु कर्तुरीप्सिततमामितिसूत्रस्थप्रागुक्तभाष्यसम्मतमेव पचेर्द्विकर्मकत्वमिति कथमप्रामाणिकत्वाभिधानमत आह अकथितसूत्रेति अत्रेति कैयटेत्यादिकथने व्यापारद्वयार्थत्वे फलपाकानुकूलव्यापारार्थत्वे इत्यर्थः तदाहुचदुस्वरम्फलम्पचतीति प्रयोगः एकव्यापारेति फलपाकानुकूलव्यापार एव पचेरर्थः तदाहुचदुस्वरः फलम्पच्यत इति प्रयोगः कालनिष्ठस्य द्वितीयस्य व्यापारस्याधुना परित्यागः भाष्यस्य दुहिपच्योर्बहुलं सकर्मकयोरिति भाष्यस्य एतच्च भाष्यं कर्मवदिति प्राप्तकर्मवद्भावस्य सकर्मकाणामप्रतिषेध इत्यनेन प्रतिषेधे प्राप्ते कर्मवद्भावविधायकम् एतत्सूत्रेति अकथितञ्चेति सूत्रेत्यर्थः यदुक्तम्मूले मतान्तरेति तदयुक्तम्प्रागुक्तं यद्भाष्यसम्मतम्मतन्तद्दीत्या तस्य युक्तत्वमेवेत्याशयेनाह पूर्वोपपादितेति एवञ्च हरदत्तोक्तमसङ्गतमिति भावः ध्वनितमिति मतान्तरेत्यभिधानेन ध्वनितमित्यर्थः उक्तमिति अकथितञ्चेति सूत्रविषयत्वं यदि जयत्यादीनाभाष्यकाराभिमतम्तदा चकारेण तेषां सङ्ग्रह उचितस्तत्रैवतु न मानमित्युक्तप्रायमित्यर्थः

ननु यदि प्रकृतसूत्रस्यार्थनिबन्धनार्थत्वाभावेनाप्राप्तिस्तदा द्विकर्मकत्वङ्कथमनुक्तानामित्याकांक्षायामाह द्विकर्मकत्वन्त्विति यथा प्रयोगव्यापारद्वयार्थकत्वं कल्पनीयामिति भावः कुरुपञ्चालादेरेव देशपदेन ग्रहणे किम्मानमत आह व्याख्यानादिति अधिशीङ्स्थासामित्यादिसूत्रारम्भमूलकाद्व्याख्यानादित्यर्थः तथैव कुरुपञ्चालादिशब्दानामेव देशवाचकत्वेनोदाहरणात् मूलेमित्यादेरित्यत्रादिपदेन समानोदरे शयित ओचोदात्त इति निर्देशस्य सङ्ग्रहः अकर्मकधातुभिर्योग इति वार्तिकमेव स्वातन्त्र्येण न कर्मसंज्ञाविधायकङ्किन्तु स्वार्थकरणकव्यापने धातूनां वृत्तिकल्पनेन सिद्धकर्मत्वानुवादकमित्यस्य वक्ष्यमाणत्वात्तदभिप्रायेणाह शीङादेरपीति शयनपूर्वके शयनादिकरणके नन्वेवन्त्वादृशदेशग्रहणेपि तस्य सूत्रस्य वैयर्थ्यमेवातस्तत्फलितमेवैतदित्याह एवञ्चेति तादृशदेशग्रहणेचेत्यर्थः एवं कल्पनया स्वकरणकव्यापने वृत्तिकल्पनया उक्तदेशादीनाम् कुरुपञ्चालादीनाम् एवकारेण वैकुण्ठादीनां व्यवच्छेदः मूलादुक्तार्थस्य न झटिति प्रतीतिरत आह सूचयतीति ननु क्रियापि काल एव प्रसिद्धपरिमाणासूर्यक्रियान्तरपरिच्छेदहेतुत्वात्काल एवेत्युक्तेरत आह क्रियाया इति जन्यमात्रङ्कालोपाधिरित्यस्य जन्यमात्रवृत्तित्वदार्थनिष्ठाधेयतानिरूपिता या कालनिष्ठा कालिकसम्बन्धावच्छिन्नाधिकरणता तदवच्छेदकमित्यर्थः क्रियाया इव जन्यघटादेरपि मासादिपदव्यवहार्यत्वङ्कालाध्वनोरत्यन्तसंयोग इति सूत्रोदाहरणसिद्धये स्वीकार्यमेवेत्याशयेनाह यदित्विति न कालत्वम् न कालपदव्यवहार्यत्वम् ननु स्वप्धातोर्यदा स्वापकरणकव्यापने वृत्तिस्तदा ऽध्वानं स्वपितीतीष्टमेवेत्यत आह स्वापमात्रेति एतेनाकर्मकधातुभिर्योग इति मौलवचनस्यापूर्वत्वशङ्कां वारयति अकथितञ्चेतिसूत्रे ऽकर्मकप्रकृतिकण्यन्तानां कथन्द्विकर्मकत्वमिति प्रश्ने कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणामित्यत्र प्रसिद्धत्वसूचकहिशब्दोपादानेन सर्वत्र स्वार्थकरणकव्यापने हत्वा कालादिकर्मकत्वसम्भवस्य सूचनात् अकर्मणामित्युपलक्षणम् सकर्मकाणामप्येवङ्कल्पनया कालादिकर्मकत्वस्य सम्भवात् कृत्रिमाऽकृत्रिमयोरिति परिभाषया कृत्रिमाधिकरणकं कार्यजातमुक्तन्तु तत्र हेतुरुक्त इत्यत्रत्यग्रन्थस्य हेतुपरत्वमेवेत्याशयेनाह कार्यसम्प्रत्ययस्येति एवञ्चौचित्येन हेतुनोक्तार्थः साधनीय इति भावः कृत्रिमकर्मत्वोक्तेरिति तच्च ग-

न्तुमिच्छतीत्यप्राप्त्यैव एवं सर्वत्र सन्दर्शनप्रार्थनाध्यवसायारम्भनिर्वृत्तेः सत्वेन तत्तन्निरूपितङ्कर्मत्वमस्त्येवेति कृतिमत्कर्मत्वोक्तेरित्यर्थ एवञ्च कृत्रिमाकृत्रिमन्यायेन कर्मकारकस्यैव ग्रहणमिति नियमासिद्धिरित्याह इदमसङ्गतमिति प्राञ्च इत्यभिधानम्मूलकारस्य यद्यरुचिबोधनाय तदा तस्यार्थस्य भाष्यकारसम्मतत्वादेवङ्कथनमसङ्गतमेवेत्यत आह हेतुमतीति हरिकारिकायां स्वातन्त्र्यादित्यनेन कर्मत्वप्राप्तिहेत्वभिधानङ्कृतमिति भ्रमनिवारणायाह स्वातन्त्र्यादित्यस्येति स्वधर्मेणेत्यस्य कर्तृवृत्तिधर्मेण कर्तृत्वेनेत्यर्थे तृतीयया इत्यस्य न लाभ इत्यत आह स्वकार्येणेत्यर्थ इति एवञ्च तृतीययेति फलितार्थकथनमिति भावः मूले ऽन्तरङ्गत्वमुपपादयति स्वकारकेति हेतुमति णिज्विधानादित्यनेन यदुपजीव्यत्वमेवोपपादितमिति ज्ञायते तदा ऽत एवेत्यनेन पुनरुपजीव्येत्यभिधाने पौनरुक्त्यमत आह विशिष्टाया इति स्वकारकविशिष्टाया णिजर्थेन सम्बन्ध इत्यर्थः मूले ऽत एवेत्यस्योक्तहेतोरेवेत्यर्थः । एवञ्च अन्तरङ्गत्वसत्वेच गतिबुद्धीतिसूत्रस्य नियमार्थेभाष्यकाराभिमतमिति विधित्वपक्षस्य निर्मूलस्य कथनमसङ्गतमत आह अस्येति अस्य गतिबुद्धीतिसूत्रस्य तदेवाह तत्र हीति आकडारादितिसूत्र इत्यर्थः कर्मेति प्रथमान्तम् मन्यत इति मूलकृदिति शेषः अरुचिरभिमान इति मन्यत इत्याभ्यां सूचिता सा ऽनुपदमेव व्यक्तीभविष्यति मूले शाब्दम्प्राधान्यम्पुरस्कृत्येति प्राप्तायां इति शेषः न प्राबल्यम्प्रयोजयत इति लौकिको दृष्टान्तो ऽत्र साधकः यथा ऽन्तरङ्गामात्यादिकार्येप्रधानराजाज्ञया बाध्यत इति इह शास्त्रे शब्दस्य प्राधान्यात्तदनुरोधिकर्मत्वस्य राजवत्प्राबल्यमिति ननु यथाशाब्दम्प्राधान्यम्प्रयोजकव्यापारे तथेदन्त्वलक्षणमार्थम्प्राधान्यम्प्रयोज्यव्यापारे इति द्वयोः समत्वमेवेति ब्रूयादित्याशयेनाह अन्यानधीनत्वेति एवञ्च द्विविधम्प्राधान्यन्तत्रास्तीति प्रयोजकव्यापार एव प्रबल इति भावः परोक्तमुपजीव्यत्वमपि खण्डयति किञ्चेत्यादिना भाष्यस्य परोक्तस्य तर्हि कागतिरत आह आकडारेति तस्य सूत्रस्य पाठभेदप्यस्य नियमार्थत्वमेवेत्याह किञ्चेति विपरीतनियमशङ्कां वारयति एषामिति योगे कर्तुरिति शेषः तदाहि गत्याद्यर्थानामणौ कर्तुर्णौ यदि भवति तदा कर्मसंज्ञैवेति नियमाकारः । शास्त्रबाधापत्तेरिति तादृशनियमेन कर्तृसंज्ञाया व्याहत्या परकार्यस्य विधानाभावादिति भावः

किञ्च भवदुक्तो नियमाकारश्चेत्याचयत्यादियोगेपि कर्मसंज्ञाप्रयोजकव्यापारस्योक्तद्विविधप्राधान्यस्य सत्वात्प्राप्नोति नचेष्टापत्तिः आकडारादिति न्यासान्तरेण वैरूप्यापत्तेः नचाणौ यः कर्ता स एव णौ कर्म भवति नतु तद्भिन्न इति विपरीतनियमः कस्मान्न भवतीति वाच्यम् लक्ष्यविसंवादापत्तेः ण्यन्ते कर्म्मान्तरस्य भवन्मते ऽभावेन ण्यन्ते कर्तुश्च कर्मण इति विशेषाभिधानानुपपत्तेश्च कर्मान्तरसम्भावनाया अभावेन सौत्राकर्मकग्रहणवैयर्थ्यापत्तेश्च अनीप्सितत्वाभावादिति प्रकृतिजन्यशाब्दबोधे प्रधानीभूतो यो व्यापारस्तत्प्रयोज्यफलाश्रयत्वेनोद्देश्यत्वस्य सत्वेनोद्देश्यत्वाभावात्मकानीप्सितत्वाभावादित्यर्थः ननु प्रयोज्यव्यापारोद्देशेन प्रयोजकव्यापारस्य प्रवृत्तेर्लौकिकमनीप्सितत्वं स्वर्गादीनामस्त्येवेत्यत आह तत्रापीति कर्तुः क्रियया तथायुक्तमित्येवंसूत्रार्थस्य सत्वात् मूले स्वतन्त्रोपलक्षणमिति स्वतन्त्रे लाक्षणिकमित्यर्थः कर्तृपदस्य शक्तिविशेषावच्छिन्ने परिभाषितत्वादिति भावः अत एव कर्तृपदस्य तत्र लक्षणासत्वादेव दाधातोर्विभागानुकूलव्यापारो ऽर्थः तादृशविभागावधित्वस्य प्रकृतधात्वर्थप्रधानव्यापाराश्रयत्वेन कर्तृत्वस्यच प्राप्तौ परत्वात्कर्तृसंज्ञैव सार्थस्य स्यान्नत्वपादानत्वमिति कथमत्र पञ्चमीति न शङ्क्यम् अपादाने चाहीयरुहोरिति ज्ञापकादिति गृहाण अपादाने या पञ्चमी भवति तदन्ताद्वा तसिः स्यात् तच्चेदपादानं हीयरुहसम्बन्धि नचेदिति तदर्थः ग्रामाद्ग्रामतोवा गच्छतीति तदुदाहरणञ्च अत्र हीयेति कर्मप्रत्यये सति हीयते इति यद्भवति तदेकदेशानुकरणमतस्तेन पर्युदासरूपज्ञापकेन कर्मप्रत्ययान्तदाधातुयोगे विप्रतिषेध इति शास्त्रप्रवृत्त्या ऽपादानत्वभवति सार्थं एनं जहाति अयं सार्थाद्धीयते इति सम्भवत्ययात् हीयत इति कर्मकर्तरि लः हीयते ऽपगच्छतीत्यर्थः न केवलज्ञातिबुद्धीतिसूत्र एव कर्तृग्रहणं स्वतन्त्रोपलक्षणङ्किन्त्वन्यत्रापीत्याह तत्प्रयोजक इति । एवमेव तत्पदमपि स्वतन्त्रपरामर्शकमेव कर्तुरीप्सिततममितिसूत्रे कर्तृपदस्य लक्षणां विनापि निर्वाह इत्याशयेनाह किञ्च प्रयोजकेति एतत्सर्वकर्मसंज्ञायाः प्रागप्रवृत्तिमभ्युपेत्य वस्तुतस्तु गतिबुद्धीतिसूत्रस्य णिचि कृते प्रवृत्तिः कर्तुरीप्सिततममित्यस्यतु प्रागेव प्रवृत्तिरित्यनुपपत्तिगन्धोपि नेत्याह किञ्च णिजुत्पत्तेरिति ननु कृतमपि कार्यन्निवर्तयन्तीत्यर्थका कृतेति न्यायेन प्राक् प्रवृत्तायाः संज्ञाया अपगमे पुनस्तस्याः प्रवृत्तिरभिप्रेता अथवा प्रयोज्यस्य

कर्तृत्वन्नङ्क्ष्यतीति स्वर्गादीनाङ्कर्मसंज्ञा प्राङ्न भविष्यतीत्यत आह अकृ
तेति अनित्यमिति ह्वोरितिसूत्रे सतुक्कग्रहणात् एतत्कैयटानुरोधेन स्वम
तेनाह नास्त्येवेति गतिरुत्तरदेशसंयोगानुकूलव्यापारमात्रम्प्रापणन्तु तादृश
व्यापारानुकूलव्यापार इत्याह उत्तरदेशेति अत एव प्रतिषेधादिति नीव
ह्योरित्यस्मादेव प्रतिषेधादित्यर्थः । यथाकथञ्चित् विशेषणतया जातिवि
शिष्टस्य शब्दार्थत्वेपि जातिशब्दस्वव्यवहारवत् अपिना विशेष्यतयेत्यर्थं
सङ्गृह्णः अत्र गतीतिसूत्रे अत एव णिजन्तस्य गत्याद्यर्थकत्वमुपजीव्य ग
त्याद्यर्थानामणौ कर्ता यः स णाविति व्याख्यानमपि सुष्ठु सङ्गच्छते ए
तावता प्रबन्धेन मूलं संयोज्य सिद्धान्तरीत्या मूलं खण्डयितुमुपक्रमते न
वेति सूत्र इत्यादिना अभ्यवहरतिम् अभ्यवपूर्वकहृधातुम् प्रत्यवसाना
र्थत्वाद्धि प्राप्तिरत्र अप्राप्त इति संयोगानुकूलव्यापारमुख्यविशेष्यकोपस्थि
तिजनकस्य गत्यर्थत्वमिति तदाशयः उदाहरणादिति प्रापणार्थस्य गत्य
र्थत्वे ऽप्राप्त्यभिधानमसंगतं स्यादिति भावः । विपूर्वइति विहरति देशन्तु
रग इति शब्दात्सम्यग्गच्छतीत्यर्थावगमात् केवलस्य गत्यर्थत्वे विपूर्व इति
न वदेदिति भावः अभ्यवपूर्व इति हरतिरित्यस्यानुषङ्गः अप्रतिषेध इति
नगतीतिप्रतिषेधो नेत्यर्थः प्रापणं यदि गतिः स्यात्तदा प्रतिषेधाभावाभि
धानमसङ्गतं स्यादिति भावः नन्वेतावता हरतेरस्तु तथा वहतेस्तु गत्य
र्थत्वाभावे किम्मानमत आह तत्रैवेति नगतीतिसूत्रएवेत्यर्थः इति भाष्ये
णेति वार्तिकस्थवहिग्रहणप्रत्याख्यानपरेणेति शेषः वहधातोर्गत्यर्थत्वाभा
वे हेतुमाह प्राप्तिश्चेति एवञ्च संयोगत्वेन संयोगस्य तन्मध्ये ऽप्रवेशान्न ग
त्यर्थत्वमिति भावः सुखम्प्राप्त इति अत्र समवायत्वेन संबन्धस्योत्तरत्र स्व
स्वामिभावत्वेन लक्ष्यस्य भेद इति विवेकः नत्यर्थत्वाभावे कर्तरि क्त
प्रत्यय एव कथमत आह आदिकर्मणीति चस्त्वर्थे नन्वेवन्तर्हि नीवह्योरिति
वार्तिकस्य का गतिरत आह देशान्तरप्राप्तेरिति परं केवलं सुखम्प्राप्त इ
त्यत्र तथावगत्यभावादाह क्वचिदिति ग्रामम्प्राप्त इत्यादौ नान्तरीयकतया
तस्य प्रतीतिः इत्यभिमत्य एवमङ्गीकृत्य उक्तभाष्यविरोधो ह्यभिमानत्वोक्तौ
हेतुः एवञ्च व्यायसिद्धार्थानुवाद एव वार्तिककृता कृत इति तत्त्वम् ननु क्षे
त्रस्थानां यवानाम्क्षणे यवानां यद्यपि प्राणवियोगसत्वाद्धिंसा भवति तथा
पि धातोस्तदर्थत्वाभावान्न निषेधस्य प्राप्तिरत आह हिंसाङ्गेति हिंसाया अङ्गं

विशेषणमिति वाच्यार्थः भक्षणकरणकहिंसने धातोर्वृत्तिरिति भावः भक्षयतेः स्वार्थणिजन्तप्रकृतिकहेतुमण्णिजन्तस्य भक्षयतेः अस्मादेव निषेधाद्गतिबुद्धीतिसूत्रे ऽणीत्यत्र हेतुमण्णिच एव ग्रहणम् ण्लृ स्मारयतीति चिन्तनार्थोयन्न मित् । ननु यदि भाष्यप्रयोगात्कर्मत्वन्तदा स्मारयति देवदत्तेनेत्यत्रातिप्रसङ्ग इत्यत आह आध्यानेति उत्कण्ठापूर्वकस्मरणेत्यर्थः स्मरतेः चिन्तनार्थस्य स्मरतेः वक्ष्यमाणरीत्या ऽयुक्तम्मूलं योजयति इदमिति शब्दायतेरिति वचनमित्यर्थः कैयटपदसूचितामरुचिमाह वस्तुत इत्यादिना एवञ्च तत्र पक्षे प्रतिषेधानुक्तौच तत्र पक्षे शब्दकर्मकाणामिति पक्षे ननु धात्वर्थसङ्गृहीतकर्मकत्वमेव मानभविष्यतीत्यत आह शब्दस्येत्यादि बहिर्भूतेति अन्तर्भूतशब्दात्मककर्मण इत्यादिः तेन एवं व्याख्यानेन बोधनार्थस्य बुद्ध्यर्थकत्वेन गतिबुद्धीतिसूत्रस्य प्राप्तिरन्यार्थकत्वेतु नेति भावः अन्यथा अन्यार्थस्यापि द्विकर्मकत्वस्य प्रामाणिकत्वे एवञ्चेति धेनोरभिधानेच अन्यपदार्थत्वाभावादिति धेनोः क्तेनाभिधानादिति भावः तत्र जायायेत्यस्यादित्वे तृतीयान्तस्य व्यधिकरणत्वाद्बहुव्रीहिघटकत्वन्न सम्भवतीत्यत आह तृतीयातत्पुरुषमिति बहुव्रीहिरिति जायाप्रतिग्राहितशब्दस्य द्वन्द्वसंज्ञकगन्धमाल्यशब्देन बहुव्रीहिसमास इत्यर्थः ननु प्रतिग्राहिते गन्धमाल्ये ययेत्यर्थे बहुव्रीहिङ् कृत्वा तेन जाययेति तृतीयान्तस्य तत्पुरुषो ऽस्त्वित्यत आह बहुव्रीहिणेति । विधायकाभावादिति समुदायार्थस्य तृतीयान्तार्थकृतत्वाभावेन तृतीयातत्कृतेतिसूत्रस्याप्राप्तेरिति भावः ननु अवयवद्वारकसामर्थ्यमादाय सुप्सुपेतिसमासो ऽस्त्वित्यत आह अवयवेनेति द्विकर्मकत्वेपीति बोधनातिरिक्तार्थस्य ग्राहेर्द्विकर्मकत्वेपीत्यर्थः कर्मत्वाविवक्षायामिति सम्बन्धित्वेन विवक्षायामित्यर्थः इष्टसिद्धिरिति जायया प्रतिग्राहिते इत्यर्थे तृतीयातत्पुरुषं कृत्वा जायाप्रतिग्राहिते गन्धमाल्ये यस्या इत्यर्थे बहुव्रीहिसमासेनेष्टसिद्धिरिति भावः हेतुत्वार्थमिति हेतुसंज्ञार्थमित्यर्थः कर्तृत्वार्थमिति कर्तृसंज्ञासिध्यर्थमित्यर्थः ईदृशार्थस्य तादृशव्यापाररूपार्थस्य एतत्कर्मसंज्ञेति धेनोः कर्मसंज्ञानिमित्तकोटौ प्रवेशेनेत्यर्थः ईदृशे विषये कर्तुः कर्मत्वविषये ननु कर्तृत्वकर्मत्वशक्त्योरन्यतरस्य सत्वमस्तु अन्यतरस्य विवक्षास्त्वित्यत आह कर्मत्वशक्तेरपीति तत्समनियतत्वेन कर्तृत्वसमनियतत्वेन आभिमानादित्यभिधानमरुचिसूचनाय तद्बीजन्तु श-

कल्पोभेदे तथा विवक्षा सम्भवत्येवेति निवृत्तप्रेषणग्रहधातोः स्वीकारमात्रार्थकग्रहधातोः णिचि तादृशस्वीकारानुकूलव्यापाररूपार्थे णिचि उच्चैर्ग्रहलक्ष्य शङ्कां वारयितुमुपक्रमते नन्वित्यादिना अन्यान्तर्भावेणेति वृत्तौ विग्रहघटकपदार्थातिरिक्तार्थस्यान्यपदार्थभिन्नस्य बोधकः शब्द इत्यर्थे मानाभाव इति भावः व्याख्यानादिति वक्ष्यमाणभाष्यप्रयोगमूलकव्याख्यानादित्यर्थः बीजाभासमिति पूर्वनिपातप्रकरणस्यानियतत्वात्पूर्वनिपातस्य संघातविवक्षासाधकत्वाभावाद्बीजाभासत्वमित्यर्थः अत एव संघातस्य विवक्षायाः सत्वादेव भाष्यप्रयोगः वोतोगुणवचनादितिसूत्रस्थभाष्यप्रयोगः ननु नित्यमितिसूत्रेणायचो वृत्तिविषये विधानादुभशब्दोदेश्यकत्वं षष्ठ्यर्थ इति वक्तुमशक्यमित्यत आह उभांश इति ननु मौलवचने तर्हि कुतो नायाजित्यत आह उभशब्दस्येति यत्र सङ्ख्येयपरतास्ति तत्रोभादुदात्तइत्यस्य प्रवृत्त्या नित्यमित्यस्यापि तत्रैव प्रवृत्तिरिति भावः प्राचीनसम्मतव्याख्यानानुरोधेनाह वृत्तौ ऋतेति धिगित्यत्र विभक्त्यश्रवणेनाविभक्तिकत्वं स्यष्टमेवेत्यत आह अनुत्पन्नेति। सूत्रैणैव तसिलादिप्रत्ययस्योपपत्तावाद्यादित्वकल्पनमनुचितमित्यभिप्रायेणाह कृष्णसम्बन्धीति ननु सामानाधिकरण्यमेकाधिकरणवृत्तित्वन्तस्य सम्बन्धत्वन्तु नीलो घट इत्यादौ बाधितत्वयोरभेदादत आह विनापीति सम्बन्धम् सम्बन्धविशेषम् षष्ठ्याः शब्दरूपतया सम्बन्धत्वञ्च सम्भवतीत्यत आह भेदसम्बन्धेति भेदप्रयोज्यसम्बन्धेत्यर्थः सच स्वस्वामिभावादिरूपः ननु नाम्नोरेव द्विधा ऽभिसम्बन्धाभिधानमसङ्गतम् क्रिययोरपि द्विधा सम्बन्धस्य दर्शनात् एधाञ्चक्र इत्यादौ पुरीमवस्कन्देत्यादौचाभेदस्य कृष्णत्वमेचेत्सुखं यायादित्यादौ भेदसम्बन्धावच्छिन्नविशेष्यविशेषणभावस्य प्रतीतेरत आह नाम्नोरित्यनेनेति एवञ्च नाम्नोरेव द्विधा सम्बन्धप्रतिपादनेन तात्पर्यङ्किन्तु क्रियाकारकयोर्विशेषसम्बन्धाभिधाने तात्पर्यमिति भावः ननु बद्धोक्तौ वैयधिकरण्यपदानुक्तेः कथमेवमभिधानमत आह षष्ठ्यावेत्येतदिति बोधनीयेति विधेयभूतेत्यर्थः एवञ्च धिङ् मूर्खेत्यत्र जीवसीत्यादि विधेयक्रियायाम्मूर्खेत्यस्यान्वयस्तस्यामेव धिक्शब्दार्थनिन्द्यत्वस्यान्वय इति क्रियाया निन्द्यत्वस्य प्रतीतिर्नतु मूर्खत्वस्येति भावः तथाच यस्मिन्वाक्ये सम्बोधनेन विभक्त्यन्तस्य क्रियावाचकस्यच तादृशस्य प्रयोगस्तत्र तस्याङ् क्रियायामन्वयो यत्रतु

सम्बोधनविभक्त्यन्तमात्रस्याप्रयोगस्तत्र विधेयक्रियावाचकम्पदमध्याहर्तव्यमित्यत्र तात्पर्यम् यत्र धिङ् मूर्ख जीवसीति प्रयुज्यते तत्र जीवनरूपा क्रिया न विधेया तस्याः सिद्धत्वात्किन्तु जानीहीत्यस्य शेषता कल्पनीया अभिमुखीभवन्मूर्खोद्देश्यकं जीवनसम्बन्धि निन्दाकर्मकं यज्ज्ञानन्तदनुकूलप्रवर्त्तनाविषयो व्यापार इति शाब्दबोधः। न योग इति किन्तु जानीहीत्येतदर्थे तातेत्यस्य त्वां हा मांवा हा इति वाक्यद्वयमेवात्र बोध्यम् हापदस्येति खेदार्थकस्येति शेषः ननु सम्बोधनपदार्थस्य क्रियायामन्वयस्य प्राक् प्रतिपादितत्वेन तिङ्समानाधिकरणे प्रथमेति वार्तिकैकवाक्यतया प्रथमायाः कारकविभक्तित्वस्य सत्वाच्च तन्मन्दमित्यादिना प्रतिपादितमसङ्गतमत आह कर्तृकारकेति ननु यदि कारकत्वन्तर्हि तस्य कर्तृत्वमप्यस्त्वित्यत आह सम्बोधनपदार्थस्येति देव त्वम्प्रसीदेति वाक्य इत्यादिः त्वमित्यनेन एतदर्थेन अभेदेपीति फलितोभेदेपीत्यर्थः शब्दत इति सम्बोधनपदार्थे इत्यादिः उद्देश्यतयैव तस्य तत्रान्वयस्य स्वीकारादिति भावः ननु तस्मिन् वाक्ये त्वमित्येतदर्थेन सह देवेत्यस्याभेदस्य सत्वाद्स्तुत्या ऽऽश्रयत्वमप्यस्तीत्यत आह वास्तवेति बहूपपुव इति वचनपुरुषाद्यव्यवस्थारूप इत्यर्थः वस्तुतस्तु वाक्यैकदेशन्यायेन व्रजानि देवदत्तेत्यस्य व्रजानि देवदत्त जानीहीत्येतदर्थकतास्ति एकतिङ् वाक्यमित्यस्य श्रूयमाणैकतिङ्वाक्यमित्यर्थ इति निघातस्य सिद्धिरप्यास्ति अत एव सम्बोधनस्य कर्तृकारकवाचिलव्यवहारोपि प्राचाम् देवदत्तेत्यस्योक्तन्यायेन देवदत्त त्वज्जानीहीत्येतदर्थकत्वेन विधेयक्रियाकर्तृकारकवाचित्वात् अत एव तिङ्समानाधिकरणे प्रथमेति वार्तिकस्याप्युपपत्तिः यत्र क्रियावाचकम्पदम् श्रूयते तत्राप्यस्तिर्भवन्तीपर इति न्यायेन गम्यमानक्रियान्वयोस्त्येव भवन्तीपर इत्यस्य लट्पर इत्यर्थः अत्र भवन्तीत्युपलक्षणम् लकारान्तरस्यापि क्वचित्सम्भवादत आह इति भाव इति एवञ्च मूलोक्तञ्चिन्त्यमित्यत्र तात्पर्यम् ननु प्रथमसमाधानेन उपर्युपरि बुद्धीनामित्यस्य सूपपादत्वेन यद्वेत्यादिनोक्तद्वितीयसमाधानस्य नोपयोगः किञ्च बुद्धीनामिना श्रेष्ठा बुद्धीना तामुपर्युपरीत्येवन्द्वितीयापि वक्तुं शक्येत्यत आह अत एवेति द्वितीयसमाधानादेवेत्यर्थः एतदेवाहालेति उक्तवाक्ये इत्यर्थः अतिशय इति यथा उपर्युपरि लोकं हरिरित्यादौ

द्विरुक्तस्योपर्युपरीत्यस्य समीपोर्ध्वदेशवृत्तित्वमर्थः प्रतियोगित्वरूपः सम्बन्धो लोकपदोत्तरद्वितीयार्थः लोकप्रतियोगिकसामीप्यवदूर्ध्वदेशवृत्तिर्हरिरित्यर्थः प्रतीयते न तथा प्रकृते किन्तु बुद्धीनां लौकिकपुरुषबुद्धीनामुपर्युपरि तदवधिकातिशयविशिष्टाश्चरन्तीत्यर्थ इति न द्वितीयाप्रसक्तिरिति भावः द्विर्वचनञ्चात्रेति चस्त्वर्थे ननु बुभुक्षितन्न प्रतिभातीत्यत्र कर्मप्रवचनीययुक्त इत्येव द्वितीया सिद्धा प्रतिशब्दस्येत्थम्भूताख्याने तस्याः संज्ञायाः प्राप्तेरत आह बुभुक्षितेति बुभुक्षितेनान्वितो यः प्रत्यर्थः प्रतिद्योत्यस्तद्रूपो यः सम्बन्धस्तस्य क्रियागतत्वमित्यर्थः सच प्रतिभात्वरूप एव एतच्च झटिति स्फूर्तिकत्वमेव एतस्य सम्बन्धस्य प्रतिद्योत्यता वाच्यस्तु स धातोरेवेति सूचनाय बुभुक्षितस्य न भातीत्यस्य प्रतिशब्दाघटितस्य लेखः कर्मप्रवचनीयत्वेतु तस्याप्युपादानङ्कृतं स्यात् एवञ्च बुभुक्षितसम्बन्धी यत्किञ्चिद्विषयकप्रतिभाभाव इति बोधः अन्तराशब्दस्याधिकरणशक्तिप्रधानत्वादाह अन्तरा इतिहीति मध्यत्वान्वय्यवधित्वरूपः सम्बन्धो द्वितीयार्थः अन्तरान्तरेणेति सूत्रे परस्परसाहचर्यादव्ययोरेव ग्रहणन्नतु टाबन्ततृतीयान्तयोः अत एवेति कर्मणि द्वितीयाङ्गीकारादेवेत्यर्थः षष्ठीति कर्तृकर्मणोरिति सूत्रविहिता षष्ठीत्यर्थः एतेनास्य कर्मप्रवचनीयसंज्ञया षत्वाभावो यथा भवति तथा कर्मप्रवचनीययुक्त इति द्वितीयापि सिद्धैवेति कर्मणि द्वितीयेत्ययुक्तमिति परास्तम् शेषे षष्ठीतु वक्तुमशक्या कर्मप्रवचनीययोगविहितद्वितीयायास्तद्बाधकत्वात । ननु लक्षणादीनां विषयत्वन्द्योत्यत्वेन वाच्यत्वेन वा वक्तव्यन्तच्च न्यतरदप्यत्र न वीप्सायान्द्विर्वचनस्य स्वीकारादत आह अन्यद्योत्याया इति द्विर्वचनद्योत्याया इत्यर्थः विषयत्वन्तु तद्घटितवाक्यजन्यशाब्दबोधविषयत्वाद्बोध्यम् वीप्साया विषयत्वबोधनाय सूत्रे वीप्सापदम्प्रत्यादिसान्निध्येनोपात्तम् इतरे वीप्सातः ननु परिशब्दस्य क्रियया सम्बन्धो नतु वृक्षेणेति कथम्पञ्चम्यापत्तिः कर्मप्रवचनीयद्योत्यसम्बन्धप्रतियोगित्वस्यैव कर्मप्रवचनीययुक्तत्वादत आह विशिष्टक्रियासम्बन्धे इति परिद्योत्य सर्वतो भावविशिष्टक्रियासम्बन्धे इत्यर्थः यदि क्रियया सम्बन्धो न स्यात्तदा कर्मत्वाभावाद् द्वितीयापि न स्यात् एवञ्च कर्मप्रवचनीयद्योत्यसम्बन्धाश्रयान्वितत्वरूपमिह कर्मप्रवचनीययुक्तत्वमस्तीति भावः अभ्युपेत्यवादोयमिति ध्व-

नयन्नाह एतत्सर्वमिति एतत्सर्वम् इह वीप्सेत्यादिनोक्तम् हरदत्तानुरोधेनेति उपपदविभक्तेरिति न्यायेनात्र कर्मण्येव द्वितीया पर्यादयस्तु क्रियाविशेषका एवेतिहि तेनोक्तम् कर्मत्वाविवक्षायामिति तादृशशक्तिमत्त्वेन विवक्षायाङ्कर्मणि द्वितीयेत्यस्य प्रवृत्तिरिति स्पष्टमेव अनापत्तिरिति कर्मप्रवचनीय इत्यत्र बाहुलकात्कर्तरि भूते ऽनीयर् कर्मशब्दोत्र क्रियागतविशेषस्य बोधकः ये कर्म प्रोक्तवन्तः सम्मतितु न तथा किंत्वप्रयुज्यमानक्रियाकृतसम्बन्धविशेषस्य द्योतका इति लब्धम् एवञ्च यदि प्रयुज्यमानसेचनक्रियागतविशेषद्योतका एते तदा ऽप्रयुज्यमानक्रियाकृतविशेषाद्योतकत्वात्कर्मप्रवचनीयसंज्ञैव न स्यान्महासंज्ञाकरणादिति भावः ननु भवन्मते कथमत्र कर्मप्रवचनीयसंज्ञेतिचेदित्थम् वृक्षम्प्रति विद्योतते विदुद्यादित्यत्र प्राप्तिरूपा या ऽविद्यमाना क्रिया तत्कृतो यो विलक्षणो वृक्षविद्योतनयोर्लक्ष्यलक्षणभावाख्यः सम्बन्धस्तद्द्योतकत्त्वमस्ति । इत्थम्भूताख्याने उदाहरणमस्मिन्देशे प्रतिपुरुषं सौन्दर्यमस्तीत्यादौ प्राप्तिक्रियाजनिताधाराधेयभावाख्यस्य पुरुषसौन्दर्ययोः सम्बन्धस्य द्योतकतास्ति भागे वृक्षम्प्रति फलानि तिष्ठन्ति अत्राप्रयुज्यमानप्राप्तिक्रियाजनितो यो ऽवयवावयविभावो जन्यजनकभावोवा सम्बन्धस्तत्परिच्छेदकतास्ति वीप्सायाम् वृक्षंवृक्षं प्रति सिञ्चतीत्यत्र वृक्षस्य जलसंयोगाख्यसेचनस्यच यो व्याप्यव्यापकभावाख्यः सम्बन्धः सो ऽप्रयुज्यमानतत्तद्वृक्षावच्छिन्नोत्पत्तिकृत इति कर्मप्रवचनीयत्वम् किञ्च यद्यत्र वृक्षस्य क्रियाकर्मत्वमाश्रित्य कर्माणि द्वितीया प्रतेः सेचनगतसर्वतोभावरूपसम्बन्धद्योतकताच कल्प्यते तदा ऽसामर्थ्यात्प्रतिवृक्षमित्यत्र समासानापत्तिः अत एव प्रत्यर्थं शब्दनिवेशान्नैकेनानेकार्थस्याभिधानामिति सरूपसूत्रस्थभाष्यप्रयोगस्योपपत्तिः अन्यथा प्रतेर्भवदुक्तरीत्या निवेशेनान्वायित्वेनासामर्थ्यात्समासो न स्यात् अत एवैतत्सूत्रभाष्ये कस्य लक्षणादयो ऽर्था निर्दिश्यन्ते वृक्षादीनाम् किमर्थम्पुनरिदमुच्यते कर्मप्रवचनीयसंज्ञा यथा स्यात् गत्युपसर्गसंज्ञे माभूतामिति नैतदस्ति प्रयोजनम् यक्रियायुक्ताः प्रादयस्तम्प्रति गत्युपसर्गसंज्ञे भवतः नच वृक्षादीन्प्रति क्रियायोगः इदन्तार्हि प्रयोजनम् द्वितीया यथा स्यात् कर्मप्रवचनीययुक्ते द्वितीयेति वृक्षम्प्रति विद्योतते वृक्षमनु विद्योतते इति प्रघट्टकेनच वृक्षादीन्प्रति क्रियायोग इत्यनेन वृक्षम्प्रतिशब्दयोः सम्बन्धो दर्शितः

कर्मप्रवचनीययोगेन द्वितीयाच स्यष्टमभिहिता किञ्चोक्तोदाहरणे दुग्धते-रकर्मकत्वात्कर्मणि द्वितीया वक्तुमप्यशक्येति बोध्यम् मूले प्राञ्च [illegible] प्रक्रियाकृत इत्यर्थः तस्योपपत्तिरपि तत्तेत्यनेन दर्शिता तत्र तस्मिन्प्र-त्युदाहरणे अत्रार्थे माम्प्राप्नुयादित्यत्रार्थे यन्माम्प्राप्नुयात्तदीयतामित्युक्ते भाग एव वक्तृतात्पर्यावगमः यदितु यच्छब्दस्य बुद्धिस्थवाचकत्वेन भा-गवाचकत्वमेव प्रकृतेस्त्विति स्वीक्रियते तदातु न कापि शङ्केति बो-ध्यम् कालाध्वनोर्यो ऽत्यन्तसंयोगः सम्बन्धो व्याप्यव्यापकभावस्तस्मिन्नर्थे प्रातिपदिकाद् द्वितीयेत्यर्थे केनात्यन्तसंयोग इत्याकाङ्क्षायाङ्गुणेन क्रियया अभावेनवा स सम्भवतीति तेषां लाभे प्रत्यासत्त्या कालाध्ववृत्तिभ्यान्द्वि-तीया इति यद्यपि लभ्यते तथाप्यन्यकालेनात्यन्तसम्बन्धो ऽन्यकालप्रति-पादकात्तु सेति कुतो नेत्यता आह येन कालेनेति । संयोग इति गुणा-दीनामिति अभावोदाहरणम्मासम्भोजनाभाव इति ननु यन्मूले समास-निवृत्तेरेव फलत्वादित्युक्ता तस्मादित्युपसंहृतन्तदयुक्तमन्यार्थङ् कृतस्य कु-ल्यादेरन्योपकारकत्वस्य दृष्टतया तिङन्तेन योगे कृत्वोर्थप्रयोगसूत्रप्रवृत्तेर्दु-र्वारत्वादत आह अन्तरङ्गत्वाच्चेति अल्पापेक्षत्वरूपञ्चात्रान्तरङ्गत्वम् नच विशेषविहितत्वेनान्तरङ्गादपि तत्सूत्रम्बलवद्भावेष्यतीति वाच्यम् अचारि-तार्थ्यविषयतायास्तस्योक्तेरिति भावः एतेन अन्तरङ्गत्वेन अननुवृत्ताविति कृत्वोर्थइति सूत्र इत्यादिः एवञ्च वक्ष्यमाणरीत्या सप्तसूत्र्यामेव शेषग्रह-णानुवृत्तिः तेनैव कृत्वोऽर्थ इत्यनेनैव परास्तमिति अल्पापेक्षस्यान्तरङ्ग-त्वन्तत्सम्मतमिति तद्रीत्यैव तदुक्तमपास्तमित्यर्थः यदितु तादृशान्तरङ्गब-हिरङ्गभावो न सिद्धान्तिसम्मत इत्युच्यते तदातु तेनैव द्वितीयेति तत्त्वम् इति द्वितीयाविवरणम् ननु प्राधान्यम्मुख्यविशेष्यत्वरूपञ्चेत्प्रयोज्यव्यापारे तदभावात्प्रयोज्यस्य कर्तृत्वं णिच्समभिव्याहारे कर्मणि यत्र प्रत्ययस्तत्र चैत्रेण पक्व इत्यादौच फलव्यापारयोर्व्यत्यासात्तत्र कर्तृत्वं कस्यापि स्यादत आह प्राधान्यञ्चेति देवदत्तेन पच्यते तण्डुल इत्यादौ देवदत्तस्य कर्तृ-त्वसिद्धये कर्तृप्रत्ययसमभिव्याहार इति धात्वर्थनिष्ठप्रकारतानिरूपितविशे-ष्यत्वमित्येतावन्मात्रोक्तौ विभागावच्छिन्नक्षरणानुकूलव्यापारस्य गोः पयो दोग्धि चैत्र इत्यत्र दुहधात्वर्थत्वात्तत्र क्षरणे ऽतिव्याप्तिरिति धात्वर्थनिष्ठ-विशेष्यतानिरूपितप्रकारतानाश्रयत्वनिवेशः अत्र धातौ तत्त्वनिवेशनीयम-

न्यथा णिजन्तजन्यशाब्दबोधे प्रयोज्यव्यापारस्य प्रयोजकव्यापारविशेषणत्वात्तत्र णिच्प्रकृतिकधात्वर्थस्य प्राधान्यव्यवहारो न स्यात् नचेष्टापत्तिः चैत्रेण पाचयति तण्डुलं यज्ञदत्त इत्यत्र चैत्रे ऽव्याप्तेः णिच्तु प्रयोजकव्यापारवाचक एव एवञ्च णिजन्ततत्प्रकृतिकधात्वोर्भिन्नतया तदुभयार्थव्यापारयोः स्वस्वार्थस्मृति प्राधान्यस्य सत्त्वेन प्रयोज्यस्य कर्तृत्वसिद्धिः कारके इति सूत्रस्थभाष्यात्तु तत्तद्धात्वर्थकारकचक्रप्रवर्तकत्वं कर्तृत्वमिति लभ्यते तच्चारोपितमनारोपितंवेत्यन्यदेतत् । स्थाली पचतीत्यादावाद्यम् चैत्रः पचतीत्यादावन्त्यम् यद्व्यापारस्यान्यव्यापारप्रवर्तकत्वविवक्षा तदा तद्व्यापार एव धात्वर्थः मूलोक्तार्थस्तु न युक्तस्तस्मिन्नर्थे भाष्यकृता स्वतन्त्रपदस्थापरिभाषणात् कर्तृसंज्ञाबोधितकर्तृत्वशक्तिमत्त्वन्तु कर्तृत्वम् साचोक्तस्वतन्त्रे तिष्ठति तस्या विभक्तिद्योत्यत्वात्प्रकृत्यर्थविशेषणता कर्तृक्रियाभावसम्बन्धस्तु तृतीयार्थः प्रकृत्यर्थस्य तद्घटककर्तृभेदेन विशेषणता एवञ्च चैत्रः पचतीत्यादिभ्यः कर्तृचैत्राभिन्नकर्तृकः पाक इतिरीत्या बोधः धातुना निर्व्यमुक्तक्रिय इति भ्रमवारणायाह धातुनोक्तेति अत्र क्रियापदमधानव्यापारपरन्तदाश्रयस्य कर्तृसंज्ञैव नतु कर्मसंज्ञेत्यस्यार्थस्य स्पष्टप्रतिपत्तये निर्व्यापदम् अनन्तरशब्दार्थेन योगे षष्ठी प्राप्ता ताम्बाधित्वा पञ्चमीत्याशयेनाह अनन्तरशब्देति मूलपठितवचने यदेत्येतदपेक्षया यत्रेत्यधिकमत आह यत्रेति अधिकरणादीनामित्यर्थः अन्वयव्यान्दर्शयति तण्डुलानोदनमित्यादिना कर्मणः कर्तृत्वस्खलमाह कर्मकर्तरीति कारकसामान्यस्य न कर्तृत्वविवक्षेत्याशयेनाह सम्प्रदानेति । उपादानग्रहणन्तच्चार्थकर्मकत्व सम्भवतीत्वत आह उक्त इति मूले आदिस्वादिभ्यामित्यादिना केवलेरुपात्ते अधिकरणमित्यन्तेन ग्रन्थेनैकस्यैव शब्दभेदेन संज्ञाभेदः प्रदर्शितः गत्यर्थःसंयोगानुकूलव्यापारो यद्यपि णिच्प्रकृत्यदधातुना खादधातुनाचाभिधीयते स एवच भक्षधातुनापि तथापि आदिस्वाद्योर्नेति निषेधात्ताभ्यां णिचि सति प्रकृत्यर्थव्यापाराश्रयस्य कर्तृसंज्ञैव भवति नतु कर्मसंज्ञा यदातु भक्षधातोर्णिचि सति सएवार्थो भक्षयतिनाभिधीयते तदा निषेधवचनाभावात्प्रयोज्यव्यापाराश्रयस्य गतिबुद्धीतिसूत्रेण कर्मसंज्ञा भवतीति प्रकारेण शब्दविशेषनिमित्तकत्वं संज्ञायाः एतेनेति वक्ष्यमाणपरिहारेणेत्यर्थः ज्ञानस्य स्वप्रकाशत्व इति एतादृशो व्यवहारो वेदान्तिनामस्ति तस्योपपत्तिर्न सं-

भवतीति केषाञ्चिदुक्तिरियम् स्वप्रकाशशब्दस्य स्वमात्मानम्प्रकाशयति वि-षयीकरोतीत्यर्थः कार्यः एवञ्चैकस्य कर्मत्वङ्कर्तृत्वञ्च बाधितं कर्तृसंज्ञायाः कर्मसंज्ञाबाधकत्वादिति तेषाम्भावः नच तेजसो यथा ग्राह्यत्वेन ग्राहकत्वेनतूद्भूतानभिभूतरूपवत्तेजस्त्वेनोपाधिना भवति उपाधिभेदस्यैवोभ-यव्यवहारनियामकत्वात्तथा ज्ञानस्यापि भविष्यतीति वाच्यम् नित्यं वि-ज्ञानमानन्दम्ब्रह्मेतिश्रुत्या ज्ञानपदवाच्यम्ब्रह्मैव तच्च 'नेहनानास्तिकिञ्च-नेतिश्रुत्या' धर्मरहितत्वेन प्रतिपादितमित्युपाधिभेदस्यैवाभावात् अन्यथा ऽद्वैतानापत्तिः नच लौकिकोपाध्यभावस्य तत्र भवन्मते सत्वात्कथन्निर्ध-र्मिकत्वमिति वाच्यम् अभावस्याधिकरणात्मकतया स्वभिन्नधर्मशून्यत्वस-त्वादित्याह ज्ञानविषयत्व इति आधाराधेयभावस्येत्यनेन कर्तृत्वखण्डनम् विषयविषयिभावस्येति कर्मत्वखण्डनम् एवञ्च ज्ञानस्य ब्रह्मात्मकस्य स्व-प्रकाशत्वमिति व्यवहारासङ्गतिः उक्तविरोधस्य परिहारमाह मूले शब्द-विशेषोपाधिकस्येति अत्रोपाधिशब्दो निमित्तपर इत्याशयेनाह शब्दवि-शेषनिमित्तकस्येति यद्धात्वर्थकियाया यस्य स्वातन्त्र्यविवक्षा स तद्धात्वर्थ-कर्ता यद्धात्वर्थप्रधानव्यापारविशेषणफलाश्रयत्वविवक्षा यस्य तत् तत्क-र्मेतिरीत्या धातुस्वरूपो यः शब्दस्तन्निमित्तकत्वन्तयोरित्यर्थः प्रत्यक्षाविति मूलेन ब्रह्मणः प्रत्यक्षरूपत्वन्दर्शितम् तस्यायम्भावः यथा घटादिविषया-णां स्वभिन्नापरोक्षज्ञानविषयत्वेन प्रत्यक्षत्वव्यवहारस्तथान । ब्रह्मणः कि-न्तु स्वात्मकस्वप्रकाशस्यैव प्रत्यक्षपदेन व्यवह्रियते इति यत्साक्षादपरो-क्षादिति श्रुतेः अपरोक्षादित्यस्यापरोक्षमित्यर्थः ननु ब्रह्म यदि न जन्य-ज्ञानविषयस्तदा तस्मिन्स्वप्रकाशत्वव्यवहारोपि कथमितिचेच्छृणु किम्ब्रह्म यद्यवेद्यं स्यात्तदा तादृशव्यवहारविषयो न स्यादिति तर्केण तादृशव्यवहारं खण्डयसि उत स्वप्रकाशत्वव्यवहारोस्माकमित्येतादृशव्यवहारविषयत्वेन हे-तुना अवेद्यत्वाभावानुमानङ्करोषि नाद्यः आपाद्यापादकयोर्द्वयोरपि ब्रह्मणि सत्वात्तेषकं न द्वितीयः हेत्वसिद्ध्या स्वरूपासिद्धेः ब्रह्मणः शब्दावेद्य-त्वात् 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति' श्रुतेः । ननु भवन्मते ब्रह्म स्वप्रकाशमिति वाक्यघटकः स्वप्रकाशशब्दो यौगिको रूढोवा आद्ये स्वम्प्रकाशयतीति व्युत्पत्त्या स्वपदार्थस्य कर्मत्वम्प्रकाशशब्दार्थस्य प्रकाश-कर्त्रर्थकत्वं वाच्यत्वाच्च विषयत्वाश्रयरूपमुभयथाप्यनुपपत्तिः निर्धर्मिकत्ववो-

धकश्रुतिविरोधात् द्वितीये स्वप्रकाशशब्दः स्वप्रकाशशब्दव्यवहार्य इत्यर्थको वाच्यः तत्रापि तच्छ्रुतिविरोध इत्यत आह कर्तृकर्मशब्दयोरिति ननु भवन्मते तस्य वाक्यस्य का गतिरितिचेदित्थम् स्वञ्चासौ प्रकाशश्चेति कर्मधारयः प्रकाशशब्दो भावघञन्तः स्वाभिन्नः प्रकाशः तस्य भावः स्वप्रकाशत्वम् कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानभावप्रत्ययेनेति सिद्धान्तास्वप्रत्ययार्थोत्र स्वाभेद एव सच नातिरिक्त इति यत्किञ्चिदपेक्षया परत्वमव्यावर्तकमत आह कर्मत्वाभिमतेति फलाश्रयत्वेनास्योपस्थितत्वादित्यर्थः कर्मापेक्षयेतितु नोक्तम् एतावत्पर्यन्तङ्कर्मत्वस्यासिद्धेः अतिव्याप्तीति ग्रामङ्गच्छति चैत्र इत्यत्र चैत्रे गमनक्रियाजन्यसंयोगाश्रयत्वसत्वादतिव्याप्तिरित्यर्थः अत्र फले तद्धात्वर्थत्वमपि विशेषणन्देयम् तेन स्यन्देन पूर्वोत्तरदेशयोः कर्मत्वापत्तिः । काशीङ्गच्छतीति अत्र विभागजन्यसंयोगानुकूलव्यापारस्य गम्धात्वर्थत्वमिति विभागस्य धात्वर्थत्वमस्तीति भावः एतन्मते भेदः आधेयत्वञ्च द्वितीयार्थः भेदे प्रकृत्यर्थस्य तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनान्वयः तस्यच भेदस्य सामानाधिकरण्यसम्बन्धेन व्यापारे ऽन्वयः ग्रामपदार्थस्याधेयत्वेप्यन्वयः ग्रामपदार्थस्यच द्वेधा भानमिति ग्रामवृत्तिसंयोगानुकूलाग्रामभेदविशिष्टव्यापारानुकूलकृतिमानित्यन्वयबोधः परमते स्वमतेतु कर्तृविशिष्टस्तादृशव्यापार इत्याकारकः संयोगस्यैव तथात्वमिति गम्धातोः संयोगावच्छिन्नव्यापार एव शक्तिरिति भावः धात्वर्थतावच्छेदकेत्यत्र धातुपदङ्गणपठितधातुपरमुत तद्भिन्नस्यापि बोधकम् । नाद्य इत्याह ग्रामङ्गमयतीति तन्मते नैयायिकमते गमनस्य संयोगावच्छिन्नव्यापारस्य न द्वितीय इत्याह तत्वेवेति मूले ऽपादानेपि तहीति एवञ्च तद्व्यावृत्तये धात्वर्थतावच्छेदकत्वविशेषणनिवेशपर्यन्तानुधावनं विफलमिति भावः एवंसति परया कर्तृसंज्ञया बाधेन चैत्रश्चैत्रङ्गच्छतीत्यादिप्रयोगापत्तिवारणेन यद्भेदेपि द्वितीयायाः शक्तिरिति प्रागुक्तन्नोचितमितिच वचनबलादित्यनेन सूचितम् ननु स्वमते यदि सूत्रेणैव संज्ञापवृत्तिनिर्णयस्तदा ऽपादानस्य कर्मसंज्ञा प्राप्नोतीत्याशयेन शङ्कते नन्विति तत्वेन धात्वर्थकुक्षिप्रवेशेन विभागजन्यसंयोगानुकूलव्यापारो धात्वर्थ इत्याशयः उद्देश्यत्वानुद्देश्यत्वभेदेन सूत्रद्वयोपन्यासः द्वितीयसूत्राभिप्रायेणेदमुत्तरमित्याशयेनाह विषम्भुक्त इत्यादाविति आदिनोदासीनतृणादिसङ्ग्रहः आद्यसूत्रस्य यत्र फलाश्रय-

त्वेनोद्देश्यता तत्र पूर्वत्वा विभागजन्यसंयोगानुकूलव्यापारस्य धात्वर्थत्वे-ऽपि कर्तृवृत्तिव्यापारजन्यसंयोगाश्रयत्वेन पूयागात्काशीङ्गच्छतीत्यत्र काश्या एवोद्देश्यता नतु पूयागस्येति तत्र पूयागे सावकाशा ऽपादानसंज्ञा ग्रामन्व्यजतीत्यत्र कर्मसंज्ञया बाध्यते अत एव पूर्वसूत्रविहितकर्मसंज्ञाया अपादानसंज्ञाबाधकत्वादेव पूकारान्तरेणाप्यतिपूसङ्गं वारयति अपादानमनिष्टेति ग्रामाद् गृहमायातीत्यत्र यद्यपि विभागावच्छिन्नसंयोगानुकूलव्यापारो धात्वर्थस्तथापि संयोगी योयो ऽनुयोगितारूपः सम्बन्ध सएव फलतावच्छेदको नतु विभागीयः फलतावच्छेदकसम्बन्धेन फलाश्रयत्वमेव कर्मसंज्ञापूयोजकमन्यथा कालिकसम्बन्धेन संयोगाश्रयत्वस्य पर्वतादावपि सत्त्वेन ग्रामम्पर्वताद्गच्छतीति यत्र तत्र पर्वतं गच्छतीति स्यात् यत्र विभागावच्छिन्नव्यापारो धात्वर्थस्तत्राप्यनुयोगितासम्बन्धएव फलतावच्छेदको नतु प्रतियोगितालक्षणः अतएव वृक्षाद्विभजत इत्यादौ वृक्षादिशब्देभ्यः पञ्चमीसिद्धिः नच आत्मानमात्मना हन्तीतिवच्चैत्रश्चैत्रङ्गच्छतीति पूयोगापत्तिः तत्रापि शरीरादुपाधिभेदेन कर्तृकर्मणोर्भेदस्य कल्पनासम्भवादिति वाच्यम् प्रामाणिकपूयोगस्योपपत्तये एवङ्कल्पनायाः सत्वात् स्वसिद्धान्ते पञ्चकम्प्रातिपदिकार्थस्तत्र विभक्तिद्योत्यकारकाणाम्प्रातिपदिकार्थविशेषणतैव नतु क्रियाविशेषणत्वमिति पूसक्ताम्मूलासङ्गतिम्परिहरति विभक्त्यर्थस्येत्यादिना एवञ्च विभक्त्यन्तेनोपस्थितानान्तत्तद्विभक्त्यर्थसम्बन्धेन क्रियाविशेषणत्वं स्यादेव तद्व्यत्यासेन फलव्यापारयोर्विशेष्यविशेषणभावव्यत्यासेन फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफलेच धातोः शक्तिः कर्तृकर्मबोधकपूत्ययसमभिव्याहारस्तत्तद्बोधतात्पर्यग्राहक इति स्वसिद्धान्ताभिपूायेणेदम् तत्र कर्मबोधकपूत्ययसमभिव्याहारे मूले रामनिष्ठो यो व्यापारस्तद्विषयत्वम्फलभूतधात्वर्थे उक्तत्वञ्च स्वोत्पादकपूवृत्युद्देश्यत्वरूपम्बोध्यम् एवम्बाणवियोगात्मकफले बाणव्यापारसाध्यत्वाभिधानङ् कृतन्तेन करणकारकस्य सर्वत्र स्वव्यापारद्वारा फलम्प्रत्येवजनकत्वात्तत्रैवान्वय इति ध्वनितम् मीमांसकैर्यदुक्तङ्काष्ठैः पाक इत्यपि स्यादिति तत्पाककियायाः सिद्धावस्थापन्नाया एव पाकपदेनाभिधानात्कारकान्वययोग्यतावच्छेदकसाध्यत्वेनानभिधानेन नात्र कारकान्वय इत्यभिमानेन वस्तुतास्तु पाकादिशब्दघटकधातुना अत्रापि साध्यत्वेनैव क्रियाया अभिधानेन तस्या-

ङ्कारकान्वये बाधकाभाव इत्याशयेनाह तदिष्टापत्तीति । तत्रैव पक्त्वा तेन रूपेणाभिधाने भवति क्रियायामिति काष्ठैः पाक इत्यादौ यद्यपि भवति क्रियाबोधकम्पदन्नास्ति तथाप्यस्तिर्भवन्तीपरो ऽप्रयुज्यमानोप्यस्तीति भाष्यकारोक्तेरत्रापि सा प्रतीयत एवेत्याशयेनेदम् कर्तुरुक्तत्वादिति प्रधानेतरयोरिति न्यायेन प्रधानभवतिक्रियाकर्तृत्वस्याभिधानेन गुणभूतपचिक्रियाकर्तृत्वमप्यभिहितमिति भावः ननु न प्रधानक्रियायाङ्कर्तृत्वेनान्वयः किन्तु करणत्वेनेति तदनुयायिनः शङ्कां वारयति करणत्वेनेति पार्ष्टिकस्यापीति इदङ्कर्मण इत्यत्र सामानाधिकरण्येनान्वयि तद्विषयकबोधस्य पश्चाद्भवता तद्विषयेपि पार्ष्टिकत्वव्यपदेशः नन्वेतादृशे स्थले हरिकर्तृकत्राणबोधाभावे इष्टापत्तिरेवेत्यत आह कर्तृतृतीयान्तेनेति असङ्गतेरिति तदघटककर्तृपदांशस्यासङ्गत्यापत्तेरित्यर्थः विग्रहवाक्यजेति लौकिकविग्रहवाक्यजेत्यर्थः इदञ्चेति प्रकृत्यादिभ्य इति वार्तिकञ्चेत्यर्थः आदिशब्दोत्र प्रकारे तेन वन्हित्वेन घटाभावः दण्डत्वेन कारणतेत्यादिप्रयोगाणामुपपत्तिः नामसंबन्धो ऽपीति नामज्ञाप्यमित्यर्थः वन्हित्वेनेत्यादौ त्ववच्छिन्नप्रतियोगिताकत्वन्तृतीयार्थः ननु दिव इति सूत्रे करणशब्दानुवृत्त्या संज्ञयोः समावेशो भविष्यतीत्यत आह एकेति मूले यन्मनसा देव इत्येतत्सिद्धिरूपं संज्ञाद्वयसमावेशफलमुक्तत्वदसङ्गतमिति हरदत्तानुयायिन उक्तिङ् खण्डयति नन्वित्यादिना षष्ठ्याः प्राप्तेरिति यथा अक्षाणान्दीविता इत्यत्रापवादत्वान्तृतीया बाध्यते तद्वदिति शेषः । तत्र कर्तृकर्मणोः कृतीतिसूत्रे कर्तृसाहचर्यादिति यथा धातुप्रतिपाद्यप्रधानव्यापाराश्रयस्य कर्तृपदेन ग्रहणात्तथा मुख्यतया तदर्थफलाश्रयस्य तत्र ग्रहणमित्यत्र साहचर्यं हेतुत्वेनाभिहितम् मुख्यत्वाभिधानं व्यपदेशिवद्भावेन यस्य कर्मत्वात्तदुद्यदासाय अत एव तादृशकर्मणो ग्रहणादेव अत्र स्तोकपदार्थस्य व्यपदेशिवद्भावेन यत्कर्मत्ववत्तत्राभेदेनान्वयात्कर्मत्वन्तु मुख्यङ् कर्मत्वमस्तीति न षष्ठीति भावः कर्मणि द्वितीयेतिसूत्रेतु मुख्यकर्मण ग्रहणमित्यत्र साधकाभावाद्व्यपदेशिवद्भावलब्धकर्मत्ववतोपि ग्रहणमिति द्वितीया भवति धात्वर्थे फले भेदेन क्रियाकारकभावसम्बन्धेन तदुपपत्तौ स्तोकम्पाक इत्यत्र षष्ठ्यभावोपपत्तौ तत्र स्तोकपदार्थस्य फले ऽभेदेनान्वयादिति भावः अत्र मनसा देव इत्यत्र अप्रवृत्ताविति कर्तृकर्मणोरित्यस्याप्रवृत्तौ अत्र प्रमाणमाह ध्वनितञ्चे-

दमिति तत्रहि अक्षाणान्देवितेत्यत्रापवादत्वाद् द्वितीयायाः षष्ठी बाधिका तृतीयायास्तु परत्वादिति प्रतिपादितम् अत्र षष्ठ्याः कर्तृकर्मणोरिति विहिता या तृतीया बाधकत्वाभिधानेन मनसा देव इत्यत्रापि तस्य सूत्रस्य प्रवृत्तिर्न्याय्यैवेति ध्वनितमित्यर्थः ननु कर्तृकर्मणोः कृतीतिसूत्रे धात्वर्थफलाश्रयकर्मण एव ग्रहणमिति कल्पनया न षष्ठीप्राप्तिरत आह तादृशसंज्ञासत्व इति समाविष्टकर्मकरणसंज्ञाद्वयसत्वे इत्यर्थः नचैवंसति मनसा देव इति प्रयोगस्यैव तर्हुच्छेदः स्यादिति वाच्यम् हेताविति सूत्रविहिततृतीयान्तस्य पचाद्यजन्तदेवशब्देन समासात्प्रयोगोपपत्तेः दिवः कर्मचेतिसूत्रे संज्ञाद्वयसमावेशफलकचकाराभावेपि किञ्चेत्यादिनोक्तफलमन्यथासिद्धमित्याशयकशङ्कानिरसितुमाह नचेति वैकल्पिकत्वेप्येवेति चकाराभावे कर्मकरणसंज्ञयोः पर्यायेण प्रवृत्त्या वैकल्पिकत्वेपीत्यर्थः अपिना समावेशसमुच्चयः येषान्देशकालादिभिन्नकर्म न सम्भवति त एवाकर्मकपदेन गृह्यन्त इति तैरुक्तम् कर्मत्वाभाव इति गतिबुद्धीतिसूत्रविहितेत्यादिः । अन्यत्र निरूपितत्वादिति अत्र शास्त्रे ऽविवक्षितकर्मकाण्यमप्यकर्मकपदेन ग्रहणमत एव भाष्यकृता कृतपूर्वीकटम् भुक्तपूर्वीओदनमित्युदाहृतम् अत एव णेरणाविति सूत्रव्याख्यानावसरे लावयति केदारन्देवदत्त इति प्रयोगे लुनातेर्निवृत्तप्रेषणाण्णिचि द्वितीया कैयटेन स्वीकृता अत एवाधीगर्थेतिसूत्रभाष्ये कर्मणः शेषत्वविवक्षया मातुः स्मर्यत इत्यत्र भावे लकार उदाहृतः फलान्तरमिति संज्ञयोः समावेशस्येत्यादिः स्वयम्फलान्तरमाह दीप्यत इत्यादिना ननु स्थलत्रयेपि कर्मसंज्ञायाः फलमुक्तम्तु करणसंज्ञाया इत्यत आह करणत्वाच्चेति चकारो भिन्नक्रमेण तृतीयापदानन्तरन्द्रष्टव्यः मूले यत्तु प्राचेति प्रक्रियाकृतेत्यर्थः अस्योपस्थानमिति दिवः कर्मचेत्यस्योपस्थानमित्यर्थः वस्तुतस्तु मूलोक्तरीत्या ऽक्षैरक्षानित्यस्योपपत्तिरयुक्ता कार्यकालपक्षविशेषकथनेन देवदत्तो वामेनाक्ष्णा पश्यतीत्युक्ते दक्षिणेन न पश्यतीति यथा गम्यते तथा यथोद्देशपक्षेनासिद्धिरिति गम्येत तदसंगतम् यथोद्देशपक्षेपि प्रधानान्यात्मसंस्काराय सन्निधीयमानानि गुणभेदम्प्रयुञ्जत इति क्विन्तिचेतिसूत्रस्थकैयटोक्तरीत्या कर्मणि द्वितीयेतिसूत्रस्थात्रागमनेन दिवइतिसूत्रस्थापि भेदस्य सत्वात् किञ्च कार्यकालपक्षेप्यपादानमुत्तराणि कारकाणि बाधन्ते

गान्दोग्यि पय इत्यत्र परत्वात्कर्मसंज्ञेति भाष्ययोजनाय संज्ञाविषये य-
देशे संज्ञाशास्त्रम्पठितन्तदेशीयमेव परत्वन्नियामकन्नतु यत्रोपस्थितिस्तदे-
शीयमन्यथा कर्मसंज्ञाशास्त्रस्य कर्मणि द्वितीयेत्यत्रोपस्थितिरपादानसंज्ञाया-
स्त्वपादाने पञ्चमीत्यत्रेति पञ्चमीविधायकशास्त्रस्य द्वितीयाविधायकशा-
स्त्रापेक्षया परत्वाद्बाधासङ्गतिः स्यष्टैव अत एवायादिभ्यः परैव प्रगृह्य-
संज्ञेत्यदसोमादितिसूत्रभाष्ये उक्तम् एतत्सर्वम्परिचिन्त्याक्षान्दीव्यतीति प्र-
योगोपपत्तिं स्वयमाह अक्षान्दीव्यतीत्यत्रेति दिव्धातुरधुना विजिगीषार्थ-
कः। अन्ये भाष्यतत्त्वविदः इदमुपलक्षणं यदा ऽक्षेषु फलाश्रयत्वस-
मानाधिकरणकर्मत्वविवक्षा तदापि तादृशप्रयोगसिद्धिरिति बोध्यम् एकै-
व शक्तिः संज्ञाद्वयोपयोगिनीति मूले ऽभिहितन्तच्च यथाश्रुते ऽसङ्गतम्
सप्तमीपञ्चम्यौ कारकमध्य इति सूत्रे कारकशब्दस्य कर्मत्वादिशक्तिप-
रत्वस्य सुप्रसिद्धतया कर्मत्वस्यच तादृशस्य करणत्वापेक्षया भिन्नत्वेनैक-
शक्तेः संज्ञाद्वयोपयोगित्वं वक्तुमशक्यमत आह दिव्धात्वर्थेति एवञ्चै-
कैव शक्तिरित्यत्र शक्तिपदन्धर्मपरन्द्रष्टव्यम् तथाच कर्मादिपदानां कर्मत्वा-
दितत्तच्छक्तिरूपेण बोधकतया द्वयोः शक्त्योर्भेद एवोचितः सर्वसाधा-
रणकर्मव्यवहारस्तु कर्मत्वशक्तिमत्त्वेनोपपादनीयः एवं सकर्मकत्वमपि ता-
दृशशक्तिमदर्थान्वयित्वमेव अत एवाध्यासिता भूमय इत्यत्र कर्मणि क्तः
सिध्यति सूत्रस्थचकारेण शक्तिद्वययोगो बोध्यते नतु तयोः शक्त्योर-
भेदः नचैवंसति नन्वित्यादिना मूलेन प्रतिपादिता शङ्का तदवस्थैवेति
वाच्यम् अपादानमुत्तराणि कारकाणि बाधन्ते गान्दोग्यि पय इत्यत्र प-
रत्वात्कर्मसंज्ञेत्युक्तत्वत्र पञ्चमीवारणाय द्रव्यगतानेकशक्तिमध्ये एकस्या
अभिहितत्वे परस्या अपि तद्वत्प्रकाशाङ्गीकारेणाक्षतेः मूलन्तु प्राचाम-
नुरोधेन सहयुक्त इति सूत्रे न लौकिकं यत्प्राधान्यम्मुख्यत्वरूपन्तदभा-
ववत्त्वरूपमप्राधान्यं विवक्षितम् राज्ञा सह सेना आगच्छतीत्यत्र राज्ञो
लौकिकप्राधान्यवत्त्वात्तृतीयानापत्तेरित्यत्राप्राधान्यम्पारिभाषिकमित्याशये-
नाह अत्राप्राधान्यमिति गुणाद्यन्वयित्वमित्यत्रादिना द्रव्यक्रिययोः सङ्ग्र-
हः नचैवंसति द्रव्याद्यन्वयित्वाभाव इत्येव द्रव्यपदार्थस्य प्रथमन्तभ्रान्ते
प्रतिपादनादुचितमिति वाच्यम् गुणसमुदायो द्रव्यमिति पतञ्जल्युक्त्यनुसा-
रेणैवमभियानात् गुणोदाहरणम्पुत्रेण स्थूल इति द्रव्योदाहरणम्पुत्रेण स-

ह पितुर्धनमिति क्रियोदाहरणम्पुत्रेण सहागतः पितेत्यादिप्रसिद्धमेव एषु शाब्दङ्गुणान्वयित्वं पितर्येवेति पुत्रस्याप्राधान्यम् आर्थिकगुणाद्यन्वयित्वन्तु तत्रापि अत एव पुत्रेण सहागमनम्पितुरित्यत्र पितरि शाब्दस्य कृत्प्रकृत्यर्थक्रियाकर्तृत्वस्य सत्त्वेन कर्तृकर्मणोरिति षष्ठी भवति शाब्दत्वन्तु इतरसम्बन्धं विनापि वाक्यजन्यशाब्दाबोधे भासमानत्वमेव सहार्थः । साहित्यन्तच्च स्वसमभिव्याहृतशब्दजन्योपस्थितिविषयगुणादिसमानाधिकरणगुणाद्यन्वयित्वमेव सामानाधिकरण्यमत्र कालिकप्रत्यासत्त्या क्वचित् यत्र क्षेत्रे तिलवापोत्तरम्माषवापस्तत्र तिलैः सह माषान्वपतीति प्रयोगादैशिकमपि क्वचित् । एतत्तृतीयार्थस्तु क्रियावाचकशब्दसत्त्वे प्रतीयमानतादृशक्रियान्वयित्वमेव यत्रतु गुणद्रव्ययोरुपस्थितिस्तत्र सहशब्दस्य प्रयोगबलात्प्रतीयमानतत्तत्पदार्थसम्बन्धित्वमेव एवञ्च पुत्रेण सह पितुर्धनमिति शब्दात्पुत्रस्वामित्वसमानकालिकपितृस्वामित्ववद्धनमिति बोधः पुत्रेण सह स्थूल इति शब्दात्तु पुत्रवृत्तिस्थौल्यसमानकालिकस्थौल्यवान्पितेति बोधः पुत्रादेः सहार्थयोगस्तु तत्तद्द्वारक एवेति विभावनीयम् एतत्सर्वं हृदि निधायाह आर्थ इतीत्यादिना । तस्यापि पुत्रस्यापि तत्सम्बन्धबोधः गुणादिसम्बन्धबोधः अप्रधानत्वाभिमते यथा विशिष्टाभावस्य सत्तास्ति तथोपपादयति शाब्दत्वरूपेत्यादिना विवक्षानिबन्धनत्वकथनेन पित्रा सहागतः पुत्र इत्याद्यपि भवतीति सूचितम् विशेष्याभावकृत इति विशेष्याभावकृतोपीत्यर्थः अपिनोभयोरभावयोः समुच्चयः अन्यत्र शेखरादौ वक्ष्यमाणरीत्या यथाश्रुतम्मूलमसङ्गतमत आह प्राचीनैरिति सीरदेवादिभिरित्यर्थः क्रियाकारकयोः साक्षात्सम्बन्ध इति तन्निमित्ता विभक्तिरन्तरङ्गा उपपदपदार्थेनतु यत्किञ्चित्क्रियाद्वारकः सम्बन्ध इति तन्निमित्ता विभक्तिर्बहिरङ्गेति तेषाम्भावः परन्त्विदमयुक्तम् नमस्यति देवानित्यत्र नमःशब्दार्थयोगसत्त्वाच्चतुर्थीप्राप्तिमाशङ्क्यानेन न्यायेन द्वितीयासाधनपराकरणविरोधात् प्रकृते नमःपदार्थस्य क्रियात्वमस्तीत्युभयोरपि समत्वात् यथा मुण्डयतो मुण्डस्य क्रियात्वन्तद्वत् अत एवाह वस्तुत इति तादिति उपपदविभक्तेरिति वाक्यमित्यर्थः अत एव सत्सप्तम्यपेक्षया ऽधिकरणसप्तम्या बलवत्त्वन्तत्रच दीयत इति सूत्रे भाष्यकृता ध्वनितङ्कैयटेनतु स्पष्टीकृतान्तत्सङ्गच्छते एवन्तर्हि मूलमसङ्गतमेव स्यादत आह अन्तरङ्गत्वमिति । ननु

प्रथमायाः कारकाधिकारे पाठाभावेनाकारकविभक्तित्वात्कथन्तेन वचनेन प्रथमासाधनमत आह प्रथमायाश्चेति कारकविभक्तित्वंहि क्रियाजनकार्थकविभक्तित्वन्तच्च प्रथमाया अप्यस्तीति सापि कारकविभक्तिरेव अभिहिते प्रथमेति वार्तिककारोक्तेः अन्यत्र उद्योतादौ नन्वस्य वचनस्यापूर्वत्वकल्पनापेक्षया पूर्वोक्तरीत्या ऽन्तरङ्गत्वमूलकत्वमेवास्त्वित्यत आह अन्तरङ्गत्वंत्विति प्रथमापवादत्वस्येति यदि प्रकृतसूत्रे ऽप्रधानग्रहणन्न क्रियते तदा सहार्थकशब्दयोगे षष्ठ्या इव प्रथमाया अपि प्राप्त्या बाध्यसामान्यचिन्तायामुभयापवादत्वापत्तिः अन्तरङ्गादप्यपवादस्य बलवत्वादिति भावः नन्वत्र बाध्यविशेषचिन्तैव तर्ह्यस्त्वित्यत आह अनन्तरस्येति षष्ठीविधायकसूत्रापेक्षया प्रथमाविधायकसूत्रस्य पुरःस्फूर्तिकत्वेन तदपवादकत्वापत्तेरित्यर्थः एवञ्चेष्टव्यवस्थाया असिध्या ऽप्रधानग्रहणस्यावश्यकत्वेन तेन न्यायेन तत्खण्डनासङ्गतिः तस्य वचनस्यापूर्वत्वेतु तेन वचनेनेष्टस्य सिद्ध्या तत्खण्डनमुचितमिति मनसि निधायाह उपपदेत्यादि न्यायेनचेत्यत्र चस्त्वर्थे अर्थादिति परिशेषादित्यर्थः इदं सर्वमन्तरङ्गत्वाभ्युपगमेन वस्तुतस्तु तदेव नास्तीत्याह किञ्चेति पदान्तरेति तदर्थेत्यर्थः एवञ्चान्तरङ्गत्वमनैमित्तिकत्वरूपमल्पापेक्षत्वरूपंवा भवता वाच्यन्तदुभयमपि न सम्भवति अन्यादृशन्तु तद्वक्तुमशक्यमिति भावः तत्वम् अन्तरङ्गत्वम् प्राचीनोक्तरीत्या ऽन्तरङ्गत्वङ्खण्डयति नचेति सम्बन्धस्येत्यस्य उपपदार्थेन सहेत्यादिः क्रियेत्यस्य यत्किञ्चिदित्यादिः तत्प्रयुक्तमिति उपपदार्थसम्बन्धप्रयुक्तमित्यर्थः कार्यम् विभक्तिरूपम् अस्य बहिरङ्गत्वोपपादनेन क्रियाकारकभावात्मकसम्बन्धस्यान्तरङ्गत्वेन तत्प्रयुक्तं विभक्तिरूपङ्कार्यमन्तरङ्गमित्यर्थादुक्तम् । एवमभिधाने समीहिता सिद्धिरित्याह पुत्रेणेति अपिशब्दः पितृसमुच्चायकः तृतीयानापत्तेरिति सहयुक्तइतिसूत्रविहिततृतीयानापत्तेरित्यर्थः एतदुपपादयति एकेति यक्रियाकर्तृत्वम्पितुस्तक्रियाकर्तृत्वमेव पुत्रस्येत्युभयत्रोपपदार्थसम्बन्धस्य समतया पुत्रशब्दादप्यन्तरङ्गत्वात्प्रथमा स्यादिति भावः नचैवंसति सहयुक्तइतिसूत्रवैयर्थ्यमिति शङ्कनीयम् द्रव्यगुणयोगे चारितार्थ्यात् केचित्तु प्रधानीभूता या क्रिया तत्सम्बन्धनिमित्तकङ्कार्यमन्तरङ्गमिति तन्न्यायार्थः कारकविभक्तेः प्रधाननिमित्तकत्वेन प्राबल्यादित्याहुस्तन्मतङ्खण्डयति क्रियाया इत्यादिना यदि प्रधानक्रियायामेव कारकान्वयनि-

यमः स्यात्तदा भवदुक्तेः सम्भवः स्यात्स एवतु नास्तीत्याशयेनाह अप्रधानक्रियायामपीति पुत्रेण सह पितुरागमनमित्यादौ भावल्युडन्तप्रतिपाद्या क्रिया यद्यपि प्रधानीभूता तथापि पुत्रेण सहागत इत्यत्र कर्त्तरि कृत्प्रत्ययत्व सत्वेन तदर्थस्यैव प्राधान्येन क्रियायास्तत्राप्राधान्येन भवदुक्तो नियम एव नास्तीति भावः मूले पुत्रेण सहागत इत्यत्र पित्रशब्दादन्तरङ्गत्वात्प्रथमामुपपाद्य तद्भिन्नरीत्या पितुरागमनमित्यत्र कर्तृषष्ठ्याः कारकत्वमुक्तमिति प्रथमा न कारकविभक्तिरिति कश्चिद्ब्राम्येतेति तद्भ्रमनिरासार्थमुक्तन्तदेवेति उक्तार्थरूपमेवेत्यर्थः अत एवाह अत्रादिनेति उक्तवाक्य इत्यर्थः नचैवंसति प्राबल्यञ्चेति चकारासङ्गतिरिति वाच्यम् चकारस्य हेत्वर्थकत्वात् यतो वचनेनापूर्वेण कारकविभक्तेः प्राबल्यमुक्तमतो ऽप्रधानग्रहणं शक्यमकर्तुमित्यन्वयः एतेन द्रव्यगुणयोगे तृतीयासिद्ध्यर्थमावश्यकं यत्सहयोग इति सूत्रं तद्विशेषविहितत्वेन परमपि कर्तृकर्मणोरितिसूत्रञ्बाधित्वा पितुरागमनमित्यत्र पित्रशब्दात्तृतीयाविधायकं स्यादिति अप्रधानग्रहणमावश्यकमिति परास्तम् वाचनिकेन तेन न्यायेन कारकविभक्तेरेवैतादृशस्थले प्रबलायाः प्रवृत्तिबोधनेन विशेषविहितत्वस्याकिञ्चित्करत्वात् किञ्च नमस्यति देवानित्यत्र नमःशब्दयोगेन परत्वात्प्राप्तामपि चतुर्थीम्बाधित्वा द्वितीया यथास्यादित्येतदर्थं वचनमावश्यकम् अत एव गाः स्वामी गच्छतीत्यत्र स्वामीश्वरेति षष्ठीं बाधित्वा धात्वर्थव्यापारजन्यफलाश्रयत्वेन गवां कर्मत्वाद् द्वितीया भवतीत्याशयेनाह अलमिति । व्याख्यानादिति अङ्गग्रहणसामर्थ्यमूलकव्याख्यानादित्यर्थः अत एवाङ्गशब्दोयं समुदायशब्द इति भाष्ये उक्तम् अन्यथा अजन्तत्वाभावे अङ्गशब्दस्यावयवे सुप्रसिद्धतया गुणवाचकस्यैव प्रत्यासत्त्योपस्थितिः स्यादिति येन गुणेनावयवस्य विकारो लक्ष्यते तद्वाचकात्तृतीयेति सूत्रार्थः स्यादित्याशयेनाह येन गुणेनेति लक्ष्यत इति तद्वाचकात्तृतीयेति शेषः अक्ष्णा काण इत्यादाविति आदिना पादेन खञ्ज इत्यस्य सङ्ग्रहः यदितु सूत्रे ऽङ्गशब्दम्परित्यज्य गुणिशब्द एवोपादीयते तदातु न दोष इत्यवधेयम् प्रकृतित्वस्याव्यावर्तकतया संदेहनिवृत्तये आह अर्शआद्यजिति यद्यप्यक्ष्येव काणन्तथाप्यवयवधर्मस्य समुदाये आरोपाद्यथा शरीरे प्रयोगस्तथा शरीरावच्छिन्नात्मन्यपि व्यवहारस्य दर्शनादाह शरीरस्येत्यवयव्युपेति विकारस-

अवश्य सूत्राप्रतिपाद्यत्वाद्विकारः सम्भवतीत्युक्त्यनुपपत्तिरत आह लक्ष्यत इति त्रितयसाधारणमिति त्रितयनिरूपितमित्यर्थः एवं क्रियामात्रविषयमित्यत्र विषयशब्दो निरूपितार्थकस्तस्य करणत्वे ऽन्वयः अथवा विषयशब्दो जनकार्थकः वैषम्यान्तरमिति एतेन यक्रियाजनकत्वकरणत्वत्राप्यनेनैव तृतीया भविष्यतीति कर्तृकरणयोरिति सूत्रे करणशब्दो नोपादेय इति परास्तम् शाब्दबोधकृतवैलक्षण्यस्य स्फुटत्वात् एवञ्च व्यापारवदेव करणमिति भेदेचेत्यर्थः एवञ्च करणत्वशक्त्यपेक्षया हेतुत्वशक्तिर्विलक्षणा तृतीयार्थ इति भावः ननु तृतीया विकल्प्यते इति मूलमसङ्गतम् समानार्थत्व एव विकल्पव्यवहारात् अत एव तुल्यार्थास्तु विकल्पेरन्निति जैमिनिनाप्युक्तम् यथा व्रीहिभिर्यवैर्वायजेत उदिते ऽनुदितेवा जुहोतीत्यत्र । अन्यथा द्वितीयादिभ्योपि विकल्पव्यवहारः स्यादत आह तदर्थत्वेनेति तादर्थ्येनेत्यर्थः एवञ्च विकल्पत इत्यस्य विवक्षाभेदेन भवतीत्यर्थः फलमपीह हेतुरिति परमपूले उक्तम् तत्र यदिहेति तस्य इह सूत्र इत्यर्थः केषाचिन्मते मतान्तरेतु इहेत्यस्यैतत्सूत्रोदाहरणे इत्यर्थः आद्यमते तृतीयार्थः फलत्वेन फलस्तत्र प्रकृत्यर्थस्याभेदेन तस्यतु जनकतासम्बन्धेन वासादावन्वय इत्यध्ययनाभिन्नफलजनको वास इति बोधः अन्यमतेतु फलस्य स्वज्ञानद्वारा वासादिहेतुत्वविवक्षा यत्र तत्राध्ययनाय वसतीति प्रयोगादध्ययनस्य हेतुरूपतृतीयार्थे ऽभेदेनान्वयः तृतीयार्थस्यतु जन्यतासम्बन्धेन वासे ऽन्वय इत्यध्ययनाभिन्नहेतुजन्यो वास इति बोधः तदेतदुपपादयति तच्च फलमित्यादिना हेतुत्वेनैवेत्येवकारेणास्य मतस्य मुख्यत्वन्दर्शितम् यदातु तादर्थ्ये चतुर्थी तदापि मतभेदेन शाब्दबोधे वैलक्षण्यमित्याह चतुर्थ्यामिति आद्यमते उपकारकत्वञ्चतुर्थ्यर्थः तत्र प्रकृत्यर्थस्य स्वनिष्ठोपकार्यतानिरूपकत्वसम्बन्धेनान्वयः प्रत्ययार्थस्यत्वाश्रयतया वासे ऽन्वयः द्वितीयमते उपकार्यश्चतुर्थ्यर्थः तत्र प्रकृत्यर्थस्याभेदेन तस्यतु स्वनिष्ठोपकार्यतानिरूपितोपकारकत्वेन वासे ऽन्वय इति मतभेद इति बोध्यम् नन्वलं श्रमेणेत्यत्र क्रियावाचकपदाप्रयोगात्कथं कारकविभक्तिः यदितु तद्विना ऽपि कारकविभक्तिस्तदर्थस्य यत्र कुत्रचिदन्वयस्तदा कारकाणां क्रियामात्रान्वयित्वनियमभङ्ग इत्यत आह गम्यमानेतीति अत्र प्राञ्चः अलंशब्दो निषेधार्थः अलम्भोजनेनेत्यादौ तथा दर्शनात् निषेधस्य प्रतियोगि-

साकाङ्क्षत्वात्प्रतियोगिवाचकम्पदं स्मर्यते तच्च योग्यत्वादिह साध्यमिति तदर्थान्वयित्वेन श्रमेणेति तृतीया नचाध्याह्रियमाणं यत्साध्यमिति तस्य नामत्वात्तदर्थो न क्रियेति कथन्तत्र तृतीयास्यार्थान्वय इति वाच्यम् । विशिष्टार्थस्याक्रियात्वेपि तद्घटककृत्प्रकृत्यर्थस्य साध्यत्वेन प्रतीयमानस्य क्रियात्वात्तस्याङ्करणकारकान्वये बाधकाभावात् गम्यमानेत्यस्य स्मर्यमाणपदजन्यबोधविषयेत्यर्थ इति वस्तुत इदन्न युक्तम् साध्यमिति पदं स्मृतिविषयो मानसज्ञानविषयोवा भवतूभयथापि तस्यानुच्चारितत्वात्प्रत्यायकता बाधिता उच्चारितः शब्दः प्रत्यायको नानुच्चारित इति भाष्यकारोक्तेः तस्माद्यथा पदार्थे पदशक्तिग्रहकाले पदैकदेशस्यापि शक्तिग्रह इति पदैकदेशादपि तस्यार्थस्योपस्थितिः सत्वा भामा भीमादिभ्यो यथा तथा वाक्यार्थे वाक्यैकदेशपदस्यापि शक्तिग्रह इति तस्माद्वाक्यार्थस्योपस्थितिः एवञ्च श्रमेण साध्यमिति वाक्यार्थे श्रमेणेत्यस्य शक्तिरिति श्रमेणेत्येतत्पदजन्यबोधविषयत्वमव्याहतमिति भावः । अस्य सिद्धान्तत्वसूचनायाह स्वतुञ्चेदमिति इग्यणः सम्प्रसारणमितिसूत्रभाष्येपि तत्र वाक्यस्य सम्प्रसारणसंज्ञायां सम्प्रसारणाच्चेत्यादावनुवादप्रदेशे वाक्यात्परत्वानुपपत्तिप्रसक्त्या सम्प्रसारणाज्जातं सम्प्रसारणशब्देन गृह्यत इत्युक्तम् परमूलस्यतु स्ववाच्यक्रियाश्रिति स्वस्य करणत्वमित्यर्थः नन्वेवंसति श्रूयमाणपदजन्यबोधविषयत्वमेवागतमिति नतु श्रूयमाणेत्यसङ्गतमेवेत्यत आह श्रूयमाणस्वमात्रवाचकेति स्वमात्रवाचकम्पदम्प्राधान्येन क्रियाबोधकम् तेन चतुर्थ्यर्थे ज्ञापितत्वतीयायाः क्वाचित्कत्वेन अशिष्टव्यवहार इत्यंशोपि सिद्ध इति अभिधानस्वाभाव्यादयमंशः सिद्ध इति भावः अशिष्टानां सङ्कीर्णाचाराणां यो व्यवहारः क्रिया तद्बोधस्य प्रयोगे यत्सम्बन्धेन व्यवहारस्य सङ्कीर्णत्वन्निन्द्यत्वन्तद्वाचकाच्चतुर्थ्यर्थे तृतीया भवतीति वार्तिकार्थः अत्र दाण्धात्वर्थो दानपूर्वक उपभोगः कामुककर्तृको दासीसम्प्रदानकदानपूर्वक उपभोग इति बोधः दास्यै दत्त्वा तामुपभुङ्क्त इति फलितम् इति तृतीयाविवरणम् । ननु स्वनिवृत्तिपूर्वकपरस्वत्वोत्पत्त्यनुकूलव्यापारो यदि दाण्धात्वर्थस्तदा कर्मणि स्वनिवृत्तिः प्रधानव्यापारेण सम्पन्नेति पुनर्ग्रहणाप्रसक्त्या ऽपुनर्ग्रहणायेत्यस्य वैयर्थ्यमत आह इदञ्चेति अपुनर्ग्रहणायेत्यस्योपादानञ्चेत्यर्थः वाच्यता दाण्धातुवाच्यता भाक्तत्व-

क्रौणत्वलक्षच किञ्चिन्निरूपितमेवेति निरूपकाकाङ्क्षाशान्त्यर्थमाह अर्थीनीकरणरूप इति ननु स्वस्वत्वध्वंसविशिष्टपरस्वत्वोत्पत्त्यनुकूलव्यापार एव चेद्दानन्तदा न शूद्राय मतिन्दद्यादित्यत्रानुपपत्तिः मतिशब्दार्थे व्यापारजन्यफलाश्रयत्वस्यासम्भवेन द्वितीयाया अनुपपत्तेरत आह न शूद्रायेति तज्जनकम् मतिजनकम् शास्त्रम् वेदादिरूपम् क्रियाग्रहणमिति कर्मणा यमभिप्रैतीतिसूत्रे कर्मणेति परित्यज्य क्रिययेति वक्तव्यमित्यर्थः प्रत्याख्यातमिति क्रियापि कृत्रिमं कर्म कया क्रियया सन्दर्शनादिक्रियया इत्यादिना प्रत्याख्यातम् पत्ये शेत इत्यस्मात्पतिसम्प्रदानकम्पत्नीकर्तृकं शयनमिति शाब्दबोधः यदि वृत्तिकारमतार्थ एव भाष्यकारस्याप्यभिप्रेतः स्यात्तदा सूत्रस्थकर्मशब्देन क्रियाया ग्रहणेपि मुख्यं यदनुगतं सम्प्रदानत्वन्तदत्र न सम्भवतीति पत्ये शेत इति प्रयोगोपपत्त्यसम्भवेन क्रियायाः कृत्रिमकर्मत्वोपपादनमसङ्गतमेव स्यादिति भावः भाष्यान्तरं व्याचष्टे चपेटामिति चपेटाशब्दार्थः प्रसृतकरतलम् संयोग इति कपोलप्रसृतकरतलसंयोगानुकूलव्यापार इत्यर्थः शेषित्वप्रधानत्वन्त्वोद्देश्यस्यैव सम्भवतीति फलितार्थमाह उद्देश्यत्वमिति अत एवाह शेषत्वमप्रधानत्वमिति एवञ्च कर्मणा करणभूतेन ये स्वस्वामिभावादिना ऽभिसम्बन्धुमिच्छति तत्सम्प्रदानमिति तदर्थादिति भावः । ग्रामसंस्कारश्च नदीयपुरीयसम्बन्धेनाधिकरस्यसम्पत्त्या ग्रामस्य विलक्षणा सुषमा बाधादिति सम्प्रदानसंज्ञाया इति शेषः न दोषः नातिप्रसङ्गः सम्प्रदानत्वशक्तिमान क्रियाकारकभावसम्बन्धश्च चतुर्थ्यर्थः आद्यस्य तद्धात्वर्थकर्मसम्बन्धित्वेनेच्छाविषयो यस्तस्मिन्विशेषणता एवञ्च सम्प्रदानविप्रसंबन्धि गोकर्मकत्वानमिति शाब्दबोधः प्रीञ्धातोर्गणद्वये पाठादाह क्रयादेश्चुरादेर्वेति परन्त्वदम्बोध्यम् यदा चुरादेः क्रियते तदा आधृषीयत्वाण्णिजभावे इदम् कथिदिति अत्रारुचिर्बीजन्तु नस्याकर्मकत्वेन कर्मणि लडसम्भव इति ननु हरिम्प्रीणयतीत्यनुपपन्नमेवं प्रीधातोरपि रूढ्यर्थत्वेन सम्प्रदानसंज्ञायाः प्राप्तेरत आह प्रीयमाण इति निर्देशेनेति अत्र कर्मणि प्रत्ययो दृश्यते यदि रूढ्यर्थकत्वमात्रेण तदर्थयोगे सम्प्रदानसंज्ञा स्यात्तदा कर्मणि शानच् प्रत्ययो न स्यादित्याशयः इदम्प्रीधातोरपि रूढ्यर्थत्वाभिमानेन ज्ञापकप्रदर्शनम् वस्तुतस्तु नात्र ज्ञापनोपयोगः प्रीधातोः कर्मार्थकप्रत्ययप्रकृतिभूतस्य रूढ्यर्थत्वाभावादेव प्रीय-

माण इति निर्देशस्योपपत्तेः तथाहि हरये रोचते भक्तिरिति प्रयोगघटको रुच्धातुरकर्मक इति फलतावच्छेदकसम्बन्धेन फलसामानाधिकरण्यस्य व्यापारे उपपत्तये विषयतासम्बन्धावच्छिन्नप्रीत्यनुकूलव्यापारो धातुवाच्य इति वक्तव्यम् एवञ्च फलतावच्छेदकविषयतासम्बन्धेन प्रीतेर्भक्तिमात्रनिष्ठत्वेन व्यापारस्य फलसामानाधिकरण्यादकर्मकता सच व्यापारः स्वमात्रसाध्यकव्यापारप्रयोज्यतारूप एव हरिम्प्रीणयतीत्यत्रतु समवायावच्छिन्नप्रीत्यनुकूलव्यापारो ऽर्थ इति फलतावच्छेदकसमवायसम्बन्धेन प्रीत्याश्रयो हरिरिति फलवैयधिकरण्यस्य व्यापारे सत्वाद्धातोः सकर्मकत्वात्कर्मणि प्रत्ययस्य प्रीधातोः प्रकृतिभूतस्य रुच्यर्थत्वाभावस्य चोपपत्तिरत्त एवाह इति भाव इति एतदेव परमसूले ऽन्यकर्तृको ऽभिलाषो रुचिरित्यनेनाभिहितम् । हरिम्प्रीणयति भक्तिरितिशब्दाद्धरिनिष्ठा या प्रीतिस्तदनुकूलो भक्त्याश्रयको व्यापार इति बोधः एवञ्चोक्तप्रीधात्वर्थफलस्य फलतावच्छेदकसमवायसम्बन्धेनाश्रयो हरिरिति तस्य प्रीयमाणपदबोध्यत्वमिति सम्प्रदानसंज्ञा हरेर्भवति एतत्सूत्राभावे हरये रोचते भक्तिरित्यादौ शेषे षष्ठी हरिशब्दात्प्राप्तेति तत्सूत्रापवादत्वमस्य ननु प्रीयमाणपदाभावे पथः सम्प्रदानसंज्ञाप्राप्तिर्या मूले ऽभिहिता सा न संगच्छते अधिकरणसंज्ञया अस्या बाधसम्भवादित्याशयकशङ्कान्निरस्यति नचेत्यादिना एतदभावे प्रीयमाणपदाभावे शेषत्वविवक्षायाम् यत्र क्रियाजनकत्वमात्रस्य विवक्षा शक्त्यन्तरस्यत्वविवक्षा तत्र तयेति अधिकरणसंज्ञयेत्यर्थः एवञ्च प्रत्युदाहरणासङ्गतिरिति भावः इत्यस्याप्यापत्तेरिति विनिगमनाविरहाद्यथा ऽधिकरणत्वविवक्षायामधिकरणसंज्ञया शेषत्वविवक्षायाञ्चरितार्थायाः सम्प्रदानसंज्ञाया बाधस्तथा कर्मत्वविवक्षायाङ्कर्मसंज्ञया बाधापत्तावस्याप्यापत्तेरिति भावः एतेन कारकपदसम्बन्धेन क्रियाजनकस्यैतत्संज्ञाप्रवृत्त्या शेषत्वविवक्षायाश्चरितार्थ्यप्रदर्शनमसङ्गतमिति परास्तम् इत्यस्यापीत्यपिना देवदत्तं रोचते मोदकः पथीत्यस्य सङ्ग्रहः एवञ्च कर्मसंज्ञापवादत्वमस्याः संज्ञायाः अन्यथोक्तरीत्या कर्माधिकरणसंज्ञाभ्यामेतद्विषयस्य व्याप्तत्वाद्दोषः स्यादिति मूलाशयः श्लाघन्हुङ् अत्र ज्ञापनवचनाज्ज्ञपेः सन्नन्तात्कर्मणि शानच् अत्र णिच्प्रकृतिणिजन्तौ द्वावपि धातू सकर्मकाविति कस्मिन् कर्मणि शानजित्याकाङ्क्षायां णिच्प्रकृत्यर्थकर्मणि सन्नन्तार्थकर्म-

णिवा प्रत्यय इति मतभेदः श्लाघृधात्वर्थो विशिष्टगुणवत्वप्रतिपत्त्यनुकूलशब्दप्रयोग एव एवञ्च यदा स्तुतिमात्रस्य धातुवाच्यत्वविवक्षा तदा फलतावच्छेदकसमवायसम्बन्धेन तादृशप्रतिपत्तिरूपफलाश्रयत्वात्कृष्णस्य कर्मत्वमिति कृष्णं श्लाघत इति भवत्येव यदातु तादृशस्तुतिपूर्विका बोधना धात्वर्थस्तदा कृष्णाय श्लाघत इति प्रयोगस्य सिद्धये सूत्रमित्याशयेनाह स्तुत्येति अत्रापि स्तुतिः कृष्णस्यैव स्मरादिति पञ्चमी हेतौ परस्मै स्वसखीजनाय स्तुतिपूर्विका बोधना स्तुतिपूर्वकबोधानुकूलव्यापारानुकूलव्यापारः प्रथमोपस्थितत्वाण्णिच्प्रकृत्यर्थकर्मण्येव ज्ञानजिति प्रथममतेन यद्विषयकज्ञानानुकूलव्यापारानुकूलव्यापारस्तस्य ज्ञीप्स्यमानत्वमिति प्रकृते कृष्णविषयकसखीजनसमवेतज्ञानानुकूलव्यापारानुकूलव्यापारस्य धात्वर्थत्वेन कृष्णस्य सम्प्रदानसंज्ञा भवति ननु यस्माद्धातोः कर्मणि प्रत्ययो भवति तद्धात्वर्थनिरूपितकर्मत्वन्तत्र चेत्तदा तत्र तेन प्रत्ययेन भवितव्यम् प्रकृतेतु भवता णिच्प्रकृत्यर्थकर्मणि प्रत्ययः कृतः सच सन्नन्तादित्येवंकथमित्यत आह तस्यापीति णिच्प्रकृत्यर्थकर्मणोपीत्यर्थः ज्ञापनविषयेच्छेति विषयतासम्बन्धेन तादृशपदार्थविशिष्टं यज्ज्ञानन्तदनुकूलव्यापारानुकूलव्यापारविषयकेच्छाविषयत्वादित्यर्थः विशिष्टस्येच्छाविषयत्वे विशेषणस्यापि तत्वमस्त्येव प्रयोज्यसखीजननिष्ठज्ञानानुकूलव्यापारो मदिष्टसाधनमिति ज्ञानात्सखीजननिष्ठज्ञानानुकूलव्यापारानुकूलव्यापारो जायतामित्याकारेच्छा गोप्या अस्तीति तादृशेच्छाविषयव्यापारप्रयोज्यव्यापारजन्यज्ञानविषयत्वस्य कृष्णे सत्वाज्ज्ञीप्स्यमानपदेन तस्य बोधनं सम्भवतीति भावः कृष्णस्य कर्मत्वप्राप्तावनेन सम्प्रदानसंज्ञा भवति श्लाघृधातुयोगे विवरणवाक्ये परस्मै कथयतीत्यत्र कथधातोरपि स एवार्थ इति कर्मसंज्ञा गतिबुद्धीत्यनेन परशब्दार्थस्य सखीजनस्यतु न भवति तत्र ज्ञानसामान्यस्य बुद्धिपदेन ग्रहणादत्र कथधात्वर्थत्वेन चाक्षुषज्ञानस्य विवक्षितत्वात् किन्तु कर्मणा कृष्णेन सखीजनमभिसम्बन्धुमिच्छतीति सम्प्रदानसंज्ञा तस्य भवति कृष्णेनाभिसम्बन्धस्तु कृष्णविषयकचाक्षुषज्ञानाश्रयत्वमेव अत एव परशब्दाच्चतुर्थी कृता ननु यदि णिच्प्रकृत्यर्थकर्मत्वमेव ज्ञीप्स्यमानपदस्य तत्र प्रवृत्तये विवक्षितञ्चेत्तदा जिज्ञास्यमान इत्येवोच्यतान्तावतापि सनर्थेच्छाविषयज्ञानविषयत्वस्य कृष्णे सत्वाज्जिज्ञास्यमानत्वस्य सत्वादिष्टसिद्धिर्भ-

विवक्षतीत्यत आह मूले अन्येत्विति एतत्पक्षे कृष्णस्य ज्ञानकर्मत्वन्न विवक्षितं किन्तु ज्ञानाश्रयत्वमिति णिजन्तार्थकर्मणि ज्ञीप्स्यमान इत्यत्र शानच् तदेवाह प्राधान्यादिति णिजर्थस्य प्रकृत्यर्थस्मृति प्राधान्यादित्यर्थः । ज्ञानकर्माकाङ्क्षानिवृत्तये आह आत्मानम्परंवेति मूले नन्वस्मिन्पक्षे कृष्णस्य प्रकृत्यर्थकर्मणा आत्मना परेणवा ऽभिसम्बन्धेच्छासत्वात्सम्प्रदानसंज्ञा प्राप्नोत्येवेति प्रकृतसूत्रस्य नोपयोग इत्यत आह कारकशेषत्वादिति नन्वेतन्नोपपद्यते सम्प्रदानत्वप्राप्तेर्जागरूकत्वादत आह कर्मणेति अत्र पक्षे श्लाघादेर्धातोः श्लाघ्यत्वगुणविशिष्टविषयकबोधने वृत्तिर्बोध्या तच्च श्लाघ्यत्वं स्वनिष्ठमन्यनिष्ठंवेत्यन्यदेतत् एवञ्च यदि गोपीकर्तृकस्वात्मपरान्यतरनिष्ठश्लाघ्यत्वगुणविशिष्टविषयकबोधनेन कृष्णो व्याप्रियते तदा सम्प्रदानत्वस्य कर्मणेति सूत्रेणास्त्येव प्राप्तिः यदि तस्याविवक्षा किन्तु सम्बन्धसामान्यस्य विवक्षा तदा षष्ठ्याम्प्राप्तायां सम्प्रदानत्वं विधीयते अत्रेदं बोध्यम् द्वितीयमते ज्ञाप्यमान इत्येवसिद्धे सन्प्रत्ययोपादानमनर्थकमिति णिच्सनोरुभयोरुपादानात्पाणिनेर्णिच्प्रकृत्यर्थकर्मणो णिजन्तार्थकर्मणोवा ग्रहणम्पक्षभेदेनेष्टमिति मतद्वयमपि सप्रमाणमेवेति ननु न्हुङ्धात्वर्थो ऽत्र न्हुतिपूर्वकबोधानुकूलव्यापारानुकूलव्यापार इति न्हुवा नेत्यस्य कथं लाभ इत्यत आह तत्र न्हुवा नेत्यन्तमिति अत्र न्हुतिकर्माकाङ्क्षाशान्तये हुवा नेत्युक्तन्नतु कर्तुरपि धात्वर्थकुक्षौ निवेश इति भावः मूले तमेवार्थमिति न्हुतिरूपमेवार्थमित्यर्थः कृष्णमित्यस्यान्यस्मै जनायेत्यादिः एवञ्च प्रथमपक्षाभिप्रायेणेदं व्याख्यानम् द्वितीयमतेनाह यस्यकस्येति मूलकाराभिप्रेतार्थस्य स्पष्टप्रतिपत्तये आह स्वाभिप्रायमिति एवञ्चात्रोभयविषयकबोधनेच्छा सनर्थः तत्र प्रथमपक्षे स्वकर्तृकन्हुतिकृष्णोभयकर्मकत्वं ज्ञाने द्वितीयपक्षेतु यत्किञ्चित्कर्तृकान्हुतिरात्माचेत्युभयं ज्ञानकर्मत्वेन विवक्षितमिति भावः तिष्ठत इत्यत्र स्थाधातुः स्थितिपूर्वकबोधानुकूलव्यापारानुकूलव्यापारार्थकः आद्यमते बोधे स्वकर्तृका स्थितिः कृष्णश्च कर्म द्वितीयमतेतु स्वकर्तृका स्थितिरात्माच बोधे कर्म प्रथममते बोधे स्वस्वीजननिष्ठत्वस्य विवक्षा द्वितीयमतेतु बोधे तादृशे कृष्णनिष्ठत्वस्य विवक्षेति बोध्यम् शयते इत्यत्र शप् धात्वर्थस्तु स्वनिष्ठानुरागाज्ञानसूचकशब्दोच्चारणपूर्वकबोधानुकूलव्यापारानुकूलव्यापार एव तत्राद्यमते बोधे ता-

दृशाक्रोशस्य कृष्णस्यच कर्मत्वविवक्षा सखीजननिष्ठत्वस्यच विवक्षा द्वितीयमतेतु बोधे कृष्णनिष्ठत्वस्य तादृशाक्रोशकर्मकृत्वस्य स्वात्मकर्मकत्वस्यच विवक्षा बोध्येत्याशयेनाह। एवमिति धारेरुत्तमर्णः धृङ् अवस्थानार्थकस्तस्माण्णिचि अवस्थानानुकूलो व्यापारः प्रतीयते स एव धारयतेरर्थ उत्तमर्णश्चावस्थित्याश्रयसम्बन्धी देवदताय शतमुत्तमर्णः शतकर्मकावस्थित्याश्रयो धारयति चैत्र इत्यत्र देवदत्त उत्तमर्णः यतो द्रव्यश्चैत्रेण गृहीतमपि देवदत्तसम्बन्धित्वेनैवावतिष्ठते चैत्रकर्तृको देवदतसम्प्रदानकः शतकर्मकावस्थित्यनुकूलो व्यापार इति शाब्दबोधः अवस्थितिश्चान्यस्वामिकत्वानुत्पत्तिः षष्ठी प्रकृतसूत्राभावे उत्तमर्णस्य नामार्थान्वयित्वेन प्राप्तेति तदपवादोयम् ननु ऋणन्नाम सजातीयद्रव्यान्तरदानमङ्गीकृत्य परदत्तद्रव्यादानन्तज्जन्यो ऽधमर्णनिष्ठः परिशोधननाश्यो ऽदृष्टविशेषोवा उभयथापि भक्ताय धारयति मोक्षं हरिरित्यत्रानुपपत्तिः मोक्षस्योक्तऋणत्वाभावादितिचेन्न उत्तमर्णायाधमर्णेन तदवश्यमेव देयमिति तत्र ऋणत्वव्यवहारात् यद्यस्यावश्यकं देयन्तत्र ऋणत्वव्यवहारस्य पितृऋणापाकरणे पुत्रो ऽधिकारीत्यत्र प्रसिद्धिरस्त्येव स्पृहेरीप्सितः अत्र स्पृहधातुरिच्छायास्तदनुकूलव्यापारस्यच वाचकः ईप्सितत्वञ्च धात्वर्थव्यापारजन्यफलाश्रयत्वम् तच्च फलमुक्तधातुवाच्यमेव ग्राह्यमिति न नियम इति यदा स्पृहधात्वर्थेच्छाजन्यस्वीकारस्य विवक्षा तदा कर्तुरीप्सिततममिति कर्मत्वाप्राप्त्या शेषे षष्ठी स्यादित्यस्य सूत्रस्यारम्भः पुष्पेभ्यः स्पृहयतीति वाक्यात्पुष्पे सम्प्रदानिका इच्छेति बोधः यदातु विषयत्वावच्छिन्नेच्छानुकूलव्यापारस्य स्पृहधातुवाच्यत्वविवक्षा तदा फलतावच्छेदकविषयतासम्बन्धेन प्रकृतधात्वर्थप्रधानव्यापारजन्यफलाश्रयत्वस्य पुष्पेषु सत्वात्पुष्पाणाङ्कर्मसंज्ञा भवति पुष्पाणि स्पृहयतीति एतदेवाह मूले तेनेति किं सिद्धमित्याकांक्षायामाह स्पृहणीय इति इतिस्थितविवीति हेलाराजीयग्रन्थ इति शेषः। तत्रहि उभयबाधकत्वोक्त्या ऽस्य सूत्रस्य निरवकाशत्वमभिमतम् तच्च न युक्तम् यदा इच्छाया एव धातुवाच्यत्वविवक्षा [illegible] फलस्यच विवक्षा तदा कर्मसंज्ञाया अप्राप्त्या शेषषष्ठीबाधकत्वेनैव चारितार्थ्यादित्याह शेषत्वविवक्षायामित्यादिना अभिमान इति यथा धातुशब्दार्थस्य कर्मत्वेपि तस्य सम्बन्धित्वेन विवक्षायाम्धातुः स्वामीत्यत्र षष्ठी भवति तथास्य सूत्रस्य शेषषष्ठ्यपवादत्वेपि सम्प्रदानत्वाविवक्षायां शेषत्व-

विवक्षया तादृशप्रयोगस्य निर्वाहे सति विभक्तिविपरिणामकल्पनमन्याय्यमित्येतद्बीजम् क्रुधद्रुहेर्ष्या । क्रोधादीनामेतत्सूत्रघटकधात्वर्थानां सर्वेषाङ्कोपप्रभवानामेव ग्रहणस्याभिप्रेतत्वेपि सामग्र्यावैजात्याद्वैजात्यमतस्तेषां स्वरूपमाह मूले क्रोधो ऽमर्ष इत्यादिना प्ररूढकोपः आधिक्यप्राप्तः कोप इत्यर्थः अपकारः दुःखजनिका क्रिया गुणविषये गुणात्मकविशेष्ये दोषत्वारोपः दम्भादिकृतस्त्वारोपः फलस्य दुःखस्य तस्य फलस्य धातुवाच्यत्वेतु सकर्मकत्वं स्यादिति भावः मूले सकर्मकत्वादिति उत्कर्षविरोधिधर्मारोपस्य विशेषतासम्बन्धेन व्यापारवैयधिकरण्यादाद्यः सकर्मकः द्वितीयस्तु स्वीयविशेषताश्रयगुणत्वसम्बन्धेन तादृशारोपात्मकफलव्यधिकरणव्यापारवाचकत्वात्सकर्मक इति भावः द्वितीया प्राप्तेति मूले उक्तन्त्यायुक्तान्द्वितीयारूपस्य फलस्य संज्ञया विरोधाभावादिति तत्यदन्तत्प्रयोजकसंज्ञोपलक्षणमित्याशयेनाह तत्प्रयोजकेति सर्वेषाङ्कोपप्रभवाणामेवैतत्संज्ञानिमित्तत्वमतश्चेतनस्य यत्र कर्तृत्वन्तत्रैतस्य सूत्रस्य प्रवृत्तौ न काचित्क्षतिः यत्रत्वचेतने कर्तृत्वविवक्षा मित्राय द्रुह्यति प्रतापोपीत्यादौ यथा तत्र चेतनत्वारोपेण प्रयोगः । यस्मतिकोप इत्येतद्विशेषणस्य यत्प्रयोजनम्परममूले ऽभिहितं भार्यामीर्ष्यतीत्यादि तत्रान्यकर्तृकदर्शनासहनजन्यतदर्शनविरोधिभार्याकर्तृकाद्दृतदेशस्थित्यादिप्रयोजकज्ञानानुकूलव्यापार एव इर्ष्यधात्वर्थ इति तत्र फलतावच्छेदकविषयतासम्बन्धेन भार्यायास्तादृशज्ञानाश्रयत्वात्कर्मता द्विष्धातुस्तु न क्रुधादिसमानार्थक इति तदर्थयोगेन सम्प्रदानसंज्ञा औषधन्द्वेष्टीत्यादौ यथा अत्र द्विष्धात्वर्थो बलवद्दुःखसाधनताज्ञानजन्यो यो विलक्षणो ऽप्रीतिजनकश्चित्तवृत्तिविशेषः स एवेति न क्रुधादिसमानार्थकतादृशवृत्तिविशेष एवानभिनन्दनशब्दार्थः अत एव यो ऽस्मान्द्वेष्टीत्यादौ नैतत्सूत्रस्य प्रवृत्तिः ॥ राधीक्ष्योर्यस्य विप्रश्नः एतयोर्योगे यत्सम्बन्धी विविधः प्रश्नस्तस्य सम्प्रदानसंज्ञा भवति मूले ऽन्यमतोपपादनावसरे कर्मसंज्ञायाः प्राथमिकप्राप्तिः कथिता तस्या उपपत्तिमाह प्रश्नविषयेति प्रश्नविषयशुभाशुभपर्यालोचनमित्यर्थः पर्यालोचनन्तु अज्ञानविरोधिज्ञानानुकूलव्यापार एव प्राचीनोक्तकर्मत्वस्य प्राप्तिमुपपादयति प्रश्नविषयरूपफलेति तच्च फलं शुभाशुभरूपम् तस्य शुभाशुभरूपफलस्य कर्मसंज्ञा यादृशफलाश्रयत्वस्य कृष्णे सत्वाद्वन्मते प्रा-

ग्रा तच्च फलच्च प्रधानीभूतव्यापारजन्यं यच्च फलम्पर्यालोचनाख्यम्-
धानव्यापारप्रयोज्यन्तत्कर्मणोः शुभाशुभयोर्धात्वर्थेनोपसङ्ग्रहादेतावकर्मकावि-
ति भावः अत एव श्यन् राधो ऽकर्मकादेवेत्युक्तेः प्रत्याङ्भ्यां श्रुवः
अत्र सोपसर्गश्रुधातोः प्रवर्तनाजन्यो ऽभ्युपगमो ऽर्थः विप्राय गाम्प्रति-
शृणोति आशृणोतीत्यादौ विप्रस्य पूर्वत्तनान्वयित्वेन षष्ठी प्राप्ता तां
सम्प्रदानसंज्ञा बाधते विप्रसम्प्रदानकम्यत्याश्रवणमिति बोधः अनुप्रतिगृ-
णश्च अत्रानुप्रतिपूर्वकगृधातोः शंसनविषयकहर्षानुकूलव्यापारात्मकम्प्रोत्सा-
हनमर्थः धात्वर्थशंसनाश्रयस्यानेन सम्प्रदानसंज्ञा विधीयते होतुः कर्मत्व-
स्य प्राप्तिमुपपादयति शंसितुरिति शंसनं सूक्तादिना इन्द्रादिश्रेष्ठगुणा-
भिधानम् तद्विषयो यो हर्षो ऽन्तःकरणस्य वृत्तिविशेषस्तदनुकूलो ऽध्व-
र्युनिष्ठो व्यापारः स एव प्रतीयते सच्च व्यापार ओथामोदइवेत्यादि-
शब्दप्रयोगरूपः शंसनविषयकहर्षरूपफलात्मकम्प्रोत्साहनन्तु शंसितरि हो-
तरि वर्त्तते होत्रभेदस्तु शंसितरि कर्मणि वर्तत इति कर्मसामानाधि-
करण्यमस्तीति बोध्यम् । एवञ्च मुख्यकर्मत्वस्य शंसितरि सत्वेच परिक्र-
यणे सम्प्रदानम् साधकतममित्यनुवर्तते लोके धनशब्दस्य रूपकादौ रू-
ढ्या प्रयोगस्य दर्शनादादिपदम्मूले ऽभिहितं तत्सङ्ग्राह्यमाह आदिनेति
शतस्य दानात्मकव्यापारद्वारा क्रयणक्रियाजनकम् यदुक्तम्मूले उपकार-
कत्वञ्चानेकधेति तत्स्थानेकधात्वन्दर्शयति साक्षादित्यादिना साक्षादुपका-
रकत्वस्योदाहरणं यूपाय दार्वीति परम्परयोपकारकत्वस्योदाहरणमाह ब्राह्मणायेति तच्छब्दो ब्राह्मणबोधकः एतेन यत्र प्र-
कृतिविकृतिभाव एव तत्रानेन वार्तिकेन चतुर्थीति वदन्तः परास्ताः
कृत्यपीत्यर्थग्रहणम् उत्पत्तिश्च कृत्यपेरर्थः कृत्यप्त्यर्थकधात्वनुयोगे उत्पद्यमाने ऽर्थे
वर्तमानाच्चतुर्थीति वार्तिकार्थः । उत्पद्यमानार्थवाचकञ्च विकारवाचक-
मेवेति तद्वाचकाच्चतुर्थी सर्वत्रोदाहृता ननु ज्ञानात्मशब्दो यदि ज्ञान-
स्वरूपस्य बोधकस्तदा विधियमाणवाक्ये ज्ञानशब्दाच्चतुर्थी विवरणवाक्ये
ज्ञानशब्दात्तृतीयेति कथमत आह आत्मशब्द इति तद्वृत्तीति ज्ञानवृत्ती-
त्यर्थः एवञ्च आत्मनशब्दस्य धर्मपरत्वेच तस्य आत्मनशब्दस्य ज्ञानत्वे-
नेति तृतीयार्थो वैशिष्ट्यम् परिणामो रूपान्तरप्राप्तिः तथाच यादृशो वा-
क्यार्थबोधस्तमाह ज्ञानत्वविशिष्टेति मूले परत्वादिति चतुर्थ्यपेक्षयेत्यादिः

भक्तिर्ज्ञानरूपत इत्यस्य भक्त्यभिन्नो ज्ञानरूपः परिणाम इत्यर्थः भक्तिरत्र मननजन्यनिदिध्यासनम् एतस्यैवाविद्यानिवृत्तिरूपमुक्तिसाधनब्रह्मज्ञानसाधनत्वस्य श्रुतिप्रसिद्धत्वात् यातु देवविशेष्यकाराध्यत्वप्रकारकज्ञानरूपा भक्तिस्तस्याः साक्षान्न तत्त्वज्ञानसाधनत्वङ्किन्तु परम्परयैव मूले शुभानुभेति सुखदुःखेत्यर्थः भूतविकारः भूतानां विकारः । यदि समासे विधानाज्ज्ञापकाद्धितशब्दयोग एव चतुर्थी तदा एवं सुखयोगेपीत्युत्तरग्रन्थासङ्गतिरत आह चतुर्थी तदर्थेति हितशब्दार्थोत्रेष्टसाधनम् ब्राह्मणाय हितमध्ययनमित्यत्र चतुर्थ्यर्थः सम्बन्धस्तस्य हितपदार्थैकदेशे इष्टे ऽन्वयः यत्तु चतुर्थीचाशिषीतिसूत्रेण विहिता या चतुर्थी तदन्तस्य समासविधायकत्वेन चतुर्थी तदर्थेति सूत्रञ्चरितार्थमिति न ज्ञापकत्वसम्भव इति तदेतत्खण्डयति दत्ताविति हितयोग इत्यत्र हितशब्दः सुखशब्दस्याप्युपलक्षणम् आशीरर्थाप्रतीतिमुपपादयति आशीरर्थयोग इत्यादिना आशीरर्थकभूयादित्यादिपदयोग इत्यर्थः विषयस्य धनपुत्रादेः तदाश्रयस्य तत्सम्बन्धिनो देवदत्तादेः नचेति नहीत्यर्थः तथान्वयः उद्देश्यविधेयभावेनान्वयः उद्देश्यविधेयभावेनान्वये भेदेनोपस्थितेः कारणत्वात् हरदत्त इति अत्रारुचिबीजन्तु वृत्तौ सर्वत्रोद्देश्यविधेयभावेनानन्वय इति न नियमः लोहितोष्णीषा ऋत्विज इति वाक्यबोधितोष्णीषानुवादेन लोहितविधायकतायाः प्राप्तप्राप्तत्वादिपर्यालोचनेन सम्प्रदायसिद्धत्वात् नचैवंसति चतुर्थी तदर्थेति सूत्रस्य चतुर्थीचाशिषीति सूत्रविहितचतुर्थ्यन्तस्य समासविधायकत्वेन चरितार्थ्याज्ज्ञापकत्वोक्तिरसंगतैव स्यादिति वाच्यम् चतुर्थीविधायकस्य तस्य सूत्रस्याहि आशीर्विषयक्रियान्वय्यर्थकात्प्रातिपदिकाक्रियाद्वारके आयुष्यादियोगे षष्ठीचतुर्थ्यावित्यर्थ इति उभयोरपि क्रियायामन्वय इति देवदत्ताय सुखम्भूयादित्यत्र देवदत्तायेत्यनेन सह सुखमित्यस्य सामर्थ्याभावेन समासाप्राप्तेरिति नानेन यत्र चतुर्थी तत्र समासविधायकता तस्य सूत्रस्येति चतुर्थी तदर्थेति सूत्रस्य ज्ञापकत्वोक्तिर्युक्तैवेत्याशयात् मूले यत्तु प्राचेति प्रसादकृतेत्यर्थः पूर्वोक्तस्वग्रन्थविरोधशङ्काम्परिहर्तुमाशङ्कते यद्यपीत्यादिना यानक्रियोपकारः यानक्रियाकृतोपकार इत्यर्थः । इत्याशय इति अनेनारुचिर्ध्वनिता तद्बीजन्तु यानक्रियाकृत उपकारः फले विक्रयभक्षणादिकर्मत्वरूपः सम्भवत्येवेति नचैवम्तादृ-

र्थे चतुर्थीत्यनेनैव चतुर्थी सिद्धेति प्रकृतसूत्रस्य वैयर्थ्यमिति वाच्यम् फलानामाहरणकर्मत्वेन द्वितीया प्राप्तेति तद्बाधनार्थमस्यारम्भात् ननु भाववचनत्रत्रादीनान्तादर्थद्योतकत्वं सूत्रान्न लभ्यत इत्यत आह भाववचनेति तत्समानार्थत्वात् तुमुन्समानार्थत्वात् अत्रार्थशब्दो नाभिधेयवाची उभयोरपि भावाभिधायकत्वस्य सुप्रसिद्धत्वात् किन्तु प्रयोजनवाची एवञ्च तुमुनपवादत्वेन तुमुन्समानफलकत्वमस्येति बोध्यम् नन्वेवं यत्र तुमुन् तत्र तुमुनैव तादर्थ्यन्द्योतितमिति द्विषां विघातायेति चतुर्थ्यनुपपत्तिरत आह द्विषामित्यादि एतेनेत्यस्यार्थमाह उत्तरेति विधानेषणयोरित्यर्थः तद्द्योतनेति तस्य द्योतनेपीत्यर्थः तुमुनन्तेनेति शेषः पूर्वेति हननविधानयोरित्यर्थः एवञ्च कर्तुः प्राधान्येच तत्र पाचको व्रजतीत्यत्र विशेषणविशिष्टस्य विभक्त्यर्थान्वये विशेषणस्याप्यन्वयोस्त्येवेत्याशङ्काकरणायोक्तम्मूले गुणभूतेति एतेन एकविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणतयान्वयाकाङ्क्षैव नास्तीति सूचितम् इति चतुर्थीविवरणम् कर्तरीति प्रयागात्काशीङ्गच्छतीति यत्र प्रयोगस्तत्र गन्तरि चैत्रादावतिव्याप्तिरित्यर्थः प्रकृतेति धात्वर्थस्य विशेषणम् तच्च शब्दप्रयोगाधिकरणकालिकविवक्षाविषयत्वम् ननु तत्तद्धातुवाच्यत्वेन प्रसिद्धत्वम् यत्तु प्रकृतेति धातोर्विशेषणमिति तन्न अपादानमुत्तराणि कारकाणि बाधन्त इति भाष्यकारोक्तिविरोधापत्तेः तथाहि धनुषा विध्यतीत्यत्र यदा निःसरणपूर्वकव्यधने धातोर्वृत्तिस्तदा धनुषो निःसरणावधित्वात्प्राप्तापादानसंज्ञाबाधित्वा व्यधनश्रुति करणत्वेन विवक्षितत्वात्परत्वात्करणसंज्ञा भवतीति भाष्योक्तिः सङ्गच्छते यदि धातुविशेषणमेव पूर्वोक्तमुक्तत्वस्यात्तदा धनुर्विध्यतीत्यत्र यादृशव्यापाराश्रयत्वेन तस्य कर्तृत्वम्भवति तादृशव्यापारस्य कर्तृत्वोपपत्तये व्यध्धातुवाच्यत्वमावश्यकन्तद्व्यापारद्वारैव करणत्वस्य वाच्यतया तदनाश्रयत्वस्य धनुष्यभावेनापादानत्वाप्रसक्त्या भाष्यासङ्गतिः स्पष्टैव । नन्वेवङ्करणसंज्ञावत्कर्तृसंज्ञाप्यपादानसंज्ञाया बाधिका भविष्यतीति सत्यन्तविशेषणं व्यर्थमेवेत्यत आह अन्यथेति सत्यन्ताभाव इत्यर्थः इयम् अपादानसंज्ञा अपवाद इति अपाये यत्कारकन्तद्रूपक्रियाजनकमित्यर्थापत्त्या विशेषविहितत्वेनेति शेषः ननु कर्तृसंज्ञा तार्हि निरवकाशा स्यादत आह कर्तृसंज्ञात्विति कर्मणीति प्रयागात्काशीङ्गच्छतीति यत्र प्रयोगस्तत्र काश्यामतिव्या-

प्तिरित्यर्थः तदुपात्तेति धावनाश्रयत्वेपि पत्धात्वर्थानाश्रयत्वस्य तत्र सत्वादिति भावः तदनाश्रयत्वादितीति एकस्य मेषस्यापादानत्वेन विवक्षितस्य कर्तृत्वाभिप्रेतनिष्ठगत्यनाश्रयत्वस्य सत्वादित्यर्थः गतौ तत्वं विशेषणन्देयमित्यत्र तात्पर्यम् नन्वेवमपि निष्टत्तभेदस्यैवापसरणस्य सृधातुना प्रतिपादनात्सृधातूपात्तगत्यनाविष्टत्वन्न सम्भवति नवै तिङन्तान्येकशेषारम्भं प्रयोजयन्ति क्रियाया एकत्वादिति भाष्यकारोक्तेः द्विवचनन्त्वाश्रयगतभेदारोपेण भवति एवञ्च प्रकृते कथमपादानसंज्ञेतिचेन्न आत्मानमात्मना वेत्सीत्यादावारोपितभेदेन कर्मत्वकर्तृत्ववत्परस्परशब्दोपात्तयोरपादानत्वङ्कर्तृत्वम्मेषशब्दोपात्तयोरिति शब्दभेदात्क्रियाया अपि भेदात् अत एव चैत्रमैत्रावन्योन्यमाश्लिष्यत इत्यत्र तयोः कर्मत्वस्य सिद्धिरन्यथा परत्वात्कर्तृसंज्ञैव स्यात् शब्दाल्लिङ्गि तस्यैव हि सर्वत्रार्थस्य भानम् 'न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृत इति'हर्युक्तेः उक्तञ्चेत्यादिना प्रतिपादितहर्युक्तेरप्यत्रैव तात्पर्यम् अतदावेशादिति पाठे विभागस्य तच्छब्देन परामर्शे ऽसङ्गतिरत आह तद्धातूपात्तेति प्रकृतधातूपात्तेत्यर्थः गतिशब्दः स्वनिष्ठविभागानुकूलकर्तृनिष्ठक्रियाया बोधकः क्वचित्तु ध्रुवमेव तदावेशादिति पाठस्तदा तच्छब्देन यदि प्रकृतधातूपात्तगतिरेव परामृश्यते तदा कर्तरि तस्य सत्वन्न ध्रुवत्वस्य सम्पादकङ्कर्तुर्ध्रुवत्वस्यानिष्टत्वात् यदि विभागस्तच्छब्दार्थस्तदा तस्योभयवृत्तित्वादतिप्रसङ्गो न वारित इत्यत आह तन्मात्रेति तत्पदार्थमाह विभागमात्रेति मात्रपदेन गतेर्निरासः अचलस्य ग्रामादेः क्रियानाविष्टत्वन्तु स्पष्टमेव अश्वात्पतित इत्यत्राश्वे यद्यपि क्रियाश्रयत्वन्तथापि पत्धातूपात्तगत्याश्रयत्वन्नास्तीति ध्रुवत्वमक्षतमिति भावः अत्रेदम्बोध्यम् । एवंव्याख्याने भाष्यसम्मतध्रुवपदार्थस्त्यक्त एव तथाहि तत्र त्रस्तादश्वात्पतितः धावतो ऽश्वात्पतित इत्यादावश्वे ध्रुवत्वाभावमाशङ्क्याध्रौव्यमविवक्षितमत्र यतः सतोप्यविवक्षा भवति अलोमिका एडका अनुदरा कन्येति असतश्च विवक्षा भवति समुद्रः कुण्डिकाविन्ध्योर्वर्द्धितकमिति असतश्चेत्यादिनिदर्शनार्थमुक्तन्नत्वस्य प्रकृते उपयोगः सतोप्यविवक्षेत्येवतु प्रकृतोपयोगि तत्र कैयटोक्तस्याध्रुवत्वस्याविवक्षा तदा भाष्यासङ्गतिः तेनहि त्रस्तादश्वात्पतित इत्यत्राव्याप्त्युपपादनावसरे अचलन्ध्रुवमेकरूपञ्च परिस्पन्दे ध्रुवता नास्तीत्युक्तम् अनेका-

र्थत्वाद्धातूनात्रासपूर्वकपरिस्पन्दे त्रसिर्वर्त्तत इति नाश्वस्य ध्रुवत्वम् नवा ऽध्रौव्यस्याविवक्षितत्वादित्यादिना समाधानावसरे ध्रौव्यमपायविषयमाश्रीयते अपाये यदनाविष्टन्तदपाये ध्रुवमुच्यते देवदत्तकर्तृके पाते त्रस्तस्याप्यश्वस्यापायावेशाभावाद् ध्रुवत्वम् एतत्कैयटप्रदर्शितरीत्या मूलेप्युक्तम् तत्र पत्धात्वर्थव्यापारानाश्रयत्वस्य त्रस्ते ऽश्वे सत्वाद् ध्रुवत्वमिति यदि ब्रूषे तदा ऽध्रौव्यमश्वे नास्त्येवेति सतोप्यविवक्षेत्यस्यासङ्गतिः स्यष्टैव किञ्च सिद्धान्तेपि त्वदुक्तन्ध्रुवत्वमेव वक्तव्यन्तच्च नोक्तमिति भाष्ये न्यूनतापत्तिः तस्मात्प्रकृतसूत्रे ध्रुवपदार्थो ऽवधिभावोपगमाश्रयत्वे सति तदन्यस्यावधित्वोपयोगिव्यापारस्यानाश्रय इति अपायः विभागजन्यसंयोगानुकूलो ऽवधिसाकाङ्क्षो गतिविशेष एव अत एव गतिर्विना त्ववधिना नापाय इति कथ्यत इति हरिणाप्युक्तम् अवधिना विना गतिर्नापाय इति योजना अवध्यन्वययोग्यविभागानुकूलत्वं विना गतिर्नापाय इति तदर्थः एवञ्च त्रासस्यावधित्वोपयोगित्वाभिप्रायेण त्रस्तादश्वात्पतित इत्यत्राव्याप्तिशङ्का सदपि त्रासस्योपयोगित्वन्न विवक्षितम् यतः प्रवीणस्त्रस्तादपि न पतत्यतो ऽप्रावीण्यमेवावधित्वोपयोगि व्यापारपदेन विवक्षितम् हरिकारिकायामतदावेशादित्यस्य तदावेशाविवक्षणादित्यर्थः अपादानत्वशक्तिमानवध्यवधिमद्भावरूपसम्बन्धश्च पञ्चम्यर्थः इयञ्च शक्तिः प्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणा अतो यत्रापादानस्य सत्ता तत्र विभागोपि धात्वर्थः अन्यथा यत्र वृक्षमजहदपि पर्णम्भूमिं स्पृशति तत्र वृक्षस्य पर्णम्पततीत्येव भवति नतु वृक्षादिति। अत एवाह वस्तुत इति नतु वृक्षात्पर्ण पततीत्यत्राधोदेशसंयोगानुकूलविभागो धात्वर्थस्तत्र विशेषणीभूतसंयोगस्य वृक्षावृत्तित्वादसम्भव इत्यत आह साचेति एवञ्च विभागानुकूलस्तत्समानाधिकरणो व्यापारो धात्वर्थः नन्वेवं विभागरूपफलाश्रयत्वाद्वृक्षस्य कर्मसंज्ञा प्राप्नोतीत्यत आह कालिकेति न तदाश्रयस्य कर्मत्वमिति एवञ्चानुयोगित्वावच्छिन्नविभागानुकूलो व्यापारो धात्वर्थ इति भावः वस्तुतस्तु कर्मत्वस्य प्राप्तिरेव नास्तीत्याशयेनाह विभागजन्यसंयोगेति एवञ्च पञ्चम्यर्थस्य विभागेन्वयः फलत्वञ्च संयोगस्य नतु विभागस्येति न कर्मत्वापत्तिरिति भावः ग्रामादायातीत्यादौतु विभागजन्योत्तरदेशसंयोगानुकूलो व्यापारो धात्वर्थः वृक्षात्पततीत्यत्रतु वि-

भागानुकूलस्तद्व्यधिकरणो व्यापारो धात्वर्थः प्रतियोगिता फलतावच्छेदक-सम्बन्धः ननु निवृत्तेर्यत्नविशेषतया तन्मात्रे लक्षणायामपि नापायलाभ इत्यत आह विश्लेष इति बौद्धो विभाग इत्यर्थः तदुक्तभाष्ये अयं योगः शक्यो ऽवक्तुम् कथं वृकेभ्यो बिभेति चोरेभ्यस्त्रायत इति इह तावद्वृकेभ्यो बिभेति य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति यदि मां वृकाः पश्यन्ति ध्रुवो मे मृत्युरिति बुध्या सम्प्राप्य निवर्त्तते तत्र ध्रुवमपाये ऽपादानमित्येव सिद्धम् चोरेभ्यस्त्रायत इति य एष मनुष्यः प्रेक्षापूर्वकारी सुहृद्भवति स पश्यति यदीमं चोराः पश्यन्ति ध्रुवमस्य वधबन्धनादिपरिक्लेशा इति स बुध्या सम्प्राप्य निवर्त्तयति तत्र ध्रुवमपाये ऽपादानमित्येव सिद्धमिति एवञ्चेदृशे विषये बिभेत्यादयो भयपूर्वकनिवृत्तिरूपार्थे लाक्षणिका इत्यर्थादुक्तभवति कस्य संयुग इत्येवमन्वये भयहेतुविषयकत्वं जिज्ञासायां स्पष्टतया न लभ्यते इति संयुगे कस्य बिभ्यतीत्येवमेवान्वयः षष्ठीतु क्रियाजनकत्वेनाविवक्षायां सम्बन्धित्वेन विवक्षायाञ्चेत्याशयेनाह शेषत्वे इति अन्य इत्युपादानमरुचिबोधनाय तद्भीजन्तु भीत्रार्थानामिति सूत्रस्थ बुद्धिकृतापायमाश्रित्य भाष्यकृता प्रत्याख्यानकृतमिति यत्र तस्य विवक्षा तत्र पञ्चमी भवति पञ्चमी यत्रतु न दृश्यते तत्र बौद्धविश्लेषाविवक्षाया षष्ठीयुक्तैवेति तज्जन्योत्ति अध्ययनजन्येत्यर्थः कारकाधिकारे ऽस्य सूत्रस्य पाठेन जन्यजनकभाव-सम्बन्धेनान्वय उचित एवेत्याशयः मूलन्तु प्राचामनुरोधेन वस्तुतस्तु पराजेरिति सूत्रस्थ य एष मनुष्यः प्रेक्षापूर्वकारी भवति सो ऽध्ययनस्य दुःखदुर्धरत्वबुद्ध्या ततो निवर्त्तत इति प्रत्याख्यानैकवाक्यतया यो ऽध्ययनार्थमप्रवृत्तस्तत्राप्ययम्प्रयोग इष्ट एवेति परापूर्वकजीधातोरनिष्टसाधनत्वप्रकारज्ञानमर्थः अध्ययनपदस्याध्ययनज्ञाने लक्षणा एवञ्चाध्ययन-ज्ञानजन्यमध्ययनविशेष्यकमनिष्टसाधनत्वप्रकारकं ज्ञानमिति फलितमतस्त्र-स्माद्विवर्त्तत इति जनिकर्तुरिति प्रयोगे उपधालोपप्रसङ्गस्य प्रकारान्तरेणापि वारणं सम्भवतीत्याशयेनाह उपधालोपप्रसङ्गस्त्विति हलः श्नः शानजिति सूत्रे ऽनुकार्यस्वरूपभङ्गेपि शास्त्रीयङ्कार्यङ्कृतमेवेत्याशयेनाह सौ-लत्वादितीति मूले भाष्यकैयटमतमिति तत्र भाष्ये ऽयमपि योगः शक्यो ऽवक्तुम् कथङ्गोपयाद्वृश्चिको जायते गोलोमाविलोमभ्यो दूर्वा जा-

यन्ते अपक्रामन्ति तास्तेभ्य इत्युक्तम् तत्रापक्रामन्तीति प्रतीतिमुपादाय लोकप्रसिद्ध्याश्रयेणैतदुच्यते लोकेहि यद्यस्माज्जायते तत्तस्मान्निर्गच्छतीति कैयटेन व्याख्यातम् यदि प्रकृतिशब्दः कारणमात्रपरः स्यात्तदा दण्डादिनिमित्तकारणवाचकादपि सूत्रसत्वे पञ्चमी स्यात्प्रत्याख्यानपक्षेतु ततः कार्यस्य निर्गमाभावात्प्रत्याख्यानविरोधः स्पष्ट एवेति सूत्रे प्रकृतिशब्द उपादानकारणमात्रपर इति लभ्यते अत एवाह इदमेवेति इदमेव भाष्यकैयटमतमेव तत्रैव उपादानकारण एव अत एव मूलोक्तम्ब्रह्मण इत्युदाहरणं वेदांतसिद्धान्तानुसार्येवोपात्तम् अत एव यतो वा इमानि भूतानि जायन्ते इति श्रुतौ यत इति पञ्चमी दृश्यते वृत्तिकारमतेतु वाक्यार्थानुपपत्तिरस्तीत्याह किञ्चेत्यादिना । इतिवदिति व्यतिरेकविषये दृष्टान्तोयम् ननु यदि प्रकृतिशब्द उपादानकारणमात्रपरस्तर्हि पुत्रात्प्रमोद इत्यादुच्यदाहरणानाङ्का गतिरितिचेत् पुत्रे उपादानत्वारोपेणेति गृहाण कारकाधिकारे ऽस्य पाठकरणेन यथा न सूत्रजन्यशाब्दबोधानुपपत्तिस्तथैवार्थकल्पना उचितेति भावः व्याख्यानादिति प्राचां व्याख्यानादित्यर्थः । ननु यदि कर्तरि क्विप् तदा पूर्वसूत्रादेकदेशस्य कर्तृपदस्यानुवृत्तिर्न स्वीकर्तव्येति लाघवमत आह जनिसाहचर्यादिति भावविहितप्रत्ययान्तजनिशब्दस्योपादानम्पूर्वसूत्रे ऽस्तीति तत्तुल्यत्वादित्यर्थः प्रथमप्रकाश इति हिमवतो गङ्गा प्रभवतीति भाष्योदाहरणात् सूत्रे प्रशब्दोपादानाच्च हिमवदपादानको गङ्गाकर्तृकः प्रथमप्रकाश इति बोधः भाष्यरीत्यातु हिमवतो निःसरमाणा गङ्गा प्रकाशत इति बोधः ल्यबन्तस्य गम्यमानार्थत्वादप्रयोग इत्युक्तन्तदयुक्तं उच्चारितस्यैव शब्दस्य प्रत्ययकतायां भाष्यकारसम्मतत्वात् अत एव पदजन्यपदार्थोपस्थितिः शाब्दबोधप्रति हेतुरिति नैयायिकानां व्यवहारो ऽत आह तदन्तेति ल्यबन्तेत्यर्थः तदर्थज्ञानस्योपायमाह यथेति तथा प्रकृतेपीति प्रासादात्प्रेक्षत इति समुदायस्य प्रासादकर्मकपूर्वकालावच्छिन्नारोहणकर्तृकर्तृकत्वदुत्तरकालिकम्प्रेक्षणमित्यर्थे शक्तिः एतच्छास्त्रमेव तत्र शक्तिग्राहकम् यत्रतु ल्यबन्तस्य साक्षात्प्रयोगस्तत्रतु न पञ्चमी लोपग्रहणात् एतत्पञ्चम्यर्थो ल्यबन्तार्थक्रियायाः कर्म अधिकरणंवा आसनात्प्रेक्षत इत्येतस्मादासनाधिकरणकपूर्वकालावच्छिन्नोपवेशनकर्तृकर्तृकत्वदुत्तरकालिकं वर्त्तमानम्प्रेक्षणमिति बोधः यत्रयत्रानेन पञ्चमी तत्र सर्वत्र

फलेभ्यो यातीत्यत्रैव बोधप्रक्रियेति सूचयितुमाह एवमिति तस्माद्वाक्यात्फलकर्मकाहरणफलकं यानमिति बोधः तादृशार्थे फलेभ्यो यातीत्यस्य शक्तिः निर्मीयमाणाध्ववाचिनः शब्दस्य पञ्चम्यन्तेनार्थद्वारा यो योगस्तस्य स्वरूपमाह तदर्थेति परिच्छेद्यपरिच्छेदकभाव एव सम्बन्ध इति भावः । यथेतरशब्दस्य नीचार्थकस्य योगे पञ्चमी विभक्त इत्यनेन सिद्धिस्तथान्यशब्दयोगेपि तेन सूत्रेण सिद्धौ प्रकृतसूत्रे ऽन्यशब्दग्रहणमपि न कार्यमितितु नेत्याशयेनाह अन्यार्थयोगेत्विति अनभिधानात् अनुक्तेरित्यर्थः यस्मान्निर्द्धार्यते यश्च निर्द्धार्यते यश्च निर्द्धारणहेतुरित्येतत्त्रितयसन्निधाने एव निर्द्धारणस्य प्रतीत्या तत्रैव तेन सूत्रेण पञ्चमी भवति एतेन यत्र नीचार्थकस्येतरशब्दस्य प्रयोगस्तत्रापि त्रितयप्रयोगो भवतीति ध्वनितम् चैत्रादितरो मैत्रो मौळ्येनेति यथा ननु यथा नीचार्थकशब्दप्रयोगे निर्द्धारणस्योक्तिस्तथाभेदविशिष्टवाचकान्यशब्दस्य योगेपि कुतो न निर्धारणमभेदस्यैव निर्द्धारकत्वसंभवादत आह परस्परेति एतेन भेदस्य साधारणधर्मत्वमध्वनितम् तद्वत् चैत्रः शूरः इतरः कातर इतिवत् अपिशब्देनान्यार्थकपरापरशब्दप्रयोगेपि बोध्यमिति बोधितम् आरभ्येति मेरुपृष्ठादारभ्य ध्रुवपर्यन्तङ्गहनक्षत्रतारागणचित्रितो ऽन्तरिक्षलोक इति तत्र प्रयोगः कैयटोक्तेरनार्षत्वादेवमुक्तिः ननु प्रभृतीत्यस्य तादृश्याख्यानेपि कस्य शब्दस्य को ऽर्थ इति स्पष्टतया न प्रतीयत इत्यत आह अवधिमिति तत्प्रभृतिपदम् एवञ्च प्रभृतिपदस्यारभ्येत्यर्थकत्वे आरभ्येत्यस्य प्रभृत्यर्थकत्वन्नानुचितमिति भावः ननु प्रभृत्यर्थकशब्दयोगे चेत्पञ्चमी तदा यत्र आद्यर्थकस्य प्रकारार्थकस्यवा तस्य प्रयोगस्तत्रापि पञ्चमी स्यादत आह आदीति एवञ्च यत्रावधिमादायेत्यर्थकस्य प्रभृतिशब्दस्य प्रयोगस्तत्रावधावभेदेन पञ्चम्यन्तार्थस्यान्वयः पञ्चमीतु साधुत्वार्था नचावधिमादायेत्यत्रावधेरादानकर्मत्वे तद्विशेषणवाचकादपि द्वितीया युक्तैवेति वाच्यम् अपादाने पञ्चमीति सूत्रे यतश्चाध्वकालानिर्माणमिति वार्तिकप्रत्याख्यानायचेदमत्र प्रयोक्तव्यं सन्न प्रयुज्यते । कार्तिक्याः प्रभृत्याग्रहायणी मास इति भाष्येण प्रभृतिशब्दाभावेपि तदर्थसत्तामात्रेण पञ्चमी भवतीति वचनस्य बोधनात् अन्यथा तादृशस्थले तत्पदाभावे पञ्चम्यर्थं वचनारभ्यावश्यकत्वेन प्रत्याख्यानासङ्गतिः स्पष्टैव यत्रतु न तदर्थस्य सत्ता तत्रतु न पञ्चमीत्याश-

येनादीत्यादुपक्तमिति भावः प्रकारः साहश्यम् आरभ्येत्यस्य गृहीत्वेति यत्रार्थस्तत्रतु ग्रहणकर्मवाचकाद् द्वितीयैव भवति आङ्पूर्वकाद्रभधातोस्तादृशो ऽर्थो ज्ञायत इति क्रियायां योगसत्वात् यत्रतु प्रभृतिशब्दस्यैव प्रयोगस्तत्रतु न द्वितीया क्रियायोगाभावात् । अन्यत्र शेखरादौ कुत्र विशेषणांश इत्यपेक्षायामाह तेन विनेति तद्राहित्यतत्साहित्यरूपविशेषणांश इत्यर्थः । प्राचामुक्तिङ् खण्डयति यत्त्विति आदिना प्रतिदानपरिग्रहः प्रदुग्धघ्नः कृष्णात्प्रति अत्र प्रतिशब्दः प्रतिनिध्यर्थकः तत्र प्रतिनिपूर्वकधाधातोः कर्मणि किप्रत्ययः प्रतिदानशब्देष भावे ल्युट् एवञ्च यत्सम्बन्धिनी एते ततस्तदुपक्तात्पञ्चमीति सूत्रार्थः उपादीयते इति साकाङ्क्षमत आह य इति यदुत्तत्तस्यैव प्रतिदानम्बाधितत्वस्य विनष्टत्वादत आह तत्तुल्येति मूल्यादेरित्यादिना तत्सदृशवस्त्वन्तरपरिग्रहः कर्तृकरणयोरिति सूत्रविहिततृतीयापवादत्वन्न स्यादतीत्याशयेनाह हेतुत्वतीयेति हरदत्त इत्यनेन सूचितामरुचिमकटयति भाष्येत्विति इहेत्यस्य स्त्रियामित्येवार्थ इति भ्रमवारणायाह अमुण इत्यादि । एवञ्च तादृशवार्तिकनिर्देशात्सूत्रे यद्विशेषणद्वयन्तत्प्रायिकमिति कल्पनीयमिति भावः ननु सन्निहितत्वाद् द्वितीयाया एव समुच्चयः स्यादत आह उभयोरिति व्याख्यानादिति अन्यतरस्याङ्ग्रहणसामर्थ्यात्पञ्चमी भविष्यतीति भाष्योक्तिरूपादित्यर्थः । अधिकरणे विभक्तिचतुष्टयस्य वक्ष्यमाणत्वादाह प्रातिपदिकार्थ इति विशेषणत्वमिति अभेदेनेति शेषः एतच्च सत्वत्तद्वाचकत्वं यत्रास्ति तत्र सत्ववचनत्वव्यवहारः उदाहरणे इति ग्रामस्य दूरन्दूराद्भूरेणवेत्यत्र दूरादीनामस्त्यादिक्रियान्वायित्वेनासत्ववचनत्वमस्तीति भावः नन्वेवंसति सप्तम्यधिकरणेचेतिसूत्रे तस्यानुवृत्तावपि दूरादावसथादित्यत्र दूरशब्दस्य देशविशेषप्रतिपादकतया सत्ववचनत्वात्पञ्चमी न स्यादत आह सप्तम्यर्थीति अनुवृत्तेतु अनुवृत्ते दूरान्तिकार्थेभ्य इत्यस्मिन् अस्य असत्ववचनेत्यस्य व्याख्यानादिति आकरोक्तादृशोदाहरणप्रदर्शनमूलकव्याख्यानादित्यर्थः क्रियाया द्रव्यत्वाभावेपि कथं तद्ग्रन्थस्योपपत्तिरत आह एवञ्चेति क्रियाया अद्रव्यत्वेच क्रियायां पदभेदेन विशेषणमल्पत्वावच्छिन्नत्वद्वाचकस्य स्तोकादिशब्दस्यासत्ववचनत्वमस्तीति भावः तमनूद्येत्यस्य व्याख्यातत्वविशिष्टमनूद्येत्यर्थ इति भ्रमवारणायाह प्राचामिति असत्वानुपपत्तिरिति विशेष्यन्द्रव्यमिति लक्ष-

णस्य करणादिति भावः ननु कृदभिहितो भावः पाक इत्यादावस्ति तत्र लिङ्गसङ्ख्ययोगित्वमेवास्ति अतस्तत्र कथमसत्ववचनत्वमिति दृष्टान्तासंगतिरत आह वैधर्म्ये दृष्टान्त इति एवञ्च पाक इत्यत्र भावो यत्प्रतिपाद्यो यथा द्रव्यवत्प्रकाशते तथा प्रकृते नेत्यर्थः कार्यः साधर्म्येपि दृष्टान्तत्वस्य सम्भवे वैधर्म्यपर्यन्तस्यानुचितत्वमित्याशयेनाह यद्वेति अव्ययकृतो भाव इति सिद्धान्तात्पक्वादिशब्दप्रतिपाद्यक्रियाया यथा ऽद्रव्यत्वन्तथा धातूपस्थाप्यफलस्यापि तथात्वमस्तीति दृष्टान्तत्वं साधर्म्ये द्रष्टव्यम्। इत्यादाविवादिना उष्ट्रासिका आस्यन्त इत्यस्य परिग्रहः प्रसिद्धस्यलं विहायाप्रसिद्धस्य प्रदर्शनमनुचितमित्याशयेनाह इदमुपेति सङ्ख्यामिति द्वित्वादिरूपामित्यादिः एकत्वन्तवनारोपितमस्त्येव एका क्रियेति भूवादिसूत्रस्थभाष्यात् तत्रैव क्रियायामेव तदन्वयस्येति प्रत्ययार्थद्वित्वादीनामन्वयस्येत्यर्थः ङ्याप्सूत्र इति तत्रहि प्रातिपदिकाधिकारस्थ प्रयोजनकथनावसरे धातोः स्वादुत्पत्तिशंकाया अपवादैस्त्यदादिभिर्बाधप्रतिपादनेन निवारणे कृते तिङन्तात्तर्हि माभूवन्निति परेणोक्ते एकत्वादिष्वर्थेषु स्वादयो विधीयन्ते तेचात्र तिङोक्ता एकत्वादय इतिकृत्वा उक्तार्थत्वान्न भविष्यन्ति टाबादयस्तर्हि तिङन्तान्माभूवन्निति स्त्रियां टाबादयो विधीयन्ते नच तिङन्तस्य स्त्रीत्वेन योगोस्तीति भाष्ये उक्तम् तत्र टाबादयस्तर्हीति प्रतीकमुपादाय कैयटेनोक्तं यथा साधनाश्रयसङ्ख्याभिधायित्वन्तिङन्तथा तद्वत्तलिङ्गाभिधायित्वमपि स्यादिति भावः नच तिङन्तस्येति क्रियाप्रधानत्वादाख्यातस्य क्रियायाश्चासत्वभूतत्वात्सत्वधर्मेण लिङ्गेनायोगः नच द्रव्यधर्मलिङ्गग्रहणयोग्यत्वन्नियतत्वाच्छब्दशक्तीनामिति भाव इति अत्र भाष्यकृता तिङन्तात्टाबादिशङ्कायाः स्त्रीत्वेन योगाभावेन यथा वारणङ् कृतन्तथा तिङन्तात्सुबुत्पत्तिरपि सङ्ख्यायोगाभावेन न वारिता किन्तु तिङा उक्तत्वादितिरीत्या वारिता तेन साधनाश्रयसंख्यासम्बन्धयोग्यता तिङन्तवाच्यक्रियाया अस्तीति ध्वनितम् तदुक्तं हरिणा 'एकत्वेपि क्रियाख्याते साधनाश्रयसङ्ख्यया भिद्यते नतु लिङ्गाख्यो भेदस्तत्र तदाश्रय' इति भाष्यप्रदीपोद्योतेप्युक्तम् अत्रैतत्स्वरसात्साधनगतसंख्यायाः क्रियायामारोपेण तिङर्थसंख्यायाः प्रकृत्यर्थ एवान्वयः आरोपमूलतयाच कर्तुरप्येकत्वप्रतीतिः शब्दशक्तिस्वभावाच्च स्वप्रकृतिकप्रत्ययवाच्यसाधनगताया एव त-

स्यास्त्रारोपः तेन भावेन द्विवचनापत्तिः यदातु तत्र प्रकारान्तरेण सङ्ख्या-वगमस्तदा भावेपि बहुवचनं भवत्येव हतशायिकाः शय्यन्त इति यथा अत्रहि उपमानबहुत्वाद्धात्वर्थे बहुत्वावगतिः नचैवं पचतः कल्पमित्यत्र द्विवचनापत्तिः संख्यायास्तिङोक्तत्वात् एकवचनन्तु साधुत्वार्थमिति न दोषः तदपि प्रथमाया एव नान्यासामनभिधानात् यदि संख्यायाः स्व-प्रकृत्यर्थकर्त्रादावन्वयस्तदा स्त्रीत्वस्यापि तत्रैव स्यादिति वैषम्यन्दुरुपपादम् एतच्च भाष्यकृता सङ्ख्याया अभावादिति नोक्तङ्कित्तुक्तार्थत्वादित्यभिहित-त्वतः कल्प्यते इति । एतेन प्रत्ययार्थसङ्ख्यायाः प्रत्ययार्थकर्त्रादावन्वय-स्वीकारे प्रत्ययानाम्प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तिविरोध इ-त्यपि निरस्तम् तिङन्तार्थक्रियायाङ्कर्मत्वान्वयस्योदाहरणमाह पश्य मृगो धावतीत्यादीति अत्र धावनक्रियाया दृशिक्रियाकर्मत्वमास्त एतच्च प्राक् प्रतिपादितम् । तन्निरूपितेति लिङ्गनिरूपितेत्यर्थः वस्तूपलक्षणं यत्र सर्व-नाम प्रयुज्यते द्रव्यमित्युच्यते सो ऽर्थो भेद्यत्वेन विवक्षित इत्यत्र भेद्यत्वे-नेति यदुक्तन्तदविरोधसम्पादनायैवमुक्तम् भेद्यत्वेनेत्यस्याविशेष्यत्वेनेत्यर्थात् एवकारेण लिङ्गनिरूपितविशेष्यताशून्यत्वमेवासत्वमित्युक्तम् क्रियाशब्द-स्य व्यापारमात्रे प्रसिद्धेर्व्यापारानाधारकारकङ्कर्मकारकमपि तदनन्वयित्वं वक्तुमशक्यमपश्य मृगो धावतीत्यत्र कर्मत्वान्वयस्य स्वीकारादत आह धात्वर्थेति कारकपदमत्र कारकशक्तिपरम् तत्फलितार्थमाह करणेति न-न्वेवमपि ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादौ आख्यातोपात्तभावनायां य-जधात्वर्थस्य यागस्य करणत्वेनान्वयोपि दृष्ट इति दोष इत्यत आह स्वातिरि-क्तेति अत्र स्वपदङ्करणत्वाश्रयबोधकपदपरम् पदान्तरेत्यनेन स्वस्यापि पदस्य-वहार्यत्वन्ध्वनितम् एवञ्च लिङ्गञ्च क्रियानाधारकाणि कारकाणिच एतैः क्रिया न युज्यत इति यदि यमेवासत्वरूपतेति कारिकार्थः एतत्कारिकायां यदि यमेवेत्युक्तन्तत्कथमिदंशब्दस्य युजधात्वर्थस्यारोपितत्वविशिष्टस्य परा-मर्शेन तस्यासत्वरूपत्वेन नपुंसकत्वस्य प्राप्तेरत आह लिङ्गेत्यादि स्त्रीलिङ्गनि-र्देश इति सर्वनाम्नामुद्देश्यविधेयान्यतरलिङ्गत्वस्य सुप्रसिद्धत्वादिति तात्प-र्यम् इति पञ्चमीविवरणम् राज्ञः पुरुष इत्यत्र षष्ठी शेष इति सूत्रेण ष-ष्ठी राजन्शब्दादेव भवति नतु पुरुषशब्दादत्र प्रमाणाकाङ्क्षायामाह मूले प्रत्ययार्थस्येत्यादि प्रकृतिप्रत्ययौ सहार्थम्ब्रूतस्तयोः प्रत्ययार्थः प्र-

धानमिति न्यायस्तिङन्ते व्यभिचरितो ऽत आह संसर्गेत्यादि । प्रत्ययार्थः स्वस्वामिभावरूपः संसर्गः विशेष्यः पुरुषः एतदुभयनिष्ठा या विषयता संसर्गतारूपा विषयता विशेष्यत्वाख्या विषयताच एतदुभयनिरूपितत्वस्य राजपदार्थनिष्ठप्रकारतायां स्वीकारादिति भावः विशेषणतायाः सम्बन्धावच्छिन्नत्वनियमादाह षष्ठ्यर्थसम्बन्धेनेति यतो राजपदार्थनिष्ठप्रकारतायामुभयनिरूपितत्वमतः सम्बन्धनिष्ठविषयतापि प्रकारतानिरूपितेति गौणस्तत्र प्रकृत्यर्थम्प्रति प्राधान्यव्यवहारः भाष्यादीति समर्थसूत्रस्थभाष्यादित्यर्थः षष्ठी शेष इति सूत्रेण षष्ठीविशेषणत्वेन विवक्षितादेव नतु विशेष्यत्वेनाभिहितादिति प्रतिपादयति मूले प्रधानादिति प्रधानत्वेन विवक्षितवाचकात्पुरुषशब्दादित्यर्थः उक्तन्यायेति प्रकृतिप्रत्ययौ सहार्थम्ब्रूतस्तयोः प्रत्ययार्थः प्रधानमिति न्यायेनेत्यर्थः अयन्न्यायस्तिङन्ते व्यभिचरितो ऽतो भावार्थमाह प्रकृत्यर्थस्यैवेति अयभावः यदा राजा स्वामित्वेन पुरुषस्तु स्वत्ववत्वेन विक्षितस्तदा राजसम्बन्धी पुरुष इति बोधो भवति यदि षष्ठी पुरुषशब्दाक्रियेत तदा प्रकृत्यर्थस्य पुरुषशब्दार्थस्य प्रत्ययार्थनिरूपितप्राधान्यापत्तिरिति इदञ्च समाधानं षष्ठ्यर्थसम्बन्धस्य प्रकारतया भानमभ्युपेत्य यदितु षष्ठ्यर्थस्य संसर्गतयैव भानभाष्यसम्मतमिति तथैव स्वीक्रियते अत एव षष्ठी शेषे इति सूत्रभाष्ये राज्ञः पुरुष इत्यत्र राजा विशेषणम्पुरुषो विशेष्य इत्युक्तमन्यथा सम्बन्धं विशेष्यतया विशेषणतयावा ब्रूयादित्युच्यते तदाप्याह मूले शेषत्वाभावाच्चेति पुरुषपदार्थस्य शेषत्वाभावादित्यर्थः प्रातिपदिकार्थमात्रवृत्तिरिति स्वार्थस्य प्राधान्यविवक्षायाम्प्रातिपदिकार्थमात्रवृत्तिः क्रियाविशेषणत्वविवक्षायाङ्कारकार्थकः एवञ्च प्रथमादिभिर्बाधात्र तस्मादनेन षष्ठी इति भावः नैवमिति उक्तद्वैविध्यरहितः षष्ठी भवत्येवेति राज्ञः पुरुषस्य धनमित्यादौ यथा विशेषण इति शुक्लशब्दे इत्यर्थः प्रकृतित्वेन विवक्षिते इति शेषः प्राधान्ये चरितार्थत्वादिति एवञ्च प्रधाने घट इत्यत्र चरितार्थायाः प्रथमाया राज्ञः पुरुष इत्यत्र राज्ञ इति भागे चरितार्थया षष्ठ्या विशेषणे परत्वाद्बाधापत्तिरिति भावः । षष्ठीवाच्यः सम्बन्धः स्वस्वामिभावादिः सच स्वस्वामित्वसमूहरूप एव नतु स्वत्वमात्रम् स्वामित्वमात्रंवा तस्यैकव्यक्तिमात्रवृत्तितया सम्बन्धत्वायोगात् सम्बन्धोहि सम्ब-

न्धिभ्याम्भिन्नः उभयसम्बन्धी भवति नचोक्तान्यतरस्य षष्ठीवाच्यत्वेपि तत्र आश्रयत्वनिरूपकत्वान्यतरसम्बन्धेनोभयसम्बन्धिवृत्तित्वमस्तीति वाच्यम् निरूपकता सम्बन्धस्य ह्यनियामकतयोभयत्र सम्बन्धत्वप्रतीत्यसम्भवात् उक्तसमूहस्य वाच्यत्वेतु तस्य सम्बन्ध्यभिन्नतया राज्ञि स्वामित्वस्य सत्वम्पुरुषे स्वत्वस्य सत्वमाश्रयतयैव वर्त्तत इति सम्बन्धिद्वयवृत्तित्वनिर्वाहः समूहस्यैव वाच्यत्वे यस्मादधिकं यस्येश्वरवचनस्तत्र सप्तमीति सूत्रभाष्यमपि साधकन्तत्रहि अधिब्रह्मदत्ते पञ्चाला इत्यत्रानेन सूत्रेण ब्रह्मदत्तशब्दात्सप्तम्याम्पञ्चालशब्दात्कर्मप्रवचनीययुक्ते द्वितीयेति द्वितीया प्राप्नोति अधिर्योत्यस्य ब्रह्मदत्तनिष्ठसम्बन्धस्य सप्तम्योक्तत्वेपि तद्योत्यस्य पञ्चालनिष्ठसम्बन्धस्य तया ऽसम्भवयादित्युक्तम् उपपदविभक्तेरिति न्यायेन समाहितमिति त्वन्यत्। अत एव स्वस्वामिभावो ऽवयवावयविभाव आधाराधेयभावः प्रतियोग्यनुयोगिभावो विशेष्यविशेषणभावादिः सम्बन्ध इति प्रामाणिकानां व्यवहारः सङ्गच्छते हरिकारिकयाप्येतत्स्फुटम् तेनहि 'द्विष्ठोप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते तत्राभिधीयमानश्च प्रधानेप्युपयुज्यत' इत्युक्तम् अत्र द्विष्ठत्वकथनेन वृत्तिनियामकसम्बन्धेन सम्बन्धस्योभयवृत्तित्वमावश्यकमिति स्पष्टमेव असौ सम्बन्धः परं विशेषणत्वमर्थः प्रयोजनं यस्य तत्वाद्विशेषणतानियामकत्वाद् गुणेषु विशेषणतया विवक्षितेषु राजप्रभृतिषु व्यतिरिच्यते उद्भूततया प्रतीयते भेदे सति विशेषणतया यो विवक्षितस्तस्य सम्बन्धं विना विशेषणत्वासम्भवेन सम्बन्धाकाङ्क्षायाः सत्वात्तत्रैवोद्भूततया प्रतीयते विशेष्येतु पदान्तरासमभिव्याहारे स्वप्रवृत्तिनिमित्तनिरूपितविशेष्यतया प्रतीयमानस्य न बहिर्भूतसम्बन्धाकाङ्क्षेति न सम्बन्धस्य विशेष्यतानियामकत्वव्यवहार इत्याह तत्राभिधीयमानेत्यादिना प्रधाने उपकारश्च पदान्तरसमभिव्याहारे सति तत्सम्बन्धावच्छिन्नविशेषणतानिरूपितविशेष्यतया भासमानत्वरूप एव सम्बन्धस्य द्विष्ठस्वभावत्वादिति भावः एतेन राज्ञः पुरुष इत्यादौ राज्ञ इति पदान्तरसमभिव्याहारे सत्येव पुरुषे स्वत्वप्रतीयते नत्वन्यथा राज्ञ इत्यादेस्तु पदान्तरसमभिव्याहारं विनाप्यध्याहृतसम्बन्धिसामान्यनिरूपितविशेषणत्वस्य प्रतीतिरिति राजनि तादृशसम्बन्धैकदेशः स्वामित्वमवगम्यमानमन्यथानुपपत्त्या पुरुषे स्वत्वमवगमयत्यतस्तस्य तादृशसम्बन्धाश्रयत्व-

ब्बहिरङ्गमिति पुरुषात्प्रथमैव भवतीत्यवधेयम्। पुरुषादिपदाप्रयोगे किन्त-दिति जिज्ञासा भवति सा पुरुष इत्युक्ते निवर्त्तत इति। परममूले षष्ठ्येवेत्युक्तन्तत्रत्या षष्ठी यदीदमापरामृश्यते तदा इयमपीत्युचितत्वत्वि-दमपीत्यस्तो व्याचष्टे इदमपीत्यादिना नापूर्वं वचनमित्यत्र हेतुः स्पष्टत-या नोपन्यस्त इति हेत्वाकाङ्क्षानुत्पत्तये आह शेषे षष्ठीति ननु प-रममूले सर्पिषो जानीते मातुः स्मरति एधोदकस्योपस्कुरुत इत्युदाहरणा-नि षष्ठी शेष इत्यस्यैवोक्तानि इदमनुपपन्नम् षष्ठी शेष इति सूत्राव्यव-धानेन ज्ञो विदर्थस्येत्यादि सप्तसूत्र्या अष्टाध्याय्यामाठात् तत्र ज्ञाधा-त्वादीनां विशिष्यपाठात्तदुदाहरणत्वस्यैव युक्तत्वात् किञ्च व्यवहितसूत्रा-ण्युपेक्ष्य व्यवहितपूर्वस्य षष्ठी हेतुप्रयोग इत्यादिसूत्रस्य धारणमप्यनुपपन्नम् षष्ठी शेष इति सूत्रस्य व्याख्यानोत्तरं ज्ञो विदर्थस्येत्यादिसूत्रव्याख्यानस्यो-चितत्वादित्याकाङ्क्षायामाह। मूले ज्ञो विदर्थस्येत्यादि इहेति सर्पिषो जानीते इत्यादुदाहरणावसर इत्यर्थः यथाश्रुतमूलासंगतिपरिहारार्थमाह कृत्वोर्थेतीति मूलासङ्गतिमेवाह वस्तुत इति तत्र कृत्वोर्थ इति सूत्रे मध्ये दिवस्तदर्थस्येत्यादिसूत्रेषु अन्ये भाष्यकृतः तेषामिति मत इति शेषः अत एव ज्ञो विदर्थस्येत्यादिसूत्रेषु शेष इत्यस्यानुवृत्तिसत्वादेव तद्बलात् षष्ठी शेषसूत्रसिद्धषष्ठ्याः पुनर्विधानबलात् कुत इति यदि समासबाधस्यापि कल्पना तदा लक्षणद्वयबाधः स्यात् मन्मते त्वेकस्यैव बाध इति लाघव-मिति भावः तथाचेतीति इदञ्च तथाच वार्तिकमित्यत्र यस्तथा चशब्द-स्तस्य प्रतीकधारणम् वार्तिकबलादिति कथनेन तस्य वार्तिकस्यापूर्वत्वमि-ति प्रतीयते एतच्च न युक्तमित्याशयेनाह वस्तुत इति मूले कारकैरिति क-रणकर्मकारकैर्व्यपदिष्टे अत्र व्यपदिष्ट इत्यत्र भूते क्तप्रत्ययः एतेन यदा शेषत्वेन विवक्षा तदा तादृशापदेशस्य निवृत्तिरिति ध्वनितम् श्रूयमाणक्रिये बहुव्रीहिसमासोयम् अधीगर्थेत्यादिसूत्रमन्यपदार्थः प्रतिपदम् पदम्पदमु-च्चार्य या विहिता सा समासस्य निष्ठत्यर्थमित्यर्थः करणे ल्युडिति समस्ते ऽसमस्तेचेति शेषः अत एव कृद्योगलक्षणषष्ठ्या समासस्येष्टत्वादेव न के-वलनिषेधप्रकरणे एषाम्पाठे ऽनिष्टमेव किन्तु गौरवमपीत्याह दिवस्तदर्थेति अत्रैषाम्पाठेतु अधीगर्थेतिसूत्रात्कर्मणीत्यस्य सम्बन्धस्तत्रेति भावः नच ष-ष्ठी शेषे उभयप्राप्तौ कर्मणि दिवस्तदर्थस्य विभाषोपसर्गे द्वितीया ब्राह्मणे

इत्यादि कृत्वोर्थेत्यन्तं पठित्वा क्तस्येत्यादिपठनीयन्तथाच दिव इति सूत्रे कर्मणीत्यस्यानुवृत्त्या लाभो भविष्यतीति वाच्यम् एवमपि तदर्थपदेनेष्टार्थस्य लाभानापत्तेः यथास्थितपाठेपि विशेषं वक्तुं शङ्कते नन्विति वैकल्पिकेति स्वरूपकीर्तनन्नतु एवङ्कथनेन विशेषप्रयोजनसूचनम् मूले तत्रचेति हरिस्मरणमित्यादौ कृद्योगषष्ठ्या समासाङ्गीकारेच कृदुत्तरेति गतिकारकोपपदादित्यनेनेत्यादिः ननु नायं विशेषः कृद्योगषष्ठ्या समासेपि कृदुत्तरपदप्रकृतिस्वरस्याधित्वा ऽतो भावेत्यस्य प्रवृत्त्यान्तोदात्तत्वमेव भविष्यतीति शङ्कामपाकरोति करणल्युडन्तेति अप्राप्तिरिति कारकात्परमनान्त्यभावकर्मवचनमन्तोदात्तमिति तस्य सूत्रस्यार्थादिति शेषः ननु कर्मण एव शेषत्वविवक्षेति शेषषष्ठ्या समासेपि कृदुत्तरपदप्रकृतिस्वरस्य प्राप्त्या विशेषाभाव इतिचेन्न स्वरविधायके कारकशब्दस्य कर्तृत्वादिशक्तिप्रकारकबोधजनकपरत्वाच्छेषत्वविवक्षायां हर्यादिशब्दानामतथात्वात् ननु मातुः स्मृतामित्यादावधीगर्थेत्यादिसूत्राणाम्प्रवृत्तिर्न सम्भवति स्मृधातोः सकर्मकतया भावे क्तप्रत्ययासम्भवेन कर्मणि क्तो वाच्यः तेनच कर्मण उक्तत्वादनभिहितत्वाभावादत आह आदिकर्मणीति आदिभूतव्यापारश्चातीतत्वेपि भूतार्थकस्य क्तस्य साधनायारब्धं यदादिकर्मणि क्तः कर्तरीति तेन कर्तरि क्तप्रत्यय इत्यर्थः एवञ्च कर्मणो ऽनभिधानादस्त्येवाधीगर्थेतिसूत्रस्य प्राप्तिरिति भावः नन्वादिक्रियाया अतीतत्वद्योतकप्रशब्दाभावात्कथन्तस्य प्राप्तिरत आह प्रशब्दमिति अनुदत्तादाविति अनुपूर्वाद्दाधातोरादिकर्मणि क्तः आदिना विदत्तादिसङ्ग्रहः एषु प्रशब्दाभावेपि 'अवदत्तं विदत्तञ्च प्रदत्तञ्चादिकर्मणि सुदत्तमनुदत्तञ्च निदत्तमितिचेष्यत' इति भाष्यकारोक्तेरिति भावः प्रकारान्तरेणाप्यधीगर्थेति सूत्रस्य प्राप्तिमाह कर्मण इति एतेन भाष्यप्रामाण्यादनुदत्तादावस्त्वादिकर्मणि क्तः प्रकृतेतु क्तस्य तथात्वे मानाभाव इति परास्तम् उक्तरीत्या भावे क्तस्य सत्वेनादोषात् एवञ्च तत्र कर्मषष्ठीनिषेधेच ननु किंशब्दस्य त्रिलिङ्गत्वेन किंयः स्त्रीत्वन्दुर्लभमित्यसङ्गतमतस्तदाशयम्प्रकटयति अर्थशब्दस्येति अयम्भावः प्रकृतोदाहरणे ऽर्थशब्दसमानाधिकरणः किंशब्दः एवञ्चार्थशब्दस्य द्वितीयान्तत्वम्प्रथमान्तत्वंवा वाच्यमुभयथा ऽस्य प्रयोगस्यानुपपत्तिरिहास्तीति अर्थशब्दस्य द्वितीयान्तत्वे तत्समानाधिकरणः किंशब्दोपि द्वितीयान्त एव वाच्यः एव-

ङ्च किमः क इति सूत्रेण कादेशे कमर्थमिति स्यादर्थशब्दस्य प्रथमान्तत्वे तस्य नपुंसकत्वानुपपत्त्या तत्समानाधिकरणकिंशब्दस्यापि नपुंसकत्वानुपपत्तिः अर्थशब्दस्य द्वितीयान्तत्वमेव यदि तदा ऽर्थमित्यस्योपपत्तावपि किमित्यस्योपपत्तिर्न संभवतीति। आद्यङ् क्लिष्टमिति सामान्ये नपुंसकत्वमगतिकगतिकम् किञ्च शब्दप्रयोगस्य स्वायत्तत्वादेवम्प्रयोगो न युक्तः कमर्थमित्यस्य वक्तुं शक्यत्वादिति भावः अन्त्ये समासपक्षे लक्षणाभाव इति अत्र समासपदम्बहुव्रीहिसमासपरमुत चतुर्थीसमासपरम् आद्ये लक्षणाभाव इत्यस्य निमित्तपर्यायप्रयोग इति लक्षणस्य प्रवृत्तियोग्यत्वाभाव इत्यर्थः समासे पूर्वपदार्थस्य पृथगुपस्थित्यभावेन तत्र सङ्ख्याया मानाभावादिति भावः नान्त्यः तस्य प्रकृतिविकृतिभावे एव प्रवृत्तेरिष्टतया तत्प्रवृत्तिसम्पादकलक्षणाभाव इत्यर्थः बहुव्रीहिसमासपक्षे एव दूषणान्तरमाह अर्थासङ्गतिरिति हरौ शब्दायमाने हरिस्तत्र गतस्तन्दृष्ट्वा हरिर्हरौ गतस्तदनन्तरं हरिरुदासीनः सम्पन्न इत्यत्र कस्य हरिशब्दस्य को ऽर्थ इत्यत्र नानार्थगततच्छब्दबुबोधयिषाभिप्रायेणायम्प्रयोगः बहुव्रीहिसमासेतु अन्यपदार्थस्य प्राधान्येन विवक्षितार्थलाभासङ्गतिरिति भावः ननु समासपदन्न चतुर्थीसमासबहुव्रीह्यन्यतरपरम् किन्तु कर्मधारयपरमत आह को ऽर्थः किमर्थमितीति विग्रहवाक्यसमासयोः समानार्थकत्वस्य न्यायसिद्धतया विग्रहे पुंस्त्वस्य सत्वमर्थपदार्थे समासेतु यद्यप्युत्तरपदार्थस्य प्राधान्यन्तथापि लिङ्गविशेषविवक्षाराहित्यमित्ययङ् क्लेश इति भावः चकारेण पूर्वपदार्थे पृथक्सङ्ख्याप्रतीत्यभावेन वार्त्तिकोदाहरणत्वासङ्गतिरपीत्यस्य सङ्ग्रहः भाष्यकृता हेताविति त्वेदम्पठितमिति यत्र सर्वनाम्नो ऽप्रयोगस्तत्रापिचेद्वार्तिकस्य प्रवृत्तिस्तदा सर्वनामसंज्ञासूत्रस्यभाष्यविरोधः प्राप्नोतीत्याशङ्काम्परिहरति यत्त्विति यथाश्रुतसूत्रमते वार्तिकाभावविशिष्टसूत्रमते अत एव यथाश्रुतसूत्राभिप्रायकत्वादेव सूत्रोपन्यासः सर्वनाम्न इति सूत्रोपन्यासः ततः पश्चादिति भाष्यप्रयोगस्यान्यथाप्युपपत्तिरित्याह अत्र सार्वविभक्तिक इति मूले पूत्ययग्रहणञ्चिन्त्यप्रयोजनमिति। ननु प्रत्ययस्यातसर्थकस्य यत्र श्रवणन्तत्र यथास्यादित्यस्य लाभार्थम्प्रत्ययग्रहणमस्तु पूत्ययशब्दस्य सामर्थ्यात् श्रूयमाणत्वविशिष्टपूत्ययलाक्षणिकत्वादितिचेन्न प्राक् पूत्ययवा ग्रामादित्यत्र षष्ठीश्यावृत्तिः पूत्ययग्रहणस्य फलमिति भवता वक्तव्यत्वाच्च-

थासिद्धम् अञ्चारादितिसूत्रे दिक्शब्दग्रहणेनैव सिद्धे ऽञ्चूत्तरपदग्रहणमतसर्थप्रत्ययान्तस्य दिक्शब्दस्य योगे या षष्ठी विहिता तस्याः प्रवृत्त्यर्थमिति पूर्वसूत्रेण पञ्चम्यैव सिद्धेः नच पूर्वसूत्रे एवाञ्चूत्तरपदग्रहणमादिक्शब्दस्याञ्चूत्तरपदस्य ग्रहणार्थमिति कस्मान्न भवति सध्र्यङ् देवदत्तेनेत्यत्र देवदत्तशब्दात्पञ्चमीसिद्धिस्तत्प्रयोजनञ्चिन्त्यतीति वाच्यम् दिक्शब्दसाहचर्यात्पूर्वसूत्रे ऽञ्चूत्तरपदस्य दिक्शब्दस्यैव ग्रहणन्नत्वन्यस्येत्यस्यान्यस्य प्रयोजनस्य सत्वात् अत एवाह इदमत्रैव सूत्रे भाष्ये स्पष्टमिति तत्रहि अथ प्रत्ययग्रहणङ्किमर्थम् इह माभूत् प्राक् प्रत्यग्वा ग्रामात् अञ्चूत्तरपदग्रहणस्याप्येतत्प्रयोजनमुक्तन्तत्रान्यतरच्छक्यमवक्तुमिति कथितम् एनबन्तेन योगे या द्वितीया तस्या गृहादुत्तरेणास्मदीयमित्यत्रोत्तरेणेत्यस्य तृतीयान्तत्वसूचनेन वारणवदन्यत्राप्यतिप्रसङ्गः प्राप्तस्तद्वारणम्मूलकृता न कृतमिति न्यूनतामुद्भावयन्नन्यत्राप्यतिप्रसङ्गं वारयति स्वयधिकारात्परेणेत्यादिना परेण शास्त्रेणेति सहेति शेषः विनापि तद्योगन्तृतीया वृद्धो यूनेतिवत् ततः परेण नायमनुवर्तत इत्यत्रतु परेणेति यद्यप्येनबन्तन्तथापि नासङ्गतिरित्याशयेनाह तत इति षष्ठ्यन्तादिति परममूलप्रदर्शितेन एनपेतिविभक्तसूत्रेण षष्ठ्यन्तादित्यर्थः वस्तुतस्त्वेनपेतिसूत्रे योगविभागो भाष्ये न दृश्यते ततः परेणेत्यत्र न षष्ठ्यन्तात्तसिः किन्तु पञ्चम्यन्तादेव पृथग्विनेतिसूत्रभाष्ये सम्बन्धानुवृत्तिप्रदर्शनावसरे षष्ठ्यतसर्थप्रत्ययेनान्यारादिभिर्योगे पञ्चमी एनपाद् द्वितीया अन्यारादिभिर्योगे पञ्चमीति प्रदर्शितन्तेनैनबन्तत्वेपि पञ्चम्याः प्रवृत्तेः अतः समुच्चयार्थकान्यतरस्याङ्ग्रहणात्पञ्चम्या एव समुच्चयात् मूले व्याख्यानादिति लक्ष्यदर्शनमूलकादित्यादिः विप्रकृष्टापि पञ्चमी समुच्चीयते नतु षष्ठी द्वितीया वृतीया इति पाठः तथाच षष्ठ्या अप्यत्र समुच्चयो निषेध्य इति प्रतीयते एतदयुक्तम् षष्ठीपदस्य सूत्रे एव सत्वादित्याशङ्कापरिहाराय शेषम्पूरयति विधीयन्त इति शेष इति स्पष्टप्रतिपत्तये तदर्थमाह षष्ठीद्वितीयेत्यादिना तत्र विशेषमाह तत्राद्योपात्तेति आद्या षष्ठी नन्वेवमपि निषेधप्रतियोगिविधानकर्मत्वं षष्ठ्या अपि प्रतीयते तच्चायुक्तम् दूरान्तिकेति सूत्रेण षष्ठीविधानस्य सत्वादत आह समुदायेति एकसत्वेपि द्वयोरभावेन त्रित्वावच्छिन्नाभावस्य सत्वादिति भावः मूलाशयमुद्घटयति अयमाव इत्यादिना

एवञ्च पक्षभेदेनोत्तरसूत्रद्वयस्य वैयर्थ्यमिति भावः अत्र दिवस्तदर्थस्येत्यत्र नाद्य इति विभाषोपसर्ग इत्यत्र शेष इति सम्बध्यते इति पक्षो न युक्त इत्यर्थः समासाभावस्य तस्मिन्सूत्रे शेषपदसम्बन्धफलस्य समासाभावस्य ननु तस्य सूत्रस्य वैकल्पिकत्वेन यदा न तस्य प्रवृत्तिस्तदा षष्ठी शेष इति सूत्रस्य प्रवृत्तिरिति तदा षष्ठीसमासप्रवृत्तिरिति फलमस्त्येवेत्याशङ्कान्निराचष्टे नचेति पक्षे विभाषोपसर्ग इति सूत्रप्रवृत्त्यभावपक्षे पूर्वशङ्कानिरसनोपायमाह नोपसर्ग इत्यादिना विभाषापदोच्चारणेन निषेधविकल्पयोरुपस्थितिकल्पनापेक्षया निषेधमात्रोपस्थापको नकारो विभाषापदमनुच्चार्य तत्र पठनीय इति भावः नचैवंसति सोपसर्गादिवधात्वर्थकर्मणि शेषत्वेन विवक्षिते षष्ठी नेत्यर्थस्याभिव्यक्त्या षष्ठीप्रवृत्तिरेव न स्यादिति वाच्यम् अनन्तरस्येति न्यायेन निषेधो दिव इति सूत्रविहितषष्ठ्या एव स्यादित्याशयात् तथापि नोपसर्ग इति न्यासकरणेपि नच पदलाघवाभावः मात्रालाघवस्य सत्वात् नचैवङ्कल्पनायामपि सूत्रद्वयमस्त्येवेत्युत्तरसूत्रद्वयारम्भादिति मूलस्य का गतिरिति वाच्यम् पाणिनिपठितानुपूर्वीकोत्तरसूत्रद्वयारम्भादित्यर्थात् नाद्य इति विभाषेति सूत्रे शेष इति न सम्बध्यत इति पक्षो न युक्त इत्यर्थः । वेदेपीति अपिना ब्राह्मण इत्यस्य समुच्चयः । द्वितीया ब्राह्मण इति सूत्रस्य यत्फलम्ब्राह्मणे द्वितीयायाः सिद्धिरेवेति तदपि विभाषोपसर्ग इति सूत्रेणैव सिध्यतीति ध्वनयितुमपिशब्दः । द्वितीयायाः सिद्धत्वादिति कर्तृकर्मणोरिति सूत्रविहितषष्ठी बाधिकेत्यादिः विभाषापदबोध्यनिषेधः षष्ठ्याः साचाधुना कर्तृकर्मणोरिति सूत्रेणैव ननु दिव इति सूत्रेण द्वितीया ब्राह्मण इति सूत्रसाध्यद्वितीयायाः प्रवृत्तिः कर्मणः कर्मत्वशक्तिमत्त्वेन विवक्षायान्नच तदा दिवस्तदर्थस्येत्यस्य प्राप्तिस्तत्र शेष इत्यस्य सम्बन्धादिति भावः तत् द्वितीया ब्राह्मण इति सूत्रम् उपसर्गानुच्चारणे विभाषोपसर्ग इति सूत्राप्राप्त्या कर्तृकर्मणोरित्यस्य बाधनार्थत्वस्य सूत्रस्यावश्यकत्वात् अप्रवृत्त्येति तत्र शेष इत्यस्यासम्बन्धेनाप्रवृत्त्येत्यर्थात् वैयर्थ्यस्य द्वितीया ब्राह्मणे इति सूत्रे इत्यादिः नच कर्तृकर्मणोरिति सूत्रस्य बाधनार्थमेवास्त्विति वाच्यम् वक्ष्यमाणप्रकारेण तिङन्ते एवास्य सूत्रस्य प्रवृत्त्या तत्र लादेशयोगे नलोकेति निषेधेन कर्तृकर्मणोरित्यस्याप्रवृत्तेः ननु द्वितीया ब्राह्मण इति सूत्रे शेषे

इत्यस्य सम्बन्धेन दिव इति सूत्रबाधनार्थमेव तदस्तित्वाशङ्कान्निराचष्टे नच द्वितीयेति द्वितीयार्थमिति शेषत्वेन विवक्षायामिति शेषः विच्छिन्नत्वेन विभाषोपसर्ग इति सूत्रेणेत्यादिः ननु मण्डूकप्लुत्या तत्र शेष इत्यस्य सम्बन्धो भविष्यतीत्यत आह वक्ष्यमाण इति ननु कृदन्तेन योगे समासाभावार्थं तत्सूत्रमस्त्वित्याशङ्क्याम्परिहरति कृति त्विदमिति तादृशलक्ष्याभावादिति शेषः अत्र हेतुम्प्रदर्शयन् स्वोक्तार्थे भाष्यकारसम्मतिमाह अत एवेति क्त्यप्रवर्तनादेव भाष्यमिति दृश्यत इति शेषः पूर्वेण विभाषोपसर्ग इत्यनेन अत्र लादेशयोगस्य सत्वेन नलोकेतिनिषेधस्य प्रवृत्त्या कर्तृकर्मणोरित्यस्याप्राप्त्या दिव इति सूत्रस्य बाधनार्थमेव द्वितीया ब्राह्मण इति सूत्रमारब्धम् भवन्मते दिव इति सूत्रे शेषपदसम्बन्धेन तस्याप्राप्त्या कर्मणि द्वितीयेत्यनेन द्वितीयायाः सिद्ध्या द्वितीया ब्राह्मण इति सूत्रस्य भवन्मते वैयर्थ्यमिति भावः । भाष्यमात्रन्न प्रमाणङ्किन्तु कैयटोप्युक्तार्थे प्रमाणमित्याशयेनाह दिव इति कैयटश्चेति प्रमाणमिति शेषः मूले ऽत एवेह त्रिसूत्र्यामित्युक्तत्वदनुपपन्नन्तृतीयसूत्रस्येहानुपन्यासादित्यत आह तृतीयस्येति एवञ्चेहेत्यनेन बुद्धिस्था सम्पूर्णा कौमुदी परामृश्यते तस्या आरब्धाया असमाप्तत्वादुदाहरतीति लटो नानुपपत्तिरिति भावः ननु तिङन्तेन समासस्याप्रसक्तत्वेपि तिङन्तप्रकृतिककल्पप्रत्ययान्तेन समासस्याप्रसङ्गो ऽस्त्येवेत्यत आह कल्पबाद्यन्तस्येति न प्रयोग इति अनभिधानादिति शेषः प्रकृतसूत्रे शेषग्रहणासम्बन्धे भाष्यमपि प्रमाणम् तत्रहि हविषो ऽप्रस्थितस्य हविषः प्रस्थितं नेति वक्तव्यम् यदा प्रस्थितत्वेन हविर्विशेष्यते तदा षष्ठी न भवतीत्यर्थः प्रस्थितत्वेन विशेषितं यद्धविस्तद्वाचकात्प्रातिपदिकान्न षष्ठीति फलितम् इन्द्राग्निभ्याञ्छागं हविर्वपाम्मेधः प्रस्थितम्प्रेष्येत्येतदस्योदाहरणभाष्ये अत्र छागमित्यादौ द्वितीया दृश्यते यदि प्रेष्यब्रुवइतिसूत्रस्य शेषत्वविवक्षायामेव प्रवृत्तिस्तदा ऽनेन वार्तिकेनैतत्सूत्राप्रवृत्तिसम्पादनेपि षष्ठी शेष इति सूत्रेण षष्ठ्या दुर्वारत्वेनोदाहरणासङ्गतिः स्यादेव नच वार्तिकारम्भसामर्थ्यात्तस्या अप्ययन्निषेध इति वाच्यम् सामर्थ्यकल्पनापेक्षया शेषग्रहणासम्बन्धे एव लाघवमित्यत्र तात्पर्यात् उभयथा शब्दस्येह भावाभावबोधकत्वन्तु द्वाभ्याम्प्रकाराभ्यामित्यर्थ इति सूचयन्नाह षष्ठीतदभावाविति ननु परमपूले गुणकर्मणि वेष्यत

इत्युक्तत्वादृशी इष्टिश्च कर्तृकर्मणोरिति सूत्रे न दृश्यत इत्यत आह इदञ्चेति तत्रहि अथेह कथंभवितव्यमेतावश्व स्रुघ्नमाहोस्विन्नेतावश्व स्रुघ्नस्येति उभयथा गोणिकापुत्र इत्युक्तम् ननु कर्मणो यद्यविवक्षा तदा कटमित्यस्य कथम्भयोग इत्यत आह तद्धितवृत्तेरिति पश्चात् इन्प्रत्ययोत्पत्त्यनन्तरम् कर्मयोगः । कटादिकर्मयोगः नन्विह कटस्य कृत्प्रकृतिकधात्वर्थोत्पत्त्यनुकूलव्यापारप्रयोज्यफलाश्रयत्वमस्त्येवेति कथं षष्ठी कटशब्दान्न भवति कृद्ग्रहणेन तद्धिते माभूदित्यस्यच कथं लाभ इतिचेदित्थम् प्रकृतसूत्रभाष्ये धातोर्द्वौ यौ प्रत्ययौ विधीयेते तिङः कृतश्च तत्र कृत्प्रयोगे इष्यते तिङ्प्रयोगे प्रतिषिध्यते इत्यनेन कर्मत्वस्य धात्वर्थनिरूपिततया परिशेषात्कृदन्तयोगे एव षष्ठी भविष्यतीति कृद्ग्रहणानर्थक्यप्रतिपाद्य कृतो ये कर्तृकर्मणी तत्र यथास्यात्तद्धितस्य ये कर्तृकर्मणी तत्र माभूदिति कृतपूर्वीकटम् भुक्तपूर्वीओदनमित्युक्तन्तेन विवक्षितो ऽर्थो लभ्यते अयम्भावः एवद्वृत्तिविषय एव सकर्मकस्यापि कृधातोर्भुज्धातोश्च कर्मणो ऽविवक्षया ऽकर्मकत्वं सम्पाद्य ताभ्याभावे प्रत्यये सति ततः समासतद्धितवृत्त्योः प्रवृत्त्यनन्तरङ्कर्मत्वशक्त्यवच्छिन्नान्वयविवक्षास्तीति कटस्य तद्धितान्तशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियानिरूपितकर्मत्वमेवास्ति नतु कृदन्तशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियानिरूपितकर्मत्वमिति नात्र षष्ठी किन्तु द्वितीया कृद्ग्रहणसामर्थ्येन कृदन्तशक्तिग्रहपूर्योज्योपस्थितिविषयकर्तृकर्मणोर्ग्रहणात् तण्डुलानाम्पाचकतर इत्यत्र तद्धिताधिक्यसत्वेपि पाचकादेः पृथक् पूर्योगेण तच्छक्तिग्रहस्यापि सत्वेन तच्छक्तिग्रहपूर्योज्योपस्थितिविषयत्वक्रियाया अस्तीति षष्ठी भवत्येव नचात्र नलोकेति निषेधः शङ्क्यः तस्य पूर्त्यासत्त्या निष्ठान्तशक्तिग्रहोपस्थाप्यक्रियानिरूपितकर्तृकर्मणि निषेधविधायकत्वात् एतद्वृत्तिविषये दृश्यमानपूर्योगसम्बन्धिवृत्तिविषये ननु नपुंसके भावे क्त इति क्तपूर्त्ययेनेष्टस्य सिद्धौ क्लेशेन भावार्थकपूर्त्ययोपपादनमफलमत आह नपुंसक इति अकर्मकेभ्य एवेति सकर्मकस्याविवक्षितकर्मकत्वेनाकर्मत्वं संसाध्य भावे क्तप्रत्ययप्रतिपादनपरभाष्यप्रामाण्यादेवङ्कल्पनात् नन्वेवंसति भ्रान्तन्देशमनेकदुर्गविषमामित्यस्य का गतिरत आह भ्रान्तमिति भ्रम्धातोर्गत्यर्थत्वात् तस्य भावेपि प्रत्ययविधायकत्वङ्कथमत आह तत्सूत्रोपात्तेति चेन तत्सूत्रोपात्तेन चेन अन्यथा तस्य निष्प्रयोजनत्वापत्तिः अपिशब्दः क-

र्तृकर्मणोः समुच्चायकः अत एवाजर्यं सङ्गतमिति सौत्रनिर्देशः सङ्गच्छते । ननु नपुंसके भावे क्तस्य योगे षष्ठ्युपसङ्ख्यानमिति वार्तिकेन गतन्तिरश्चीनमनूरुसारथेरित्यत्र कर्तरि षष्ठीवद्भ्रान्तं देशमित्यत्रापि कर्मणि देशशब्दात् षष्ठी स्यात् । यदितु शेषत्वविवक्षया षष्ठीसाधनेन तस्य वार्तिकस्य प्रत्याख्यानपक्षस्तदा ऽनूरुसारथिशब्दादिव भ्रान्तन्देशमित्यत्र देशशब्दादपि शेषत्वविवक्षया षष्ठ्या आपत्तिरितिचेन्न प्रकृतसूत्रस्थभाष्यप्रामाण्येन नपुंसकत्वविशिष्टे भावे क्तप्रत्ययो ऽकर्मकेभ्य एवेति सामान्यतो न नियमः किन्तु नपुंसके भावे क्त इत्यनेन क्तो ऽकर्मकेभ्य एवेति नियम्यते गतन्तिरश्चीनमित्यत्राविवक्षितकर्मकत्वेनाकर्मकाद्गमधातोर्नपुंसके भावे क्त इत्यनेनैव क्तः अत एवानूरुसारथिशब्दात्षष्ठी नपुंसके भावे क्तस्य योगे षष्ठ्या उपसङ्ख्यानमिति वार्तिके प्रतिपदोक्तत्वान्नपुंसके भाव इति विहितक्तस्यैव ग्रहणमिति सर्वं सामञ्जसं स्यात् नन्वेवन्तर्हि गतन्तिरश्चीनमितिवदत्रापि नपुंसके भावे क्तो दुर्वार इतिचेन्न कृतपूर्वीकटम्भुक्तपुर्वीओदनमित्येतद्वृत्तिविषय एवायम्भागकर्मकः पश्चात्तस्य कर्मसम्बन्धेनैतच्छास्त्रीयकर्मसंज्ञकार्थानन्वय्यर्थकत्वरूपाकर्मकत्वाभावेन तस्यात्राप्राप्तेरिति ण इति तस्य विकल्पेन शप्रत्ययविधायकतया तदभावे श्याद्व्यधेति सूत्रेणाकारान्तलक्षणो ण इत्यर्थः प्रमादादिति नच पाघ्राध्माधेडिति शप्रत्यये तथा भविष्यतीति वाच्यम् तस्मिन्कर्तरि शपि तस्य जुहोत्यादिभ्य इति श्लौ द्वित्वे दधैरिति स्यादिति भावः पचादित्वेनाचि धाभिरिति धैरिति स्यात् अत्रामोदशब्दात्कर्तृकर्मणोरिति षष्ठी कुतो नेति पृश्नः आमोदस्य गुणत्वाद्द्रव्याकाङ्क्षाशान्तये आह पुष्पादीनामिति अभिमानपदोपादानसूचितामरुचिम्प्रकटयति यदित्वामोदमिति जयमङ्गलाख्यातरीत्येति 'ददैर्दुःखस्य मादृग्भ्यो धायैरामोदमुत्तमम् लिम्पैरिव तनोर्वातैश्चेतयः स्याज्ज्वलो न क इति' पद्यम् इदञ्च तत्रैव व्याख्यातम् मादृग्भ्यो दुःखन्ददद्भिरुत्तमामोदम्पुष्पादीनाङ्गृहीत्वा मादृशां दत्तस्य दुःखस्य पोषकैर्मादृशां शरीरं लिम्पद्भिरिव वातैः को मादृग् विरहाग्निव्याप्तश्चेतयः चेतयन् ज्वलः ज्वलन्निव न स्यादिति दाधातोः पोषणार्थाद्धात्रश्च ददातिदधात्योर्विभाषेति शणौ लिम्पेःशः ज्वलेर्णः न काप्यनुपपत्तिरिति अध्याहियमाणस्य गृहीत्वेत्यस्यामोदपदार्थः कर्मोति नलोकेतिषष्ठीनिषेधात्कर्मणि द्वितीया भवति एतेन आमोदम्मगृह्य धायैरित्यर्थविवक्षायाम्भासादात्पेक्षत

इत्यत्रैव ल्यब्लोप इति वचनेनामोदशब्दात्पञ्चम्या आपत्तिरिति कस्यचिदुक्तिः पूत्युक्ता गृहीत्वाशब्दस्यैवात्राध्याहारात् ल्यब्लोपे कर्मण्यधिकरण इति पञ्चमीतु ल्यबन्तं विना तदर्थावगतिर्यत्र तद्विषयम् प्रकृतेतु ल्यबन्तं विना आमोदस्य धात्वर्थकर्मत्वस्य झटिति प्रतीतिरिति न तेन पञ्चमीप्राप्तिः अत एवाजघ्रे विषमविलोचनस्य वक्ष इत्यत्र वक्षस्शब्दान्न पञ्चमी तदर्हमिति निर्देशस्य वक्ष्यमाणरीत्योपपत्तेरनित्यत्वज्ञापकत्वेनाशङ्कां वारयति अथभाव इत्यादिना तत्रैव सप्तम्यन्तादिवार्थे वतिः तस्य षष्ठ्यन्तादिवार्थे वतिः अर्हम् तस्येत्यनुवर्तते शब्दाधिकारोत्र एवञ्चेदं कर्मषष्ठ्यन्तमिति तत्कर्मकार्हणकर्तरि वतिरित्यर्थः एवं योगविभागे गौरवपरिहारायाह तास्य भाव इत्यत्रेति चस्त्वर्थे असमस्तेति इदन्द्वितीयान्तत्वस्य स्फोरणाय यदुक्तमाग्वक्ष्यमाणरीत्येति तामाह एतेनेति निरस्तमित्यन्वयः तदिति द्वितीयान्तम् अर्हमिति पचाद्यजन्तम् नच तदर्हमिति निर्देशस्य सौत्रत्वेनोपपत्तिरास्त्विति वाच्यम् सौत्रत्वकल्पनापेक्षया ऽनेकप्रयोगसाधकानित्यत्वकल्पनस्य न्याय्यत्वादिति भावः अत एव तदित्यस्य द्वितीयान्तत्वादेव षष्ठ्यन्तत्वेतु षष्ठी समर्थादिति स्यात् अत एव विधिमर्हतीति विग्रहः तत्फलन्तु असमस्तद्वितीयान्तत्वफलन्तु मूले ऽत्राहुरित्युपादानमरुचिबोधनाय तात्पर्यकटयति भाष्येत्विति एतत् अनित्यत्वम् नेति भट्टिप्रयोगस्योक्तरीत्योपपत्तिः तदर्हमितितु कर्मोपपदाण्प्रत्ययान्तम् किञ्चोक्तरीत्या योगविभागेन व्याख्याने यद्यपि पुनस्तस्येत्यस्यानुपादाने शब्दलाघवन्तथापि तस्येत्यत्र स्वरितत्वस्य निर्हेतुकशब्दाधिकारस्यचाश्रयणमिति ज्ञानजनकमनोव्यापारस्य गौरवमस्त्येवेति मूले लश्येति पृथक्कृत्वा विग्रहघटकत्वेन प्रदर्शितम् लश्च उश्च उकश्चेतितु नोक्तम् इण्डिशीनामिति न्यायेन रूपासिद्धिप्रसङ्गादत एवाह ऊकौचेतीति अव्ययपदमुक्तद्वन्द्वघटकमिति भ्रमवारणायाह अव्ययमिति ननु यदुच्चारेण तदन्तविधिस्तदाहारिं दिदृक्षुरित्यत्र न स्यादत आह व्यपदेशिवद्भावेनेति सर्वोयङ्कारकषष्ठ्याः प्रतिषेध इति कथनेन शेषषष्ठ्यनङ्गीकारे दुरापशब्दस्य खल्प्रत्ययान्ततया षष्ठी न स्यादिति भावः इक्ष्वाकूणान्दुराप इत्यादीनां शेषत्वविवक्षया साधनन्दुर्वलमिति सूचयन्नाह नन्विति वार्तिकादिति षष्ठीतिनिषेधस्य बाधकादिति शेषः तत्प्रत्याख्यान इति शेषत्वविवक्षयेत्यादिः सा नेति शेषत्वविवक्षा नेत्यर्थः

आरम्भप्रत्याख्यानयोः फलैक्यायैवमेव कल्पनादिति भावः तत्रार्थे प्रमाणान्तरमाह पूरणेत्यादि ध्वनितमिति तत्रहि सति किमुदाहरणम् ब्राह्मणस्य कुर्वन् नैतदस्ति कारकषष्ठ्या निषेधात् शेषषष्ठ्यान्तु ब्राह्मणस्य कटमित्यर्थेनासामर्थ्यात्सतीति व्यर्थमित्युक्तम् यदि कारकषष्ठीविषयेपि शेषत्वविवक्षा स्यात्तदा कुर्वन्नित्येतद्योगेपि शेषत्वविवक्षा सम्भवतीति कटादियोगेनासामर्थ्यप्रदर्शनमसङ्गतं स्यात्तेनेदन्ध्वनितमित्यर्थः यदि स्फुटोपमामित्यत्रोपमाशब्दः कर्मोऽन्तस्यात्तदा भूतिसितेन शम्भुनेति करणवतीयैव युक्ता कारकविभक्तेर्बलवत्वादत आह स्फुटोपमेति भावसाधन इति भावे ऽभिधेये प्रत्यय इति भावः साधनत्वेन व्यपदिश्यते एवञ्च भावे ऽङ्प्रत्ययस्तत्प्रकृत्यर्थोपमानक्रियायान्नारदस्य शाब्दो ऽन्वयः शम्भोश्चार्थः तुल्यार्थैरतुलोपमाभ्यामित्यत्रतु तुलोपमाशब्दौ कर्मसाधनाऽन्तौ सादृश्यानुयोगिवाचकौ सादृश्यमेतयोः प्रवृत्तिनिमित्तमिति बोध्यम् इति षष्ठीविवरणम् ननु चकाराद्दूरान्तिकार्थेभ्यो ऽधिकरणे सप्तमीविधानेपि कथं विभक्तिचतुष्टयमत आह सप्तम्यधीति सिद्धत्वादिति एतेन तत्र न चकारेण सप्तमीविधानं किन्तु प्रथमोपस्थितिकत्वेन प्रातिपदिकार्थस्यान्तरङ्गत्वात्तत्र सप्तमी विधीयते साच कस्मादित्याकाङ्क्षायाम्पूर्वसूत्रेण दूरान्तिकार्थेभ्य इत्यस्योपस्थानात्तेभ्यः सप्तमीत्यस्य लाभः अत एवाह प्रागुक्ता इति ननु प्रातिपदिकार्थेति सूत्रस्य परत्वात्तेन परत्वाद्बाधिका प्रथमैव स्यादिति कथञ्चतस्रो विभक्तय इत्यत आह इयञ्चेति अपीति तेनान्तरङ्गायाः समुच्चयः एतेभ्यो ऽधिकरणकारकेपि सप्तमी भवति प्रथमायास्तत्र मात्रपदेन व्यावृत्तेः मूले त्रैविध्यमाधारस्य दर्शितन्तत्र सम्मतिरुक्ता संहितायामितीति ननु प्रवृत्तिनिमित्तमधिकरणशब्दस्याधिकरणत्वमेव तच्चैकमिति कथमाधारस्य त्रैविध्यमितिचेन्न आधारतायाः सम्बन्धावच्छिन्नत्वनियमेनोपकारकसम्बन्धभेदादधिकरणं त्रिविधमित्युच्यते यत्राधारत्वाभिमतपदार्थीयय-त्किञ्चिदवयवावच्छेदेन संयोगे सति कर्तृकर्मसमवेतक्रियानिरूपिताधारत्वविवक्षास्ति सः यत्रवा उप समीपे श्लेष इति व्युत्पत्त्या व्यवहितसामीप्यसम्बन्धावच्छिन्नाधेयतानिरूपितकर्तृकर्मसमवेतक्रियानिरूपिताधारत्वस्य विवक्षास्ति सच औपश्लेषिकाधार इत्युच्यते अत एव भृत्येभ्यो यन्मासिकन्दीयते तत्र मासे दीयते मासिकमिति व्युत्पत्तिस्तत्रच दीयत इति

सूत्रसम्मता भवति अत्र बुद्धिस्थदिवसपरिच्छिन्नमासस्य दाधात्वर्थफलविशिष्टाधारकालस्यचोपश्लेषोस्तीति मास औपश्लेषिकमधिकरणम् मासे ऽतिक्रान्ते दीयते उत्तरकाले दीयते इत्यर्थः स्पष्टप्रतिपत्तये क्रियते फलितार्थसूचनाय ननु संयोगसमवायान्यतरसम्बन्धेन यः कर्तृकर्मव्यवहितक्रियाधारस्तत्र रूढिसत्वाद्योगार्थमादाय सामीप्यमादाय व्यवहितस्य कथङ्ग्रहणमितिचेन्न । गङ्गायां गावः कूपे गर्गकुलमिति भाष्यकारीयव्यवहारबलेन तस्यापि ग्रहणात् अत एवैको यणचीत्यादिसूत्राणामनुपस्थिलष्टस्येक इत्यर्थविवरणं सुष्ठु सङ्गच्छते अत एव चशब्दस्य शब्देन कोन्यो ऽभिसम्बन्धो भवितुमर्हति अन्यदत्तः उपश्लेषादिति भाष्योक्तिरप्युपपद्यते साक्षाक्रियाधारस्य कर्मकर्तृसंज्ञा ऽधिकरणसंज्ञाया बाधिका भवतीति परम्परया क्रियाधारस्य सा भवति साच परम्परा क्वचित्संयोगघटिता क्वचित्समवायघटिता क्वचित्तदन्यतरातिरिक्तविशेषणतासम्बन्धघटिता आद्या कटे शेते स्थाल्यान्तण्डुलं पचतीत्यादौ पटे शौक्लयन्द्रव्यादिषु जातिरित्यादौ द्वितीया तृतीयातु घटाभावे पटाभाव इत्यादौ तदुक्तं हरिणा 'कर्तृकर्मव्यवहितामसाक्षाद्धारयक्रियाम् उपकुर्वक्रियासिद्धौ शास्त्रे ऽधिकरणं स्मृतमिति' अत्र व्यवहितामित्युक्तेप्यसाक्षादित्युक्तिः परम्परयैवान्वयसूचनाय अत एवाक्षेषु शौण्ड इति विग्रहे सप्तमी शौण्डैरिति समासः वैषयिकाधारस्तु मोक्षे इच्छास्तीत्यादौ यत्र सर्वावयवावच्छेदेन सम्बन्धोस्ति स एवाभिव्यापकाधार इत्युच्यते तिलेषु तैलमन्दध्नि सर्पिरित्यादौ यथा अत्रायं विशेषः इच्छा इत्यादौ धात्वर्थेच्छाविषयता यदा मोक्षस्य विवक्षिता तदा मोक्षमिच्छतीत्येवान्तरङ्गत्वेन कर्मसंज्ञया भवति यदातु प्रत्ययार्थसिद्धावस्थापन्नार्थविषयता मोक्षस्य विवक्षिता तदा मोक्षे इच्छास्तीति भवति अत्रापि प्रकृत्यर्थसाध्येच्छाविषयत्वविवक्षायाङ्कर्मणि षष्ठी भवति अधिकमन्यत्र द्रष्टव्यम् । क्तस्येनविषयस्य कर्मण्युपसङ्ख्यानमित्यत्र विषयशब्दो वृत्तिभूमिपरत्वेन मूले व्याख्यातस्तदर्थङ्कथयितुमाह यत् क्तान्तेति यत् क्तान्तार्थेत्यर्थः वार्त्तिके क्तशब्दः क्तान्तपरः एवमिनशब्दोपि तदन्तपरः विषयशब्दो वृत्तिभूमिपरः एतदर्थः परार्थाभिधायकत्वाश्रयः एवञ्चेन्नन्तः शब्दः परार्थाभिधायकत्वाश्रयो यस्य क्तान्तार्थस्येत्यर्थः फलितः यस्येत्यत्र षष्ठ्यर्थो निरूप्यनिरूपकभावः यत् क्तान्तार्थनिरूपिताभिन्नपरार्थाभिधायकत्वा-

श्रय इन्नन्तः शब्दस्तस्य क्तान्तस्य कर्मणि सप्तमी भवतीत्यर्थः सिद्धः एवञ्चहुव्रीहिपर्यन्तधावने फलाभावाद्विषयशब्दस्य देशवाचकत्वेन प्रसिद्धत्वात्प्रकृतिरेव देशपरत्वेन गृह्यत इत्याशयेन व्याचष्टे इनोविषयेति एवञ्च बहुव्रीह्यपेक्षया षष्ठीतत्पुरुषे लाघवमिति भावः अधीती व्याकरण इति शब्दाद्भूतकालिकव्याकरणकर्मकाध्ययनकर्तेतियोधः इन्विषयस्य कर्मणीत्यत्र कर्मशब्दः कालादिभिन्नकर्मबोधकः तेन मासमधीती व्याकरण इत्यस्योपपत्तिः । निमित्तात्कर्मयोगे अत्र निमित्तपदङ्क्रियाजनकप्रवृत्तिकारणज्ञानविषयलाक्षणिकम् फलज्ञानस्यच प्रवृत्तिहेतुत्वस्यसिद्धत्वेत्यभिप्रायेण परममूले निमित्तमिह फलमित्युक्तम् कर्मयोग इत्यस्य क्रियाकर्मणा योगः सम्बन्धस्तस्मिन्नित्यर्थः सतीति शेषः फलञ्चर्मणि द्वीपिनमित्यादौ सप्तम्यर्थः तस्य फलत्वन्तु हननक्रियायास्तल्लाभेच्छाधीनत्वाद्बोध्यम् एवञ्च चर्मणि द्वीपिनं हन्तीतिशब्दाच्चर्महेतुकं यद्द्वीपिकर्मकं हननन्तद्विशेष्यकः कर्तृप्रकारकः शाब्दबोधः अत्र परममूले हेतुवृतीयेत्यभिधानं हेताविति सूत्रे फलस्यापि हेतुपदेन ग्रहणमित्यभिप्रायेण एवञ्च फलार्थकत्वमपि हननस्य सम्भवतीत्याशयेनाह मूले तादर्थ्यचतुर्थ्यर्थीति एतदेव प्रकटयति फलस्येति चर्मणि द्वीपिनं हन्तीत्यत्र सिम्नि पुष्कलको हत इत्यत्र पुष्कलकशब्दस्याण्डकोशार्थकत्वे कर्मणा योगः समवायः दन्तयोर्हन्ति कुञ्जरमित्यत्र केशेषु चमरीं हन्ति इत्यत्र पुष्कलकशब्दस्य शंकुपरत्वे सीमशब्दस्य परिच्छिन्नदेशपरत्वेच संयोगात्मकः कर्मयोगो बोध्यः यस्यच भावेन भावलक्षणमित्यत्र भावशब्दः क्रियाया बोधकः एवञ्च यत्सम्बन्धिक्रियया यस्य क्रिया लक्ष्यते ततः सप्तमीत्यर्थः नन्वस्य सूत्रस्य यत्र क्रिययोर्ज्ञाप्यज्ञापकभावरूपलक्ष्यलक्षणभावस्तत्रैवचेत्प्रवृत्तिस्तदा ह्यत्र ज्ञापकत्वोपपादिका भूयोदर्शनादिघटिता सामग्री सम्भवति तत्रैव प्रवृत्तिः स्यान्नत्वन्यत्रेत्याशयेन शङ्कते नन्विति भूयोदर्शनाश्रयः साध्यसाधनयोः सामानाधिकरण्यस्य भूयांसि यानि दर्शनानि तत्प्रयोज्यः यथा वन्हिधूमयोः नन्वस्तु भूयोदर्शनाश्रयत्वङ्किन्त्विच्छिन्नमत आह ततश्चेति तदङ्गीकारेचेत्यर्थः प्रकृते गोषु दुह्यमानासु गत इत्यादौ इदं वाक्यङ्गृहिणमति आगन्तुकपुरुषकर्तृकगमनक्रियोत्पत्त्यधिकरणकालज्ञानेच्छया आगन्तुकः कदा गत इति यः प्रश्नस्तस्योत्तरभूतम् एवञ्चात्र न निरुक्तभूयोदर्शनसम्भव इत्याह कदाचि-

द्धीति मूले निर्ज्ञातकालेति बहुव्रीहिः क्रिया अन्यपदार्थः एवञ्च निर्ज्ञातकाला या दोहनक्रिया सा अनिर्ज्ञातकाला या गमनक्रिया तस्या लक्षणञ्चवति मूलस्थ न्यूनताम्परिहर्तुमाह कालो देशस्येति एवञ्च निर्ज्ञातदेशा क्रिया अनिर्ज्ञातदेशाया लक्षणमिति बोध्यम् । एवञ्च तत्तच्छब्दबोध्यत्वेन विवक्षितं यज्ज्ञापकत्वन्तदेतच्छास्त्रप्रवृत्तिप्रयोजकत्वन्नत्वत्र भूयोदर्शनापेक्षेति तात्पर्यम् सति गुण इति अत्र गुणसत्वक्रियाधिकरणदेशः पृथिव्यादिर्ज्ञात इति गुणसत्वक्रिया द्रव्यत्वसत्वक्रियाया लक्षणम् यत्सम्बन्धिक्रियेत्यत्र यत्पदबोध्यः क्वचित्कर्म क्वचित्कर्ता अत एवोक्तम्मूले तदाश्रययोः कर्तृकर्मणोरिति कर्तुः कर्मणश्च यदुदाहरणन्तत्र तयोः कृदन्तबोध्यत्वात्प्राधान्यङ् क्रियायास्तु विशेषणत्वमिति प्रधानयोरेव लक्षणत्वप्रतीतिरित्याशयेनोक्तमिहेति कर्तृकर्मबोधकप्रत्ययान्तघटितोदाहरणद्वये प्रतीयमानमिति उभयत्र सप्तम्यर्थो ज्ञाप्यज्ञापकभावः दोहनादिक्रियाधिकरणकालसम्बन्धश्च तस्य प्रकारत्वमते गोष्वित्यादिवाक्यादुर्तमानकालावच्छिन्नव्यापारजन्यदोहनाश्रयगोनिष्ठज्ञापकतानिरूपितज्ञाप्यताविशिष्टो दोहनाधिकरणकालसम्बन्धविशिष्टव्यापारजन्यगमनाश्रयश्चैत्र इत्यादिक्रमेण बोध्यः सप्तम्यर्थस्य संसर्गत्वमतेचोक्तोभयसम्बन्धेन तादृशगवीविशिष्टगमनकर्त्रभिन्नश्चैत्र इत्यादिक्रमेण बोध्यः न द्रव्ययोरेव ज्ञाप्यज्ञापकभावः किन्तु क्रियाविशिष्टयोरेव अन्यथा गोषु चैत्र इति शब्दादपि गोज्ञाप्यश्चैत्र इति बोधः स्यात् एवञ्च यद्धर्मविशिष्टयोस्तथात्वसम्भवस्तद्धर्मयोरेव ज्ञाप्यज्ञापकभावो मानसज्ञानविषयः व्यञ्जनाया अपि वृत्तित्वमते शाब्दबोधविषयो वेत्याशयेनोक्तं विशेषणीभूतयोरित्यादि अत एवोक्तं सूत्रकृता यस्यच भावेनेति तद्विवरणे निर्ज्ञातकालेति स कालो यदि प्रातःसमयरूपस्तदा तस्यैव पक्षत्वं कालिकसम्बन्धेन गमनक्रियाविशिष्टस्य साध्यता कालिकसम्बन्धेनैव दोहनकर्माभिन्नगवीनां हेतुता बोध्या विशेषणांशे पर्यवसानविषये दृष्टान्तमाह शिखी ध्वस्त इत्यादाविति इदम्पर्यवसानं यदा शिखाविशिष्टस्य पुरुषस्य जीवननिश्चयस्तस्मिन्समये भवति ननु क्रियाया एव लक्षकत्वं सूत्रकृतोक्तमिति तत्र पर्यवसानोक्तिरयुक्तेत्यत आह विशिष्टवेषेणेति अभेदसम्बन्धेन गमनादिक्रियाविशिष्टगवादिनिष्ठतादृशगोत्वादिनेत्यर्थः । धातूपस्थाप्यक्रियायाः साक्षादेव ज्ञापकत्वं वक्तुमशक्यम् अ-

सत्वभूतत्वात् किन्त्वाश्रयद्वारैवात एव तदाश्रयद्वारेणेति मूले ऽभिहितम् एतेन क्रिययोः साक्षात्तदाश्रययोस्तद्द्वारेति कस्यचिदुक्तिर्निरस्ता इदञ्च सूत्रं यत्र मानान्तरसिद्धस्यार्थस्य कालदेशान्यतरघटितसम्बन्धेन फलविशेषणसम्बन्धस्य प्रतिपादनाय प्रयोगस्तत्रैव प्रवर्तते अत्रेदम्बोध्यम् काचिक्रिया स्वाधारकालावच्छिन्नामन्यां क्रियां लक्षयति यथा गोषु दुह्यमानासु गत इत्यादौ काचित्स्वाधारकालाव्यवहितपूर्वकालावच्छिन्नामन्यां लक्षयति यथा गोषु धोक्ष्यमाणास्वागतश्चैत्र इत्यादौ काचित्तु स्वाधारकालानन्तरकालावच्छिन्नामन्यां क्रियां लक्षयति । यथा गोषु दुग्धासु गत इत्यादौ लक्षकक्रियाश्रयवाचकत्वन्द्वयोरपि गोशब्ददुह्यमानशब्दयोरित्युभाभ्यां सप्तमी ननु यत्र क्रियावाचकम्पदन्न प्रयुज्यते विवाहे नान्दीमुखङ् कुर्यादित्यादौ तत्र कथं सप्तमीतिचेदित्थम् अत्र विवाहपदस्य विवाहप्राक्काले लाक्षणिकत्वात् सप्तम्यधिकरणेचेति सप्तमी राहूपरागे स्नायादित्यादौ राहूपरागपदस्य राहूपरागकाले लक्षणा तस्य सप्तम्यर्थाधारतायामन्वयस्तस्यास्तु स्वनिरूपिताधेयतासम्बन्धेन स्नाधात्वर्थे ऽन्वये सिद्धसाध्यसमभिव्याहारन्यायेन राहूपरागस्नानयोर्निमित्तनिमित्तिभावे पर्यवसानम् 'अङ्गवङ्गकलिङ्गेषु सौराष्ट्रमगधेषुच तीर्थयात्रां विना गत्वा पुनःसंस्कारमर्हति' अत्राङ्गादिपदमङ्गादिदेशपरम् अधिकरण एव सप्तमी तस्य गमने ऽन्वयः तस्य स्वसमानकर्तृकत्वस्वोत्तरकालिकत्वोभयसम्बन्धेन पुनःसंस्कारयोग्यतायामन्वयो ऽवच्छेदकावच्छेदेनेति तत्तद्देशगमनस्य पुनःसंस्कारनिमित्तत्वम्फलति 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्तेचास्य कर्माणि तस्मिन्दृष्टे परावरे' परं हिरण्यगर्भादि अवरं यस्मात्तस्मिन् ब्रह्मणि दृष्टे तद्विषयकदर्शने अहम्ब्रह्मास्मीत्याकारकापरोक्षज्ञाने ईदृशज्ञानोत्तरकाले ऽस्य द्रष्टुः पुरुषस्य हृदयग्रन्थिर्मिथ्याज्ञानजन्यसंस्कारो भिद्यते सर्वसंशयास्तादृशसंस्कारप्रभवसंशयाश्छिद्यन्ते जाता नश्यन्ति पुनरुत्पत्तिस्तु तेषान्न भवति सामग्र्यभावात् । अत एव सर्वपदम् अस्य कर्माणि सञ्चितान्यदृष्टानि क्षीयन्ते नश्यन्ति प्रारब्धानान्तु भोगान्निवृत्तिर्भवतीत्यर्थः दृष्टपदन्तादृशदर्शनोत्तरकाललाक्षणिकमौपश्लेषिकाधारे एव सप्तमी मासिकादौ यथा तथैव बोध्या एवं हृदयग्रन्थिशब्देन संगभयद्वेषमोहशोकादि यद्यत् तत्सर्वं ग्राह्यम् अविद्याया नाशे तत्कार्याणान्नाशात्

भिद्यत इत्यत्र कर्मकर्तरि लट् मूले वृक्षे न कपिसंयोग इत्यत्र मूलपदात्सप्तम्यप्यौपश्लेषिकाधारे अवच्छेदकतासम्बन्धस्याप्याधारतानियामकत्वात् अत एव शिरसि वेदनापादे मे सुखमिति व्यवहारः यथायथमवधातव्यम् अत्रेदम्बोध्यम् उक्तत्रिविधाधिकरणेषु मुख्यमधिकरणमभिव्याप्तिकं सर्वावयवावच्छेदेन यत्राधेयस्य सम्बन्धस्तदेव अत एव स्खरितेनाधिकार इति सूत्रभाष्ये आचार्यः किमधिकरणं न्याय्यम्मन्यते यत्र कृत्स्न आधारात्म व्याप्त इत्युक्तम् अस्य न्याय्यत्वन्तु प्रकृत्यर्थतावच्छेदकविशिष्टे तज्ज्ञानाद्भवति अन्यदधिकरणङ्गौणम् सप्तमीतु सर्वस्मिन्नप्यधिकरणे सप्तम्यधिकरणचेत्यत्राधिकरणपदे स्खरितत्वप्रतिज्ञानाद्भवति अत एव गङ्गायाङ्घावः कूपे गर्गकुलमित्यत्र गौणाधारे सप्तम्युदाहृता भाष्ये पञ्चमी विभक्ते यतश्च निर्द्धारणमित्यनुवर्तते अत्र विभक्तशब्दार्थो भेदः एवञ्च यतो निर्द्धारणम्भेदश्च ततः पञ्चमीत्यर्थः यत्र निर्द्धारणन्तत्र भेदस्य सर्वत्र सत्वाद्विभक्तग्रहणसामर्थ्याद्भेद एवेति नियमलाभः भेद एवेत्यस्य भिन्नधर्मप्रकारकप्रतीतिविशेष्यत्वमेव एवकारेणाभेदस्य व्यवच्छेदः सच निर्द्धार्यमाणस्य क्वापि नास्तीति नियमप्रदर्शनवैयर्थ्यमाप्नोतीत्याकाङ्क्षायामाह मूले नतु शब्दान्तरेति तदुदाहरणं स्पष्टप्रतिपत्तये आह गवामिति उक्तस्य विभक्तपदार्थस्य सत्वमुदाहरणे प्रदर्शितम्मूले नह्यत्रेत्यादिना यत्र सामान्यविशेषभावस्तत्र विशेषस्य सामान्यधर्मावच्छिन्नत्वमस्त्येव प्रकृतेतु निर्द्धार्यमाणेषु पाटलिपुत्रकत्वन्नास्तीति भेदस्यैव सत्वमावश्यकमिति भावः अत्र पञ्चम्यर्थो निर्द्धारणविषयत्वम् पाटलिपुत्रकावधिकनिर्द्धारणविषया माथुरा आढ्यतरा इति बोधः साधुनिपुणाभ्यामितिसूत्रस्थस्यार्चायामित्यस्य व्यावर्त्यप्रदर्शनसमये साधुशब्दम्परित्यज्य निपुणशब्द एवोक्तस्तद्बीजमाह वार्तिकादितीति नन्वेवं साधुर्भृत्यो राज्ञ इत्यस्य वृत्तिप्रदर्शितप्रयोगस्य कथमुपपत्तिरत आह साधुर्भृत्य इति । नन्वेवमन्यविषयकमपि साधुत्वङ्गम्येतेत्यत आह प्रत्यासत्त्येति एवञ्च यद्विषयकसाधुत्वं शब्दतो बुध्यते तद्वाचकादेव वार्तिकेन सप्तमीति भावः अत एव तत्र वार्तिके प्रकृष्टयोगात्मकप्रयोगग्रहणम् ननु यदि साधुशब्दार्थस्यार्थिको योगो राजनि गम्यत इति भवत्सम्मतन्तदा वृत्तिप्रदर्शितस्यथमोपस्थितं साधुर्भृत्यो राज्ञ इति प्रत्युदाहरणमपि सम्यगेव प्रकृतसूत्रे ऽर्चायामित्यस्याभावे साधुनि-

पुणाभ्यामिति तृतीयया योगमात्राक्षेपादिति तत्त्यागानौचित्यमेवेत्यत आह अर्चायाम्प्रतियोग इति साधुर्मातरम्प्रतिपर्यनु इत्यत्र यदा ऽर्चा विवक्षिता तदा मातृशब्दात्सप्तमी प्राप्ता परन्तु प्रतियोगसत्त्वान्न भवति एतेन प्रकृतसूत्रे साधुग्रहणमनर्थकम् साधुशब्दप्रयोगे साध्वसाधुप्रयोग इति वार्तिकेन सप्तम्या दुर्वारत्वादिति कस्यचिदुक्तिः प्रत्युक्ता प्रकृतसूत्रे पुनः साधुशब्दोपादानसामर्थ्यात्प्रत्यादिभिर्योगे साधुशब्दे प्रकृतसूत्रेण वार्तिकेनवा प्राप्ता सप्तमी न भवतीति भावः अप्रतेरिति शब्दे समस्तः प्रतिशब्दो लक्षणेत्थम्भूतेति कर्मप्रवचनीयसंज्ञाघटकप्रत्यादिलाक्षणिक इत्याशयेन वार्तिककृतोक्तमप्रत्यादिभिरिति नन्वेवंसति प्रकृतसूत्र एव साधुशब्दोपादानमस्तु प्रत्यादियोगाभावे प्रकृतसूत्रेणैव साधुशब्दप्रयोगे सप्तम्याः सिद्धौ वार्तिके साधुग्रहणमनर्थकमितिचेन्न साधुः ऋष्णो मातरीत्यत्र तत्त्वकथने ऽर्चाया अभावे ऽपि सप्तमीसिद्ध्यर्थत्वस्य सत्त्वात् एवञ्च प्रकृतसूत्रे ऽर्चाग्रहणन्निपुणार्थमेवेति ध्वनयन्नाह तत्त्वमिति अत एव सप्तम्यधिकरणेचेतिसूत्रस्थसाध्वसाधुप्रयोग इति वार्तिकव्याख्यानावसरे साधुनिपुणाभ्यां सप्तम्यां सिद्धायामनर्चार्थमत्र साधुग्रहणन्तेन तत्त्वकथने साधुशब्दयोगे सप्तमी भवति अर्चायग्रहणन्तु तत्र निपुणविशेषणार्थमेवेति कैयटः सङ्गच्छते मूले प्रसितोत्सुकाभ्याम् एतद्व्याख्यानावसरे तत्परे प्रसितासक्तावित्यमरप्रदर्शनं रूढस्यैव प्रसितशब्दस्य ग्रहणन्नतु यौगिकस्येति प्रदर्शनायेत्याशयेनाह रूढत्वादिति प्रसिद्धत्वादित्यर्थः रूढियोगमपहरतीति न्यायस्यापि प्रसिद्धत्व एव तात्पर्यम् एतदर्थस्य एतदर्थकस्य सितशब्दो गौरवाची इत्यर्थे इति सतीति शेषः परममूले यस्मादधिकं यस्यचेश्वरवचनमिति सूत्रस्य व्याख्यानम्मङ्गलाय मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्त इति भाष्यात् तत्र यस्यचेश्वरवचनमितिशब्दस्य यस्य स्वस्य ईश्वरः कथ्यते तद्वाचकादित्यर्थे स्ववाचकात्सप्तमी यदात्वीश्वरशब्दो भावप्रधाननिर्देशेनेश्वरत्ववचनस्तदा स्वामिवाचकात्सा भवति अधिभुवि रामः अधिरामे भूरित्यत्र यथा। इति सप्तमीविवरणम् ॥ इति श्रीमहामहोपाध्यायभैरवमिश्रविरचितायां शब्दरत्नव्याख्यायां कारकान्तं प्रकरणं सम्पूर्णम् ॥

इति शम्।